नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः - २१

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः

नमो नमो निम्मल दंसणस्स

श्री आनंद-क्षमा-ललित सुशील सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भाग : २१ व्यवहार-छेदसूत्रम्-(१)

पीठिका एवं उद्देशकः १...३

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं

मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-

''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,

फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,

अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहार छेद सूत्रस्य विषयानुक्रमः

भागः २१, पीठिका एवं उद्देशकः १...३

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
—	पीठिका	३	३६-६५	उद्देशकः-२	३०४
.	मङ्गलं प्रस्तावना			प्रायश्चितकालं किञ्चित्	
	व्यवहार-शब्दाथः			वक्तव्यता	
	प्रायश्चित-द्वारं			गणावच्छेदकरणे निषेधः	
	नय व्यवहारः			गणावच्छेदक पद	
	आलोचना, प्रति क्रमण,			आचार्य उपाध्याय पद	
	आदि प्रायश्चितानि			परिहार कल्पस्य आहार	
	विनय प्ररुपणा			व्यवहार आदिः	
	प्रायश्चित्दानविधिः			स्थविर-वैयावृत्यम्	

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
१-३५	उद्देशकः-१	६६	६६-९४	उद्देशकः- ३	३९२
	आलोचना प्रायश्चित्			गण-अधिपति विधिः	
	परिहार कल्पस्थितस्य–			उपाध्याय पद विधान	
	विधिः			आचार्य उपाध्याय पदे	
	गण प्रवेश विषयक विधानानि			आचार्य-उपाध्याय–	
	पुनः प्रवज्या विधानं			गणावच्छेदक पदं	
	आलोचना करणे विधिः			मैथुनसेवी एवं मृषावादी	

उद्देशक :- ४.....१० आगामी भागे वर्तते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स
पञ्चम गणधर श्री सुधर्मा स्वामिने नमः

३६/१ व्यवहार-छेदसूत्रं-१-

(सटीकं)

तृतीयं-छेदसूत्रं

[भद्रबाहु स्वामिरचितं मूलम् + [स्वोपयज्ञ निर्युक्ति युक्तं] संघदास गणिविरचितं भाष्यं + मलयगिरि आचार्य विरचिता टीका]

[व्यवहार सूत्र-पीठिका]

||१|| प्रणमत नेमिजिनेश्वर-मखिलप्रत्यूहतिमिररविबिंब म् ।
दर्शनपथमवतीर्णं, शशीव दृष्टेः प्रसत्तिकरम् ।।

||२|| नत्वा गुरुपदकमलं, व्यवहारमहं विचित्रनिपुणार्थम् ।
विवृणोमि यथाशक्ति, प्रबोधहेतोर्जडमतीनाम् ।।

||३|| विषमपदविवरणेन, व्यवहर्त्तव्यो व्यध्यायि साधूनाम् ।
येनायं व्यवहारः, श्रीचूर्णिकृते नमस्तस्मै ।।

||४|| भाष्यं क्व चेदं विषमार्थगर्भं, क्व चाहमेषोऽल्पमतिप्रकर्षः ।
तथापि सम्यग्गुरुपर्युपास्ति-प्रसादतो जातदृढप्रतिज्ञः ।।

वृ- उक्तंकल्पाध्ययनम्, इदानीं व्यवहाराध्ययनमुच्यते, तस्य चायमभिसंबंधः, कल्पाध्यायने आभवत् प्रायश्चित्तमुक्तं, न तु दान प्रायश्चित्त दानं, व्यवहारे तु दानप्रायश्चितमालोचनाविधिश्चाभिधास्यते. तदनेन संबंधेनायातस्याऽस्य व्यवहाराध्ययनस्य व्याख्या प्रस्तूयते । अस्य च महापुरस्येव चत्वारि अनुयोगद्वाराणि भवन्ति । तथाहि यथा नगरमकृतद्वारमनगरं, कृतैकद्वारमपि च दुरधिगमं, कृतचतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगममेवं व्यवहाराध्ययनपुरमप्यर्थाधिगमोपायशून्यमशक्याधिगममेकद्वारानुगतमपि च दुरधिगमं, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगममिति फलयान् द्वारोपन्यासः, अनुयोगद्वाराणि नाम अध्ययनार्थप्रवेशमुखानि, तानि च अमूनि-उपक्रमो, निक्षेपोऽनुगमो, नया इतिः तत्र उपक्रमणमुपक्रमः, शास्त्रस्य समीपीकरणं, निक्षेपणं निक्षेपो नामादिन्यासः अनुगमनमनुगमः सूत्रस्यानुरुपमर्थाख्यानं, नया नैगमादयो वस्तुनः पर्यायाणाम् यथासंभवमधिगमकारिणः, तत्रोपक्रमो द्विविधः शास्त्रीयइतरश्च, इतरः षट्प्रकारः नामस्थापनाद्रव्यक्षेत्रकालभावभेदात्, तत्र नामस्थापने सुप्रतीते; द्रव्योपक्रमो द्विविधः, आगमतो नोआगमतश्च, आगमत उपक्रम शब्दार्थस्य ज्ञाता तत्र चानुपयुक्तोऽनुपयोगो द्रव्यमिति वचनात् । नोआगमतस्त्रिविधो, ज्ञशरीर भव्यशरीर तद्व्यतिरिक्तभेदात् । तत्र यद् उपक्रम शब्दार्थज्ञस्य शरीरं जीवविप्रमुक्तं सिद्धिशिलातलादिगंत, तद्भूतभावित्वात् ज्ञशरीरद्रव्योपक्रमः, यस्तुबालकोनेदानी-मुपक्रमशब्दार्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मवबुध्यते, अथचाऽवश्यमायत्यांभोत्स्यते, संभावनाभाविनिबंधनत्वाद्, भव्यशरीरद्रव्योपक्रमः ज्ञशरीर भव्यशरीर व्यतिरिक्त स्त्रिविधः सचित्ताचित्तमिश्रभेदात् ।

तत्र सचित्तद्रव्योपक्रमो द्विपद चतुः पदापदोपाधिभेदभिन्नः पुनरेकैको द्विविधः परिकर्म्मणि वस्तुविनाशे च, तत्र द्रव्यस्य गुणविशेषपरिणामकरणं परिकर्म्म, तस्मिन् सचित्र द्विपदद्रव्योपक्रमो यथा पुरुषस्य वर्णादिकरण, सचित्रचतुष्पदद्रव्योपक्रमोयथा हस्त्यादेः शिक्षाद्यापादनं, सचित्तापदद्रव्योपक्रमो-यथा वृक्षादे र्वृक्षायुर्वेदोपदेशाद् वृद्धादि गुणकरणं वस्तुविनाशे पुरुषादीनां खड्गादिभिर्विनाशकरणं, अचितद्रव्योपक्रमः परिकर्म्मणि यथा पद्मरागमणेः क्षारमृत्पुटकादिना नैर्मल्यापादनं; वस्तुविनाशे विनाशकरणं. मिश्रद्रव्योपक्रमः परिकर्मणि कटकादिभूपितपुरुपादि द्रव्यस्यगुणविशेषकरणं, वस्तुविनाशे विवक्षितपर्यायोच्छेदः;क्षेत्रमाकाशं तच्चामूर्तं, नित्यं चेति न तस्य परिकर्मलक्षणो वा उपक्रमो घटते, तत उपचारात् तदाश्रितस्येक्षक्षेत्रादेस्तौ द्रष्टव्यौ; कालस्योपक्रमः परिकर्म्मणि चन्द्रोपरागादे-र्यथावस्थितमवगिव परिज्ञानकरणं, वस्तुविनाशे विवक्षिते काले तदुचितप्रयोजनस्यासंपादनं, तदसंपादने हि स कालो विनाशितो भवति; भावोपक्रमो द्विधा आगमतो नोआगमतश्च, तत्रागमत उपक्रम शब्दार्थस्य ज्ञाता तत्र चोपयुक्त उपयोगो भावनिक्षेप इति वचनात्, नोआगमतो द्विधा, प्रशस्ताऽप्रशस्तश्च तत्राऽप्रशस्तो गणिकादीनां, गणिकाद्यप्रशस्तेन संसाराभिवर्द्धिना व्यवसायेन परभावमुपक्रामन्ति, प्रशस्तं श्रुतादिनिमित्तमाचार्यभावोपक्रमः अनेनेहाधिकारः ।।

अथ व्याख्यांगप्रतिपादनाधिकारे गुरुभावोपक्रमाभिधानमनर्थकमव्याख्यांगत्वात्तदसम्यक्, तस्यापि व्याख्यांगत्वात् उक्तं च-गुर्वायत्ता यस्मात् शास्त्रारंभा भवंति, सर्वेपि तस्माद् गुर्वाराधनपरेण हितकांक्षिणा भाव्यं । आवश्यक भाष्यकारेणाप्यभ्यधायि।

।। १ ।। गुरुचितायत्ताई वक्खाणंगाई जेन सव्वाई ।।
जेन पुन सुप्पसन्नं,होइ तयं तं तहा कज्जं ।।

।। २ ।। आगारिंगियकुसलं, जइ सेयं वायसं वए पुज्जा ।
तह वियसिं न विकूडे विरहंमियकारणं पुच्छे ।।

वृ- आह यद्येवं गुरुभावोपक्रम एव भणनीयो. न शेषा निःप्रयोजनत्वात् न गुरुचित्तप्रसादनार्थं तेषामप्युपयोगित्वात् तथा च देशकालावपेक्ष्य परिकर्म्मविनाशौ द्रव्याणमुदकौदनादीनामाहारादिकार्येषु कुर्व्वन्नंतेवासी हरति गुरुणां चेतः, अथवा उपक्रमसामान्यात् ये केचन संभविन उपक्रमभेदास्ते सर्वेप्युक्ताः; येनानुपयोगिव्युदासेनोपयोगिनिष्प्रतिपक्षा प्रतिपत्तिरुपजायते तथा चाप्रस्तुतार्थापाकरणं प्रस्तुतार्थव्याकरणं च, नामादिन्यासव्याख्यायाः फलमुपवर्णयन्ति महाधियः; अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्चनिक्षेपः समवतार इति तत्रानुपूर्वी नामस्थापनाद्रव्यक्षेत्रकालगणनोत्कीर्त्तनसंस्थान सामाचारीभावभेदभिन्ना दशप्रकारा तस्यां यथा संभवमवतारणीयमिदमध्ययनं, विशेषतस्तूत्कीर्त-नानुपुर्व्यां गणानुपूर्व्यां च, उत्कीर्त्तना नाम संशब्दना यथा कल्पाध्ययनं व्यवहारध्ययनमिति, गणनं परिसंख्यानमेकं द्वे त्रीणि इत्यादि, साच गणनानुपूर्वी त्रिप्रकारा पूर्वानुपूर्वी पश्चानुपूर्वी अनानुपूर्वी च तत्रपूर्वानुपूर्व्यामिदं द्वितीयं पश्चादानुपूर्व्यां प्रथमं, द्वयोस्त्वऽनानुपूर्वीनास्ति, अपरे तु दशभिर्दशाध्ययनैः सहेदंगणयंति, तत्र पूर्वानुपूर्व्यामिदं द्वादशं, पश्चादानुपूर्व्यां प्रथममनानुपूर्व्यामिकादयो द्वादशपर्यंता अंकाः श्रेण्यांव्यवस्थाप्यन्ते, तेषामू च परस्परमभ्यासे यावान् राशिः संपद्यते तावंतो द्विरुपोना भंगकाः ते च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोटिसंख्याकास्तेषु च क्वचित्प्रथमं क्वचित् द्वितीयमित्यादि, नाम एक नामादि दश नामपर्यतं यथानुयोगद्वारेषु षट् नाम्नि त्ववतारः

तत्र षट् भावा औदयिकादयो निरुप्यन्ते, तत्रास्य ज्ञायोपशमिके भावे अवतारः सर्वश्रुतस्य ज्ञायोपशमिकत्वात्; प्रमाणं चतुर्द्धा द्रव्यप्रमाणं क्षेत्रर्पमाणं काल प्रमाणं भावप्रमाणं च तत्र व्यवहाराध्ययनं भाव आत्मकत्वाद् भावप्रमाणविषयं, तदपि भावप्रमाणं त्रिधा तद्यथा गुणप्रमाणं नयप्रमाणं संख्याप्रमाणं च, गुणप्रमाणमपि द्विधा । जीवगुणप्रमाणमऽजीवगुणमाणं, तत्र जीवादपृथग्भूतव्यवहाराध्ययनस्य ज्ञानगुणप्रमाणे समवतारः तदपि जीवगुणप्रमाणं त्रिधा ज्ञानदर्शनचारित्रभेदात्, तत्र बोधात्मकत्वात् व्यवहाराध्ययनस्य ज्ञानगुणप्रमाणे समवतारः तत्र ज्ञानगुणप्रमाणं प्रत्युज्ञानुमानागमोपमानभेदात् चतुष्प्रकारं, तत्र व्यवहाराध्ययनस्य प्रायः परोपदेशसव्यापेक्षत्वादागमेसमवतारः, आगमोऽपि लौकिकलोकोत्तरभेदात् द्विधा तत्रेदं व्यवहाराध्ययनं परमर्षिप्रणीतत्वात् लोकोत्तरे समवतरति, सोपि द्विधा आवश्यकमावश्यकव्यतिरिक्तश्च तत्रेदमावश्यकव्यतिरिक्त आवश्यकव्यतिरिक्तोपि द्विधा अंग प्रविष्टो अनंगप्रविष्टश्च तत्रेदमनंगप्रविष्टः सोपि द्विधा कालिकोत्कालिकभेदात् तत्रेदं कालिके, सोपि सूत्रार्थोभयात्मानंतरपरंपरभेदभिन्नः, तत्रेदं सूत्रार्थ रुपत्वात्तदुभये, तथेदं गणभृतां गौतमादीनां सूत्रत्र आत्मागमस्तच्छिष्याणाम् जंबूस्वामि प्रभृतीनामनंतरागमः प्रशिष्याणाम् तु प्रभवादीनां परंपरागमः अर्थतो भगवतामर्हतामात्मागमो गणधराणामनंतरागमः तच्छिष्याणां परंपरागमः ।

नयप्रमाणे तु नास्य संप्रत्यवतारो मूढनयत्वात् उक्तं च मूढनइयं सुयंकालियं च इत्यादि, संख्यानामस्थापनाद्रव्यज्ञेत्रकालोपमपरिमाणभावभेदात् अष्टप्रकाश यथानुयोगद्वारेषु तथा वक्तव्या, तत्र कालिकश्रुतपरिमाण संख्याऽपि द्विधा सूत्रतोऽर्थतश्च तत्रार्थतोऽनंतपर्यायत्वादपरिमितपरिमाणं सूत्रतः परिमितप्रमाणं अक्षरपदपादश्लोकगाथादीनां संख्यातत्वात्, संप्रति वक्तव्यता साच त्रिधा स्वसमयवक्तव्यता परसमयवक्तव्यता उभयसमयवक्तव्यताच, स्वसमय स्वसिद्धांतवक्तव्यता पदार्थविचारः तत्र प्रायेण सर्वाण्यपि अध्ययनानि स्वसमयवक्तव्यतायां समवतरंतीत्यस्यापि स्वसमयवक्तव्यतायां समवतारः ।।

इदानीमर्थाधिकारः सचेह दान प्रायश्चित्तमा भवत् प्रायश्चित्तमालोचना विधिश्च; संप्रति समवतारः, स च लाधवार्थं प्रतिद्वारं समवतारणाद्वारेण प्रदर्शित एव, उक्तः उपक्रमः, इदानीं निक्षेपः स च त्रिधा ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च तत्रौघोनाम यत्सामान्यशास्त्राभिधानं तच्च चतुर्द्धा अध्ययनमक्षीणमायः क्षपणा च, एकैकं नाम स्थापना द्रव्यभावभेदेन चतुर्भेदमनुयोगद्वारतः प्रपंचेनाभिधाय भावाध्ययनभावक्षीणभावायभावक्षपणास्चैतदध्ययनमायोज्यं, नामनिष्पन्ने निक्षेपे व्यवहारः इति, व्यवह्रियते यत् यस्य प्रायश्चित्तमाभवति स तद्दानविषयीक्रियतेऽनेनेति व्यवहारः; नृश्रोभावात् समश्च हल इति करणे घञ्प्रत्ययः तत्र व्यवहारग्रहणेन व्यवहारी व्यवहर्तव्यं चेति द्वितयसूचितमेव तद्व्यतिरेकेण व्यवहारस्यासंभवात् न खलु करणं सकर्म्मकक्रियासाधकतमरुपं कर्म्मकर्त्तारं च विना क्वचित्संभवदुपलब्धमिति, ततो यथा व्यवहारस्य प्ररुपणा कर्त्तव्या तथा व्यवहारी व्यवहर्त्तव्ययोरपीति, त्रयाणामपि प्ररुपणां चिकीर्षु र्भाष्यकृदेतदाह.

[भा. १] ववहारो ववहारी ववहरियव्वा य जे जहा पुरिसा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एएसिं तु पयाणं, पत्तेयं परूवणं वोच्छं ।।

वृ- व्यवहार उक्तशब्दार्थः, व्यवहरतीत्येवंशीलो व्यवहारी व्यवहारक्रियाप्रवर्त्तकः, प्रायश्चित्तदायीति यावत्, तथा ये पुरुषा पुरुषग्रहणं पुरुषोत्तमो धर्म इति ख्यापनार्थमन्यथास्त्रियोपिद्दष्टव्यास्तासामपि *प्रायश्चित्तदानविषयतया प्रतिपादयिष्यमाणत्वात्, यथा येन वक्ष्यमाणेन प्रकारेण व्यवहर्त्तव्या* व्यवहारक्रियाविषयीकर्त्तव्यः, पाठांतरं जे जहा काले अस्यायमर्थः, ये यथा यस्मिन् काले व्यवहर्त्तव्यास्तद्यथा यदा आगम व्यवहारिणः संति, तदा तदुपदेशेनैव व्यवहर्त्तव्यास्तेषु व्यविच्छिन्नेषु श्रुतज्ञानव्यवहार्युपदेशेन तदेवचाज्ञयापि तदेव धारणया तदेवतु जीतव्यवहारेणापि व्यवहर्त्तव्या इति, एतेषां व्यवहारव्यवहारिव्यवहर्त्तव्यरुपाणां त्रयाणां पदानां तु विशेषणे स चैतद्विशिनष्टि, संक्षेपप्ररुपणार्थमिदमाह ।।

[भा. २] ववहारी खलुकत्ता ववहारो होइ करणभूतो उ ।
ववहरियव्व कज्ज कुंभादितियस्स जह सिद्धी ।।

वृ- ववहारी खलुकत्तति व्यवहारस्य कर्ता व्यवहारस्य छेत्ताभिधीयते इति शेषः, व्यवहारः पुनर्भवति करणभूतः व्यवहार च्छेदक्रिया प्रतिकरणंत्व प्राप्तः, तु शब्दः पुनरर्थे व्यवहरितसंबंधश्च, स च यथा स्थानयोजित एव स च व्यवहारः करणभूतः पंचधा १ आगमः २ श्रुतमा ३ धारणा ५ जीतश्च आह चूर्णिकृत्, पंचविधो व्यवहारः करणमिति, तेन च पंचविधेन व्यवहारेण करणभूतेन व्यवहरन् कर्त्ता यन्निष्पादयति कार्यं, तद् व्यवहर्त्तव्यमित्सुच्यते, तथा चाह ववहरियव्वाय जे जहा पुरिसा इति, अथ कथं व्यवहारग्रहणेन व्यवहारी व्यवहर्त्तव्यश्च सूच्यते, न खलु देवदत्तग्रहणेन यज्ञदत्तस्य सूचा भवतीति तत आह कुंभादितियस्य जह सिद्धि कुंभ आदिरेषामिति कुंभादयस्तेषां त्रिकं कुंभादित्रिकं, तस्य यथा सिद्धिः कुंभग्रहणेन तथा कुंभइत्युक्ते सकृतक इति तस्य कर्त्ता कुलालः करणं मृच्चक्रादिसामर्थ्यात् तन्यते, कृतकस्यासतः कर्तृकरण व्यतिरेकणासंभवात् एवमत्रापि, व्यवहार इत्युक्तेव्यवहारि व्यवहर्त्तव्यश्च सूच्यते करणस्यापि सकर्म्मकक्रिया साधकतमरुपस्य कर्म्मकर्तृव्यतिरेकेणासंभवादिति त्रितयसिद्धिः तदेवमेकग्रहणे सामर्थ्यादितरस्य द्वयस्य ग्रहणं भवत्येतत् सामान्येन सनिदर्शनमुक्तं, संप्रतिकरणग्रहणेऽवश्यकर्तुकर्म्मग्रहणं भवतीत्यर्थे निदर्शनमाह ।।

[भा. ३] नाणं नाणीनेयं, अन्ना वा मग्गणा भवेतितए ।
विविहं वा विहिणा वा, ववणहरणं च ववहारो ।।

वृ- मार्गणा भवति तामेवाह, नाणीनाणं नेयमिति, तत्र ज्ञायते वस्तु परिच्छिद्यते अनेनेति ज्ञानं, तत्रयथा ज्ञानमित्सुक्ते ज्ञानिना ज्ञानक्रिया कर्तुर्ज्ञेयस्य च ज्ञानक्रियाविषयस्य परिच्छेदस्य सिद्धि र्भवति, तद्द्वितयसिद्धिमंतरेण ज्ञानस्य ज्ञानत्वस्यैवासंभवादेवमत्रापि व्यवहार ग्रहणेन व्यवहारी व्यवहर्त्तव्यश्च सूच्यते इति भवति त्रितयस्याप्युपक्षेपः एका तावन्मार्ग्गणा त्रितयविषया कुंभादित्रिकसिद्धिद्दष्टांते प्रागभिहिता, वा शब्द प्रकारांतरे अथवा इयमन्या त्रितया विषया तदेव संक्षेपतो व्यवहारादिपदत्रयस्य प्ररुपणा कृता, संप्रति यथाक्रमं विस्तरेण तां चिकीर्षुः प्रथमतो व्यवहारपदस्य निरुक्तं वक्तुकाम इदमाह विविहं वा इत्यादि विविधं तद्योग्यतानुसारेण विचित्रं विधिना वा सर्वज्ञोक्तेन प्रकारेण वपनं तपः प्रभृत्यनुष्टानविशेपस्य दानं टुवप् बीजतंतुसंताने इति वचनात् हरणमतीचारदोपजातस्य अथवा संभूय द्वित्र्यादिसाधुनां क्वचित्प्रयोजने प्रवृत्तौयत् यस्मिन्या भवति तस्य तस्मिन् वपनमितरस्माच्च हरणमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारः किमुक्तं भवति ? विविधो विधिना वा हारो व्यवहारः, पृषोदरादय इति विवाप शब्दयोर्व्यव आदेशः; संप्रति वपनहरणशब्दयोरर्थं वक्तुकामस्तदेकार्थिकान्याह ।।

[भा.४] ववणंति रोवणंतिय, पकिरण परिसाडणाय एगट्ठं ।
हारोत्तियहरणं, तिय एगठं हीरएव त्ति ।।

वृ- टुवप् बीजतंतुसंताने उप्यते इति वपनं, इति शब्दः शब्दस्वरूपपरिसमाप्तिद्योतकः एवमुत्तरेपि, रोपणमिति रुह जन्मनि रोहति कश्चित्तमन्यः प्रयुंक्ते प्रयोकृतृव्यापारे निव् रुहेः पो वाइति हकारस्य पकारः रोप्यते इति परिसाडणा इति, शट् रुजायां परिपूर्व परिशटति परिभ्रश्यति तमन्यः प्रयुंक्ते पूर्ववत् णिच् परिशाटयते इति परिशाटनानि वेत्यादि अनट् प्रत्य यः आप् चसमुच्चये, एगठमिति एतत् शब्दचतुष्ययमेकार्थ एकार्थप्रवृत्ताः परस्परमेते पर्याया इति भावस्तेन यदुक्तं भवति रोपणमिति प्रकरणमिति परिशाटनेति वा तदुक्तं भवति वपनमिति एतावता वपनशब्दस्य प्रदानलक्षणोऽर्थः समर्थितः; हारोति चेत्यादिग्रहणं हार इहर्हरणं ह्रियते इति वा एकार्थं त्रयोप्येते शब्दा एकार्थिका इत्यर्थः तदेव वापशब्दस्य हारशब्दस्य च प्रत्येकमर्थोऽमिहितः, संप्रति तयोरेव समुदितयोरर्थं जिज्ञापयिषुरिद-माह ।।

[भा.५] अत्थी पच्चत्थीणं हाउं एकस्सववइविइयस्स ।
एएण उ ववहारो अहिगारो एत्थ उ विहीए ।।

वृ- अर्थी याचको यः परस्मात्ममेदं लभ्यमिति याचते, प्रत्यर्थी अर्थिनः प्रतिकुलः, किमुक्तं भवति, यः परस्य गृहीत्वा न किमपि तस्मै प्रयच्छति तयोरर्थिप्रत्यर्थिनो र्विवदमानयोर्व्यवहारार्थ-स्थेयपुरुषमुपस्थितयोः स व्यवहारपरिच्छेदकुशलो व्यवहारविधापनसमर्थश्च स्थेयो यस्मात् हाउं एकस्सत्ति सूत्रेषष्टी पंचम्यर्थे प्राकृते हि विभक्तिव्यत्ययोऽपि भवति, यदाह, पाणिनिः स्वप्राकृतलक्षणे व्यत्ययोप्यासामिति, यस्य यन्नाभवति, तस्मात् तत् हृत्वा आदाय यस्या भवति तस्मै द्वितीयाय वपति प्रयच्छति, एएणउववहारो इति एतेन अनंतरोदितेन कारणेन स स्थेयव्यापारो व्यवहारः, किमुक्तं भवति यस्मादेषस्थेयपुरुषो विवादनिर्णयाय एकस्माद्धरति, अन्यस्मै प्रयच्छति, तस्मात्तद्व्यापारो वपनहरणात्मकत्वात् व्यवहार इति एतावता समुदायार्थकथनंकृतं, स च व्यवहारो विधिव्यवहारो अविधि व्यवहारश्च अधिकारः प्रयोजनं व्यवहारेण विधिनैव विधिपूर्वकेणैव तु शब्द एवकारार्थे भिन्नक्रमश्च, ना विधिना, अविधिर्मोक्ष प्रतिपंथित्वात् तदेवमुक्तं, व्यवहारशब्दस्य निर्वचनं तच्च क्रियामात्र-मपेक्षयोक्तमधिकृत ग्रंथयोजनायां तु करणव्युत्पत्तिराश्रयणीया, विधिना ह्रियते च येन स व्यवहार इति, संप्रति व्यवहारस्य नामादिभेददर्शनार्थमाह ।।

[भा.६] ववहारंमि चउक्कं दव्वे पत्ताइलोइयादी वा ।
नो आगमतो पनगं, भावे एगठिया तस्स ।।

वृ- व्यवहारे व्यवहारविषये चतुष्कं, किमुक्तं भवति चतुर्द्धा व्यवहारस्तद्यथा-नामव्यवहारः स्थापनाव्यवहारो द्रव्यव्यवहारो भावव्यवहारश्च तत्र नामस्थापने सुप्रतीते, द्रव्यव्यवहारो द्विधा, आगमतो नोआगमतश्च, आगमतो व्यवहारपदज्ञाता तत्र चानुपयुक्तो, नोआगमत स्त्रिधा-ज्ञशरीरभव्यशरीर तद्व्यतिरिक्तभेदात् तत्र ज्ञशरीरभव्यशरीव्यवहारो गतो, ज्ञशरीरभव्यशरीरयोरन्यत्रानेकशोभिहितत्वात् तद्व्यतिरिक्तमाह; दव्वेपत्ताइ लोइयादीवा द्रव्ये द्रव्यविषये व्यवहारो नोआगमतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञशरीरभव्यशरीरव्यतिरिक्तः पत्रादिशधाराधेययोरभेदविवक्षणादयं निर्देश स्ततोयमर्थः ज्ञशरीरभव्यशरीर व्यतिरिक्तो द्रव्यव्यवहारः खल्वेष एव ग्रंथः पुस्तक पत्रलिखित आदि शब्दात् काष्टसंपुटफल-कपट्टिकादिपरिग्रहः, तत्राप्ये तदग्रंथस्य लेखनसंभवात्, लौकिकादि वेति, यदि वा ज्ञशरीरभव्य-शरीरयोर्व्यतिरिक्तो द्रव्यव्यवहारस्त्रिविधस्तद्यथा, लौकिकः कुप्रावचनिको लोकोत्तरिकश्च तत्र लौकिको यथा आनंदपुरे खड्गादावुद्दीर्णे रुपकाणामशीति सहस्त्र दंडो मारितेपि तावानेव, प्रहारे तु पतिते यदि कथमपि न मृतस्तर्हि रुपकपंचकं दंडः, उत्कृष्टे तु कलहे प्रवृत्ते अर्द्धत्रयोदशरुपको दंडः; कुप्रावचनिको यथा यत्कर्म्भ यो न करोति, न ततः कर्म्मणस्तस्य किंचिदिति; लोकोत्तरिको यथा एते पांडुरपटप्रावरणा जिनानामनाज्ञया स्वच्छंदं व्यवहरंतः परस्परमशनपानादिप्रदानरुपव्यवहारं कुर्वंति, भावव्यवहारो द्विधा आगमतो नोआगमतश्च, आगमतो व्यवहारपदार्थज्ञाता तत्र चोपयुक्तः उपयोगो भावनिक्षेपइति वचनात् नोआगमतः पंचविधो व्यवहारस्तथाचाह; नोआगमतो पणगंभावे इति, भावे विचार्यमाणेनोआगमतो व्यवहारो व्यवहारपंचकं आगमः श्रुतम् आज्ञा धारणाजितमिति नोशब्दो देशवचनात्तस्य पंचविधस्यापि नोआगमतो भावव्यवहारस्य सामान्येन एकार्थिकान्यमूनिता न्येवाह ।।

[भा.७] सुत्तेअत्थे जीए कप्पे मग्गे तहेव नाएय ।
तत्तोय इच्छियव्वे आयरिए चेव ववहारो ।।

वृ- तत्तदर्थसूचनात् सूत्रं, ऊणादिकी शब्दव्युत्पत्तिः, तच्च पूर्वाणि च्छेदसूत्राणि वा, तथा अर्थ्यते मोक्षमभिलषद्भिः इत्यर्थः सूत्रस्याभिधेयं, तथाजीतं नाम प्रभूतानेकगीतार्थकृतमर्यादा; तत् प्रतिपादको ग्रंथोप्युपचारात् जीतं, तथा कल्पंते समर्था भवंति संयमाध्वनि प्रवर्त्तमाना अनेनेति कल्पःमृजूष शुद्धौ मृजंति शुद्धि भवत्यनेनातिचारकल्पपप्रक्षालनादिति मार्गः उभयत्र व्यंजनात् धञिति धञ् प्रत्ययः तथा इण् गतौ, निपूर्वः नितरामीयते गम्यते मोक्षाऽनेनेति न्यायः तथा सर्वैरपि मुमुक्षुभिरिष्यते प्राप्तुमिष्यते इप्सितव्यः आचर्यतेस्म, बृहत्पुरुषै रप्याचरितं, व्यवहार इति पूर्ववत् उक्तान्येकार्थिकानि संप्रत्यत्रैवाक्षेपपरिहारावभिधित्सुराह ।।

[भा.८] एगठिया अभिहिया, न य ववहारपनगं इह दिठं ।
भणइ एत्थेव तयं दट्ठव्वं अंतगयमेव ।।

वृ- नन्वभिहितान्येकार्थिकानि परमेतेष्वेकाऽर्थिकेषु व्यवहारपंचकमागमश्रुताज्ञाधारणाजीतलक्षणं न दृष्टं नोपात्तं; जीतस्यैव केवलस्योपात्तत्वादऽत्रसूरिराह भण्यते, अत्रोत्तरं दीयते, अत्रैव एतेष्वेव एकार्थिकेषु तत् व्यवहारपंचकमंतर्गतमेव दृष्टव्यं, कथमित्याह ।।

[भा.९] आगमसुयाउ सुत्तेण, सुइया अत्थतो उ ति चउत्था ।
बहुजनमाइणं पुनजीयंउ चियंति एगट्ठं ।।

वृ- सूत्रेण सूत्रशब्देन सूचिते आगमश्रुत आगमश्रुतव्यवहारौ, तथाहि आगमव्यवहारिणः षट् तद्यथा केवलज्ञानी मनःपर्यायज्ञानी अवधिज्ञानी चतुर्दशपूर्वी दशपूर्वी च, श्रुतव्यवहारिणोऽवशेपपूर्वधरा एकादशांगधारि कल्पव्यवहारादिसूत्रार्थतदुभयविदश्च ततो भवति सूत्रग्रहणेनागमश्रुतव्यवहारयो ग्रंहणं चतुर्दशपूर्वादीनां कल्पव्यवहारादिच्छेग्रंथानामपि च सूत्रात्मकत्वात्; तथा अर्थतः अर्थशब्देन सूचितौ त्रिचतुर्थौ तृतीयचतुर्थावा ज्ञाधारणलक्षणौ व्यवहारौ तथाहि आज्ञाव्यवहारो नाम यदाद्वावप्या-चार्यावाऽऽसेवित्तसूत्रार्थतयातिगीतार्थौक्ष क्षीणजंधाबलौ व्यवहारक्रमानुरोधतः प्रकृष्टदेशांतरनिवासिना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च तौ एवान्योन्यस्य समीपं गंतुमसमर्थाविभूतां, तदान्यतरस्मिन् प्रायश्चित्ते समापतितेसति तथाविध-योग्यगीतार्थशिष्याभावे सति धारणाकुशलमगीतार्थमपि शिष्यगूढार्थान्यतिचारासेवनपदानि कथयित्वा प्रेषयति, यथा-

पढमस्सय कज्रस्सय पढमेण पएण सेवियंजंतु ।
पढमे छक्के अब्भिंत्तरं तु पढमं भवेड्डाणं ।।

अत्र प्रथमं कार्यं दर्प्पः, तत्र प्रथमं पदं दर्प्पस्तन्निमित्तं प्रथमं षट्कं व्रतषट्कं तत्राभ्यंतरमंतर्गतं प्रथमं स्थानं प्राणातिपात्तः ।

पढमस्सय कज्रस्सय, पढमेण पएण सेवियं जंतु ।
पढमे छक्के अब्भिंतरं तु बीयं भवे ठाणे ।।

अत्र द्वितीयं स्थानं मृपावादः, एवमदत्तादानादिष्वपि भावनीयं ।

पढमस्सय कज्रस्सय पढमेण पएण सेवियं जंतुं ।
बिइए छक्के अब्भिंतरं, तु पढमंभवेठाणं ।।

वृ- अत्र द्वितीयं षट्कं कायषट्कमित्यदि एवं तेन कथितेन आचार्यो द्रव्यक्षेत्रकाल-भावसंहननधृतिबलादिकं परिभाव्यस्वयं वागमनं करोति, शिष्यं वा तथाविधं योग्यं गीतार्थं प्रज्ञाप्य प्रेषयति, तदभावे तस्यैव प्रेषितस्य गूढार्थामतिचारविशुद्धिं कथयति, धारणाव्यवहारो नाम गीतार्थेन संविग्नेनाचार्येण द्रव्यक्षेत्रकालभावपुरुषान् प्रतिसेवनाश्चावलोक्य यस्मिन्नपराधे यत् प्रायश्चित्तम् अदायि,तत्सर्वमन्यो दृष्ट्वा तेष्वेव द्रव्यादिषु तादृश एवापराधे तदेव प्रायश्चितं ददाति, एष धारणाव्यवहारः, अथवा वैयावृत्यकरस्य गचछोपग्राहिणः स्पर्द्धकस्वामिनो वादेशदर्शनसहायस्य वासंविग्नस्योचितप्रायश्चित्तदानं धारणमेष कोऽर्थः इत्यत आह बहुजणेत्यादि बहुभिर्जनै र्गीतार्थैश्चीर्णं बहुजनाचीर्णभिति, वा उचितमिति वा जीतमिति वा एकार्थं किमुक्तं भवति बहुजनाचीर्णंनाम जीतमिति तमेवजीतव्यवहारं दर्शयति ।।

[भा.१०] दद्दुरमादिसु कल्लाणगं तु विगलिंदिएसु भत्तट्ठो ।
परियावणा एतेसिं चउत्थमायंबिला हुंति ।।

वृ- दर्दुरो मंडूकस्तदादिषु तत्प्रभृतिषु मकारालाक्षणिकः प्राकृतत्वात् तिर्यक्पंचेंद्रियेषुजीविता-द्व्यपरोपितेष्वितिशेषः कल्पाणकं त्विति तुशब्दो विशेषणार्थः, स चैतत् विशिनष्टि, पंचकल्पाणकं प्रायश्चित्तं, विगलिंदिएसु भत्तट्ठो इति विकलान्यसंपूर्नानि इंद्रियाणि येषां ते विकलेंद्रियाएकद्वित्रि-चतुरिंद्रियास्तत्रव्याख्यानतो विशेषप्रतिपत्तिरित्येकेंद्रिया अनंतवनस्पतिकायिका दृष्टव्याप्रायश्चित्तं भवतः, इयमत्रभावना यदि दर्दुरादीन् तिर्यक्पंचेंद्रियान् गाढं परितापयति ततोऽभक्तार्थप्रायश्चितमथ विकलेंद्रियान् अनंतवनस्पतिकाप्रभृतीन् गाढ् परितापयति, तत आचाम्लं, उपलक्षणमेतत्, तेनैतदपिजीतव्यवहारानुगमतमवसेयं, यदि दर्दुरप्रभृतीन् तिर्यक्पंचेंद्रियान् मनाक् संघट्टयति तत एकाशनकमथानागाढंपरितापयति, तत आचाम्लं, तथा अनंतवनस्पतिकायिकद्वित्रिचतुरियाणां संघट्टने पूर्वार्द्धमेतेषामेवानागाढपरितापने एकाशनं, तथा पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां संघट्टने निर्विकृतिकमनागाढपरितापने पुरिमार्द्धं, आगाढपरितापने एकाशनं जीविताद्व्यपरोपणे आचाम्लमिति, इदमपि जीतमेवेति दर्शयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११]　　　　अपरिणाकालाइसु, अपडिक्कंतस्स निव्विगइयंतु ।
निव्वीतियं पुरिमड्ढो अंबिलखवणाय आवासे ॥

वृ- अपरिज्ञा-प्रत्याख्यानपरिज्ञाया अग्रहणं गृहीताया वा भंगः, ततः सूत्रे विभक्तिलोप आर्षत्वात् तथा कालादिषु अप्रतिक्रामतो अव्यावर्तमानस्य प्रायश्चित्तं निर्विकृतिकं, किमुक्तं भवति, यदि नमस्कारपौरुष्यादिदिवसप्रत्याख्यानं वैकालिकं च पानाहारप्रत्याख्यानं न गृह्णाति, गृहित्वा विराधयति, तथा स्वाध्यायं प्रस्थाप्य यदि कालस्य न प्रतिक्रामति, न कालप्रतिक्रमणनिमित्तं कायोत्सर्गं करोती, आदिशब्दात् येषु स्थानेष्वीर्यापथिकया प्रतिक्रमेतव्यं, तेषु चेत् तथा न प्रतिक्रामति, तर्हि प्रायश्चित्तं निर्विकृतमिति, तथा निव्वीतिय इत्यादि आवासे आवश्यके एकादिकायोत्सर्गे सर्वावश्यकाकरणेच यथासंख्यं निर्विकृतिकपूर्वार्द्धाचाम्लक्षपणानि, इयमत्र भावना आवश्यके यद्येकं कायोत्सर्गं न करोति ततः प्रायश्चित्तं निर्विकृतिकं, कायोत्सर्गद्वायाकरणे पूर्वार्द्धं, त्रयाणामपि कायोत्सर्गाणामकरणे आचाम्लं, सर्वस्यापि वावश्यकस्याकरणे अभक्तार्थमिति;

[भा.१२]　　　　जं जस्स च पच्छित्तं आयरियपरंपराए अविरुद्धं ।
जोगाय बहु विगप्पा एसो खलु जीयकप्पो ॥

वृ- यत् प्रायश्चित्तं यस्याचार्यस्य गच्छे आचार्यपरंपरागतत्वेनाविरुद्धं, न पूर्वपुरुषमर्यादातिक्रमेण विरोधभाक्, यथान्येषामाचार्याणां नमस्कारपौरुष्यादिप्रत्याख्यानस्याकरणे कृतस्य वा भंगे प्रायश्चित्तमाचाम्लं, तथा आवश्यकगतैककायोत्सर्गाकरणे पूर्वार्द्धं कायोत्सर्ग द्वयाकरणे एकाशनक मित्यादी तथा ये योगा उपधानानि बहुविकल्पा गच्छभेदेन बहुभेदा आचार्य परंपरा गतत्वेन चाविरुद्धायथा नागिलकुलवंशवर्त्तिनां साधूनामाचारादारभ्य यावदनुत्तरोपपातिकदशाः, तावन्नास्ति आचाम्लं, केवलं निर्विकृतिकेन ते पठंति आचार्यानुज्ञाताश्च विधिना कायोत्सर्गं कृत्वा विकृतीः परिभुंजते, तथा कल्पव्यवहारयोः चंद्रप्रज्ञप्तिसूर्यप्रज्ञप्त्योश्च केचिदागाढं योगं प्रतिपन्ना अपरे त्वनागाढमिति, एस खलु जीयकप्पो उ इति एव सर्व्वोपि खलु गच्छभेदेन प्रायश्चित्तभेदो योगभेदश्चाचार्यपरंपरागतो जीतकल्पो जीतव्यवहारो वेदितव्यः उक्तो व्यवहारः संप्रति व्यवहारिणः इति द्वितीयं द्वारमभिधित्सुराह-

[भा.१३]　　　　दव्वंमि लोइया खलु, लंचिल्ला भावतो उ मज्झत्था ।
उत्तरदव्वअगीयागीयावालंचपक्खेहिं ॥

वृ- व्यवहारिणश्चतुर्द्धा तद्यथा नामव्यवहारिणः, स्थापनाव्यवहारिणः, द्रव्यव्यवहारिणो, भावव्यवहारिणश्च, तत्र नामस्थापने सुज्ञाते द्रव्यव्यवहारिणो द्विधा आगमतो नोआगमतश्च, तत्रागमतो व्यवहारिशब्दार्थज्ञास्ते चानुपयुक्ता, नोआगमतस्त्रिविधाज्ञशरीरभव्यशरीरतद्व्यतिरिक्तभेदात्, तत्र ज्ञशरीरभव्यशरीर द्रव्यव्यवहारिणः प्रतीताः, तद् व्यतिरिक्ता द्विविधा लौकिका लोकोत्तरिकाश्च, भावव्यवहारिणोऽपि द्विधा आगमतो नोआगमतश्च आगमतो व्यवहारिशब्दार्थज्ञास्तत्रैवोपयुक्ताः नोआगमतो द्विधा लौकिका लोकोत्तरिकाश्च तत्र पूर्वार्द्धेन नो आगमतो द्रव्यभाव लौकिक व्यवहारिणः प्रतिपादयति, द्रव्ये विचार्यमाणे नोआगमतो ज्ञशरीभव्यशरीरव्यतिरिक्तालौकिकाव्यवहारिणः खलु लंचिल्लाइति, लंचाउत्कोच इत्यनर्थातरं तद्वन्तः किमुक्तं भवति ? परलंचामुपजीव्य ये सापेक्षाः संतो व्यवहारपरिच्छेदकारिणस्ते द्रव्यतो लौकिका व्यवहारिणः, भावतो उ मज्झत्थाइति भावतः पुनर्नो-आगमतो व्यवहारिणो मध्यस्था मध्य रागद्वेषयोरपांतरालं तिष्ठंतीति मध्यस्थाः ये

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

परलंचोपचारमंतरेणारक्ताद्विष्टाः संतोन्यायैकनिष्ठतया व्यवहारपरिच्छेत्तारस्ते नोआगमतो लौकिकभाव्यव्यवहारिण इति भावः, अधुना लोकोत्तरिकान् नोआगमतो द्रव्यव्यवहारिणः प्रतिपादयति, उतरदव्वअगीया इत्यादि उत्तरे लोकोत्तरे द्रव्ये विचार्यमाणा नोआगमतो द्रव्यव्यवहारिणोऽगीता अगीतार्थाः ते हि यथावस्थितं व्यवहारं न कर्तुमवबुध्यंते, ततस्तद्द्रव्यव्यवहारो द्रव्यव्यहार एव भावस्य यथावस्थितपरिज्ञानलक्षणस्याभावात् द्रव्यशब्दोऽत्राप्रधानवाची, अप्रधानव्यवहारिणस्ते इत्यर्थः, गीयावालंचपक्खेहिं इति, यदिवागीतार्था अपि संतो ये परलंचामुपजीव्य व्यवहारं परिच्छिदंति, तेऽपि द्रव्यव्यवहारिणोऽथवा विना लंचां गीतार्था अपि ये ममायं भ्राता ममायं निजक इति पक्षेण पक्षपातेन व्यवहारकारिणस्तेपि द्रव्यव्यवहारिणः मध्यस्थरुपस्य भावस्यासंभवात् संप्रति नोआगमतो लोकोत्तरिकान् भावव्यवहारिणः प्राह ।।

[भा.१४] पियधम्मादढधम्मा, संविग्गा चेव वज्जभीरुअ ।
सुत्तत्थतदुभयविऊ अनिस्सियववहारकारी य ।।

वृ- प्रियो धर्म्मो येषां ते प्रियधर्माणः, धर्मे दृढा दृढधर्माः, राजतंतादित्वात् दृढशब्दस्य पूर्वनिपातः, अत्र चतुर्भंगिका प्रियधर्म्माणो नामैकेनो दृढधर्म्मा इति प्रथमो भंगः, नो प्रियधर्म्माणो दृढधर्म्मा इति द्वितीयः, अपरे प्रियधर्माणो दृढधर्म्माश्चेति तृतीयः, अन्ये नो प्रियधर्माणो नो दृढदर्मा इति चर्तुर्थः, अत्र तृतीयोभंगोऽधिकृतो न शेषा इति प्रतिपत्त्यर्थं विशेषणांतरमाह, संविग्नः संविग्न नामोत्त्रस्तास्तेच द्विधा, द्रव्यतो भावतश्च, द्रव्यतः संविग्ना मृगास्तेषां यतस्ततो वा बिभ्यतांप्रायः सदैवोत्त्रस्तमानसत्वात्, भावसंविग्ना ये संसारादुत्त्रस्तमानसतया सदैव पूर्वरात्रादिष्वेच्चिंतयंति, किं मे कडं किं च ममात्थिसेसं, किंसक्कणिज्जं न समायरामि इत्यादि, अत्र भावसंविग्नैरधिकारः भावसंविग्नप्रतिपत्यर्थमेव विशेषणांतरमाह, वज्जभीरुअवद्यं-पापं, तस्य भीरवः ये चावद्यभीरवस्ते भावसंविग्ना एवेति, वज्जभीरुग्रहणेन भाव संविग्नः प्रतिपत्तिः एते च यथोक्तविशेषणेन विशिष्टा अपि न गीतार्थत्वमृते भावव्यवहारकारिणो भवंतीति, गीतार्थत्वप्रतिपत्त्यर्थमाह; सुतत्थतदुभयविऊ सूत्रंच अर्थश्च तदुभयं चेति तच्च तत् सूत्रार्थलक्षणं, उभयंच तदुभयं च सूत्रार्थतदुभयानितानि विदंतीति सूत्रार्थतदु भयविदः,

किमुक्तंभवति ? सूत्रचिंतायां सूत्रमर्थचिंतायामर्थं, तदुभयचिंतायां च तदुभयं, ये विदंति, ते सूत्रार्थतदुभयविद इह सूत्रार्थविदने चतुर्भंगिका, सूत्रविदो नामैको नो अर्थविदः, नो सूत्रविदोऽर्थविदः २ अपरे सूत्रविदो अर्थविदोपि, ३ अन्ये नो सूत्रविदोनाप्यर्थविदः अत्र तृतीभंगेनाधिकारस्तत्रापि सूत्रवेलायां सूत्रविद्भिरर्थवेलायामर्थविद्भिस्तदुभयवेलायां तदुभयविद्भिरिति, सूत्रार्थतदुभयग्रहणं ।। अनिस्सियववहारकारी य इति निश्रारागः निश्रा संजाता अस्येतिनिश्रितो, ननिश्रितोऽनिश्रितः स चासौ व्यवहारश्च अनिश्रितव्यवहारस्तत्करणशीला अनिश्रितव्यवहारकारिण न रागेण व्यवहारकारिण इति भावः एकग्रहणे तज्जातीयस्यापि ग्रहणमितिन्यायादनुपश्रितव्यवहारकारिण इत्यपिद्रष्टव्यं, तत्र उपश्रा नाम द्वेषः उपश्रा संजाता अस्येति उपश्रितो न उपश्रितोऽनुपश्रितः स चासौ व्यवहारश्च तत्करणशीला अनुपश्रितव्यवहारकारिण; न द्वेषेण व्यवहारकारिण इत्यर्थः अथवा एषोऽनुवर्त्तितः स न मह्यमाहारादिकमानीय दास्यतीत्यपेक्षा निश्रा एष मदीयः शिष्यो यदि वा प्रतीच्छकोऽथवामदीयं मात्रादिकुलमेतत् मदीया वा एते श्रावका इत्यपेक्षा उपश्राशेषं तथैव, अत्रानिश्रितव्यवहारकारिण इति किमुक्तं भवति ? लंचोपचारनिरपेक्षाव्यवहारकारिणः न रागेण व्यवहारकारिण इति किमुक्तं भवति

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

पक्षपातनिरपेक्षव्यवहारपरिच्छेत्ता इति, अथ प्रियधर्म्मदृढधर्म्मसंविग्नसूत्रार्थतदुभयविद्ग्रहणे किं फलमित्यत आह ।।

[भा. १५] पियधम्मे दढधम्मेय, पच्चओ होइ गीयसंविग्गे ।
रागो उ होइ निस्सा उवस्सितो दोससंजुत्तो ।।

वृ- प्रियधर्म्मणि दृढधर्म्मे च समुच्चये भिन्नक्रमश्च, गीतेगीतार्थे सूत्रार्थतदुभयविदिसंविग्ने च प्रायश्चितं ददतिप्रत्येयो विश्वासो भवति यथायं प्रियधर्म्मा दृढधर्मोगीतार्थः संविग्नश्चे ति नान्यथा प्रायश्चित्तव्यवहारकारीति, प्रियधर्म्मादिपदानामुपन्यासः; तथा अनिश्रितव्यवहारकारिण इत्यत्र योनिश्राशब्दस्तदर्थमाचष्टे, रागस्तु भवति निश्रा, अनुपश्रितव्यवहारकारिण इत्यत्रोपश्रितशब्दस्य व्याख्यानमाह, उपश्रितोद्वेषसंयुक्तः, उपश्रा द्वेष इत्यनर्थांतरमितिभावः; द्वितीयं व्याख्यानं निश्रोपश्राशब्दयोर्दर्शयति ।।

भा. [१६] अहवाआहारादी दाहीइ मज्झ तु एस निस्साओ ।
सीसो पडिच्छओ वा होइ उवस्साकुलादी वा ।।

वृ- अथवेति व्याख्यानांतरोपदर्शने, एषोऽनुवर्त्तितः सन् मह्यमाहारादिकं दास्यतीत्येपापेक्षा लंचोपजीवनस्वभावा, निश्रा तथा एप मे शिष्य एप मे प्रतीच्छकइदं मे मातृकुलमिदं पितृकुलमादिशब्दात् इमे मम सहदेशनिवासिनो भक्ता वा इमे सदैव ममेत्यपेक्षाभ्युपगमस्वरूपा भवत्युपश्रा, अस्यां हि व्यवहारिणो द्रव्यव्यवहारिणो भवंति, गीयावालंचपक्खेहिं इति वचना त्तत एतयोः प्रतिषेधः उक्ता व्यवहारिणः, संप्रति व्यवहर्त्तव्यास्तेच नामादिभेदाच्चतुर्द्धास्तद्यथा नामव्यवहर्त्तव्या, स्थापनाव्यवहर्त्तव्या द्रव्यव्यवहर्त्तव्या भावव्यवहर्त्तव्याश्च, तत्र नामस्थापने प्रतीते, द्रव्य व्यवहर्त्तव्या अपि द्विधा आगमतो नोआगमतश्च, तत्रागमतो व्यवहर्तव्यशब्दार्थज्ञास्ते चानुपयुक्ता नोआगमतोपि त्रिधा, ज्ञशरीरभव्यशरीररूपाः प्रतीताः तद्व्यतिरिक्तस्तु द्विधा, लौकिका, लोकोत्तरिकाश्च, भावव्यवहर्त्तव्या द्विधा, आगमनोआगमभेदात् तत्र आगमतो व्यवहर्त्तव्यपदार्थज्ञाः सूत्रे चोपयुक्ताः, नोआगमतो लौकिका लोकोत्तरिकाश्च तत्र लौकिकद्रव्यभावव्यवहर्तव्य प्रतिपादनार्थमाह-

[भा. १७] लोए चोराईया, दव्वे भावे विसोहिकामाओ ।
जायमयसूतकादिसु, निज्जूढा पायकहयाओ ।।

वृ- लोके लोकविपया व्यवहर्त्तव्याद्विधा, तद्यथा द्रव्यव्यवहर्त्तव्या भावव्यवहर्त्तव्याश्च तत्र द्रव्ये द्रव्यव्यवहर्त्तव्यश्चौरादयः चौरः तस्करः आदिशब्दात्पारदारिकघातकहेरिकादिपरिग्रहः, ते हि चौर्यादिकं कृत्वापि न सम्यक् प्रतिपद्यंते, बलात्प्रतिपद्यमानाअपि च न भावतो विशोधिमिच्छंति, ततस्ते द्रव्यव्यवहर्त्तव्या, भावे भावविपया व्यवहर्त्तव्या विशोधिकामा एव, तुशब्दस्य एवकारार्थत्वात् विशोधौ कामोऽभिलाषो येषां ते विशोधिकामाः कथमस्माकमेततत्कुकर्म्मविपया विशुद्धिर्भविष्यतीति विशुद्धिप्रतिपत्त्यभ्युद्यता भावव्यवहर्तव्या इतिभावः, न केवलं द्रव्यव्यवहर्तव्याश्चौरादयः, किंतु जायमयसूयगाइसु निज्जूढा इत्यादि सूतकशब्दः प्रत्येकमभिसंबध्यते, जातसूतकं मृतसूतकं च, सूतकं नाम जन्मानंतरं दशाहानि यावत्, मृतकसूतकं नाम मृतानंतरं दशदिवसान् यावत्, तत्र जातकसूतके मृतकसूतकेवा आदिशब्दात् तदाद्येपु शुद्रगृहादिषु ये कृतभोजनाः संतो धिग्जातीयैर्निर्व्यूढा असंभाष्याः कृतास्तथा ये पातकहताश्च पातकेन ब्रह्महत्यालक्षणेन मातापितादिघातकलक्षणेन वा हताः पातकहताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेहि द्वयेऽपियदा न स्वदोषं प्रतिपद्यंते प्रतिपद्यमानावा न सम्यगालोचयंति, किंतु व्याजांतरेण कथयंति तदा द्रव्यव्यवहर्त्तव्या द्रष्टव्याः, तथाहि एगो धिज्ञाइतो उरालाएण्हुसाए चंडालीए वा अज्झो ववणो ततो तं काएण फासित्ता पायच्छित्तनिमित्तंचउव्वेयमुवट्ठितो भणति सुमिणेण्हुसं चंडालिंवागतोमि इति, एवमादयो द्रव्यव्यहर्तव्या तथा चाह । -

[भा.१८] फासेऊण अगम्मं, भणेइ सुमिणे गओ अगम्मंति ।
एवमादिलोयदव्वे उज्जु पुनहोइ भावंमि ।।

वृ- स्पृष्ट्वा कायेनेतिगम्यते अगम्यांस्नुषां चांडाल्यादिकां वा स्त्रियमिति शेषः, भणति प्रायश्चित्तनिमित्तं चतुर्वेदपुपस्थितः सन् यथा स्वप्ने अपेयपानं कृतवानहमित्यादिपरिग्रहः, लोयदव्वेति, लौकिका द्रव्यव्यवर्हतव्याः उज्जु पुन होइ भावंमि, अत्र सामान्यविवक्षायामेकवचनं, ततोऽयमर्थः त एव जातमृतकसूतकादिनिर्व्यूढादय रुजवः संतो यदासम्यगालोचयंति, तदा भावे भावविषया लौकिका व्यवहर्तव्या भवंति उक्ता लौकिकद्रव्यभावव्यवहर्तव्याः, संप्रति लोकोत्तरिकद्रव्यभावव्यवहर्तव्य-प्रतिपादनार्थमाह ।।

[भा.१९] परपच्चएण सोही दव्वुत्तरिओ उ होइएमादी ।
गीतो व अगीतो वा सब्भावउवट्ठिओ भावे ।।

वृ- यस्य शोधिः परप्रत्ययेन परआचार्यादिकः स एव प्रत्ययः कारणं तदा परप्रत्ययस्तेन किमुक्तं भवति, नूनमहं प्रतिसेवमान आचार्येण उपाध्यायेनाऽन्येन वा साधुना ज्ञातोऽस्मि, ततः सम्यगालोचयामीत्येवं परप्रत्ययेन यस्य शोधिप्रतिपत्तिरेवमादिशब्दात् यो गुरुदोषं सेवित्वा अल्पं कथयति, स्वकृतं चान्यकृतं ब्रवीति तदादिपरिग्रहः, लोकोत्तरिको द्रव्यव्यवहर्तव्यो भवति. भावे भावविषयः पुनः लोकोत्तरिको व्यवहर्तव्योगीतो वा गीतार्थो वा अगीतो वेति अगीतार्थो वा प्रायश्चित्तप्रतिपत्तयर्थं सद्भावेनोपस्थितः स च वक्ष्यमाणगुणैरुपेतः सन् भवतीति, तानेव गुणानुपदर्शयति-

[भा.२०] अवंके अकुटिले यावि कारणपडिसेवि तहय आहच्च ।
पियधम्मे बहुसुए, विइयं उवदेसि पच्छित्तं ।।

वृ- वक्रोऽसंयतो, न वक्रोऽवक्रः, संयतो विरत इत्यर्थः, अकुटिलो अमायी चशब्दादक्रोधी अमानी अलोभीश्चेतिपरिग्रहः, अपि पदार्थसंभावने, स चामून् पदार्थान् संभावयति, कारणे समापतिते सति नामैको यतनया प्रतिसेवते इत्येको भंगः । कारणे अयतनयेति द्वितीयः, अकारणेयतनयेति तृतीयः, अकारणेऽयतनयेति चतुर्थः, अत्र प्रथमभंगशुद्ध इति तत्प्रतिपादनार्थमाह ।। कारणप्रतिसेवीकारणे अशिवादिलक्षणे विशुद्धेनालंबनेन बहुशो विचार्य शुल्कादिपरिशुद्धलाभाकांक्षिवणिग्दृष्टांतेनाकृत्यं यतनया प्रतिसेवते इत्येवं शीलं कारणप्रतिसेवी, तहय आहच्चेति तथा चेति समुच्चये कारणेप्य-कृत्यप्रतिसेवी, न यदा तदा वा, किंतु आहच्च कदाचित् अन्यथा कदाचित् अन्यथा वादीर्धसंय-मस्फातिमनुपलक्षमाणो अथवा आहच्चेति कदाचिदकारणे पि प्रतिसेवी पियधम्मे य बहुसुए इति आद्यंतयोर्ग्रहणेमध्यस्यापिग्रहणमिति न्यायत् प्रियधर्म्मा दृढधर्म्मा संविग्नोऽवद्यभीरुः सूत्रार्थतदुभयविद इत्यपि दृष्टव्यं, एतसर्वेऽपि व्यवहर्त्तव्या, विइयंति अत्र द्वितियं मतांतरं केचिदाहुरवक्रादीनामपि प्रतिपक्षा व्यवहर्त्तव्या इति, उवदेव पच्छित्तं इह द्विविधः साधु गीतार्थोऽगीतार्थश्च तत्रयोगीतार्थः स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गीतार्थत्वादेवानाभाव्यं न गृह्णातीति न तस्योपदेशः यः पुनरगीतार्थस्तस्यानाभाव्यं गृह्णत उपदेशो दीयते, यथा न युक्तं तवानाभवात् गृहीतुं यदि पुनरनाभवत् ग्रहीष्यसि, ततस्तन्निमित्तं प्रायश्चित्तं भविष्यतीत्युपदेशदानं, तत एवमुपदेशे दत्ते सति दानप्रायश्चित्तं दीयते इति गाथासमासार्थः, अत्र शिष्यः प्राह कारणप्रतिसेवी भावव्यवहर्त्तव्य उक्तः स कथमुपपद्यते, प्रतिषिद्धं हि यतनयापि सेवमानो जिनाज्ञाप्रद्वेषकारी ननु स दुष्टभाव इति कथं भावव्यवहर्त्तव्यः ? नैष दोषो, जिनाज्ञाप्रद्वेषकारित्वाभावात् सतिकारणे प्रतिसेवायामपि वर्त्तते, जिनाज्ञामवलंब्यैव यथास्यामवस्थायां दीर्घसंयमस्फातिनिमित्त-मकृत्यप्रतिसेवायामपि प्रवर्त्तितव्यमिति, ततो न कश्चिद्दोषः, अपि च भगवंतो वीतरागा न मिथ्या कदाचनापि ब्रुवते, वीतरागतया तेषां मिथ्यावचन कारणभावात्; उक्तंच -

रागाद्वा द्वेषाद्वा मोहाद्वावाक्यमुच्यते ह्यनृतम् ।
यस्यतु नैते दोषास्तस्याऽनृतकारणंकिं स्यात् ।।

भगवता वा यतनयापि कारणे प्रतिसेविनो भावव्यवहर्त्तव्या उक्तास्तद्यदि भगवद्वचनाद् द्वितीयभंगवर्त्तिनोपि भावव्यवहर्त्तव्यास्ततः प्रथमभंगवर्त्तिनः सुतरां भावव्यवहर्त्तव्या भवेयुः तथा चाह

[भा.२१] आहच्च कारणंमि, सेवंनो अजयणं सिया कुज्जा ।
एसोवि होइ भावे, किं पुन जयणाए सेवंतो ।।

वृ- आहच्च कदाचित् गत्या कारणे अशिवादिलक्षणे अकृत्यं सेवमानः स्यात्कदाचित् अयतनां कुर्यात् अयतनया प्रतिसेवेतेतिभावः एषोपि भवद्वचनाद्भवति भावे व्यवहर्त्तव्य किं पुनर्यतनयाप्रतिसेवमानः प्रथमभंगवर्त्ती ससुतरांभवेद्भावेव्यवर्हतव्य इत्यर्थः, न तु केवलं प्रथमभंगवर्ती वा भगवद्वचनाद् भावे व्यवहर्तव्यः, किंतु तृतीयभंगवर्त्त्यपि तथा चाह -

[भा.२२] पडिसवियंमि सोहिं काहं आलंबणं कुणइ जो उ ।
सेवंतोवि अकिच्चं, ववहरियव्वो स खलु भावे ।।

वृ- कारणमंतरेणाऽपि यतनया प्रतिसेविते अकृत्ये पश्चात् शोधिं प्रायश्चित्तमहं करिष्यामीत्येवंरुपमालंबनं यः करोति, किमुक्तं भवति, एवंरुपेणालंबनेनाकृत्ये यः प्रवृत्तिं चिकीर्षति, स तथा रुपमालंबनं कृत्वा प्रतिसेवमानो ऽप्य कृत्यं खलु निश्चितं भावे व्यवहर्त्तव्यः अंतःकरण-विशुद्धिपुरस्सरं यतनया प्रवर्तमानत्वेन भावतो व्यवहारयोग्यत्वात्; किमुक्तं भवति ? अकारणे यतनयेति तृतीयभंगवर्त्यपि भगवद्वचनाद्य व्यवहर्तव्यो वेदितव्य इति, तदेवं चतुर्भंगिकायामाद्यभंगत्रयवर्तिनो भावव्यवहर्तव्य उक्ताः संप्रति चुतर्भंगिकामनपेक्ष्यान्यथैव भावव्यवहर्तव्यलक्षणमाह-

[भा.२३] अहवा कज्जाकज्जे जताजतो वावि सेविउं साहू।
सब्भावसमाउट्टो, ववहरियव्वो हवइ भावे ।।

वृ- अथवेति प्रकारांतरे तद्य प्रकारांतरमिदं प्राक्चतुर्भंगिकां प्ररुप्य भावव्यवहर्त्तव्या उक्ताः संप्रति तु तामनपेक्ष्यैव भावव्यवहर्त्तव्योऽभिधीयते, कथमितिचेदत आह, कज्जाकज्ज कार्येऽशिवादिनिस्त-रणलक्षणे प्रयोजने अकार्य तथाविधपुष्ट प्रयोजनाभावे जयाजयोवेति यतमानो वा अयतमानो वा साधुरकृत्युं सेवित्वा सद्भावे पुनकरणलक्षणया तात्विक्या वृत्त्यासमावृत्तोऽकृत्यकरणात् प्रत्त्यावृत्तः सन् गुरोः समीपे यः आलोचयतीतिशेषः, स भावे भवति व्यवहर्त्तव्यः, भावतोऽकृत्यकरणतः प्रत्त्यावृतत्वात् संप्रति प्राक्प्ररुपितायां चतुर्भंगिकायां यश्चतुर्थो भंगस्तत्प्ररुपणार्थमाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२४] निक्कारणं पडिसेवी कज्जे निद्धंधसो अणवेक्खो ।
देसं वा सव्वं वा गुहिस्सं दव्वओएसे ।।

वृ- यो निष्कारणे कारणमंतरेण प्रतिसेवी, अकृत्यप्रतिसेवनशीलः, कज्जेनिद्धंधसोत्ति अत्र अपिशब्दोऽनुक्तोऽपि गम्यते सामर्थ्यात्, ततोऽयमर्थः कार्येऽपि तथाविधे समुत्पन्ने निद्धंधसो देशीवचनमेतत् अकृत्यं प्रतिसेवमानोनारंभाधिकतारंभविराध्यमान प्राण्यनुकंपा पर इत्यर्थः च समुच्चये स च भिन्नक्रमोऽनपेक्षश्चेत्येवं योजनीयः न विद्यतेऽपेक्षा वैरानुबंधो मे विराध्यमान जंतुभिः सह भविष्यति संसारो वा दीर्घतर इत्येवंरुपा यस्याऽसावनपेक्षः हा दुष्टुकृतं मयेति पश्चादनुतापरहितइतिभावः तथा यः प्रतिसेवित्वादेशं गूहयिष्यामि किंचिन् मात्रमालोचयिष्यामि न सर्वमिति भावः सव्वंवत्ति सर्वं वा गूहयिष्यामि न किंचिदालोचयिष्यामीत्यर्थ इति चिंतयति, चिंतयित्वा च तथैव करोति एष द्रव्यत्तो वेदितव्यः किंवानेत्यत आह -

[भा.२५] सो वि हु ववहरियव्वो, अनवत्थावारणं तदन्नेय ।
घडगारतुल्लसीलो अनुवरओसन्नमज्झत्ति ।।

वृ- सोऽप्यनंतरोक्तस्वरुपो द्रव्यव्यवहर्त्तव्यो, व्यवहर्त्तव्यमेव किं कारणमत आह, अनवत्था वारणंतदन्नेय इति तस्मिन् व्यवह्रियमाणे अनवस्थावारणं भवति, तदन्ये च निषिद्धा जायंते किमुक्तं भवति सोप्यनवस्थाया मा पुनरकृत्यं कार्षीत्, तदन्ये च तं तथा प्रवर्त्तमानं दृष्ट्वा मा तथाप्रवृत्तिंकार्षुरिति, स च व्यवहर्तुमिष्यमाणः पूर्वमेव वक्तव्यो, यथा आलोचय महाभाग स्वकृतमपराधमनालोचिताऽ-प्रतिक्रांतो हि दीर्घसंसारभाग्भवतीति, एवं च भण्यता यो ज्ञायते प्रतिपत्स्यते शिक्षावचनं प्रतिपद्य चाकृत्यकरणात् विरतो विरम्य च न भूयः प्रतिसेवीति, यस्तु तथा भण्यमानोपि न सम्यगकृत्यकरणादु-परमते, सोऽनुपरतो घटकारतुल्य शीलः कुंभकारसदृशस्वभावोऽवसन्नमध्यो द्रष्टव्यो न तु व्यवहर्त्तव्यः, अथ कोऽसौ कुंभकारो यत्सदृशस्वभावः सन्न व्यवहर्तव्यः ? उच्यते, कुंभकारसालाए साहू ठिया तत्थ आयरिएण साहू वुत्ता अज्जो ? एसु कंभगारभायणेसु अप्पमादी भवेज्जाह, मा भंजिहह तत्थ पमादी चेल्लगोकुंभगारभायणं भंजिऊण मिछामि दुक्कडं भणइ एवमभिक्खणं दिने दिने, ततो सो कुंभगारो रुठो, तं चेल्लगं कियाडियाए घेतुं सीसे खडुंकोक्को नामटोल्लतो मिच्छामि दुक्कडं भणइ; चेल्लओ भणद, किं ममं निरवराहं पिट्टंसि ? कुंभगारो भणइ, भाणगाणि तए भंगाणि चेन्नओ भणइ, मिच्छादुक्कडं कयं कुंभकारो भणइ मएवि मिच्छादुक्कडं कयं, नत्थि कम्मबंधो मम तव पहारं देंतस्स, एसो कुंभगारमिच्छादुक्कडसरिस मिच्छादुक्कडो अव्यवहरियव्वो, तदेवं तहय आहच्चेति व्याख्यातं संप्रति पियधम्मे य बहुसुए इत्यस्य व्याख्यानमाह -

[भा.२६] पियधम्मोजावसुयंववहारन्ना उ जेसमक्खाया ।
सव्वेवि जहादिट्ठा ववहरियव्वा य ते होंति ।।

वृ- इहाद्यंतग्रहणे मध्यस्यापि ग्रहणमिति न्यायात्, पियधर्म्मबहुश्रुतग्रहणे तदंतरालवर्त्तिनामपि दृढधर्म्मादीनां ग्रहणं, ततः प्रियधर्मण आरभ्य यावत् श्रुतंसूत्रार्थतदुभयविद इति पदं तावत् ये व्यवहारज्ञा व्यवहारपरिछेदकर्त्तारः प्राक्समाख्यातास्ते सर्वेऽपि यथोद्दिष्टा यथोक्तस्वरुपा व्यवहर्त्तव्या भावव्यवहर्त्तव्या भवंति, प्रत्येतव्या इति शेषः, प्रियधर्म्मादितया सूत्रार्थतदुभयवित्तया च तेषां प्रज्ञापनीयत्वात इति व्यवहारः प्रायश्चित्तव्यवहार आभवत्सचित्तादिव्यवहारश्चतत्रद्विविधेऽपि व्यवहारे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहर्त्तव्यं प्रायो गीतार्थेन सह-नागीतार्थेन तथा चाह -

[भा.२७] अगीएणं सद्धिं, ववहरियव्वं न चेव पुरिसेन ।
जम्हा सो ववहारे कयंमि सम्मं न सद्दहति ।।

वृ- इह यः स्वयं व्यवहारमवबुध्यते प्रतिपाद्यमानो वा प्रतिपद्यते व्यवहारं, स गीतार्थ इतरस्त्वगीतार्थः, तत्रागीतेनागीतार्थेन सार्द्धं नैव पुरुषेण व्यवहर्त्तव्यं; कस्मादित्याह, यस्मात् सोऽगीतार्थो व्यवहारे कृतेऽपि न सम्यक् श्रद्धते न परिपूर्नमपि व्यवहारं कृतं, तथेति प्रतिपद्यते, इति तस्माद् गीतार्थेन सह व्यवहर्त्तव्यं, यत आह -

[भा.२८] दुविहंमि ववहारे गीयत्थो पणविज्जई जं तु ।
तं सम्मं पडिवज्जइ गीयत्थंमी गुणा चेव ।।

वृ- द्विविधेऽपि प्रायश्चित्तलक्षणे आभवत्सचित्तादिव्यवहारलक्षणे च व्यवहारे गीतार्थो यत्प्रत्याख्याप्यते, पाठांतरं पणविज्जइ प्रज्ञाप्यते तत्सम्यक् प्रतिपद्यते गीतार्थत्वात्तथा चाह गीयत्थंमी गुणा चेव, गीतार्थे गुणा एव नाऽगुणाः अगुणवतो गीतार्थत्वायोगात्, यथा च गीतार्थः संप्रतिपाद्यमानः, सम्यक् प्रतिपद्यते, तथा प्रतिपादयन्नाह.

[भा.२९] सचितादुप्पन्ने, गीयत्था सइ दुवेण्ह गीयाणं ।
एगयरेउ निउत्ते, सम्मं ववहारसद्दहणा ।।

वृ- दोणि जना गीयत्थाविणओवसंपया इव विहरंति तेसिं सचिताइ किंचिउप्पणं, तन्निमित्तं ववहारो जातो एगो भणइ मम भवति बिइओ मम भवइ, तत्थयसमीवे अन्नो गीयत्थो नत्थि, जस्स सगासे गच्छंति; ततो एगेन बिइउ भणीतो अज्जो तुमं चेव ममं पमाणं मे भणाहि कस्सा भवति ततो सो एवं निउत्तो चिंतेइ तित्थयरानंतरे संघे अहं ठविलो, ता कहमहं तित्थयरानंतरं संघमइक्कमामिति भणइ तुमं चेवाभवति न ममंति एष भावार्थः, अक्षरयोजनात्वेवं सचित्ताद्युत्पन्ने आदिशब्दादचित्तमिश्रपरिग्रहः, समासश्च कर्मधारयस्ततोऽयमर्थः सचित्तशिष्येऽचित्ते वस्त्रादौ मिश्रे सोपकरणे शिष्ये उत्पन्ने सति द्वयोः गीतार्थयोः परस्परं विवदमानयोः अन्यस्मिन् समीपे व्यवहारपरिच्छेदकर्त्तरि गीतार्थेऽसति कथमप्येकतरस्मिन् गीतार्थतया निवृत्ते विवादात् प्रत्यावृते प्रागुक्तनीत्याव्यवहारश्रद्धानं भवति, सम्यक्व्यवहार-प्रतिपत्तिरुपजायते, कथमित्यत आह गीयोणाइयंतो इत्यादि ।

[भा.३०] गीतो आणाइयंतो, छिंद तुमं चेव छेदितो संतो ।
कहमंतरमिवावेति, तित्थयरानंतरं संघं ॥

वृ- गीतोगीतार्थो अनतिक्रामन् यत् विवादादनतिक्रामन् द्वितीयेन गीतार्थेन सचिताद्युत्पादन-सहवर्त्तिना व्यवहारममुं त्वमेव छिन्द्धि, न हित्वमगीतार्थो, नापि युक्तमयुक्तं वा त्वं न जानासि इत्येव च्छिंदितो निमंत्रितः सन् चिंतयति, अहमनेनास्मिन् व्यवहारे प्रमाणीकुर्वता तीर्थकरानंतरसंघमध्यवर्त्ती स्थापितः संघश्चभगवदाज्ञावर्त्तितया यथावस्थितार्थवक्ता अन्यथा तीर्थकरानंतरत्वायोगात्, तद्यदिलोभादितयाकथमपि व्यवहारं विलोप्स्यामि ? ततो मयैव तीर्थकरानंतरः संघोऽतरितः कृतो भवेत्, ततु एवं जानन् व्यवहारविलोपनेन कथमहं तीर्थकरानंतरं संघमंतरे स्थापयामि अंतरयामीति चिंतयित्वा सोऽवादीत् तवैवेदमाभवति न ममेति, तस्मात् द्विविधो व्यवहारो गीतार्थेन सह कर्त्तव्यो, नागीतार्थे-नगीतार्थश्च प्रियधर्म्मादिगुणोपेत इति प्रियधर्मादयो भावव्यवहर्त्तव्याः, ननु ये प्रियधर्म्मादयस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रियधर्म्मत्वादिगुणैरेवाकल्प्यं न किमपि प्रतिसेविष्यंति, इति, कथं व्यवहर्त्तव्या निर्दिश्यंते, व्यवहारहेत्व-कल्प्यंप्रतिसेवनासंभवात्, नैष दोषः, प्रमादवशतस्तेषामपिकदाचिदकल्प्यप्रतिसेवनोपपत्तेः, अन्यच्च प्रमादाभावेपि कदाचिदशिवाद्युत्पत्तौ गुरुलाधवं पर्यालोच्य दीर्धसंयमस्फातिनिमित्तमकल्प्यमति-प्रतिसेवंते, ततो भवति तेषामपि व्यवहारयोग्यतेति व्यवहर्त्तव्या निर्दिष्टाः अथ ये पियधर्मादिगुणोपेता अपि प्रमादिनस्ते कथं व्यवह्रियंते, पमादितया तेषां व्यवहार योग्यताया अभावात् तत आह ।।

[भा.३१] पियधम्मे दढधम्मे, संविग्गे चेव जे उ पडिवक्खा ।
ते वि हु ववहरियव्वा किं पुन जे तेसिं पडिवक्खा ।।

वृ- प्रियधर्म्मणि दढधर्म्मे संविग्ने च ये प्रतिपक्षा अप्रियधर्म्मा अदढधर्म्मा असंविग्नाश्च तेप्यनवस्थावारणाय तदन्यनिषेधाय वहु निश्चितं व्यवहर्त्तव्य भगद्भिरुक्ताः किं पुनर्ये तेषामप्रियधर्म्मादीनां प्रतिपक्षाः प्रियधर्म्मदृढधर्म्मसंविग्नास्ते सुतरां व्यवहर्त्तव्या प्रियधर्मादितया तेषां भावतो व्यवहारप्रवृत्तेः, तदेवं पियधम्मेय बहुसुए इत्येतद्व्याख्यातं; संप्रति द्वितीयमित्यवयवं व्याचिख्यासुराह

[भा.३२] बिइयमुवएस अवंकाइयाण जे होंति उ पडिवक्खा ।
तेवि हु ववहरियव्वा, पायच्छित्ताभवंते य ।।

वृ- द्वितीय उपदेश आदेशो मकारोऽलाक्षणिकः, द्वितीयं मतांतरमित्यर्थः, अवक्रादीनां ये भवंति प्रतिपक्षाः वक्रः कुटिलो निष्कारणप्रतिसेवी, तथा सततप्रतिसेवनाशीलोऽप्रियधर्मा यावदबहुश्रुतस्तेऽपि केचिद् व्यवहारयोग्यतया अपरेऽनवस्थावारणाव तदन्यनिषेधायवा आभवति प्रायश्चित्ते व्यवहर्त्तव्याः, संप्रतिउवदेसपच्छित्तमित्येतत् व्याचिख्यासुराह-

[भा.३३] उपदेसो उ अगीए दिज्जइ बिइओ उ सोधिववहारो ।
गहिएविअनाभव्वे, दिज्जइ बिइयं तु पच्छित्तं ।।

वृ- साधुर्द्विविधो गीतार्थोऽगीतार्थश्च, तत्र यो गीतार्थः स स्वयमेव जानीते, जानानस्य च नोपदेशः, यस्त्वऽगीतार्थः स युक्तायुक्तपरिज्ञानविकलतयाऽनाभाव्यमपि गृह्णाति ततस्तस्मै अगीताय अगीतार्थाय उपदेशो दीयते, यथा न युक्तं तवानाभाव्यं ग्रहीतुं यो ह्यनाभाव्यं गृह्णाति तस्य तन्निमित्तं प्रायश्चित्तमाभवति, एवमुपदिश्य तस्यानाभाव्यं ग्रहणप्रवृत्तिनिमित्तं दानप्रायश्चित्तं दीयते, तथा चाह बिइओ उ सोहिववहारो शोधिः प्रायश्चित्तं अनाभाव्यं गृह्णाति, प्रथमत उपदेशो दीयते, द्वितीय-शोधिदानव्यवहारः तदेतदनाभाव्यं गृह्णंतं प्रत्युक्तं; संप्रति गृहीतानाभाव्यं प्रत्याह गहिए वीत्यादि अपिशब्दः समुच्चये न केवलमनाभाव्ये गृह्यमाणे, किंतु गृहीतेऽप्यनाभाव्ये दीयते, प्रथमत उपदेश इति गम्यं, तदनंतरं सूत्रमुच्चार्य प्रायश्चित्तं यथावस्थितं कथयित्वा एतत्तवाभवति प्रायश्चित्तमिति प्रथमं, ततो तदानप्रायश्चित्तं दीयत इति द्वितीयं. अथ प्रायश्चित्तमिति कः शब्दार्थः कतिविधं प्रायश्चित्तमिति प्रश्नमुपजीव्य प्रायश्चित्तनिरुक्तादि द्वारकलापप्रतिपादनाय द्वारगाथामाह ।-

[भा.३४] पायच्छित्तनिरुत्तं, भेया जत्तो परुवणबहुलं ।
अज्झयणाण विसेसो, तदरिहपरिसा य सुत्तत्थो ।।

वृ- प्रथमतः प्रायश्चित्तशब्दार्थो वक्तव्यः, ततः प्रायश्चित्तस्य भेदाः प्रतिसेवनादयो वक्तव्याः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनंतरं यतो निमित्तात् प्ररुपणात पृथक्त्वप्ररुपणाबाहुल्यं किमुक्तं भवति यतो निमित्तात् प्रतिसेवनातः संयोजन प्रायश्चित्तमारोपणा प्रायश्चित्तं परिकुंचना प्रायश्चित्तं च पृथगुपपद्यते तद् वक्तव्यं ततोऽनयोः कल्पाध्ययनव्यवहाराध्ययनयोर्विशेषो नानात्वं वक्तव्यं, तदनंतरं तदर्हा प्रायश्चित्तार्हा पर्षद् वाच्या ततःसूत्रार्थः एव द्वारगाथा संक्षेपार्थः, व्यासार्थं तु प्रतिद्वारं वक्ष्यति, तत्र निरुक्तद्वारप्रतिपादनार्थमाह ।

[भा.३५] पावं छिंदइ जम्हा, पायच्छित्तं तु भन्नए तेनं ।
पाएण वा विचित्तं, विसोहए ते न पच्छित्तं ।।

वृ- यस्मात् शोधिरुपोव्यवहारोऽपराधसंचितं पापं छिनत्ति विनाशयति, तेन कारणेन सप्रायश्चित्तं भण्यते, पृषोदरादित्वादिष्टरुपसिद्धिः, अथवा प्रायोऽपराधमलिनं चित्तं जीवमत्र चित्तशब्देन चित्तचित्तवतोरऽभेदोपचारात् जीवोऽभिधीयते, तथा चाह चूर्णिकृत् चित्त इति जीवस्याख्येति विशोधयत्यपराधमलरहितं करोति तेने कारणेन प्रायश्चित्तं, प्रायः प्रायेण चित्तं यथावस्थितं भवत्यस्मादिति प्रायश्चित्तमितिव्युत्पत्तेः, गतं निरुक्तद्वारभिदानीं भेदद्वार प्रतिपादनार्थमाह ।।

[भा.३६] पडिसेवणा य संजोयणाय आरोवणा य बोधव्वा ।
पलिउंचणा चउत्थी पायच्छित्तंचउद्धा उ ।।

वृ- प्रतिपिद्धस्य सेवना प्रतिसेवना, अकल्प्यसमाचरणमिति भावः, च समुच्चये, संयोजना शय्यातरराजपिंडादिभेदभिन्नाऽपराधजनितप्रायश्चित्तानां संकलनाकरणं, आरोप्यते इति आरोपणा प्रायश्चितानामुपर्युपर्यारोपणं, यावत् षण्मासाः, परतो वर्द्धमानस्वामितीर्थे आरोपणायाः प्रतिषेधात्, परिकुंचनं परिकुंचना गुरुदोषस्य मायया लघुदोषस्य कथनं यथा सचित्तं प्रतिपेव्य मया अचित्तं प्रतिषेवितमित्याहेति एषा प्रतिसेवनाद् आरभ्य गण्यमाना चतुर्थी, एवमेतत् प्रायश्चित्तं चतुर्द्धा भवति, तत्र यथोद्देशं निर्देश इति न्यायत् प्रथमतः प्रतिषेवणोच्यते, प्रतिषेवणा प्रतिषेवकप्रतिषेव्यव्यतिरेकेण नोपपद्यते, सकर्म्मकक्रियायाः कर्त्तृकर्म्मव्यतिरेकेणासंभवात् ततस्त्रयाणामपि प्ररुपणां चिकीर्षुरिदमाह

[भा.३७] पडिसेवओ य पडिसेवणा य पडिसेवियव्वयं चेव ।
एएसिं तु पयाणं पत्तेयपरुवणं वोच्छं ।।

वृ- प्रतिपिद्धं सेवते इति प्रतिषेवकः, प्रतिषेवकः प्रतिषेवणक्रियाकारी, च समुच्चये प्रतिषेवणा अकल्प्यसमाचरणं, प्रतिषेवित व्यमकल्प्यनीयमेतेषां त्रयाणामपि पदानां प्रत्येकं प्ररुपणां वक्ष्ये प्रतिज्ञामेव निर्वाहयति ।।

[भा.३८] पडिसेवओ सेवंतो, पडिसेवणमूलउत्तरगुणे य ।
पडिसेवियव्वदव्वं रुविव्व सिया अरुविव्व ।।

वृ- प्रतिषेवकोनामाकल्पंसेवमानः प्रतिषेवना अकल्प्यसमाचरणं सा च द्विधा मूलउत्तरगुणे य इति गुणशब्दः प्रत्येकमभिसंबध्यते, मूलगुणविषया उत्तरगुणविषया च, यच्च कार्यं समाचर्यमाणं मूलगुणप्रतिघाति उत्तरगुणप्रतिघाति वा तत् प्रतिषेवितव्यं तच्च द्रव्यं पर्याया वा, तत्र पर्याया द्रव्य एवांतर्भूताविवक्षिताभेदाभावादिति द्रव्यंद्रष्टव्यं, तथा चाह, द्रव्यं तच्च स्यात् कदाचित् रुपि आधाकर्म्माद्योदनादि वा विकल्पे अरुपि वा आकाशादि तदपि हि मृषावादादिविषयतया भवति, कदाचित् प्रतिषेवनीयं, इह प्रतिषेवणामंतरेण न प्रतिषेवकस्य सिद्धि र्नापि प्रतिषेवनीयस्य, ततः प्रतिषेवणाया विशेषणः प्ररुपणामाह ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३९] पडिसेवणा उ भावो सो पुन कुसलो य होज्ञकुसलो वा।
कुसलेण होइ कप्पो, अकुसलपरिणामतो दप्पो ॥

वृ- प्रतिषेवणा द्विविधा द्रव्यरुपा भावरुपाच प्रतिषेवणक्रियायाः कर्त्तुकर्म्मगतत्वात् तत्र चातस्य तस्य वस्तुनः प्रतिषेव्य मानता सा द्रव्यरुपा प्रतिषेवणा, यस्तु जीवस्य तथा प्रतिषेवकत्वपरिणामः, सा भावरुपा प्रतिषेवणासैव चेह ग्राह्या, जीवपरिणामानुरुपतः प्रायश्चित्तविधिप्रवृत्तेः, तथा चाह पडिसेवणा उ भावो प्रतिषेवणा नाम तुरेवकारार्थो भिन्नक्रमश्च, भाव एव जीवस्याध्यवसाय एव नान्य, स च भावो द्विधा कुशलोऽकुशलश्च, तत्र कुशलो ज्ञानादिरुपोऽकुशलोऽविरत्यादिरुपः, तत्र या कुशलेन परिणामेन बाह्यवस्तुप्रतिसेवना सा कल्पः पदैकदेशे पदसमुदायोपचारात् कल्प्यः प्रतिषेवणा कल्पिका इति भावः, या पुनरकुशलपरिणामतः प्रतिषेवणा सा दर्प्पः, दर्प्प प्रतिषेवणा दर्प्पिका इत्यर्थः, आह किमेषां त्रयाणामपि परस्परमेकत्वं नानात्वं, वा उच्यते, उभयमपि, कथमित्यत आह -

[भा.४०] नाणी न विणा नाणं नेयं पुनतं सणन्नमन्नं च ।
इय दोणमनाणत्तं भइयं पुनसेवियव्वेण ।।

वृ- यथा ज्ञानं विना अंतरेण ज्ञानी न भवति, ज्ञानपरिणामपरिणततयैव ज्ञानित्वव्यपदेशभावादिति तयोर्ज्ञानिज्ञानिनोरेकत्वं, इह दोण्हमनाणतंति इति एवं ज्ञानिज्ञानगतेन प्रकारेण द्वयोः प्रतिसेवक-प्रतिसेवनयोरनानात्वमेकत्वं, प्रतिषेवनामंतरेण प्रतिषेवकस्याप्यभावात्, प्रतिसेवनापरिणामपरिणतावेव प्रतिसेवकत्वव्यपदेशप्रवृत्तेः, नेयं पुनं तेसणन्न मन्नं च इति, पुनःशब्दो विशेषद्योतने स चामुं विशेषं द्योतयति, न ज्ञानज्ञानिनोः परस्परमविज्ञेयेनापिसहाय एकत्वं किंतु ज्ञेयं तयोर्ज्ञानज्ञानिनोरनन्यत् अन्यच्च, किमुक्तं भवति ज्ञानिनोज्ञानाच्च ज्ञेयं किंचिदन्यत् किंचिदनन्यत् तथाहि यदा ज्ञानी आत्मालंबन-ज्ञानपरिणामपरिणतस्तदा ज्ञानज्ञानिनोरेकत्वं यदात्वात्मव्यतिरिक्त-घटाद्यालंबनज्ञानपरिणाम-परिणतस्तदा न्यत्वमात्मनो घटादीनामन्यत्वात् ज्ञानमपि यदाभिनिबोधिकादिस्वरुपालंबनं तदा ज्ञानज्ञेययोरेकत्वं, यदा तु स्वव्यतिरिक्तघटाद्यालंबनं तदान्यत्वं. घटादीनां ज्ञानात् मूर्त्तामूर्त्ततया पृथग्देशादितया च भिन्नत्वात् भइयं पुन सेवियव्वेण अत्रापीतीत्यनुवर्तते, इति उक्तेन प्रकारेण प्रतिषेवकप्रतिषेवणीयोरनानात्वं भक्तं विकल्पितं, पुन र्नानात्वं सेवितव्येन प्रतिषेवितव्येन कदाचिन्नानात्वमित्यर्थः तथाहि यदा प्रतिसेवते, नानात्वं कीटकादिसत्वानां साधोः पृथग्भूतत्वात् प्रतिसेवनात् यदा प्रतिसेवना प्रतिसेवकस्याध्यवसायः स तर्हि यदात्मव्यापादनविषयस्तदा प्रतिसेवनाप्रतिसेवनयोरेकत्वं यदा तु बाह्यस्त्र्यादिप्रतिसेवनाविषयः तदानानात्वं स्त्र्यादिप्रतिसेव-कादन्यत्वात् संप्रति यत्प्राग्मूलोत्तरगुणविषयतया प्रतिसेवनाया द्वैविध्यमुक्तं, तद्विभावयिषुराह ।।

[भा.४१] मूलगुणे उत्तरगुणे, दुविहा पडिसेवणा समासेन ।
मूलगुणे पंचविहात पिंडविसोहाइया इयरा ।।

वृ- प्रतिसेवना समासेन संक्षेपेण द्विविधा, तद्यथा मूलगुणे मूलगुणविषया उत्तरगुणे उत्तरगुणविषया, तत्र मूलगुण विषया पंचविधा प्राणतिपातमृषावादादत्तादानमैथुनपरिग्रहरुपा इतर उत्तर गुणविषया पिंडविशुध्यादिविषया अनेकविधा, अत्रादिशब्दात्समित्यादिपरिग्रहः किमुक्तं भवति मुलगुणेषु प्राणातिपातविरत्यादिषु उत्तरगुणेषु पिंडविशुध्यादिषु यथाक्रमं प्रतिसेवना प्राणतिपातादिलक्षणा पंचविधा आधाकर्मोपभोगादिलक्षणा अनेकविधेति, तत्र मूलगुणप्रतिसेवनासंरंभादिभेदर्नाश्चत्रा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरगुणप्रतिसेवनात्वतिक्रमादिभेदतस्तथा चाह -

[भा.४२]　　सा पुन अइक्कमवइक्कमे यअइयारा तह
अनायारे संरंभ समारंभ आरंभ रागदोसादी ।।

वृ- सा उत्तरगुणप्रतिसेवना पुनरतिक्रमे व्यतिक्रमे अतिचारे अनाचारे च भवति, एतदुक्तं भवति, सर्वाप्युत्तरगुणप्रतिसेवना अतिक्रमादिभेदतश्चतुःप्रकाश, मूलगुणप्रतिसेवना संरंभे समारंभे, आरंभे च, संरंभादिभेदतस्त्रिप्रकारेतिभावार्थः, ते च संरंभादयो रागद्वेषादितः रागतो द्वेषत आदिशब्दादज्ञानतश्च; तत्र रागतो यथा चिलातीपुत्रस्य सूसुमावधः द्वेषतो यथा सत्यके द्वैपायनव्यापादनमज्ञानतो ब्राह्मणादीनां छागादिवधः ननु यथोद्देशस्तथा निर्देश इति प्रथमतो मूलगुणप्रतिसेवनाव्याख्यातुमुचिता पश्चादुत्तरगुणप्रतिसेवना अत्र तु विपर्यय इति कथं ? उच्यते, इह प्रायः प्रथमतोऽल्पसंक्लिष्टाऽध्यवसायः स तूत्तरगुप्रतिसेवनां कुरुते, पश्चादतिसंक्लिष्टाध्यवसायो मूलगुणप्रतिसेवनामिति ख्यापनार्थं विपर्ययेणोपन्यास इत्यदोषः, संप्रति अतिक्रमादीन्पिंड विशुद्धिमधिकृत्य व्याचिख्यासुराह

[भा.४३]　　आहाकम्मनिमंतण, पडिसुणमाण अतिक्कमो होई ।
पयभेयाइवइक्कम, गहिए तइएतरोगिलिए ।।

वृ- कोऽपि श्राद्धो नालप्रतिबद्धो ज्ञातिर्पतिबद्धो गुणानुरक्तो वा आधाकर्म्म निष्पाद्य निमंत्रयति, यथा भगवन् युष्मन्निमित्तमस्मद्गृहे सिद्धमन्नमास्ते इति समागत्य प्रतिगृह्यतामित्यादि तत् प्रतिशृणोति प्रतिश्रवणानंतरं चोत्तिष्ठति, पात्राण्युद्गृहणाति उद्गृह्य च गुरोः समीपमागत्योपयोगं करोति, एप समस्तोपि व्यापारोऽतिक्रमः, उपयोगपरिसमाप्त्यनंतरं च यदाधाकर्म्मग्रहणाय पदभेदं करोति, आदिशब्दान् मार्गे गच्छति, गृहं प्रविशति, आधाकर्म्मग्रहणाय पात्रं प्रसारयति, न चाद्यापि प्रतिगृह्णाति, एप सर्वोपि व्यापारो व्यतिक्रमः गहिए तईओत्ति आधाकर्म्मणि गृहीत्ते उपलक्षणमेतत् यावद्वसतौ समानीने गुरुसमक्षमालोचिते भोजनार्थमुपस्थापिते मुखे प्रक्षिप्यमाणेऽपि यावन्नाद्यापिगिलति तावत् तृतीयोऽतिचारलक्षणो दोपः, गिलिते त्वाधाकर्म्मणानाचारः, एवं सर्वेष्वप्यौद्देशिकादिषु भावनीयं, अत्रैव प्रायश्चितमाह -

[भा.४४]　　तिन्निय गुरुगामा सा विसेसिया तिण्हवगुरु अंते ।
एए चेव य लहुया विसोहिकोडीए पच्छित्ता ।।

वृ- त्रयाणामति क्रमव्यतिक्रमातिचाराणां त्रयो गुरुकामा सा कथंभूता इत्याह विशेपितास्तपः काल विशेपिताः किमुक्तं भवति अतिक्रमेऽपिमासगुरुरतीचारेऽपिमासगुरुरेते च त्रयोऽपि यथोत्तरं तपःकालविशेपिताः अथ अंते अनाचारलक्षणे दोपे चतुर्गुरु चतुर्मासगुरुप्रायश्चित्तं, एते च मासगुर्वादयः प्रायश्चितभेदा अतिक्रमादिष्वपि शोधिकोट्या त्वेत एवमासादयोलघुका प्रायश्चितानि तद्यथा अतिक्रमे मासलघुव्यतिक्रमेऽपि मास लघु, अतिचारेऽपि मास लघु नवरमेते यथोत्तरंतपःकालविशेपिताः अनाचारे चतुर्म्मासलघुः मूलगुणे पंचविधा प्रतिसेवनेति यदुक्तं तत्र पंचविधत्वं दर्शयति ।।

[भा.४५]　　पाणिवहमुसावाएअदत्तमेहुणपरिग्गहे चेव ।
मूलगुणे पंचविहा परुपणा तस्सिमा होई ।।

वृ- प्राणवधस्त्रसस्थावरप्राणिहिंसा, मृषावादो भूतोपधातिवचः, अदत्तादान स्वामिगुर्वननुज्ञात ग्रहणं, मैथुनं स्त्रीसेवा, परिग्रहः स च वाह्याभ्यंतरस्वस्तुपु मूर्च्छा सर्वत्र एकारांतता प्राकृतलक्षणवशात्

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

मूलगुणे मूलगुणविषया पंचविधा प्रतिसेवना तस्याश्च पंचविधायाः प्रतिसेवनायाः संरंभादिभेदतः प्रतिभेदंत्रिरूपाया इयं वक्ष्यमाण प्ररुपणा संरंभादिव्याख्यानरूपा भवति तामेव दर्शयति ।।

[भा.४६] संकप्पो संरंभो परितावकारी भवे समारंभो ।
आरंभाउ द्दवउ, सव्वनयाणंपि सुद्धाणं ।।

वृ- प्राणातिपातं करोमीति यः संकल्पोऽध्यवसायः स संरंभो यस्तु परस्य परितापकरो व्यापार ससमारंभः अपद्रावयतो जीवितात्परं व्यपरोपयतो व्यापारः आरंभः आह च चूर्णीकृत् पाणाइवायं करोमीति जो संकप्पं करेइ चिंतयतीत्यर्थः संरंभे वट्टइ परितावणं करेइ समारंभे वट्टइति एतच्च संरंभादित्रितयं सर्वनयानामपि शुद्धानां सुम्मतं अथ शुद्धाणमित्यत्र प्राकृतत्वात् पूर्वस्याकारस्य लोपो द्रष्टव्यः ततोऽयमर्थः सर्वनया नामप्यशुद्धानामे तत् संरंभादि त्रितयंसम्मतं न तु शुद्धानामिति, अथके नयाः शुद्धाः केवाऽशुद्धाः इति शुद्धाशुद्धनयप्रतिपादनार्थमाह -

[भा.४७] सव्वेति होंति सुद्ध, नत्थि असुद्धोनयोउ सठाणे ।
पुव्वावपच्छिमाणवउ सुद्धचउपच्छिमा तेसिं ।।

वृ- नयाः सत तद्यथा, नैगमः, संग्रहो, व्यवहारः, ऋजुसूत्रः, शब्द, समभिरुढ, एवंभूत इति, एते च सर्वे नया स्वस्थाने निजनिजवक्तव्यतायां शुद्धा नास्ति सकश्चिन्नयो यः स्ववक्तव्यतायामप्यशुद्धः सर्वेषामपि परिपूर्णस्ववक्तव्यताभ्युपगमपरत्वात् उक्तं च नियवयवणिज्ज सव्वा सव्व नयापरवियालणे मोहा यद्यप्येतदस्ति तथापि नैतत् प्रस्तुतोपयोगि, सर्वनयानां संरंभादित्रितयानभ्युपगमात्; ततः प्रकारांतरेण शुद्धाशुद्धनयप्ररुपणामाह पुव्वावेत्यादि पूर्वा आदिना वा शब्दः प्रागुक्तपक्षापेक्षया पक्षांतरताद्योतनार्थः पश्चिमानां चतुर्णां ऋजुसूत्रादीनां नयानां ये नैगमसंग्रहव्यवहाररूपास्त्रयस्ते शुद्धाः शोधयंति कर्म्ममलिनं जीवमिति शुद्धाशुद्धेरंतरभूत ण्यऽर्थात् क्तप्रत्ययः, न उ पच्छिमातेसिं न तुयंतेषामादिमानां पश्चिमाऋजुसूत्रादयस्ते शुद्धाः अनुयायिद्रव्याऽनभ्युपगमस्तेषां विशोधकत्वायोगात् कथं पुनराद्यास्त्रयोनयाः शुद्धा इत्यत आह-

[भा.४८] वेणइए मिच्छत्तं ववहारनयउजं विसोहिंति ।
तम्हा तेव्विय सुद्धा भइयव्वं होइ इयरेहिं ।।

वृ- वैनयिको नाम मिथ्याद्दष्टिस्तस्मिन् यन् मिथ्यात्वं यत् व्यवहारनया एवतुरेवकारार्थः, नैगमसंग्रहव्यवहारः शोधयंति अपनयंति, तेह्यनुयायिद्रव्याभ्युपगमपरा स्ततः कृतकर्म्मफलोप-भोगोपपत्तेः सद्धर्म्मदिशनादौ प्रवृत्तियोगतो भवति तात्विकी शुद्धिः तस्मात्तएव शुद्धः भइयव्वं होइ इयरेहिंति, इतैर ऋजुसूत्रादिभिर्नयैर्मिथ्यात्वशोधिमधिकृत्य भजनीयं, शुद्ध्यतीति भावः, तेहि पर्यायमात्रमभ्युपगच्छंति, पर्यायाणां परस्परमात्यंतिकं भेदं, ततः कृतविप्रणाशादि दोष प्रसंगः, तथाहि मनुष्येणकृतंकर्म्म किल देवो भुंक्ते, मनुष्यावस्थातश्च देवावस्था भिन्ना, ततोमनुष्यकृतकर्म्म विप्रणाशो, मनुष्येण सता तस्योपभोगाभावात् देवस्य च फलोपभोगोऽकृताभ्यागमः, देवेन सता तस्य कर्म्मणोऽकरणात् कृतविप्रणाशादि दोषपरिज्ञाने च न कोऽपि धर्म्मश्रवणे अनुष्ठाने वा प्रवर्त्तेत, इति मिथ्यात्वशुद्ध्यभावस्तदभावाच्च न ते शुद्धा इति, एतदेवस्पष्टतरं विभावयिपुराह ।।

[भा.४९] ववहारनयस्साया कम्मं काउं फलं संमणु होइ ।
इय वेणइएकहणं विसेसणे माहु मिच्छत्तं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- व्यवहारः प्रधानोनयो व्यवहारनयस्तस्यमतेन आत्मा शुभमशुभं वा कर्म्म कृत्वा तस्यफलं भवांतरे समनुभवति अनुयायि द्रव्याभ्युपगमात् इति एतस्मात्कारणाद्वैनयिके मिथ्यादृष्टौ मिथ्यात्वापगमाय कथनं सद्धर्म्मोपदेशस्ततूपरिणतौ च मिथ्यात्वापगमइति मिथ्यात्वशोधकत्वात्ते त्रयोऽपि व्यवहारनयाः शुद्धा विसेसणमाहु मिच्छतमिति, विशेष्यते परस्परं पर्यायजातं भिन्नतया व्यवस्थाप्यते अनेनेति विशेपणमृजुसूत्रादिनयस्तस्मिन् प्ररूप्यमाणे कृतविप्रनाशादिदोपाशंकातोऽधिकतरंमा जंतवो मिथ्यात्वंयासु रितिन तन्मतानुसारेण वैनयिकेऽपिका सद्धर्मदेशनाप्रवृत्तिस्तदभावाद्य न मिथ्यात्वशुद्धिरिति न ते शुद्धाः, रमभ्युपगम परत्वात् उपरतिनास्तु चत्वारः शुद्धा नैश्चयिकत्वात् तत् शुद्धाशुद्धनयलक्षणमधिकृत्य यत्प्राक्द्वितीयं व्याख्यानं कृतं सव्व नयाणं असुद्धाणमिति तत्प्रदर्शयन्नाह

[भा.५०] संकप्पा ईति ययं अविसुद्धाणं नुहोइउ नयाणं ।
इयरेबाहिरवत्थु, नेच्छंताया जतो हिंसा ।।

वृ- इहसंकल्पशब्देन न संरंभ उपलक्ष्यते पर्यायत्वात् संकल्पादित्रितयमिति कोऽर्थः संरंभादित्रितयं संरंभ समारंभारंवलक्षणं अविशुद्धानामेव तु रेवकारार्थो भवति, नयानां मतेन ज्ञातव्यमिति शेपः, व्यवहारपरतया तेपां मतेन त्रितयस्यापि संभवात् इतरे शुद्धऋजुसूत्रादयो हिंसाविचारप्रक्रमे बाह्यवस्तुनेच्छंति, नाभ्युपगच्छंति न बाह्य वस्तुगतां हिंसामनुमन्यंते इति भावः, य तस्तन्मतेनात्मैव तथाध्यवसाय परिकल्पितो हिंसा न बाह्य मनुष्यादि पर्याय विनाशनमाया यथा चेव उ हिंसेति वचनात्ततः संरंभ एव हिंसा न समारंभोनप्यारंभ इति, न शुद्धनयानां संरंभादि त्रितयं, सांप्रतमस्यामेव सा पुन न अतिक्रमे इत्यादिकायां गाथायां यत्र मूलोत्तरगुणप्रतिसेवना या विपर्ययेणोपन्यसनमकारि तत्र कारणमाक्षेप पुरस्सरमुपन्यस्यन्नाह -

[भा.५१] चोएइकिमुत्तरगुणा, पुव्वं बहु अथोवगलहुयंच ।
अतिसंकिलिठभावो, मूलगुणेसेवते पच्छा ।।

वृ- चोदयति प्रश्नयति शिष्यो, यथाकमित्तरगुणा उत्तरगुण प्रतिसेवना पूर्वमुक्ता यथोद्देशंनिर्देश इतिन्यायाद्धि पूर्व मूलगुण प्रतिसेवनावक्तुमुचितेति भावः अत्रोत्तरमाह बहवः उत्तरगुणाः, स्तोकामूलगुणा स्तथा लघु शीघ्रमुत्तरगुणानां सेवकः प्रतिसेवकः, ततो अतसंक्लिष्टभावः सन् पश्चात् मूलगुणान् सेवते प्रतिसेवते इति ख्यापनार्थ; विपर्ययेणोपन्यास इह प्रायश्चित्तं मुख्यवृत्त्याविशोधि स्तथाचापराधं विधाय विशुद्धमनसो गुरु समक्षं वदंति, भगवन्नमुकस्याऽपराधस्य प्रयच्छत प्रायश्चित्तमिति, प्रतिसेवनाप्युपचारात् कदाचित् प्रायश्चित्तं, तथा चापराधे कृते वक्तारोभवंति, समापतितमस्माकमद्य प्रायश्चित्तमिति, तत्र यथोपचारतः प्रतिसेवनाप्रायश्चित्त मुच्यते, तथोपपादयन्नाह -

[भा.५२] पडिसेवियंमिदिज्जइ, पच्छित्तं इहरहाउपडिसेहे ।
तेन पडिसेवणव्विय पच्छित्तं विमंदसहा ।।

वृ- प्रतिसेविते प्रतिपिद्धे सेविते यस्मात् प्रायश्चित्तं दीयते, इतरथा प्रतिपिद्धासेवनमंतरेण प्रतिपेधः प्रायश्चित्तस्य, ततः प्रतिसेवना प्रायश्चित्तस्य निमित्तमितिकारणे कार्योपचारात् प्रतिसेवनैव प्रायश्चित्तं प्रतिसेवनारूपं प्रायश्चितमिदं दशधा, दशप्रकारं तामेव दशप्रकारतामुपदर्शयति -

[भा.५३] आलोयण पडिकिमणे, मीसविवेगे तहाविउस्सग्गे ।
तवछेय मूल अणवठियाय पारंचिएचेव ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- आङ्मर्यादायां सा च मर्यादा इयं । जहबालोजंपंतो कज्ञमकज्ञं उजजुए भणइ तं तह आलोएज्ञा मायामय वप्पिमुक्कोय ।। अनया मर्यादया लोकृदर्शनं चुरादित्वात् निच लोकनं लोचना प्रकटीकरणं, आलोचनं गुरोः पुरतोवचसा प्रकटीकरणमितिभावः यत् प्रायश्चित्तमालोचना मात्रेण शुध्यति. तदालोचनार्हतया कारणे कार्योपचारादालोचनं, तथा प्रतिक्रमणं दोपात्प्रतिनिवर्त्तन मपुनः करणतया मिथ्यादुष्कृतप्रदानमत्यिर्थः, तदर्हं प्रायश्चित्तमपि प्रतिक्रमणं, किमुक्तं भवति प्रायश्चित्तं मिथ्यादुष्कृत मात्रेणैवशुद्धिमासादयतिनच गुरु समक्षमालोच्यते, यथा सहसानुपयोगतः श्लेष्मादि प्रक्षेपादुपजातं प्रायश्चित्तं तथाहसिहसानुपयुक्त यदि श्लेष्मादि प्रक्षिप्तंभवति, न च हिंसादिकं दोपमापन्नस्तर्हि गुरुसमक्षमालोचनामंतरेणापि मिथ्यादुःकृतप्रदानमात्रेण स शुध्यति, तत् प्रतिक्रमणमार्हत्वात् प्रतिक्रमणं, यस्मिन् पुनः प्रतिसेविते प्रायश्चित्ते यदगिरुसमक्षमालोचयतआिलोच्ययो गुरु संदिष्टः प्रतिक्रामति पश्चाच्च मिथ्यादुःकृतमिति ब्रूते, तदा शुध्यति तत् आलोचनाप्रतिक्रमणलक्षणोभयार्हत्वात् विवेकः परित्यागः यत् प्रायश्चित्तं विवेक एवकृते शुद्धिमासादयति नान्यथा, यथाधाकर्म्मिणि गृहिते तत्विवेकार्हत्वात् विवेकः तथा व्युत्सर्गः कायचेष्टानिरोधोपयोगमात्रेण शुध्यति प्रायश्चित्तं, यथा दुःस्वप्नजनितं तद्व्युत्सर्गार्हत्वात् व्युत्सर्गः तवेत्तियस्मिन्प्रतिसेवितनिर्विकृतकादिपण्मासपर्यवसानं तपोदीयते, तत्तपोर्हत्वात् तपः यस्मिन्समापतिते प्रायश्चित्ते निरवशेपपर्यायोच्छेदमाधाय भूयोमहाव्रतारोपणं तन्मूलार्हत्वान्मूलं, येन पुनः प्रतिसेवितेनोत्थापनाया अप्ययोग्यः सन् कंचित्कालं न व्रतेषु स्थाप्यते, यावन्नाद्यापि प्रतिविशिष्टं तपश्चीर्णं भवति, पश्चाच्च चीर्णतपास्तद्दोपोपरतो व्रतेषु स्थाप्यते तदनवस्थित्वादनवस्थितप्रायश्चित्तं पारंचिए चेवत्ति अचूगतोच, यस्मिन् प्रतिसेवितेलिंगक्षेत्र-कालतपसां पारमंचति तत् पारांचित मर्हतीति पारांचितं, एपसंक्षेपार्थः विस्तरार्थं तु प्रतिद्वारम् भाष्यकृदेववक्ष्यति, तत्र प्रथमद्वारमालोचनेति विवरिषुरिदमाह -

[भा.५४] आलोयणत्तिकापुन कस्ससगासेचेवहोइकायव्वा
केसुच कज्ञेसु भवे - गमणागमणादिएसुतु ।।

वृ- काकिंस्वरूपापुनरालोचनेति, प्रथमतः प्रतिपाद्यंतदनंतरं कस्य सकाशे समीपे भवति कर्तृव्यालोचनेतिवाच्यं, तथा केषुकार्येषु भवत्यालोचना तत्र प्रतिपत्तिलाघवाय संक्षेपतोऽत्रैवनिर्वचनमाह गमनागमनादकिषुगमने आगमने आदि शब्दात् शय्या संस्तारकः वस्त्रपात्रपादप्रोञ्छनक गहणादपरिग्रहः, तु शब्दो विशेपणे सचैतत् विशिनष्टि, गमनागमनादष्वि वश्यकर्त्तव्येषु सम्यक्उप-युक्तस्यादुष्टभावतया निरति चारस्य छद्मस्थस्या प्रमत्तस्य यतेरालोचना भवतीति आह, यानि नामावश्यकर्त्तव्यानि गमनादीनि तेषु सम्यगुपयुक्तस्या दुष्टभावतया निरतिचारस्या प्रमत्तस्य किमालोचनया ? तामंतरेणापि तस्य शुद्धत्वात् यथा सूत्रं प्रवृत्तेः सत्य मेतत् केवलं या चेष्टा निमित्ताः सूक्ष्मप्रमादनिमित्ता वा, सूक्ष्मा आश्रवक्रियास्ता आलोचनामात्रेण शुध्यंतीति, तच्छुद्धिनिमित्त मालोचना, उक्तं च

।।१।। जया उवउत्तो निरइयारोय करेइ करणीज्ञावते जोगा
तत्थका विसोही आलोइए अनालोइ एव ।।

।।२।। गुरुभणइतत्थ जाचिट्ठ निमित्ता वा सुहुमा -
आसव किरिया ताउ सुज्झंति आलोयणमित्तेणंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र कानामालोचनेतयित् प्रथमंद्वारं तत्प्रसिद्धत्वादन्यत्र वा कल्पाध्ययनादिपुव्याख्यातत्वादहिभाष्यकृता न व्याख्यातं, तथापिस्थाना शून्यार्थकिंचिदुच्यते, आलोचना नाम अवश्यकरणीयस्य कार्यस्य पूर्वंवा कार्यसमाप्ते रूध्ध्वंवा यदविपूर्वमपि पश्चादपि च गुरोः पुरतोवचसाप्रकटीकरणं सा चालोचना उपरितनेषु प्राश्चित्तेषु केषुचित् संभवति केषुचिन्न संभवति तत्रयेषुसंभवति तत्प्रसिध्यर्थमिदमाह -

[भा.५५] बिइएनत्थिवियडनावाउविवेगेतहाविउस्सग्गो ।
आलोयणाउ नियमा गीयमगीयेच केसिंचि ।।

वृ- द्वितीयंसूत्रक्रमप्रामाण्या नुसरणात् प्रतिक्रमणं, तस्मिन् द्वितीये प्रतिक्रमणलक्षणे प्रायश्चित्ते नास्ति विकटना आलोचना, तथाहि सहसानाभोगतोवा यदि किंचिदाचरितं भवति यथा मनोज्ञेषु शब्दादिष्विंद्रियगोचरमागतेषु रागगमनम् अमनोज्ञेषु द्वेषगमनं, तदा तदनंतरमेव मिथ्यादुष्कृतमिति ब्रूते तच्चतेनैव शुद्धिंयातीतिनालोचयति, वाउ विवेगत्ति वा शब्दो विभाषायां विवेक विवेकाई प्रायश्चित्ते, आलोचना या विभाषा कदाचिद् भवति, कदाचिन्न भवतीति भावः, तथाहि तद् विवेकार्हं नाम प्रायश्चित्तं यत्परिस्थापनया शुध्यति, तत्र यदकल्पिकमाधाकर्म्मिकादि पूर्वऽमविदितत्वेनगृहीतं, पश्चाच्च कथमपि ज्ञातं तद्यदा परिस्थापयतः शुभभावनाध्यारोहेकेवलज्ञानमुत्पद्यते, तदाऽ सौ कृतकृत्यो जात इतिनालोचयति, अनुत्पन्ने तुज्ञानातिशये नियमादागत्य गुरुसमीपमालोचयतीति, तहाविउस्सग्गे इति, यथा विवेक आलोचनायाविभाषा, तथा व्युत्सर्गेपि, किमुक्तं भवति, व्युत्सर्गेपि कदाचिदालोचना न भवति, यथास्वप्ने हिंसादिकमासेवितं तच्छुद्धिनिमित्तं च कायोत्सर्गः कृतः तदनंतरं च शुभभावनाप्रकार्पतः केवलज्ञानमुदपादि, मरणं वा तस्याकस्मिकिमुपजातमिति नास्त्यालोचना, अनुत्पन्ने ज्ञाने जीवन् नियमादावश्यकं विकटयन् आलोचयति, यथा स्वप्नेमया हिंसादिक मासेवितं कायोत्सर्गेणच शोधितमिति, गतमालोचनेतिद्वारमधुना कस्यसकाशे आलोचना कर्तव्येतिद्वारं विवरीपुराह, सा आलोचना नियमाद वश्यतया गीतमिति प्राकृतत्वात् षष्ठ्यर्थे प्रथमा तस्य गीतार्थस्य सकाशे कर्तव्या, नागीतार्थस्य, अत्रैवभतांतरमाह अगीयेकेसिंचि केषांचिदाचार्याणामिदंमतं उत्सर्गतस्तावदाचार्यस्य समीपे आलोचयितव्यं, यदा पुनराचार्यः संज्ञादि प्रयोजनगतो भवति तदा अगीतार्थस्यापि समीपे भिक्षाद्यालोचनीयमिति, तच्चालोचनार्हप्रायश्चित्तमेतेपुस्थानेषुभवति ।

[भा.५६] करणिज्जेसुउजोगेसु, छउमत्थस्सभिक्खुणो ।
आलोयणपच्छित्तं, गुरुणं अंतिएसिया ।।

वृ- करणीयाः नाम अवश्य कर्तव्यः योगाः श्रुतोपदिष्टाः संयमहेतवः क्रियाः अथवा योगा मनोवाक्काय व्यापाराः -

जोगोविरियं थामो, उच्छाह परक्कमोतहाचेट्ठा ।
सत्तीसामत्थं चिय जोगस्स हवंति पज्जाया ।।

इतिवचनात् ते चावश्यकर्त्तव्य इमे कूर्म्मइव वसतौसंलीनगात्रः सुप्रणिहित पाणिपादोऽवतिष्ठते, वचनमपि सत्यमसत्यामृषां वाब्रूते, ना सत्यामृषेति, मनसोप्यकुशलस्य निरोधनं कुशलस्योदीरणमेवंरूपेपु करणीयेपु सम्यगुपयुक्तस्य निरतिचारस्येतिवाक्यशेपः सातिचारस्योपरितनप्रायश्चित्तसंभवात् छद्मस्थस्यपरोक्षज्ञानिना, नतुकेवलज्ञानिन स्तस्यकृतकृत्यत्वेना लोचनाया अयोगात् उक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च छउमत्थस्सहवइ आलोयणा न केवलिणो इति तथा सूत्रोक्तेन प्रकारेण भिक्षते इत्येवं शीलोभिक्षु स्तस्ययतेरलोचना प्रायश्चित्तंस्यात् तदपि च गुरुणामंतिके समीपेनान्येषामिति, इह करणीया योगा इति सामान्येनोक्तमधुनानामग्राहं करणीययोग प्रतिपादनार्थमाह -

[भा.५७] भिक्खवियार विहारे अनेसुयएवमाइकज्जेसु ।
अविगडियंमिअ विनतो होज्ज असुद्धे व परिभोगो ।।

वृ- भिक्षायां विचारे विहारे अन्येष्वपि चैवमादिकेषु कार्येषु आलोचनाप्रायश्चितं भवतीति वर्त्तते इयमत्रभावना गुरुमापृच्छय गुरुणानुज्ञातः सन् श्रुतोपदेशेनोपयुक्तःस्वयोग्यभिक्षावस्त्रपात्रशय्या-संस्तारकपादप्रोंच्छनादि यदिवा आचार्योपाध्याय स्थविरबालग्लानशैक्षकक्षपकासमर्थप्रायोग्य-वस्त्रपात्रभक्तपानौपध्यादि गृहीत्वासमागतो विचारउच्चारभूमिस्तस्माद्वासमागतो विहारो वसतावस्वाध्याये स्वाध्यायमकृत्वा वसतेरन्यत्रगमनं, ततएवमादि ग्रहणाच्चैत्यवंदन निमित्तं, पूर्वगृहीतपीठ फलक शय्या संस्तारकप्रत्यर्प्पणनिमित्तं वा बहुश्रुतापूर्व संविग्नानां वंदनप्रत्ययं वा संशव्यवच्छेदाय वा श्राद्धस्य ज्ञात्यवपन्न विहारणामवबोधाय, साधार्मिकाणां वा संयमोत्साहनिमित्तं हस्तशतात्परं दूरमासन्नं वा गत्वा समागतोयद्यपि नास्तिकश्चिदतीचारस्तथापि यथाविधि गुरुसमक्षमा-लोचयितव्यमन्यथा सूक्ष्मचेष्टा निमित्तानां सूक्ष्मप्रमादनिमित्तानां वा क्रियाणां शुध्यभावात् अन्यच्च निरतिचारोपि यदि गुरोः समक्षं नालोचयति, ततोऽ विनयोभवति, अशुद्धपरिभोगो वा तथाचाह अविकटिते अनालोचिते अविनयो वा अशुद्धस्य वा परिभोगो भवेत् आलोचिते तूभयदोषाऽभावः नन्वविनयदोषा भावःस्याद शुद्ध परिभोगाभावः कथं ? उच्यते केनापि साधुना भिक्षा प्रचुरसत्कारपुरस्सरा लब्धा, तस्य शंकितमुपजातं, किंनामेयं भिक्षा शुद्धाऽशुद्धावा, तत्रयद्यनालोच्यभुंक्तेततोऽशुद्धपरिभोगो भवति, तेन वालोचितं आचार्येण पृष्टमन्य दिवसेपुतस्मिन् गृहे कीदृशी भिक्षाअलभ्यत, किंयंतोवा भोजनकारिणः ? प्राघूर्णका वाकेप्यागता, संखंडीवाजाता;इत्यादि विभाषाएव च पृष्टे तेन यथावस्थितं कथितं. ततआचार्येण ज्ञाता शुद्धा अशुद्ध वा, तस्मादालोचयितव्यं, अन्यच्च -

[भा.५८] छउमत्थो तहज्जहा वाहवेज्ज उवजोगो ।
आलोएंतोउहइ, सोउंचवियाणइसोया

वृ- अन्यच्चकिंचान्यत् इत्यर्थः छाद्मस्थिकः सामान्यसाधुगतउपयोगस्तथा यथावस्त्वनुसारी अन्यथा वा विपरीतो भवेत्; आचार्यस्त्वति मेधाधारणादि गुणसमन्विततया बहुश्रुततयावातिशय-ज्ञानीततः शंकितमालोचिते निःशंकितं करोति, तथायद्यपिगृहतः शंकितमुपजातं तथापि कदाचित् आलोचयन् स्वप्रज्ञयाप्यूहते, ततःशुद्ध मशुद्धंवा स्वयमेव जानाति, यदि वातदीयामालोचनां श्रुत्वा श्रोता आचार्यादिकः पूर्वोक्तेन प्रकारेण यदिवा आचार्यादिकस्य पार्श्वे बहवो लोकाः समागच्छंति, बहुभ्यश्च शृण्वन् कदाचित्तमपि विषयं लोकतः श्रुत्वा जानाति शुद्धमशुद्धं वा, तस्मादालोचयितव्यं, यदुक्तं गुरुणंतिएसिया इति तत्रस्यादित्यस्य व्याख्यानमाह -

[भा.५८] आसंकम वहियंमियहोइ सिया अवहिए तहिपगयं ।
गणतत्ति विप्पमुक्के, विविक्खेवेवावि आसंका ।।

वृ- स्याच्छद्ब आशंकमिति प्राकृतत्वादाशंकायामवधृतेचार्थे आशंकानामविभाषा यथास्यादिति कोऽर्थः कदाचिद्भवेत् अवधृतंनाम अवधारणं, तत्रतयोद्वयोरर्थयोर्मध्ये अवधृते अवधारणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकृतमधिकारः अवधारणार्थोत्रस्याच्छब्दःइतिभावः ततोयमर्थः गुरुणामंतिकेनियमादालोचना, यदिवा आशंकायामपि प्रकृतं, तत्रायमर्थः गुरुणामंतिकेस्यात्तावदालोचना यदि पुनराचार्यो गणतृप्तिविप्रमुक्तोभवति, ततस्तमस्मिन् गणतृप्तिविप्रमुक्ते उपाध्यायस्य समीपे आलोचना, अथोपाध्यायस्यापिकुलादि कार्यैः श्राद्धादि कथनैर्वाप्याक्षेपस्ततो अन्यस्य गीतार्थस्य तदभावे अगीतार्थस्य समीपे आलोचयितव्यं, गतमालोचनार्हप्रायश्चित्त मिदानीं प्रतिक्रमणार्ह मभिधित्सुराह -

[भा.६०] गुत्तीसुयसमितीसुय पडिरुवीजोगतहापसत्थेय ।
वइक्कमे अनाभोगे पायच्छित्तं पडिक्कमणं ।।

वृ- गुप्तयस्तिस्रस्तद्यथा मनोगुप्ति वचन गुप्तिः कायगुप्तिस्तासु, समितयः पंच तद्यथा इर्यासमिति र्भाषासमितिरेषणासमितिरादानभांडमात्रनिक्षेपणा समिति रुच्चार प्रश्रवण श्लेष्मसिंधाणजल्लपारिष्ठा-पनिकासमितिश्च एतासु च सहसाकारतोऽनाभोगतोवा कथमपि प्रमादे सतीतिवाक्यशेषः प्रायश्चित्तं प्रतिक्रमणं मिथ्यादुष्कृतप्रदानलक्षणं, इय मत्रभावना, सहसाकारतोऽनाभोगतो वायदिमनसादुश्चिंतितं स्यात् वचसादुर्भाषितं, कायेनदुश्चेष्टितं, तथा ईर्यायां यदि कथां कथयन् व्रजेत् भाषायामपि यदि गृहस्थ-भाषयाढड्डरस्वरेण वा भाषेत, एषणायांभक्तपानगवेषणवेलायामनुपयुक्तो भांडोपकरणस्यादाने-निक्षेपेवाऽप्रमार्जयिता अप्रत्युपेक्षितेस्थंडिले उच्चारादीनां परिष्ठापयिता न च हिंसादोषमापन्नः उपलक्षणमेतत् तेनयदि कंदर्पो वा हासो वा स्त्रीभक्तचौरजनपदकथया तथा क्रोधमानमायालोभेषु गमनं, विषयेषु वा शब्दरूपरसगंधस्पर्शलक्षणेष्वनुषंगः सहसानाभोगतो वा कृतः स्यात् ततएतेषु सर्वेषु स्थानेषु मिथ्यादुष्कृतत प्रदानलक्षणं प्रायश्चित्तमिति, तथा प्रतिरूपयोगे प्रतिरूपविनयात्मके व्यापारे तथा प्रशस्तो यो यत्र करणीयो व्यापारः सतत्र प्रशस्तईच्छामिच्छाइत्यादिस्तस्मिंन्न पिवाक्रियमाणे प्रायश्चित्तं प्रतिक्रमणं, इह प्रतिरूपग्रहणं ज्ञानादि विनयोपलक्षणं, ततो यमर्थः ज्ञानदर्शनचारित्रप्रतिरूपलक्षण-प्रकारविनयाकरणे इच्छामिथ्यातथाकारादि प्रशस्तयोगाकरणे उपलक्षणमेतत् आचार्यादिषु प्रद्वेषादिकरणे वाच अंतर भाषादि कृतौ कायेनपुरो गमनादौ प्रतिक्रमणं प्रायश्चित्तं, तथा उत्तरगुणप्रतिसेवनायां वइक्कमेइति मर्यादाकथनं तेनातिक्रमेव्यतिक्रमेच प्राग्व्याख्यातस्वरूपे तथा, अनाभोगादकृत्यप्रतिसेवने मिथ्यादुष्कृत प्रदानात्मकं प्रतिक्रमणं प्रायश्चित्तमिति गाथा समासार्थः व्यासार्थंतु भाष्यकृत् व्याचिख्यासुः प्रथमतो गुत्तीसुय समिइसुय इति व्याख्यानयति ।।

[भा.६१] केवलमेव अगुत्तो सहसानाभोगतो वअप्पहिंसा ।
तहियंतुपडिक्कमणं आउट्टि तवोनवादानं ।।

वृ- एवकारो भिन्नक्रमः अगुप्तएव गुप्तिरहित एवकेवलं, उपलक्षणमेतत् तेनसमितिरहित एव केवलमित्यपिद्रष्टव्यं, केवल ग्रहणमगुप्तत्वमसमितत्वंचैकं केवलं, नत्वगुप्तत्वा समितत्वप्रत्ययं प्राणिव्यापादनमापन्न इति प्रतिपादनार्थं, तथा चाह अप्पहिंसा अल्पशब्दो अभाववाची, अल्पानैवकाचन प्राणिनो हिंसाभवेदिति शेषः, कथमगुप्तोऽ समितोवेत्यतआह सहसापदैकदेशेपदसमुदायोपचारात् सहसाकारतोऽना भोगतोवातत्र सहसाकारतो नाम पुव्वं अपासिऊणं, छूढेपाएकुलिंगएपासे, नय तरइति नियत्तेउं, जोगं सहसाकारण मेयं । इत्येवंरूपः, अनाभोगो विस्मृतिः, तहियंतु पडिक्कमणमिति तत्र सहसाकारतो नाभोगतो वा केवल एवागुप्तत्वे असमितत्वे चसति प्रायश्चित्तं प्रतिक्रमणंयदिपुनः आउट्टित्ति उपेत्य अगुप्तत्वमसमि तत्वं वा करोति तदा तत्र प्रायश्चित्तं तपोर्ह नवादानं तपसइति गम्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथमदानमितिचेत् ? उच्यते, यदि स्थविरकल्पिकाउपत्यागुप्तत्वमसमितत्वं वा मनसा समापन्नास्ततस्तपोर्हं प्रायश्चित्तं तेषां न भवति, गच्छनिर्गतानां तुमनसाप्यापन्नानां चतुर्गुरुकं प्रायश्चित्तमिति, तदेवंगुप्तिषु समितिषु वंति व्याख्यातमिदानी प्रतिरुपयोगपदव्यानार्थमाह -

[भा.६२] पडिरुवग्गहणेणं विनओखलुसूइओचउविगप्पो ।
नाणेदंसणेचरणे, पडिरुवंचउत्थओ होई ।।

वृ- प्रतिरुपग्रहणेन प्रतिरुपशब्दोपादानेन चतुर्विकल्पः चतुष्प्रकारः खलुविनयः सूचितः, चतुःप्रकारत्वमेव दर्शयति, ज्ञाने ज्ञानविषयः, दर्शने दर्शनविषयः, चरणे चरणविषयश्चतुर्थः प्रतिरुपको विनयो भवति; तत्र ज्ञानविनयाष्ट प्रकारतां कथयति ।

[भा.६३] कालेविनए वहुमाणे उवहाणे तह अनिण्हवणे ।
वंजण अत्थ तदुभए अट्ठविहो नाण विनतोउ ।।

वृ- योयस्यांगप्रविष्टादेः श्रुतस्यकाल उक्तस्तस्यतस्मिन्नेव स्वाध्यायः कर्त्तव्यो, नान्यदा, तीर्थंकर वचनात् दृष्टांत कृष्यादेः काल करणेफलं विपर्ययः अत्रोदाहरणं, एगोसाहू पादोसियं कालंघेत्तुं-अतिक्कंताएवि पढमपोरिसीए अनुवयोगेन पढइ कालियसुयं, सम्मद्दिट्ठी देवयाचिंतेइ, मानं पंतदेवया छलिज्जत्ति काउंतक्ककुडंघेत्तूण तक्क तक्कंति भणती तस्सपुरतो गया गयाइं करेइ, तेन य मेसज्झायस्य वाघायं करेइतिय पभणिया अयाणिएको इमो तक्कस्स विक्कयणकालो वेतलंतालोएही, तीएवि भणियं, अहो को इमो कालियसुयस्स सज्झायकालोत्ति ततो साहू न एसा पगतित्ति उवउत्तो नाओ अद्धरतो दिन्नं मिच्छादुक्कडं देवयाए भणियं मा एवंकरेज्जासि मापंतो छलेज्जा ततो काले सज्झाइयव्वं, नतुअकाले इति, तथाश्रुतं श्रवणंकुर्वतागुरो र्विनयः कर्त्तव्यः, विनयोनामअभ्युत्थानपादधावनादि, अविनय गृहीतं श्रुतमफलं भवति एत्थ उदाहरणं, सेणिउराया भज्जाए भन्नत्ति, ममेगखंभपासायं करेह तेनवड्डिउ आलो गयाकट्ठछिंदगा तेहिं अडवीए सलक्खणो महइ माहालयोदुमोदिट्ठो धूवोदित्ता जेणिस पग्गिहितो रुक्खोसोदरिसावेउ अप्पाणं तोनछिंदामो अहनदेइ दरिसावंतोछिंदामोत्ति ताहेतेन रुक्खवासि ना वानमंतरेणअभयस्य दरिसावोदिन्नोभो ! अहरंन्नोएगखंभं पासायं करेमि, सव्वोउयं च आरामं सव्ववणजातिउववेयं, माछिंदह, इमंरुक्खं जतो ममआवासस्सउवरिएस चूलाकप्पोत्ति एवंतेन कातोपासादो अन्नया एगाएमायंगीए अगाले दोहलो जातो, सा भत्तारं भणइ, मम अंबयाणि आनेह, अगालो अंबगाणंतेन उ नामिणीए विज्जाएडालाउणामिया अंबगाणिगहियाणि पुनोवि उन्नामिणीए उन्नामिया ।

-पभाए रन्नादिट्ठं, पयंनदीसइ, को एस माणुसो अतिगतो जस्सएरिसी सत्तीसो ममअंतउरंपिधरिसहि इत्तिकाउं अभयंसद्दाविउण भणइ सत्तरत्तस्य अब्भंत्तरे जइचोरं नाणेसि तोते नत्थिजीवियं ताहेअभउ गतो गवेसिउमाढत्तो नवरंएगंमि पएसे एगोनडोनच्चिउकामोलोगो मिलितो तत्थगंतुं अभओभणइ जाव एसोनडो अप्पाणंमंडेइ तावममेगं अक्खाणगंसुणेह जहा कहिम्हि नगरे एगोदरिद्दीसेट्ठीपरिवसइ तस्सधूया वड्डकुमारी अतीवरुवस्सिणीया सावरच्छिणी कामदेवं अच्चेइ, सायएगंमि आरामेचोरियाए पुप्फाणि उच्चिणेइ, आरामिणा दिट्ठाकठिउमाढत्ता तीएसो भणितो मामइं कुमारिं विनासेहितवाविभगिनी भाणिज्जिओअत्थि, तेन भणिया एकहा तेनमुंयामि, जइ नवरं जम्मि दिवसे परिनिज्जसि, तद्दिवसंचेव भत्तारेण अनुग्घाडिया समाणि मम सगासं एहिसि, तीए भणियं, एवंभवउ त्ति तेन विसज्जिया, अन्नया

परिणीयाजाहे अपवरकं पवेसिया ताहेच भत्तारस्ससब्भावं कहेइ विसज्जिया. वच्चसुत्ति पट्टिया आरामं, अंतरायं चोरिहिं गहिया तेसिं सब्भोवो कहितो, मुक्का गच्छंतीए अंतरा रक्खसो दिट्ठो, जोछण्हमासाणं आहारेइ तेन गहिया सब्भावेकहिए मुक्का आरामियस्स सगासंगया तेनदिठा सोसंभंतो भणइकहमागयासि, ताएभणियं, मएक्तांसापुव्विं संमउ सोभणइ कहंभत्तारेण मुक्का ताहेतस्सतं सव्वं कहियं, अहोसच्चपइन्ना, एसामहिलत्ति एहिं मुक्का कहमहं दुहामित्ति तेनविपमुक्का, पडिनियता सव्वेसिंते मज्झेण आगया, तेहिं सव्वेहिं मुक्का भत्तारसगास समाभरणसग्गागया ताहे अभउ तंजनं पुच्छइ, अक्खह केणदुक्करंकयं तोहेंईसालुया भणंति भत्तारेणं छुहालुयाभणंति रक्खसेणं कामिणा भणंति मालाकारेण हरिकेसेण भणियं चोरेहिं पच्छा सोगहितो जहा एसचोरोत्ति ततो सेणियस्स उवणीतो पुच्छीएणसब्भावो कहितो ताहेरन्ना भणियं ।

-जइं नवरं एयातो विज्जाउदेसि तोनमारेभि त्तिअब्भुवगते, आसनेठितोपढइ, नठाइ गया भणइ किं न ठाइ भायंगो भणइ जहा अविनएण पढसि, अहंभूमिए तुमंआसणे, ततो सेणिओ नीयचरेआसनेठितो, इयरो महति महालए, ततोठियातो सिद्धाउय विज्जाडत्ति एवं विणएण अहिज्जियव्वं नो अविनएणं, तथा श्रुत ग्रहणोद्यतेन गुरोबहुमानः कार्यः, बहुमानो नाम आंतरो भाव प्रतिबंधः एतस्मिन् सत्यऽक्षेपण अधिकफलंश्रुतं भवति; विनवबहुमानेसु चउभंगो एगस्स विनओ न वहुमानो, अवरस्स बहुमानो नविनओ अन्नस्स विनओ बहुमानो वि, अन्नस्स न विणओ न बहुमानो एत्थदुण्ह वि विसेसपदंसणत्थं इमंउदाहरणं, एगंमि गिरिकंदरे सिवोतंच बंभणो पुलिंदोय अच्चइ बंभणो उवलेवण समज्जणाइयं करेत्ता सुइभूतो अच्चिणइ, अच्चिणित्ता विनयभुतो थुणाति नय बहुमाणे ... पुंलिदो पुन तंमिसिवे भाव पडिबद्धो, गल्लोदएण ण्हवति, नमिऊण उवविसइ ततोसिवो तेन समं आलोवसंकहाहिं अत्थइ, अन्नया यतेसिंउल्लावणसद्दो बंभणेन सुतं, तेन पडियरिउणं उवालद्धो तुमंपि एसोचेव कडपूयणा सिवो एरसिएण उच्चिठएण समं मंतेसि, ताहे सिवोभणइ, एसोबहुमाणेइ, तुमंपुनाइन तहा, अन्नायाय सिवो अच्छीणि उक्खणिऊण अच्छइ, बंभणो आगतोरडिउमुवसंतोपुनिंदोय आगतोसिवस्स अच्छिंनपेच्छइ ।

ततो अप्पणयं अच्छिंकंडफलेण उक्खिणित्ता सिवस्सजोएइ, ततो सिवेणं बंभणो पत्तियावितो, एवं नाणमंतेसु विनयो बहुमानोय दोविकायव्वो; तथा श्रुत गहणमभीप्सता उपधानंकार्य उपदधाति, पुष्टिं नयत्यनेनेत्युपधानं तपः यत् यत्राध्ययते आगाढादि योग लक्षणमुपधानमुक्तं तत्तत्र कार्य, तत्पूर्विकस्यैव श्रुतग्रहणस्य सफलत्वात् अत्रोदाहरणं, एगआयरियाते वायणाए सत्तापरितं सज्झाएविअसज्झायंधोसेउमारब्धा नाणंतरायं बंधिउणकालमासेकालंकिच्चा देवलोगं गया, देवलोगातो आउक्खएण चुया, आभीरकुले पच्चायात भोगंमुंजंति, अन्नया य सेधूया जाया साय अतीव रुवस्सिणी तानिपच्चंतियाणि गोचारिनिमित्तं अनत्थ गछंति, तीएदारिआए पिउणोसगडं सव्वसगडाणं पुरतोगच्छइ सावदारिया तस्ससगडस्सधुरं उढेठिया वच्चइ, तरुणोहिंचिंतियं, समसेणीगाइं सगडाइं काउं दारियं पेच्छामो, तेहिं सगडा उप्पहेण खेडिया विसमे आवडिया समाणा भग्गा, ततो लोगेणतीए दारियाए नामं कयं असगडा, ताए पिया असगडपियत्ति ततो तस्सतंचेववेरग्गंजायं, तंदारियं एगस्स दाऊणं पव्वइओ; जावचउरंगियं तावपढिओ. असंख्यं पठिउमारब्धो, तं नाणावरणीज्जं से कम्मं उदिन्नं, पढंतस्स किं न ठाइ, आयरिया भणंति, छठेण अनुजाणेज्जउ ततो सो भणइ, एयस्स केरिसो जोगो, आयरिया भणंति, जाव न ठाइ, ताव आयंबिलं कायव्वं, ततो सो भणइ एवं चेव पढामि, तेन तहा पढंते बारसरुपगाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बारसहिं संचच्छरेहि न अहियाणि ताव तेन आयंबिलाणि कयाणि, तता से नाणवरणिज्जं कम्मं खीणं ।

-एवं जहा असगडपियाए आगाढजोगो अनुपालितो, तहा सव्वे[व्वे]हिं सव्वमुवहाणं पालेयव्वं, तथा अनिण्हव इति गृहीतश्रुतेनानिह्नवः कार्यः, तत् यस्य सकाशे अधीतं, तत्र स एव च कथनीयो नान्यः, चित्तं कालुष्यापत्तेरत्रदृष्टांतः एगस्स ण्हावियस्स छुरभंडं विज्जासामत्थेणं आगासे अच्छइ तं च एगो य परिव्वायगो बहूहिं उवसंपज्जणाहिं उवसंपज्जिऊण तेन सा विज्ज लद्धा, ताहे अन्नत्थ गंतुं तिदंडेण आगासगएण महाजनेन पूइज्जइ, रणा पुच्छिओ भयवं! किमेस विज्जाइसओ उततवातिसओ! सो भणइ, विज्जाइसओ कस्स सगासातो गहितो, सो भणइ हिमवंते फलाहारस्स रिसिणो सगासे अहिज्जितो एवं वुत्ते समाणे संकिलेसदुट्ठयाए तं तिदंडं खडत्ति पडियं एवं जो अप्पागमं आयरियं निन्हवेउण अन्नं, तस्स अविहिसंकिलेसदोसेण सा विज्जा परलोए न हवइ इति तथा व्यंजनार्थ तदुभये इति समाहारत्वादेकवचनं भेदो न कार्य इति वाक्यशेषः एतदुक्तं भवति, श्रुतप्रवृत्तेन तत्फलमभिप्सता व्यंजनभेदोऽर्थभेद उभयोर्भेदश्च न कार्य इति, तत्र व्यंजनभेदो यथा धम्मो मंगलमुक्कट्ठं इति वक्तव्येषु पुनं कल्लाणमुक्कोसमित्याह अर्थभेदो यथा अवंती केयावंती लोगंसिविप्परामुसंती इत्यत्र आचारसूत्रे यावंतः केचन लोके अस्मिन् पाषंडिलोके विपरा मृशंतीत्येवंविद्यार्थाभिधाने अवंतीजनपदे केयारज्जुर्वलकूपे पतिता लोकाः परामृशंतीत्याह, उभयभेदो द्वयोरपि यथात्मोपमर्दन धम्मो मंगलमुत्कृष्टाऽहिंसापर्वतमस्तके इत्यादिदोषश्चात्र व्यंजनभेदे अर्थभेदस्तद्भेदे क्रियाभेदे च मोक्षाभावस्तदभावे च निरर्थका दीक्षेति एवं कालादिभेदप्रकारेणाष्टविधोऽष्टप्रकारोज्ञानविनयः, दर्शनविनयोप्यष्टप्रकारस्तामेवाष्टप्रकारतामुपदर्शयति

[भा.६४] निस्संकियं निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठीय ।
उववूहथिरीकरणे वच्छल्लपभावणे अट्ठ ।।

वृ- शंकनं शंकितं शंका इत्यर्थः निर्गतं शंकितं यस्मादसौ निःशंकितः, देशसर्वशंकारहितं इत्यर्थः, तत्र देशशंका समाने जीवित्वे किमेको भव्यो, अपरस्त्वभव्य इति, सर्वशंका प्राकृतनिबद्धत्वात् सकलमेवेदं प्रवचनं परिकल्पितं भविष्यति इत्येवं नपुनरालोचयति यथा भावा हेतुग्राह्या अहेतुग्रह्याश्च, तत्र हेतुग्राह्या जीवास्तित्वादयः, अहेतुग्राह्या अस्मदाद्यपेक्षया भव्यत्वादयः प्रकृष्टज्ञानगोचरत्वात्तद्हेतूनामिति प्राकृतनिबंधोपि बालादिसाधारणमुक्तं च -

।।१।। बालस्त्रीमूर्खमूढानां, नृणां चारित्रकांक्षिणं; ।
अनुग्रहाय तत्वज्ञैः, सिद्धांतः प्राकृतः स्मृतः ।।

वृ- एतश्च न परिकल्पितो दृष्टेष्टाविरुद्धत्वात् निःशंकितो जीव एवार्हच्छासनप्रतिपन्नो, दर्शनं प्रतिविनीतत्वाद्दर्शनप्राधान्यविवक्षया दर्शनविनय उच्यते एतेन विनयविनयवतोरभेदमाह एकांतभेदे त्वविनयवत इव तत्फलाभावान्मोक्षाभाव एवं शेषपदेष्वपि भावना कार्या, तथा निःकांक्षितो देशसर्वकांक्षारहितः तत्र देशकांक्षा यदेकं दिगंबरादिदर्शनं कांक्षति, सर्वकांक्षा यथा यः सर्वाण्येव दर्शनान्याकांक्षति, न पुनरालोचयति षट्जीवनिकायपीडामसत्प्ररूपणां च, विचिकित्सा मतिविभ्रमः निर्गता विचिकित्सा यस्मादसौ निर्विचिकित्सः साध्वेव जिनदर्शनं किंतु प्रवृत्तस्य सतो ममास्मात्फलं भविष्यति न वा कृष्यादिक्रियाया उभयथाप्युपलब्धेरिति चिकित्सयारहितः नह्यविकलः उपायउपेयवस्तुपरिप्रापको भवतीति, संजातनिश्चयो निर्विचिकित्स उच्यते; एतावता अंशेन निःशंकिताद् भिन्नः उदाहरणं चात्र विद्यासाधको यथावश्यके इति, यद्वा निर्विशुद्धजुगुप्सः साधु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जुगुप्सारहितः उदाहरणं चात्र श्रावकदुहिता यथाऽवश्यके एव तथा बालतपस्वितपोविद्यातिशयदर्शनेन मूढा स्वभावान्न चलिता दृष्टिः सम्यग्दर्शनरूपा यस्याऽसावमूढदृष्टिः उक्तं च -

॥१॥ नेगविहा इड्ढीओ पूयं, परवादिणं च दट्ठूण जस्स; ।
न मुज्झइ दिट्ठी, अमूढदिट्ठिं तयं बिंति ॥

अत्रोदाहरणं सुलसा श्राविका, यथा अंबडो रायगिहं गच्छंतो बहूणं भवियिणं थिरिकरणनिमित्तं सामिणा भणितो सुलसं पुच्छेजासि, अंबडो चिंतइ, पुन्नमंति सुलसा जं अरिहा पुच्छइ, ततो अंबडेण परिजाणनिमित्तं सा भत्तं मग्गिया तहवि न दिण्णं ततोतणबहूनिरूवाणि विउव्वियाणि तइविनदिन्नं न य संमूढा, तह किर कुतित्थियरिद्धीओदट्ठूण अमूढदिट्ठिणा भवियव्वं, एतावान् गुणिप्रधानो दर्शनविनयनिर्देशः, अधुना गुणप्रधानं उपबृंहणं च तत्रोपबृंहणं नाम समानधार्मिकाणां क्षपण वैयावृत्त्यादिसद्गुणप्रशंसनेन तद्वृत्ति ।करणं उक्तं च -

॥१॥ खमणे वेयावच्चे, विनए सज्झायमाइएसु य जुत्तं; ।
जो तं पसंसए एस, होइ उववूहणाविनओ ॥

एतेष्वेव क्षपणादिषु सीदतां तत्रैव विशेषतः स्थापना स्थिरिकरणं आह च । -

॥१॥ एएसुं चिय खमणादिएसु सीयंत चोयणा जाउं ।
बहुदोसे मानुस्से मा सीद थिरीकरणमेयं ॥

तत्र उपबृंहणायामुदाहरणं रायगिहे नगरे सेणिओ राया इतो य सक्को देवराया समत्तं पसंसइ, ततो देवो असद्दहंतो नगरबाहिं सेणियस्स नग्गियस्स चेल्लयरूवं काऊण अणिमिसे गण्हिइ, ताहे तं निवारेइ, पुनरवि अन्नत्थ संजती गुव्विणी पुरतो ठिया ताहे अपवरगे पविसिऊण जहा न कोइ जाणइ तहा सूतिगिहं करावेइ कं किंचि सूइकम्मं तं सयमेव करेइ, ततो सो देवो संजइरूवं पयहिऊण दिव्वं देवरूवं दरिसेइ भणइ सय भो सेणिय सुलद्धं ते जम्म जीवियस्स फलं, जेण ते पवयणस्स उवरि एरिसी भत्ती अत्थीत्ति, उववूहेऊणगतो, एवं उववूहेयव्वा साहम्मिया, स्थिरीकरणे उदाहरणं अज्ञा साहारिया जहा ते वेल्लयसुएण थिरीकया तहा जे भविया ते थिरीकरेयव्वा; तथा वात्सल्यप्रभावने इति, वात्सल्यं च प्रभावना च वात्सल्यप्रभावने, तत्र वात्सल्यं समानधार्मिकस्याहारादिभिः प्रत्युपकरणं उक्तं च -

॥१॥ साहम्मिय वच्छल्लं आहाराईसु होइ सव्वत्थ ।
आएसगुरुगिलाणं तवस्सिबालाइसु विसेसा ॥

प्रभाव्यते विशेषतः प्रकाश्यते इति प्रभावना, निचेण्यासश्रन्थेत्यादिना भावे अनप्रत्ययः स चार्थात् प्रवचनस्य यद्यपि प्रवचनं शाश्वततत्त्वात्तीर्थकरभाषितत्वाद्वा सुरासुरनमस्कृतत्वात्स्वयमेव दीप्यते, तथापि दर्शनशुद्धिमात्मनोऽभीप्सुर्यो येन गुणेनाधिकः स तेन तत् प्रवचनं प्रभावयति; यथा भगवदार्यवज्रस्वामिप्रभृतिकः, उक्तं च -

॥१॥ कामं सभावसिद्धं तु पवयणं दिप्पते सयंचेव; ।
तहवि सय जो जेना हिओ सो तेन पभावए तं तु ॥

ते च प्रवचनप्रभावका अतिशय्यादयः उक्तं च -

॥२॥ अतिसेसइड्ढि धम्मकहि वादि आयरिय खवग नेमित्ती; ।
विज्जागयागणसम्मया य तित्थं पभावेंति ॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

अस्याक्षरगमनिका अतिशयी अवध्यादज्ञिनयुक्तः, ऋद्धिग्रहणात् आमर्पौपध्यादिऋद्धिप्राप्तः आचार्यः वादि धर्म्मकथि क्षपक नैमित्तिकाः प्रतीताः विद्याग्रहणात् विद्यासिद्धः आर्यखपटवत् राजगणसंमतश्चेति राजसंमता मंत्र्यादयः, गणसंमत्ता महत्तरादयः च शब्दाद्दानश्रद्धादिपरिग्रहः एते तीर्थं प्रवचनं प्रभावयंति, स्वतः प्रकाशस्वभावमेव सहकारितया प्रकाशयंतीति, अट्ठत्ति एवं दर्शनविनयभेदा अष्टौ भवंति, चारित्रविनयोप्यष्टप्रकारः तथा चाह -

[भा.६५] पणिहाणजोगजुत्तो पंचहिं समिईहिं तिहिं य गुत्तीहिं ।
एस उ चरित्तविनओ अट्ठविहो होइ नायव्वो ।।

वृ- प्रणिधानं चेतःस्वास्थ्यं तत्प्रधाना योगाः प्रणिधानयोगाः योगा व्यापारास्यैर्युकः समन्वितः प्रणिधानयोगयुक्तः, अयं च यतो अविरतसम्यग्दृष्टेरपि भवति, तत् आह, पंचभिः समितिभिस्तिसृभिश्च गुप्तिभिर्यः प्रधानयोगयुक्त एष चारित्रविनयः विनयविनयवतोः कथंचिदव्यतिरेकादष्टविधो भवति ज्ञातव्यः, समितिगुप्तियोगभेदाः, तत्रसमितयः प्रवीचाररूपा, गुप्तयः प्रतीचाराः प्रतीचाररूपाः, उक्तंच

।। १ ।। समिईण य गुत्तीण य एसो भेदो उ होइ नायव्वो ।
समिई पयाररूवा गुत्ती गुण उभयरूवाउ ।।

उक्तश्चारित्रविनयः, संप्रति प्रतिरूपविनयप्रतिपादनार्थमाह -

[भा.६६] पडिरूवो खलु विनओ कायवइमने तहेव उवयारे;
अट्ठचउव्विहदुविहो सत्तविह परुवणातस्स ।।

वृ- प्रतिरुपः उचितः खलु विनयश्चतुः प्रकारस्तद्यथा काये कायनिमित्तः एवं वाचि वाचिकः मनसि मानसिकः तथा उपचारे औपचारिकः अट्ठच उविह इत्यादि अत्र यथासंख्यं पदघटना कायिको विनयो अष्टविधः, वाचिकश्चतुर्विधः, मानसिको द्विवधिः, उपचारिकः सप्तविधः परुवणा तस्सत्ति तस्य कायिकादिभेदभिन्नस्य चतुःप्रकारस्य प्रतिरुपविनयस्य प्ररुपणा वक्ष्यमाणा तत्र यथोद्देशं निर्द्देश इति न्यायात् प्रथमतः कायिकस्याष्टविधस्य प्ररुपणामाह -

[भा.६७] अब्भुठाणं अंजलि आसणदानं अभिग्गहकिई य ।
सुस्सूसणा य अभिगच्छणा य संसाहणा चेव ।।

वृ- अभ्युत्थानार्हे गुर्वादौ समागच्छति एष सामान्यसाधूनां विनयः अपूर्वं पुनः समागच्छंतं दृष्ट्वा सूरिणाप्युत्थातव्यं, अंजलिप्रश्नादौ यदि पुनः कथमप्येको हस्तः क्षणिको भवति, तदेकतरं हस्तमुत्पाट्यनम क्षमाश्रमणेभ्य इति वक्तव्यं, आसनदानं नाम पीठकाद्युपनयनं, अभिग्रहा गुरुनियोगकरणाभिसंधिः, कृतिश्चेति कृतिकर्म्म वंदनमित्यर्थः, शुश्रूषणा विधिवदऽनतिदूरासन्नतया सेवनं, अभिगमनमागच्छतः प्रत्युद्गमनं सूत्रे स्त्रीत्वं प्राकृतत्वात् संसाधना गच्छतोनुव्रजनं, संप्रति वाग्नियभेदानाह -

[भा.६८] हियमयिअफरुसभासी, अनुवीइभासिसवाइउ; ।
विनओ एएसिं तु विभागं वोच्छामि अहानुपुव्वीए ।।

वृ- अत्र भासिशब्दः प्रत्येकमभिसंवध्यते, हितभाषी मितभाषी अपरुषभाषी हितं परिणामसुंदरं तद्भाषते, इत्येवंशीलो हितभाषिस्वरुपं वक्तव्यं, हितं च द्विविधमिहलोके हितं परलोक हितं च तत्र इहलोकहितप्रतिपादनार्थमाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.६९] वाहिविरुद्धं भुंजइ, देहविरुद्धं च आउरो कुणइ ।
आयासअकालिचरियादिवारणं हियं तु ।।

वृ- यः कश्चित् पुरुषो व्याधिग्रस्तो व्याधिविरुद्धं व्याधिप्रतिकोपकारि भुंक्ते तथा य आतुरो ग्लानो ग्लानत्वभग्नः सन् देहविनाशकारि करोत्यनशनप्रत्याख्यानादि, तयोर्यद्वारणं, तथा आयासस्स मानातिरेकेण क्रियमाणस्य अकालचर्या रात्रौ पथिगमनमादिशब्दात् कंटकाकुलादिपथि गमनादि-परिग्रहस्तस्य च यद्वारणमेतत् ऐहिकं हितं तद्भाषी ऐहिकहितभाषी; संप्रति परलोकहितभाषिरूप-प्रतिपादनार्थमाह -

[भा.७०] सामायारीसीयंतचोयणा उज्जमंतसंसा य,
दारुणसहावतं चिय, वारेइ परत्थ हियवाई ।।

वृ- सामाचारी त्रिविधा ओघसामाचारी दशविधचक्रवालसामाचारी, पदविभागसामाचारी च तस्यां त्रिविधायामपिसामाचार्यां यथायोगं सीदतः शिथिलयतश्चोदना प्रोत्साहकरणं सामाचारीसीदतश्चोदना, तथा उद्यच्छतस्त्रिविधायामपि सामाचार्यां यथाशक्त्युद्यमं कुर्वतः शंसा प्रशंसा उपबृंहणमुद्यच्छंसा, चः समुच्चये परलोकहितभाषणमिति सामर्थ्यात् गम्यते, तत्कारी परलोकहितवादी; तथा दारुणः क्रोधाद्यन्वितः स्वभावो यस्यासौ दारुणस्वभावस्तद्भावो दारुणस्वभावता, तां यो वारयति, सोपिपरत्र हितवादी, अत्र परः पृच्छति ।।

[भा.७१] अत्थि पुन काइकिट्ठा इह परलोगे य अहियया होइ, ।
थद्धफरुसत्तनियडी, अतिलुद्धत्तं इच्चादी ।।

वृ- ननु हितभाषीत्यत्र हितमिति विशेषणं च व्यवच्छेदकं भवति, व्यवच्छेदं चात्र हितं तदस्ति पुनः काचित् कायिकी वाचिकी मानसिकी वा चेष्टा या इह लोके परलोके वा हिता सती व्यवच्छिद्येत् सूरिराह थद्धपरुसेत्यादि त्वप्रत्यय उभयत्रापि संबध्यते, स्तब्धत्वमनर्मता एतेन कायिकी चेष्टोक्ता, परुषत्वं निष्ठुरभाषिता, अनेन वाचिकी, मानसिकीमाह निकृतिर्माया अतिलुब्धत्वमत्युत्कटलोभता इत्यादि शब्दात् क्रोधशीलता कलहोद्दीपकत्वमित्यमित्यादिपरिग्रहः ततोऽस्त्यहितापि चेष्टेति तदव्यवछेदार्थं हितग्रहणं, संप्रति मितिभाषित्वव्याख्यानार्थमाह -

[भा.७२] तं पुन अनुच्चसद्दं वोछिण्णमिय पभासए मउयं ।
मम्मेसु अडूमंतो सियावए परिपागवयणेणं ।।

वृ- तत् इहलोकहितं परलोकहितं वा पुनर्भाषतेऽनुच्चशब्धं विद्यते न उच्चशब्दः स्वरो यस्य तत्तथा तत् व्यवच्छिन्नं विभक्तममिलिताक्षरमित्यर्थः, मितं परिमितं प्रभूतार्थ संग्राहकं स्तोकाक्षरमित्यर्थः, तथा मृदुकं कोमलं श्रोतृमनसां प्रल्हादकारि इत्थंभूतमपि मर्मानुवेधतया विपाकदारुणं स्यात् अत आह मर्मस्वऽदूनयन् मर्म्माण्यविध्यन् इत्यर्थः स्याद्वा तथाविधं कंचनमशिक्षणीयमधिकृत्य परुषस्य मर्म्मानुवेधकस्य च वक्ता परिपचनेन अन्यापदेशेन यथा दोषाः स्त्रीसेवादयः इह परत्र वाकल्याणकारिणो यथा अमुकस्य तस्मात् कुलोत्पन्नेन शीलप्रमुखेषु गुणेष्वादरः कर्त्तव्यः एवं मितभाषी, सांप्रतम-परुषभाषित्वव्याख्यानार्थमाह ।।

[भा.७३] तंपि य अपरुसमउयं हिययगाहि सुपेसलं भणइ,
नेहमिव उग्गिरंतो, नयनमुखेहिं च वियसंतो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तदपि हितं मितं च भणति अपरुषमनिष्टुरमेतदेव व्याचष्टे मृदुकं कोमलं कथंभूतमित्याहः हृदयं गृह्णाति हृदये सम्यग्निवे शिते इत्येवंशीलहृदयग्राहः तथा सुट्टु अतिशयेन पेशलं मनोज्ञं श्रोतृमनसां प्रीतिकारि सुपेशलं, तथा नयनमुखाभ्यां विकसन् तथा कथंचनापि भणति, यथा स्नेहमिवां-तरप्रतिबद्धमिव साक्षादुद्रिरन् प्रकटीकुर्वन् प्रतिभासते, इत्थंभूतो वक्ता अपरुषभासी, संप्रत्यनु-चिंत्यभाषित्वप्रतिपादनार्थमाह ।।

[भा.७४] तं पुन विरहे भासइ न चेव ततोऽपभासियं कुणइ ।
जोएइ तहा कालं, जह वुत्तं होइ सफलं तु ।।

वृ- तत्पुनर्हितं मितपरुषं च भाषते, अविरहे विरहाभावे समक्षमित्यर्थः, न पुनस्ततो विरहादन्यत्र परोक्षे अपभाषितं दुष्टभाषणं करोति विरुपं भाषते इत्यर्थः, तथा जोएइति देशीवचनमेतन् निरुपयति कालं प्रस्तावं यथाप्रस्तावोचिततया उक्तं भणितं सफलं भवति ।।

[भा.७५] अमियं अदेसकाले भावियमिव भासियं निरुवयारं ।
आपत्तोवि न गिण्हइ, किमंग पुन जो पमाणत्थो ।।

वृ- अमितं प्रभूताक्षरं, तथा अदेशकाले भावितमेवेति देशकालाभ्यामभावितमिव न देशोचितं नापि कालोचितमिति भावः, अत एव निरुपकारी देशकालानुचिततया ततो लेशतोपि परस्योपकारायोगात् एवंरुपं भाषितमायत्तोपि स्ववशगोऽपि न गृह्णाति, नादेयबुद्धया श्रृणोति किमंग पुनः प्रमाणस्थो मान्य इति ।

[भा.७६] पुव्वं बुद्धीए पासित्ता तत्तो वक्कमुदाहरे ।
अचक्खुयोवनेयारं, बुद्धिं अन्नेसए गिरा ।।

वृ- प्रागुक्तप्रकारेण पूर्वं बुद्धया प्रेक्ष्य पर्यालोच्य पश्चात् वाक्यमुदाहरेत् उच्चारयेत अन्यथा यथा कथंचन प्रवृत्त्या सम्यगुपादेयत्वायोगात् तथा चाह अचक्षुष्कइवांधक इव नेतारमाकर्षयितारं बुद्धिमन्वेपते गीः सदसदर्थप्रतिपाद्यते, इत्थं च वक्ता अनुविचिंत्यभाषी, उक्तो वाचिको विनयः संप्रति मानसिक विनयद्वैविध्यंप्रतिपादनार्थनाह -

[भा.७७] मानसिओ पुन विनओ दुविहो उ समासओ मुनीयव्वो ।
अकुसलमनोनिरोही कुसलमनउदीरणं चेव ।।

वृ- मानसिकः पुनर्विनयः समासतः संक्षेपेण द्विविधो द्विप्रकारो मुणितव्यो ज्ञातव्यः, तदेव द्वैविध्यमुपदर्शयति, अकुशलस्य आर्त्तध्यानाद्युपगतस्य मनसो निरोधः, अकुशलमनोनिरोधः कुशलस्य धर्म्मध्यानाद्युत्थितस्य मनस उदीरणं, च समुच्चये एवकारो अवधारणे एतावेव द्वौ भेदौ नान्याविति ।

उक्तो मानसिकोपि विनयः, सांप्रतमापैचारिकसप्तविधविनयप्रतिपादनार्थमाह -

[भा.७८] अब्भासवत्ति छंदोनुवत्तिया कज्जपडिकित्ती चेव,
अत्तगवेसणकालोनुयायसव्वानुलोमं च ।।

वृ- गुरो रभ्यासे समीपे वर्त्तते इतिशीलोऽभ्यासवर्त्ती, गुरुपादपीठिकार्पत्यासन्नवर्त्तीति भावः छंदो गुरुणामभिप्रायस्तमनुवर्त्तते, आराधयतीत्येवंशीलः, छंदोनुवर्त्ती तद्भावः छंदोनुवर्त्तिता, तथा कार्ये कार्यनिमित्तं तृतीयो विनयः किमुक्तं भवति संग्रहमुपसंग्रहं वा मे करिष्यतीत्येवं बुद्ध्या यो विनयः क्रियते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स कार्यनिमित्तको विनयः, पडिकित्तीचेवत्ति कृते कार्ये यः क्रियते विनयः स प्रतिकृतिरुपत्वात् प्रतिकृतिरुपत्वात् प्रतिकृतिरत्र कार्यहेतुके प्रतिकृतिरुपे च विनये आक्षेपपरिहारौ भाष्यकृद्वक्ष्याति, तथा द्रव्याद्यापत्सु आर्त्तस्य उपलक्षणमेतत् अनार्त्तस्य वा गवेषणं दुर्लभद्रव्यसंपादनादिरुपमार्त्तगवेषणं, तथा कालं प्रस्तावमुपलक्षणत्वात् देशं च जानातीति कालज्ञस्तद्भावः कालज्ञता देशकालपरिज्ञानं तस्मिन् सति गुर्वादिच्छंदसा गुर्वादिभ्य आहारादिप्रदानं करोति, ततो विनयहेतुत्वात्तदपि देशकाल परिज्ञानविनयः तथा सर्वेषु गुरुपदेशेष्वनुलोममप्रतिकुलतो सर्वानुलोमं, च समुच्चये एष गाथासंक्षेपार्थः, व्यासार्थं तु भाष्यकृद्विभणिषुः प्रथमतोभ्यासवर्त्तित्वं व्याख्यानयन्नाह-

[भा.७९] गुरुणोय लाभकंखी, अब्भासे वट्टते सया ।
साहू आगारइंगिएहिं, संदिट्ठो वत्ति काऊणं ।।

वृ- गुरोरभ्यासे समीपे लाभकांक्षी, ज्ञानदर्शनचारित्ररुपपरमार्थलाभार्थी सदा साधुः प्रवर्त्तते, किमर्थमित्यत आह-आगारित्यादि आकारो नेत्रवक्त्रगतं, इंगितं चेष्टा ताभ्यां गुरोरभिप्रावमवगम्य तत्समीहितं कुर्त्तुं संदिष्टो चेति यत् किमपि गुरुणा संदिष्टः तद्वा कर्तुमिति, संप्रति च्छंदोनुवर्त्तितामाह -

[भा.८०] कालसहावानुमया, अहारुवहीउवस्सया चेव ।
नाउं ववहरइ तहा, छंदं अनुवत्तमाणो उ ।।

वृ- आहारः पिंडः, उपधिः कल्पादिः, उपाश्रयो वसतिरेते कालस्वभावानुमता इति, अनुमतशब्दः प्रत्येकमभिसंबध्यते, कालानुमताः स्वभावानुमताश्च कालानुमता ये यस्मिन् काले सुखहेतुतयानुमताः ते कालानुमताः । प्रकृतिः स्वभावः स चार्थादिह गुरोः प्रतिगृह्यते तदनुमताः तदनुकूलाः तान् तथा ज्ञात्वा च्छंदो गुरोरभिप्रायमनुवर्त्तमानो व्यवहरति संपादयति, एष च्छंदोनुवर्त्तिताविनयः, संप्रति कार्यहेतुके विनये परकृतमाक्षेपं मनस्याधाय परिहारमाह ।

[भा.८१] इहपरलोकासंसविमुक्कं कामं वयंति विनयं तु ।
मोक्खाहिगारिएसु अविरुद्धो सो दुपक्खेवि ।।

वृ- ननु तीर्थकरैर्भगवद्भिरिहपरलोकाशंसाविप्रमुक्तविनयः कर्त्तव्यतयोपदिष्टस्ततः कथं साधूनां कार्यहेतुको विनयः ? उच्यते, काममिति अनुमते अवधृते ततोयमर्थः, यद्यपि नाम इह परलोकाशंसाविप्रभुक्तं कामं नियमाद्वदंति विनयं तथापि मोक्षाधिकारिषु मोक्षयोग्येषु मोक्षपथज्ञानदर्शनचारित्रवत्स्वित्यर्थः स कार्यहेतुकोपि विनयः द्वयो पक्षयोः समाहारे द्विपक्षं, तस्मिन्नपि साधुवर्गे चेत्यर्थः अविरुद्धो न विरोधभाक् इयमत्र भावना कार्यहेतुकोपि विनयः खलु संग्रहादि कार्यार्थि संग्रहादि कार्यं च मोक्षांगमिति, सोपि मोक्षार्थिना कर्त्तव्यो भगवदुपदिष्टत्वादिति, संप्रति कृत प्रतिकृत विनये तमेवाक्षेपं मनस्याधाय परिहारमाह । -

[भा.८२] एमेवय अनियाणं, वेयावच्चं तु होइ कायव्वं ।
कयपडिकित्ती विजुज्जइ, न कुणइ सव्वत्थ न जयइवि ।।

वृ- यथा मोक्षांगतया कार्यहेतुको विनयः साधुभिः कर्त्तव्यः, एवमेव मोक्षांगतयैव कृतप्रतिकृतिरुपमपि वैयावृत्त्यं अनिदानं निदानं भोगप्रार्थना तद्रहितं भवति, कर्त्तव्यं अनिदानमिति, च विशेषणं मध्यग्रहणे दंडादेरिवाद्यंतयोरपि ग्रहणमिति न्यायात् पूर्वं पश्चाच्च द्रष्टव्यं, तेन सर्वोपि विनयो मोक्षार्थिभिरनिदानः कर्त्तव्यः अथ कथं कृतप्रतिकृतिरुपस्य विनयस्य मोक्षांगता ? उच्यते सुशिष्यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्येवंपरिभावयति, ज्ञानदर्शनचारित्रलाभैर्मामनुपकारिणमप्युपकुर्वंति भगवंतोऽमी सूरयस्तस्मादेतेष्ववश्यं विनयःकर्त्तुव्यः, "जस्स तियं वेनइयं पउंजे" इति वचनादेवं च पर्यालोच्य यः क्रियते विनयः, स कृतप्रतिकृतिरुपत्वात् कृतप्रतिकृतिमोक्षांगत्वाच्चावश्यं कर्तव्य इति अन्यच्च उत्सर्गतस्तावत् साधुभिः सर्वं निर्जरार्थं कर्त्तव्यं, केवलं कदाचिदशुभोपि भाव उपजायते, कर्म्मगतेर्विचित्रत्वात् ततोऽशुभभावोदयवशात् यद्यपि सर्वदा न निर्जरार्थं प्रवर्त्तते, तथाप्येष ममापि करिष्यतीति कृतप्रतिकृतिबुद्ध्यापि वैयावृत्त्यं कर्त्तव्यं, तथा चाह 'कयपडिकितिविजुज्ज़इ' इत्यादि यद्यपि यत् वैयावृत्त्यं सर्वत्र सर्वेषु प्रयोजनेषु निर्जरानिमित्तं करोति तथापि कृतप्रतिकृतिरपि युज्यते कृतप्रतिकृतिबुद्ध्यापि वैयावृत्त्यं कर्त्तव्यमिति भावः, साधूनां ज्ञानादिपात्रतया विनयं स्थानत्वेन तेषु विनयस्य कल्याणपरंपराहेतुत्वात्। उक्तः कृतप्रतिकृतिरुपो विनयः ।सांप्रतमार्त्तगवेषणरुपविनयप्रतिपादनार्थमाह ।

[भा.८३/१] दव्वावईमाइसुं अत्तमणत्तेव गवेसणं कुणइ ।।

वृ- द्रव्यापदि दुर्लभद्रव्य संपतौ च तथा च भवति केषुचित् देशेष्ववं त्यादिषु दुर्लभं घृतादिद्रव्यमिति, आदिशब्दात् क्षेत्रापदि परिग्रहः, तत्र क्षेत्रापदि कांतारादि पतने, कालापदि दुर्भिक्षे, भावापदि गाढग्लानत्वे आर्त्तस्य पीडितस्य अत्यन्तसहिष्णुतया अनार्त्तस्य वा यथाशक्तियत् गवेषणं करोति, दुर्लभद्रव्यादि संपादयति, स आर्त्तगवेषणाविनयः; संप्रति कालज्ञताविनयप्रतिपादनार्थमाह-

[भा.८३/२] आहारादिपयाणं छंदंमि ऊ छट्ठउ विनउ ।।

वृ- षष्ठः कालज्ञतालक्षणो विनयः एष यदुत छंदंमिउ इति तृतीयार्थे सप्तमी यथा तिसु तेसु अलंकिया पुहवी इत्यत्र ततोऽयमर्थः ।छंदसा गुरुणामभिप्रायेणैव तुशब्दस्यैवकारार्थत्वात् आहारादिप्रदानं किमुक्तं भवति, यत् यस्मै प्रतिभासते तदिंगिताकारादिभिरभिज्ञाय आचार्यग्लानोपाध्यायप्रभृतिनामकालक्षेपं संपादयति, स एष कालज्ञताविनयः उक्तः कालज्ञताविनयः, संप्रति सर्वत्रानुलोमतालक्षणं विनयमाह।

[भा.८४] सामायारिपरुवणनिद्देसे चेव बहुविहे गुरुजो, ।
एमेयत्ति तहत्तिय, सव्वत्थनुलोमयाएसा ।।

वृ- गुरुणो इत्यत्र कर्त्तरि षष्ठी, गुरोः सामाचारीप्ररुपणे किमुक्तं भवति, इच्छामिथ्यादिरुपायां तस्यां सामाचार्यां गुरुणा प्ररुप्यमाणायां एवमेतत् यथा भगवंतो वदंति नान्यथेति प्रतिपत्तिस्तथा बहुविधे बहुप्रकारे निर्देशे तत्कर्त्तव्यताज्ञापनलक्षणे गुरोर्गुरुणा क्रियमाणे या तथेति वचनतः कर्त्तव्यतया च प्रतिपत्तिरेषा सर्वापि सर्वानुलोमता नाम विनय उपसंहारमाह-

[भा.८५] लोगोवयारविनओ, इय एसो वन्नितो सपक्खंमि ।
आसज्ज कारणं पुन कीरइ जइणा विपक्खेवि ।।

वृ- इति एवमुक्तेन प्रकारेण एष लोकोपचारविनयः स्वपक्षे सुविहितलक्षणे वर्णितः आसाद्य कारणं विपुनर्विपक्षेपि गृहस्थेषु तथाविधागारिषु श्रावकेषु पार्श्वस्थादिषु एष लोकोपचारविनयाभ्यासवर्त्तित्वादिलक्षणो यतनया प्रवचनोन्नतिव्याघातपरिहारेण संयमानाबाधया च क्रियते, तदेवं कायवाङ्मनोलोकोपचारभेदतश्चतुःप्रकारः प्रतिरुपविनययुक्तः अथवा अन्यथा चतुःप्रकारः प्रतिरुपविनयस्तानेव प्रकारान् दर्शयति ।।

[भा.८६] चउहा वा पडिरुवो तत्थंगनुलोमवयणसहियत्तं ।
पडिरुवकायकिरिया फासणसव्वानुलोमंच ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- वाशब्दः प्रकारांतरद्योतनार्थः, अन्यथा वा चतुष्प्रकारः प्रतिरुपविनयः तत्र तेषु चतुर्षु प्रकारेषु मध्ये एकः प्रतिरुपविनयस्तावदयं यदुत अनुलोमवचनसहितत्वं यत्किमपि कार्यमादिष्टः करोति, तत्सर्वमनुलोभवचनपूर्वकं करोति नान्यथेति भावः, द्वितीयप्रतिरुपकायक्रिया यथा परिपाट्या शरीरविश्रामणमित्यर्थः, तृतीयः संस्पर्शनविनयः यथा गुर्वादेः सुखासिको यः जायते तथा मृदुसंस्पर्शनिप्रत्येकः संस्पर्शनविषय इतिभावः, चतुर्थः सर्वानुलोमता सूत्रेसर्वानुलोममिति भावप्रधानो निर्देशः, चः समुच्चये सा च सर्वानुलोमता व्यवहारविरुद्धेपि प्राणव्यपरोपणकारिण्यपि वा समादेशे यथाक्रमं तथेति प्रतिपत्तिस्तथैव व कार्यसंपादनमित्येवं रुपा एतानेव प्रकारान् क्रमेण व्याचिख्यासुः प्रथमतोनुलोमवचनसहितत्वं व्याख्यानयति -

भा. [८७] अमुगं कीर उ आमंति भणइ अनुलोमवयणसहितो उ,
वयणपसायाईहि य अभिनंदइ तं वयं गरुणो ।।

वृ- इच्छाकारेण भो शिष्याः अमुकं क्रियतामित्येवं गुरुणा समादिष्टे यो वचसा आममिति ब्रूते एव किंतु गुरोस्तां वाचं वदनप्रसादादिभिः वदनस्य प्रसादेन मुखस्य प्रसन्नतया आदिशब्दात् उत्फुल्लनयनकमलोऽजलिप्रग्रहादिना चाभिनंदति, महान् कृतः प्रसादो यदेवं समादिष्ट इति एवं ज्ञापनेन स्फीतीकरोति स विनयविनयवतोरभेदोपचाशत् अनुलोमवचनसहितः प्रतिरुपविनयः तुशब्द एवकारार्थः एवंरुप एवानुलोमवचनसहितो नान्य इति, अस्यैव विनयस्य करणे उपदेशमाह -

[भा.८८] चोदयंते परं थेरा इच्छानिच्छेय तं वइं;
जुत्ता विनयजुत्तस्स गुरुवक्कनुलोमता ।।

वृ- स्थविरा आचार्यादयः ते परं शिष्यं चोदयंते तेषां तत्राधिकारित्वात् तत्र तां चोदनात्मिकां वाचं प्रति यदि इच्छा भवति तदादिष्टकार्यकरणाय यदिवा अनिच्छा तथापि विशुद्धान्वयतया विनययुक्तस्य गुरुवाक्यानुलोमता आममित्येवं गुरुवाक्योपबृंहणं, गुरुवाक्योपदिष्टकार्यसंपादकता चेति लक्षणा युक्ता इयमत्र भावना जातिकुलसमन्वितेन विनयमिच्छता सदैव गुरोर्निकटवर्त्तिना भवितव्यं तत्र यदा गुरुः शिक्षयते, तदा तां शिक्षामिच्छता अनिच्छता वाऽवश्यं गुरुवाक्यमाममिति तथैवेत्येवं उपबृंहणीयं कार्यं च संपादनीयमिति एतदेव सविस्तरमाह ।

[भा.८९] गुरवो जं पभासंति तत्थ खिप्पं समुज्जमे ।
नऊसच्छंदया सेया, लोए किमुत उत्तरे ।।

वृ- गुरवो यत्प्रभाषंते, कर्त्तव्यतयोपदिशंति, तत्र क्षिप्रं शीघ्रं समुद्यच्छेत् सम्यगुद्यमं कुर्यात् यतो नहु नैव स्वच्छंदता स्वाभिप्रायेण वर्त्तिता श्रेयसी लोकेपि, अपिशब्दोत्राऽनुक्तोऽपि सामर्थ्यात् गम्यते, किमुत उत्तरे लोकोत्तरे सुविहितजनमार्गे परलोकार्थिनस्तस्य सुतरां न श्रेयसी, ज्ञानादिविच्युतिप्रसंगात्।

[भा.९०] जदुत्तं गुरुनिद्देसं जोवि आइसई मुनी ।
तस्सावि विहिणा जुत्ता, गुरुवक्कानुलोमता ।।

वृ- यथोक्तं गुरुनिर्देशं गुर्वाज्ञारुपं योपि मुनिरादिशति कथयति, तस्यापि तथा दिशतः प्रतिविधिना सूत्रोक्तेन युक्ता गुरुवाक्यानुलोमता यतो यथोक्तस्वरुपात्तदेवमुक्तोऽनुलोमवचनसहितस्वरुपो विनयः, संप्रति प्रतिरुपकायक्रियाविनयमाह -

[भा.९१] अद्धाण वायणाए निन्नासणयाए परिकिलंतस्स ।

सीसाई जा पाया किरिया पायादविनउ य ।।

वृ- अध्वनि मार्गे वाचनायां सूत्रार्थप्रदानलक्षणायां निन्यासनतया निरंतरोपवेशनतः परिक्रांतस्य समंततः क्रम्ममुपागतस्य क्रिया प्रतिरुपकायक्रिया विश्रामणेति तात्पर्यार्थः कर्त्तव्येति वाक्यशेषः, कथं कर्त्तव्येत्यतः आह शीर्षादियांवत्पादौ शिरस्यारभ्य क्रमेण तावत्कर्त्तव्या यावत्पादौ; यदि पुनः पादादारभ्य करोति तदा अविनयः पादादिमलस्य शीर्षादिषु लग्नात् अत्रैवापवादमाह -

[भा.९२] जत्तो व भणाइ गुरु करेइ कियकम्म मो ततो ।
पुव्वं संफरिसणविनउ पुन परिमिउयं वा जहा सहइ ।।

वृ- यतो वा अंगादारभ्य गुरुर्भणति तत् पूर्वमारभ्य कृतिकर्म्म विश्रामणां, मो इति पादपूरणे करोति तथा च सति पादादप्यारभ्य कुर्वतो नाविनयः गुर्वाज्ञाकारित्वात् उक्तोनुलोमकायक्रियाविनयः, संप्रति संस्पर्शनविनयमाह; संफरिसणेत्यादि संस्पर्शनविनयः पुनः परिमृदुकं वाशब्दादल्पमृदुकं वा यथा सहते तथा विश्रामणां करोति, अतिस्वरेण विश्रामणायां परितापनसंभवात् अथ विश्रामणायां को गुण इत्यत आह । -

[भा.९३] वायाइ सठाणं वयंति बद्धासणस्स जे खुभिया ।
खेयजओ तनुथिरया, बलंच अरिसादओ नेवं; ।।

वृ- वातादयो वातपित्तश्लेष्माणो ये बद्धासनस्य सतः क्षुभिताः स्वस्थानात् प्रतिचलितास्ते स्थानं व्रजंति स्वस्थानं प्रतिपद्यंते, ते न विक्रयां भजंतीति भावः, तथा वाचनाप्रदानतो मार्गगमनतो वा यः खेद उपजातः तस्य जयो ऽपगमो भवति, तथा तनोः शरीरस्य स्थिरता दार्ढ्यं भवति, न विशरारुभावः, अत एव च बलं शरीरं तदुपष्टंभतो आदिशब्दात्तदन्यरोगा न उपजायंते, एते विश्रामणायां गुणास्ततः कर्त्तव्योऽवश्यमनुलोमकायक्रियाविनयः, संस्पर्शनविनयश्च संप्रति सर्वत्रानुलोमताविनयमाह -

[भा.९४] सेयवपु मे काको, दिठो चउदंतपंडुरो वेभो ।
आमंति पडिभणते सव्वत्थनुलोमपडिलोमे ।।

वृ- श्वेतवपुःश्वेतशरीरो मे मया काको दृष्टः यदिवा इभो हस्ती चतुर्दंतो पांडुरश्च मया दृष्ट इति वर्त्तते, एवं प्रतिलोमे लोकव्यवहारविरुद्धे गुरुणा कथमप्युच्यमाने आमभिति प्रतिभणति शिष्ये सर्वत्रानुलोमलक्षणो विनयः प्रतिपत्तव्यः, किमुक्तं भवति, यदि नाम श्वेतवपुर्मया काको दृष्ट इत्यादिकं लोकव्यवहारप्रतिकूलं कथमपि गुरुर्भणति तथापि तदानीं सकलजनसमक्षमामित्येवं वक्तव्यं, न पुनस्तद्वचः कुट्टयितव्यं, केवलं विशेषार्थिना जनविरहेकारणं प्रष्टव्यं, एवं हि सर्वानुलोमतालक्षणो विनयः प्रकटितो भवति नान्यथा । -

[भा.९५] मिणु गोणसं गुलेहिं गणेह से दाहवक्कलाइं से ।
अग्गंगुलीए वग्घं तु दडिवगडं भणति आममिति ।।

वृ- मिणु प्रमिणु गोनसं सर्प्पजातिविशेषं अंगुलैः यथा कियत्यंगुलानि अयं गोनसो विद्यते इति तथा गणय परिसंख्याहि से तस्य गोनसस्य दंष्ट्राः यदिवा से तस्य वक्र वालानि पृष्टस्योपरि मंडललक्षणानि गणय कियंत्योऽस्य दंष्ट्राः कियंति वास्य पृष्ठस्योपरि वक्रवालानीत्येतत् गणयित्वा कथयेति भावः, तथा अग्रांगुलया अंगुल्यग्रभागेन व्याघ्रं तुदतो त्रेणेव व्यथय, तथा डिप प्रोल्लंघय अवटं कूपं, एवं प्राणप्रतिलोमं वदति गुरौ सर्वत्रानुलोमताविनययुक्तः शिष्य आममिति भणति, गुरवो हि सकलजगत्प्राणिवर्गविषय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमकरुणापरितचेतसस्ततस्त एव युक्तमयुक्तं वा जानंति किमत्र शिष्यस्य चिंतयेति शिष्येण सर्वत्रानुलोमविनयमिच्छता ईद्दशमपि गुरुवचनं तथेति प्रतिपत्तव्यमिति, संप्रति गुत्तिसु य समिईसु य इत्यादि गाथायां यदुक्तं पसत्थे य इति तत्र प्रशस्तग्रहणव्यवच्छेद्यं दर्शयति -

[भा. ९६] तत्थ उ पसत्थगहणं परिपिट्टणछेज्जमाइ वारेइ, ।
उसन्नगिहत्थाण, य उट्ठाईय पुव्वुत्ता ।।

वृ- जोगे तहा पसत्थे य इत्यत्र यत् प्रशस्तग्रहणं कृतं तत् अप्रशस्तयोगं परिपिट्टनछेदादिकं वारयति निराकरोति, न तदकरणे प्रतिक्रमणं प्रायश्चित्तं भवतीति भावः, तस्याप्रशस्तत्वेन तत् करणस्यैव प्रायश्चित्तविषयत्वात्, तथा अवसन्नानामुपलक्षणमेतत् पार्श्वस्थकुशीलानां च तथा गृहस्थानां पूर्वोक्ता उत्थानादयोऽभ्युत्थान जल्पासनप्रदानादयस्तानपि वारयति, तेषामपि तान् प्रति अप्रशस्तत्वात्, अत्रैव प्रायश्चित्तयोजनामाह ।।

[भा. ९७] जो जत्थ उ करणिज्जो, उट्ठाणाइंउ अकरणेतस्स ।
होइ पडिक्कमियव्वं एमेवय वाए मानसिए ।।

वृ- यो योग उत्थानादिरभ्युत्थानांजलिप्रदानादिको यत्र आचार्यादिविषये करणीय उक्तस्तस्य तत्राकरणे प्रतिक्रमितव्यं भवति, मिथ्यादुःकृतं प्रायश्चित्तं भवतीति भावः, तदेव तत् कायिकप्रतिरुपयोगविषये उक्तमेव अनेनैव प्रकारेण वाचिके मानसिकेपि योगे प्रतिरुपे वक्तव्यं, यथा वाचिको मानसिकोपि यः प्रतियोगरुपयोगो यत्र करणीय उक्तस्तस्य तथा तत्राकरणे मिथ्यादुःकृतं प्रायश्चित्तमिति, चशब्दोऽनुक्तसमुच्चयार्थस्तेन इच्छामिथ्यादिप्रशस्तयोगाकरणेपि मिथ्यादुःकृतं द्रष्टव्यं, संप्रति यत् मूलगाथायामतिक्कमे अनाभोगे इत्युपन्यस्तं, तद्व्याख्यानयन्नाह ।।

[भा. ९८] अवराहे अतिक्कमणे वइक्कमे चेव तह अनाभोगे ।
भयमाणे उ अकिच्चं, पायच्छित्तं पडिक्कमणं; ।।

वृ- अपराधे उत्तरगुणप्रतिसेवनरुपे अतिक्रमणे तथा व्यतिक्रमे च तथाऽनाभोगतोऽकृत्यमपि मूलोत्तरगुण प्रतिसेवनालक्षणं भजमाने प्रतिक्रमणं मिथ्यादुष्कुतं प्रायश्चित्तं तदेवमुक्तं प्रतिक्रमणार्हं प्रायश्चित्तमिदानीं तदुभयार्हमभिधातुकाम आह ।

[भा. ९९] संकिए सहसागारे भयाउरे आवतीसु य; ।
महव्वयातिचारे य, छण्हं ठाणाण बज्झंतो ।।

वृ- शंकितः प्राणातिपातादौ यथा मया प्राणातिपातः कृतः किंवा न कृतस्तथा मृषा भणितं नवा, अवग्रहोऽनुज्ञापितो नवा, स्नानादिदर्शननिमित्तं जिनभवनादिगतस्य स्त्रीस्पर्शे रागगमनमभून्नवा, इष्टानिष्टेषु शब्दादिषु रागद्वेषौ गतौ नवा तक्रादिलेपकृदवयवाः कथमपि पात्रगताः पर्युषिता भिक्षार्थमटितुकामेन धौताः किंवा न धौत्ता इत्यादि तत्र षन्नां स्थानानां बाह्यं तदुभयलक्षणं प्रायश्चितमिति योगः, तथा उपयोगवतोपि सहसाकारे सहसा प्राणातिपादिकरणे तथा भये दुष्टम्लेच्छादिसमुत्थे यदिवा हस्त्यागमने मेघोदकनिपातस्पर्शने दीपादिस्पर्शनेन वा आकुलतया प्राणातिपातादिकरणे तथा आतुरः क्षुधापिपासया वा पीडितः भावप्रधानश्चायं निर्देशस्ततोयमर्थः आतुरतायां तथा आपत्चतुर्द्धा तद्यथा द्रव्यापत् क्षेत्रापत् कालापत्, भावापत्; तत्र द्रव्यापत् दुर्लभं प्रायोग्यं द्रव्यं, क्षेत्रापत्छिन्नमंडपादि कालापत् दुर्भिक्षादि, भावापत् गाढग्लानत्वादि एतासु स हिंसादोषमापद्यमानस्यापि अनात्मवशगस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि ईर्यासमितावुपयुक्तोऽप्युच्चालिते पादे सहसा समापतितं कुलिंगिनमपि व्यापादयेत् मृषापि कदाचित्सहसा भाषतेऽग्रहमपि कदाचिद्राभसिकतया अननुज्ञातमपिपरिभोगयति अत्युल्बणमबलारुपमवलोक्य कदाचनिपि सहसारागमुपैति इत्यादि, तथा भयात्प्रपलायमानो भू जल ज्वलन वनस्पति-द्वित्रिचतुःपंचेंद्रियानपि व्यापादयेन् मृषापि भयाद् भाषते, परिग्रहमपि धर्मोपकरणबाह्यस्य करोति, आतुरतायामपि सम्यगीर्यापशाशोधने संभवति प्राणातिपातः, अत्यातुरतायां कदाचिन् मृषाभाषणमपि अदत्तादानमपि च एवमापत्स्वपि भावनीयं, यथा महाव्रतानां प्राणातिपातनिवृत्त्यादीनां सहसाकारः स्फुटबुद्ध्याकारणतो वा अतिचारे चशब्दादतिक्रमव्यतिक्रमयोश्च तथाऽतिक्रमादीनां महावृतविषयाणा-मन्यतमस्याशंकायां वा किमित्याह छण्हठाणाणवज्झतोइतिइह केषांचित् अनवस्थितपारांचिते प्रायश्चिते द्वे अपि कं प्रायश्चित्तमिति प्रतिपत्तिः तन्मतेन नवधा प्रायश्चित्तं, तत्रचाद्ये द्वे प्रायश्चिते मुकत्वा शेषाणि सप्त प्रायश्चित्तानि तेषां च सप्तानां प्रायश्चित्तानां यदाद्यं प्रायश्चित्तं तत् उपरितनानां षण्णां बाह्ये नाभ्यंतरमिति, षण्णां स्थानानां बाह्यतः इति वचसा तदेव प्रतिपत्तव्यं, यश्च तदुभयं तच्चेवं भावनीयं, शंकितादिषु यथोक्तस्वरुपेषु सत्सु प्रथमं गुरुणां पुरत आलोचनं, तदनंतरं गुरुसमादेशेन मिथ्यादुःकृतदानमिति तत्र यदुक्तं संकिए इति तत् विवृण्वन्नाह -

[भा. १००]　हित्थोव न हित्थोमे, सत्तो भणियं व नभणियं मोसं ।
उग्गहनुएणमणुन्ना, तइए फासे चउत्थम्मि ॥

[भा. १०१]　इंदियरागद्दोसाउ, पंचमे किं गतोमि न गतोत्ति ।
छट्ठे लेवाडाइ, धोयम धोयं न वा वेत्ति ॥

वृ. सत्त्वः प्राणी हित्थोत्ति देशीपदमेतत् हिसिंतो मे मया न वा हिंसित इति, तथा भणितं यदि वा न भणितं तथा तृतीये अदत्तादान विरति लक्षणे अवग्रहो ऽनुज्ञा न कारिता, तथा चतुर्थे मैथुनविरति लक्षणे, जिनभवनादिषु स्नानादि दर्शन प्रयोजनतो गतः सन् फासे इति स्त्री स्पर्शरागं गतो न वा, तथा पंचमे परिग्रह विरमणलक्षणे इन्द्रियेषु विषयिणा विषयोपलक्षणादिन्द्रिय विषयेषु इष्टानिष्टेषु रागद्वेषौ गतोस्मि किंवा न गत इति, तथा षष्ठेरात्रिभोजन विरमणे लेपकृदादि तक्राद्यवयवरुपं कथमपि यात्रादि गतं पर्युषितं भिक्षाटनार्थमुद्यतेन धौतमथवा न धौतं मयेति यद्येवं ततः किमित्याह-

[भा. १०२]　इंदिय अव्वागडिया जे अत्था अनुवधारिया ।
तदुभयपायच्छित्तं पडिवज्जइ भावतो ॥

वृ. उक्तेन प्रकारेण य अर्थः प्राणातिपातादयः इन्द्रियैश्चक्षुरादिभिरव्याकृता अप्रकटीभूताः प्रकटीकृता अपि ये अनुपधारिता न सम्यक् धारणा विषयी कृतास्तेषु प्रायर्त्तिं प्रतिपद्यते भावतः सम्यक् अपुनरावतनेन तदुभयमिति तच्च तद् उभयं च पूर्व गुरुणां पुरत आलोचना तदनंतरं तदादेशतो मिथ्या-दुःकृतदानमित्येवं रूपं तदुभयं एतदेव सविस्तरमभिधित्सुराह -

[भा. १०३]　सद्दा सुया बहुविहा तत्थय केसु विगतोमि रागंति; ।
अमुगत्थ मेवितक्का, पडिवज्जइ तदुभयं तत्था ॥

वृ- शब्दामया बहुविधा बहुप्रकाराः श्रुताः श्रवणविषयीकृतास्तत्र तेषु बहुविधेषु शब्देषु श्रुतेषु मध्ये वितर्कति एवं मे वितर्क्क संदेहो यथा केषुचिदपि अमुगत्थति अमुकेषु रागमुपलक्षणमेतत् द्वेषं वा गतोस्मि तत्र तस्मिन् शंकाविषये तदुभयमुक्तलक्षणंप्रायश्चित्तं भावतः प्रतिपद्यते, यदि हि निश्चितं भवति यथा

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अमुकेषु शब्देषु रागद्वेषं वा गत इति तत्र तपोर्हं प्रायश्चित्तं अथैवं निश्चयो न गतो रागद्वेषं वा तत्र स शुद्ध एव न प्रायश्चित्तविषयः, ततोवितर्के यथोक्तलक्षणे तदुभयमेव प्रायश्चित्तमिति ।

[भा.१०४] एवमेव सेसएवि विसए आसेविऊणजे पच्छा; ।
काऊणएगपक्खे न तरइ तहियं तदुभयं तु ।।

वृ- एवमेव उक्तेनैव प्रकारेण यान् रुपादीन् विषयान् आसेव्योपभुज्य उपलक्षणमेतत् प्राणातिपातादीनप्यासेव्य पश्चात् एकतरस्मिन् पक्षे अपराधलक्षणे निर्दोषतालक्षणे वा कर्तुं न शक्नोति, यथा रुपादिषु विषयेषु रागद्वेषं वा गतः प्राणातिपातादयो वा कृता इति यदि वा न गतो रागद्वेषौ, नापि कृताः प्राणातिपातादय इति तत्र तदुभयं च तदुभयमेव तु शब्दस्यैवकार्थत्वात् यथोक्तलक्षणं प्रायश्चित्तं शंकास्पदत्वात् तदेवं शंकिते इति व्याख्यातं, संप्रति सहसाकारे इत्यादि व्याचिख्यासुराह -

[भा.१०५] उपयोगवतो सहसा, भएण वा पेल्लिए कुलिंगादि ।
अच्चाउरावतीसु य अनेसियादिगहणभोगा ।।

वृ- उपयोगवतोपि ईर्यासमितौ सम्यगुपयुक्तस्यापि उच्चालिते पादे कथमपि सहसायोगतः समापतितः सन् कुलिंगी व्यापद्यते भयेन वा चौरसिंहादीनां भृशं प्रपलायमाने भयग्रहणमुपलक्षणं तेन एतदपि द्रष्टव्यं परेण वा पेल्लिए इति परेण प्रेरितो वा तद्व्यापारमासाद्य कुलिंगी उपलक्षणमेतत् पृथिव्यादिजीवनिकायो वा व्यापत्तिमाप्नुयात् तथा अत्यातुरे क्षुधापिपासया वा अत्यंतपीडिते तथा आपत्सु द्रव्यापदादिषु यदि अनेषितादिग्रहणे भोगौ भवतः अनेषितमनेषणीयमादिशब्दादकल्पनीयस्य परिग्रहः, न केवलमनेषितादिग्रहणभोगौ किंतु गमनागमनादौ पृथिव्यादिजंतुविराधनापि भवति तथापि तत्र प्रायश्चित्तं यथोक्तलक्षणं तदुभयमिति वर्त्तते सहसाकारादिविषयत्वात्, संप्रति महव्वयाइयारे य इत्येतद्व्याख्यानयन्नाह -

[भा.१०६] सहसाकारे अइक्कमवइक्कमे चेव तह अइयारे ।
होइ व सद्दग्गहणा पच्छित्तं तदुभयं तिसुवि ।।

[भा.१०७] अतियारुवया वा, एगयरे तत्थहोइ आसंका ।
नवहा जस्स विसोही तस्सुवरिं छण्हं बज्झं तु ।।

वृ- सहसाकारतः सहसाकारतोतिक्रमे व्यतिक्रमे अतिचारे च प्राग् व्यावर्णितस्वरुपे महाव्रतविषये इति सामर्थ्यात् गम्यते महव्वयाइयारे य इति पदस्य व्याख्यायमानात्वात् एतेषु त्रिष्वपि दोषेषु तदुभयमुक्तस्वरुपं प्रायश्चित्तमिति योगः, अथ मूलगाथायां महाव्रतातीचारे चेत्येवोक्तं ततः कथमत्र विवृतं अतिक्रमे व्यतिक्रमे चेति ? अत आह, चशब्दग्रहणात् किमुक्तं भवति ? चशब्दग्रहणतः मूलगाथायामतिक्रमव्यतिक्रमयोरपि समुच्चयः कृत इत्यदोषः, अथवा अतिचारस्य पर्यंतग्रहणादतिक्रमव्यतिक्रमयोरपि उपयोग स्फुटबुद्धयाकरणे तदुभयं प्रायश्चित्तमिति योगः, वाशब्दो भिन्नक्रमत्वादेगयरे इत्यत्र योजनीयः ततोऽयमर्थ एकतरस्मिन् वा तत्र अतिक्रमे व्यतिक्रमे व्यतिक्रमे अतिचारे वा यदि भवत्याशंका यथा मयातिक्रमः कृतो न वा व्यतिक्रमो कृतो न वा अतिचारः कृतो नवेति तत्रापि तदुभयं प्रायश्चित्तं इह सहसाकाराशंके संकिए सहसागारे पदद्वयेनापि गते, केवलं महाव्रतानामतिक्रममादिष्वित्याशंकायां सहसाकारे चैतदेव प्रायश्चित्तं नान्यत् परिकल्पनीयमिति भाष्यकृता सहसाकाराशंके अपि योजिते, छण्ह ठाणाण बज्झं तु इति व्याख्यानयन्नाह नवहेत्यादि

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

यस्याचार्यस्य मतेऽनवस्थितपरांचितयोरैक्याविवक्षणात् नवधा नवप्रकाश विशोधिः प्रायश्चित्तं, तस्य आद्यप्रायश्चित्तद्वयस्योपरि यद्वर्त्तते प्रायश्चित्तं तत् षणामुपरितनानां बाह्यमेव तुशब्दस्यैवकारार्थत्वात्, ततः छण्हं ठाणाण वज्झंतु इति तदुभयं प्रायश्चित्तं प्रतिपत्तव्यमिति उक्तं तदुभयार्हं प्रायश्चित्तमिदानीं विवेकार्हमाह । -

[भा.१०८] कडजोगिण उ गहियं सेज्जासंथारभत्तपानं वा ।
अफासुएसणिज्जं नाउं, विवेगो उ पच्छित्तं ।।

वृ- कृतयोगी नाम गीतार्थः, कश्च गीतार्थ उच्यते वस्त्रपात्रपिंडशय्यैषणाध्ययनानि छेदसूत्राणि च सूत्रतोऽर्थतः तदुभयतो वा येन सम्यगधीतानि स गीतार्थः, तेन कृतयोगिना श्रुतोपदेशानुसारिपरिणाम-परिणतेन शय्या उपाश्रयः उपाश्रयग्रहणात् तृणडगलकमल्लकादिपरिग्रहस्तेषामपि प्रायस्तत्रैव संभवात् संस्तारकः प्रतीतः, संस्तारकग्रहणं सकलौधिकोपग्रहिकोपलक्षणं भक्तमशनं, पानं सौवीरादि वाशब्दात् खादिय स्वादिमं वा गृहीतं पश्चात् कथमपि अप्रासुकमनेषणीयं वा ज्ञातं, तत्र प्रायश्चित्तं तस्य गृहीतस्य शय्यादेर्विवेकः परित्यागः उक्तं च - तं सेज्जाइयं विहिणा सुउवइठेणं विगिंचमाणो परिसुद्धो इति ।।

[भा.१०९] पउरण्णपाणगामे किं साहु न वेति सावए पुच्छा नत्थि ।
वसहित्ति पकया ठिएसु अतिसेसियविवेगो ।।

वृ- केचित् साधवः प्रचुरान्नपाने ग्रामे गतास्तत्र वसतिर्दुःप्रापा नोचिता लभ्यते इति न स्थिताः ततः सावए पुच्छा इति षष्ठिसप्तम्योरर्थ प्रत्यभेदात् श्रावकस्य तथाभिनवदीक्षितस्य पार्श्वे पृच्छा अभवत् यथा किमिति साधवो नात्र तिष्ठंति स प्राह नास्त्यत्र वसतिरिति कृत्वा ततः साधुषु गतेषु श्रावकैः पर्यालोच्य वसतिः प्रकृता प्रकृष्टा कृता तस्यां च कृतायां कालांतरेण ते वान्ये वा साधवः समागतास्तत्र स्थिता स्थितेषु च कतिपयदिनातिक्रमे अतिशेषितं ज्ञातं च सति ततः प्रायश्चित्तं विवेकः किमुक्तं भवति, ज्ञाते सति तां वसतिं परित्यजंतस्ते शुद्धा इति उपलक्षणमेतत्, तेन एतदपि द्रष्टव्यं ।। अशठभावेन गिरि राहु मेघ महिकारजःसमावृते सवितरि उद्गतबुद्धया अनस्तमितबुध्ध्या वा गृहीतमशनादिकं पश्चात् ज्ञातमनुद्गते अस्तमिते वा सूर्ये गृहीतं तथा प्रथम पौरुष्यां गृहीत्वा चतुर्थामपि पौरुषीं यावत् धृतमशनादि शठभावेनाऽशठभावेन वा अर्द्धयोजनातिक्रमेण नीतमानीतं वाशनादि तत्र विवेक एव प्रायश्चित्तमिति शठाशठ्योश्चेदं लक्षणं इंद्रियविकथामायाक्रीडादि कुर्वन् शठः ग्लानसागारिकस्थंडिलभयादिकारण-तोऽशठ इति उक्तं विवेकार्हं प्रायश्चित्तं संप्रति व्युत्सर्गार्हमाह -

[भा.११०] गमनागमनवियारे सुत्ते वा सुमिणे दंसणे राती ।
नावा नईसंतारे पायच्छित्तंवि उस्सग्गो ।।

वृ- गमनमुपाश्रयात् गुरुमूलाद्वा बहिर्गमनं भूयः स्वोपाश्रये गुरुपादमूले वा बहिःप्रदेशात् प्रत्यावर्त्तनमागमनं च गमनं च गमनागमनं समाहारो द्वंद्वः गमनपूर्वमागमनं गमनागमनं गमनं आगमनं च गमनागमने स्यादावसंख्येय इत्येकशेषः तयोस्तत्र यदा भक्ताद्यर्थमन्यस्मिन् ग्रामे गतः सन् विश्रमणनिमित्तमासितुकामोऽथवा यावन्नाद्यापि वेला च भवति तावत् प्रतीक्षितुकामो यदिवा प्रथमालिकां कर्तुकामो यदा शून्यगृहादिषु प्रविशति तदेवमादिषु प्रयोजनेषु गमनमात्रेपि ऐर्यापथिकीप्रतिक्रमणपुरस्सरं कायोत्सर्गः प्रायश्चित्तं, तदनंतरं कार्यसमाप्तौ भूयःस्वोपाश्रयप्रवेशे आगमनमात्रे कायोत्सर्गः, शेषेषु प्रयोजनेष्वपांतराले विश्रामणासंभवे गमनागमनयोरिति वियारे इति

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

विचारो नाम उच्चारादिपरिष्ठापनं, तत्रापि प्रायश्चित्तं कायोत्सर्गः सुत्ते वा इति सूत्रे सूत्रविषयेषु उद्देशसमुद्देशानुज्ञाप्रतिक्रमण श्रुतस्कंधांगपरिवर्त्तनादिश्च विधिसमाचरणपरिहाराय प्रायश्चित्तं कायोत्सर्गः, वासमुच्चये सुमिणेदंसणेराउ इति उत्सर्गतो दिवा स्वप्तुमेव न कल्पते ततो रात्रिग्रहणं रात्रौ स्वप्नदर्शने प्राणातिपातादिसावद्यबहुले कदाचिदनवद्यस्वप्नदर्शने वा अनिष्टसूचके उपलक्षणमेतत् दुःशकुनदुर्निमित्तेषु वा तत्प्रतिघातकरणाय कायोत्सर्गकरणं प्रायश्चित्तं; नावा नइसंतारे इति नौश्चतुर्द्धा तद्यथा समुद्रनौ उद्यानी अवयानी तिर्यग्गामिनी च तत्र समुद्रनौः प्रवहणं येन समुद्रो लंध्यते, शेषास्तिस्रो नद्यां तत्रापि या नद्याः प्रतिश्रोतोगामिनी सा उद्यानी अनुस्रोतोगामिनी अवयानी या पुनर्नदीं तिर्यक् छिनत्ति सा तिर्यग्गामिनी तत्र यतनयोपयुक्तस्य यथायोगं चतुर्विधयापि नावा तथाविधप्रयोज-नोत्पत्तिवशतो गमने सूत्रोक्तविधिना कायोत्सर्गः प्रायश्चित्तं नदीसंतारश्चतुर्विधस्तत्र पादाभ्यां त्रिधा तद्यथा संघट्टः, लेपस्तदुपरि च तत्र जंघार्द्धप्रमाणे उदकसंस्पर्शे संघट्टः, नाभिप्रमाणे उदकसंस्पर्श लेप तत उपरि उदकसंस्पर्शे तदुपरि चतुर्थो नदीसंस्तारो बाहूडुपादिभिः एतेष्वपि सर्वत्र यतनयोपयुक्तस्य प्रायश्चित्तं कायोत्सर्गः व्युत्सर्गः कायोत्सर्ग इत्यर्थांतरमेष गाथासंक्षेपार्थः ।। सांप्रतमेनामेव गाथां विवरीषुर्येषु स्थानेषु गमनमागमनं गमनागमनं वा प्रतिक्रमणीयं संभवति यो विचारविषयो यत्प्रमाणं च तत्र कायोत्सर्गप्रायश्चित्तं तदेतदुपदर्शयन्नाह -

[भा.१११] भत्ते पाने सयणासणे य अरहंतसमणसेज्जासु ।
उच्चारे पासवणे पणवीसं होंति ऊसासो ।।

वृ- भक्ते पाने शयनासने च अरिहंतसमणे सेज्जासु इति शय्याशब्दः प्रत्येकमभिसंबध्यते अर्हच्छय्यायामर्हद्भवने, श्रमणशय्यायां श्रमणोपाश्रये, गमनमागमनं च प्रतिक्रमणीयं संभवति उच्चारप्रश्रवणयोस्तु हस्तशताद्बहिर्गत्वा परिस्थापने गमनागमनेंतर्भावः हस्तशताभ्यंतरत एव तद्व्युत्सर्गे तन्मात्रकपरिष्ठापने वा विचारविषये एतेषु च सर्वेष्वपि स्थानेषु च कायोत्सर्गप्रायश्चित्तस्य प्रमाणं भवति पंचविंशतिरुच्छ्रासाः तत्र भक्ते पाने वा कथं गमनमात्रं प्रतिक्रमणीयं संभवतीत्ति प्रतिपादनार्थमाह -

[भा.११२] वीसमण असइ काले पढमालियवास संखंडीए ।
वा इरियावहियठाए गमनं तु पडिक्कमंतस्स ।।

वृ- यदा भक्तार्थं पानार्थं वा भिक्षाचर्यया ग्रामांतरं गत्वा मार्गगमनसमुत्थपरिश्रममजयाय विश्राम्यति, असति कालेति अथवा असति भिक्षाकाले यावत् भिक्षावेला भवति तावत्प्रतीक्षितुकामः पढमालियत्ति यदिवा क्षुधापीडितः सन् प्रथमालिकां कर्त्तुकामो यत्र शुन्यगृहादिषु प्रविशति, वासत्ति अथवा तस्मिन्नन्यस्मिन् वा ग्रामे भिक्षामटतोंतरा वर्षं पतितुमारब्धं ततः छन्नं किमपि स्थानं प्रविश्य तत्रासितुकामः संखंडीए वा इति संखंड्यां वा अप्रमाणायां ध्रुवं भूयात् लाभ इति ज्ञात्वा क्वचिदन्यत्र प्रतीक्षितुमिच्छुर्भवति तदा तस्यैर्यापथिक्यर्थं ईर्यापथिकपापविशुध्ध्यर्थं गमनं प्रतिक्रामतो गमनविषयं प्रतिक्रमणं कुर्व्वतः कायोत्सर्गः प्रायश्चित्तं स च कायोत्सर्गः पंचविंशत्युच्छासप्रमाणः उच्छ्रासाश्च पादसमास इति पंचविंशतेश्चतुर्भिः भागे हृते षट् श्लोका एकपादाधिका लभ्यंते ततश्चतुर्विशतिस्तवः चंदेसु निम्मलयरा इति पादपर्यंतं कायोत्सर्गे चिंतनीय इति भावः ।।

[भा.११३] एवमेव सेसएसुवि होइ निसज्जए अंतरे गमनं ।
आगमनं जं तत्तो निरंतरायागयं होइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवमेव भक्तपानयोरिव शेषेष्वपि स्थानेषु शयनसनादिषु यावत्नाद्यापि वेला भवति तावत् यावत् प्रतीक्षणं तदेतदत्रांतरं तस्मिन् अंतरे निषद्यायामुपवेशने केवलं गमनं प्रतिक्रमणीयं भवति तथाहि शयनं नाम संस्तारकादि आसनं पीठकादि तद्याचनार्थं क्वचनापि गतस्तत्र ग्लानचारित्वादिभिः कारणैः शरीरदुर्बलतया जातपरिश्रमो विश्रमितुकामः, संस्तारकादिप्रभुर्वा न विद्यते क्वचिदन्यत्र गतत्वात् ततस्तं प्रतीक्षितुकाम एर्यापथिक पापविशोधनाय गमनं प्रतीक्रमतीति आगमनं जं तत्तो इति एवं भक्तपानाद्यर्थं विश्रम्य कार्यसमाप्तौ ततः स्थानात् यदा भूयः स्वोपाश्रयं प्रत्यावर्त्तते तदा केवलमागमनं प्रतिक्रमणीयं भवति यदि पुनरेतेष्वेव प्रयोजनेषु नोक्तप्रकारेणापांतराले विश्रमणं भवति तदा निरंतरं भवति उक्तलक्षणस्यांतरस्याभावे गतागतं गमनागमनं समुदितं प्रतिक्रमणीयं जायते एवमर्हच्छ्रमणशय्यास्वपि गमनमागमनं गमनागमनं च प्रतिक्रमितव्यं भावनीयं, तद्यथा पाक्षिकादिषु जिनभवनादौ चैत्यवंदको गत्वा यदा स्नानादिदर्शननिमित्तमैर्यापथिकी प्रतिक्रम्य विश्राम्यति तदा केवलं गमनमेव प्रतिक्रमणीयं, ततः स्वोपाश्रये प्रत्यायातावागमनं विश्रामणासंभवे गमनागमनमिति, तथा पाक्षिकादौ येऽन्यवसतिषु सुसाधवस्तेऽश्यं वंदनीय इति विधिस्ततस्तत्र वंदको गतो यदा विश्राम्यति तदागमनं, ततः स्वोपाश्रये प्रत्यागमने आगमनं, विश्रामणाभावे गमनागमनं प्रतिक्रमणीयमिति; उच्चारे प्रश्रवणे च हस्तशताद् बहिर्व्युत्सृष्टेऽपांतराले प्राये विश्रामणासंभवात् गमनागमनं समुदितं प्रतिक्रमणीयं भवति, यदापि हस्तशतस्याभ्यंतरे उच्चारं प्रश्रवणं तन्मात्रकं वा परिष्ठापयति तदापि विचारे इति वचनात् एर्यापथिकीप्रतिक्रमणपुरस्सरः पंचविंशत्युच्छ्वासप्रमाणः कायोत्सर्गः प्रायश्चित्तं, संप्रति सुत्ते इति पदं व्याचिख्यासुराह -

[भा.११४] उद्देससमुद्देसे सत्ताचीसं तहा अनुन्नाए ।
अठेवय ऊसासा पठवणा पडिक्कमणमादी ।।

वृ- उद्देशो वाचनासूत्रप्रदानमित्यर्थः समुद्देशो व्याख्या अर्थप्रदानमिति भावः, अनुज्ञासूत्रार्थयोरन्य-प्रदानं प्रदानं प्रत्यनुमननं एतेषु तथेतिशब्दोऽनुक्तसमुच्चयार्थस्तेन श्रुतस्कंधपरिवर्त्तने अंगपरिवर्त्तने च कृते तदुत्तरकालमविधिसमाचरणपरिहाराय प्रायश्चित्तं कायोत्सर्गः सप्तविंशत्युच्छ्वासप्रमाणं पर्यन्तैकपादहीनः समस्तश्चतुर्विंशतिस्तवस्तत्र चिंतनीय इति भावः, अट्ठेवय इत्यादि । प्रस्थापनं स्वाध्यायस्य प्रतिक्रमणः कालस्य तयोः करणे कायोत्सर्गः प्रायश्चित्तमष्टावेवोच्छ्वासः अष्टोच्छ्वासप्रमाणः आदिशब्दात् पानकमपि परिस्थाप्यऐर्यापथिकी प्रतिक्रमणोत्तरकालं कार्योत्सर्गोऽष्टोच्छ्वासप्रमाणः करणीय इति द्रष्टव्यमेतच्चास्यैव व्यवहारस्य चूर्ण्यां दृष्ट्वालिखितमिति । अत्रैवाक्षेपमभिधित्सुराह -

[भा.११५] पुव्वं पट्ठवणा खलु उद्देसाईयपच्छत्तो होंति ।
पट्ठवणुद्देसादिसु अनानुपुव्वी कया किंनु ।।

वृ- ननु पूर्वं प्रस्थापना खलु स्वाध्यायस्य क्रियते, पश्चादुद्देशादयो भवंति, ततः प्रस्थापनोद्देशादिषु व्यवस्थितेषु किंनु इत्याक्षेपे किमर्थं ननु अनानुपूर्वी अनंतरगाथायां कृता किमिति पश्चात् गाथायां पूर्वमुद्देशादय उक्तास्तदनंतरं प्रस्थापनमिति भावः, नैष दोषो मतांतरेणैवंरुपाया अप्यानुपूर्व्याः संभवात् तथाचाह-

[भा.११६] अज्झयणाणंति तयं पुव्वुत्तं पट्ठविज्जई जेहिं ।
तेसिं उद्देसादि, पुव्वमतो पच्छपट्ठवणा ।।

वृ- यैराचार्यैरध्ययनानामुपलक्षणमेतदुद्देशकप्रभृतीनां च त्रितयं उद्देशसमुद्देशानुज्ञालक्षणं पूर्वोक्तं पूर्वप्रवर्त्तितं प्रस्थाप्यते उद्देशादिषु कृतेषु पश्चात्तेषां प्रस्थापना यैराचार्यैरुपवर्ण्यते तेषां मतेनायमेवक्रम इति वाक्यशेषः, अतः प्राक् गाथायां पूर्वमुद्देशादयः उक्ताः पश्चात् प्रस्थापनेति, संप्रति सुत्तेवा इति वाशब्दसमुच्चितं दर्शयति ।।

[भा.११७] सव्वेसु खलियादिसु, ज्झाएज्ञा पंचमंगलं ।
दो सिलोगेव चिंतेज्ञा एगग्गो वाचितक्खणं ।।

वृ- इह यदि बहिर्गमनं प्रयोजनानंतरप्रारंभे वा वस्त्रादेः स्खलनं भवति, आदि शब्दात् शेषापशकुनदुर्निमित्तपरिग्रहः तेषु सर्वेषु स्खलितादिषु समुपजातेषु विवक्षितप्रयोजनव्याघातसूचकेषु समुद्गतेषु तत्प्रतिघातनिमित्तं पंचमंगलमष्टोच्छ्वासप्रमाणं नमस्कारसूत्रं ध्यायेत् यदिवा यौ वा तौ वा स्वाध्यायभूतौ द्वौ श्लोकौ चिंतयेत्, अथवा यावताकालेन द्वौ श्लोकौ चिंत्येते तत्क्षणं तावंतं कालं एकाग्रः कायोत्सर्गस्थः सन् शुभमना भूयात् ।।

[भा.११८] बिइयं पुन खलियादिसु उस्सासा होंति तहय सोलसय ।
तइयंमि उ बत्तीसा चउत्थंमि न गच्छएअण्णं ।।

वृ- द्वितीयं वारं पुनस्तथा तेनैव प्रकारेण स्खलितादिषु विवक्षितप्रयोजनव्याघातसूचकेषु समुद्भूतेषु तत्प्रतिघातनिमित्तं कायोत्सर्गउच्छ्वासाः षोडश भवंति षोडशोच्छ्वासप्रमाणः कायोत्सर्गः क्रियते इति भावः, तइयंपि उ इत्यादि, तृतीयवारे तृतीयस्यां वेलायां स्खलितादिजातेषु तत्प्रतिघातनिमित्तं कायोत्सर्गे द्वात्रिंशदुच्छ्वासाः प्रतिक्षपणीयाः चतुर्थे वारे स्खलितानां प्रवृत्तौ स्वस्थानात् विवक्षितादन्यत् स्थानं न गच्छति, उपलक्षणमेतत् नाप्यन्यत् प्रयोजनं प्रारभते, अवश्यं भाविविघ्नसंभवात् संप्रति सुमिणदंसणे गतो इति व्याख्यानयन्नाह -

[भा.११९] पाणवहमुसावादे अदत्तमेहुणपरिग्गहे ।
सुमिणे सयमेगंति अनुनऊसासाणब्भवेज्ञासि ।।

वृ- प्राणवधे मृषावादे अदत्तादाने मैथुने परिग्रहे च स्वप्ने कृते कारिते अनुमोदिते च केवलं मैथुने कारितेऽनुमोदिते एवं स्वयं कृते इत्थीविप्परियासे इत्यादिना प्रायश्चित्तस्य वक्ष्यमाणत्वात् कायोत्सर्गः प्रायश्चित्तं, तत्र कायोत्सर्गे शतमेकमन्यूनमुच्छ्वासानां क्षपयेत् पंचविंशत्युच्छ्वासप्रमाणं चतुर्विंशस्तवं चतुरो वारान् ध्यायेत् इति भावः अथवा अपरः प्रकारस्तमेव दर्शयति ।।

[भा.१२०] महव्वयाइं ज्झाएज्ञा सिलोगे पंचविंशति ।
इत्थीविप्परियासे सत्तावीस सिलोइओ ।।

वृ- महाव्रतानि दशवैकालिकश्रुतबद्धानि कायोत्सर्गे ध्यायेत् तेषामपि प्रायः पंचविंशतिश्लोकप्रमाणत्वात् यदिवा यान्तान्वा स्वाध्यायभूतान् पंचविंशतिश्लोकान् ध्यायेत् स्त्रीविपर्यासे पुनः स्वप्नसंभूते प्रायश्चित्तं कायोत्सर्गः सप्तविंशतिश्लोकिकः सप्तविंशतिश्लोकवान् अष्टोत्तरशतमुच्छ्वासानां तन्निमित्ते कायोत्सर्गे क्षपयेदिति भावः, उत्सर्गे प्रमाणमेव निरुपयति ।।

[भा.१२१] पायसमाउसासा कालपमाणेण होंति नायव्वा ।
एवं कालपमाणं काउस्सग्गे मुनेयव्वं ।।

वृ- उच्छ्वासाः कालप्रमाणेन भवति ज्ञातव्याः पादसमाः किमुक्तं भवति यावत् कालेनैश्लोकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादश्चिंत्यते तावत्कालप्रमाणः कायोत्सर्गे उच्छ्वास इति तत्कालमुच्छ्वासानां कायोत्सर्गे ज्ञातव्यं, अथ ध्यानं योगनिरोधात्मकं, तत्र कायोत्सर्गे किं ध्यानं उच्यते ध्येयो योगनिरोध इति पूर्वमहर्षिवचनात् तच्च योगनिरोधात्मकं ध्यानं त्रिधा, तद्यथा काययोगनिरोधात्मकं, वाग्योगनिरोधात्मकं मनोयोग-निरोधात्मकं च तत्र कायोत्सर्गे किं ध्यानं ? उच्यते त्रिविधमपि मुख्यतस्तु मूकायिकं तथा चाह -

[भा.१२२] कायचेट्ठं निरुंभित्ता मनं वायं च सव्वसो ।
वट्टइ काइए ज्झाणे, सुहुमुस्सासवं मुनी ।।

वृ- कायचेष्टां कायव्यापारं तथा मनोवाचं सर्वशः सर्वात्मना निरुध्य कायोत्सर्गः क्रियते, ततः कायोत्सर्गस्थो मुनि सूक्ष्मोच्छ्वासवान् उपलक्षणमेतत् सूक्ष्मदृष्टिसंचारादिवांश्च न खलु कायोत्सर्गे सूक्ष्मोच्छ्वासादयो निरुध्यंते, तन्निरोधस्य कर्तुमशक्यत्वात् वर्त्तते, कायिके ध्याने एतच्चैवमुच्यते तस्य स्पष्टमुपलक्ष्यमाणत्वात् यावता पुनर्वाचिकमानसे अपि ध्याने द्रष्टव्ये तथा चाह -

[भा.१२३] न विरुज्झंति उस्सगज्झाणा वाइयमानसा ।
तीरिए उस्सग्गे तिण्हमन्नयरेसिया ।।

वृ- न विरुध्येते उत्सर्गे कायोत्सर्गे ध्याने वाचिकमानसे वाङ्मनोयोगयोरपि विषयांतरतो निरुध्यमानत्वात् सूत्रे च द्वित्वेपि बहुवचनं प्राकृतत्वात् उक्तं च बहुवयणमिति तीरं संजातमस्येति तीरितः परिपूर्णे सति सम्यग्विधिना पारितस्तस्मिन् तीरिते कायोत्सर्गे पुनस्त्रयाणां ध्यानानामन्यतरत् । अन्यतमत् स्यात् । पुनस्त्रितयमपि भंगिकश्रुतगुणनव्यतिरेकेण प्रायोऽन्यत्र व्यापारांतरे ध्यानत्रितयासंभवात्; अथ यथा कायोत्सर्गे किमन्येपि गुणाः संभवंति किंवा नेति उच्यते, संभवतीति ब्रूमस्तथा चाह -

[भा.१२४] मनसो एगग्गत्तं जनयइ देहस्स हणइ जडत्तं ।
काउस्सग्गगुणा खलु सुहदुहमज्झत्थया चेव ।।

वृ- कायोत्सर्गस्य गुणाः कायोत्सर्गगुणाः खल्वमी तद्यथा कायोत्सर्गः सम्यग्विधिना विधीयमानो नाम मनसश्चित्तस्य एकाग्रत्वमेकाग्रलंबनतां जनयति, तच्चैकाग्रत्वं परमं ध्यानं जं थिरमज्झवसाणं तं ज्झाणमिति वचनान् देहस्य शरीरस्य जडत्वं जाड्यं हंति विनाशयति, प्रयत्नविशेषतः परमलाघवसंभवात् तथा कायोत्सर्गस्थितानां वासीचंदनकल्पत्वात् सुखदुःखमध्यस्थता सुखदुःखे परैरुदीर्यमाणं रागद्वेषाकरणमन्यथा सम्यक्कायोत्सर्गस्यैवासंभवात् उक्तं व्युत्सर्गार्हप्रायश्चित्तमिदानीं तपोर्हं वक्तव्यं, तपश्च रात्रिंदिवपंचकादारभ्य रात्रिंदिवपंचकादिवृध्धया तावन्नेयं यावत्षण्मासाः. तत्र येषु स्थानेषु रात्रिंदिवपंचकतपसान्युपदर्शयतिः -

[भा.१२५] दंडगगहिनिक्खेवे, आवसियाए निसिहियाए य ।
गुरुणं च अप्पणामे, पंचराइंदिया होंति ।।

वृ- दंडं गृह्णन् प्रत्युपेक्षते न प्रमार्जयतीत्येको भंगः, न प्रत्युपेक्षते प्रमार्जयतीति द्वितीयः न प्रत्युपेक्षते न प्रमार्जयतीति तृतीयः, प्रत्युपेक्षते प्रमार्जयतीति चतुर्थः । तत्राद्येषु भंगकेषु पश्चादानुपूर्व्या यथोत्तरं तपः कालविशेषिते लघुर्मासः प्रत्येकं प्रायश्चित्तं, चतुर्थे चत्वारो भंगास्तद्यथा दुःप्रत्युपेक्षते दुःप्रमार्जयति । १ । दुःप्रत्युपेक्षते सुप्रमार्जयति । २ । सुप्रत्युपेक्षते दुःप्रमार्जयति । ३ । सुप्रत्युपेक्षते सुप्रमार्जयति । ४ । अत्राधेषु त्रिपु भंगेषु पश्चादानुपूर्व्या यथोत्तरं तपः कालविशेषेतानि पंचरात्रिं दिवसानि प्रायश्चित्तं, चतुर्थे भंगे शुद्धो विधिना प्रवृत्तः, इहाद्यास्त्रयो भंगका मासलघुप्रायश्चित्तविषयाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तावादुक्ता यावता वक्ष्यमाणेषु मासिकेषु प्रायश्चित्तेषु द्रष्टव्याः यथा दंडकग्रहणेऽभिहितं तथा दंडकनिक्षेपेऽपि तथा वक्तव्यं, नवरं निक्षेपेऽधस्तात् भूमेरुपरि च दंडशिरःसंपर्कविषयभित्तिप्रदेशे प्रमार्जना कर्त्तव्या । तथा वसतेर्निर्गच्छन् यद्यावश्यकी न करोति वसतौ प्रविशन्वा नैषेधिकी तत आवश्यक्या अकरणे नैषेधिक्या अकरणे च प्रत्येकं प्रायश्चित्ते रात्रिंदिवपंचकं तथा गुरुणं च अप्पनामे इति अप्रणामग्रहणं हस्तोत्सेधादेरुपलक्षणं ततोऽयमर्थः अवश्यकरणीयप्रयोजनवशतः स्वोपाश्रयाद्वहिर्निर्गतो भूयः प्रतिश्रये प्रविशन् नमो खमासमणाणमिति न ब्रूते प्रणामं वा न करोति नापि हस्तानां क्षणिकत्वेपि हस्तोत्सेधं तदा प्रायश्चित्तं रात्रिंदिवंपंचकं ।।

[भा.१२६] वेंटियगहनिक्खेवे निट्ठीवणा आयवो य छायं च ।
थंडिल्लकण्हभोमे गामे राइंदिया पंच ।।

वृ- संस्तारकं वेटलिकाया ग्रहणे निक्षेपे च प्रत्येकं दंडकं इव सप्तभंगकं तत्रापि दंडक इवाद्येषु त्रिषु भंगकेषु पश्चादनुपूर्व्या यथोत्तरं तपः कालविशेषितं प्रत्येकं लघुमास उत्तरेषु त्रिषु भंगकेषु प्रत्येकं रात्रिंदिवपंचकं, सप्तमे तु भंगे शुद्धः निट्ठीवणादित्त निष्टीवनादौ इह साधवो द्विधा गच्छगता गच्छविनिर्गताश्च तत्र ये गच्छनिर्गतास्ते नियमादनिष्टीवका औपग्राहिकमल्लकाद्युपकरणासंभवात् गच्छगता अपि ये विधिना निष्ठीव्यंति, ते अनिष्ठीवका एव, न प्रायश्चित्तविषयाः । अविधिना खेलमल्लकनिष्टीवने दंडक इव सप्त मंगा दंडक इवैव चाद्येषु प्रत्येकं लघुमासः, उत्तरेषु त्रिषु प्रत्येकं रात्रिंदिवपंचकं, सप्तमभंगवर्त्तिनस्त्वनिष्ठीवका एव विधिना निष्टीवनात् उपरितनेष्वपि च त्रिषु भंगेषु यदि भूमौ निष्ठीवति, तदा मासलघु, यच्च निष्ठीवने प्राणिनां परितापनाद्युपजायते, तन्निष्पन्नंच प्रायश्चित्तं, आदि शब्दात् कंडूयनपरिग्रहः कंडूयनेपि हि दंडक इव सप्तभंगकं तथैव प्रायश्चित्तविधिः तथा वस्त्रादिकमातपात् छायं छायाया वा आतपे संक्रामयन्न प्रत्युपेक्षते न प्रमार्जयतीत्यादयो पूर्ववत् सप्तभंगाः। पूर्ववदेव चाद्येषु षट्सु भंगकेषु प्रायश्चित्तविधिः सप्तमे भंगे शुद्धः, संप्रति लाघवमपेक्षमाणच्छेदार्हमपि प्रायश्चित्तमत्रैव विषये प्रतिपादयति -

[भा.१२७] एएसिं अन्नयरं, निरंतरं अतिचरेज्ज तिक्खुत्तो ।
निक्कारणम गिलाणे पंच उ राइंदिया छेदो ।।

वृ. एतेषामनंतरोदितानां रात्रिदिवपंचकप्रायश्चित्तविषयाणां स्थानानामन्यतरत् स्थानमग्लानो निष्कारणं यदि निरंतरमतिचरेत् त्रित्रिकृत्वस्त्रीन् वारान् तदा तत्पर्यायस्य छेदः क्रियते पंचरात्रिंदिवानि उपलक्षणमेतत् येष्वनंतरोदितेषु स्थानेषु मासलघुकानि प्रायश्चित्तान्युक्तानि तेषामन्यतरत् स्थानमग्लानो निष्कारणं यदि निरंतरं त्रीन्वारानतिचरति तदा तत्पर्यायस्य छेदो मासिक इति द्रष्टव्यं, संप्रति मासिकानि प्रायश्चित्तानि विभणिषुराह -

[भा.१२८] हरियाले हिंगुलए मनोसिले अंजनेय लोणेत्थ ।
मीसगपुढविक्काए जह उदउल्ले तहा मासो ।।

वृ- यथा उदकार्द्रे तथेति वचनात् एवमत्र प्रतिपत्तव्यं, यथा उदकार्द्रे उदकमृक्षिते करे मात्रके वा भिक्षां गृह्णतः प्रायश्चित्तं लघुमासः, तथा हरिताल हिंगुलक मनःशिलाः प्रतीताः, अंजनं सौवीरांजनादि लवणं सामुद्रादि एते सचित्त पृथिवीकायभेदाः, उपलक्षणमेतत् तेन शुद्ध पृथिव्यूषगेरुकवर्णिका सेटिका सौराष्ट्रिक्यादयोपि सचित्तपृथिवीकायभेदाः प्रतिपत्तव्याः । तथा मिश्रकः सचित्ताचित्तरूपः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्दमादिर्हरितालदिर्वा पृथिवीकायः, एतेष्वपि, किमुक्तं भवति ? एतैरपि प्रत्येकं म्रक्षिते करे मात्रके वा भिक्षामाददानस्य लघुर्मासः, एतत्पुनः संप्रदायादवसातव्यम्, सचित्तमिश्रपृथिवीरजो गुंठिते सचित्तमिश्रोदकस्निग्धे वा करे मात्रके वा भिक्षामुपाददान्सय पंचरात्रिं दिवानी उक्तं च ससणिद्ध ससरक्खे पनगमिति तथा वनस्पतिकायो द्विविधः परीत्तोऽनंतकायश्च एकैकस्य त्रयो भेदाः पिष्टं कुकुसा उत्कुटितं च पिष्टं कुक्कुसाश्च प्रतीताः उत्कुटितश्चिंचनकादिः तत्र त्रिविधैरपि सचित्तमिश्रमपरीत्तवनस्पतिकायैः संस्पृष्टे करे मात्रके वा भिक्षां गृह्णतो लघुर्मासः, अनंत सचित्त मिश्रवनस्पतिकायैस्त्रिविधैरपि संस्पृष्टे गुरुमासः पुरःकर्म्मणि पश्चात्कर्म्मणि च केचिदाहुर्लघुमासोऽपरे चत्वारो लघवः, उक्तं च कल्पचूर्णौ पुरकम्मपुच्छकम्मेहिं चउलहु इति ॥

[भा.१२९] सज्झायस्स अकरणे, काउस्सग्गे तहा अपडिलेहा ।
पोसहियतवेयतहा अवंदना चेइयाणं च ॥

वृ- स्वाध्यायस्य वाचनादेरकरणे सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योगः । अत्रेयं भावना सूत्रपौरुषीं यदि न करोति, ततो मासलघु प्रायश्चित्तं, अर्थपौरुषीं न करोति मासलघु द्वेसूत्रपौरुष्यावकुर्वतो द्वौ लघुमासौ, तिसृणां सूत्रपौरुषीणामकरणे त्रयो लघुमासाः, चतसृणामपि सूत्रपौरुषीणामकरणे चतुर्मासलघु काउस्सग्गे इति अकरणे इत्यत्राप्यनुवर्त्तते आवश्यकप्रतिबद्धकायोत्सर्गस्य सूत्रे सप्तमी षष्ठीसप्तम्योरर्थं प्रत्यभेदात् अकरणे सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति सर्वत्रापि योजनीयं, भावना त्वत्रापीयं आवश्यके एकं कायोत्सर्गं न करोति मासलघु, द्वौ न करोति द्विमासलघु, त्रीन् कायोत्सर्गान्न करोति त्रिमासलघु, सकलमेवाश्यकं न करोति चतुर्मासलघु, तथा उपविष्टः सुप्तो वा यद्यावश्यकं करोति प्रावरणप्रावृतो वा वंदनकानि आवश्यके ददाति, दोषैरुपेतानि वा ददाति प्रायश्चित्तं मासलघु, नवरं यत्र माया तत्र मासगुरु, तथा पडिलेहा इति विभक्तेरत्र लोपः प्राकृतत्वात् अप्रत्युपेक्षायां प्रत्युपेक्षाया अकरणे सामर्थ्यादवसीयते तत्रोपधिर्द्विधा औधिकऔपग्रहिकश्च औधिकस्त्रिधा जघन्यो मध्यमः उत्कृष्टश्च, तत्र जघन्यः चतुर्द्धा तद्यथा । मुखपोतिका पात्रकेसरिका गोच्छकः पात्रस्थापनं च उक्तं च मुहपोत्ती पायकेसरिया गोच्छए पायठवणं च एस चउव्विहो जहन्नो इति मध्यमः षड्विधः तद्यथा पटलानि रजस्त्राणं पात्रबंध चोलपट्टः मात्रकं रजोहरणं च आह च पडलाइं रयत्ताणं पत्ताबंधो य चोलपट्टो य, मत्तग रयहरणं वि य मज्झिमगो छव्विहो नेओ; उत्कृष्टश्चतुर्विधः तद्यथा पतद्ग्रहस्त्रयःकल्पाः उक्तं च उक्कोसो चउव्विहो पडिग्रहो तिन्निपच्छागा इति । आर्यिकाणामप्युपधिरौधिकस्त्रिविधस्तद्यथा जघन्यो मध्यम उत्कृष्टश्च तत्र जघन्यः चतुर्विधो मुखपोतिकादिरुपः प्रागुक्तः, मध्यमस्त्रयोदशविधस्तद्यथा पात्रबंधो १ रजोहरणं २ पटलानि ३ रजस्त्राणं ४ मात्रकं ५ कमठक ६ अवग्रहानंतकं ७ पट्ट ८ अर्द्धोरुकाः ९ चलनिका १० कंचुकः ११ अवकक्षी १२ वैकक्षी १३ उक्तंच -

पत्ताबंधाइया चउरो ते चेव पुव्वनिद्दिट्ठा, मत्तो य कमढकं वा, तह ओग्गहनंतगं चेव ।
पट्टो अद्धोरु चिय चलणि य तह कंचुगे य उगच्छी; वेयगच्छी तेरसमा अज्जाणं होइ नायव्वा ॥

उत्कृष्टोऽष्टविधस्तद्यथा पतग्रहस्त्रयः कल्पा अभ्यंतरनिवसनी बहिर्निवसनी संघाडी स्कंधकरणी उक्तं च उक्कोसा अट्ठविहो चउरो ते चेव पुव्वदिट्ठा जे साहूणं अन्ने य इमे चउरो अब्भिंतरबाहिनियंसणी संघाडो खंधकरणी य इति औपग्राहिकोपी साधूनामार्यिकाणां च त्रिविधस्तद्यथा जघन्यो मध्यम उत्कृष्टश्च तत्र पीठनिषद्यादंडकप्रमार्जनीडगलक पिप्पलकसूची नखरदनिकादिर्जघन्यः, मध्यमो दंडक पंचविध

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्चारप्रश्रवणखेलमल्लकादिरूपः आर्यिकाणामधिको चारकः उत्कृष्टोऽक्षाः संस्तारक एकांगिका इतरो वा, द्वितीयपदे पुस्तकपंचकं फलकं च उक्तं च -

अक्खासंथारो वा दुविहो एगंगिको व इयरो वा ।
बिइय पय पोत्थपनगं फलगं तह होइ उक्कोसो ।।

तत्रोत्कृष्टमुपधिं यदि यथाकालं न प्रत्युपेक्षते चतुर्मासलघु मध्यमं यदि न प्रत्युपेक्षते तदा मासगुरु जघन्यं न प्रत्युपेक्षते पंचरात्रिदिवानि; दोषैः प्रत्युपेक्षते मासलघु पोसहिय तवे य तहा इति पोषं दधाति इति पोषधं अष्टमी पाक्षिकादि, पोषधे भवं पौषधि तच्च तत् तपश्चर्या पौषधिकतपस्तस्मिन्नक्रियमाणे इति सामर्थ्यात् गम्यते, सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योजना, तद्यथा अष्टम्यां चतुर्थं न करोति मासलघु पाक्षिके न चतुर्थं करोति मासगुरु चतुर्म्मासके षष्ठस्याकरणे चतुर्म्मासलघु सांवत्सरिके अष्टमं न करोति चतुर्मासगुरु, तथा एतेष्वेव अष्टमीपाक्षिकादिषु चैत्यानां जिनबिंबानां च शब्दात् ये अन्यस्यां वसतौ सुसाधवस्तेषामप्यवंदने मासलघु तथा ये चैत्यभवनस्थिता वैकालिकं प्रतिक्रम्य अकृते आवश्यके प्रभाते च कृते आवश्यके यदि चैत्यानि न वंदंते तेषामपि मासलघु उक्तं चास्यैव व्यवहारस्य चूर्णौ एएसु चेव अट्ठमीमादीसु चेइयाइं साहुणो वा जे अणाए वसहीए ठिया ते न वंदंति मासलघु जइचेइयघरे ठिया वेयालियं कालं पडिक्कंता अकए आवस्सए गोसे य कए आवस्सए चेइए न वंदंति तो मासलहु इति, सांप्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतः सज्झायस्स अकरणे इत्येतत् व्याख्यानयति ।

[भा.१३०] सुत्तत्थपोरिसीणं अकरणे मासो उ होइ गुरुलहुगो ।
चाउक्कालं पोरिसि उवायणं तस्स चउलहुगा ।।

वृ- सूत्रार्थपौरुष्योः सूत्रपौरुष्याः अर्थपौरुष्या इत्यर्थः अकरणं यथाक्रमं गुरुमासो लघुमासः, अर्थपौरुषी हि प्रज्ञादिविशिष्टसामग्रपेक्षा सूत्रायत्ता च, सूत्रपौरुषी त्वभिनवदीक्षितेनापि जडमतिनापि च यथाशक्ति अवश्यं कर्तव्या, सूत्राभावे सर्वस्याप्यभावादतः सूत्रपौरुष्या अकरणे मासगुरु, अर्थपौरुष्या अकरणे मासलघु, द्वयोः सुत्रपौरुष्योरकरणे द्वौ लघुमासौ तिसृणां पौरुषीणामकरणे त्रयो लघुमासा इति सामर्थ्यात् प्रतिपत्तव्यं, चाउक्कालमित्यादि चतुःकालं दिवारात्रिगतं प्रथमचरमप्रहररूपेषु चतुर्षु कालेषु सुत्रपौरुषीरवपातयतो भ्रंशयतोऽकुर्वत इत्यर्थः चतुर्लघुका श्चत्वारो लघुमासाः संप्रति काउसग्गे इति व्याख्यानयति ।।

[भा.१३१] जइ उसग्गे न कुणइ तइमासा निसणए निवणेय ।
सव्वं चेवावस्सं न कुणइ तहियं चउ लहुंति ।।

वृ- आवश्यके प्राभातिको वैकालिके वा यावतः कायोत्सर्गानि् न करोति तत्तिमासा स्तस्य प्रायश्चित्तं, एकं चेन्न करोति एकोलघुमासः । द्वौ न करोति द्वौ लघुमासौ त्रीन्न करोति त्रयो लघुमासा तथा निषण उपविष्टो निर्वन्नः पतितः सुप्त इत्यर्थः । चशब्दात् प्रावरण प्रावृतो वा यद्यावश्यकं करोति तदा सर्वत्र मासलघु, यदि पुनः सर्वमेवावश्यकं न करोति चतुर्लघु चत्वारो लघुमासा प्रायश्चित्तं । अधुना अपडिलेहा इति व्याचष्टे ।।

[भा.१३२] चाउम्मासुक्कोसे, मासिय मज्झे य पंचउ जहन्नो ।
उवहिस्स अपेहाए एसा खलु होइ आरुवणा ।।

वृ- उत्कृष्टे उत्कृष्टस्य प्रागुक्तस्वरूपस्य उपधेरप्रेक्षायामप्रत्युपेक्षायां चत्वारो लघुमासा मध्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मध्यस्योपधेरप्रत्युपेक्षायां लघुमासा जघन्ये जघन्यस्य पंचरात्रिं दिवानि एसा खलु भवति आरोपणा प्रायश्चित्तमप्रत्युपेक्षायामिति, संप्रति पोसहियतवेय इति व्याख्यानयति ।।

[भा.१३३] चउछट्ठऽट्ठमकरणे अट्ठमिपक्ख चउमास वरिसेय ।
लहुगुरुलहुगागुरुगा, अवंदने चेइ साहूणं ।।

वृ- अत्र यथासंख्येन पदयोजना सा चैवं अष्टम्यां चतुर्थस्याकरणे मासलघु, पाक्षिके चतुर्थस्याकरणे मासगुरु चतुर्मासे षष्टस्याकरणे चत्वारो लघुमासा सांवत्सरिके अष्टमस्याकरणे चत्वारो गुरुमासाः, तथा एतेषु चाष्टम्यादिषु दिवसेषु चैत्यानामनामन्यवसतिगतसुसाधूनां चावंदने प्रत्येकं मासलघु, संप्रति लाघवार्थमत्रैव छेदार्हं प्रायश्चित्तमाह ।।

[भा.१३४] एएसु तिठाणेसुं, भिक्खु जो वट्टए पमाएणं ।
सो मासियं ति लग्गइ उग्घायं वा अनुग्घायं ।।

वृ- एतेष्वनंतरोदितेषु स्थानेषु तित्ति त्रिः त्रीन् वारान् यो भिक्षुः प्रमादेन वर्त्तते, प्रमादेनैषां स्थानानामन्यतरत् त्रीन्वारान् अति चरति स मासिकं सामान्यतो मासनिष्पन्नं, छेदमुघातं लघु, अनुद्घातं गुरुकं लगति प्राप्नोति, यत्र मासा लघवो गुरुवो तपःप्रायश्चित्तं, तत्र तति मासा लघवो गुरवो वा छेद इति यावत्, संप्रति शेषाणि यानि चातुर्मासिकानी षण्मासिकानि वा प्रायश्चित्तानि ये वा भणिता छेदा यानि च मूलानवस्थितपारांचितानि तदेतत् सर्वमेकगाथया विवक्षुराह -

[भा.१३५] छक्कायचउसु लहुगा, परित्तलहुगा य गुरुग साहारे ।
संघट्टण परितावण लहुगुरुगतिवायणेमूलं ।।

वृ- षट्कायाः पृथिव्यप्तेजोवायुवनस्पतित्रसकायरुपाः तेषां मध्ये चतुर्षु पृथिव्यप्तेजोवायुरुपेषु संघट्टनादिभिर्लघुकाः प्रायश्चित्तं परीत्ते प्रत्येकवनस्पतिकायेपि च लघुकाः साधारे अनंतवनस्पतिकायिके संघट्टनादिषु गुरुकाः तथा द्वींद्रियादीनां संघट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तमतिपातने विनाशे मूलं इयमत्र भावना पृथिवीकायं संघट्टयति मासलघु, परितापयति मासगुरु। अपद्रावयति जीवितात् व्यपरोपयति इत्यर्थः । चतुलघु एवमप्काये तेजस्काये वायुकाए प्रत्येकवनस्पतिकाये च द्रष्टव्यं । उक्तं च -

छक्कायादिम चउ तहयपरित्तंमि होति वणकाए ।
लहुगुरुमासो चउलहु संघट्टण परितावउद्दवणे ।।

एतत् प्रायश्चित्तमेकैकस्मिन् दिवसे संघट्टनादिकरणे यदि पुनर्द्वौद्वौ दिवसौ पृथिव्यादीन् संघट्टयति तदा मासगुरु परितापयति चतुर्लघु जीवितात् व्यपरोपयति चतुर्गुरु परितापने षट्लघु अपद्रावणे षट्गुरु पंचदिवसान् निरंतरं पृथिव्यादीनां संघट्टने षट्लघु परितापने षट्गुरु अपद्रावणे मासिकछेदः षट्दिवसान्निरंतरं संघट्टने षट्गुरु परितापने मासिकच्छेदः अपद्रावणे चतुर्म्मासच्छेद सप्तदिवसान्निरंतरं पृथिव्यादीनां संघट्टने मासिकच्छेदः परितापने चतुर्मासिकः अपद्रावणे षण्मासिकः अष्टौ दिवसान्निरंतरं पृथिव्यादीनां संघट्टने चातुर्मासिकः परितापने षण्मासिकः अपद्रावणे मूलम् । उक्तं च -

दोहि दिवसेहिं मासगुरुए आढवेत्ता ।
चउगुरु ते यातिजाव ठाट्ठहिसययं ति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनंतवनस्पतिकायिकं संघट्टयति मासगुरु परितापयति चतुर्लघु, अपद्रावयति चतुर्गुरु, द्वित्रिदिवसादि निरंतरसंघट्टनादिषूत्तरोत्तरैकैकस्थानवृद्धितः सप्तभिर्दिवसैर्मूलं, द्वींद्रियं संघट्टयति चतुर्लघु परितापयति चतुर्गुरु अपद्रावयति षट्लघु, अत्रद्वयादिदिवसनिरंतरं संघट्टनादिषु षड्भिर्दिवसैर्मूलं, त्रींद्रियं संघट्टयति चतुर्गुरु परितापयति षट्लघु अपद्रावयति षट्गुरु अत्रपंचभिदिवसैर्मूलं चतुरिंद्रियं संघट्टयति षट्लघु, परितापयतः षट्गुरु अपद्रावयतो मासिकच्छेदः अत्र चतुर्भिर्दिवसैर्मूलं पंचेंद्रियं संघट्टयतः षट्गुरु परितापयतः च्छेदापद्रावयतो मूलमत्र द्वयोर्दिवसयोरनवस्थाप्यं त्रिषु दिवसेषु पारांचितमिति, तदेवमुक्तं सप्रभेदं प्रतिसेवनाप्रायश्चित्तमधुना संयोजनाप्रायश्चित्तं वक्तव्यं; अस्मिंश्च व्याख्याते यतः प्ररुपणापृथक्त्वमित्यें तदपि द्वारं व्याख्यातं द्रष्टव्यं तत्र चोदकः संयोजनादीनां भेदानां प्ररुपणा पृथक्त्वमाक्षिपन्नाह -

[भा. १३६] पडिसेवणं विना खलु संजोगारोवणा न विज्जंति ।
मायाचिय पडिसेवा अइप्पसंगोयं इति एक्कं ॥

वृ- इह प्रायश्चित्तं सर्वमुत्पद्यते प्रतिसेवनातो, न खलु मूलगुणप्रतिसेवनामुत्तरगुणप्रतिसेवनां वा विना क्वापि प्रायश्चित्तः संभवः पडिसेवियंमि दिज्जइ पच्छित्तं इहरहा उपडिसेहो इति वचनात् ततः संयोजनाप्रायश्चित्तमारोपणाप्रायश्चित्तं च प्रतिसेवनामंतरेण न भवतीति तयोः प्रतिसेवनायामेवांतर्भावः प्रतिकुंचनाप्रायश्चित्तमपि न प्रतिसेवनातः पृथगुपपन्नं, यतः प्रतिकुंचना नाम माया तथा चोक्तं पलिउंचणंति य मायत्तियनियडित्तियएगट्ठाए इति माया च प्रतिसेवना तत एकमेव प्रतिसेवनाप्रायश्चित्तमुपपत्तिमत्, न शेषाणि त्रीणि संयोजनादीनि पृथक् प्रायश्चित्तानि अन्यथैवमतिप्रसंगआपद्यते, तथाहि संयोजनादीनि त्रीणि प्रायश्चित्तानि प्रतिसेवनारुपाणि भवंत्यपि प्रतिसेवना भवंति ततः प्रतिसेवनापि न प्रतिसेवना स्यात् विशेषाभावात् अनिष्टं चैतत् तस्मादेकमेव प्रायश्चित्तं प्रतिसेवना, न शेषाणीति एव चोदकेनाक्षिप्ते प्ररुपणापृथक्त्वे सूरिरुत्तरमाह -

[भा. १३७] एगाहिगाणवि नाणत्तं केत्तियाव दिज्जंति ।
आलोयणाविहीविय इयनाणत्तं चउण्हंपि ॥

वृ- एकाधिकारिकानि नाम एकस्मिन् शय्यातरपिंडादावधिकृतदोषेऽनालोचिते एव यानि शेषदोषसमुत्थितानि प्रायश्चित्तानि तान्येकाधिकारिकाणि, एकाधिकारे भवानि एकाधिकारिकाणि अध्यात्मादित्वादिकणितिव्युत्पत्तेः तेषामप्येकाधिकारिणां नानात्वं न पुनरेकाधिकारितया एकत्वमिति प्रज्ञापनाय तदर्थं संयोजनाप्रायश्चित्तं पृथगुच्यते नानात्वमेव गाथाद्वयेन दर्शयति ॥

[भा. १३८] सेज्जायरितिपिंडे याउदउल्ले खलु तहा अभिहडेय ।
आहाकम्मेय तहा सत्तउ सागारिए मासा ॥

वृ- केनापि साधुना प्रथमतः शय्यायरपिंड उपभुक्त तस्मिन्ननालोचित एव तदनंतरमुदकार्दमासेवितं, ततोभ्याहृतं तदनंतरमाधाकर्म्मिकं एतानि चत्वार्यप्येकाधिकारिकाणि अधिकृत एव शय्यातरपिंडदोषे अनालोचिते शेषदोषप्रायश्चित्तानां संभवात् एतेषां चैकाधिकारिकाणामपि नानात्वं नतु शय्यातरपिंड एव शेषाण्यंतर्भवंति, ततः सर्वाण्यपि पृथगालोचनीयानि न केवल एवैकः शय्यातरपिंड इति परिज्ञानाय संयोजना दर्श्यते तत्र शय्यातरपिंडे मासलघु उदकार्द्रेपि मासलघु स्वग्रामाहृतेपि मासलघु आधाकर्म्मिके चत्वारो गुरुमासाः गुरुगा आहय इति वचनात् एवं शय्यातरपिंडे अधिकृते संयोजनाप्रायश्चित्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमासास्तथा चाह सत्तउ सागरिए मासा सागारिको नाम शय्यातरस्तस्मिन्सागारिकेसागारिकापिंडे अधिकृते एकाधिकारिकाणामपि नानात्यात् संयोजनाप्रायश्चित्तं सप्तमासाः ।

[भा.१३९] रणो आहाकम्मे उदउल्ले खलु तहा ।
अभिहडेय दसमास रायपिंडे उग्गमदोसाइणाचेव ।।

वृ- केनापि प्रथमतो राजपिंड उपभुक्तस्ततस्तेनैव राजपिंडे उपभुक्त अनालोचिते एवाधाकर्मिकमुपभुक्तं, तदनंतरमुदकार्द्र, ततोऽभ्याहृतमेवमेतान्यपि चत्वार्येकाधिकारिकाणि अधिकृत एव राजपिंडदोषे शेषदोषाणां संभवात् एतेषां च नानात्वमिति पृथगालोचनायां संयोजना दर्श्यंते राजपिंडे चत्वारो गुरुमासाः आधाकर्म्मिकेपि चत्वारो गुरुमासाः उदकार्द्रे लघुमासः अभ्याहृतेपि लघुमास इत्यधिकृते राजपिंडे उद्गमदोषादिना उद्गमदोषेण आदिशब्दादुत्पादनादोषेणैषणादोषेम चशब्दादन्येन च यथासंभवं संयोजनायां दसमासाः प्रायश्चित्तं एवमनया दिशा तत्तद्दोषं संयोजनातः संयोजनाप्रायश्चित्तमवसातव्यं, एवं संयोजनायामनुमतायां माभूदपरिमाणा शंकेति कस्मिन् तीर्थे कति मासा दीयंते प्रायश्चितमिति परिज्ञानाय संयोजनात् आरोपणा प्रायश्चित्तं पृथक्कृतं आलोयणाविहीवियत्ति यत् यथा प्रतिसेवितं तत्तथैवालोचितव्यं नतु मायया प्रतिकुंचनीयमन्यथा मायया प्रतिकुंचने मायाप्रत्ययमधिकं मासगुरुं प्राप्नोतीत्येवं ज्ञापितः सन् यथाप्रतिसेवितमालोचयते, तत आलोचनाविधि-रपिसम्यग् ज्ञापितः स्यात् अपिशब्दादेवं ज्ञापितो यदा माययान्यथालोचयते तदा आरोपणायां क्रियमाणायां यत्र मासलघु आभवति तत्र मासगुरु प्रदातव्यमिति ज्ञापनार्थमारोपणातः प्रतिकुंचनाप्रायश्चित्तं भिन्नं कृतमिति एवमुक्तेन प्रकारेण चौतुर्णामपि प्रायश्चित्तानां नानात्वमिति उक्तं संयोजनाप्रायश्चित्तं तदुक्तौ यतः प्ररुपणापृथकत्वमिति द्वारमप्युक्तं, सांप्रतमारोपणाप्रायश्चित्तमाह -

[भा.१४०] पंचादि आरोवणनेयव्वा जाव होंति छम्मासा ।
तेन पनगादियाणं छण्हुवरि ज्झोसणं कुज्जा ।।

वृ- रात्रिंदिवपंचकादारभ्यारोपणा पंचादि रात्रिंदिवपंचकादिका आदिशब्दात् दश पंचदश विंशतिः रात्रिंदिवमासिकादिपरिग्रहः ज्ञातव्यः तावत् यावत् षणमासा भवंति, नाधिकं यत् एवं तेन कारणेन षण्णां मासानामुपरिपनगाइयाणंति रात्रिंदिव पंचकादीनां ज्भ्कोषणामपनयनं कुर्यात्, षण्मासानामुपरि यदापद्यते प्रायश्चित्तं, तत्सर्वं त्यज्यते इति भावः उक्तं च चूर्णौ - "छम्मासाणपरं जं आवज्जइतं सव्वं छंडिज्जइ," इति अत्र चोदक आह -

[भा.१४१] किं कारणं न दिज्जइ छम्मासाण परतोउ आरुवणा ।
भणइ गुरु पुन इणमो, जं कारण ज्झोसियासेसा ।।

वृ- षण्मासानां परत आरोपणाप्रायश्चित्तं न दीयते । अत्र किं कारणमाचार्यः प्रतिवचनमाह । जं कारणं ति निमित्तकारणहेतुषु सर्वा विभक्त्तय इति वचनात् । अत्र हेतौ प्रथमा ततोयमर्थः येन कारणेन षण्मासानां परतः शेषाणि रात्रिंदिवपंचकादीनि प्रायश्चित्तनिज्झोषितानि त्यक्तानि तत्कारणं पुनरिदं वक्ष्यमाणमिति गुरुर्भणाति तदेव कारणं दर्शयति ।

[भा.१४२] आरोवणनिप्फन्नं छउमत्थे जं जिनेहि उक्कोसं ।
तं तस्सउ तित्थंमीववहरणं धन्नपिडगं च ।।

वृ. छद्मस्थे छद्मस्थकाले यत् जिनैः स्वस्वकालापेक्षया उत्कृष्टं तपः कर्म्म कृतं तस्य तीर्थकरस्य तीर्थे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुरेवकारार्थो भिन्नक्रमश्च स चैवं योजनीयस्तदेव तावत्प्रमाणमेवारोपणानिष्पन्नं तपःकर्म्म व्यवह्रियते इति व्यवहरणं बहुलवचनात्कर्म्मण्यनट् व्यवहरणीयमिति भावः किंचेत्यत आह धान्यपिटकमिव धान्यप्रस्थक इव किमुक्तं भवति येन राज्ञा यो धान्यप्रस्थकः स्थापितस्तत्काले स एव व्यवहर्त्तव्यो न पुरातनो नाप्यन्यः स्वमतिपरिकल्पितस्तथा भगवतापि तीर्थकरेण येन छद्मस्थकाले यावत् प्रमाणमुत्कृष्टं तपःकर्म कृतं तस्य तीर्थ आरोपणानिष्पन्नप्रायश्चित्तमपि तावत्प्रमाणमेव व्यवहरणीयं नाधिकमन्यथा राजाज्ञाखंडनतो राजप्रयुक्तदंडस्य च भगवदाज्ञाखंडनतः संसारदंडस्य प्रवृत्तेः एतमेव धान्यपिटकदृष्टांतं भावयति ।

[भा.१४३] जोजया पत्थिवो होइ सो तया धन्न पत्थगं ।
ठावे अन्नं पुरिल्लेणं ववहरंते य दंडए ।।

वृ- यो यदा पार्थिवः पृथिवीपतिर्भवति स तदास्वकालं धान्यं प्रस्थकमन्यं स्थापयति, तस्मिंश्च स्थापिते ये पुरिल्लेणं-ति, पुरातनेनोपलक्षणमेतत् स्वमतिपरिकल्पितेन वा व्यवहरंति तान् तथा व्यवहरतो दंडयति एवं तिर्थकृदपि भगवान् यो यावत् प्रमाणमुत्कृष्टं तपःकर्म्म छद्मस्थकाले कुर्वन् तपः कर्म्मपरिमाणं व्यवस्थापयति स स्वतीर्थे तावत्प्रमाणादधिकं तपःकर्म्म व्यवहारतः संसारदंडेन दंडयति तस्मात्तस्य तीर्थे तावत्प्रमाणमेव व्यवहर्त्तव्यमिति । अथ कस्य तीर्थे कियत्प्रमाणं तपःकर्म्मेत्यत आह -

[भा.१४४] संवच्छरं तु पढमे मज्झिमगाणट्ठमासियं होइ ।
छम्मासपच्छिमस्स उ मानं भणियं उक्कोसं ।।

वृ- प्रथमे प्रथमतीर्थकरकाले मानं तपःकर्म्मपरिमाणमुत्कृष्टं भणितं संवत्सरमेव तुरेवकारार्थः मध्यमकानां द्वाविंशतितीर्थकृतां तपःकर्म्मपरिमाणमुत्कृष्टं भवत्यष्टमासिकमष्टमासप्रमाणं, पश्चिमस्य तु भगवतो वर्द्धमानस्वामिनः तपः कर्म्मपरिमाणमुत्कृष्टं भणितं षण्मासाः अत्रैव भूयः शिष्यशंकामाह-

[भा.१४५] पुनरवि चोएइ ततो पुरिमा चरमा य विसमसोहीया ।
किह सुज्झंती तेऊ चोयग इणमो मुणसु वोच्छं ।।

वृ- एवमनंतरोदिते सूरिणाभिहिते पुनरपि शिष्यश्चोदयति प्रश्नयति यदि नामैवं ततः पूर्वादितीर्थकरतीर्थवर्त्तिनश्चरमाः पश्चिमतीर्थकरतीर्थवर्त्तिनो विषमशोधिका विषमप्रायश्चित्ता अभवन् ततः कथं ते विषमशोधिका अविशेषेण शुद्ध्यंति सर्वात्मना शुद्धिमासादयंति न खलु कारणवैषम्ये कार्यमविषमं दृष्टमत्र तु विषमं प्रायश्चित्तं विशोधिस्तु सर्वेषामप्यविशेषेणतुल्या, ततो दुर्घटमेतदिति भावः । अत्रसूरिर्यत् प्रायश्चित्तवैषम्ये कारणं यथा च कारणविषमतायामपि तुल्या विशोधिस्तदेतत् प्रतिपादयिषुः प्रथमतः प्रायश्चित्तवैषम्यकारणमभिधित्सुरिदमाह चोयगेत्यादि हे चोदक उपपन्नप्रश्नकारिन् प्रायश्चित्तवैषम्ये इदं वक्ष्यमाणकारणं वक्ष्ये तच्च वक्ष्यमाणमवहितमनाः श्रृणु, प्रतिज्ञातमेव निर्वाहयति।

[भा.१४६] कालस्स निद्धायाए देहबलं धिइबलं व जं पुरिमे ।
तदनंतभागहीनं कमेण जा पच्छिमा अरिहा ।।

वृ- पुरिमे पूर्वे आदितीर्थकरतीर्थे कालस्य स्निग्धतया प्राणिनां देहबलं शारीरं बलं तदुपष्टंभतो धृतिबलं च यत्, आसीत् तत् अवसर्प्पिणीकालतस्य तथा स्वभावतया क्रमेण प्रतिक्षणमनंतभागहीनमनंत-भागहीनं एतत् तावदायातं यावत् पश्चिमो भगवानर्हन् वर्द्धमानस्वामी ततः शारीरबलस्य धृतिबलस्य च विषमत्वात् विषमं प्रायश्चित्तं तथा चाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा. १४७] संवच्छरेणावि न तेसि आसी जोगाण हानी दुविहे बलंमि ।
जेयाविधिज्झाइ अनोववेयानद्धम्मया सोहयए तएवि ।।

वृ- तेषामादितीर्थकरवर्त्तिनां साधूनां द्विविधे बले शारीरे बले धृतिबले च अत्यंतमुपचयप्राप्ते सति संवत्सरेणापि संवत्सरप्रमाणमपि तपः कुर्वतां न योगानां संयमव्यापाररूपाणां हानिरासीत् मध्यवतीर्थ-करतीर्थवर्त्तिनां द्विविधमपि बलं क्रमेणानंतभागहीनमनंतभागहीनम् पश्चिमतीर्थकरतीर्थवर्त्तिनामनं-तहीनमतो मध्यमकानां संवत्सरप्रमाणं तपः कुर्वतां महतीयोगहानिरिति तेषाम ष्टमासिकमुत्कृष्टं तपःकर्म्म व्यवस्थापितं पश्चिमतीर्थकरतीर्थवर्त्तिनां तदपि कुर्वतां योगहानिरिति षण्मासिकमुत्कृष्टं तपःकर्म्म तेषा प्रवर्त्तितं तदेवमुक्तं प्रायश्चित्तवैषम्ये कारणं संप्रति तुल्यां विशोधिं प्रतिपादयति । जेयावीत्यादि ये चापि मध्यमतीर्थकरतीर्थवर्त्तिनोपश्चिमतीर्थकरतीर्थवर्त्तिनश्च धैर्याद्यनुपपेता धैर्येण धृतिबलेन आदिशब्दात् संहननबलेन च कालदोषतोऽनुपपेताः तएवित्ति तकानपि तद्धर्म्मता तेषामिव आदितीर्थकरतीर्थ-वर्त्तिनामिव धर्म्मोऽशठत्वादिकः स्वभावो येषां ते तद्धर्म्माणस्तद्भावः तद्धर्म्मता सा शोधयति इयमत्र भावना इह अशठभावेनानिगूहितबलवीर्यतया यथाशक्ति तपःकर्म्मणि प्रवृत्तिर्विशोधेरांतरं कारणं तच्च बाह्यतपः कर्म्मणो वैषम्येपि सर्वेषामप्यविशिष्टमतः सर्वेषां तुल्या विशोधिः युक्तं चैतत् तथाहि प्रथमतीर्थकर तीर्थेपि न सर्वेषां देहबलं धृतिबलं च समानमथ च सर्वेषामप्यशठभावतया प्रवृत्तेस्तुलया विशोधिरेवमत्रापि भावनीयमित्यदोषः । अत्रैव निदर्शनमाह -

[भा. १४८] पत्थगा जे पुरा आसि हीनमानाउ तेधुना ।
मान भंडाणि धन्नाणि सोहे जाणे तहेवय ।।

वृ- ये पुरा पूर्वकाले प्रस्थक आसीरन् ते कालदोषतः क्रमेण हीना हीनतरा जायमाना अत्यंतहीनमाना जातास्तथा धान्यादिभांडानि प्रस्थकादिपरिमाणपरिछेद्यानि तथैव संख्याव्यवहारस्च सर्वदाप्यवि-शिष्टत्वात् एवमिहापि प्रायश्चित्तानां वैषम्येपि तथैव धान्यानां प्रस्थकपरिच्छेद्यतामिव तुल्यां जानीहि प्रस्थकदृष्टांतेन सर्वत्र तुल्यां विशोधिमवबुध्यस्वेति भावः, उक्तमारोपणाप्रायश्चित्तमिदानीं प्रतिकुंचनाप्रायश्चित्तमाह -

[भा. १४९] दव्वे खेत्ते काले भावे पलिउंचणा चउविगप्पा ।
चोयगकप्पारोवण इहइं भणिया पुरिसजाया ।।

वृ- प्रतिकुंच्यते अन्यथा प्रतिसेवितमन्यथा कथ्यते, यया सा प्रतिकुंचना सा चतुर्विधा तद्यथा द्रव्ये द्रव्यविषया एवं क्षेत्रे काले भावे च अत्र परस्य प्रश्नमभिधित्सुराह चोयगत्ति । अत्र चोदको ब्रूते ननु कल्पेपि प्रायश्चित्तमभिहितं, व्यवहारेपि तदेव प्रायश्चित्तमभिधीयते इति द्वयोरप्यध्ययनयोर्विशेषाभावः अत्रार्थे सूरिवचनं । कप्पारोवणेत्यादि । कल्पे कल्पाध्ययने कल्पितानां मूलोत्तरगुणापराधप्रायश्चित्तानामारोपणं, दानमिह व्यवहाराध्ययने भणितं, इंइति पादपूरणे इजेराः पादपूरणे इति वचनात्, सानुस्वारता प्राकृतत्वात् प्राकृते हि पादांते सानुस्वारता भवतीति किमुक्तं भवति । कल्पाध्ययने आभवत् प्रायश्चित्तमुक्तं नतु दानमिह तु दानं भणितमिति विशेषः, तथा कल्पाध्ययने प्रायश्चित्तार्हाः पुरुषजाता न भणिता इह तु भणिता इति महान् विशेषः एष गाथासंक्षेपार्थः सांप्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतो द्रव्यादिभेदयभिन्नां प्रतिकुंचनां व्याख्यानयति -

[भा. १५०] सचित्ते अचित्तं जनवयपडिसेवियं तु अद्धाणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुभिक्खंमि दुभिक्खे हट्ठेण तहा गिलाणेणं ।।

वृ- द्रव्यविषया प्रतिकुंचना नाम सचित्ते उपलक्षणमेतत् मिश्रे वा प्रतिसेविते अचित्तं मया प्रतिसेवितमित्यालोचयति, क्षेत्रप्रतिकुंचना जनपदे प्रतिसेव्य यदध्वनि प्रतिसेवितमित्यालोचयति, कालप्रतिकुंचना यत्सुभिक्षे काले सेवित्वा दुर्भिक्षे मया प्रतिसेवितमित्यावेदयति, भावप्रतिकुंचना यत् हृष्टेन सता ग्लानेन सता मया प्रतिसेवितमित्यालोचयति उक्ता प्रतिकुंचना अधुना अनंतरगाथोत्तरार्धं व्याख्यानयन् अज्झयणाण विसेसो इति द्वारं व्याख्यानयति तत्र चोयग इत्यवयवं व्याचिख्यासुराह -

[भा.१५१] कप्पंमिवि पच्छित्तं ववहारंमिवि तहेव पच्छित्तं ।
कप्पववहाराणं को नु विसेसोत्ति चोएइ ।।

वृ- ननु कल्पे प्रायश्चित्तमुक्तं, व्यवहारेपि तदेव प्रायश्चित्तमभिधीयते ततः कल्पव्यवहारयोः को नु विशेषो नैव कश्चनापीतिभावः न तुशब्दस्याक्षेपद्योतकत्वादिति चोदयति । प्रश्नयति शिष्यः । अपि चाभिधानतोपि कल्पव्यवहारयोर्विशेषानुपपत्तिः तथाचाह -

[भा.१५२] जो अवितहववहारी सो नियमा वट्टए उ कप्पंमि ।
इय बिहु नत्थि विसेसो अज्झयणाणं दुवेण्हंपि ।।

वृ- यो नाम साधुरवितथव्यवहारी स नियमादवश्यंभावेन वर्त्तते एव तुरेवकारार्थः कल्पे आचारे आचारवर्त्तिन एव यथोक्तावितथव्यवहारकारित्वात् । यश्च वर्त्तते कल्पे आचारे स नियमादवितथव्यवहारकारी तथाहि कल्पो व्यवहार आचार इत्यनर्थांतरमिति इयबिहु इत्यपि एवमपि अर्थगत्याभिधानाभेदतोपि आस्तां प्रागुक्तप्रकारेणाभिधेयाभेद इत्यपि शब्दार्थः हुर्निश्चितं द्वयोरपि कल्पव्यवहारयोरध्ययनयोनास्ति विशेषः एवं परेणाभिधेयाभेदतोऽभिधानाभेदतश्चैक्ये प्रतिपादिते सूरिभिधेयभेदं दर्शयन् कप्पारोवणेत्ति अवयवं व्याख्यानयति ।

[भा.१५३] कप्पंमि कप्पिया खलु मूलगुणे चेव चउत्तरगुणे यः
ववहारे ववहरिय । पायच्छित्ता भवंते य ।।

वृ- कल्पे कल्पाध्ययने कल्पितान्येव प्ररुपितान्येव खलु शब्दस्यैवकारार्थत्वात् नतु दानव्यवहार प्रवर्त्तितानि कानीत्यत आह मूलगुणा चेव उत्तरगुणा य इति विपये़ण विषयिणो लक्षणात् मूलगुणापराधप्रायश्चित्तानि उत्तरगुणापराधप्रायश्चित्तानि । व्यवहारे व्यवहाराध्ययने पुनर्व्यवहृतानि दानव्यवहारविषयीकृतानि किमुक्तं भवति कल्पाध्ययने मूलगुणापराधे वा आभवंति प्रायश्चित्तान्युक्तानि अस्मिंस्तु व्यवहाराध्ययने तेषामाभवतां प्रायश्चित्तानां दानमुक्तमिति यानि च कल्पाध्ययने आभवंति प्रायश्चित्तानि नोक्तानि तानि व्यवहारेभिधीयंते तेषां दानं च किंच -

[भा.१५४] अविसेसियं च कप्पे इहइं तु विसेसियं इमं ।
चउहा पडिसेवण संजोयण आरोवण कुंचियं चेव ।।

वृ- चः समुच्चये अन्यच्चेत्यर्थः । कल्पे कल्पाध्ययने प्रायश्चित्तमविशेपितं विशेपरहितमुक्तं । इहइन्तुत्ति इः पादपूरणे सानुस्वारता पूर्ववत् तुः पुनरर्थे इह व्यवहाराध्ययने पुनरिदं प्रायश्चित्तं चतुर्द्धा चतुर्भिः प्रकारैर्विशेषितं, तानेव प्रकारानाह । प्रतिसेवनं संयोजनमारोपणं कुंचनमिति प्रतिकुंचनं एतानि अनंतरमेव सप्रपंचं व्याख्यातानीति न भूयो व्याख्यायंते तदेवभिधेयाभेदतो नास्ति विशेष इति यदुक्तं तदसिद्धमिति प्रतिपादितमभिधेयभेदस्य दर्शितत्वात् । यत्पुनरुच्यते अभिधानाभेदतो नास्ति विशेष इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनैकांतिकमिति दर्शयति -

[भा.१५५] नाणत्तं दिस्सए अत्थे, अभिन्ने वंजणम्मिवि ।
वंजणस्स य भेदंमि कोइअत्थो न भिज्ञए ।।

वृ- व्यज्यते प्रकटीक्रियते अर्थोऽनेन प्रदीपेनेव घट इति व्यंजनं शब्दस्तस्मिन् अपिशब्दो भिन्नक्रमः स चैवं योजनीयोऽभिन्नेपि एकरुपेपि एकअर्थे अर्थविषये नानात्वं दृश्यते यथा सैंधव इत्युक्ते तत्तत्प्रस्तावादिना अश्वलवणवस्त्राद्यर्थनानात्वं, तथा व्यंजनस्य शब्दस्य भेदेपि च शब्दोऽपिशब्दार्थो भिन्नक्रमश्चेत्यत्र संबध्यते कश्चिदर्थो न भिद्यते, यथा खं, व्योम, आकाशमिति कस्मादेवं शब्दाभेदेपि अर्थनानात्वमिति चेत्? उच्यते, शब्दार्थयोर्भेदाबेदविषये चतुर्भंगिकायाभावात् तथाहि अर्थस्याप्यभेदः शब्दस्थाप्यभेद इति प्रथमो भंगः अर्थस्याभेदः शब्दस्य भेद इति द्वितीयः, अर्थस्याभेदः शब्दस्याभेदः इति तृतीयः अर्थस्य भेदः शब्दस्य भेदः इति चतुर्थः एतेष्वेव चतुर्थभंगकेषु क्रमेणोदाहरणान्युपदर्शयति-

[भा.१५६] पढमो इंदोत्ति बिइयओ होइइंदसकोत्ति ।
तइओ गो भूप पसू रस्सिणोत्ति चरमो घडपडोत्ति ।।

वृ- प्रथमो भंगोऽर्थभेदः शब्दोऽभेदः इत्येवंरुपो यथा इंद्र इंद्र इति । तथाह्येकेनापि इंद्र इत्युक्तं द्वितीयेनापि इंद्र इति अत्र च द्वितीयेनापि इंद्र इति । अत्र च द्वयोरपि शब्दयोः स्वरुपाभेदेऽर्थाभेदश्च । द्वितीयोर्थाभेदः शब्दस्य भेद इति रुपो यथा इंद्रशक्र इति अत्र हि शब्दस्य नानात्वमर्थस्त्वभिन्न एव द्वयोरप्येकार्थिकत्वात् तृतीयोऽर्थस्य भेदः शब्दस्याभेद इत्येवंलक्षणो यता भूप पशु रश्मिषु पुरुषभेदेन कालभेदेन वा प्रयुज्यमाना गोशब्दाः । अत्र हि गौरिति सर्वत्राप्यभिन्न इति, चरमो यथा घट पट इति अत्र हि द्वयोरपि शब्दयोः रुपभेदोप्यस्ति अर्यभेदोपि तत उपपद्यते शब्दाभेदेपि अर्थनानात्वमर्थाभेदेपि शब्दनानात्वं तेन यदुच्यते अभिधानाभेदतो नास्ति विशेष इति । तदनेकांतिकमुपदर्शितं भूपपशुरश्मिवाचिनां । गोशब्दानामभिधानाभेदेप्यर्थविशेषदर्शनात् स चार्थविशेषोत्रीऽप्यस्ति, यथोक्तं प्राक् अभिधानाभेदत इति यद् उक्तं तत् प्रत्यक्षविरुद्धं ब्यंजनभेदस्य साक्षादुपलभ्यमानत्वात्, तथाह्येकत्र कल्प इति-अपरत्र व्यवहार इति ।। अथार्थगत्याभिधानाऽभेद उच्यते न स्वरुपतस्तदप्यसत् अर्थविशेषस्याप्युभयत्र भावात्तथा चाह -

[भा.१५७] वंजणेन य नाणत्तं अत्थतो अविकप्पियं ।
दिस्सए कप्पनामस्स ववहारस्स तहेव य ।।

वृ- कल्पनाम्नोध्ययनस्य तथैव व्यवहारस्य व्यवहाराध्ययनस्य दृश्यते व्यंजनेन व्यंजनभेदन नानात्वं, प्रत्यक्षतः व पृथग्विभिन्नानां व्यंजनानामुपलभ्यमानत्वात् । तथाऽर्थतोऽर्थमाश्रित्यास्ति नानात्वं, अविकल्पितं निश्चितं प्रायश्चितभेदानां प्रतिसेवनासंयोजनादीनां प्रायश्चित्तार्हपुरुषजातानां च कत्पाध्ययनानुक्तानामिह व्यवहाराभिधानात् तदरिहपरिसाय इत्येतत् द्वारं व्याचिख्यासुरिहहं भणिया पुरिसजाया इत्यवयवं व्याख्यानयन्नाह -

[भा.१५८] वट्टंतस्स अकप्पे पच्छित्तं तस्स वणिया भेदा ।
जे पुन पुरिसज्जाया तस्सरिहा ते इमे होंति ।।

वृ- इह कल्पे वर्त्तमानस्य सूत्रोक्तविधिनायतनया प्रवृत्तेः प्रायश्चित्तविषयतैव नोपजायते, इत्यकल्पगृहणमकल्पे दर्पादौ वर्त्तमानस्य यत् प्रायश्चित्तं तस्ययेभेदाः प्रतिसेवनासंयोजनादयस्ते वर्णिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये पुनस्तस्य प्रायश्चित्तस्यार्हा योग्याः पुरुषजाताः पुरुषप्रकाराः पुरुषभेदा इत्यर्थः, त इमे वक्ष्यमाणस्वरूपा भवंति । तानेव दर्शयति ।।

[भा.१५९] कयकरणा इयरे वा सावेक्खा खलु तहेव निरवेक्खा ।
निरवेक्खा जिनमादी सावेक्खा आयरियमादी ।।

वृ- कृतकरणा नाम षष्ठाष्टमादिभिर्विविधतपोविधानैः परिकर्म्मितशरीरः इतरे अकृतकरणाः षष्ठाष्ठमादिभिस्तपोविशेषैरपरिकर्म्मितशरीराः तत्र ये कृतकरणास्ते द्विविधास्तद्यथा सापेक्षाः खलु तथैव निरपेक्षाः, सह अपेक्षा गच्छस्येति गम्यते येषां ते सापेक्षा गच्छवासिनः, निर्गता अपेक्षा येभ्यस्तेनिरपेक्षाः तत्र ये निरपेक्षास्ते त्रिविधा जिनादयः तद्यथा । जिनकल्पिकाःशुद्धपरिहारविशुद्धिका यथालंद-कल्पिकाश्च, एते नियमतः कृतकरणा एव अकृतकरणानामन्यतमस्यापि कल्पस्य प्रतिपत्त्ययोगात् सापेक्षा अपि त्रिविधा आचार्यादयस्तद्यथा - आचार्या उपाध्याया भिक्षवश्च एते प्रत्येकं द्विधा भूयो भवंति तद्यथा-आचार्याः कृतकरणा अकृतकरणाश्च उपाध्याया अपि कृतकरणा अकृतकरणाश्च भिक्षवो-पि कृतकरणा अकृतकरणाश्च तत्र कृतकरणानां चिंत्यमानत्वादस्यां गाथायामेते कृतकरणा ग्राह्याः ।

[भा.१६०] अकयकरणावि दुविहा, अणहिगया अहिगया य बोधव्वा ।
जं सेवइ अहिगए अनहिगएअत्थिरे इच्छा ।।

वृ- इहाचार्या उपाध्यायाश्च कृतकरणा अकृतकरणा वा नियमात् गीतार्थाः स्थिराश्च, तत इहाकृतकरणा भिक्षव एव ग्राह्याः, ते अकृतकरणा भिक्षवो द्विविधास्तद्यथा अनधिगताश्च अधिगताश्च अनधिगता नाम अगीतार्थाः अधिगता गीतार्थाः, अपिशब्दः संभावने स चैतत्संभावयति, ये भिक्षवोऽनधिगतास्ते द्विविधास्तद्यथा स्थिरा अस्थिराश्च स्थिरा नाम धृतिसंहननसंपन्नाः तद्विपरीता अस्थिराः, अधिगता अपि द्विधा स्थिरा अस्थिराश्च कृतकरणा अपि भिक्षवो द्विधा अधिगताः अनधिगताश्च अनधिगता अपि द्विधा स्थिरा अस्थिराश्च अधिगता अपि द्विविधाः स्थिरा अस्थिराश्च अत्रैव संक्षेपतः प्रायश्चित्तदानविधिमाह जं सेवइ इत्यादि यत् प्रायश्चित्तस्थानं सेवते प्रतिसेवते अधिगतो गीतार्थ उपलक्षणमेतत् कृतकरणः स्थिरश्च तस्मै तदेव परिपूर्नं दीयते, तदेव प्रायश्चित्तस्थानं प्राप्ते अनधिगते अस्थिरे च अस्थिरे, च शब्दादकृतकरणे च गुरोः प्रायश्चित्तदानविधौ इच्छा सूत्रोपदेशानुसारेण स्वेच्छा तथाहि यदि श्रुतोपदेशानुसारतः कृतकरणः स्थिरोधिगत इति वा कृतकरणादिरपि समर्थ इति विज्ञातो भवति तदा यदेव प्रायश्चित्तमापन्नस्तदेव तस्मै दीयते, । अथासमर्थ इति परीक्षित इति गाथावत्प्रायश्चित्तं प्राप्तस्तस्यार्वाक्तनमनंतरं दीयते, तत्राप्यसमर्थतायां ततोप्यनंतरं तत्राप्यसामर्थ्ये ततोप्यनंतरमेवं यथापूर्वं क्रमेण तावन्नेयं यावन्निर्विकृतिकं तत्राप्यसमर्थतायां पौरुषीप्रत्याख्यानं, तत्राप्यशक्तौ नमस्कारसहितं गाढग्लानत्वादिना तस्याप्यसंभवे एवमेवलोचनामात्रेण शुध्यापादनमिति, संप्रति पुरुषभेदमार्गणायामेव प्रकारांतरमाह -

[भा.१६१] अहवासा विक्खियरे निरवेक्खा सव्वहा उकय करणा ।
इयरे कयाऽकयावा, थिराऽथिरा होंति गीयत्था ।।

वृ- अथवेति प्रकारांतरद्योतनार्थः, तच्च प्रकारांतरमिदं पूर्वं कृतकरणा कृतकरणभेदावादौ कृत्वा पुरुषभेदमार्गमाकृता, अत्र तु सापेक्षनिरपेक्षभेदौ तथाचाह - साविक्खियरेत्ति द्विविधाः प्रायश्चित्तार्हाः पुरुषास्तद्यथा । सापेक्षा इतरे च, सापेक्षा गच्छवासिनस्ते च त्रिधा आचार्या उपाध्याया भिक्षवः, निरपेक्षा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनकल्पिकादयस्तत्र ये निरपेक्षास्ते सर्वशः सर्वात्मना कृतकरणास्तुशब्दस्य समुच्चयार्थत्वादधिगताः स्थिराश्च, इतरे सापेक्षा द्विविधास्तद्यथा कयाकयावा इति पदैकदेशे पदसमुदायोपचारात् कृतकरणा अकृतकरणाश्च वाशब्दः समुच्चये कृतकरणा अपि द्विधा स्थिरा अस्थिरा अस्थिराश्च, अकृतकरणा अपि द्विधा स्थिरा अस्थिराश्च एकैके द्विधा गीतार्था अगीतार्थाश्च सूत्रे गीतार्था इत्युपलक्षणं, ततोऽगीतार्था अपि विवृताः अथ किंस्वरूपाः कृतकरणा इति कृतकरणस्वरूपमाह -

[भा.१६२] छठऽट्ठमाइएहिं कयकरणा तेउ उभयपरियाए ।
अहिगयकयकरणत्तं जोगयतगारिहा केई ।।

वृ- कृतकरणा नाम ये पष्ठाष्टमादिभिस्तपोविशेषैरुभयपर्याये श्रामण्ये पर्याये चेत्यर्थः परिकर्म्मित-शरीरास्ते ज्ञातव्यास्तद्विलक्षणा इतरे सामर्थ्यादकृतकरणाः; अत्रैव मतांतरमाह । अहिगयेत्यादि केचि-दाचार्या ये अधिगतास्ते नियमात् कृतकरणा इत्यधिगतानां कृतकरणत्वमिच्छंति, कस्मादिति चेदत आह जोगायतगारिहाइति, निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायोदर्शनमिति वृद्धवैयाकरणप्रवादात् हेतावत्र प्रथमा ततोयमर्थः यतस्तैर्महाकल्पश्रुतादीनामायतकाला योगा उद्व्यूढास्तत आयतकयोगार्हा अभवन्निति नियमतो अधिगताः कृतकरणा इति, तदेवं कृताः पुरुषभेदमार्गणा सांप्रतममीषां प्रायश्चित्तदानविधिर्वक्तव्यस्तत्र ये निरपेक्षा जिनकल्पिकादयस्ते यत् प्रायश्चित्तमापन्नास्तदेव तेभ्यो दीयते न तद्विषया गुरुलाधवचिंता निरपेक्षत्वात् सापेक्षाणां तु सापेक्षतयैव प्रायश्चित्तदानविधौ तद्विषया गुरुलाधवचिंता कर्त्तव्या, तत्र यानि प्रायश्चित्तानि दातव्यानि, तानि संक्षेपतो गाथाद्वयेनाह ।

[भा.१६३] निव्विइए पुरिमड्ढे, एक्कासण अंबिले चउत्थेय ।
पनगं दस पनरसा वीसा तह पन्नवीसाय ।।

[भा.१६४] मासो लहुओ गुरुगो, चउरोमासा हवंति लहुगुरुगा ।
छम्मासा लहुगुरुगा छेदो मूलं तह दुगं च ।।

वृ- निर्विकृतिकं विकृतिप्रत्याख्यानं पुरिमड्ढंति दिवसपूर्वार्द्धप्रत्याख्यानं, एकाशनाचाम्लचतुर्थाति प्रतितानि, पनगंति, रात्रिंदिवानां पंचकं लहुगुरुयंति वक्ष्यमाणं पदमत्रापि व्याख्यानतो विशेषप्रति-पत्तिरिति विभक्तिपरिणामेन संबंध्यते, लघुरात्रिंदिवपंचकं गुरुरात्रिंदिवपंचकं च तत्र लघुरात्रिंदिवपंच-कमाचाम्लेन एकद्व्यादिदिनैर्वा हीनं, परिपूर्णं गुरुरात्रिंदिवपंचकं एवं दसत्ति लघुरात्रिंदिवदशकं गुरुरात्रिं-दिवदशकं, पन्नरसत्ति लघुरात्रिदिवपंचदशकं गुरुरात्रिंदिवपंचदशकं, पनवीसत्ति लघुरात्रिंदिवपंचविं-शतिकं गुरुरात्रिंदिवपंचविंशतिकं । मासो लहुओ गुरुओत्ति लघुमासो गुरुमासाः । चत्वारो लघुमा-साश्चत्वारो गुरुमासा, षण्मासा लघवः षण्मासा गुरवः, तथा छेदः कतिपयपर्यायस्य, मूलं सर्वपर्यायोच्छे-देन व्रतारोपणं, तहदुगंचत्ति अनवस्थाप्यं पारांचितं च; इह पारांचितप्रायश्चित्तवर्त्ती प्रायो जिनकल्पिक-प्रतिरुपको वर्त्तते उक्तं च -

पारंचिउएगागीइच्चादि, जिनकप्पियपडिरुवगो इति अनवस्थाप्यप्रायश्चित्तवर्त्यप्येवं गुणः ।
संघयणविरियआगम सुत्तविही एजो समुज्जुत्तो निग्गाहजुत्तो तवस्सी, पवयणसारे गहियअत्थो ।।
तिलतुसतिभागमित्तोवि जस्स असुभो न विज्जए, भावो; निज्जूहणारिहो सो, से से निज्जूहण नत्थि;।।
एयगुणसंपन्नो पावइ अनवट्ठाणमुत्तमगुणो हो, एय गुण विप्पहीणो-तारिसंगभीरे भवे मूलं ।।
एतौ चैकांततो निरपेक्षौ, सापेक्षाणां त्वयं प्रायश्चित्तदानविधिः कथयितुमुपक्रांतस्ततो मूलादारभ्य

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

प्रायश्चित्तदानविधिरच्यते तथा चाह -

[भा.१६५] पढमस्स होइ मूलं बिइए मूलं छेदो च छगुरुगा ।
जयणाए होइ सुद्धो, अजयणा गुरुगा तिविहभेदो

वृ- प्रथमस्याचार्यस्य कृतकरणस्य सापेक्षस्य महत्यपिअपराधे सापेक्षत्वात् प्रायश्चित्तं मूलमुपलक्षणमेतत् तेन तस्यैवाकृतकरणस्यासमर्थात् । छेद इत्यपि द्रष्टव्यं, द्वितीये उपाध्याये कृतकरणे। तथारुपायां धृतिबलसमर्थतायां मूलमितरथा च्छेदः । अकृतकरणे गुरुषण्मासिकं, इहाचार्य उपाध्यायो वा यदि यतनया कारणे देशकालानुरूपं प्रायश्चित्तस्थानं अवर्त्तिष्ट, तदा शुद्धो न प्रायश्चितविषयः यतनया कारणप्रवृत्तेः अयतनया तु प्रायश्चित्तस्थाने प्रवृत्तौ मूलं छेदो वाचार्यस्य, उपाध्यायस्य तु गुरुकादारभ्योक्तप्रकारेण त्रिविधा प्रायश्चित्तस्य भेदः षड्गुरुछेदो मूलं च, एवंमुक्तानुसारतो भिक्षुष्वपि प्रायश्चित्तदानविधिरनुसरणीयः एतदेव व्याचक्षाण आह -

[भा.१६६] सव्वेसिं अविसिट्ठो आवत्तीतेन पढमया मूलं ।
सावेक्खे गुरुमूलं कयाकए होइ पुन छेओउ ।।

[भा.१६७] सावेक्खोत्ति च काउं, गुरुस्स कयजोगिणो भवे छेदो ।
अकयकरणंमि छगुरु इइअड्ढोक्कतीए नेयं ।।

वृ- इति प्रायश्चित्तदानविधिरुक्तप्रकारेण कथयितुमभीष्टो, यदा सर्वेषामाचार्यादीनामापत्तिः प्रायश्चित्तस्यापादनं, अविशिष्टा सापेक्षाणां च महत्यपराधे मूलं नानवस्थाप्यं, पारांचितं वा ततः प्रथमतया सर्वेषां मूलमापन्नमविशिष्टमधिकृत्य गुरुलाघव चिंतया प्रायश्चित्तदानविधिरुच्यते, तत्र सापेक्षे गुरौ आचार्ये गाथायां विभक्तिलोपः प्राकृतत्वात्कृते कृतकरणे प्रायश्चित्तं मूलं, सापेक्षे इति वचनात्, महत्यप्यपराधे गुरौ सापेक्षत्वात् मूलमेव प्रायश्चित्तं, नत्वनवस्थाप्यं, पारांचितं वेति ज्ञापितं एतदेव चोपजीव्य प्रागप्येवमस्माभिर्व्याख्यातं; अकृते अकृतकरणे गुराविति संबंधादाचार्ये भवति प्रायश्चित्तं छेदः, सावेक्खोत्ति च काउमित्यादि, अत्र गुरुशब्देनोपाध्यायः प्रोच्यते आचार्यस्योक्तत्वात् गुरोरुपाध्यायस्य कृतयोगिनः कृतकरणस्य मूलं प्रायश्चित्तमापन्नस्यापि सापेक्ष्य इति कृत्वा प्रायश्चित्तं छेदो भवति, तस्यापि कृतकरणस्य मनाक् निरपेक्षतायां मूलमपि प्रायश्चित्तं बिइए मूलं च छेदो छग्गुरुगा इति वचनाद् अकृतकरणे तु तस्मिन्नेवोपाध्याये मूलमापन्नेपि प्रायश्चित्तं षड्गुरुकाः । गुरवः षण्मासाः । अकृतकरणतया छेदप्रायश्चित्तस्याप्यनर्हत्वात् इति एवममुना प्रकारेण अड्ढोक्कंतीए इति एकैकस्मिन्नाचार्यादौ स्थाने कृतकरणभेदतो द्वे द्वे प्रायश्चित्ते तयोश्च द्वयोरेकमाद्यं प्रायश्चित्तमुपक्रामति न तुत्तरस्थानेऽनुवर्त्तते द्वितीयं चोत्तरस्थानेऽनुवर्त्तते एकं च द्वयोरर्द्धमित्यत्रार्द्धापक्रांत्या ज्ञेयं प्रायश्चित्तदानमिदमिति संक्षिप्तमुक्तमिति, विनेयजनानुग्रहाय यंत्रककल्पनया विशेषतो भाव्यते, तत्र यंत्रकविधानमिदं तिर्यक् द्वादशगृहकानि क्रियंते, अधोमुखं च विंशतिगृहाणि एवं च द्वादशगृहात्मिका विंशतिगृहपंक्तयो जाताः ।

तत्र विंशतितमायां पंक्तौ दक्षिणतो ये अंतिये ये द्वे द्वे गृहके ते मुक्त्वा तस्या अधस्तात् दशगृहात्मिका एकविंशतितमा पंक्तिः स्थाप्या, तस्यामप्येकविंशतितमायां पंक्तौ ये द्वे अंतिमे गृहके ते मुक्त्वा अधस्तात् अष्टगृहात्मिका द्वाविंशतितमा पंक्तिः स्थापनीया, तस्यामपि ये द्वे अंतिमे गृहके ते मुक्त्वा तस्या अधस्तात् षड्गृहात्मिका त्रयोविंशतितमा पंक्तिर्न्यसनीया, तस्यामपि ये द्वे अंतिमे गृहके ते विमुच्य तस्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधस्ताच्चतुर्गृहात्मिका चतुर्विंशतितमा पंक्तिः स्थापयितव्या तस्यामपि ये द्वे अंतिमे गृहके ते परित्यज्य तस्या अधस्तात् द्विगृहात्मिका पंचविंशतितमा पंक्तिः स्थाप्या, तस्या अधस्तादेकगृहात्मिका षड्विंशतितमा पंक्तिः, एवं षड्विंशपंक्त्यात्मकस्य यंत्रकस्य सर्वोपरि तस्याः प्रथमपंक्ते रुपरि प्रथमगृहके कृतकरण आचार्यः स्थापनीयः, द्वितीये गृहके अकृतकरणः, तृतीये कृतकरण उपाध्यायः, चतुर्थे स एवाकृतकरणः, पंचमे अधिगतस्थिरभिक्षुः कृतकरणः, दशमे स एवाकृतकरण; सप्तमे अधिगतास्थिरभिक्षुः कृतकरणः, अष्टमे स एवाकृतकरणः, नवमे अनधिगतस्थिरभिक्षुः कृतकरणः, दशमे स एवाकृतकरणः; एकादशे अनधिगतास्थिरभिक्षुः कृतकरणः, द्वादशे अनधिगतोऽस्थिरोऽकृतकरणस्यः, एवं स्थापयित्वा कृतकरणस्याचार्यस्य मूलं तस्मिन्नेवापराधेऽकृतकरणस्य छेदः उपाध्यायस्य मूलमापन्नस्य कृतकरणस्य च्छेदः अकृतकरणस्य षण्मासगुरुस्तत्रैवापराधे भिक्षोरधिगतस्य स्थिरस्य कृतकरणस्य षण्मासगुरुः, अकृतकरणस्य षण्मासलघुः ।

अधिगतस्य भिक्षोरस्थिरस्य कृतकरणस्य षण्मासलघु, अकृतकरणस्य चतुर्मासगुरुः, अनधिगतस्य भिक्षोः स्थिरस्य कृतकरणस्य चतुर्मासगुरु, अकृतकरणस्य चतुर्मासलघु अनधिगतस्य भिक्षोरस्थिरस्य कृतकरणस्य चतुर्मासलघु तस्यैवाकृतकरणस्य मासगुरु ।। एवं प्रथमपंक्तौ मूलादारब्धं मासगुरुके निष्ठितं, द्वितीयपंक्तौ प्रथमे गृहके च्छेदः, द्वितीये षड्गुरु, तृतीयेपि षड्गुरु, चतुर्थे षड्लघु पंचमे षट्लघु षष्ठे चतुर्गुरु सप्तमेऽपि चतुर्गुरु सप्तमेऽपि चतुर्गुरु । अष्टमे चतुर्लघु नवमेपि चतुर्लघु, दशमे मासगुरु एकादशेपि मासगुरु, द्वादशे मासलघु अत्र छेदादारब्धं मासलघुके निष्ठितं ।

तृतीयपंक्तौ प्रथमे गृहके षड्गुरु द्वितीये षड्लघु तृतीयेपि षड्लघु चतुर्थे चतुर्मासगुरु । पंचमेपि चतुर्मासगुरु, षष्ठे चतुर्मासलघु सप्तमे चतुर्मासलघु अष्टमे मासगुरु नवमेपि मासगुरु दशमे मासलघु एकादशेपि मासलघु द्वादशे भिन्नमासगुरु अत्र षड्गुरुकादारब्धं भिन्नमासे गुरौ निष्ठितं चतुर्थपंक्तौ प्रथमे गृहके षड्लघु, द्वितीये चतुर्मासगुरु, तृतीयेपि चतुर्मासगुरु, चतुर्थे चतुर्लघु, पंचमेपि चतुर्लघु, षष्ठे मासगुरु, सप्तमेपि मासगुरु, अष्टमे मासलघु, नवमेपि मासलघु, दशमे भिन्नमासो गुरुएकादशेपि भिन्नमासगुरु, द्वादेश भिन्नमासो लघुः । अत्र षट्लघुकादारब्धं लघुभिन्नमासे निष्टितं, पंचमपंक्तौ प्रथमे गृहे चतुर्मासगुरु, द्वितीये चतुर्लघु, तृतीयेपि चतुर्लघु चतुर्थे मासगुरु पंचमेति मासगुरु, षष्ठे मासलघु सप्तमेपि मासलघु अष्टमे भिन्नमासोगुरुः । नवमेपि भिन्नमासो गुरुर्दशमे भिन्नमासो लघु एकादशेपि भिन्नमासो लघु द्वादशे गुरुविंशति रात्रिदिवं, अत्र चतुर्गुरुकादारब्धं गुरुके विंशतिरात्रिदिवे स्थितं; षष्ठपंक्तौ प्रथमगृहे चतुर्मासलघु द्वितीये मासगुरु, तृतीयेपि मासगुरु, चतुर्थे मासलघु, पंचमेपि मासलघु, षष्ठे गुरुकं पंचविंशतिकं, सप्तमेपि गुरुकं पंचविंशतिकं, अष्टमे लघुपंचविंशतिकं, नवमेपि लघुपंचविंशतिकं दशमे गुरुविंशतिकं एकादशेपि गुरुविंशतिकं द्वादशे लघुविंशतिकं अत्र चतुर्लघुकादारब्धं लघुविंशतिके निवृतं सप्तमपंक्तौ प्रथमग्रहे मासगुरु द्वितीये मासलघु तृतीयेपि मासलघु चतुर्थे गुरुपंचविशतिंकं पंचमे गुरुपंचविंशतिकं षष्टे लघुपंचविंशतिकं सप्तमे लघुपंचविंशतिकं अष्टमे गुरुविंशतिकं नवमे गुरुविंशतिकं दशमे लघुविंशतिकं एकादशेपि लघुविंशतिकं द्वादशे गुरुपंचदशकं।

अत्र मासगुरुकादारब्धं गुरुपंचदशके पर्याप्तं । अष्टमपंक्तौ प्रथमे गृहके मासलघु द्वितीये गुरुपंचविंशतिकं तृतीये गुरुपंचविंशतिकं चतुर्थे, पंचविंशतिकं लघु पंचमे पंचविंशतिकं लघु षष्टे गरुविंशतिकं सप्तमे गुरुविंशतिकं, अष्टमे लघुविंशतिकं नवमे लघुविंशतिकं, । दशमे गुरुपंचदशकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकादशे गुरुपंचदशकं द्वादशे लघुपंचदशकं, अत्र मासलघुकादारब्धं लघुपंचदशके पर्याप्तं, नवमपंक्तौ प्रथमगृहे गुरुपंचविंशतिकं द्वितीये लघुपंचविंशतिकं, तृतीये लघुपंचविंशतिकं चतुर्थे गुरुविंशतिकं पंचमे गुरुविंशतिकं, षष्ठे लघुविंशतिकं सप्तमे लघुविंशतिकं, अष्टमे गुरुपंचदशकं नवमे गुरुपंचदशकं, दशमे लघुपंचदशकमेकादशके लघुपंचदशकं, द्वादशे गुरुदशकं. अत्र गुरुपंचविंशतिकादारभ्य गुरुदशके निष्ठितं, दशमपंक्तौ प्रथमगृहे लघुपंचविंशतिकं, द्वितीये गुरुविंशतिकं तृतीये गुरुविंशतिकं चतुर्थे लघुविंशतिकं, पंचमे लघुविंशतिकं. षष्ठे गुरुपंचदशकं सप्तमे गुरुपंचदशकं, अष्टमे लघुपंचदशकं नवमे लघुपंचदशकं, दशमे गुरुदशकमेकादशे गुरुदशकं, द्वादशे दशकं लघु, । अत्र लघुपंचविंशतिकादारब्धं लघुदशके स्थितं, एकादशपंक्तौ प्रथमे गृहके गुरुविंशतिकं, द्वितीये लघुविंशतिकं तृतीये लघुविंशतिकं, चतुर्थे गुरुपंचदशकं, पंचमे गुरुपंदशकं, षष्ठे लघुपंचदशकं सप्तमे लघुपंचदशकं । अष्टमे गुरुदशकं नवमे गुरुदशकं । दशमे लघुदशकं एकादशमे लघुदशकं द्वादशे गुरुपंचकं, अत्र गुरविंशतिकादारब्धं गुरुपंचके पर्याप्तं, द्वादशपंक्तौ प्रथमे गृहके लघुविंशतिकं, द्वितीये गुरुपंचदशकं, तृतीये गुरुपंचदशकं, चतुर्थे लघुपंचदशकं, पंचमे लघुपंचदशकं षष्ठे गुरुदशकं सप्तमे गुरुदशकं, । अष्टमे लघुदशकं । नवमे लघुदशकं, दशमे गुरुपंचकमेकादशे गुरुपंचकं, द्वादशे लघुपंचकं अत्र लघुविंशतिकादारब्धं लघुपंचके पर्याप्तं,

त्रयोदशपंक्तौ प्रथमे गृहके गुरुपंचदशकं द्वितीये लघुपंचदशकं तृतीये लघुपंचदशकं, चतुर्थे गुरुदशकं पंचमे गुरुदशकं, । षष्ठे लघुदशकं सप्तमे लघुदशकं, अष्टमे गुरुपंचकं नवमे गुरुपंचकं, दशमे लघुपंचकं एकादशे लघुपंचकं, द्वादशे दशमं । अत्र गुरुपंचदशकादारब्धं दशमे निष्ठितं । चतुर्दशपंक्तौ प्रथमगृहके लघुपंचदशकं, द्वितीये गुरुदशकं तृतीये गुरुदशकं, चतुर्थे लघुदशकं । पंचमे लघुदशकं, । षष्ठे गुरुपंचकं सप्तमे गुरुपंचकं, अष्टमे लघुपंचकं नवमे लघुपंचकं, दशमे दशममेकादशे दशमं, द्वादशे अष्टमं अत्र लघुपंचदशकादारब्धमष्टमे निष्ठितं, । पंचदशपंक्तौ प्रथमे गृहके गुरुदशकं, द्वितीये लघुदशकं तृतीये लघुदशकं, चतुर्थे गुरुपंचकं पंचमे गुरुपंचकं, षष्ठे लघुपंचकं सप्तमे लघुपंचकमष्टमे दशमं नवमे दशमं, दशमे अष्टममेकादशे अष्टमं द्वादशे षष्ठं । अत्र गुरुदशकादारब्धं षष्ठे निष्ठितं, षोडशपंक्तौ प्रथमगृहके लघुदशकं द्वितीये गुरुपंचकं तृतीये गुरुपंचकं, चतुर्थे लघुपंचकं पंचमे लघुपंचकं. षष्ठे दशमं सप्तमे दशमं, अष्टमे अष्टमं नवमे अष्टमं, दशमे षष्ठं एकादशे षष्ठं द्वादशे चतुर्थमत्र लघुदशकादारब्धं चतुर्थे निष्ठितं, सप्तदशपंक्तौ प्रथमगृहके गुरुपंचकं द्वितीये लघुपंचकं, । तृतीये लघुपंचकं । चतुर्थे दशमं पंचमे दशमं, षष्ठे अष्टमं सप्तमे अष्टमं, अष्टमे षष्ठं, दशमे चतुर्थमेकादशे चतुर्थं द्वादशे आचामाम्लमिति ।

अत्र गुरुपंचकादारब्धमाचामाम्ले निष्ठितमष्टादशपंक्तौ प्रथमगृहके लघुपंचकं द्वितीये दशमं, तृतीये दशमं चतुर्थेऽष्टमं पंचमे अष्टमं, षष्ठे षष्ठं सप्तमे षष्ठं, अष्टमे चतुर्थं नवमे चतुर्थं दशमे आचामाम्लं, एकादशे आचामाम्लं द्वादशे एकाशनकमत्र लघुपंचकादारब्धमेकाशने निष्ठितमेकोनविंशतितमायां पंक्तौ प्रथमगृहके दशमं द्वितीये अष्टमं तृतीये अष्टमं चतुर्थे षष्ठं पंचमे षष्ठं षष्ठे चतुर्थं सप्तमे चतुर्थं अष्टमे आचामाम्लं नवमे आचामाम्लं दशमे एकाशनकं एकादशे एकाशनकं द्वादशे पूर्वार्धं अत्र दशमादारब्धं पूर्वार्धे स्थितं, विंशतितमायां पंक्तौ प्रथमग्रहके अष्टमं द्वितीये षष्ठं तृतीये षष्ठं चतुर्थे चतुर्थं पंचमे चतुर्थं षष्ठे आचामाम्लं सप्तमे आचामाम्लं अष्टमे एकाशनकं नवमे एकाशनकं दशमे पूर्वार्धमेकादशे पूर्वार्धं द्वादशे निर्विकृतिकमत्राष्टमादारब्धं निर्विकृतिके निष्टित मेकविंशतितमायां पंक्तौ प्रथमे गृहके षष्ठं, द्वितीये चतुर्थं । तृतीये चतुर्थं चतुर्थे आयामाम्लं, पंचमे आयामाम्लं, षष्ठे एकाशनं सप्तमे एकाशने अष्टमे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वार्द्धं, नवमे पूर्वार्द्धं दशमे निर्विकृतिकं, अत्र षष्ठादारब्धं निर्विकृतिकं निष्ठितं द्वाविंशतितमायां पंक्तौ प्रथमे गृहके चतुर्थं द्वितीये आचाम्लं चतुर्थे एकाशनं पंचमे एकाशनं षष्ठे पूर्वार्द्धं सप्तमे पूर्वार्द्धं अष्टमे निर्विकृतिकमत्र चतुर्थादारब्धं निर्विकृतिके निष्ठितं, त्रयोविंशतितमायां पंक्तौ प्रथमे गृहके आचामाम्लं द्वितीये एकाशनकं । तृतीये एकाशनकं । चतुर्थे पूर्वार्द्धं पंचमे पूर्वार्द्धं, षष्ठे निर्विकृतिकं, चतुर्विंशतितमपंक्तौ प्रथमे गृहके एकाशनकं द्वितीये पूर्वार्द्धं तृतीये पूर्वार्द्धं । चतुर्थे निर्विकृतिकं, पंचविंशतितमंपक्तौ प्रथमे गृहके पूर्वार्द्धं द्वितीये निर्विकृतिकं षड्विंशतितमायां पंक्तौ निर्विकृतिकमिति, तदेवं कयकरणा इयरे वा इत्यादिना ये पुरुषभेदाः प्रागुक्तास्तेषां प्रायश्चित्तदानविधिरुक्तः । संप्रति जं सेवेइ अहिगतो इत्यादि यत् गाथोत्तरार्द्धमुक्तं, तद्व्याख्यानार्थमाह, -

[भा. १६८] अकयकरणाउ गीया जे य अगीया य अकयअथिरा य ।
ते सावत्तिअनंतरबहुयं तरियं व झोसो वा ।

वृ- ये गीता गीतार्था अधिगता इत्यर्थः, अकृतकरणाः ये च अगीता अगीतार्था अनधिगता इति भावः, अकयत्ति अकृतकरणाश्च, चशब्दात् अकृतकरणाश्च । अस्थिराश्च कृतकरणा अकृतकरणाश्च तेषां कदाचित् आपत्तिप्रायश्चित्तं दीयते, यत् यत् प्रायश्चित्तं आपन्नं तदेव दीयते इति, यावत् कदाचित् तथाविधायामसमर्थतायां यत्प्रायश्चित्तमापन्नं, तस्यार्वाक्तनमनंतरं दीयते, कदाचित्प्रभूतायामसमर्थतायां बह्वंतरित बहुभिः प्रायश्चित्तैरन्तरितमर्वाक्तनं दीयते इति यावत् अत्यंतासमर्थतायां झोसो वा सर्वस्य प्रायश्चित्तस्य परित्यागः आलोचनमात्रेणैवतस्यामवस्थायां तस्य शुद्धिभावात् ।, यथा कृतकरणस्योपाध्यायस्य मूलमापन्नस्य तथाविधयोग्यतायां मूलं दीयते, अकृतकरणस्य पुनरसमर्थ इति कृत्वा छेदस्तथाप्यसमर्थतायां षट्गुरु तत्राप्यशक्तौ षट्लघु एवं तावत् नेयं यावन् निर्विकृतिकं तत्राप्यशक्तौ पौरुषी तत्राप्यसमर्थतायां नमस्कारसहितं तस्यापि गाढग्लानत्वभावतोऽसंभवे एवमेवालोचनामात्रतः शुद्धिरिति । तदेव कयकरणा इयरे वा इत्यादिगाथाद्वयसकलमपि भावितमधुना सावेक्खा आयरीयमादीति यदुक्तं तत्र परस्याक्षेपमाह -

[भा. १६९] आयरियादी तिविहो सावेक्खाणंतु किं कतो भेदो ।
एएसिं पच्छित्तं दानंचऽन्नं अतो तिविहो ।।

वृ- नन्वाचार्योपाध्याययोरपि भिक्षुत्वस्यावस्थितत्वात् तद्ग्रहणे तयोरपि ग्रहणमिति किं किमर्थं सापेक्षाणां त्रिविध आचार्यादिकः आचार्योपाध्यायभिक्षुलक्षणः कृतो भेदः ? एवमुक्ते सूरिराह एएसिणमित्यादि । एतेषामाचार्यादीनां यत् आभवति प्रायश्चित्तं यश्च तस्य प्रायश्चित्तस्य समर्थासमर्थपुरुषाद्यपेक्ष्य दानं, तत् पृथक पृथक् अन्यत् अतः सापेक्षाणामाचार्यादिकस्त्रिविधो भेदः कृतः, एतदेव सविशेषमाह -

[भा. १७०] कारणमकारणं वा जयणा अजयणा व नत्थि अगीयत्थे ।
एएण कारणेणं आयरियाई भवे तिविहा ।।

वृ- इदं कारणं प्रतिसेवनाया इदमकारणं वा, तथा इयं यतना इयमयतना इत्येतन्नास्ति अगीतार्थे, गीतार्थस्य तु, अर्थात्गीतार्थस्यास्तीति प्रतीयते, तत्राचार्योपाध्यायौ गीतार्थौ, भिक्षुः गीतार्थोऽगीतार्थश्च, गीतार्थस्य अगीतार्थस्य च कारणे यतनया कारणे अयतनया अकारणे यतनया अकारणे अयतनया पृथक् प्रथक् अन्यत् प्रायश्चित्तं, सहासहपुरुषाद्यपेक्षातुल्येपि प्रायश्चित्ते आपद्यमाने पृथगन्योऽन्यो दानविधिरत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेन कारणेनाचार्यादयस्त्रिविधा भवंति, सूत्रे भवे इति बहुत्वेप्यकवचनं प्राकृतत्वात् प्राकृते हि वचनव्यत्ययोपि क्वचिद् भवति इति, एनामेव गाथां व्याख्यानयति ।।

[भा.१७१] कज्जाकज्जजयाजय अविजाणंतो अगीतो जं सेवे ।
सो होइ तस्स दप्पो गीये दप्पो जह दोसा ।।

वृ- कार्यं नाम प्रयोजनं, यच्च प्रयोजनं तच्च अधिकृतप्रवृत् कारणं, अत एवान्यत्रोक्तं कारणंति वा कज्जंति वा एगट्ठं, ततोयमर्थः अगीतोऽगीतार्थः कारणं न जानाति, यस्मिन्प्राप्ते प्रतिसेवना क्रियते । अकारणं न जानाति यस्मिन् प्रतिसेवना न क्रियते, तथा कारणे अकारणे वा प्राप्ते सेवनं कुर्वन् यतनामयतनां वा न जानाति, एतान्यजानानो यः सेवते प्रतिसेवते, तस्य दर्प्पो भवति । सा तस्य दर्प्पिका प्रतिसेवना भवतीति भावः, गीतार्थः पुनः सर्वाण्यप्येतानि जानाति ततः कारणे प्रतिसेवते, ना कारणेपि यतनया न पुनरयतनया ततः शुद्ध एव न प्रायश्चित्तविषयोऽगीतार्थस्य त्वज्ञानतया दर्प्पेण प्रतिसेवमानस्य प्रायश्चित्तं यदि पुनः गीतार्थोपि दर्प्पेण प्रतिसेवते, कारणेप्ययतनया च तदा तुल्यामगीतार्थेन समं तस्य प्रायश्चित्तं । तथाचाह गीए दप्पा जए दोसा, गीते गीतार्थे दर्प्पेण प्रवर्तमाने प्रतिसेवनायामिति गम्यते कारणेपि प्रतिसेवनाया अयतमाने अगीतार्थेन तुल्यं तस्य प्रायश्चित्तमिति भावः, प्रतिसेव्यमाने तुल्ये वस्तुनि दर्प्पेणापि क्रियमाणायां प्रति सेवनायां यतनया प्रवृत्तौ न तुल्यं प्रायश्चित्तं, कारणे पुनर्यतनया प्रवर्त्तमानः शुद्ध एव न प्रायश्चित्तविषयः । तत्राचार्या उपाध्यायश्च नियमात् गीतार्था इति गीतार्थत्वापेक्षया समाः केवलं प्रतिसेव्यमानं वस्तुप्रतीत्य विषमाः भिक्षवो गीतार्थाऽगीतार्थाश्च भवंति प्रतिसेव्यमपि वस्त्वधिकृत्य भेद इति, वस्तुभेदतो गीतार्थत्वागीतार्थत्वतश्च पृथक् विभिन्नं विभिन्नं प्रायश्चित्तं, सहासहपुरुषाद्यपेक्षया तु तुल्येप्याभवति प्रायश्चित्ते पृथक् विभिन्नं विभिन्नं प्रायश्चित्तदानं तथाचाह -

[भा.१७२] दोसविहवानुरुवो लोए दंडोवि किमुत उत्तरिए ।
तित्थुच्छेदो इहरा निरानुकंपा नय विसोही ।।

वृ- दंडोवीत्यपिशब्दो भिन्नक्रमत्वात् लोकेपीत्येवं द्रष्टव्यः लोकेपि दंडो दोषानुरुपो विभवानुरुपश्च, तथाहि महत्यपराधे महान् दंडोऽल्पेऽल्पीयान् तथा समानेऽपि दोषेऽल्पधनस्याल्पो महाधनस्य महान् लोकेपि तावदेवं किमुत किंपुनरौत्तरिके लोकोत्तरसंबंधिनि व्यवहारे, तत्र सुतरां दोषसामर्थ्यानुरुपो दंडस्तस्य सकलजगदनुकंपायाः प्रधानत्वात् यदि पुनरल्पेपि दोषे महान् दंडो महत्यप्यल्पीयान् तथा यदि समानेप्यपराधे कृतकरणत्वमकृतकरणत्वं वाचार्योपाध्याययोर्भिक्षोरपि कृतकरणत्वमकृतकरणत्वमधि-गतत्वं स्थिरत्वमस्थिरत्वं चानपेक्ष्य न तदनुरुपो दंडः स्यात् किंतु तुल्य एव, तदा व्यवस्थाया अभावतः संतानप्रवृत्यसंभवे तीर्थोच्छेदः स्यात्, तथा निरनुकंपा अनुकंपाया अभावः । प्रायश्चित्तदायकस्य असमर्थभिक्षुप्रभृतीनामनुग्रहात् न च तस्य प्रायश्चित्तदायकस्य विशोधिरप्रायश्चित्तस्य प्रायश्चित्तेप्यति-मात्रप्रायश्चित्तस्य दानतो महाऽशातनासंभवात् अप्पच्छित्ते व देइ पच्छित्तं पच्छित्ते आसायणा तस्स महतीउ, इति वचनात् ततः सापेक्षा आचार्यादयस्त्रिविधा उक्ताः अत्रैव प्रकारांतरमाह ।

[भा.१७३] अहवा कज्जा कज्जे जयाजयं ते य कोविदो गीयो; ।
दप्पाजातोनिसेवे, अनुरुवं पावए दोसं ।।

वृ- अथवेति प्रकारांतरेगीतार्थः सकारणमपिजानाति । अकारणमपि जानाति, यतनामपि जानाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयतनामपि जानाति एवं कार्याकार्ये यतावते कोविदो गीतार्थो यदि दर्प्पेण प्रतिसेवते । कारणेप्ययतनया तदा स दर्प्पायतनातो निषेवमाणोऽनुरुपं दर्पानुरुपमयतनारुपं दोषं प्रायश्चित्तं प्राप्नोति, दर्प्पाऽयतनानिष्पन्नं तस्मै प्रायश्चित्तं दीयते इति भावः ।

[भा. १७४] कप्पेय अकप्पम्मिय, जो पुन अविनिच्छितो अकज्जंपि ।
कज्जमिति सेवमाणो अदोसवंतो असढभावो ।।

वृ- यः पुनः कल्पेऽकल्पे च अविनिश्चितः किंकल्प्यं किमकल्प्यमिति विनिश्चियरहितः सोऽकार्यमपि अकरणीयमपि अकल्प्यमिति भावः कार्यमिति कल्पिकमिति बुध्या सेवमानोऽशठभावः अत्र हेतौ प्रथमाऽशठभावत्वाददोषवान् प्रायश्चित्तभाग् भवतीति भावः ।

[भा. १७५] जं वा दोसमयाणंतो हेहंभूतो निसेवई ।
निद्दोसवं केण हुज्जा, वियाणंतो तमायारं ।।

वृ- हेहंभूतो नाम गुणदोषपरिज्ञानविकलोऽशठभावः स यं दोषमजानानो निषेवते प्रतिसेवते तमेव दोषं विजानानः कोविदो गीतार्थः आचरन् समाचरन् केन हेतुना निर्दोषवान् ? दोषस्याभावो निर्दोषं तदस्यास्तीति निर्दोषवान् दोषाभाववान् न भवेत् नैव भवतीत भावः । तीव्रदुष्टाध्यव्यवसायभावात् । न खलु जानानस्तव्रिदुष्टाध्यवसायमंतरेण तथा प्रवर्त्तते इति तदेवं दृष्टांतमभिधायाधुना दार्ष्टांतिकयोजनामाह -

[भा. १७६] एमेवय तुल्लंमिवि अवराहपयंमि वट्टिया दोवि ।
तत्थवि जहानुरुवं दलंति दंडं दुवेणहंपि ।।

वृ- एवमेव अनेनैव प्रकारेण अनेनैव दृष्टांतेनेति भावः द्वावपि जनौ आस्तामेक इत्यपि शब्दार्थः । तुल्येपि समानेप्यपराधपदे वर्त्तितौ तत्रापि तुल्येप्यपराधपदे द्वयोरपि तयोर्यथानुरुपं गीतार्था-गीतार्थयतनासंहननविशेषानुरुपं दंडं दलयंति प्रयच्छन्ति, तस्मात् प्रायश्चित्तभेदतः प्रायश्चित्त-दानभेदतश्चाचार्यादिकस्त्रिविधो भेदः कृतः, तदेवमाचार्यादित्रिविधभेदसमर्थनायोक्तरुपदृष्टांतवशतो गीतार्थागीतार्थादिभेदतः आभवत् प्रायश्चित्तनानात्वं चोपदर्शितमिदानीमत एव दृष्टांतादवस्थाभेदतो गीतार्थे एव केवले शोधिनानात्वमुपदर्शयति ।

[भा. १७८] एसेवय दिट्ठंतो तिविहे गीयंमि विसोहिनाणत्तं ।
वत्थुसरिसो उ दंडो दिज्जइ लोएवि पुव्वुत्तं ।।

वृ- गीते गीतार्थे त्रिविधे त्रिप्रकारे बालतरुणवृद्धलक्षणे यत् शोधिनानात्वं तद्विषये एष एवानंतरोदितस्वरुपो दृष्टांतस्तथाहि यथाकल्प्यविधिपरिज्ञानविकलोऽकल्पनीयमपि कल्पनीयमिति बुद्ध्या प्रतिसेवमानो न दोषवान् भवति । कोविदस्तु कल्प्याकल्प्ये जानानोऽकल्पनीयं प्रतिसेवमानो दोषवान् एवमिहापि तुल्ये प्रतिसेव्यमाने वस्तुनि तरुणे प्रभूतं प्रायश्चित्तं समर्थत्वात् । बालवृद्धयोः स्तोकमसमर्थत्वात् न चैतदन्याय्यं, यतो लोकेपि वस्तुसदृशः पुरुषानुरुपो दंडो दीयते, तथाहि बाले वृद्धे च महत्यप्यपराधे करुणास्पदत्वात् स्तोको दंडः तरुणे महान्, एतच्च पुव्वुत्तमिति प्रागेवोक्तं दोसविहवानुरुवो इत्यादिना ततो न्याय्यमनंतरोदितमिति, संप्रत्याचार्योपाध्यायभिक्षूणामेव चिकित्साविषये विधिनानात्वं दर्शयति -

[भा. १७८] तिविहे तेगिच्छंमि उज्जुय वाउलणसाहुणा चेव ।

पन्नवणमनिच्छंते, दिट्ठंतो भंडिपोएहिं ।।

वृ- त्रिविधे त्रिप्रकारे आचार्योपाध्यायभिक्षुलक्षणे चिकित्स्यमाने गीतार्थे इति गम्यते, उज्जुयत्ति ऋजुकं स्फुटमेव व्यापृत साधुना व्यापृतक्रियाकथनं कर्त्तव्यं इयमत्र भावना आचार्याणामुपाध्यायानां गीतार्थानां च भिक्षूणां विचिकित्स्यमानानां यदि शुद्धं प्रासुकमेषणीयं लभ्यते, तदा समीचीनमेवं न तत्र विचारः अथ प्रासुकमेषणीयं न लभ्यते, अवश्यं च चिकित्सा कर्त्तव्या, तदा ऽशुद्धमप्यानीय दीयते, तथाभूते च दीयमाने स्फुटमेव निवेद्यते, इदमेवंभूतमिति, तेषां गीतार्थत्वेनापरिणामदोषस्याति-पारिणामदोषस्य चासंभवात् । अगीतार्थभिक्षोः पुनः शुद्धालाभे चिकित्सामशुद्धेन कुर्वंतो मुनिवृषभा यतनया कुर्व्वंति, न चाशुद्धं कथयंति । यदि पुनः कथयंत्ययतनया कुर्वंति, तदा सोऽपरिणामत्वादनिच्छन् यत् आगाढादि परितापनममनुभवति । तन्निमित्तं प्रायश्चित्तमापद्यते तेषां मुनिवृषभाणां यद्वाति-परिणामतया सोतिप्रसंगं कुर्यात्, तस्मान्न कथनीयं नाप्ययतना कर्त्तव्या, अथ कथमपि तेनागीतार्थेन भिक्षुणा ज्ञातं भवेत् यथा अकल्पिकमानीय मह्यं दीयते इति, तदा तदनिच्छन् प्रज्ञाप्यते तथाचाह पन्नवणमणिच्छंते इति अकल्पिकमनिच्छत्यगीतार्थे भिक्षौ प्रज्ञापना कर्त्तव्या । यथा ग्लानार्थं यदकल्पिकमपि यतनया सेव्यते, तत्र शुद्धो ग्लानो, यतनया प्रवृत्तेरल्पीयान् दोषोऽशुद्धग्रहणात् सोपि च पश्चात्प्रायश्चित्तेन शोधयिष्यते न चासावल्पीयान् दोषो नांगीकर्त्तव्यः । उत्तरकालं प्रभूतसंयमलाभात् । तथाहि चिकित्साकरणतः प्रगुणीभूतः सन्परिपालयिष्यति चिरकालं संयमं, संयमप्रभावतश्च कदाचित् गम्यते तद्भव एव मोक्षो, यदि पुनश्चिकित्सां न कारयिष्यसि । ततस्तदकरणतो मृतः सन्नसंयतो भविष्यसि, असंयतस्य च भूयान् कर्म्मबंधस्तस्मादल्पेन बह्वन्वेष्यतामेताद्विद्वत्ताया लक्षणं, उक्तं च, अप्पेण बहुमेसेज्जा एयं पंडियलक्खणमिति, एवं प्रज्ञापना तरुणे क्रियते, यः पुनः बालः स बालत्वात् यथा भणितं करोत्येव यस्तु वृद्धस्तरुणो वातिरोगग्रस्तोऽचिकित्सनीयः स प्रोत्साह्यते महानुभाव ! कुरु भक्तप्रत्याख्यानं, साधय ! पूर्वमहर्षिसेवितमार्थमेतज्जिनवचनाधिगमफलमिति, यदि पुनरेवमुत्साह्य-मानोपि न भक्तप्रत्याख्यानं कर्त्तुमिच्छति, तदा भंडीपोताभ्यां दृष्टांतः करणीयः, भंडीगंत्री, पोतः प्रवहणं, दृष्टांतकरणं चाग्रे स्वयमेव दर्शयिष्यति । एष गाथासमासार्थः सांप्रतमेनामेव गाथां विवृणोति ।।

[भा.१७९] सुद्धालाभे अगीते अजयणकरणकहणे भवे गुरुगा ।
कुज्जा व अति पसंगं, असेवमानेव असमाही ।।

वृ- अगीते अगीतार्थे भिक्षौ शुद्धालाभे प्रासुकैषणीयालाभे अशुद्धेन चिकित्स्यमाने यदि अयतना क्रियते कथ्यते वा, तदा मुनिवृषभाणामयतनाकारिणां कथयतां प्रायश्चित्तं भवति, गुरुकाश्चत्वारो मासा गुरवः, इयमत्र भावना यदि अयतनाकरणतोऽकरणतो वा ज्ञातं भवति । यथा ममाशुद्धेन चिकित्सा क्रियते तदा तेषां मुनिवृषभाणां चत्वारो गुरुकाः एतच्चासामाचारीप्रवृत्तिनिषेधार्थं प्रायश्चित्तं, या पुनरनिच्छतोऽसमाधिप्रवृत्तेरनागाढादिपरितापना तन्निष्पन्नमन्यदेव पृथगिति, यदिवा सोतिपरिणाम-कत्वादतिप्रसंगं कुर्यात् । अथवा चिकित्सायाः प्रतिषेधतोऽकल्पनीयमसेवमाने रोगवृद्धिवशापद-समाधिस्तस्य स्यात् असमाहितस्य च कुगतिप्रपातस्तस्मात् तस्मिन् यतनया कर्त्तव्यं, न च कथनीयमिति, सांप्रतं यदुक्तं भंडीपोताभ्यां दृष्टांतः कर्त्तव्य इति । तत्र भंडीदृष्टांतं भावयति ।

[भा.१८०] जा एगदेसे अदढाउ भंडी, सीलप्पए साउ करेइ कज्जं ।
जा दुब्बला संठवियाविसंती न तंतुसीलंति विसन्न दारुं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- या भंडी गंत्री एकदेशे क्वचित् अदढा सा शीलाप्यते तस्याः परिशीलनं कार्यते तुशब्दो यस्मादर्थे यतः सा तथाशीलिता सती करोति कार्य, या पुनः संस्थापिता सती दुर्बला न कार्यकरणक्षमा तां विषन्नदारुं नैव तुशब्द एवकारार्थो भिन्नक्रमत्वादत्र संबध्यते, शीलयंति, कार्यकरणाक्षमत्वात् एष भंडीदृष्टांत एतदनुसारेण पोतदृष्टांतोपि भावनीयः । तद्यथा -

[भा.१८१]　　जो एगदेसे अदढा उ पोतो, सीलप्पए सोउ करेइ कज्जं ।
　　जो दुब्बलो संठवितोवि संतो न तंतुसीलंति विसन्नदारुं ।।

वृ- दार्ष्टांतिकयोजना त्वेवं, यदि प्रभूतमायुः संभाव्यते, प्रगुणीकृतश्च देहः संयमव्यापारेषु समर्थ इति ज्ञायते, तदा चिरकालं संयमपरिपालनाय युक्ता चिकित्सा, अल्पेन प्रभूतमन्वेषयेदिति वचनात्, यदा चायुः संदिग्धं न प्रगुणीकृतोपि देहः संयमव्यापारक्षमस्तदैवं प्रज्ञापनानिष्फला चिकित्सेति न चिकित्सा कारयितुमुचितोति अन्यच्च -

[भा.१८२]　　संदेहियमारोग्गं, पउणोवि न पच्चलोनुजोगाणं ।
　　इइ सेवंतो दप्पे वट्टइ नय सो तहा कज्जो ।।

वृ- संदिग्धमारोग्यप्रतिरोगग्रस्तत्वात् न च प्रगुणोपि प्रगुणीकृतोपि योगानां संयमव्यापाराणां करणे प्रत्यलः समर्थ इति जानानो यदि यतनयाप्यकल्प्यं प्रतिसेवते, तदा स दर्प्पे वर्त्तते, न च स तथारुपो सेवनाया दीर्घसंसारमूलत्वात् इति प्रज्ञाप्यते यदि पुनरेवमपि प्रज्ञाप्यमानो नावबुध्यते, तदा यतनया रुपेक्षितव्यं; यः पुनस्तरुणो मनाक् वृद्धो वा प्रगुणीकृतः सन् तपःसंयमादिषु प्रत्यलो भवितेति ज्ञायते, तदा तं चिकित्सामप्रतिपद्यमानं प्रत्येवं प्रज्ञापना ।।

[भा.१८३]　　कोहं अछित्तिं अदुवाअहीहं तवोविहाणसुयउज्जमिज्जं ।।
　　गणं वनीइएयसारविस्सं सालंबसेवी समुवेइ मोक्खं ।।

वृ- यो ग्लानः सन्नेवमवबुध्यते, समर्थो भूतः सन्नछित्तिं प्रभूतलोकप्रव्राजनादिना तीर्थाव्यवच्छेदं करिष्यामि । अदुविति अथवा अहमध्येष्ये सूत्रतोऽर्थतश्च द्वादशांगं दर्शनप्रभावकाणि वा शास्त्राणि । यदिवा तपो लब्धिसमन्वितत्वात्तपोविधानेषु नानाप्रकारेषु उज्जमिस्सामि उद्यमिष्यामि उद्यमं करिष्यामि, गणं वा गच्छं वा नीत्या सूत्रोक्तया सारयिष्यामि गुणैः प्रवृद्धं करिष्यामि स एवं सालंबसेवी एतैरनंतरोदितैरालंबनैर्यतनया चिकित्सार्थमकल्पमपि प्रतिसेवमानः समुपैति प्राप्नोति मोक्षं सिद्धिमिति।

व्यवहार सूत्रस्य पीठिका समाप्ता

मुनि दीपरत्नसागरेण संशोधिता सम्पादिताव्यवहारसूत्रस्य पीठिकायाः
[सनिर्युक्तिः] भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः १

वृ- गतो नाम निष्पन्नो निक्षेपः; संप्रति सूत्रालापक निष्पन्नस्य निक्षेपस्यावसरः, सच सूत्रेसति भवति, सूत्रं चानुगमे, सचानुगमोद्विधा सूत्रानुगमो निर्युक्त्य नुगमश्च, तत्र निर्युक्त्य नुगमस्त्रिविधस्तद्यथा निक्षेप निर्युक्त्यनुगमः उपोद्घात निर्युक्त्यनुगमः सूत्र स्पर्शिक निर्युक्त्यनुगमश्च, निक्षेप निर्युक्त्य नुगमोऽनुगतः; सूत्र स्पर्शिक निर्युक्त्य नुगमो वक्ष्यते, उपोद्घात निर्युक्त्य नुगम स्त्वाभ्यां द्वार गाथाभ्यां समवगंतव्यः, तद्यथा-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

उद्देसे निद्देसे य निग्गमे खित्तकालपुरिसे य ।
कारणपच्चयलक्खण नए समोयारनुमए ।।
किं कइविहं कस्स कहिं केसु कहिं केच्चिरं हवइ कालं ।
कइसंतरमविरहियं भवागरिसफासणनिरुत्ती ।।

वृ- अनयोरर्थः आवश्यक टीका तोऽवसेयः, महार्थत्वात्; सूत्रस्पर्शिक निर्युक्त्य नुगमस्तु सूत्रप्रवृत्तौ भवति, सूत्रं सूत्रानुगमे सचारवसरप्राप्त एव युगपच्च सूत्रादयो व्रजंति । तथा चोक्तं -

सुत्तंसुत्तानुगमो सुत्तालावगततोनिक्खेवो ।
सुत्तफासिय निज्जुत्ति नयाय समगंतु वच्चंति ।।

विषय विभागः पुनरयममीषामवसातव्यः -

होइ कयत्थो वोत्तुं सपयच्छेयं भवे सुयानुगमो
सुत्तालावगनासो । नामदिन्नासविनिओगं ।।

सुत्त फासिय निज्जुत्तिनियोगोसेसएपयत्थादी । पायंसोच्चियनेगमनयादिनयगोयरोहोइ ।। अत्राक्षेपपरिहारौसामायिकाध्ययने निरुपिताविति, नेहवितायेते, सूत्रानुगमेचाऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयं तच्चेदं सूत्रं -

(मू. १) *जे भिक्खू मासियं परिहारठाणं पडिसेवित्ता आलोएज्जा अपलिउंचियं आलोएमाणस्स मासियं, पलिउंचियं आलोएमाणस्सदोमासियं ॥*

वृ- अस्य व्याख्या । तल्लक्षणंचेदं संहिताचपदंचैव पदार्थः पदविग्रहः, चालनाप्रत्यवस्थानं व्याख्यासूत्रस्यषड्विधा । तत्रास्खलितपादोच्चारणंसंहिता साचैवंजेभिक्खूमासियमित्यादिपाठः । अधुनापदानि-यःभिक्षुर्मासिकंपरिहारस्थानंप्रतिसेव्यआलोचयेत् । अपरिकुंच्यआलोचयमानस्यमासिकं परिकुंच्य आलोचयमानस्यद्वैमासिकमितिअधुना पदार्थः ।। अस्मिन्प्रस्तावे यत्पीठिकायामुक्तं "सुत्तत्थो" इतिद्वारम् तदापतितम् य इति सर्वनाम अनिर्दिष्टनाम्नानिर्देशे, भिक्षियाञ्चायां । यमनियमव्यवस्थितः कृतकारित्यानुमोदितपरिहारेण भिक्षतेइत्येवंशीलोभिक्षुःसन् भिक्षासंरोरुरितिउ-प्रत्ययः । यदिवानेरुक्तोशब्दव्युत्पत्तिः क्षुधबुभुक्षायां अध्यत्तिबुभुक्षतेभोक्तुमिच्छति, चतुर्गतिकमपि-संसारस्मादितिसंपदादित्वात्क्षुत्अष्टप्रकारंकर्म्मतंज्ञानदर्शन चारित्र तपोभिर्भिनत्तीतिभिक्षुः पृषोदरादय इतीष्टरुपनिष्पत्तिः । मासेन निर्वृत्तं मासिकं, द्यत्र्तिष्ठांति जंतवःकर्म्मकलुषिताअस्मिन्निितिस्थानं करणाधारे इत्यनट्परिहारःस्थानंपरिहारस्थानंविशेषणसमासः पडिसेवित्तोत्ति प्रतिशब्दोभृशार्थेप्रकर्षेवा सेवित्वा प्रतिसेव्यगतिक्वन्यस्तत्पुरुष इतिसमासः अनञवत् क्त्वोयवादेशः सूत्रेयबभावः प्राकृतत्वात् । आलोचयेत्लोचृदर्शने चुरादित्वात्णिच आङ्मर्यादायांआमर्यादया जहबालो जंपंतोइत्यादिरुपयालोचयेत्-यथात्मनस्तथागुरोः प्रकटीकुर्यात् यच्छब्दस्तच्छब्दापेक्षोऽतोऽत्रतस्येतिसामर्थ्यादवसीयते, तस्य अपलिउंचियत्ति कुचु कुंचु कौटिल्याअल्पाल्पीभावयोः परिसर्वतोभावेपरिसमंतात कुंचित्वा-कौटिल्यमाचर्यपरिकुंच्यसूत्रेडश्चक्रपीडादीनामिति विकल्पवचनतोरेफस्यलकारभावः न परिकुंच्य-अपरिकुंच्य आलोचयमानस्यमासिकंलघुकं गुरुकंवा, प्रतिसेवनानुसारतः प्रायश्चित्तंदद्यादितिशेषः, परिकुंच्यकौटिल्यमाचर्य आलोचयमानस्यद्वैमासिकंदद्यात्मायाकरणतोऽधिकस्यगुरुमासस्यभावात् तथाहि यः प्रतिकुंचयन्नालोचयतितस्ययदापन्नंदयितेऽन्यश्चमायाप्रत्ययोगुरुकोमासः इति उक्तःपदार्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुनापदविग्रहः, सचसमासभाक्षु पदेषुभवतीति, परिहारस्थानमित्यत्रपरिकुंच्यत्यत्र च द्रष्टव्यः । स च यथाभवति तथादर्शित एव संप्रति चालनावसरस्तत्रचादेकआह यदिपरिहारएवस्थानं, ततोद्वयोरप्येकार्थत्वात् परिहारशब्दस्यैवग्रहणमुचितं, परमस्योक्तार्थत्वादप्रयोगः । उक्तार्थानामप्रयोगः। इति न्यायात् अत्राचार्यः प्रत्यवस्थानं करोति, स्थानशब्दोनामशब्दशक्तिस्वाभाव्यादनेकविशेषाधार-सामान्याभिधायी, तेनएतत् ध्वनयति । अनेकप्रकाराणिनाममासिकप्रायश्चित्तानि, अनेकप्रकारेण च मासिकेन प्रायश्चित्तेनोपन्यस्तेन प्रयोजनं, कल्पाध्ययनोक्तसकलमासिकप्रायश्चित्तविषयदानालोचन-योरभिधातुमुपक्रमात् । अतोअत्रस्थानग्रहणंपुनरप्याह, किंकारणंमासिकप्रायश्चित्तमधिकृत्यादिसूत्रो-पनिबंधः कृतः, अथमतंजधन्यमिदंप्रायश्चित्तमत एतदधिकृत्यकृतोजधन्यमध्यमोत्कृष्टेषुप्रथमतो-जधन्यस्याभिधातुमुचितत्वात् तदसम्यक्, रात्रिंदिवपंचकस्यजधन्यत्वात् । अत्रभाष्यकृत्प्रत्यवस्था-नार्थमिदमाह -

[भा. १८४] दुहतोभिन्न पलंबे, मासियसोहिउ वणिआ कप्पे ।
तस्सपुनइमं दानंभणियंआलोयणविहीय ।।

वृ- कल्पाध्ययनेआदिसूत्रेआमेताल पलंबे इत्यादिरुपेप्रलंबते । प्रकर्षेण वृद्धिंयातिवृक्षोऽस्मा-दितिप्रलंबंमूलं । अकर्त्तरीतिधञ प्रत्ययः तस्मिन्उपलक्षणमेतत् तलोवृक्षस्तत्रभवंतालं तालवृक्षफलं तस्मिन्नपिचद्विधातोभिन्ने द्रव्यतोपि भावतोपि भिन्ने, मासकीशोधिरुपवर्णिता मासिकं प्रायश्चित्तमुपवर्णितमितिभावः । अथ चा स्मिनव्यवहाराध्ययनोक्तस्यप्रायश्चित्तस्यदानविधिरालोचना-विधिश्चवक्तुमुपक्रांतस्ततोयदादौकल्पाध्ययने मासिकं प्रायश्चित्तमुक्तं, तस्सपुन इत्यादि पुनः शब्दोविशेषणे स चेमं विशेषं द्योतयति तत्रहि सामान्यतएव मासिकं प्रायश्चित्तमुक्तंनदानविधिरा-लोचना-विधिर्वेति, इहपुनर्व्यवहारेनस्य मासिकस्यप्रायश्चित्तस्येदंदानं भणितमालोचनाविधिश्च, न केवल-मस्यैवमासिकस्य प्रायश्चित्तस्य, किंत्वन्येषामपिमासिकप्रायश्चित्तानां तत्रोक्तानां सामान्ये नसूत्रस्य-प्रवृत्तत्वात् तथा चाह -

[भा. १८५] एमेवसेसएसुवि सुत्तेसुकप्पेनामअज्झयणे
जहिं मासिय आवत्ती । तीसेदानं इहं भणियं ।।

वृ- एवमेव अनेनैव प्रकारेण कल्पनाम्नि अध्ययने यानि शेषाणि सूत्राणि सपरिक्खेवे अबाहिरिए कप्पइहेमंतगिम्हासु मासं वत्थए, जइमासकप्पंभिंदइ मास लहु एवं निग्गंथीणवि तहा अत्रस परिखेवे इति सपरिक्षेपेवृत्ति वरंडकादिसमन्वितेअबाह्येग्रामस्या त्यंतमबहिर्भूतेउपाश्रये इति गम्यतेवत्थए इति वस्तुंशेषंसुगमं, तथा अभिनिव्वगडाए तइएभंगे मासलहु । अत्र अभिनिव्वगडाएइति अभिनिर्व्याकृतायां पृथग्विभिन्नद्वारायां वसतावित्यर्थः एवंशेषाण्यपिसूत्राण्युच्चारणीयानि तेषुशेषेष्वपिसूत्रेषुगहिति-अगृहीतवीप्स्योप्येषशब्दःसामर्थ्यात् वीप्स्यांगमयतिशेषः सूत्राणामतिप्रभूतत्वात् । ततोयमर्थः तत्रयत्रमासिका आपत्तिरुक्ता तीसेइति । अत्रापिवीप्सार्थोद्रष्टव्यः तच्छब्दस्ययच्छब्दापेक्षत्वात् । तस्यास्तस्याइहआदिसूत्रेदानंभणितमुपलक्षणत्वात् । आलोचनाविधिश्च ।

[भा. १८६] छट्ठअपच्छिमसुत्तेजिनथेराणांठिई समक्खाया ।
तहियंपिहोइमासो अमेरतोसोउनिप्फन्नो ।।

वृ- षष्ठेषष्ठोद्देशकेअपश्चिमे सूत्रे अंतिमसूत्रे जिनकल्पिकानांस्थविराणां च स्थितिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाख्यातातत्रापियदिजिनानांस्थविराणां च स्वकल्पस्थित्यनुरुपसामाचार्यतिक्रमस्ततोभवति मासोमासलघुप्रायश्चित्तंतथाचाह अमेरतोसोअनिष्पन्न स्तस्याप्यस्मिन्नादिसूत्रेदानमालोचना-विधिश्चोक्तः । अतोर्थमासिकंप्रायश्चित्तमधिकृत्यादिसूत्रोपनिबंधः कृतः एषः सूत्रार्थः अधुनानिर्युक्ति-कृत्विस्तरं वक्तुकामआह -

[भा.१८७] जेत्तिवसेत्तिकेत्तिवनिद्देसाहोंतिएवमादीया ।
भिक्खुस्सपरुवणया जेत्ति कएहोइ निद्देसो ।।

वृ- जेइतिवासेइतिवाकेइतिवा कियंतोनामनामग्राहंदर्शयितुंशक्यंते, ततआह - एवमादिकाआ-दिशब्दादेगेइत्यादिपरिग्रहादनिर्देशाभवंति । सामान्यार्थेइतिगम्यते तत्र जे इति निर्देशो यथा अत्रैव-सूत्रेअथवा जेणं भंते, अपरं असंतएणं अब्भक्खाणेणं अब्भक्खाइज्जाइत्यादि से इति निर्देशो यथासे गामंसि वा । नगरंसिवा । इत्यादि, के इति यथाके आगच्छइ दित्तरुवेइत्यादि सामान्यंचविशेषनिष्ट-मतो जे इति निर्देशेकृतेभिक्षोर्भवति निर्देशो, योभिक्षुर्नान्यइतितस्यचभिक्षोस्तथानिर्दिष्टस्य-प्ररुपणा-नामादिनिक्षेपरुपकर्त्तव्या सूत्रस्पर्शिकनिर्युक्तेर वसरप्राप्तत्वात् तामेवाह ।।

[भा.१८८] नामंठवणाभिक्खू दव्वभिक्खूभावभिक्खूय ।
दव्वेसरीरभविओ भावेणयसंजतोभिक्खू ।।

वृ- भिक्षुशब्दस्यनिक्षेपश्चतुष्कोनामंति भिक्षुशब्दस्यात्रापिसंबंधात्नामभिक्षुः द्रव्यभिक्षुश्चचशब्दो स्वगतानेकभेदसूचको तत्रयस्यपुरुषस्यभिक्षुरितिनामसनाम्नाभिक्षुर्नामभिक्षुर्यदिवा नामनामवतोरभेदो-पचारात्नामासौभिक्षुश्चनामभिक्षुरितिव्युत्पत्तेर्नामभिक्षुः स्थापनया आकारमात्रेणअसत्कल्पन-यभिक्षुस्थापनाभिक्षुः चित्रकर्मादिलिखितोबुद्धिकल्पितोवाऽक्षादिः द्रव्यभिक्षुर्द्विधा आगमतोनो-आगमतश्च तत्रागमतोज्ञातातत्रचानुपयुक्तोऽनुपयोगो द्रव्यमितिवचनात् नोआगमतस्त्रिविधस्तद्यथाज्ञ-शरीरं, भव्यशरीरं, तदव्यतिरिक्तश्च तत्रभिक्षुपदार्थज्ञस्ययत्शरीरंव्यपगतजीवितंतत् शरीरंद्रव्यभिक्षुर्भूत-भावत्वात्, यस्तु बालको नेदानींभिक्षुशब्दार्थमवबुध्यते । अथचायत्यांतेनैवशरीरेणभोत्स्यते, तस्ययत् शरीरं तत् भव्यशरीरं द्रव्यभिक्षुः भाविभावत्वात् । तद्व्यतिरिक्तस्त्रिधा तद्यथा एकभविकोबद्धायुष्कः अभिमुखनामगोत्रश्च तत्रएकभविकोनामयोनिरयिकस्तिर्यङमनुष्योदेवोवाऽनंतरभवेभिक्षुर्भावी, बद्धायुष्कोनामयेनभिक्षुपर्यायनिमित्तमायुर्बद्धं, अभिमुखनामगोत्रो यस्यभिक्षुपर्यायप्रवर्त्तना-भिमुखेनामगोत्रकर्म्मणीसचार्यक्षेत्रेमनुष्यभवेभाविभिक्षुपर्याये समुत्पद्यमानः । यदिवास्वजनधनादि-परित्यज्यगुरुसमीपेप्रव्रज्याप्रतिपत्त्यर्थंस्वगृहात्विनिर्गच्छन्तथाचाहदव्वेसरीरभविओत्ति द्रव्येइति-द्वारपरामर्शः । द्रव्यभिक्षुर्नोआगमतो इतिगम्यते इति, शरीरत्तिशरीरग्रहणेनज्ञशरीरंभव्यशरीरं चपरिगृहीतं भवियत्तिभव्योभावीत्यनर्थांतरं भावीचत्रिविधपर्यायइतितद्ग्रहणेएकभविकादित्रिभेदपरिग्रहः । भावभिक्षुर्द्विधाआगमतो नोआगमतश्च । आगमतोभिक्षुशब्दार्थस्यज्ञातातत्रचोपयुक्तः उपयोगोभाव-निक्षेपइतिवचनात्नोआगमतः संयतस्तथा चाह ।। भावेनउसंजतो भिक्खू भावेन भिक्षुस्तुशब्दोविशेष-णार्थः । सचामुं विशेषंद्योतयति नो आगमतः संयतः सम्यक् त्रिविधंत्रिविधेनसमस्त सावद्यादुपरतः । अत्रैवनोआगमतो भावभिक्षुर्भिक्षणशीलोभिक्षुरिति व्युत्पत्तिमधिकृत्याक्षेपपरिहारावभिधित्सुराह -

[भा.१८९] भिक्खणसीलोभिक्खू, अन्नेविनत्तेअननवित्तित्ता ।
निप्पिसिएणंनायंपिसियालंभेणसेसाउ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ननुयदेतत्वयोक्तं, भिक्षणशीलोभिक्षुरितितदसमीचीनमतिव्याप्तिदोषप्रसंगात् । तथाहि-भिक्षुरित्युच्यमानेऽन्येपिरक्तपटादयोनोआगमतोभावभिक्षवः प्राप्नुवंति तेषामपि, भिक्षाजीवितया-भिक्षणशीलत्वात् । नचैतदिष्यतेतस्मादतिव्याप्तिर्भावभिक्षुलक्षणस्यदोषः । अत्रसूरिःह नतेशेषारक्त-पटभृतयोभिक्षवः कुतइत्याह - अनन्यवृत्तित्वातूनविद्यतेअन्याभिक्षा मात्रात्व्यतिरिक्तावृत्तिवर्त्तनं-येषां तेअनन्यवृत्तयस्तद्भावस्तत्वंतस्मादनन्यगतिकत्वदित्यर्थः किमुक्तंभवतियदाआधाकर्मि-कमौद्देशिकमभ्याहृतं वा नलभंते तदा अनन्यगतिकयाभिक्षापरिभ्रमणशीलास्ततोनतेभिक्षवः इयमत्रभावना, द्वेशब्दस्यनिमित्ते तद्यथा व्युत्पत्तिनिमित्तं प्रवृत्ति निमित्तं च यथागोशद्वस्य । तथा-हिगोशब्दस्यव्युत्पतिनिमित्तगमनक्रियागच्छतीतिगौरितिव्युत्पादनात् तेनचगमनेनैकार्थिसम-वायितयायदुपलक्षितंसास्नादिमत्वंतत्प्रवृत्तिनिमित्तंतेनचगच्छति अगच्छति वागोपिंडेगोशब्दः प्रवर्त्तते उभय्यामप्यवस्थायांप्रवृत्तिनिमित्तभावात्अश्वादौतु न प्रवर्त्तते । यथोक्तरुपस्यप्रवृत्तिनिमित्तस्यतत्रा-भावात । एवमत्रापिभिक्षुशब्दस्यद्वेनिमित्ते, व्युत्पत्तिनिमितं प्रवत्तिनिमित्तं च तत्र भिक्षणंव्युत्पत्ति-निमित्तंभिक्षतो इत्येवंशीलो भिक्षुरितिव्युत्पत्तिः तेन च भिक्षणेनैकार्थसमवायितया यदुपलक्षितमिह-परलोकाशंसाविप्रमुक्ततया यमनियमेषुव्यवस्थितत्वंतत् प्रवृत्तिनिमित्तं तेनभिक्षमाणे अभिक्षमाणे वाभिक्षौ भिक्षु शब्दः प्रवर्त्तते, उभय्यामपि अवस्थायां प्रवृत्तिनिमित्तसद्भावात्; रक्तपटादौतुन प्रवर्त्तते, नवकोट्य परिशुद्धान्नभोजितयातेषुयथोक्त रुपस्यप्रवृत्तिनिमित्तस्याभावात्, अत्रार्थेज्ञातमुदाहरणं कर्त्तव्यं, पिशितालाभेन यो निःपिशित स्तेनयथा कोऽपि ब्रुयात् यावत् मांसं न लभेतावदहं निःपिशितः पिशितव्रती ।।

[भा. १९०] अविहिंसा बंभयारी, पोसहिय अमद्यमंसियाचोरा ।।
सतिलंभे परिच्चाई होंतितदक्खानसेसाउ ।।

वृ- कोपि भाषेत अहमहिंसावृत्तिर्यावन् मृगादीन् न पश्यापि, । अन्यः कोप्येवंब्रूते अहं ब्रह्मचारी यावन्मय स्त्री न संपद्यते अथवा कोप्येवमाह । अहमाहारपोषधीयावन्ममाहारोन संपद्यते, यथावा कोपिवदेत् अहम्मद्यमांसवृत्तिर्यावत् मद्यमांसे न लभे यथा वा कोपि नियमं प्रतिपद्यते । अचोरवृत्तिरहंयावत् परस्यच्छिद्रं न पश्यामि इतिएते यथा पिशिताद्य लाभेन निःपिशितादयोनाम पिशिवव्रत्तादयः व्रतं च सति असतिवावस्तुनि तदिच्छापरित्यागतस्तन्निवृत्तिः निः पिशितादीनां तुपिशितादिष्विच्छा सततानुबंधिनीततो नतेपिशितव्रत्यादयः व्रतिशब्दप्रवृत्तिनिमित्ताभावात् । तथा चाह सति लंभे इत्यादि सति विवक्षितस्य पिशितादेर्वस्तुनो लाभेपितत्परित्यागिनस्ते तदाख्या भवंति सत्यपिवस्तुनो लाभेतत्परित्यागतः सत्यसतिवावस्तुनितद्विषयेच्छापरित्यागात् शेषास्त्वनंतरोदिता निपिशितादयोन तदाख्यापिशिताद्य लाभेपितद्विषयेच्छा निवृत्यभावात् एवं रक्तपटादयो पिनभिक्षवः पचन पाचनादिनवकोटीविषयेच्छा निवृत्यभावात् तदभावश्चाधाकर्म्मादिष्वपि प्रवृत्तः तदेवं निःपिशितादि दृष्टांतोपन्यासेन रक्तपटादिषु यथोक्तरुपप्रवृत्ति निमित्ताभावतो भिक्षुशब्द प्रवृत्त्यभावः उक्तः । अथवा किमेतैरुपन्यस्तैर्दृष्टांतैर्भिक्षुप्रवृत्ते जगत्प्रसिद्धायास्तेषु साक्षादभाव दर्शनतएव भिक्षुशब्द प्रवृत्यभावस्य सिद्धत्वात् तथाचाह -

[भा. १९१] अहवाएसगासुद्धं जहागिहणंतिसाहुणो ।
भिक्खं नेवकुलिंगत्था, भिक्खजीवीवितेजदि ।।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

वृ- अथवेतिप्रकारांतरद्योतने, तच्चप्रकारांतरं पातनिकायामेवभावितं, तद्यद्यपितेरक्तपटादयोभिक्षाजीविनस्तथापि यथासाधवः एषणाशुद्धं एषणादोषैः शंकितादिभिरुपलक्षणमेतत्, उद्गमदोषैराधा कर्म्मादिभिरुत्पादनादोषैर्धात्री दूत्यादिभि; परिशुद्धां भिक्षांगृह्णंति नैवममुनाप्रकारेण कुलिंगस्थाः कुत्सितलिंगधारिणोरक्त पटादयस्ततो भिक्षुवृत्तेर्जगत्प्रसिद्धाया स्तेष्वभावतोनते भिक्षवस्तथाचाह -

[भा.१९२] दगमुद्देसियंचेव कंदमूलफलाणि य सयं गाहा ।
परातोय गिण्हंता कहंभिक्खुणो ।।

वृ- दकमुदकंसचित्तं तडागादिगतं ऊद्देसिकमुद्दिष्टकृत कर्म्मभेदमुपलक्षणमेतत् आधाकर्म्मादिच तथा कंदमूलफलानिच स्वयमात्मना गृह्णंतीतिस्वयंग्राहा, वा ज्वलादिदुनीभूग्रहास्त्रोर्णः इति चैकल्पिको णप्रत्ययः स्वयं गृहणंत इत्यर्थः, परतश्चगृहणंतः कथं भिक्षवः, भिक्षावृत्तेरभावात् । अथकासाजगत्प्रसिद्धा भिक्षुवृत्तिर्यदभावान्नते भिक्षवइति भिक्षुवृत्तिमुपदर्शयति -

[भा.१९३] अचित्ता एसणिज्जा यमियाकाले परिक्खिया ।
जहालद्धा विसुद्धाय एसावित्तीय भिक्खुणो ।।

वृ- अचित्ताप्रासुकानतुसचित्तामिश्रावाएषणीया आधाकर्म्मादि दोषरहिता मिता एकत्रिंशदादिकवल प्रमाणतः परिमिताकालदिवा, अथवातृतीयस्यां पौरुष्यां, परीक्षा दायकादिदोष विशुद्धा, यथा लब्धासंयोजनादि दोषरहिता, विशुद्धा परिभोगकाले रागद्वेषाकरणतोअंगारादि दोषरहिता, एवं रुपा या सदाभिक्षाएषाभिक्षूणां वृतिः, साचरक्तपटादिषुसर्वथानास्तीति तेषु भिक्षुत्वाभावतोनातिप्रसंगः, तदेव भिक्षणशीलोभिक्षुरितिव्युत्पत्तौयदति प्रसंगापादनं परेणकृतंतदपाकृतं, क्षुधं मिनत्ति इतिभिक्षुरितिनिर्वचने तु परस्यानवकाशएवकेवलं किंचिद्वक्तव्यमस्तीतितद्भिक्षुराह -

[भा.१९४] दव्वेयभावभेयग, भेयणभेत्तव्वयंचतिविहं तु ।
नाणाइभावभेयण कम्मक्खुहे गट्ठय भेज्जं ।।

वृ- क्षुधं भिनत्तीतिभिक्षुरितिव्युत्पत्याभिक्षुर्भेदक उक्तो, भेदकोनामभिदिक्रियाकर्त्ताभिदिक्रिया च सकर्म्मिका, सकर्म्मिकायाश्च क्रियायाः कर्त्ताकरणकर्म्मव्यतिरेकेण न भवतीति तद्ग्रहणेनभेदनं भेत्तव्यमितिद्वयंसूचित्तं, एतच्च भेदकभेदनभेत्तव्यरुपंवस्तुनिकुरंबंत्रिविधमपि, तु शब्दोऽपि शब्दार्थः त्रिभेदमपिप्रत्येकं द्विधा तद्यथा दव्वेयभावेति, च शब्दोभिन्नक्रमः द्रव्यतोभावतश्चेत्यर्थः तथाहिभेदकोद्विधाद्रव्यस्यभावस्य च, भेदनमपि द्विधाद्रव्यस्यभावस्यच, भेत्तव्यमपिद्विधाद्रव्यरुपं, भावरुपं च। तत्रभेदकोरथकारादिद्रव्यस्यभेदनं परश्चादि द्रव्यंभेत्तव्यं काष्टं भावस्यभेदकोभिक्षुर्भावस्यभेदनानिज्ञानादीनि भावभेत्तव्यंकर्म्मतथाचाह - नाणादीत्यादिज्ञानादि आदिशब्दात्दर्शनचारित्रपरिग्रहः भावभेदनं भेद्यं भावत इति च संबध्यतेकर्मकर्म्मक्षुध इति एकार्थं । तथा चोक्तं । कम्मंतिवा खुहंतिवा कलुसंतिवा वज्जंतिवावेरंत्ति वा पंकोत्तिवा । मलोत्तिवा एएएगट्ठियाइति; भिक्षोरपिशक्रपुंदरादिवदमून्येकार्थिकानिभिक्षुः यतिः तपस्वीभावांत इति तथा चैतेषांव्युत्पत्तिमाह -

[भा.१९५] भिंदंतोयाविखुहंभिक्खू जयमाणगोजई होइ ।
तवसंजमेतवस्सीभवखवंतोभवंतोय ।।

वृ- क्षुधमष्टप्रकारंकर्म्मभिंदानोभिक्षुः यतेप्रयत्ने संयमयोगेषुयतमानःप्रयत्नवान् यतिः, तपः

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

संयमेतपःप्रधान संयमेवर्त्तमानस्तपस्वीतपोऽस्यास्तीतितपस्वीतिव्यूत्पत्तेः भवं नारकादि भवं क्षपयन् भवान्तः भवमंतयति भवस्यांतं करोतीतिव्युत्पत्तेः अनेन च नोआगमतो भावभिक्षुणाधिकारः भिक्षुरिति गतमिदानीं मासिकमित्यत्रयोमासशब्दस्तन्निपप्ररुपणार्थमाह -

[भा.१९६] नामंठवणादविए खित्तेकालेतहेवभावेय
मासस्सपरुवणया पगयंपुनकालमासेण ।।

वृ- नामंति मासशब्दसंबंधात् नाममासःएवंस्थापनामासः दविएत्ति द्रव्यमासः एवं क्षेत्रमासः कालमासोभावमासश्च एषाषड्विधा मासस्यप्ररुपणता प्ररुपणस्य प्ररुपणा शब्दस्वभावःप्रवृत्तिनिमित्तं प्ररुपणताप्ररुपणेत्यर्थः । प्रकृतमधिकारःपुनरत्रकालमासेन एषगाथा संक्षेपार्थः । सांप्रतमेनामेवगाथां विवरीषुर्नामस्थापनेसुप्रतीतत्वादनादृत्यद्रव्याख्यानार्थमाह -

[भा.१९७] दव्वेभवेनिव्वत्तिओयखेत्तंमि जमिवएननया ।
कालेजहि वणिजइनक्खत्तादीवपंचविहो ।।

वृ- द्रव्यमासोद्विधा आगमतो नोआगमतश्च तत्रागमतोमासशब्दार्थज्ञातातत्रचानुपयुक्तः । नोआगमतस्त्रिविधस्तद्यथा ज्ञशरीरभव्यशरीर तदव्यतिरिक्तश्च तत्र ज्ञशरीरभव्यशरीरेप्राग्वत् । तद्व्यतिरिक्तमाह दव्वेभवोनिव्वत्तिओत्ति द्रव्येमासो, भव्यइति भावि एकभविकादि इहमास इतिरुपंप्राकृतेषशब्दस्यापिभवति, ततएकभविकादिरत्रमाषोद्रष्टव्यः तत्र एकभविको नाम योदेवोमनुष्यस्तिर्यङ्‌वाअनंतरमुध्धृत्यमाषोभविष्यति, बद्धायुष्कोयेनमाषभवायुर्बद्धं । अभिमुखनामगोत्रोयो माषबावंसमुत्पत्तुकामःसमवहतःस्वदेशान् तत्रविक्षिपन्वर्त्तते । अथवा-तद्व्यतिरिक्तोद्रव्यमाषोद्विधा निवत्तिओयत्ति मूलगुण निवर्तनानिवर्तितःउत्तरगुणनिर्वर्त्त-नानिर्वर्त्तितश्चतत्रमूलगुणनिर्वर्तिता नामयेनजीवेनतत्प्रथमतयामाषभवानुगतनामगोत्रकर्म्मोद-यतोमाषद्रव्यप्रायोग्यानि द्रव्याणिगृहीतानि उत्तरगुणनिर्वर्त्तनानिर्वर्त्तितोमाषस्तंबश्चित्रकर्म्मणिलिखितः, खेत्तंमीत्यादि यस्मिन् क्षेत्रे मासस्यवर्णनासमासक्षेत्रप्राधान्यविवक्षायांतत्क्षेत्रमासइत्यपिद्रष्टव्यं । तथायत्रकालेयोमासोवर्ण्यतेसकालप्रदानताविवक्षणात्तत्कालमासः । अथवामासः श्रावणभाद्रप-दादिकः ।यदिवा स्वलक्षणनिष्पन्नोनाक्षत्रादिकः पंचविधः पंचभेदः कालमासः तानेवभेदानुपदर्शयति।

[भा.१९८] नक्खतेचंदेयाउउ, आदिच्चेय होइ बोधव्वो .
अभिवड्ढिएयतत्तो पंचविधो कालमासोउ ।।

वृ- नक्षत्रेषुभवानाक्षत्रः किमुक्तंभवति चंद्रश्चारंचरन्यावताकालेनाभिजितंआरभ्योत्तरषाढानक्षत्र-पर्यंतं गच्छति । तत्कालप्रमाणोनाक्षत्रोमासः । यदिवा चंद्रस्य नक्षत्रमंडलेपरिवर्त्तनतो निष्पन्न इत्यु-पचारतोमासोपिनक्षत्रम्, तथाचंदेयाइति चंद्रेभवश्चांद्रःयुगादौश्रावणेमासेबहुलपक्षप्रतिपद-आरभ्ययावत्पौर्णमासी परिसमाप्तिस्तावत्कालप्रमाणश्चांद्रोमासः एकपौर्णमासी परावर्त्तश्चांद्रामास इति यावत् अथवा चंद्रचारनिष्पन्नत्वादुपचारतो मासोपि चंद्रः । चः समुच्चये, दीर्घत्वमार्षत्वात् उउइतिऋतुऋःसचकिल लोकरुढ्याषष्ट्यहोरात्रप्रमाणो द्विमासात्मकस्तस्याद्धमपिमा-सोऽवयवेसमुदायोपचारात्ऋतुरेवार्थात्परिपूर्नत्रिंशदहोरात्रप्रमाणः एषएवऋतुमासः, ।कर्म्ममासइतिवा सावनमासइतिवा व्यवह्रियते, उक्तंच एसचेव उउमासो कम्ममासोसावणमासोभन्नइइति । आदित्यस्यायमादित्यः ।पत्युत्तरपदयमादित्यदितेर्ण्योऽणपवादो वेतिण्यप्रत्ययः, व्यंजनात्यम्यन्तस्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरूपेवा इतिपाक्षिकस्यएकस्ययकारस्यलोपः । सचैकस्य दक्षिणायनस्योत्तरायणस्य वा त्र्यशीत्यधिकदिनशतप्रमाणस्यषष्टभागमानः यदिवा आदित्यचार निष्पन्नत्वादुपचारतोमासोप्यादित्यः, अभिवड्ढिए यतत्तो इति ततश्चतुर्थादादित्यान् मासादनंतरपंचमोमासोऽभिवर्द्धितः, अभिवर्द्धितोनाम-मुख्यतस्त्रयोदशचंद्रमासप्रमाणः संवत्सरेद्वादशचंद्रमासप्रमाणात्संवत्सरादेकेन मासेनाभिवर्द्धितत्वात्, परंत द्वादशभागप्रमाण ओमासोप्पवयवेसमुदायोपचारादभिवर्द्धितः एपपंचविधः कालमासः तुः पुरणार्थः तदेवमुक्तानामतोनाक्षत्रादयः पंचापिमासाः सांप्रतमेषामेव मासानां दिनपरिमाणमभिधित्सुस्तदानयनाय करणमाह -

[भा.१९९] रिक्खाईमासाणं करणमिणमंतुआणणोवाओ ।
जुगदिनरासिंठविय अट्ठारसयाइंतीसाइं ।।

वृ- ऋक्षेपुचंद्रस्यपरिवर्त्तनतोमासोप्याधेये आधारोपचारात्ऋक्षः ऋक्षआदिर्येषांतेऋक्षादयः । आदिशब्दात्चंद्रमासादिपरिग्रहः । तेषामृक्षादीनां मासानामानयनोपायकरणमिदं वक्ष्यमाणं तदेवाह जुगदिनेत्यादि युगेचंद्राभिवर्द्धित संवत्सरप्रमाणे दिन राशिरहोरात्र राशिर्युगादिनराशिस्तंस्थापयित्वा-कियत्प्रमाणमित्याहअष्टादशशतानित्रिंशानित्रिंशदाधिकानिएतावान् दिनराशिर्युगेभवतीति कथमवसीयतेइतिचेत् ? उच्यते, इहसूर्यस्यदक्षिणुत्तरंवा अयनं त्र्यशीत्यधिकदिनशतात्मकंयुगेच पंचदक्षिणायनानिपंचोत्तरायनानि सर्व संख्यया दशायनानि ततस्त्र्यशीत्यधिकं दिन शतंदशकेन गुण्यते इत्यागतो यथोक्तो दिनराशिरेवं प्रमाणं दिनराशिं स्थापयित्वा किमित्याह -

[भा.२००] ताहेहराहिभागं, रिक्खाईयाणदिनकरंताणं ।
सत्तट्ठी बावट्ठी एगट्ठी सट्ठी भागेहिं ।।

वृ- ततो दिनराशि स्थापनानंतरमृक्षादीनां ऋक्षमासप्रभृतीनां दिनकरांतानां सूर्यमास पर्यंतानां नक्षत्र चंद्रर्त्वादित्यमासानामित्यर्थः दिनमानानयनाय यथाक्रमं सप्तषष्टि द्वाषष्टि एकषष्टि षष्टिभागैः सप्तषष्ट्यादिभिर्भागहारैरित्यर्थः भागंहराहित्ति हर ततो यथोक्तं नक्षत्रादिमासगतदिनपरिणामागच्छतितच्चोत्तरत्रदर्शयिष्यते, सांप्रतमभिवर्द्धित मासगतदिन परिमाणानयनायवेदंकरणमिति करणांतरमाह -

[भा.२०१] अभिवड्ढियकरणंपुनठावियरासिइमंतुकायव्वं ।
ऊणाली ससयाइं पणठाइंअनूनाइं ।।

वृ- अभिवर्द्धितकरणमभिवर्द्धितमासगतदिनपरिमाणानयनायकरणं पुनरिदं वक्ष्यमाणं कर्त्तव्यंप्रयोक्तव्यमितियोगः तदेवाहस्थापयित्वाराशिंकिंप्रमाणमित्यतआह एकोनचत्वारिंशत् शतानिपंचषष्ट्यधिकान्यन्यूनानिपरिपूर्णानिकेपांराशिऽयमितिचेत् । उच्यते, अभिवर्द्धित मासगतदिन चतुर्विंशत्युत्तर शतभागानां तथाह्यभिवर्द्धितमासस्य दिनपरिणाममेकात्रिंशदहारात्रएकविंशत्युत्तरं-शतंभागानां अहोरात्राश्च प्रत्येकं एकत्रिंशत्विंशत्युत्तरशतेनगुण्यते जातान्यष्टात्रिंशत्शतानि चतुश्चत्वारिंशदधिकानी उपरितनं च एकविंशत्युत्तरं शतं तत्रप्रक्षिप्यते जातोयथोक्तप्रमाणो राशिः ।। तं स्थापयित्वाकिमित्याह -

[भा.२०२] एयस्सभागहरणं चउवीसेणं सएणकायव्वं ।
जेलद्धाते दिवसा सेसाभागा मुनेयव्वा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एतस्यअनंतरोदितस्य पंचषष्ट्यधिकैकोनचत्वारिंशच्छतप्रमाणस्यराशेश्चतुर्विंशत्यधिकेन-शतेनभागहरणं भागेचहृते अंकालब्धास्ते दिवसा ज्ञातव्याः शेषास्त्वंका उद्धरिता अहोरात्रस्य चतुर्विंशत्युत्तरशतभागाः ।

[भा.२०३] अहवावितीसइगुणे, सेसेतेनेवभागहारेण ।
भइयंमिजंतु लब्भइ तेउमुहुत्तामुणेयव्वा ।।

वृ- अथवेतिप्रकारांतरद्योतने, तच्चप्रकारांतरमिदं लब्ध दिवसानामुपरिभागास्तावत्तदवस्था एव ध्रियंते तथैव शास्त्रे व्यवहारदर्शनात् अथवा अपिसमुच्चये स च समुच्चयः प्रकारांतरस्यैवान्यस्या श्रूयमाणत्वात् शेषे उद्धरिते राशौमुहूर्त्तानियनायस्त्रिंशद्गुणेकृतेततस्तेनैव चतुर्विंशत्युत्तरशतप्रमाणेन भागहारेण भक्ते यत्लभ्यतेतेमुहूर्त्ताज्ञातव्या ।

[भा.२०४] तस्सविजंअवसेसं बावठीएउतस्सगुणकारो ।
गुणकारभागहारे बावठीएय उववट्टो ।।

वृ- तस्यापिमुहूर्त्तस्यसंबंधियदवशेषमुद्धरितं तस्यमुहूर्त्तगतद्वाषष्टिभागानयनाय द्वाषष्ट्या गुणकारः गुणकरणं किमुक्तं भवति यदवशेषंतिष्ठति, ततुद्वाषष्ट्या गुण्यते ततोगुणकारभागहारेइतियस्यो-परितनस्यराशेर्गुणकरमभवत् स गुणकार योगात्गुणकारः, अधस्तनस्तुभागंहरतीतिभागहारः गुणकारश्च भागहारश्चगुणकारभागहारं समाहारो द्वंद्वस्तस्मिन् षष्टीसप्तम्योरर्थंप्रत्यभेदस्ततएतदुक्तंभवति गुणकार-भागहारयोर्द्वाषष्ट्याअपवर्त्तोऽपवर्त्तनाक्रियते ।

[भा.२०५] दोहिं तु हितेभागे जेलद्धाते बिसठिभागाओ ।
एएसिमागयफलंरिक्खाईणं कमेणइमं ।।

वृ- भागहारराशेश्चतुर्विंशत्यधिकशतप्रमाणस्यद्वाषष्ट्या पवर्त्तनायां जातौद्वौ ताभ्यांतुद्वाभ्यांहृते भागे ये अंका लब्धास्तेद्विषष्टिभागाएव तुरेवकारार्थोः मुहूर्त्तस्य ज्ञातव्याः सांप्रतमागतफलप्रतिपादनार्थ-मिदमाह एएसिमित्यादि एतेषां भागहाराणांमृक्षादीनां नक्षत्रादिमासानां दिनपरिमाणा नयनायभागं हरतां, यत् आगतमेवफलमागतफलं तत् क्रमेण ऋक्षादि मासपरिपाट्या इदं वक्ष्यमाणं तदेवाह -

[भा.२०६] अहोरत्तसत्तवीसंति सत्तसत्तट्ठिभागनक्खत्तो ।
चंदो उउगुणतीसं बिसट्ठिभागायबत्तीसं ।।

वृ- नाक्षेत्रो नक्षत्र संबंधीमासः सप्तविंशतिरहोरात्राः सप्तषष्टिभागाः त्रिःसप्त त्रयोवारासप्त एकविंशतिरित्यर्थः तथाहियुगदिनराशिः त्रिंशदधिकाष्टादश शतप्रमाणो ध्रियते, तस्य सप्तषष्टियुगेनक्षत्र मासा, इति सप्तषष्ट्या भागोह्रियते लब्धासप्तविंशति रहोरात्रा एकविंशतिरहोरात्रस्यसप्तषष्टिभागाः, तथा चांद्रश्चंद्रमासएकोनत्रिंशदहोरात्राद्वाषष्टिभागा अहोरात्रस्यद्वात्रिंशत् तथाहितस्यैवयुगदिनराशेस्त्रिं-शदधिकाष्टादशशतमानस्य युगे चंद्रमासाद्वाषष्टिरिति द्वाषष्ट्याभागेहृतेएतावदेवलभ्यते इति ।

[भा.२०७] उडुमासोतीसदिनाआइच्चोती सहोइ अद्धं च ।
अभिवड्ढिएकत्तीसाएगवीससयं च भागाणं ।।

वृ- ऋतुःमासपरिपूर्नानि त्रिंशद्दिनानि एकषष्टियुगेऋतुर्म्मासइत्येकषष्ट्याअनंतरोदितस्यध्रुवराशेर्भा-गहरणे एतावत्तोलभ्यमानत्वात् । आदित्य आदित्य मासो भवति, त्रिंशदहोरात्रा अहोरात्रास्यार्द्धं यतः सूर्यस्ययुगे मासाः षष्टिस्ततः षष्टाद्याध्रुवराशेर्भागहरणे एतावल्लभ्यते इति अभिवर्द्धितो अभिवर्द्धितमास

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकत्रिंशदहोरात्रा एकस्यचाहोरात्रस्य चतुर्विंशत्युत्तरशतभागानामेकविंशशतं एकविंशत्यधिकंशतं तथाहि एकोनचत्वारिंशच्छतानांपंचषष्ट्यधिकानां चतुर्विंशत्युत्तरेण शतेनभागे ह्रियमाणे यथोक्तं लभ्यतएवेति अथवा न भागैः संख्या किंतुमुहूर्त्तादिभिस्तआह -

[भा.२०८] एकत्तीसंचदिनाइ गुत्तीसमुहुत्तसत्तरसभागा ।
एथ्थपुरणअहिगारो नायव्वोकम्ममासेण ।।

वृ- एकत्रिंशद्दिनानि एकोनत्रिंशन्मुहूर्त्ता सप्तदशद्वाषष्टिभागाः एकत्रिंशत्दिनानितावत् पूर्ववत् ततो यदेकविंशत्युत्तरंशतमवशेषं जा तंतत् अहोरात्रस्यत्रिंशत्मुहूत्ता इति मुहूर्त्तानयनायत्रिंशतागुण्यतेजातानि त्रिंशदधिकानिषट्त्रिशत्शतानि एतेषांचतुर्विंशत्यधिकेनशतेनभागहरणां लब्धाएकत्रिंशत्मुहूर्त्ता शेषमवतिष्ठते चतुःत्रिंशत् सद्वाषष्टिभागानयनायद्वाषष्ट्यागुण्यते जातान्येकविंशतिशतान्यष्टोत्तराणि तेषांचतुर्विंशत्युत्तरशतेनभागोह्रियतेलब्धाः परिपूर्णाः सप्तदशद्वाषष्टिभागाः अत्र पुनः प्रायश्चित्तविधावधिकारः प्रकृतं ज्ञातव्यो नक्षत्रादिनांमासानां मध्येकर्म्ममासेन, संप्रति भावमासप्रतिपादनार्थमाह -

[भा.२०९] मूलादिवेदगोखलु भावेजोवाविजाणतो तस्स ।
नहिअग्गिनाणतोग्गीणाणं भावो ततो अन्नो ।।

वृ- भावेभावोमासोद्विधा आगमतो नोआगमतश्चतत्रनोआगमतः खलुमूलादिवेदकः, मूल-कंदकांडपत्रपुष्पफलवेदकः किमुक्तं भवते । योधान्यमाषजीवोधान्यमाषभवेवर्त्तमानो मूलरूपतया कंदरूपतया कांडरूपतया पत्ररूपतया पुष्परूपतया फलरूपतया वा धान्यमाषभावायुर्वेदयते, सनोआगमतोभावमासः, प्राकृतेमाषशब्दस्यापिमासइतिरूपसंभवात् आगमतआह जोवाविजाणतो तस्स तस्यमाषस्यमासस्य वा यो ज्ञायको ज्ञाता अपि शब्दादुपयुक्तश्च स आगमतोभावमासः, उपयोगोभावनिक्षेप इतिवचनात् अत्रपरआह नहीत्यादि, ननु यदि मासस्यज्ञाता तत्रचोपयुक्त-स्तथापिकथमसौभावमासः तर्ह्यग्नि ज्ञानोपयुक्तोमाणवकोग्निर्दाहपाकाद्यर्थ क्रियाकारित्वाभावत् सूरिराह नाणमित्यादि यदेतदुक्तं तदसत् सम्यग्वस्तुतत्त्वापरिज्ञानात् इहाद्यर्थाभिधानप्रत्ययास्तुल्यनामधेयाः। तथाहिघटोपिघट इत्यभिधीयते घटशब्दोपिघटज्ञानमपि घटइति एतच्च सर्ववादिनामविसंवादस्थानं ततोमासज्ञानमपिमासशब्दवाच्यंतच्चभावो जीवगुणात्वात् स च ज्ञानलक्षणोभावस्तस्मादात्म-नोऽनन्यइतिमास ज्ञानोपयुक्तोभावमासः अत्र षड्विधमासनिक्षेप मध्येकालमासेनाधिकारस्तत्रा-पिकर्म्ममासेनेत्यनंतरमेवोक्तं शेषास्त्वपाकरणबुद्ध्योपन्यस्ताः एतदेवनिक्षेप प्ररूपणायाः फलं यत् प्रस्तुतस्यव्याकरणमप्रस्तुतस्यनिराकरणमिति, यदुक्तम प्रसुतार्थापाकरणात् प्रस्तुतार्थव्या-करणाच्चनिक्षेपः फलवानिति तदेवं मासनिक्षेप प्ररूणाकृता संप्रति परिहार शब्द निक्षेप प्ररूपणार्थमाह -

[भा.२१०] नामं ठवणा दविए परिरय परिहरण वज्जणुग्गहता;
भावावण्णेसुद्धे नव परिहारस्स नामाइं ।

वृ- परिहारशब्दोविभक्तिपरिणामेन सर्वत्रसंबध्यते, तद्यथानाम परिहारः स्थापनापरिहारः । दविए इति द्रव्योद्रव्यविषयः परिहारोद्रव्यपरिहारः, परिरयपरिहारः परिहरण परिहारःवृजीवर्जनेवृज्यतेइति वर्जनकर्म्मएयनटवर्जनमित्यर्थः वर्जनस्यपरिहारोवर्जनपरिहारः अनुगृह्यते इति अनुग्रहः कर्म्मण्य च तस्यभावो अनुग्रहताऽनुग्रहणमित्यर्थः, । अनुग्रहतया परिहारोऽनुग्रहता परिहारः, भावत्तिभावचिंता-यामापन्ने आपन्नस्यपरिहार आपन्नपरिहारः, अशुद्धे शुद्धस्य परिहारः एवं परिहारस्यनामादि विशेषणतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवनामानि भवंति, एषगाथाक्षरार्थः अधुना भावार्थ उच्यते, तत्र नामस्थापने प्रतीते, द्रव्यपरिहारो द्विधाआगमतो नो आगमतश्च, तत्रागमतः परिहारशब्दार्थज्ञाता तत्र चानुपयुक्तः, नोआगमतस्त्रिधा ज्ञशरीरं भव्यशरीरं तद्व्यतिरिक्तः तत्र ज्ञ शरीर भव्य शरीरे प्राग्वत् । तद्व्यतिरिक्त परिहार परिरय परिहारादि प्रतिपादनार्थ माह -

[भा.२११] कंटगमादी दव्वे, गिरिनदि माईण परिरयो होइ;
परिहरणधरणाभोगे, लोउत्तरवज्ज इत्तरिए ।

वृ- द्रव्य इति द्वार परामर्शः नो आगमतो ज्ञ शरीर भव्यशरीर व्यतिरिक्तो द्रव्यपरिहारोनाम यत् कंटकादि कंटकमादि शद्वात् स्थाणु विषसर्प्पादिकं च परिहरति द्रव्यस्य परिहारो द्रव्यपरिहार इति व्युत्त्यत्तेः । परिरयो नाम पर्याहारः परिधिरितियावत् उक्तं च पज्ञाहारोत्तिवा परिरओति वा एगठं; परिरयेण परिहारः । परिरय परिहारः स च परिरयो भवति संभवति, गिरि नद्यादीनां विषयेइयमत्र भावनायत् गिरिनदीमादि शब्दात् समुद्रमटवीं वा परिरयेण परिहरति एष परिरयपरिहारः । तथा परिहियते इति परिहरणां भावे अनट्तच्चद्विधा लौकिकं लोकोत्तरं च तत्र लौकिकं यथा माता पुत्रं परिहरति भ्रातरं परिहरति न परिभुंक्ते इत्येवमादि, लोकोत्तरं साक्षादाह - परिहरणाधरणाभोगे -

लोकोत्तरं परिहरणं द्विधाधरणे भोगे च । धरण परिहरणां, परिभोगपरिहरणं चेत्यर्थः, तत्र धरणपरिहरणां नाम यत् किमप्युपकरणां संगोपयति प्रतिलेखति च न परिभुंक्ते, परिभोग परिहरण यत् सौत्रिककल्पादि परिभुंक्ते प्रावृणोतीत्यर्थः । उक्तं च, -

लोगे जहमाताऊ पुत्तं परिहरति, एवमादीओ लोउत्तर परिहारो दुविहो परिभोग धरणेयं ।

अत्रैवंव्युत्पत्ति परिहरणमेवपरिहारः । परिहरणा परिहारः लोउत्तरवज्जइतरिए वर्जवर्ज्यं, तत्द्विधा लोगत्ति लौकिकं, उत्तरति लोकोत्तरं, लौकिकं द्विधा इत्वरं यावत् कथितं च, तत्रेत्वरंयत् सूतकं मृतकादिदशदिवसान् यावत् वर्ज्यते इति यावत्कथितं वरुडछिंपकचर्म्मकारडोंबादि एतेहियावज्जीवं शिष्टैः संभोगादिना वर्ज्यते, लोकोत्तरमपविर्ज्यं द्विधा इत्वरंयावत्कथितं च तत्रेत्वरं दाने अभिगमसड्ढे इत्यादि यावत्कथि कमट्ठारसपुरिसेसुं वीसं इथ्थीसुदसनपुंसे, इत्यादि वर्ज्यं इत्तरिएइत्यत्रेत्वरग्रहणमुपलक्षणां तेन यावत्कथिकमित्यापिद्रष्टव्यं, तस्यपरिहारः परित्यागो वर्जन परिहारः ।

[भा.२१२] खोडादिभंगनुग्गहभावे आवणसुद्धपरिहारो ।
मासादीआवणो तेनउ पगयं न अन्नेहिं ।।

वृ. खोटभंगइतिवाउक्कोडभंगइतिवा अक्षोटभंगइतिवा एकार्थं, उक्तंच निशीथचूर्णौखोटभंगोत्ति-वाउक्कोडभंगोत्तिवा अक्खोड भंगोत्ति एगट्ठं ।। खोटंनामयत् राजकुलेहिरण्या दिद्रव्यंदातव्यं । आदि-शब्दात् वेष्टिकरणं चारभटादीनां भोजनादि प्रदानमित्यादि परिग्रहः, खोडादेर्भंगः खोडादिभंगाऽनुग्रहः पदैकदेशेपदसमुदायोपचारादनुग्रहपरिहारः । एतदुक्तं भवंति राजकृतानुग्रहवशेन एकद्वित्र्यादि वर्ष मर्यादयाथयोक्तरूपखोटादिभंजन एकंद्वे त्रिणि वर्षाणि यावत् वसति तावन्तंवाकालंयावत् राज्ञानुग्रहः कृतस्तावंतंकालं वसति न च हिरण्यादि प्रददाति नापि वेष्टिं करोति न चापि चारभटादीनां भोजनादि प्रदानं विधत्ते एष खोटादिभंगोअनुग्रह परिहारः, भावेइति भावविषय परिहारो द्विधा तद्यथा आपन्नपरिहारः शुद्धपरिहारश्च तत्र यत् विशुद्धः सन् पंचयाममनुत्तरं धर्म्मं परिहरति करोति, परिहारः शब्दस्य परिभोगेऽपिवर्त्तमानत्वात् स शुद्धपरिहारः शुद्धस्य सतः परिहारः पंचयामानुत्तरधर्म्मकरणं शुद्धपरिहार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति व्युत्पत्तेः यदिवा यो विशुद्ध कल्पव्यवहार क्रियते, स शुद्धपरिहार शुद्धश्चासौ परिहारश्च शुद्धपरिहार इति व्युत्पत्तेः । यथा यत् मासिकं वा यावत् षण्मासिकं वा प्रायश्चित्तमापन्नं तत् आपन्ने अपरि-भोगपिवर्त्तते, परिहियते इति, परिहारः । कर्म्मणिधञ् आपन्नेमेव परिहारः । आपन्नपरिहार इति व्युत्पत्तेः तथाचाह मासादी आवन्ने इति मासादिकं यत्प्रायश्चित्तस्थानमापन्नं तत् आपन्ने आपन्नपरिहारे द्रष्टव्यं मासादिकं यत् प्रायश्चित्तस्थानमापन्नं तत् आपन्नपरिहार इति भावः । अथवा परिहरणां परिहार इति भावेधञ् । आपन्नेन प्रायश्चित्तस्थानेन परिहारो वर्जनं साधोरितिगम्यते आपन्नपरिहारः । तथाहि स प्रायश्चित्ती अविशुद्धत्वात् विशुद्धचरणैः साधुभिर्यावत् प्रायश्चित प्रतिपत्त्यान विशुद्धो भवति तावत् परिहियते इति इह तेन आपन्नपरिहारेण प्रकृतमधिकारो न शेषैः परिहारैः तदेवं परिहार शब्दनिक्षेप प्ररूपणकृता, संप्रतिस्थानशब्दे निक्षेपप्ररूपणार्थमाह -

[भा.२१३] नामंठवणादविए, खेत्तऽद्धाउड्ढवसहि विरतीय ।
संगमपग्गहजोहे अचलगणाण संधणा भावे ।।

वृ.इह स्थानशब्द प्रकरणात् प्रत्येकमभिसंबध्यते । नामस्थानं दविए इति द्रव्ये द्रव्यस्य स्थानं द्रव्यस्थानं क्षेत्रस्थानं अद्धाकाल इत्यनर्थांतरकाले काल एववास्थानं कालस्थानं उर्ध्वस्थानां वसतिस्थानं विरतिस्थानं संयमस्थानं प्रग्रहस्थानं योधस्थानमचलस्थानं गणनास्थानं संधनास्थानं भावेभावविषयं । एषगाथाक्षरार्थः । भावार्थ उच्यते तत्र नामस्थापने प्रतीते द्रव्यस्थानं द्विधा आगमतो नोआगमतश्च आगमतः स्थानशब्दार्थज्ञातातत्रचानुपयुक्तः, नोआगमतो ज्ञशरीर भव्यशरीर तद्व्यतिरिक्त भेदात् त्रिविधं तत्र ज्ञशरीरभव्यशरीरे प्रतीते इति, तद्व्यतिरिक्त द्रव्यस्थानं क्षेत्रादि स्थानं च प्रतिपादयति ।।

[भा.२१४] सचित्तादीदव्वेखेत्ते गामादि अद्ध दुविहाओ ।
सुरनारगभवठाणं सेसाणं कायभवठाणं ।।

वृ- ज्ञशरीर भव्यशरीर व्यतिरिक्तं नोआगमतो द्रव्ये द्रव्यस्य स्थानं त्रिधा सचित्तादि । पदैकदेशे पदसमुदायोपचारादेवं निर्देशो यावत्पुनरिदंद्रष्टव्यं सचितद्रव्यस्थानादि तद्यथा सचित्तद्रव्यस्थानमचित्त-द्रव्यस्थानं मिश्रद्रव्यस्थानं च । तत्र सचित्तद्रव्यस्थानमपि त्रिधा द्विपद सचित्तद्रव्यस्थानं चतुष्पद सचित्तद्रव्यस्थानमपदसचित्तद्रव्यस्थानं च, तत्र दिने दिने यत्र मनुष्या उपविशंति, तच्च द्विपदानां सचित्तद्रव्याणां स्थानं यत्र पुनर्दिनेदिने चतुष्पदागवादयो निवसंति तच्च चतुष्पद सचित्तद्रव्यस्थानं यत्रपुनर्गुरुकंफलं निक्षिप्यते तत्रापदानां हरितकायानां स्थानं जायते किलेति तत् अपदसचित्तद्रव्यस्थानं यत्र फलकादीनि निक्षिप्यंते तत् अचित्तद्रव्यस्थानं यत्पुनस्तेषामेव द्विपदादी नामलंकृतविभूषितानां स्थानं जलभृतस्य वाघटस्य यत् स्थानं तत् मिश्रद्रव्यस्थानं खेत्ते गामादि इति । क्षेत्रे विचार्यमाणे गामादि द्रष्टव्यं किमुक्तं भवति, क्षेत्रं नामग्रामनगरादिस्तस्यस्थानं क्षेत्रस्थानं, अथवा यत्र क्षेत्रे ग्रामादिग्राम नगरादि निवेश्यते तत् क्षेत्रं ग्रामादीनां स्थानमिति क्षेत्रस्थानं क्षेत्रमेवस्थानं क्षेत्रस्थानमिति व्युत्पत्तेः, तथा च लोके ग्रामादीनामुद्वसितानां स्थानमवलोक्यवक्ताभवति । इदं ग्रामस्थानमिदं नगरस्थानमिति अद्धदुविहाउ इत्यादि । अद्धाकालः स द्विधा जीवेषु अजीवेषु च तत्राजीवेषु यस्य यावती स्थितिः तस्यतावान् कालः स्थानं जीवेषु संसारिषु पुनर्द्विविधः कालः कायस्थितिः भवस्थितिश्च तत्र सुरनारकाणामेकभवावस्थानात् भवस्थानं भवस्थितिः कालस्थानं, शेषाणां तिर्यङ्मनुष्याणामनेकभव-ग्रहणसंभवात् कायभवस्थानं यथासंभवाकाय स्थितिः कायस्थानं भवस्थितिः, भवस्थानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालस्थानमित्यर्थः अथवा कालस्थानं समय आवलिका इत्यादि कालसामान्यस्य एतेषु विशेषेष्ववस्थानात्, ऊर्ध्वादि स्थानप्रतिपदनार्थमाह -

[भा. २१५] ठाणनिसीयतुअट्टण उड्ढा दीवसहि निवसए जथ्थ ।
विरत्तीदेसे सव्वे संजमठाणा असंखाउ ।।

वृ- मूलगाथायां उर्ध्वग्रहणंतज्जातीयतया निषीदनत्वग्वर्त्तनयोरुपलक्षणं ततइहोक्तमूर्ध्वादि किं तत् ऊर्ध्वादीनिचेदत आहस्थान निषीदनत्वग्वर्त्तनानिसूत्रेत्रविभक्तिलोपः प्राकृतत्वात् तत्रस्थानमूर्ध्वस्थानं कायोत्सर्गइत्यर्थः, निषीदनमुपवेशनंत्वग्वर्त्तनंशयनं तथा साधुजनइतरो वा यत्रनिवसतिसा वसतिः सैवस्थानं वसतिस्थानं, विरतिद्विधादेशे सर्वस्मिंश्च तत्रदेशविरतिः श्रावकाणां पंचाणुव्रतभावात् सर्वविरति साधूनाम्पंचमहाव्रत भावात् सैवस्थानं तत्र श्रावकाणां साधूनां चावस्थानात् विरतिस्थानं संयमस्थानं ज्ञानदर्शनचारित्र परिणामात्मकोध्यवसाय विशेषः तान्यसंख्येयानि तत्रप्रथममपि संयमस्थानं पर्यवपरिमाणचिंतायां सर्वाकाशप्रदेशेभ्योऽनंतगुणं द्वितीयादीनितु संयमस्थानानि तानि उत्तरोत्तर विशुध्ध्याप्रवर्द्धमानानि यथोत्तरमनंतभागाधिकादीनि षट्स्थानक परिवृध्ध्याज्ञातव्यानि, तानि च सामायिकवतः छेदोपस्थापनवतश्च प्रत्येकं मूलदारभ्यासंख्येयानिपरस्परंतुल्यानि चतानि, परिहारवि शुद्धित्वात् ततः परंयान्यसंख्येयानि संयमस्थानानि तानि प्रत्येकंत्रयाणामपि परिहारविशुद्धिक १ । सामायिक । २ । छेदोपस्थापनवतां च प्रत्येकंप्रायोग्याणि, नतु परिहारविशुद्धिकानामतिविशुद्धत्वात्। ततः पराणि सूक्ष्मसंपरायस्यैव केवलस्यप्रायोग्याणि नतु सामायिकादिवतामतिविशुद्धत्वात्, तानिचांतर्मुहूर्त्तसमयप्रमाणान्यसंख्येयानि ततः परमनंतगुणमेकं यथाख्यातं संयमस्थानं स्थापना; प्रग्रस्थान प्रतिपादनार्थमाह -

[भा. २१६] पग्गहलोइयरेय, एक्केक्को तत्थ होइ पंचविहो ।
रायजुयरायमच्चे सेट्ठिपुरोहिय लोगंमि ।।

वृ- प्रकर्षेण प्रधानतया वागृह्यते उपादीयते इति प्रग्रहः कर्म्मएयल् प्रत्ययः प्रधानपुरुषः स द्विधा लौकिक इतरश्चतत्र तयोर्द्वयोर्म्मध्येएकैकोलौकिक इतरश्चप्रत्येकंभवति पंचविधः पंचप्रकारः । तानेवपंचप्रकारान् लौकिके तावद्दर्शयति राजाप्रजापतिर्युवराजः द्वितीयस्थानवर्त्ती अमात्यो राजकार्य चिंताकृत् श्रेष्ठीतुष्टनरपति प्रदत्त श्रीदेवताध्यासित सौवर्णपट्ट विभूपितोत्तमांगोनगरचिंताकारी नागरिकजन श्रेष्टः, पुरोहितः शांतिकर्म्मकृत् । एषपंचविधः प्रग्रहोलोके राजादीनांजनैः प्रधानतयो पादीयमानत्वात् इतरमाह -

[भा. २१७] आयरिय उवज्झाए पवत्तिथेरे तहेव गणवच्छे ।
एसो लोगुत्तरितो पंचविहो पग्गहो होइ ।।

वृ- आचार्योनुयोगाचार्यादिको, उपाध्यायः सूत्रप्रदायी, प्रवर्त्तयतीत्येवं शीलः प्रवर्त्ताःप्रवर्तकः धर्म्मे विषीदतां प्रोत्साहकः स्थविरः श्रुतस्थविरादिः, गणावच्छेदको गणतप्तिकारी एष लोकोत्तरिको लोकोत्तरभावी पंचविधःप्रग्रहो भवति आचार्यादीनां लोकोत्तरेप्रधानतयोपादीयमानत्वात्; योधादिस्थानप्रतिपादनार्थमाह -

[भा. २१८] आलीढपच्चालीढे वेसाहे मंडले य समपाए ।
अयलेयनिरेयकाले गणणे एक्काइजोकोडी ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- योधानां स्थानं पंचविधं तद्यथा आलीढं प्रत्यालीढं वैशाखं मंडलं समपादं च, तत्र दक्षिणमूरुमग्रतो मुखं कृत्वा वाममूरुं पश्चात्मुखमपसारयति । अंतराचद्वयोरपि पादयोः पंचपादाः ततो वामहस्तेन धनुर्गृहीत्वा दक्षिणाहस्तेनप्रत्यंचामाकर्षाति तत् आलीढस्थानं यत्पुनर्वाममूरुमग्रतो मुखमाधाय दक्षिणमूरुं पश्चात्मुखमपसारयति अंतरा वात्रापि द्वयोरपि पादयोः पंचपादास्ततः पूर्वप्रकारेण युध्यते तत् प्रत्यालीढं स्थानमालीढस्य प्रतिपथिविपरीतत्वात् प्रत्यालीढं प्रत्युनः पार्ष्णी अभ्यंतराभिमुखे कृत्वा समश्रेण्याकरोति अग्रिमतले च बहिर्मुखे ततो युध्यते तत् वैशाखं स्थानं तथा द्वावपि पादौ समौ दक्षिणवामतोऽपसार्य ऊरु प्रसारयति यतामध्ये मंडलं भवति अंतरा चत्वारः पादास्तत् मंडलं द्वावपि पादौ समौ निरंतरं यत् स्थापयति जानुनी ऊरु चाति सरले करोति तत्समपादं, एतैर्हि पंचभिरपि स्थानैर्योधाययथायोगं युध्यंते, तत् एतानि योधस्थानाति, तथा अचलो निःप्रकंपः परमाण्वादिर्भवति, यत् निरंजकाले तत् अचलस्थानं अचलंच तत्स्थानं चावस्थानमचलस्थानमिति व्युत्पत्तेर्वा निरंजकालश्च परमाएवादीनामयं परमाणुपुग्गलेणं भंते निरेयकालतोकेवचिरं होइ जहन्नेणं एक्कं समयं, उक्कोसेणं असंखेज्जं कालं असंखेज्जा वा उस्सप्पिणि ओसप्पिणिओ इत्यादि । तथा गणने संख्यायां स्थानमेकादि एकं दशशतं सहस्रमित्यादि यावत् कोटी कोट्यः पर्यंतत्वमभिदधानं एतज्ज्ञापयति, प्रायो लोकव्यवहारेकोट्याः परं संख्यास्थानं कोट्येव दशशतादि विशेषितानि त्वन्यत् संख्यांतररुपस्थानमिति । संधनास्थानमाह ।

[भा.२१९] रज्जुयमादि अच्छिन्नं, कंचुयमादीण छिन्नसंधणया ।
सेढिदुगं अछिन्नं अपुव्वगहणं तु भावंमि ।।

वृ- संधना संधानकरणं सा द्विधा द्रव्यसंधना भावसंधना च द्रव्यसंधना द्विविधा च्छिन्नसंधना अच्छिन्नसंधना च तत्र रज्जुकादिकमछिन्नं यत् वलयति एषा छिन्ना द्रव्यसंधना कंचुकादीनां छिन्नसंधनता कंचुकादयो ह्यन्योन्यखंडमीलनतः संधीयते ततस्ते छिन्नसंधना । भावसंधनापि द्विधा, छिन्नसंधना अछिन्नसंधना च तत्राछिन्नसंधना श्रेणिद्विकमुपशमश्रेणिः क्षपकश्रेणिस्तुपशमश्रेणिरछिन्नसंधना क्षपकश्रेण्यामपि दर्शन सप्तकक्षयानंतरं कषायाष्टकादि क्षपयितुं प्रवृत्तो नियमादाकेवलप्राप्तेर्ननिवर्त्तते, ततः क्षपकश्रेणिरप्यच्छिन्नसंधना, अपुव्वगहणं तु भावंमि इति प्रशस्तेषु भावेषु प्रवर्त्तमानो यदपूर्वं भावं संदधाति एषाप्यछिन्ना भावसंधना शुभभावसंधनस्या व्यवछिन्नत्वात् । इयं पुनः छिन्नसंधना ।।

[भा.२२०] मीसातो उदइयं गयस्स मीसगमनेपुनोच्छिन्नं ।
अपसत्थ पसत्थं वा भावे पगयं तु च्छिन्नेण ।।

वृ- छिन्नाभावसंधनामिश्रः क्षायोपशमिको भावः तस्मात् मिश्रात् क्षायोपशमिकात् भावात् यदा औदयिकं भावं संक्रामति तदा तस्य औदयिकं गतस्य छिन्नं भावसंधानं भावांतरे संक्रांतत्वात्, तथा तस्मादौदयिक भावात् यदापुनर्मिश्रगमनं भवति मिश्रं भावं संक्रामति तदापि छिन्नं भावसंधानं एवं शेषेष्वपि भावेषु यथा यथायोगं भावनीयं, अथवा द्विविधा छिन्नभावसंधना प्रशस्ताऽप्रशस्ता च तत्र यदा प्रशस्ते चरणादिभावे स्थितः सन् तथाविधकर्मोदयवशतोऽप्रशस्तं चरणभावं संक्रामति, तदा अप्रशस्ता छिन्नभावसंधना यदा पुनरप्रशस्तादचरणभावात् प्रशस्तं चरणभावं संक्रामति तदा प्रशस्ता छिन्नाभावसंधना अत्र प्रकृतमधिकारः च्छिन्नेन भावसंधानेन तत्राप्यप्रशस्तेन तथाहि प्रायश्चित्तस्थानं तदा प्रतिसेवतं यदा प्रशस्तादभावाद प्रशस्तं भावं संक्रांतो भवति तदेवं स्थाननिरुपणा कृता, संप्रति यदुक्तं सूत्रे पडिसेवित्ता इति तत्र प्रतिसेवना व्याख्यानार्थमाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२२१] मूलुत्तरपडिसेवा मूले पंचविहे उत्तरे दसहा ।
एक्केक्का वि य दुविहा दप्पे नायव्वा ।।

वृ- प्रतिसेवनानाम प्रतिसेवना सा च द्विधा मूलोत्तरत्ति, पदैकदेशे पदसमुदायोपचारात् मूलगुणातिचार प्रतिसेवना, उत्तरगुणातिचारप्रतिसेवना च तत्र मूले पंचविहत्ति मूले मूलगुणातिचारप्रतिसेवना पंचविधा पंचप्रकारा, मूलगुणातिचाराणां प्राणातिपातादीनां पंचविधित्वादुत्तरे त्ति उत्तरगुणातिचारप्रतिसेवना दशधा दशप्रकारा उत्तरगुणानां दशविधतया तदतिचाराणामपि दसविधत्वात् ते च दशविधा उत्तरगुणा दशविधं प्रत्याख्यानं तद्यथा - अनागतमतिक्रांतं कोटीसहितं नियंत्रितं, साकारमनाकारं, परिमाणकृतं निरवशेषं सांकेतिकमद्धा प्रत्याख्यानं च । अथवा इमे दशविधा उत्तरगुणाः । तद्यथा पिंडविशोधिरेक उत्तरगुणः पंचसमितयः पंचउत्तरगुणाः एवं षट् तपोबाह्यं षट्प्रभेदं सप्तम उत्तरगुणः अभ्यंतर षट्प्रभेदमष्टमः, भिक्षुप्रतिमा द्वादश नवमः अभिग्रहा द्रव्यक्षेत्रकालभावभेदभिन्ना दशमः एतेषु दशविधेपूत्तरगुणेषुयाति-चारप्रतिसेवना सापि दशविधेति एक्केकावियदुविहा इत्यादि एकैका मूलगुणातिचारप्रतिसेवना उत्तरगुणातिचारप्रतिसेवना च प्रत्येकं सप्रभेदाद्विविधा द्विप्रकारा ज्ञातव्या तद्यथा दर्प्पे कल्पे च दर्प्पिका कल्पिका चेत्यर्थः । तत्र या कारणमंतरेणप्रतिसेवना क्रियते सा दर्प्पिका या पुनः कारणे सा कल्पिका । अत्र शिष्यः पृच्छति -

[भा.२२२] किहभिक्खू जयमाणो आवज्जइ मासियं तु परिहारं ।
कंटगपहेवछलना भिक्खूवि तहा विहरमाणो ।।

वृ- कथं केन प्रकारेण भिक्षुर्यतमानः सूत्रोक्तनीत्या प्रयत्नपरो मासिकं परिहारं प्रायश्चित्तस्थान-मापद्यते, नैवापत्तिसंभवो, यतनया सर्वत्र प्रवृत्तेरितिभावः, आचार्य आह कंटगेत्यादि कंटकाकीर्णः पंथाः कंटकपथस्तस्मिन्निव यतनयापि वर्त्तमानस्यच्छलना भवति, ततो भिक्षुरपि तथा विहरन् यतमानो मासिकमापद्यते प्रायश्चित्तस्थानमिति, अत्रैव दृष्टांतरमाह -

[भा.२२३] तिक्खमि उदगवेगे, विसमं विवज्जलंभि वच्चंतो ।
कुणमाणो विपयत्तं अवसो जह पावए पडणं ।।

वृ- तीक्ष्णे अतिप्रबले शीघ्रे च उदकवेगे उदकरये यदि वा विषमे अतिदुर्गमे विज्जले सकर्दमस्थाने व्रजन् पुरुषः कुर्वन्नपि प्रयत्नमवशो यथा प्राप्नोति पतनं -

[भा.२२४] इह समणसु विहियाणं सव्वपक्षेण वीजयंताणं ।
कम्मोदय पच्चइया विराधना कस्सइ भवेज्जा ।।

वृ- इह श्रमणा लिंगमात्रधारिणोपि व्यवह्रियंते शाक्यादयोपि च, ततस्तद्व्यवच्छेदार्थं सुविहितग्रहणं शोभनं विहितमनुष्ठानं येषां ते सुविहितास्ततः श्रमणशब्देन सह विशेषणसमासः तथा प्रागुक्तदृष्टांतप्रकारेण सुविहितानां सर्वप्रयतने सर्वात्मना स्वशक्त्यनतिक्रमेण अपिशब्दो भिन्नक्रमः स चैवं योजनीयः, यतमानामपि मध्ये कस्यापि कर्मोदयप्रत्ययिका कर्मोदयहेतुका विराधना भवेत् आह? किमेकांतेनैव प्रतिसेवना कर्मोदयप्रत्ययिका उतान्योपि कश्चित्प्रकारः प्रतिसेवनाया अस्ति ? उच्यते अस्तीति ब्रूमः तथाचाह -

[भा.२२५] अन्नविहु पडिसेवा सा उ न कम्मोदएण जा जयतो ।
सा कम्मक्खयकरणी दप्पाजय कम्मजननीउ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कर्मोदयहेतुका या प्रतिसेवना सा तावदेकास्ति किंत्वन्यापि, कर्मोदयहेतुका या व्यतिरिक्तापि प्रतिसेवा प्रतिसेवनास्ति साउन कम्मोदएणंति तु शब्दोव्ययत्वेनानेकार्थत्वात् हेतौ ततोयमार्थः यतः सान्या प्रतिसेवना न कर्म्मोदयहेतुका, कर्म्मोदयहेतुकत्वे अन्यथा योगात् । सा च कारणे तत्रापि यतनया द्रष्टव्या तत्र या कारणे जयतोत्ति यतमानस्य यतनया प्रवर्त्तमानस्य प्रतिसेवना सा कर्मक्षयकरणी कर्म्मक्षयं क्रियतेऽनयेति कर्म्मक्षयकरणी करणे अनट् साहि नावशस्य सतः कर्मोदयहेतुका, किंतु सूत्रोक्तनीत्या, कारणे यतनया यतमानस्य ततस्तत्राज्ञाराधनात् सा कर्म्मक्षयकारिणी या पुनः प्रतिसेवना दर्प्पेण या च कल्पेप्ययतनया सा कर्म्मजननी तथाचाह । दप्पाजय कम्मजननीउ दप्पेण कारणेपि चा यतस्य प्रतिसेवा कर्म्म जन्यते अनया कर्म्मजननी तदेवं यतो दर्प्पेण कल्प्येपि चायतनया प्रतिसेवना कर्म्मजननी तत इदं सिद्धं ।।

[भा.२२६] पडिसेवणाउ कम्मोदएण कम्ममवि तन्नि मित्तागं ।
अन्नोन्नहेउसिद्धी तेसिंबीयंतकुराणं च ।।

वृ- प्रतिसेवना कर्मोदयेन किमुक्तं भवति, प्रतिसेवनाया हेतुः कर्मोदयः कर्म्मापि च तन्निमित्तकं प्रतिसेवनानिमित्तकं, कर्म्मणोपि हेतुः प्रतिसेवना इतिभावः एवं तेषां प्रतिसेवना कर्म्मणामन्योन्यं परस्परं हेतुसिद्धिः हेतुभावसिद्धिः केषामिव परस्परं हेतुभावसिद्धिरित्यत आह बीजांकुरयोरिव गाथायां द्वित्वेपि बहुवचनं प्राकृतत्वात् यथा बीजमंकुरस्य हेतुरंकुरोपि च परस्परया बीजस्य हेतुरित्यनयोः परस्परं हेतुभावस्तथा कर्म्मप्रतिसेवनयोरपि ।।

[भा.२२७] दिट्ठा खलु पडिसेवा सा उ कहं होज्ज पुच्छिए एवं ।
भणइ अंतोवस्सए बाहिं ववियारमादीसु ।।

वृ- परस्य चक्षुरादिप्रत्यक्षतस्तस्य स्वसंवेदनप्रत्यक्षेण दृष्टा खलु प्रतिसेवा सा नु क्षेत्रतः क्व भवेत् इति एवमनुना प्रकारेण पृष्टे सति भण्यते उत्तरं दीयते । अंतर्म्मध्ये उपाश्रये उपाश्रयस्य बहिर्वा विचारादिषु विचारादि निमित्तं बहिर्विनिर्गतस्य उपलक्षणमेतत् तेन कालतः प्रश्ने दिवा रात्रौ वा भावतः प्रश्न दर्प्पणकल्पेन वेत्यपि वक्तव्यमिति ।।

[भा.२२८] पडिसेविए दप्पेणं, कप्पेणं चावि अजयणाएउ ।
नविणज्जइवाधातो कं वेलं होज्ज जीवस्स ।।

वृ- दर्प्पेण कल्पेनाप्ययतनया प्रतिसेविते मासिकादिकमतीचारं प्रातेन संवेगमुपगच्छता आलोचना प्रयोक्तव्या एतद्य चिंतयितव्यं नापि नैव ज्ञायते कां चेलां कस्यां वेलायां व्याधातो जीवस्य जीवप्राणधारणे, जीवनं जीवः तस्य जीवितस्येत्यर्थः व्याधातो भवेत् अनालोचिते च यदि भ्रियते, ततो दीर्धसंसारी भवति तत एतत् भण्यते ।।

[भा.२२९] तं न खमं खु पमातो मुहुत्तमवि आसिउं ससल्लेण ।
आयरियपादमूले गंतूण समुद्धरे सल्लं ।।

वृ- यस्मादचिंतितः पतति, जीवितस्य व्याधातोऽनालोचिते च मृतस्य दीर्धसंसारिता, तस्मात् पमातो इति अत्र दकारस्य लोपः प्राकृतत्वात् प्रमादतः प्रमादवशेन सशल्येनातीचारशल्ययुक्तेन मुहूर्त्तमप्यासितुं न क्षमं, खु निश्चितं किंत्वाचार्यपादमूले गत्वा आलोचनाविधानेन प्रायश्चित्त प्रतिपत्त्या शल्यमतीचाररूपं समुद्धरेत् विशोधयेत् यस्मात् -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२३०] नहु सुज्झइ ससल्लो जह भणियं सासणे जिनवराणं ।
उद्धरियसव्वसल्लो सुज्झइ जीवो धुयकिलेसो ।।

वृ- यथा भणितं जिनवराणां भगवतामर्हतां शासने तथा ज्ञायते जिनवचनतो ज्ञायते इत्यर्थः नहु नैव सशल्यो अतीचार शल्यपरिकलितस्तपश्चरणादिकं प्रभूतमपि कुर्वन् शुध्यति अविसुद्धस्स न वड्ढइ गुणसेढीतत्तियाठाइ इति वचनात् किंतुध्धृतः सर्वशल्य संस्तपश्चरणादि भावतोधुतक्लेशोऽपगमित समस्त कर्म्मजालो जीवः शुद्धयति मुक्तात्मा भवतीति ।।

[भा.२३१] अहगं च सावराहो आसोविवपच्छितो गुरुसगासं ।
वइयगगामे संखडि पत्ते आलोयणा तिविहा ।।

वृ- इदमपि च चिंतनीयं, अहकं च अहमपि च सापराधस्तस्मान् मया गुरुपादमूले गत्वा प्रायश्चित्ताभ्युपगमेन शल्यमुद्धरणीयं एवं च चिंतयित्वा तस्यातीचारस्य विशोधनार्थमश्व इवयथा सारथिमनुवर्त्तयन् क्वचिदप्यप्रतिबद्धो अश्वो याति तथा संयमंकेवल मनु वर्त्तयन् गुरुसकाशं गुरोः समीपं प्रतिप्रस्थितो व्रजिकायां गोकुलेग्रामे प्रचुरोत्कृष्टभिक्षालाभे संखड्यां वाकस्यांचिदप्रतिबद्धः सन् गच्छेत् गुरुसमीपं च प्राप्तः सन् आलोचनां दद्यात् सा चाऽलोचना त्रिविधा तद्यथा विहारलोचना उपसंपदालोचना अपराधालोचना च तथा चाह पत्ते आलोयणतिविहा । प्राप्ते तस्मिन् तेनालोचना दातव्या सा च त्रिविधा यथोक्तरुपानवरमत्राधिकारोऽपराधालोचनया सूत्रे तस्या एव साक्षादुपादानात् तत्र यदुक्तमश्व इवेति, तद्व्याख्यानार्थमाह -

[भा.२३२] सिग्घु जु गई आसो अनुयत्तई सारहिं न अत्ताणं ।
इय संजमनुयत्त इवयादि अवंकितो साहू ।।

वृ- कशोत्पाटादिना सारथ्यभिप्रायमुपलक्ष्य यथाऽश्वः शीध्रंगतिऋजुगतिश्च सन् सारथिमनुवर्त्तयति न आत्मानं मंदगत्या वा इत्येवममुना प्रकारेण व्रजि कादिषु अवक्रियतो व्रजिकादिष्वगमनेन वक्रमगच्छन् साधु संयमं वाक् यस्य व्यवच्छेदफलत्वात् संयममेवकेवलमनुवर्त्तयति नतु व्रजिकादिषु गमनेनात्मानं आलोचना दातव्येत्युक्तं । तत्रालोचनादानं तावदस्तु आलोचना परिणामो पि महाफल इत्येतद्दर्शयति ।

[भा.२३३] आलोयणापरिणतो संमं संपत्थितो गुरुसगासं ।
जेइ अंतराउकालं करेइ आराहतो सोउ ।।

वृ- सम्यक्आलोचनापरिणतः आलोचनापरिणामपरिणतः सन् गुरुसकाशं गुरुसमीपं संप्रस्थितो यद्यंतरा कालं करोति तथापि स आराधक एव स्वशक्त्यनिगूहनेन प्रवृत्तेस्तु शब्दएवकारार्थो भिन्नक्रमश्च स च यथा स्थानं योजितः आलोचना त्रिविधेत्युक्तं तत्र प्रथमां विहारालोचनां तावदाह -

[भा.२३४] पक्खिय चउ संवच्छर, उक्कोसं बारसण्हवरिसाणं ।
से मणुन्ना आयरिया फड्डुगपतियायवियडेंति ।।

वृ- समनोज्ञा एकसंभोगिका आचार्याः परस्परं तथास्य साधुसमुदायः तथास्पर्द्धकपतयश्च स्वमूलाचार्यस्य समीपे पाक्षिके तत्राभावे चातुर्म्मासिके तत्राप्यभावे सांवत्सरिके तत्राप्यसत्यन्यदा उक्कोसमित्यादिउत्कर्षतो । द्वादशभिर्वर्षैः सूत्रे षष्ठीतृतीयार्थे प्राकृतत्वात् दूरादप्यागत्य विहारं विकटयंति प्रकटयंति । आलोचयंति इत्यर्थः । भावार्थो वृद्धसंप्रदायादवसातव्यः, सचायं-संभोइया आयरिया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्खिए आलोयंति, उमोवारायणीयस्स आलोएइ, रायनितोविउमरायनियस्स आलोएइ, जइ सोरायणिओ नत्थि, । जइ पुन उमरायणितोवि ओगो, वागीयत्थो न भवइ, तो चउम्मासिए आलोएई तत्थवि असइ संवच्छरिए तत्थवि असतीए जत्थमिलइ रायनियस्स उमगीयत्थस्स वा तत्थ उक्कोसेणंबारसहि वरिसेहिं दूरतोवि आगंतुं आलोएयव्वं, फडुगपइहिं वि आगंतु आलोएयव्वं, फड्डापइयावि आगंतु पक्खियाइसु मूलायरियस्समीवे आलोएति इति ।।

[भा.२३५] तुं पुन ओहविभागे दरभूते उह जावभिन्नोउ ।
तेन परेण विभागो संभमसत्थाइभयणाओ ।।

वृ- तत्पुनर्विहारालोचनं द्विधा । तद्यथाउहविभागे इति प्राकृतत्वात् तृतीयार्थे सप्तमी ओघेन विभागेन च ओधःसामान्यं विभाभागो विस्तरः । तत्र ये साधवः समनोज्ञादरभुत्तेइति ईषद्भुंक्ते वास्तव्यसाधुभिरितिगम्यते । भोक्तुमारब्धवतां वास्तव्यसाधूनामित्यर्थः, प्राधुर्णकासमागतांतेउहत्ति ओघेनालोचयंति यता अल्पाविराधनामूलगुणेतूत्तरगुणेत्वल्पापार्श्वस्थादितुदानग्रहण तश्चेत्येवमालोच्य मंडल्यांभुंजते तत्र यदिमूलगुणापराधनिमित्तं वा प्रायश्चित्तं पंचकादि यावत्भिन्नो भिन्नमासः भिन्नमासपर्यन्तमापन्ना भवंति तदालोचनया आलोच्य साधुभिः सहैकत्र समुद्दिशंति तदनंतरं विभागत आलोचयंति तेनपरेणविभागोत्ति तेनेत्यव्ययमनेकार्थत्वात्ततइत्यर्थे द्रष्टव्यं ततोभिन्नमासात् परेण परतो मासादिकं यदि प्रायश्चित्तमापन्नास्ततोविभागं पृथग्भावः विष्वक्समुद्दिशंति पश्चाद्विभागेनालोचयंति संभ्रमसत्थादि भयणाउ इति संभ्रमसार्थादिषु आदिशब्दात् गाढग्लानत्वादिकारणपरिग्रहः । भजना विकल्पना विष्वग्भोजनं पृथग्भोजनसंभवेभवति विष्वग्भोजनं तदभावेनेतिभावः इयमत्रभावना संभ्रमोनामअग्न्यादिभयसमुत्थंत्वरणं तत्र सार्थेन सह व्रजतोऽतरासार्थनिवेशतः साधवः प्राधूर्णाः प्राधूर्णिकाः समागताः सार्थश्च प्रचलितुकामः । अन्यद्वा तत्र ग्रामांतरे वा गाढग्लानत्वादिकं प्रयोजनमुपस्थितं ततः प्रतीक्षणं न सहंते, अथवा ते मासादिकं परिहारस्थानमापन्नाः भाजनानि पृथग्भूतानि न विद्यंते येषु विष्वग्भोजनं कुर्युः तत ओधेनालोच्य वास्तव्यसाधुभिःसहैकत्रैव भुंजते क्षणिकीभूत-पृथग्भाजनप्राप्तौ विष्वक् ततो विभागेनालोचयंति; सांप्रतमालोचनायाः कालनियममाह -

[भा.२३६] उहेणेगदिवसिया विभागतोणे गएगदिवसाउ ।
इति च दिवसतोवाविभागतो उघतो दिवसं ।।

वृ- ओघेनालोचना नियमाद्धैकदैवसिकी एकदिवसनिर्वृत्ता अल्पापराधत्वात् आसन्नभोजन-कालत्वाच्च विभागेनालोचना एक दिवसिकी अनेकदिवसिकी वा कथं पुनरनैकदिवसिकी संभवतीति चेत्उच्यते, बहवो यदा अपराधास्तदा बह्वालोचयितव्यमाचार्यश्च कथमपिव्यापृता भवेयुस्ततो न बह्वी वेलां प्रतीच्छंति, आलोचको वा गच्छादि प्रयोजनतो व्यापृतोभवेत् । तत एवमनैक दिवसिकी विभागालोचना भवति सा च विभागालोचना रत्तिं वा इति रात्रौ वा गाथायां द्वितीय सप्तम्यर्थे प्राकृतत्वात्प्राकृते हि विभक्तीनां व्यत्ययो भवति, व्यत्ययोप्यासामितिवचनात्, दृश्यते च । लौकिकप्रयोगेपि सप्तम्यर्थे द्वितीया यथाउअविनयतत्तिल्लेपूरेसि सरिद्दहमएसूरेकत्तोरत्तिमुद्देपाणि-उसद्धासउणयाणमिति दिवसतो वा सप्तम्यंतात् तस् प्रत्ययःदिवागतो विभागालोचना विस्तरबहुलत्वात्साह्याचार्यस्यालोचकस्य वा प्रपारिते न भवति ततोदिवसे रात्रौ वा सा न विरुध्यते इति ओधतओधालोचनापुनर्दिवसं दिवसे अत्रापि द्वितीया सप्तम्यार्थेओघालोचना हि भोजनकाले प्रत्यासन्ने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति साधवश्च रात्रौ न भुंजंते ततः । सा नियमतोदैवसिकी संप्रति त्रिविधाया अप्यालोचनाया वैभागिक्याः प्रशस्ताप्रशस्तदिनचिंतां चिकीर्षुरिदमाह ।।

[भा.२३७] विभागेन अप्पसत्थे दिनं मि रत्तिंचिववक्खवतोवावि ।
आइल्लादोणि भवेति बक्खवतो होइ तइया उ ।।

वृ- इह त्रिविधालोचना वक्तुमुपक्रांता तद्यथा विहारालोचना उपसंपदालोचना अपराधालोचना च एकैका द्विधा ओधतो विभागतश्च, तत्रोघतो भोजनकाले प्रत्यासन्ने भावान्न प्रशस्ताप्रशस्तदिनचिंता विभागतः पुनरस्तीति सा प्रोच्यते । आदिल्लादोन्निभवेइत्ति आद्ये द्वे आलोचने विहारालोचना उपसंपदालोचना चेत्यर्थः विभागेन विस्तरेण दीयमाने भवेयातामप्रशस्ते दिने रात्रौ वा अप्रशस्तायां विष्टिव्यतीपातादिदोषकलितेपि दिवसरात्रौ वा दीयते इति भावः दोषाभावात्, तथा पूर्वसूरि-भिरनुज्ञातत्वात्, विक्खवतो वा वेत्ति विपक्षतो वापि ते द्वे आद्ये आलोचने भवेयातां अप्रशस्तस्य प्रशस्तो विपक्षस्ततोऽयमर्थः प्रशस्ते वा दिवसे रात्रौ वा ते स्यातामिति विवक्खतो होउ तइयाओ इति तृतीया पुनरपराधालोचना विभागतो दीयमाना विपक्षतः सर्वस्य वाक्यस्य विपक्षव्यवच्छेदफलतया सावधारणत्वाद्विपक्षत एव प्रशस्तएव दिवसे रात्रौ वा भवतीति भावः सांप्रतमोघालोचनायाः प्रकारमाह-

[भा.२३८] अप्पामूलगुणेसु उत्तरगुणतो विराधना अप्पा ।
अप्पापा सत्थादिसु दानग्गह संपयोगोहा ।।

वृ- अल्पा स्तोकविराधना मूलगुणेषु प्राणातिपातनिवृत्त्यादिषु रात्रिभोजनविरमणपर्यंतेषु अल्पा विराधना उत्तरगुणेषु पिंडविशुद्ध्यादिषु अल्पा विराधना पार्श्वस्थादिषु पार्श्वस्थावसन्नकुशीलसंसक्तेषु दानग्रहसंप्रयोगतः दानसंप्रयोगतो ग्रहणसंप्रयोगतश्च एषा ओधत ओधेनालोचना एवमालोच्य मंडल्यामेकत्रसमुद्दिशंति विहारविभागालोचनाया विधिमाह -

[भा.२३९] भिक्खादिनिग्गए सुरहिते वियडंति फड्डगापईओ ।
सव्वसमक्खं केई ते विसरियंनुसारेति ।।

वृ- भिक्षादिनिर्गतेषु भिक्षार्थमादिशद्वाद्विचारभूमिगमनार्थमन्यप्रयोजनार्थं वा बहिर्विनिर्गतेषु साधुषु किमुक्तं भवति यस्यां वेलायां शिष्याः प्रतीच्छकाश्च बहिर्विनिर्गता भवंति तदानिं रहिते रहितस्य एकाकिन आचार्यस्य समीपे स्पर्द्धकपतिकाः स्पर्द्धकस्वामिनो विकटयंति, केचित् पुनराचार्या एतत् ब्रुवते ये स्पर्धकपतिना सह समागताःसाधवस्तेषां समक्षं स्पर्धकपतयो विकटयंति, किंकारणमिति चेत् । आहते वीसरियंनुसारेंति, यस्मात्ते यत् किमपि विस्मृतं तत् स्मारयंति कथयंति संप्रति यत् आलोचनीयं तदालोचनाविषयं विधिमाह -

[भा.२४०] मूलगुणापढमकाजा तत्थवि पढमं तु पंथमादीसु ।
पायअमपज्जणादी बिइए उल्लाइ पंथे वा ।

वृ- इह द्विविधा अपराधा मूलगुणापराधा उत्तरगुणापराधाश्च, तत्र उभयसंभवे प्रथमं, मूलगुणत्ति मूलगुणापराधा आलोचनीयाः, तेष्वपि मूलगुणापराधेषु मध्ये प्रथमं मूलगुणापराधः प्राणतिपात इति, स प्रथममालोचनीयः, । स च षड् जीवकायविषय इति कायाः प्रथमतः आलोचयितव्यास्ते च कायाः पृथिव्यादिक्रमेण तत्र सूत्रे उपन्यस्ता इति, तत्थवित्ति, तेष्वपि कायेषु पृथिव्यादिषु प्रथमं पृथिवीकायमेवमालोचयेत्, पंथमादीसु पायअपमज्जणादी, पंथादिषु यत्पादाप्रमार्जनादि कृतं किमुक्तं

भवति ? पथि व्रजता स्थंडिलादस्थंडिलमस्थंडिलात् स्थंडिलं कृष्णमृत्तिकातो वा नीलमृत्तिकां नीलमृत्तिकातो वा कृष्णमृत्तिकां, एवं शेषवर्णोष्वपति भावनीयं, संक्रामता पादयोर्यत् प्रमार्जनं न कृतं तथा वातोद्धतेन सचित्तेन रजसा सचित्तया वा मृत्तिकया संसृष्टेन हस्तेन संसृष्टेन मात्रकेणा वा यत् भिक्षाग्रहणं कृत्तं, तदेवमाद्यालोचयेदिति सर्वत्रापि सामर्थ्यात् योजनीयं, बितिए उल्लाइपंथे वा इति पृथिवीकायविराधनालोचनानंतरं द्वितीये अप्कायविषये यत् उदकार्द्रादि आदिशब्दात् सस्निग्धादि परिग्रहः एतदुक्तं भवति, उदकार्द्रेन सस्निग्धेन वा हस्तेन मात्रकेणा वा भिक्षाग्रहणं कृतं पथि वा मार्गे वा अयतनया उदकमुत्तीर्णा च । एवमादि तदालोचयेत् ।

[भा.२४१] तइए पइट्ठियादी, अभिधारणवीयणादि वाउंमि;
बीयाइ घट्टपंचमे, इंदिये अनुचायतो छट्ठे ।

वृ- अप्काय विराधनालोचनानंतरं तृतीये तेजस्काये यत् प्रतिष्ठितादि तेजसि परंपरादिप्रतिष्ठितं भक्तं पानं वा गृहीतं, आदिशब्दात् सज्योतिषि वसतावबस्थानं कृतमित्येवमादीति भाव तदालोचयेत् तदनंतरं वायौ वातकाये यत् अभिधारण वीजनादि कृतं धर्मार्त्तेन बहिर्वातोभिसंधारितो भक्तं पानं शरीरं वा वीजनकादिना वीजितं एवमादि तदालोचयेत्, ततः पंचमे वनस्पतिकाये बीयाइघट्टित्ति यवबीजादिघट्टनं आदिशब्दात् हरितकायादिपरिग्रहः उपलक्षणमेतत् तेन यदि वा बीजादिकं भिक्षासु पतितं ग्रहीतमित्येवमादि तदालोचयेत् तदनंतरं षष्ठे त्रसकाये इंद्रियानुपाततत इंद्रियवृद्धिक्रमेणालोचना दातव्या, तद्यथा प्रथमतो द्वींद्रियाणां संघट्टनपरितापनाद्यालोचयेत्, तदनंतरं त्रींद्रियाणां ततश्चतुरिंद्रियाणां ततः पंचेंद्रियाणामिति एवं प्रथममूलगुणापराधेषु क्रमेणालोचितेषु सत्सु ।

[भा.२४२] दुब्भासिय हसियादी बीए तइए अ जावियग्गहणं ।
घट्टणपुव्वरयाई इंदिय आलोगमेहुण्णे ।

वृ- द्वितीये मूलगुणापराधे मृषावादे मृषावादविषये यत् किमपि दुर्भाषितं भणितं हासेन वा मृषावादो भणित आदिशब्दात् क्रोधेन वा मानेन वा मायया वा लोभेन वा भयेन वा यत् किमपि मृषाभणितमिति परिग्रहस्तदालोचयेत्, तदनंतरं तृतीये मूलगुणापराधे एदत्तादानलक्षणे यत् अयाचितस्य तृणडगलादेर्ग्रहणं उपलक्षणमेतत् तेन अननुज्ञाप्य वा अवग्रहं कायिकादि व्युत्सृष्टं भवेदित्यादि परिग्रहः तदालोचयेत् ततो मैथुने मैथुनविषये यद्घट्टने पूर्वरतादि, किमुक्तं भवति, ? चैत्यभवनमहिमादिषु प्रभूतजनसंमर्द्दे स्त्रीशरीरसंघट्टने स्पर्श आस्वादितो भवेत; पूर्वरतक्रीडितं वा अनुस्मृतं स्यात् । इंदियत्ति इंद्रियाणि वा मनोहराणि उपलक्षणमेतत् वदनस्तनादिकमतिसुमनोहरमवेक्ष्य मनाक् रागं गतो भवेत् इत्यादि तदालोचयेत् ।

[भा.२४३] मुच्छातिरित्तपंचमे; छट्ठे लेवाडअगयसुंठादी;
गुत्तिसमिईविवक्खाणामि गहणुत्तरगुणेसु ।

वृ- चतुर्थमूलगुणापराधालोचनानंतरं पंचमे मूलगुणापराधे परिग्रहविषयभूते यत् उपकरणेषु मूर्च्छा कृता भवेत्, अइरित्तत्ति अतिरिक्तो वा उपधिः परिगृहीत एतदालोचयेत् तदनंतरं षष्ठे मूलगुणापराधे रात्रिभोजने लेवाडित्ति लेपकृदवयवः कथमपि पर्युषितो भवेत् । अगदं वा शुंठ्यादि किंचित् सन्निहितं परिभुक्तं भवेत् एवमादि आलोचयेत्, एवं क्रमेण मूलगुणापराधालोचनां दत्वा तदनंतरमुत्तरगुणेषु उत्तरगुणाविषये गुप्ति समितिविपक्षाः कृताः । अनेषणीयग्रहणं वाकारि, किमुक्तं भवति गुप्तिषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचिद्गुप्तः स्यात् समितिषु कदाचिदसमितोऽनेषणीयं वा भक्तं पानं वा गृहीतं स्यादित्यादि आलोचयेत् तथा -

[भा.२४४] संतंमिवि बलविरिए तवो वहाणे य जं न उज्जमियं;
एसाविहारवियडणा, वोच्छं उवसंपनाणतं ।

वृ- सत्यपि विद्यमानेपि बलं शरीरं प्राणः वीर्यमांतरी शक्तिर्यद्वशात् तपः कुर्व्वन् शरीरस्यातिकृशतायामपि न संयमयोगेषु सीदति; बलं च वीर्यं च बलवीर्य समाहारे द्वंद्वस्तस्मिन् तपसो द्विप्रभेदस्यापि उपधानं करणं तपउपधानं तस्मिन् नोद्यतं, नोद्यमः कृतः एतदपि आलोचयेत् । एषा विहारविकटना विहारालोचना उपसंपदालोचनादि प्राय एवंरूपा, केवलं यन्नानात्वं तद् वक्ष्ये, तत्र प्रथमतः उपसंपदालोचनाया अपराधा लोचनायाश्च विहारलोचनया सह नानात्वं दर्शयति -

[भा.२४५] एगमणोगा दिवसेसु होइ ओहे य पयविभागे य,
उवसंपयावराहे, नायमनायं परिच्छंति ।

वृ- उपसंपच्चापराधश्च उपसंपदपराधस्तस्मिन् आलोचना इति प्रस्तावात् गम्यते उपसंपदालोचना अपराधालोचना चेत्यर्थः, । प्रत्येकं द्विधा, ओहेय इत्यादि तृतीयार्थे सप्तमी ओधेन पदविभागेन च । तथा एकैकापि दिवसेषु चिंत्यमाना एगमनोगा इति पदैकदेशे पदसमुदायोपचारात्: एकदिवसिकी अनेकदिवसिकी च भवति । ओघालोचना एकदिवसिकी विभागालोचना एकादिवसिकी अनैकदिवसिकी चेत्यर्थः, तदेवमुक्तमनानात्वमधुना नानात्वमुपदर्शयति । नायमनायं परिच्छंति, उपसंपद्यमानं पूर्वं ज्ञातमज्ञातं च परीक्षंते परिभावयंति, परिभाव्य वा ज्ञानमावश्यकपदादिभिः परीक्षंते इयमत्र भावना, । उपसंपद्यमानो द्विविधो भवति ज्ञातोऽज्ञातः, तत्र यदि ज्ञातः स न परीक्ष्यते तस्याग्रेपि ज्ञातत्वात् अथाज्ञातस्तर्हि स आवश्यकादिभिः पदैः परीक्षणीय इति, संप्रति यदुक्तं विभागेण अप्पसत्थे दिनमित्यादि, तद् व्याख्यातुकाम आह -

[भा.२४६] दिवसातो उवसंपय अवराहे दिवसतो पसत्थंमि;
उव्वातो तदिवसं, तिराहं तु अतिक्कमे गुरुगा ।

वृ- विहारालोचनावत् उपसंपदालोचनापि विभागेन प्रशस्ते अप्रशस्ते वा दिवसे रात्रौ दातव्या दोषाभावात् । तथा पूर्वसूरिभिरनुज्ञातात्, अपराधे अपराधविषया पुनरालोचना, दिवसतो इति सप्तम्यंतात् तद्दिवसे उपलक्षणमेतत् रजन्यां वा, प्रशस्ते विष्टिव्यतीपातादिदोषवर्जिते व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात्, द्रव्यादिषु च प्रशस्तेषु दातव्या, नाप्रशस्तेषु एषा जिनाज्ञा, तथा उव्वातो तद्दिवसमिति यस्मिन् दिवसे उपसंपद्यमान आगतः, तस्मिन् दिवस यदि उद्वातः परिश्रांत इति कृत्वा न पृष्ट आचार्येण, ततः स आचार्यः शुद्धः । त्रयाणां तु दिवसानामतिक्रमे विमुक्तं भवति । त्रिषु दिवसेषु मध्ये यदि न पृष्टस्ततश्चतुर्थे दिवसे तस्यापृच्छतः परिहारस्थानं गुरुकाश्चत्वारो गुरुमासा एतच्च उपरि व्याख्यास्यते ।

[भा.२४७] समणुन्नदुगनिमित्तं, उवसंपज्जे ते य होइ एमेव ।
अणमणुने नवरं, विभागतो कारणे भइयं ।।

वृ- उपसंपद्यमानो द्विधा, तद्यथा समनोज्ञोऽसमनोज्ञश्च तत्र समनोज्ञस्य समीपे समनोज्ञ उपसंपद्यमानो द्विकनिमित्तं उपसंपद्यते, तद्यथा ज्ञानार्थं दर्शनार्थं च, न चारित्रार्थं, येन चरणं प्रति सदृश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव तस्मिन् समनोज्ञे द्विकनिमित्तमुपसंपद्यमाने एवमेव, विहारालोचनेव भवत्यालोचना इयमत्र भावना, समनोज्ञो द्विकनिमित्तमुपसंपद्यमान आलोचनां विहारालोचनामिव ओघेन ददाति, पदविभागेन च पदविभागालोचना एक दिवसेन वा भवत्यनेकदिवसैर्वा एवं समनोज्ञस्य उपसंपदालोचना, अणमणुने इत्यादि अन्यो नाम भिन्नसांभोगिकः अमनोज्ञाऽसंविग्नः । सोन्योऽसमनोज्ञश्च उपसंपद्यमानस्त्रिकनिमित्तमुपसंपद्यते । तद्यथा ज्ञानार्थं दर्शनार्थं चारित्रार्थं वा तस्मिंश्च तथोपसंपद्यमाने पूर्ववदालोचनाविधिः। अत्रापीयं भावना । अन्योऽसमनोज्ञो वा आलोचनां ददाति ओघेन पदविभागेन ददान एकदिवसेन वा ददाति, अनेकदिवसैर्वा नवरमिति विशेष एष पुनरत्र विशेषः तस्यान्यस्यामनोज्ञस्य वा आलोचना उत्सर्गतो विभागतः सर्वं वाक्यं सावधारणमिति विभागेन तत एव कारणे पुनर्भजितं विकल्पितं वेलाप्राप्तौ विभागालोचना भवति संभ्रमसार्थादिषु पुनः कारणेषु तदप्राप्तावोघेनालोचनेति भावः एषा भजना अपराधालोचनायामपि द्रष्टव्या, तथाहि अपराधालोचनायामप्युत्सर्गत एव विभागेन दातव्या, । अपवादकारणे पुनः भ्रमसार्थादिलक्षणे ओघेनापीति, संप्रति उद्घातो तद्दिवसमिति व्याख्यातुकाम आह।

[भा.२४८] पढमदिनमविप्फाले, लहुओ बितिए गुरु तइए लहुया ।
तेच्चिय तस्साकहणे, सुद्धमसुद्धो इमेहिं तु ।।

वृ- समनोज्ञ उपसंपादनार्थमागतस्तं यद्याचार्यः प्रथमदिवसमिति सप्तम्यर्थे द्वितीया प्रथमदिवसेन विप्फालेइ, देशीवचनमेतत् न पृच्छतीत्यर्थः । उक्तंच विप्फालणत्ति पुच्छणत्ति वा एगट्ठमिति, यथा कृत आगतः । कुत्र वा गमिष्यसि, किंनिमित्तं वा समागत इति । ततस्तस्य प्रथमदिवसे एवमविप्फालने परिहारस्थानं लहुयत्ति मासलघु द्वितीयेपि दिवसे यदि न पृच्छति ततो गुरुत्ति मासगुरुः, तइएत्ति तृतीयदिवसेप्यपृच्छने लहुया इति चत्वारो लघुमासाः, । चतुर्थेपि दिवसे यदि न पृच्छति ।, ततः तिण्हं तु अतिक्कमे गुरुगा इति वचनाच्चतुर्गुरु, पंचमादिष्वपि दिवसेष्वपृच्छने तदेव चतुर्गुरु, तिराहं तु अतिक्कमे गुरुगा इति निरवधितया वचनप्रवृत्तेः तेच्चिय तस्साकहणे इति, ते एव प्रायश्चित्तविशेषाः क्रमेण तस्याकथने, तद्यथा स पृष्टः सन् यदि ब्रूते कथयिष्यामि न तु कथयति, तत्सस्मिन् प्रथमदिवसे अकथने मासलघु द्वितीयदिवसेप्यकथयतो मासगुरु, इदानीं उद्घातो तद्दिवसमिति व्याख्याया अवसरः । तद्दिवसे प्रथमदिवसे उद्घात इति कृत्वा न पृच्छति ततः स आचार्यः प्रथमदिवसे अविप्फाले अपृच्छने लहुयत्ति लघु न दोषगुरु, शुद्ध इत्यर्थः । कारणवशेनापृच्छनात् द्वितीयदिवसे न पृच्छति मासगुरु, तृतीयदिवसेप्यपृच्छने चतुर्लघु, चतुर्थदिवसेप्यपृच्छने चतुर्गुरु, एवं तेनोपसंपद्यमानेन पृष्टेनापृष्टेन वा यद्ख्यातं भवति, यथाहममुकेन कारणेन समागत इति ततः स आगताश्चिंतनीयः सुद्धमसुद्धो वत्ति शुद्धोऽशुद्धो वा अत्र चत्वारो भंगास्तद्यथा निर्गमनमप्युशुद्धं आगमनमप्यशुद्धं, १ निर्गमनमशुद्धमागमनं शुद्धं २, निर्गमनं शुद्धमागमनमशुद्धं ३, निर्गमनमपि शुद्धमागमनमपि शुद्धं ४, अत्र प्रथमभंगे निर्गमनस्य इमेहिं तुत्ति एभिर्वक्ष्यमाणैर्द्वारैश्चिंतितान्येव द्वाराणि दर्शयति -

[भा.२४९] अहिगरणविगतिजोगे, पडिनीए थद्धलुद्धनिद्धम्मे ।
अलसअनुबद्धवेर, सच्छंदमती पयहीयव्वो ।।

वृ- यदि स उपसंपद्यमानोऽधिकरणदोषतः स्वस्थानान्निर्गतः, विगतित्ति विकृतिलांपट्यात् जोगति योगोद्वहनभीरुतया, पडिनीएत्ति प्रत्यनीकोऽत्रम साधुरिति बुध्धया, तथा थद्धलुद्धेत्यादि स्तब्ध इति वा लुब्ध इति वा, निर्द्धर्म्म इति वा अलस इति वा अनुबद्धवैर इति वा स्वच्छंदमतिरिति वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनिर्गतस्ततस्तस्य निर्गमनमशुद्धमिति कृत्वा पयहीयव्वांत्ति परिहर्त्तव्यः । तदपरिहरणे प्रायश्चित्तं, तत्राधिकरणविषये प्रायश्चित्तमाह -

[भा.२५०] गिहिसंजयअहिगरणे, लघुगुरु तस्स अप्पणोच्छेदे ।
विगइ न देइ घेत्तुभुतउद्धरियं च गहिएवि ।।

वृ- गृहिभिः संयतेश्च सहाधिकरणे विनिर्गतं यद्याचार्यः स्वीकरोति, ततो यथाक्रमं प्रायश्चित्तं लघुगुरुकं इयमत्र भावना यदि गृहस्थेन सहाधिकरणं कृत्वा विनिर्गतस्तं यद्याचार्यः संगृह्णाति, ततस्तस्याचार्यस्य परिहारस्थानं चत्वारो लघुमासाः, अथ संयतेन समधिकरणं कृत्वा समागतं संगृह्णाति ततश्चत्वारो गुरुकाः, तस्य पुनरागंतुकस्य पणत्ति रात्रिंदिवसपंचकप्रमाणः पर्यायस्य च्छेदः इहाधिकरणादिदोषतो विनिर्गतास्ते प्रश्नेऽप्रश्ने वा सति तदुक्तिवशादवसीयंते, तत्र विकृतिदोषविनिर्गतस्य पृष्ठस्यापृष्टस्य वा य उक्तिविशेषस्तं दर्शयति विगइमित्यादि । स आचार्यो विकृतं घृतादिकं ग्रहणाय न ददाति, तथा योगवाहिभिर्योगोत्तीर्णैः कायोत्सर्गकरणतो गृहीतेपि परिपूर्ने विकृतिजातेऽन्यैर्भुक्ते या उद्धरिता विकृतिस्तामपि नानुजानाति किंच -

[भा.२५१] नववज्जियाव देहो पगईए दुब्बलो अहं भंते,
तब्भावियस्स इण्हिं न य गहणां धारणं कत्तो ।

वृ- वज्जियावो नाम देशीवचनत्वादिक्षुः उक्तंच वज्ञियावगो उच्छु इति नववज्ञियावत् देहो यस्य स तथा इयमत्र भावना स ब्रूते अहं भगवन् नवेक्षुतुल्यो मम देहो यथा स इक्षुः पानीयेन विना शुष्यति, तथा ममापि देहो विकृतिं विना सीदति, अन्यच्चाहं स्वभावेन दुर्बलो, न विकृतिमंतरेण बलिको भवाभि, तथा सर्वदैव विकृत्या भावितदेहस्ततस्तद्भावितस्य सतो ममेदानीं तस्याभावेन बलं न सूत्रस्यार्थस्य वा ग्रहणमशक्तत्वात् पूर्वगृहीतस्य तु सूत्रस्यार्थस्य वा धारणं कुतः । तत् अशक्त्या सर्वं दूरत एव विस्मृतं, ततोहं विनिर्गतः संप्रति योगविषये प्रत्यनीकविषये चोक्तिविशेषं दर्शयति -

[भा.२५२] एगंतरनिव्वगति, जोगो पच्चत्थिगोव मे अत्थि ।
बुक्कखलिएसु गेण्ह, छिद्दाणि कहेइ य गुरूणं ।

वृ- तस्मिन् गच्छे योग एकांतरनिर्विकृतिकः विमुक्तं भवति!; स पृष्टोऽपृष्टो वा ब्रूते तस्याचार्यस्य गच्छं योगं एकांतरोपवासेनोह्यते, एकांतराचाम्लेन वा तथा योगवाहिनो योगोत्तीर्णस्यापि ते आचार्या विकृतिं न विसृजंति, ततः कर्कशास्तत्र योगा इति विनिर्गतः । तथा तद्गच्छे मे मम प्रत्यर्थिकः प्रत्यनीकोस्ति स कथंचित् सामाचारीयोगेषु बुक्कखलिएसुत्ति बुक्के विस्मृते, सामाचारीविशेषे स्खलिते दुःप्रत्युपेक्षणादिके मां गृह्णाति, अत्यर्थं खरंटयति, अथवा चुक्कखलितेषु जातेषु तानि चुक्कस्खलितानि अपराधपदे छिद्राणीव छिद्राणि गृह्णाति गृहीत्वा च गुरूणां कथयति पश्चात् गुरुवो मां खरंटयंति, ततो विनिर्गतः, संप्रति लुब्धस्य स्तब्धस्य वोक्तिविशेषं दर्शयति -

[भा.२५३] चंकमणादि उट्ठाणे, कटिगहणं झाउ नत्थि थद्धेवं;
भुंजइ सयमुक्कोसं, न य देंत तेसिं लुद्धेवं ।

वृ- स्तब्ध एवं भाषते, चंक्रमणादावुत्थाने कटिग्रहणां स्वाध्यायश्च नास्ति एतदुक्तं भवति, यद्याचार्याश्चंक्रमणं कुर्वन् आदिशब्दात् यदिवा कायिक्यादिभूमिं गच्छंत्यागच्छंति वा तथा अभ्युत्थातव्याः तेषां नायकत्वात् तत एवं चंक्रमणादावभ्युत्तिष्ठतामस्माकं कटी वातेन गृह्यते भूयो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयो उत्थाने पलिमंथभावात् सूत्ररूपस्यार्थरूपस्य वा स्वाध्यायस्य हानिः । अथनाभ्युत्थीयंते तत्र आचार्याः प्रायश्चित्तं ददति खरंटयंति च, ततोहं विनिर्गतः, लुब्धः पुनरेवं ब्रूते, यत् किमप्युत्कृष्टं शिखरिणी मोदकादि तदाचार्यः स्वयं भुंक्ते, न त्वस्माद्दशेभ्यो ददाति, अन्येभ्यो वा बालवृद्धदुर्बलप्राधूर्णकेभ्यो ददाति, तत एतदसहमानोहं निर्गतः अधुना निर्द्धर्म्मालसयोरुक्तिविशेषं प्रकटयति ।।

[भा.२५४] आवस्सियापमज्जण अकरणे उग्गदंडनिद्धम्मो,
बालावुड्ढादीहा; भिक्खाचरिया य उब्भामा ।

वृ- यो निर्द्धर्म्मा स पृष्टः सन्नेवं वक्ति, आवश्यकीप्रमार्जनाकरणे उग्रदंडा आचार्याः । इयमत्र भावना, यदि कथमपि निर्गच्छन् प्रविशन् आवश्यकी नैषेधिकी च न करोति, दंडादिकं गृह्णान् निक्षिपन्वा न प्रमार्जयति तत आचार्या निरनुकंपाः संत उग्रं प्रायश्चित्तरूपं दंडं प्रयच्छंति, ततोहं दंडभयात् विनिर्गतः, य पुनरलसः स एवं ब्रूते, बालाद्यर्थाय बालवृद्धादीनामर्थाय तस्मिन् गच्छे दीर्घा भिक्षाचर्या, अथवा क्षुल्लकं कर्कशं वा तत् क्षेत्रं, ततो दिने दिने उद्भ्रामा, भिक्षाचर्या प्रतिदिवसमन्यत्र ग्रामांतरे गत्वा नीयते इति भावस्तथा यदि कथमप्यपर्याप्तेन समागम्यते ततो गुरुः खरंटयति, किंवसतौ महानसमस्ति येनापर्याप्तः समागतः तस्माद् भूयोऽपि व्रज भिक्षार्थं, यतः कालोऽद्यापि बहुः प्राप्यत इति । ततोहं निर्गतः, सांप्रतमनुबद्धवैरस्वच्छंदमत्योरुक्तिविशेषं दर्शयति -

[भा.२५५] पानसुणगाव भुंजंति एगत्तो भंडिउंपिअनुबद्धोः
एगागिस्स न लब्भा, वलिउं थेवंपि सच्छंदो ।

वृ- अनुबद्धोऽनुबद्धवैरो भवति भंडित्वापि भंडनं कलहस्तमपि कृत्वा पानशुनका इव एकत्र भुंजते, इयमत्र भावना यथा पाणश्चांडालाः शुनकाः कुक्कुराः परस्परं भंडित्वा तत्क्षणदेवैकत्र भुंजते, एवं तत्र संयता अपि, नवरं मिथ्यादुःकृतं परस्परं दाप्यते इति विशेषः, अहं पुनर्न शक्नोमि हृदयस्थेन शल्येन तैः सह एकत्र समुद्देष्टुमिति विनिर्गतः, स्वच्छंदमतिः पुनोवं भाषते, एकाकिनः सतः स्तोकमपि न लभ्यं चलितुं, किमुक्तं भवति ! संज्ञाभूमावप्येकाकिनः सतो गंतुं न प्रयच्छंति, किंत्वेवं ब्रुवते, नियमात्संघाटकरूपतया केनापि सहितेन गंतव्यं, ततस्तमसहमानोहमत्रागतः एतान्यधिकरणादिप-दान्याचार्यः श्रुत्वा तं परित्यजति, एतैश्चाधिकरणादिपदैरागतस्य तस्योपसंपद्यमानस्य प्रतीच्छतश्चा-चार्यस्येदं प्रायश्चित्तं ।।

[भा.२५६] जइभंडणपडिनीए, लुद्धे अनुबद्धरोसचउगुरुगा,
सेसाणं हुंति लहुगा एमेव पडिच्छमाणस्स ।

वृ- यो यतिभिः सह भंडनं कृत्वा समागतः यश्च तत्र मे प्रत्यनीकः साधुरिति कृत्वा समागच्छेत् यश्च लुब्धो यश्चानुबद्धरोपः । एतेषामुपसंपदं प्रतिपद्यमानानां प्रायश्चित्तं चतुर्गुरुकाश्चत्वारो गुरुमासाः, शेषाणां गृहिभंडनकारिविकृतिलंपटयोगभीरुस्तब्धनिर्धर्म्मस्वचच्छंदमतीनां लघुका इति चत्वारो लघुकाः, । यः पुनराचार्यस्तदाचार्याननुज्ञया प्रायश्चित्तदानमंतरेण च प्रतीच्छति तस्यापि प्रायश्चित्तमेवमेव, तद्यथा यतिमंडनकारिप्रत्यनीकलुब्धानुबद्धवैरान् प्रतीच्छतश्चत्वारो गुरुमासाः शेषान् षट् प्रतीच्छतश्चत्वारो लघुमासाः । अथवा ये एते दोषा उक्तास्तेषां मध्ये एकनापि दोषेणा नागतो भवेत् किंत्वेभि-र्वक्ष्यमाणैस्तानेवाह ।।

[भा.२५७] एगे अपरिणाह वा अप्पाधारे य थेरए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गिलाणे बहुरोगी य, मंदधम्मे य पाहुडे ।

वृ- यदि एक एकाकी पश्चादाचार्यः । यदिवा अपरिणतः अकल्पिकवस्त्रादिसहितः स च कल्पिकवस्त्राद्युत्पादने लब्धिमान् । अथवा पश्चादाचार्योऽल्याधारसूत्रार्थनैपुनविकलः स च पृष्टः सन् सूत्रार्थकथने निपुणशक्तिमान् यदिवाचार्यः परिवारो वा स्थविरो जरसा वृद्धशरीरः स च तेषां प्रतिजागरकः अथवा पश्चादेको ग्लानः । स च चिंताकारी यदिवा पश्चात्तत्रैको बहुरोगी बहुरोगी नाम बहुभिः साधारणैः रोगैर्याप्यशरीरः स च तस्य वर्त्तापकः, यदिवा पश्चातनाचार्यपरिवारः सर्वोपि निर्द्धर्म्मा न गुर्वाज्ञां करोति केवलं तद्भयात् किमपि करोति तथा तत्र पश्चात् गुरोः केनापि सह प्राभृतं वर्तमानमस्ति । प्राभृतं नाम अधिकरणां, स च गुरोः क्रमेणाधिकरणापनयनतः साहाय्यकारी एवं प्राग्वर्त्तमाने यदि समागतो भवति तदा तस्य निर्गमनमशुद्धमशुद्ध त्वाद्य परित्याज्य इति । एनामेव गाथां व्याख्यातुकामः प्रथमत एकापरिणलाल्पाधारद्वाराणि व्याख्यानयति -

[भा.२५८] एगानियं पमोत्तुं । वत्थादिअकप्पिएहिं वा सहियं;
अप्पाधारेवायण तं चेव च पुच्छिउं देह ।

वृ- एकमेकाकिनं पश्चादाचार्यं मुक्त्वा यदि समागतः, अथवा वस्त्राद्यकल्पिकैः कथमपि गृहीतैरकल्पकैर्वस्त्रादिभिः सहितं मुक्त्वा एतेनापरिणत इति व्याख्यातं, यदिवा अल्पः सूत्रस्यार्थस्य वा आधार इति स आचार्यस्तमेव पृष्ट्वा शेषसाधुभ्यो वाचनां ददाति, तादृशं मुक्त्वा एतेनाल्पाधार इति विवृतं ।।

[भा.२५९] थेरं अतीमहल्लं, अजंगमं मोत्तु आगतो गुरुं तु ।।
सो च परिसावथेरा अहं तु वट्टावतोतेसिं ।

वृ- स्थविरमेव व्याचष्टे, अतीव महान्तमजंगमं गमनशक्तिविकलं गुरुं उपलक्षणमेतत् परिवारं स्थविरमुक्तरूपं मुक्त्वा यदि समागतः स च प्रतिजागरकस्तथा च तस्य पृष्टस्य सतोऽमुमेवोक्तिविशेषं दर्शयति स आचार्यः स्थविरः पर्षदापरिवारो वा अहं तु तेषां गुर्वादीनां वर्त्तापकः प्रतिजागरक आसम् एतेन स्थविर इति पदं व्याख्यातं, ग्लानबहुरोगनिर्द्धर्म्मपदानि व्याख्यानयति ।।

[भा.२६०] तत्थ गिलाणो एगो जप्पसरीरो य होइ बहुरोगी;
निद्धम्मा गुरुआणं न करेंति ममं पमोत्तूणं ।

वृ- तत्र गच्छे ग्लान एकोस्ति, यदिवा बहुरोगी यो जाप्यशरीरो भवति, स बहुरोगी, तं ग्लानबहुरोगिणं वा विमुच्य यदि समागतस्तथा निर्द्धर्म्मपरिषद्विषये तस्य पृष्टस्य सत उक्तिविशेषं दर्शयति, निर्द्धर्म्मणो धर्मवासनारहितास्तस्य ममाचार्यस्य शिष्याः सर्वथा गुर्वाज्ञां न कुर्वंति मां प्रमुच्य, मम पुनराज्ञां कुर्वंति, तादृशं वा निद्धर्म्मपरिवारं मुक्त्वा यदि समागतस्तर्हि स न प्रतिग्राह्यः केवलमयमुपदेशस्तस्मै दातव्यः । तमेवाह -

[भा.२६१] एयारिसं विउसज्ज विप्पवासो न कप्पइ ।
सीसायरिय पडिच्छे, पायच्छित्तं विहिज्जइ ।।

वृ- एतादृशमेकाक्यादिस्वरूपं गुरुमन्यं वा ग्लानादिकं व्युत्सृज्य परित्यज्य विशेषेण प्रवासोऽन्यत्र गमनं विप्रयासो भद्र तव न कल्पते बहुगुणाधारो भवान् कथमीदृशं कृतवान्, तस्मात् अद्यापि प्रायश्चित्तं प्रतिपद्य, पश्चात् गच्छ, स च समागतस्तस्य प्राक्तनस्याचार्यशिष्यो वा स्यात् प्रतीच्छको वा एवमागतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमुपसंपद्यमानं योप्याचार्यः प्रतीच्छति, सोपि प्रायश्चित्तभाक् ततः शिष्यप्रतीच्छकाचार्याणां प्रायश्चित्तं विवक्षुरिदमाह, सीसायरिए इत्यादि, शिष्ये आचार्ये प्रतीच्छके च प्रायश्चित्त विधीयते प्रायश्चित्तदानविधिरुच्यते इति भावः, प्रतिज्ञातमेव निर्वाहयति ।

[भा.२६२] एगे गिलाणगे वा, तिण्हवि गुरुगाउ सीसमादीणं;
सेसे सिस्से गुरुगा, पडिच्छलहुगा गुरूसरिसं ।

वृ- एकस्मिन् एकाकिनि गुरो ग्लाने वा तत्र गच्छे तिष्ठति यदि समागतः शिष्यप्रतीच्छको वा आचार्येणा तथासमागतः सन् यदि प्रतीच्छितस्तदा शिष्यादीनां शिष्यप्रतीच्छकाचार्याणां त्रयाणमपि प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः, यः पुनरन्यः शेषोऽपरिणताल्पाधारस्थविरबहुरोगमंदधर्म्म-परिवारलक्षणः, तस्मिन् शेषे यदि समागतः शिष्यः ततस्तस्य प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः अथ प्रतीच्छकः समागतस्तर्हि तस्य लघुकाश्चत्वारो लघुमासाः गुरूसरिसमिति, गुरोरपि शिष्यप्रतीच्छकसदृशं प्रायश्चित्तं, किमुक्तं भवति यदि शिष्यं प्रतीछति ततः प्रायश्चित्तं चत्वारो गुरुमासाः, अथ प्रतीच्छकं तर्हि चत्वारो लघुका इति ।

[भा.२६३] सीसपडिच्छे पाहुड, च्छेदो राइंदियाणि पंचेव ।
आयरियस्सवि गुरुगा, दोवेए पडिच्छमाणस्स ।

वृ- यदि प्राभृते गुरोः केनापि सहाधिकरणे वर्त्तमाने शिष्यः प्रतीच्छको वा समागतः तदा तस्य शिष्यस्य प्रतीच्छकस्य वा प्रायश्चित्तं पंच रात्रिंदिवानि पर्यायस्य च्छेदः, आचार्यस्य पुनर्द्वावप्येतौ प्रतीच्छतः प्रतिगृह्णतः प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासां तदेव प्रथमभंगे निर्गमनदोषा उक्ताः आगमनमशुद्धं तदा भवति, यदा व्रजिकादिषु प्रतिबध्यमानः समागतः तत्रापि प्रतिबंधनिमित्तं प्रायश्चित्तं सूत्रानुसारतो वक्तव्यं गतः प्रथमोभंगः द्वितीयभंगोप्येतादृश एव नवरं तत्रागमनं शुद्धं क्वचिदपि व्रजिकादौ प्रतिबंधाकरणात् तृतीयचतुर्थभंगावनुक्रमेणाह -

[भा.२६४] एतद्दोसविमुक्कं वइयादीपडिबद्धमायातं,
दाऊण पच्छित्तं; पडिबद्धंपि पडिच्छेज्जा ।

वृ- एतैरनंतरोदितैरधिकरणकारित्वविकृतिलांपट्यादिदोषैर्विमुक्तमेतेन निर्गमनं शुद्धमुक्तं, तथा व्रजिकादौ अप्रतिबद्धं क्वचिदपि प्रतिबंधमाकुर्वतमायातमेतेन गमनं शुद्धमुपदर्शितं एष चतुर्थो भंगः एष एवोत्सर्गतः श्रेयानिति ज्ञापनार्थं तृतीयभंगात्पूर्वमुक्तः । एवंभूतं प्रतोच्छंत् तृतीयभंगमाह - दाउणेत्यादि । यस्त्वधिकरणकारित्यादिदोषविनिर्मुक्तो निर्गतः केवलं व्रजिकादिषु प्रतिबध्यमानः समागतस्तमप्यपवादपदेन यत् व्रजिकादिषु प्रतिबंधकरणम भूत्तन्निमित्तं प्रायश्चित्तं दत्वा प्रतीच्छेद् ।

[भा.२६५] सुद्धं पडिच्छिऊणं, अपडिच्छणा लहुयतिंनिदिवसानि;
सीसे आयरिए वा, परिच्छा तत्थिमा होइ ।

वृ- शुद्धं निर्गमनमागमनदोषरहितं प्रतीच्छ्य प्रतिगृह्य त्रीन् दिवसान् यावत् परीक्षेत् किमेष धर्म्मश्रद्धावान् किंवा नेति, यदि पुनर्न परीक्ष्यते ततोप्य परीक्षणे लहुयत्ति मासलघुप्रायश्चित्तं, आचार्यांतराभिप्रायेण चतुर्मासलघु, सा च परीक्षा उभयथापि शिष्य आचार्यां परीक्षते, आचार्याः शिष्यः उभयथापि च परीक्षा आवश्यकादिपदैस्तथा चाह सिस्से इत्यादि, तत्र तस्मिन् उपसंपद्यमाने प्रतीच्छिते सति शिष्ये आचार्ये च परस्परमियमावश्यकादिपदैर्वक्ष्यमाणा परीक्षा भवति तामेवाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६६] आवस्सय पडिलेहण, सज्झाए भुंजणाय भासाय;
विंयारे गेलण्णे भिक्खगहणे परिच्छंति ।

वृ- आवश्यक प्रतिलेखने स्वाध्याये भोजने भाषायां विचारे बहिर्भूमौ ग्लाने भिक्षाग्रहणे च परस्परमाचार्यशिष्यौ परीक्षेते, तत्रावश्यकादिपदान्यधिकृत्य यथाचार्यः शिष्यं परीक्षते तथोपदर्शयति।

[भा.२६७] केई पुव्वनिसिद्धा, केई सारइ तत्र सारेइ;
संविग्गो सिक्खमग्गइ मुत्तावलिमो अणाहोहं ।

वृ- केचित्साधवो वरवृषभादयस्तस्योपसंपत्कालात् पूर्वमेव आवश्यकादिपदेषु ये दोषास्तेभ्यो निषिद्धा, यथा आचार्या इदमिदं च माकार्पुरिति ते तथैव वर्त्तमानास्तिष्ठंति, य पुनः केचित् अभिनवदीक्षितत्वाद् विना कारणेन प्रमाद्यंति तान् गुरुः सारयति सम्यग् यथोक्तानुष्ठाने प्रवर्त्तयति, तं पुनरुपसंपन्नं प्रमादस्थाने वर्त्तमानमपि न सारयति, तत्र यदि स उपसंपद्यमानः संविग्नो भवति, ततः सोऽप्रतिनोद्यमानः सन्नेवं चिंतयति, येषु स्थानेष्वहं प्रमादं कृतवान् तेष्वेव स्थानेष्वन्यान् प्रमाद्यत आचार्याः सारयंति अहो अहमनाथः परित्यक्त एतैरिति चिंतयित्वा संविग्नविहारमिच्छन् आचार्यपादमूले गत्वा मुत्तावलिमो इति निपातः पादपूरणे छिन्नमुक्तावलीप्रकाशान्यश्रूणि विमुंचन् पादयोः पतित्वा शिक्षां मार्गयते । याचते यथा मामप्य त्यादरेण भगवंतः शिक्षयंत्तां मा शरणमुपागतं परित्यजत एवं परीक्षानिर्वहतः परिग्राह्यः इतरस्तु परित्याज्यः तत्रावश्यके यथा परीक्षा कर्त्तव्या तथोपदर्शयति ।

[भा.२६८] हीनाहियविवरीए सतिवि बले पुव्वट्ठंते चोएइ ।
अप्पणचोवोदेन्ती नममंति इहं सुहं वसिउं ।।

वृ- हीनं नाम यत् कायोत्सर्गसूत्राणि मंदमंदमुच्चार्य शेषसाधुषु चिरकालं कायोत्सर्गस्थितेषु पश्चात् स कायोत्सर्गे तिष्ठति इत्यादि अधिकं नाम कायोत्सर्गसूत्राण्यतित्वरितं त्वरितमुच्चार्यानुपेक्षाकरणार्थं पूर्वमेव कायोत्सर्गे तिष्ठति, रत्नाधिके चोत्सारिते कायोत्सर्गे पश्चाच्चिरेण स्वं कायोत्सर्गमुत्सारयति इत्यादि, विपरीतं नाम प्रादोषिकान् कायोत्सर्गान् प्राभातिकानिव करोति, प्राभातिकान् प्रादोषिकानिव इत्यादि हीनं चाधिकं च विपरीतं समाहारो द्वंद्वस्तस्मिन् प्रमादतो वर्त्तमानान् अथवा सूर्ये किल अस्तमितमात्रे एव निर्व्याघाते सर्वैरपि साधुभिराचार्येण सह प्रतिक्रमितव्यं, यदि पुनराचार्यस्य श्राद्धाधिधर्म्मकथा-दिभिर्व्याघातस्ततो बालवृद्धग्लानासहान् निषद्याधरं च मुक्त्वा शेषैः सूत्रार्थस्मरणार्थं कायोत्सर्गेण स्थातव्यं, ये पुनः सत्यपि बले पूर्वं कायोत्सर्गे न तिष्ठंति । तान् पूर्वमतिष्ठतश्चोदयति, यः पुनः परीक्षते तं प्रमाद्यंतमपि न शिक्षयति, ततो यदि स एवं व्यवस्यति, यथात्मीयान्, प्रमाद्यतश्चोदयति न मामिति सुखमिह वसितुमिति, स इत्थंभूतः पंजरभग्नो ज्ञातव्यो न प्रतीच्छनीयः ।।

[भा.२६९] जो पुन चोइज्जंते दट्ठूण नियत्तए ततो ठाणा;
भणइ अहं भे चत्तो, चोएह ममंपि सीयंतं ।

वृ- यः पुनश्चोद्यमानान् शिक्षमाणान् शेषसाधून् दृष्ट्वा ततः स्थानात् निवर्त्तते, भणति च गुरुपादमूले गत्वा मन्युभराक्रांतो गद्गदस्वरेण अहं युष्मच्छरणमागतोपि भो भगवन् युष्माभिः शिक्षाया अप्रसादतस्त्यक्तः । न चैतत् भगवतां परमकरुणापरीतचेतसामुचितं तस्मात् प्रसादमाधाय मामपि सीदंतं शिक्षयध्वमिति, एष इत्थंभूतः प्रतिग्राह्यः कृता आवश्यकमधिकृत्य परीक्षा संप्रति प्रतिलेखन स्वाध्यायभोजनभाषाद्वाराणि अधिकृत्य तामाह -

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

[भा.२७०] पडिलेहणसज्झाए एमेवय हीणअहियविवरीयं,
दोसेहिं वा विभुंजइ, गारत्थियढड्डरभासा ।

वृ- एवमेवाश्यकोक्तेनैव प्रकारेण प्रतिलेखन स्वाध्याये च हीनमधिकं विपरीतं च कुर्वत आत्मीयान् शिक्षयते नतु तं परीक्ष्यमाणमित्यादि पूर्ववत् तत्र प्रतिलेखनायां हीनाधिकता नाम यत् कालतो हीनामधिकां चाप्रतिलेखनां करोति, खोटकादिभिर्वा हीनाधिकां वा, विपरीतता नाम प्रभाते यन्मुखपोतिकाद्विक्रमेण न प्रत्युपेक्षते किंतु स्वेच्छया यदिवा पूर्वाह्ने रजोहरणं निःपश्चिमं प्रत्युपेक्षते अपराह्ने तु सर्वप्रथममित्यादि, स्वाध्याये हीनता नाम यद्यप्राप्तायामपि कालवेलायां कालप्रतिक्रमणं करोति, अधिकता यदिक्रांतायामपि कालवेलायां न कालं प्रतिक्रामति, वंदनादिक्रियां वा तदनुगतां हीनाधिकां करोति, विपरीतता पौरुषीपाठमतिक्रांतायां पौरुष्यां पठति उत्कालिकं पौरुष्यामिति, तथा भोजनद्वारे आलोकादिविधिना सूत्रोक्ते न न भुंक्त दोषैर्वापि, असुरसुरं अवचवचं अहुयमवलंबियमित्यादि विपरीतरूपैर्भुक्ते, तत्रात्मीयान् तथा भुंजानान् शिक्षयते नतु परीक्ष्यमाणमित्यादि पूर्ववत्, भाषाद्वारे या अगारस्थितभाषा गृहस्थभाषा च ढड्डरभाषा स्थूरस्वरभाषा तां भाषते, तत्रात्मीयान् तथारूपता भाषमाणान् शिक्षयते, न पुनः परीक्ष्यमाणमित्यादि विभाषा पूर्ववत्, शेषाणि त्रीणि द्वाराण्येकगाथया प्रतिपादयति -

[भा.२७१] थंडिल सामायारीह वेतिअतरंगतनपडिजग्गे;
अभणितो भिक्खं न हिंडइ अनेसणादी च पिल्लेइ ।

वृ- स्थंडिले समाचारी पादप्रमार्जनडगलकग्रहणा, दिगालोकनादिरूपां हापयति परिभवति विलुंपतीत्यर्थः, तत्र तथा सामाचारीं विलुंपत आत्मीयान् साधून् शिक्षयते । न परीक्ष्यमाणमित्यादि प्राग्वत् गतं विचारद्वारं, ग्लानद्वारमाह । अतरंगतं असमर्थं ग्लानमित्यर्थः न प्रतिजागर्त्ति नापि तस्य ग्लानस्य खेलमल्लकादिकं समर्प्पयति । अत्रापि ग्लानमप्रतिजाग्रत आत्मीयान् साधून् शिक्षयते नतु परीक्ष्यमाणमित्यादि विभाषा पूर्ववत् गतं ग्लानद्वारं, भिक्षाग्रहणद्वारमाह । अभणितः सन् भिक्षां न हिंडते भणितोपि च इषद्धिंडिते सति प्रतिनिवर्त्तते, अनेषणादि वा प्रेरयति प्रवर्त्तयति किमुक्तं भवति । अनेषणीयां भिक्षां गृह्णाति, आदिशब्दात् कौटिल्येन चोत्पादयति । इत्यादिपरिग्रहः, तं च तथा भिक्षाग्रहणे प्रवर्त्तमानमपि न शिक्षयति, किंत्वात्मीयान् साधून् इत्यादि प्राग्वत्, तस्य चागमो द्वाभ्यां स्थानाभ्यां भवति, ततस्ते एव द्वे स्थाने प्रतिपादयति ।।

[भा.२७२] जयमाणपरिहवंते, आगमनं तस्स दोहिं ठाणेहिं;
पंजरभग्गअभिमुहे आवस्सगमादि आयरिए ।

वृ- तस्योपसंपद्यमानस्यागमनं द्वाभ्यां स्थानाभ्यां भवेत् । तद्यथा यतमानेभ्यः परिभवद्भ्यश्च, यतमाना नाम संविग्नाः परिभवंतः पार्श्वस्थादयः, उक्तं च -

सो पुन जयमाणगाण वा साहूण मूलातो आगतो होज्ञा ।
परिभवंताण मूलातो, आगतो होज्ञापरिभवंता ना पासत्था ।।

वृ- इति तत्र योयतमानसाधूनां मूलादागतः स ज्ञानदर्शनार्थे पंजरभग्नो वा समागतो भवेत्, यः पुनः परिभवतां मूलादागतः स चारित्रार्थमुद्यंतुकामः समागतो भवेत् अनुद्यंतुकामो वा ज्ञानदर्शनार्थमिति । अथवा यो यतमानेभ्यः समागतः स पंजरभग्नः, यः पुनः परिभवद्भ्यः उद्यंतुकामश्चारित्रार्थं समागतः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽभिमुखः पंजराभिमुखः एतयोर्द्वयोरपि समागतयोरावश्यकादिभिः पदैराचार्येण परीक्षा कर्त्तव्या तदेवमागंतुकस्य यथा आवश्यकादिभिः पदैराचार्येण परीक्षा कर्त्तव्या तथा दर्शिता, संप्रति तेनागंतुकेन यथाचार्यपरीक्षा कर्त्तव्या । तथोपदर्शयति । आवस्सगमाइ आयरिए आवश्यकादिभिः पदैरागंतुकेनापि आचार्येण आचार्यस्य परीक्षा कर्त्तव्याः सा चेवं । आवश्यकादिषु पूर्वभणितेषु द्वारेषु मध्ये क्वापि यदि गच्छवासिनः कानपि सीदतः पश्यति ततः आचार्येभ्यः कथयति । तेन कथिते सति यथाचार्यः सम्यक् प्रतिपद्य तान् प्रमादिनः प्रतिचोदयति, । प्रायश्चित्तं प्रयच्छति, ततस्तत्रोपसंपत्तव्यं, अथ कथितेपि आचार्याः तूष्णीतिष्ठंति भणंति वा, किं तव यद्येते न सम्यग्वर्त्तंते, तर्हि अन्यत्र गच्छांतरे उपसंपत्तव्यं न तत्रेति अथ यतमानेभ्यः समागतः पंजरे भग्न इत्युक्तं तत्र पंजरेति किमुच्यते, । तत आह -

[भा.२७३] पणगाइसंगहो होइ, पंजरो जा य सारणा नोन्नं ।
पच्छित्तंव मढणाहिं, निवारणं सउणिदिट्ठंतो ।।

वृ- आचार्योपाध्यायप्रवर्त्तकस्थविरगणावच्छेदकरुपमादिशब्दात् भिक्षवो वृषभाः क्षुल्लका वृद्धाश्चः परिगृह्यंति, तेषां संग्रहः पंचकादिसंग्रो भवति, पंजरः अथवा आचार्यादीनां अन्योन्यं परस्परं सारणा, किमुक्तं भवति आचार्यादयः परस्परं यत् मृदुमधुरभाषया सोपालंभं वा शिक्षयंति एष वा पंजरः, यदिवा यत्प्रायश्चित्तं च मढनाभिरसमाचार्या निवारणपूर्वं खरपरुषैस्तर्जयित्वा पश्चात् प्रायश्चित्तप्रदानेन यदसामाचारीतो निवर्त्तनं तत् पंजरः, अत्रार्थे शकुनिदृष्टांतः यथा पजरे शकुनेः शलाकादिभिः स्वच्छंदगमनं निवार्यते, तथा आचार्यादिपुरुषगच्छपंजरे सारणाशलाकया असमाचारीरुपोन्मार्गगमनं निवार्यते इति, । अत्र ये यतमानानां मूलात् ज्ञानदर्शनार्थमागतो ये च परिभवतां मूलात् । चारित्रार्थमागच्छन् ते संग्रहीतव्याः । ये पुनः पंजरभग्ना ज्ञानदर्शनार्थमागता ये च परिभवतां मूलात् ज्ञानदर्शनार्थमागच्छन् ते न संग्रहीतव्याः । तत्र ये न संग्रहीतव्यास्ते एको वा स्यादनेके वा यत आह ।।

[भा.२७४] ते पुन एगमनेगानेगाणं सारणा जहा पुव्वं ।
उपसंपयत्ता आउट्टे अनउट्टे अन्नहिगच्छे ।।

वृ- ते पुनरुपसंपद्यामानाः कदाचिदेको वा स्यादनेके वा । तत्रानेकेषां या सारणा सा यथापूर्वं कल्पाध्ययने उवएसो सारणा चेव । तईया पडिसारणा इत्यादिना ग्रंथेन भणिता, तथात्रापि द्रष्टव्या, यः पुनरेकोऽसमाचारीकर्वुन् शिक्ष्यते शिक्ष्यमाणश्च यदि व्यावृत्तः शिक्षां प्रत्यभिमुखो भवति, ततस्तस्मिन् आवृत्ते षष्ठीसप्तम्योरर्थं प्रत्यभेदात् तस्यावृत्तस्य उपसंपद्भवति, यदि पुनर्नावर्त्तते तदा तस्मिन् अनावृत्ते इदं भण्यते, अन्यत्र गच्छ, स्था इति अथवा इदमुत्तरार्द्धं, आवस्सगमाइ आयरिए इति यदुक्तं । तस्य व्याख्यानं आवश्यकादिषु पदेषु गच्छवासिनः प्रमादिना द्दष्ट्वा आचार्याय कथयेत् । कथिते च सति यदि स आचार्यः सम्यग् आवर्त्तते निजसाधून् सम्यग् शिक्षयते । प्रायश्चित्तं च तेभ्यः प्रयच्छति, ततस्तस्मिन्नावर्त्ते तस्य तत्रोपसंपद्भवति, अथ कथितेनावर्त्तते, तूष्णीं करोति भणति वा किं तवैतैः स्वयं सम्यग्वर्त्तेथा इति, तदा अन्यत्र गच्छेदिति यदुक्तं प्राक् दाऊण पच्छित्तं बज्झंतपी पडिच्छेज्ञा इति तत् व्याख्यानयति ।।

[भा.२७५] निग्गमणे परिसुद्धे आगमने ऊसुद्धेदेंति पच्छित्तं ।
निग्गमणेअ परिसुद्धे इमाए जयणाए वारिंति ।।

वृ- तृतीये भंगे निर्गमने परिशुद्धे प्रागुक्तदोषवर्जिते, आगमने अशुद्धे व्रजिकादिषु प्रतिबंधकरणात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयपदे अल्पदोषतया प्रतीच्छाबुद्धौ सत्यां प्रायश्चित्तं प्रतिबंधमात्रनिष्पन्नं ददाति । दत्वा च प्रतीच्छंति, निर्गमने पुनः प्रथमभंगे द्वितीयभंगे वा अधिकारणमेव अधिकरणादिभिः एगे अपरिणए वा इत्यादिभिर्वा दोषैरशुद्धं न प्रतीच्छनीयः किंतु वारणीयः तं वाऽनया वक्ष्यमाणया यतनया वारयंति । तामेवाह ॥

[भा. २७६] नत्थी संकियसंघाडमंडलीभिक्खबाहिरानयनं ।
पच्छित्त विउस्सग्गे निग्गममुत्तस्स छन्नेणं ॥

वृ- यः पंजरभग्नो ज्ञानदर्शनार्थमागतः । तं प्रतीयं वाक्ययतना यत् त्वं श्रुतमभिलषसि, तन्मम पार्श्वे नास्ति, अथ स ब्रुयात्, मया श्रुतं यथाऽमुको ग्रंथोऽमुकस्य पार्श्वे युष्माभिः श्रुत इति, तत इदं वक्तव्यं, श्रुतः स ग्रंथः केवलमिदानीं बहुषुस्थानेषु शंकितं जातं, न च शंकितं श्रुतमन्यस्मै दीयते, प्रवचने निषेधात्। तस्मादन्यत्र निःशंकितश्रुतान् गवेषयस्व यस्तु स्वच्छंदमतिः संघाटकोद्विग्रः संज्ञाभूमिमात्रमप्येकाकिना गंतुं न लभ्यमिति समागतस्तं प्रतीदं वक्तव्यं, अस्माकमाचार्यपरंपरात् इयं सामाचारी संज्ञाभूमिमात्रमपि न गंतव्यमेतच्च तव दुष्करमतोन्यत्र गच्छ तावदिति, यः पुनरनुबद्धवैरत्वेनागतस्तं प्रतीदं वक्तव्यं, मंडलीति अस्माकमीदृशी सामाचारी यदवश्यं मंडल्यां समुदेष्टव्यं, यद्यपि च न पठति न श्रृणोति वा तथापि सूत्रपौरुष्यां मंडल्यामुपवेष्टव्यमर्थपौरुष्यां मंडल्यामुपविश्यार्थः श्रोतव्यः, न कदाचनापि साधूनां स्वचछंदत्वमेतच्च भवतोऽप्रीतिकरं, तस्मादन्यत्र गम्यतां । यस्त्वलसत्वेनागतस्तं प्रतीदं वाच्यं, भिक्खबाहिराणयणं, भिक्षायाः बहिःप्रदेशादानयनं, किमुक्तं भवति अस्माकमत्र क्षेत्रे बहवो बालवृद्धाः सग्लानाः साधवः ते च भिक्षां न हिंडंत, ततो यदि प्रतिदिवसं भिक्षा बहिः प्रदेशादानयसि । ततस्तिष्ठ, परमेतत् दुष्करं तव तस्मात् यत्र सुखेन तिष्ठसि, तत्र याहि, किमत्र क्लेशसहनेन यस्तु निर्द्धर्म्मा उग्रदंडा आचार्या इति विनिर्गतस्तं प्रतीदमुत्तरं, पच्छित्तत्ति । अस्माकमियं सामाचारी यदि दुःप्रमार्जनादिमात्रमपि करोति, तदा तत्कालमेव प्रायश्चित्तं यथोक्तं दीयते, न कालक्षेपेण नापि पक्षपातादिनास्तोकह्रासेन यस्तु विकृतिलंपटो न मह्यं विकृतिमनुजानातीति विनिर्गतस्तं प्रतीयं वाग्यतना ।

अविउसग्गत्ति अस्माकमप्ययं सामाचार्यागमः अव्युत्सर्गोऽनुत्कलनं विकृतेरिति व्याख्यानतो गम्यते, योगवाहिना अयोगवाहिना वा विकृतिर्न ग्राह्या इत्यर्थः, अत्राधिकरणप्रत्यनीकस्तब्धलब्धविषये यतना नोक्ता विचित्रत्वात्सूत्रभाष्यगतेस्तत्राधिकरणे यतना यथा कल्पामध्ययने तथा द्रष्टव्या, शेषविषया तु विनेयजनानुग्रहायभिधीयते, तत्र यः प्रत्यनीकस्तत्र मेस्तीत्यागतः, भण्यते ममापि शिष्याः प्रतीचछकाश्च ईषदपि प्रमादं न क्षमंते, मह्यं कथयति अहं च दोषानुरुपं दंडं प्रयच्छामि । अन्यथैकतरपक्षपातकरणतो गच्छ, मुद्राभंगः सर्वज्ञाज्ञाविलोपश्च, तस्मादत्रापि तव दुष्करमिति न स्थातुमुचित्तं, स्तब्धः पुनरेवं भण्यते, अस्माकमियं सामाचारी चंक्रमणादि कुर्वति गुरावभ्युत्थातव्यं, अनुभ्युत्तिष्ठतः प्रायश्चित्तप्रदानमिति, लुब्धं प्रत्येषा वाग्यतना उत्कृष्टद्रव्याणि मोदकादीनि अस्माकमपि बालवृद्धग्लानप्राधूर्णकिभ्यो दीयंते, तदेवं स्वच्छंदचारित्रप्रभृतीनां निवारणे वाग्यतनोक्ता. यदि पुनरेते तथा निवारिता अपि न वक्ष्यमाणप्रकारेण प्रत्यावर्त्तते, नापि निर्गच्छंति येपि च विशुद्धनिर्गमाः प्रतीच्छिताः संतः सीदंति तेषां परिस्थापने यतनामाह- निग्गममुत्तस्य छणेणं यदा परिस्थापयितुमिष्य-माणस्य स्वयं भिक्षादिनिमित्तं निर्गमो भवति, यदा वा रात्रौ निर्भरनिद्रया सुप्तस्तदा तं त्यक्तवा नंष्टव्यं, कथमित्याह छन्नेनाप्रकटमल्पलसागारिकं किमुक्तं भवति, येऽपरिणता बालादयो वा गच्छे तत्रां तेषां न कथ्यते । यथामुमेवं त्यक्त्वा नष्टव्यमिति, मा रहस्यभेदं कार्षुरिति एष गाथार्थः, सांप्रतमेनमेव गाथार्थं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनयजनानुग्रहाय विवृणोति -

[भा.२७७] नत्थि यं मि जमिच्छसि सुयं मया आमसंकियं तं तु ।
न य संकियं तु दिज्जइ निस्संकसुए गवेस्साहि ।।

वृ- यदिच्छसि शास्त्रं श्रोतुं तदेतत् मे मम पार्श्वे नास्ति, अथ ब्रूयात् मयेदं श्रुतं यथामुकं शास्त्रं भवद्भिः श्रुतमिति तत्राह आमं तत् शास्त्रं मया श्रुतं केवलमिदानीं शंकितं जातं, नच शंकितं दीयते तस्मान्निःशंकश्रुतान् गवेषय, संघाडइतिमंडलीति च द्वारद्वयं व्याचिख्यासुराह -

[भा.२७८] एगागिस्स न लब्भा, वियारादीवि जयणसच्छंदे ।
भोयणसुत्ते मंडलि पढंते वा नियोयंति ।।

वृ- स्वच्छंदे स्वच्छंदमतौ निवारणार्थमियं वाग्यतना, अस्माकमेकाकिनः सतो विचारादावपि बहिर्भम्यादावपि न लभ्यं गंतुमिति । अनुबद्धवैरे इयं वाग्यतना अस्मदीया मुनिवृषभा भोजने सूत्रे उपलक्षणमेतत् अर्थे वा पठंतोपि मंडल्यां नियोजयंति, एतच्च तव दुष्करमिति, अधुना भिक्खवाहिराणयणं पूच्छित्तविउस्सग्गे इति त्रीणि द्वाराणि व्याख्यानयति ।।

[भा.२७९] अलसं भणंति बाहिं जइ हिंडसि अम्ह एत्थ बालादी ।
पच्छित्तं हाडहडं अवि उसग्गो तहा विगई ।।

वृ- अलसं प्रतिभणंत्याचार्या अस्माकमत्र क्षेत्रे बहवो बालादयस्ते च भिक्षां न हिंडंते ततो यदि बहिर्भिक्षां हिंडसे तर्हि तिष्ठ, तर्हि, अन्यथा व्रज स्थानांतरमिति, निर्द्धर्म्माणं प्रति पुनरिदं वदंति अस्माकं स्तोकेपि दुःप्रमार्जनादौ कृते प्रायश्चित्तं हाडहडं देशीपदमेतत् तत्कालमित्यर्थः दीयते, अन्यथा मूलत एव सामाचारीविलोपप्रसक्तेः, विकृतिलंपटं प्रति पुनरियं वाग्यतना योगवाहिनो अयोगवाहिनो वाऽस्माकं गच्छे विकृतेरव्युत्सर्गोऽनुत्कलनं भवांश्च दुर्बलशरीरो नवक्षुरिव पानार्थिने विकृत्या पाल्यस्वभावस्तस्मा-दन्यत्र प्रयाहीति, यत्र चोदक आह -

[भा.२८०] तत्थ भवे मायमोसो एवं तु भवे नज्जवं तस्स ।
वत्तं च उज्जूभूते सोही तेलोक्कदंसीहिं ।।

वृ- यदेतन्निर्गमनाशुद्धे उपायेन प्रतिषेधनमुक्तं, तत्र कस्यचित् मतिः स्यात् । एवं प्रतिषेधतो माया भवति मृषावादश्च तत्र यत्परविप्रतारणचिंतनं, तन्माया, विद्यमानमपि श्रुतं नास्ति शंकितं वा तिष्ठति इत्यादि ब्रूवाणस्य मृषावादः, एवं तु अमुना प्रकारेण पुनर्म्मायामृषां कुर्व्वतो भवेत् तस्यानार्ज-वमनृजुतामायातः, । कुटिलभावभावात् उक्तं पुनस्त्रैलोक्यदर्शिभिरिदं शोधिः ऋजुभूते सोही उज्जुय-भूयस्सेत्यादि प्रदेशांतरे श्रवणात् । ततो नेदं मायामृषाभाषणमुचितमिति । अत्र सूरिः प्रत्युत्तरमाह -

[भा.२८१] एस अगीते जयणा गीते विकरेंति जुज्जइ जंतु ।
विद्देसकरं इहरा मच्छरिवा दो फुडरुक्खे ।।

वृ- एषा अनंतरोदिता वाग्यतना अगीते अगीतार्थे गीतेपि गीतार्थेपि निर्गमनाशुद्धे निवारणा क्रियते, केवलं स्फुटाक्षरैर्यथा एवंभूतात् दोषात् त्वमत्रागतः एवंभूतदोषश्च न सुविहितैः प्रतीछ्यते इति, न चैवं भणितः सुन् स रुष्यति गीतार्थत्वात्, गीतार्था हि सर्वामपि सामाचारीमवबुद्ध्यंते, अवबुद्ध्यमाना कथमप्रीतिं विद्वेषं कुर्वंतीति, तथाचाह । करेंति जुज्जइ जंतु ।यत् युज्यते युक्तिमापतति तत् गीतार्थाः कुर्वंति नाप्रीत्यादिकमिति, इहरत्ति इतरथा यद्यगीतार्थेपि स्फुटरुक्षैर्निवारणा क्रियते केवलं स्फुटाक्षरैर्यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंभूतदोषवान् त्वमत्रागतः ततः स्फुटरुक्षे भाषिते सति स्फूटं नाम सद्भूतदोषोच्चारणं, रुक्षं स्नेहोपदर्शनहितं, यदिवा स्फुटमेव परस्य रुक्षतोत्पादनात्, रुक्षं स्फुटरुक्षं तस्मिन् भाषिते तत् भाष्यमाणं वचस्तेषां विद्वेषकरं विद्वेषोत्पादकं भवति । अगीतार्थत्वात्, चिंतयंति च मत्सरभावेनैते सूत्रमर्थं वा न प्रयच्छंति, ततो मत्सरिण एते इति, एवं च चिंतयित्वा स्वपक्षे परपक्षे च मत्सरिण एते इति प्रकाशयंति ततो लोके मत्सरिप्रवादो विद्वेषकरं च तद्वचस्तेषां माभूदिति प्रागुक्तयतनया निवारणा क्रियते, न च मायामृषादोषसंभवो यतः पराप्रीत्यनुपादकतया परिणामसुंदरतया चोभयोरपि गुणकारित्वमवेक्ष्य तथा वाग्यतना क्रियते, न विप्रतारणबुद्ध्येति । एतेषामेव प्रतीच्छने अपवादमाह -

[भा.२८२] निग्गमसुद्धमुवाएण, वारियं गेण्हते समाउट्टं ।
अहिगरण पडिनि अनुबद्ध मेगागिजढं न साएज्ञा ।।

वृ- निर्गमोऽशुद्धो यस्य स निर्गमाशुद्धस्तं उपायेन प्रागुक्तयतनालक्षणेन वारितं समावृत्तं संतं गृह्णाति, किमुक्तं भवति यदि स तथा प्रतिषिद्धः सन् ब्रूते, भगवन् मिथ्या मे दुःकृतं न पुनरेवं करिष्यामि किंतु यथा यूयं भणिष्यथ, तथा करिष्यामि मुक्तो मया स पापस्वभावो दुर्गतिवर्द्धन इति, तत एवं तं समावृत्तं गृह्णाति, किं सर्वमपि नेत्याह अहिगरणेत्यादि नेत्याह अहिगरणेत्यादि योऽधिकरणं कृत्वा समागतस्तं यश्च तत्र मे प्रत्युनीकोस्तीत्युक्तवान् तं तथा अनुबद्धरोषं येन च पश्चादेकाकी आचार्यस्त्यक्तस्तं च न साएज्ञा न सात्मयेत् न सात्मीकुर्यात् न स्वीकुर्यादिति भावः केवलं प्रत्यनीके अपवादोस्ति तमेवाभिधित्सुराह -

[भा.२८३] पडिनीयंमिउ भयणा, गिहिम्मिं आयरियमादिदुट्ठंमि ।
संजयपडिनीए पुन, न होंति उवसामिए भयणा ।।

वृ- प्रत्यनीके भजना तामेवाह । गृहिणि गृहस्थे आचार्यादिदुष्टे किमुक्तं भवति, यदि कोपि नाम गृहस्थ आचार्यस्य आदिशब्दात् उपाध्यायप्रवर्त्तिस्थविरगणवच्छेदानां शेषभिक्षूणां च प्रद्विष्टः स चानेकधा उपशम्यमानोपि नोपशांतस्ततस्तस्मिन् आचार्यादिप्रदेष्टे गृहिणयनुपशांते तद्भयादागतः सन् प्रतिगृह्यते यदि पुनः स ब्रूयात् संयतो मे तत्र प्रत्यनीकोस्ति ततस्तस्मिन् संयतप्रत्यनीके न भवत्युपसंपत् न प्रतिसंगृह्यते इत्यर्थः । अथवा स भण्यते गच्छ त्वं तं क्षमयित्वा समागच्छ एवमुक्तो यदि तत्र गत्वा तं न क्षमयति ततो न स प्रतिगृह्यते अथ तेन गत्वाऽसौ क्षामितः केवलं स एव न क्षमते, तर्हि स पश्चादागतः प्रतिग्राह्यः । अथ स वक्ति मया स तदानीमेवागच्छता क्षामितः । तदा तस्मिन्नुपशांते स नियमात् प्रतिगृह्य एव न भवति भजना निर्दोषत्वात् ।

[भा.२८४] सो पुन उवसंपज्ञे, नाणट्ठा दंसणे चरित्ते य ।
एएसिं नाणत्तं वोच्छामि अहानुपुव्वीए ।।

वृ- स पुनरुक्तप्रकारेण संगृह्यमाण उपसंपद्यते ज्ञानार्थं ज्ञाननिमित्तं दर्शने दर्शननिमित्तं सप्तम्या निमित्ते विधानात् दर्शनप्रभावकशास्त्रनिमित्तमित्यर्थः चारित्रार्थं चारित्रनिमित्तं एतेषां ज्ञानाद्यर्थमुपसंपद्यमानानां नानात्वं भेदं यथोपन्यासं या अनुपूर्व्वी सा यथानुपूर्व्वी तया वक्ष्यामि प्रतिज्ञातमेव निर्वाहयति ।

[भा.२८५] वत्तणा संधणा चेव गहणे सुत्तत्थ तदुभये ।
वेयावच्च खमणे काले आवकहाएअ ।।

वृ- ज्ञानार्थं दर्शनार्थं चोपसंपत् प्रत्येकं त्रिधा, तद्यथा सूत्रं चार्थश्च तदुभयं च सूत्रार्थतदभयं तस्मिन् सूत्रेष्वेतदुभयस्मिंश्चेत्यर्थे निमित्तं सप्तमी चेयं ततयो भावार्थः । ज्ञानार्थं दर्शनार्थं चोपसंपद्यमानः प्रत्येकं सूत्रार्थं वा उपसंपद्यते अर्थार्थं वा तदुभयार्थं चेति पुनरेकैकं त्रिधा तद्यथा वर्त्तनेति अत्र सप्तमीलोपः प्राकृतत्वात् वर्त्तनायां । वर्त्तनानिमित्तं एवमेव संधनायां संधनानिमित्तं तत्र पूर्वगृहीतस्य सूत्रार्थस्य तदुभयस्य वा ग्रहणनिमित्तं, एवं ज्ञाने दर्शने च प्रत्येकं भवति त्रिधा उपसंपत् चरणोपसंपदा पुनरुपसंपद्यमानो द्विधोपसंपद्यते, तद्यथा वैयावृत्तनिमितं क्षपणे क्षपणानिमितं ते च द्विधापि उपसंपद्यमानाः कालतो यावज्जीवं भवेयुः । च शब्दादित्वराश्च एनामेवगाथां व्याख्यानयति -

[भा. २८६] दंसणनाणे सुत्तत्थतदुभये वत्तणा य एक्केके ।
उवसंपया चरित्ते वेयावच्चे य खमणे य ।।

वृ- दर्शनविशोधिकानि यानि सूत्राणि शास्त्राणि वा तानि दर्शनं, शेषाणि सूत्राणि शास्त्राणि वा ज्ञानं, तत्र दर्शने ज्ञाने च प्रत्येकमुपसंपत् त्रिधा, सूत्रनिमित्तमर्थनिमित्तं तदुभयनिमित्तं च, एकैकस्मिंश्च सूत्रादौ प्रत्यकं वर्त्तनादि त्रिभेदं वर्त्तना संधना ग्रहणं च, किमुक्तं भवति सूत्रेपि वर्त्तनानिमित्तमुपसंपद्यते, संधनानिमित्तमुपसंपद्यते, अपूर्वग्रहणनिमित्तं वा उपसंपद्यते, एवमर्थेपि त्रितयमुभयेपि त्रितयमिति, दर्शनेपि नवविधोपसंपत् ज्ञानेपि नवविधेति, चारित्रे चारित्रविषया उपसंपत् वैयावृत्ते क्षपणे च ।

[भा. २८७] सुद्धपरिच्छन्ने लहुगा अकारंते सारणा अनापुच्छा ।
तीसुवि मासो लहुत्तो वत्तणादीसुठाणेसु ।।

वृ- यत् गुरुसकाशे सूत्रं तत्सर्वमधीतं ततो गुरुभिरनुज्ञातो विधिना आपृच्छ्य व्रजिकादिष्व-प्रतिबध्यमान आगतः । आगतश्च सन् त्रीन् दिवसान् यावत् परीक्षितः शुद्धः इत्थंभूतं यो न प्रतीच्छत्या-चार्यस्तस्य प्रायश्चित्तं लघुकाश्चत्वारो लघुमासाः, योपि उपसंपन्नो वर्त्तमाननिमित्तं संधनानिमित्तं ग्रहणनिमित्तं वा स यदि वर्त्तनां संधनां ग्रहणं वा न करोति तदा तस्मिन् वर्त्तनादिकमकुर्व्वति प्रत्येकं त्रिष्वपि स्थानेषु वर्त्तनादिषु मासो लघुकः प्रायश्चित्तं, आचार्योपि यद्युपसंपन्नं प्रमाद्यंतं न सारयति ततस्तस्मिन्नपि सारणे अत्र विभक्तिलोप आर्षत्वात् । अकुर्वति त्रिष्वपि वर्त्तनादिषु स्थानेषु मासलघु एतच्च प्रायश्चित्तविधानं सूत्रविषयमर्थे पुनर्वर्त्तनादिमकुर्व्वति शिष्ये अर्थनिमित्तमुपसंपन्नं प्रमाद्यंतं वर्त्तनादिष्वसारयति गुरौ च प्रत्येकं त्रिष्वपि वर्त्तनादिषु स्थानेषु प्रायश्चित्तं मासगुरु, उभयविषयेषु द्वयोरपि प्रत्येकं वर्त्तनादिषु त्रिष्वपि स्थानेषु पृथक् उभयं प्रायश्चित्तं मासगुरु मासलघु चेति, एवं गाथायामनुक्तमपि संप्रदायादवसितं, तथा अणापुच्छाइति अनापृच्छायामनुज्ञामित्यर्थः अत्र चत्वारो भंगास्तद्यथा अननुज्ञातोऽननुज्ञातेन सह वर्त्तनां करोतीत्येको भंगः, अननुज्ञातोऽनुज्ञातेन सहेति द्वितीयः, अनुज्ञातो अननुज्ञातेनेति तृतीयः अनुज्ञातो अनुज्ञातेनेति चतुर्थः एवं संधनायां ग्रहणेपि च प्रत्येकं चत्वारो भंगाः एवमर्थेपि तदुभयस्मिन्नपि च प्रत्येकं वर्त्तनादिषु चत्वारश्चत्वारो भंगाः तत्र सुत्रविषये त्रिष्वपि वर्त्तनादिषु स्थानेषु प्रत्येकमाद्येषु भंगेषु ददानस्य च गृह्णणस्य च प्रायश्चित्तं मासलघु तपः कालविशेषितं तद्यथा वर्त्तनायामाद्येषु त्रिषु भंगेषु मासलघु, संधनायां मासलघु तपो गुरुकाललघु, ग्रहणे मासलघु, द्वाभ्यां गुरु तद्यथा - तपसा कालेन च, एवमर्थे तपः कालविशेषितं मासगुरु । तदुभयस्मिन् तदुभय-प्रायश्चित्तमर्थ विषयं तदुभयविषयं च प्रायश्चित्तं गाथायानुपात्तमपि व्याख्यानादुपगतंचः चतुर्थभंगः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः सर्वत्रापि शुद्ध इति न तत्र कस्यापि प्रायश्चित्तमिति, इहाचार्यस्यापि प्रमादतः सूत्रादिषु वर्त्तनादिकम-कुर्वंतमुपसंपन्नमसारयतः प्रायश्चित्तमतो नियमात्स आचार्येण सारयितव्यस्तथा च एतदेवाह -

[भा.२८८] सारेयव्वो नियमा उवसंपन्नोसि जं निमित्तं तु ।
तं कुणसु तुमं भंते अकरेमाणं विवेगो उ ।।

वृ- स उपसंपन्नो नियमात्सारयितव्यः कथमित्याह । अहो भदंत ज्ञानाद्यभ्यासकारितया परमकल्याणयोगिनू इह शिष्यस्याप्याचार्येण प्रोत्साहनार्थं तथाविधयोग्यतासंभवमधिकृत्यैवंविधमप्यामंत्रणं कर्त्तव्यमिति ज्ञापनार्थं, अन्यथा भदंतेति गुर्वामंत्रणे रुढत्वात्तत्रैव न्यायं न शिष्ये इति यन्निमित्त-मुपसंपन्नस्त्वं तत् कुरु एवमेकद्वित्रिवारं सारितोपि य दि न करोति वर्त्तनादिकं, ततस्तस्मिन्नकुर्व्वति विवेक एव परित्यागः कर्त्तव्यः तुरेवकारार्थः; यदुक्तमनापुच्छाइति तं व्याख्यानयति -

[भा.२८९] अननुन्नाए दंत पडिच्छंतभंगचउरोउ ।
भंगतियंमिवि मासो, दुहतोणुन्नाए सुद्धोउ ।।

वृ- अननुज्ञातो मकारोऽलाक्षणिकः । अनुनुज्ञाते ददाति इतरस्तु प्रतीच्छतीत्येवं ददानप्रतीच्छतां चत्वारो भंगाः सूत्रभंगत्रिकेपि आद्येषु वर्त्तनादिपु प्रत्येकं प्रायश्चित्तं मासो लघुमासः, अर्थे गुरुमासस्तदुभयस्मिन् तदुभयं प्रायश्चितमिति व्याख्यानात् दुहतोणुन्नाए इति उभयतो ददानतया प्रतीच्छकतया वानुज्ञाते भंगश्चतुर्थः शुद्ध एव तुरेवकारार्थः एषोऽक्षरार्थः । भावार्थस्तु प्रागेवोपदर्शितः, एष प्रायश्चित्तविधिः ज्ञानार्थं उपसंपद्युक्त एवं दर्शनार्थमप्युपसंपदि द्रष्टव्यस्तथा चाह -

[भा.२९०] एमेव दंसणे वी वत्तणमादीपयाउ जहनाणे ।
वेयावच्चकरो पुन इत्तरितो आवकहितोय ।।

वृ- यथा ज्ञाने वर्त्तनादिपदान्यधिकृत्य प्रायश्चित्तविधिरुक्तः एवमेव अननेवै प्रकारेण दर्शनेपि वर्त्तनादीनि पदान्यधिकृत्य वेदितव्यः गता ज्ञानर्दशनोपसंपत् । इदानीं चारित्रोपसंपत् भावनीया, तत्र काले आवकहाएय इति व्याख्यानयन् वेयावच्चेइति पदं व्याख्यानयति वेयावच्चेत्यादि वैयावृत्त्यकरो वैयावृत्त्यार्थ उपसंपन्नः पुनर्द्विधा इत्वरः स्वल्पकालभावी यावत्कथितो यावज्जीवभावी अस्य च द्विविधस्यापि वैयावृत्त्यकारापणविधिरयं, एको गच्छवासी वैयावृत्त्यकरोपरः प्राघूर्णकः स च वक्ति, अहं वैयावृत्त्यं करोमि तत्र विधिमाह ।

[भा.२९१] तुल्लेसु जो सुलद्धी अन्नस्सव वारएणनिच्छंते ।
तुल्लेसुव आवकही तस्स मएणं च इत्तरितो ।।

वृ- यदि द्वावपि कालतस्तुल्यावित्वरौ च तत्र यद्येको लब्धिमान् अपरोऽलब्धिकस्तर्हि तयोस्तुल्ययोर्यः सलब्धिकः स कार्यते, इतरस्तु उपाध्यायादिभ्यो दीयते अथ द्वावपि यावत्कथिकौ तत्रापि यो लब्धिमान् स कार्यते, इतरोऽन्येभ्यो दीयते, यदि पुनर्द्वावपि सलब्धिकौ यावत्कथिकौ च तत्र अन्यतर उपाध्यायादेः कार्यते, अथैकोपि तस्य नेच्छति ततः आगंतुको विमुच्यते, अथ द्वावपि सलब्धिकावित्वरौ च तत आगंतुक उपाध्यायादीनां वैयावृत्त्यं कार्यते, सूत्रालापकश्च उपाध्यायादिवैयावृत्त्यफल-प्रदर्शकस्ततः प्रोत्साहनार्थं पठनीयः । उवज्झायवेयावच्चं, करेमाणे समणे निग्गंथे महानिज्जरे महापज्जवसाने होइ इत्यादि ।

अथ नेच्छति तर्हि तस्मिन्नन्यस्योपाध्यायादेर्वैयावृत्त्यमानिच्छति वा शब्दो भिन्नक्रमत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वारएणवेत्येवं योजनीयः द्वावपि वारकेण कार्येते, कियत्कालमेकः कियत्कालमपर इति यदि वास्तव्यो वैयावृत्त्यकरोनुमन्यते अथ नानुमन्यते, तत आगंतुकस्यावंतं कालं प्रतीक्षाप्यते, यावत् वास्तव्यस्य वैयावृत्तस्य इत्वरकालः समाप्तिमुपयाति अथ न प्रतीक्षते तर्हि विसृज्यते, एष द्वयोरित्वरयोर्वैया-वृत्त्यकारापणविधिः अथ एक इत्वरः एको यावत्कथिकस्तत्राह तुल्लेसुव इत्यादि तुल्ययोर्लब्ध्या समानयोर्यो यावत्कथिकः स कार्यते, इत्वरोऽन्यस्योपाध्यायादेः संनियोजनीयः अथ वास्तव्यो यावत्कथिकस्तर्हि स भण्यते विश्राम्य, त्वं तावत् यावदित्वरः करोति तथाचाह तस्य वास्तव्यस्य वैयावृत्त्यकरस्य मतेन इच्छया इत्वरो वा कार्यते वैयावृत्त्यं अथ वास्तव्यस्तथा प्रज्ञापितोपि नेच्छति तर्हि न कार्यते स हि पश्चादपि यास्यति, । तत इतरो वास्तव्यो न करिष्यतीति, अथ इत्वरो यावत्कथिकश्च द्वावपि लब्धिकौ तत्रयावत्कथिकः कार्यते, इत्वरो अन्यस्य नियुज्यते, विसृज्यते वा अथवा इत्वरः सलब्धिकःयावत्कथिकोऽलब्धिकस्तत्र यावत्कथिको भण्यते विश्राम्य, तावत् यावदेष इत्वरः सलब्धिकः करोति । पश्चात्त्व मेव करिष्यसि, अथ नेच्छति तर्हि स एव कार्यते इतरस्त्वन्यस्मै दीयते, तस्य तत्रानिच्छायां विसृज्यते । अथेत्वरोऽलब्धिको यावत्कथिको लब्धिमान् तत्र यावत्कथिकः कार्यते इतर उपाध्यायादेः समर्प्यते अथ तस्य तत्रानिच्छा तर्हि विसृज्यते इति, इह यदि वास्तव्यवैयावृत्त्यकरणे अननुज्ञातो वैयावृत्त्यं कारयति यदिवानापृच्छया अन्यं वैयावृत्त्यकरं स्थापयति । तदा तस्याचार्यस्य बहवो दोषास्तानेवाह -

[भा. २९२] अननुनाए लहुगा अवियत्तमसहजोगदाणादी ।
निज्जरमहती हु भवे, तवस्सिमादीनकरणेवी ।।

वृ- वास्तव्य वैयावृत्त्य करेणाननुज्ञायामुपलक्षणमेतत्तस्याना पृच्छायां ना यद्यागंतुकमित्वरं वैयावृत्त्ये स्थापयति ततस्तस्य प्रायश्चित्तं लघुकाश्चत्त्वारो लघुमासः अन्येब्रुवते अनापृच्छायां मासलघु, अननुज्ञायां चतुलघु अन्यद्यानन्नुज्ञायामना पृच्छायां वा वैयावृत्त्यपदे अन्यस्येत्वरस्य स्थापने वास्तव्यस्य अवियत्तमप्रीतिरुपजायते अप्रीत्या च कलहं कुर्यात् असाहगा जोगदानादी इति, यानि दानादीनि दानश्रद्धादीनि कुलानि आचार्यस्य प्रायोग्याणि तान्यागंतुकवैयावृत्त्यकरस्य न साधयति, न कथयति तस्मात्स इत्वर आगंतुकोवैयावृत्त्यकरः प्रत्राप्यते, त्वं तपस्यादीनां क्षपकादीनां वैयावृत्त्यं कुरु, तेषामपि क्रियमाणे वैयावृत्त्ये महती निर्जरा तदेवं वैयावृत्त्यद्वारं गतमिदानीं क्षपणद्वारावसरः ।

[भा. २९३] आवकही इत्तरिय इत्तरिय विगिट्ठ तह अविगिट्ठे य ।
समणामंतणखमणे, अनिच्छमाणं नउ नियोगो ।।

वृ- क्षपक उपसंपद्यमानो द्विधा यावत्कथिक इत्वरश्च, तत्रेत्वरो द्विधा विकृष्टतपःकारी अविकृष्टतपःकारी च, तत्र चतुर्थषष्ठाष्टमकारी अविकृष्टतपःकृत्, दशमादितपकारी विकृष्टतपः कृत्तयोर्द्वयोरप्युपसंपद्यमानयोः समणामंतणत्ति आचार्येणस्वगणस्य स्वगच्छस्यामंत्रणं प्रच्छन्नं कर्त्तव्यं, आर्या एव विकृष्टतपःकरणार्थमविकृष्टतपःकरणार्थं वा समागतः, किंप्रतीक्ष्यतामुत प्रतिषिध्यतामिति? तत्र यदि तेषामनुमतं भवति, तदा प्रतीष्यते, अनिच्छायां प्रतिषिध्यते, यदि पुनः केचिन्मन्यंते केचिन्न मन्यंते ते तर्हि यः कश्चिन्नेष्टवान् तमनिच्छंतं तस्य क्षपकस्य वैयावृत्ते बलान्न नियोजयेत्, बलाभियोगस्य सूत्रे निषेधात, यस्तु प्रतीच्छितः । स प्रष्टव्यः किंत्वं वैकृष्टं तपः करोषि अविकृष्टं वा ? यदि ब्रूते आविकृष्टं, ततो भूयोपि पृष्टव्यं त्वं पारणकदिने कीदृशो भवसि, यदि प्राह, ग्लानोपमः, तत्राह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२९४] अविगिट्ठ किलम्मंतं भणंति माखम करेहि सज्झायं;
सक्का किलंमिउं जेवि, विगिट्ठेणं तहिं वियरे ।

वृ- अविकृष्टेतपसि क्लाम्यंतं भणंति सूरयो, मा क्षपय मा क्षपणं कुरु न युक्तं भद्र तव क्षपणं कर्त्तुं न शक्त्यभावादित्यर्थः तस्मात्कुरु स्वाध्यायं, तपःकरणात् स्वाध्यायकरणस्य बहुगुणत्वात्, अपि च स्वाध्यायोपि परमं तपः, यत उक्तं -

बारसविहिम्मिवि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे;
नवि अत्थि नवि दोहिइ, सज्झाइ समं तवो कम्मं ।

अग्लानोपमस्त्वं विकृष्टतपःकारी तपःकार्यते, यस्तु विकृष्टं तपःकरोति स यद्यपि पारणकदिनेपि ग्लानोपमो जायते, तथापि स कार्यते, यत आह सक्का इत्यादि अपि शब्दः पुनरर्थे ये पुनस्तपस्विनो विकृष्टेन तपसा पारणकदिने क्लमयितुं शक्याः क्लाम्यंते इति भावः । तत्र तेषु तपस्विषु वितरेत् दद्यात् तपःकरणं, तेषां तथारूपाणामपि समनुजानीयात्, न तु वारणीयं, विकृष्टतपःकरणस्य महागुणत्वात् केवलं भक्तपानं भैषजादिकमानाय्य दातव्यं अथ ग्लानोपमो न भवति, किंतु स्वयमेव संस्तारकप्रतिलेखनादीन् व्यापारान् सर्वानप्यहीनातिरिक्तान् करोति, प्रतीच्छ्ते, एवंतत्र यो विकृष्टेन तपसा ग्लानोपमो भवति तत्रेयं सामाचारी

[भा.२९५] अनपडिच्छणे लहुगा असति गिलाणोवमे अदंतिय;
पडिलेहण संथारए पानग तहमत्तगतिगं च ।

वृ- तस्मिन् गच्छे यद्यन्यः कोपि विकृष्टतपःकारी क्षपको विद्यते, स च पारणकदिने ग्लानोपमो वा भवेदग्लानोपमो वा । तथापि तस्मिन्विद्यमाने क्षपके अन्यं क्षपकमाचार्यो न प्रतीच्छदेत्, प्राक्तनस्य हि क्षपकस्य पारणकदिने ग्लानोपमस्याग्लानोपमस्य वा सतोवश्यं कर्त्तव्यं, न च द्वयोर्वैयावृत्त्यकरणे साधवः प्रभवंति, तस्मात् न प्रत्येषणीयः, यदि पुनः साधवोनुमन्यंते सोपि प्रतीक्ष्यतां, तस्यापि वैयावृत्त्यकरणेन समाधिमुत्पादयिष्याम इति, तदा प्रतीच्छनीयः । यदि पुनर्गच्छे विद्यमानेपि विकृष्टतपःकारिणि क्षपके गच्छाननुमतावाचार्योऽन्यं प्रतीच्छति तदा तस्यान्यप्रतीच्छने प्रायश्चित्तं लघुकाश्चत्वारो लघुमासाः; असतित्ति तथा असति प्रायोग्यद्रव्ये ये दोषास्ते च वक्तव्याः, ते चामी द्वयोः क्षपकयोर्युगपत्पारणकदिने समापतिते पर्याप्त्या पारणद्रव्ये अलाभतो असति असंस्तरणं भवेत्, असंस्तरणाच्च यदेषणादि प्रेरयंति, तन्निमित्तं प्रायश्चित्तमाचार्यस्यापतति, आज्ञाभंगादयश्च दोषा जायंते, तथा पारणकप्रायोग्यद्रव्यसंपादनेन संस्तरणमकुर्वत्सु साधुषु विषये सोऽप्रीतिं कुर्यात्, अप्रीत्या च अनागाढामागाढां वा परितापनां प्राप्नुयात्, तथा च सति तन्निष्पन्नमपि प्रायश्चित्तमाचार्यस्य, अन्यच्च शिष्याः प्रतीच्छकाश्च द्वयोरपि क्षपकयोर्वैवृत्त्यकरणतो भग्ना एवं चिंतयेयुर्यथान्यान्यक्षपकवैयावृत्त्यवारणेन नास्माकं सूत्रमर्थो वा, तस्मादन्यत्र व्रजाम इति ।

तथा गिलाणोवमे इति तेषु गच्छवासिषु साधुषु वास्तव्यक्षपकवैयावृत्त्यकरणव्यापृतेषु ग्लानोपमो जायते, तदा तस्याचार्यस्य प्रायश्चित्तं चतुर्गुरुकाः, अदंतेयत्ति तथा गच्छे वास्तव्यक्षपककरणव्यावृततया भक्तपानं वागंतुकस्याददाने स भक्तार्थं पानार्थं वा स्वयं हिंडेत प्रतिलेखनादिक्रियां च स्वयमेव कुर्यात्, हिंडमानश्च क्षुधापिपासया शीतेनोष्णेन वा पीडितो यद्यनागाढां परितापनां प्रायश्चित्तमाचार्यस्य चतुर्लघु, अथ गाढां तदा चतुर्गुरु अथ मूर्च्छति तदा षट् लघु, तथा परिताप्यमानो यद्येषणां प्रेरयति, तदा तन्निमित्तं, प्रायश्चितं, अथ न प्रेरयति, तथा प्रभूतमटतो यदा नागाढादिपरितापनां प्राप्नोति, तन्निमित्तं प्रायश्चितं,

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

अथ तत्र गच्छे अन्यो वास्तव्यः क्षपको न विद्यते, तदा नियमतः स प्रतीच्छनीयः, केवलं सोपि गच्छानुमत्या, अन्यथा न किमपि तस्य गच्छः करिष्यति, तत्र यदि प्रमादतो वैयावृत्त्यभीरुतया गच्छो नानुमन्यते, तदा स प्रज्ञापनीयः । अथ कारणवशतस्तदा न प्रतीच्छनीयः, यदि पुनर्गच्छाननुमत्यापि प्रतीच्छति तदा तस्य प्रायश्चितं चत्वारो लघुकास्तथा गच्छानुमतो यो यतः प्रतिलभ्यते स सततः क्षपकप्रायोग्यमानयति, अननुमतौ च न कोपि किमप्यानयतीत्यसति पारणकदिने पर्याप्त्या प्रायोग्यद्रव्ये असंस्तरणमसंस्तरणाच्च परितापनादुःखं तन्निमित्तं प्रायश्चित्तमाचार्यस्य, तथा पारणकदिने ग्लानोपमो जायते, तथा शेषेषु साधुषु प्रयोजनांतरव्यापृततया भक्तं पानं वा ददानेषु स्वयं हिंडमाने ये दोषास्तेपि वक्तव्याः; संप्रति तस्य क्षपकस्य वास्तव्यस्यागंतुकस्य वा कृतप्रत्याख्यानस्यापि यत् प्रतिदिवसं कर्त्तव्यं तदाह- पडिलेहणेत्यादि तस्योपकरणं कल्पादि यथायोगमुभयकालं प्रतिलेखनीयं, संस्तारकश्च तस्य कर्त्तव्यः, तथा पानकं पानीयं तस्योचितमानीय दातव्यं तथा मात्रकत्रिकं च उच्चारमात्रकं प्रश्रवणमात्रकं खेलमात्रकं च यथाकालं समर्प्पणीयं परीष्ठापनीयं च, सांप्रतमेनामेव गाथां व्याख्यानयन् प्रथमतो अनपडिच्छणे लहुगा इति असइ इति च व्याख्यानयति -

[भा.२९६] दुण्हेगतरे खमणो, अन्नुपडिच्छंतसंथरेआणा ।
अप्पत्तियपरितावण सुत्तेहानिअन्नहिं च इमे ।

वृ- वास्तव्ये क्षपके क्षपणे द्वयोर्ग्लानोपमयोरन्यतरस्मिन् विद्यमाने यदि गच्छानापृच्छया अन्यं प्रतीच्छति तदा तस्मिन्नन्यं प्रतीच्छति प्रायश्चित्तं लघुकाश्चत्वार इति वाक्यशेषः, तथा युगपत् तद्द्वयोः क्षपकयोः पारणकदिने युगपत्समापतिते प्रायोग्यद्रव्ये अलाभतो असति यदि वास्तव्यक्षपकवैयावृत्त्य-करणव्यापृतानामागंतुकस्य वैयावृत्त्यकरणवेलातिक्रमतोऽसंस्तरणं भवेत् तस्मिंश्चासंस्तरणे यदेषणादि प्रेरयंति तन्निमित्तं प्रायश्चित्तमाचार्यस्य तथा आणत्ति आज्ञापदैकदेशेसमुदायोपचारादाज्ञाभंगानवस्था मिथ्यात्वविराधनादोपाः प्रादुष्युः तस्य चा संस्तरणे अप्रीतिरप्रीत्या च परितापनं ततः परितापन निमित्त-मपि प्रायश्चित्तं तथा शिष्याः प्रतीच्छकाश्चैवं चिंतयेयुरस्माकं द्वयोः क्षपकयोर्वैयावृत्यकरणे व्यापृतानां सूत्रे हानिरुपलक्षणमेतत् अर्थे च, तस्मादन्यत्र व्रजामः; संप्रति । गिलाणोवमे अडंते यत्ति व्याख्यानयति-

[भा.२९७] गेलण्णतुल्लगुरुगा अडंतेपरितावणा सयंकरणे ।
नेसनगहणागहणे दुगड्ढ हिंडत्तमुच्छाय ॥

वृ. साधुषु वास्तव्यक्षपकवैयावृत्त्यकरणतः प्रयोजनांतरे व्यापृततया वैयावृत्त्यमकुर्वत्सु यद्यागंतुकः क्षपकोग्लानतुल्यो ग्लानोपमो जायते, तदा सूरेः प्रायश्चितं चतुर्गुरुकाः, तथा भक्तं पानं च अददत्सु स्वयंदुगड्ढहिंडंतत्ति द्विकार्थं भक्तार्थं पानार्थं च हिंडमाने स्वयं वा उपकरणस्य प्रत्युपेक्षणादेः करणे या परितापना अनागाढा अगाढा वा मुच्छायति मूर्च्छा च तन्निमित्तं प्रायश्चित्तं आचार्यस्य तत्रानागाढपरितापनानिमित्तं चतुर्लघु आगाढपरितापनानिमित्तं चतुर्गुरु मूर्च्छानिमित्तं षट्लघु नेसणगहहणागहणे इति स स्वयं हिंडमानः क्षुधापिपासया वा शीतेन वा उष्णेन वा परितापितः सन् यदनेषणीयमपि गृह्णाति तन्निमित्तं प्रायश्चित्तमग्रहणे नेषणीयस्य प्रभूतं हिंडमानो यद्वाप्नोति आगाढपरितापनादिकं तन्निमित्तमपि यत एवमादयो दोषास्तस्माद्गच्छमापृच्छ्य तदनुमत्या प्रतीच्छेत, प्रतीच्छितस्य च सर्वं सर्वप्रयत्नेन निर्जरार्थतया कर्त्तव्यमिति इह आगतः सन् प्रथम दिवसेपि प्रच्छनीयो यथा केन कारणेन त्वमिहागतोसीति, अन्यथा यदि तमपृष्ट्वैव आलोचनामदापयित्वा च संवासयति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा प्रायश्चित्तं तदेवाह -

[भा.२९८] पढमदिनंमि न पुच्छे, लहुओ मासो उ बिइय गुरुओ य,
तइयंमि होंति लहुगा, तिण्हं तु अतिक्कमे गुरुगा ।

वृ- यदि प्रथमे दिने न पृच्छेत्, तर्हि तस्याचार्यस्य प्रायश्चित्तं लघुमासः, द्वितीये गुरुमासः, तृतीये भवंति चत्वारो लघुमासाः, त्रयाणां तु दिनानामतिक्रमे चतुर्थादिषु दिवसेषु प्रायश्चित्तं चतुर्गुरुकाश्चत्वारो गुरुमासाः, अधुनापवादो भण्यते यदि कार्यादिप्रयोजनवशादास्तामेकं द्वे त्रीणि वा दिनानि षण्मासानपि यावन्न पृच्छति, तथापि न प्रायश्चित्तभाक् तथा चाह -

[भा.२९९] कज्जे भत्तपरिण्णा गिलाणरायायधम्मकहवादी,
छम्मासा उक्कोसा तेसिं तु वइक्कमे गुरुगा ।

वृ- कार्ये कुलगणसंघविषये व्यापृतो भवेदाचार्यः तथा केनापि साधुना भक्तपरिज्ञा कृता, तस्य समीपे लोको भूयानागच्छति, तत्राचार्यो धर्म्मकथने व्यापृतः गिलाणत्ति ग्लानप्रयोजने वा व्यापृतः रायाएधम्भकहीति राजा वा धर्म्मार्थी प्रतिदिवसमेति, ततस्तस्य धर्मः कथयितव्य इति धर्म्मकथिकत्वेन व्यापृतः, वादी वा कश्चन प्रबलः समुत्थितः स निगृहीतव्यस्तत एतैः कारणैर्व्यापृतः सन् आचार्यो जघन्यत एकं द्वे त्रीणि वा दिनानि उत्कर्षतो यावत् षण्मासास्तावदागंतुकं प्रष्टुमालोचनां वा प्रदापयितुं न प्रपारयेत् इत्थमप्रपारणे च दोषाभावस्तेषां षण्मासानां पुनर्व्यतिक्रमे किमुक्तं भवति एण्मासेभ्यः परतोपि यदि न पृच्छति नापि दापयत्यालोचनां, ततः प्रायश्चित्तमाचार्यस्य गुरुकाश्चत्वारो गुरुमासाः, अन्ये तु ब्रुवते, षण्मासानां परतो प्रथमदिने न प्रतीच्छत्यालोचनां, तदा लघुमासः द्वितीयदिनेप्यप्रतीच्छने मासगुरु, तृतीयदिने चतुर्लघु, दिनत्रयातिक्रमे चतुर्थादिषु दिनेष्वप्रतीच्छने च चतुर्गुरुका इति; कार्यादिप्रयोजनवशतो व्यापृत इमां यतनां कुर्यात् ।

[भा.३००] अन्नेण पडिच्छावे, तस्सासति सयं पडिच्छते रत्तिं,
उत्तरवीमंसाए खिन्नो य, निसिंपि न पडिच्छे ।

वृ- यद्यन्यो गीतार्थस्तस्याचार्यस्य समीपेऽस्त्यालोचनार्हस्तर्हि स संदेशनीयो, यथायमापृच्छ्य-तामालोचनां वा प्रतीष्यतामिति, अथ नास्त्यन्यो गीतार्थस्तदा तस्य गीतार्थस्यासति भावप्रधानोयं निर्देशोऽभावे स्वयमेव रात्रौ प्रतीच्छत्यालोचनां, अथ यथा श्रीगुप्तेन षडुलूकः षण्मासान् यावत् वादं दत्वा निर्जित एवं दीर्घकालावलंबिनि विवादे रात्रावप्युत्तरविमर्शेन प्रत्युत्तरचिंतया खिन्नः श्रांतो निशायामपि न प्रतीच्छतीत्यालोचनां दत्तामिति अथवा अत्राप्यपवादस्तमेवाह -

[भा.३०१] दोहिं तिहिं वादिनेहिं जइ विज्जइ इत्तो न होइ पच्छित्तं;
तेन परमणुन्नवण, कुलाइरन्नोव दीवंति ।

वृ- यदि षण्णां मासानां परतो द्वाभ्यां त्रिभिर्वा दिनैः परप्रवादी नियमात् पराजेष्यते, कुलादिकार्यं वा समाप्तिमुपयास्यतीत्येवं निश्चीयते, ततस्तेष्वपि दिनेष्वप्रच्छने आलोचनाया अप्रतीच्छेन वा न प्रायश्चित्तं भवति अथ ज्ञायते तेष्वप्येकद्वित्र्यादिषु दिवसेषु न कुलादिकार्यसमाप्तिर्भविष्यति, न च परवादी जेष्यते तदा षण्मासस्समाप्तावेव राज्ञः समीपे गत्वा ज्ञापनीयं यथाहं दिनमेकमऽक्षणिको भविष्यामि, नान्यथा गृह्लिथा इति कुलादिकार्येष्वपि कुलादीन्यनुज्ञापयति तथा चाह तेनपरमित्यादि तेनेत्यव्ययं, तत इत्यर्थे ततः षण्मासेभ्यः परं कार्यापरिच्छित्तौ संभाव्यमाना या अनुज्ञापना कुलादेर्दिनमेकं यावत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्त्तव्या, राज्ञश्च वादिविषये कारणं दीपयंत्यचार्याः, यथाहं कारणवशेन दिनमेकमक्षणिको भविष्यामीति एवं चेन्न कुर्वति तदा प्रायश्चित्तं चतुर्गुरुकाः । तदेवमुक्तः क्षपणोपसंपद्विधिरिदानीं ज्ञानार्थं दर्शनार्थं चारित्रार्थं चोपसंपद्यमानः प्रतीच्छितो नियमादालोचनां दापयितव्यः, स च दाप्यमानः कथमालोचनां ददाति, उच्यते ।

[भा. ३०२] आलोयणं तहचेवय, मूलुत्तरे नवरि विगडिए इमं तु; ।
इत्थं सारण चोयण, निवेयणंतेवि एमेव ।

वृ- यथा संभोगिकानां विहारालोचनायां मूलगुणातिचारविषये उत्तरगुणातिचारविषये च भणितं, तथात्रापि भणितव्यं, किमुक्तं भवति उपसंपद्यमानोप्यालोचनां ददानः पूर्वं मूलगुणतिचारान् प्रागुक्तक्रमेणालोचयति, पश्चादुत्तरगुणानिति नवरमयं विशेषः, विकटिते आलोचिते एकत्र स्थितान् विभिन्नस्थितान्वा प्रत्येकं वंदित्वा इदं भणति,

आलोयणा मे दिन्ना इच्छामि सारणवारणचोयणंति तेप्येवमेव ।
प्रतिभणंतो निवेदनं कुर्वंति अज्जो अम्हे सारेज्जा, वारेज्जा, चोइज्ञा इति ।।

गता उपसंपदालोचना सांप्रतमपराधालोचना ययात्र प्रकृतं -

[भा. ३०३] एमेवय अवराहे किं न ते कया तहिं चिय विसोही ।
अहिगरणादीसाहति गीयच्छो वा तहिं नत्थि ।।

वृ- यथा विहारालोचनायामुपसंपदालोचनायां च त्रिधिर्भणित एवमेव तथैव अपराधालोचनायामपि द्रष्टव्यो, यावत् पृष्टो वा अपृष्टो वा ब्रूते अहमपराधालोचकः समागतः तत आचार्यैर्वक्तव्यः किं केन कारणेन ते त्वया तत्रैव स्वगच्छ एव न कृता विशोधिः प्रायश्चित्तांगीकरणेन, एवमुक्ते यदि साधयति कथयति अधिकरणादीनि अधिकरणं तैस्सहजातमादिशब्दैत् प्रागुक्तविकृतियोगप्रत्यनीकादिकारणपरिग्रहः अथवा वक्ति तत्र गीतार्थो नास्ति तत्राधिकरणादिष्वविशुद्धिकारणेषु समागत एवं प्रतिभणनीयः ।

[भा. ३०४] नच्छि इहं पडियरगा, खुलखेत्तं उग्गमविय पच्छित्तं
संकियमादीवपदे जहक्कमं ते तहवि भासे ।

वृ- अस्तीति निपातो बहुवचनार्थः प्रतिचारका नाम अपराधापन्नस्य प्रायश्चित्ते दत्ते तपः कुर्वतो ग्लानायमानस्य वैयावृत्त्यकरास्ते इह मम पार्श्वे न संति, खुलक्षेत्रं नाम मंदभिक्षं यत्र वा प्रभूतमुपग्रहकारि घृतादि द्रव्यं न लभ्यते, तादृशमिदं क्षेत्रं तथाविधदानं शुद्धश्रावकाभावत् वयमपि स्तोकेप्यपराधे उग्रं प्रायश्चित्तं दद्मः तथा गुरुपारंपर्यसमागमात्, तथा यानि नत्थी संकियसंघाडेत्यादि प्रागुक्तगाथोपन्यस्तानि शंकितादीनि पदानि संभवेन यथाक्रमं तथेति समुच्चये विभाषेत ब्रूयात् यथा प्रायश्चित्तसूत्रमनुसृत्य प्रायश्चित्तं दीयते, तदिदानीं विस्मृतं शंकितं जातं न चार्थं स्मरामि, ततः कथं प्रायश्चित्तं प्रयच्छामि, अथवा प्रायश्चित्तं पतिपन्ने सति तत्तपस्त्वयेह कर्त्तव्यं तत्र चेयमस्माकं सामाचारी बहिर्भूमिमात्रमपि संघाटकं विना न गंतव्यं, यदि पुनः कोपि गच्छति ततस्तस्मै प्रायश्चित्तमत्युग्रं ददामि, इत्येव यथासंभवं शंकितादीनि पदानि बूयात् नतु दद्यादालोचनामिति, यस्तु निर्गमनशुद्ध आगमनेन तु शुद्धोऽशुद्धो वा प्रतीच्छ्यते । तस्यालोचनायां विधिर्वक्तव्यः तत्र यदुक्तमधस्तात् अवराहे दिवसतो पसच्छंमि इति तदिदानीं व्याख्यानयंति -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा. ३०५] दव्यादिचउरभिग्गह, पसत्थमपसत्थे तं दुहेक्केक्के ।
अपसत्थे वज्जेउं, पसत्थएहिं तु आलोए ।

वृ- अपराधालोचनायां दीयमानायां द्रव्यादयो द्रव्यक्षेत्रकालभावाश्चत्वारश्चतुःसंख्याका अपेक्षणीया भवंति, तथा अभिग्गहत्ति दिशामभिग्रहः कर्त्तव्यस्ते च द्रव्यादयो दिशश्च एकैकप्रत्येकं द्विधा द्विप्रकारास्तद्यथा, प्रशस्ता अप्रशस्ताश्च, तत्राप्रशस्तान् द्रव्यादीन प्रशस्ताश्च दिशो वर्जयित्वा प्रशस्तैर्द्रव्यादिभिर्दिग्विशेषैश्च, किमुक्तं भवति ? प्रशस्तेषु द्रव्यादिषु प्रशस्ताश्च दिशोऽभिगृह्य आलोचयेत्, आलोचनां दद्यात् तत्राप्रशस्तद्रव्यादिप्रतिपादनार्थमाह -

[भा. ३०६] भग्गधरे कुड्डेसुय, रासीसु य जे दुमा य अमणुना ।
तत्थ न आलोएज्जा, तप्पडिवक्खे दिसा तिन्नि ।

वृ- यत्रस्थंभतुलाकुड्यादीनामन्यतम् किमपि पतितं तत् भग्नग्रहं तत्र तथा कुड्डेसु इति कुड्यग्रहणात् कुड्यमात्रावशेषं, तत्र पाठांतरं रुद्देसुय इति तत्र रुद्रेषु रुद्रग्रहेषु तथा राशिषु अमनोज्ञतिलमाषकोद्रवादिधान्यराशिषु ये च द्रुमा अमनोज्ञा निष्प त्रककंटकिप्रभृतयोऽमनोज्ञा अप्रशस्तास्तत्र तेष्वप्याश्रयभूतेषु उपलक्षणमेतत् अप्रशस्तासु तिथिषु अप्रशस्तेषु संध्यागतादिषु नक्षत्रेषु अप्रशस्ताश्च याम्यादीर्दिशाभिगृह्य नालोचयेत् किंतु तत्प्रतिपक्षे प्रशस्तद्रव्यादिरूपे आलोचयेत्, तथा प्रशस्ताश्च तिस्रो दिशः पूर्वामुत्तरां चरंतीं चाभिगृह्य आलोचयेत् इदानीममनोज्ञधान्यराश्यादिषु द्रव्यादित्वयोजनामाह -

[भा. ३०७] अमणुनधन्नरासी, अमणुनदुम्मा य होंति दव्वंमि ।
भग्गधरे रुद्दऊसर, पवायदड्ढाइ खित्तंमि ।

वृ- अमनोज्ञा धान्यराशयो अमनोज्ञद्रुमाश्च भवंति, द्रव्ये द्रष्टव्याः, भग्नग्रहे प्रागुक्तस्वरूपं, रुद्दत्ति रुद्रग्रहं, ऊसरत्ति ऊषरं यत्र तृणादि नोद्गच्छति, छिन्नटंकातटीप्रपातः भृगुप्रपातादिकं वा; दग्धं दवदग्धमादिशब्दात् विद्युत्हतादिपरिग्रहः, इत्यादि सर्वं क्षेत्रे द्रष्टव्यं तत्र यत् अमणुनदुमा य होंति दव्वंमीत्युक्तं तदेतत् व्याख्यानयति -

[भा. ३०८] निपत्त कंटइल्ले, विज्जुहते खारकडुयदड्ढे य ।
अयतउयतवसीसग, दव्वे धम्माय अमणुणा ।

वृ- निःपत्रा स्वभाववतः पत्ररहिताः करीरादयः, कंटकिनो बदरीबब्बूलप्रभृतयः, विद्युद्धता विद्युत्प्रपातभग्नाः, क्षाररसामोरडप्रभृतयः, कटुकाः कटुकरसा रोहिणीकुटजलिंबादयः, दग्धाश्च दवदग्धाः, एतान् द्रुमान् अमनोज्ञान् जानीहीति वाक्यशेषः । न केवलममनोज्ञकुधान्यराशयोऽमनोज्ञा द्रुमाश्च द्रव्ये वर्जनीयाः किंतु अयस्त्रपुताम्रसीसकराशयो द्रव्ये वर्जयितव्याः । अमणुना धन्नरासी इति व्याख्यानयति, अमनोज्ञानि धान्यानि पुनश्च शब्दः पुनरर्थे अमनोज्ञधान्यराशयः, संप्रति कालतो ये दिवसा वर्जनीयास्तानाह -

[भा. ३०९] पडिकुट्ठेल्लगदिवसे, वज्जेज्जा अट्ठमिं च नवमिं च
छट्ठिं च चउत्थिं च बारसिं दोण्हंपि पक्खाणं ।

वृ- इह इल्लप्रत्ययः प्राकृते स्वार्थे प्रतिकृष्टा एव प्रतिकुष्टेल्लकाः । ते च दिवसाश्च प्रतिकुष्टेल्लकदिवसाः प्रतिषिद्धा दिवसास्तान् वर्जयेत्, तानेव नामत आह द्वयोरपि शुक्लकृष्णरूपयोः पक्षयोरष्टमीं नवमीं षष्ठीं चतुर्थीं द्वादशीं च एता हि तिथयः शुभप्रयोजनेषु सर्वेष्वपि स्वभावत एव प्रतिकूलास्ततो वर्जनीयाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं कालतोऽप्रशस्तं वर्ज्यं, वर्ज्यं संध्यागतादिकं नक्षत्रं तदेवाह -

[भा.३१०] संज्झागयं रविगयं, विड्डारं संग्गहं विलंबिं च,
राहुहयं गहभिन्नं वज्जेए सत्त नक्खत्ते ।

वृ- संध्यागतं नाम यत्र नक्षत्रे सूर्योऽनंतरं स्थास्यति तत आदित्यपृष्ठस्थितमन्ये पुनराहुर्यस्मिन्नुदिते सूर्य उदेति तत् संध्यागतमपरे त्वेवं ब्रुवते, यत्र रविस्तिष्ठति । तस्माच्चतुर्दशं पंचदशं वा नक्षत्रं संध्यागतं, रविगतं यत्र रविस्तिष्ठति, पूर्वद्वारिके नक्षत्रे पूर्वदिशा गंतव्ये यदा अपरया दिशा गच्छति । तदा तत् विड्डारं विगतद्वारमित्यर्थः, यत् क्रूरग्रहेणाक्रांतं तत् संग्रहं, विलंबि यत् सूर्येण परिभुज्य मुक्तं, अन्ये त्वाहुः सूर्यस्त पृष्टतोऽग्रतो वा अनंतरं नक्षत्रं संध्यागतं यत्पुनः सूरगतात् नक्षत्रात् पृष्ठतस्तृतीयं तत् विलंबि इति । राहुहतं यत्र सूर्यस्य चंद्रस्य वा ग्रहणं, यस्य मध्येन ग्रहोऽगमत् तत् ग्रहभिन्नं एतानि सप्त नक्षत्राणि चंद्रयोग युक्तानि वर्जयेत् यत् एतेष्विमे दोषाः ।

[भा.३११] संज्झागयंमि कलहो, होइ कुभत्तं विलंबिनक्खत्ते ।
विड्डारे परविजयो आदिच्चगए अनिव्वाणीजं ।।

[भा.३१२] जं संगहंमि कीरइ, नक्खत्ते तत्तवुग्गहो होइ,
राहुहयंमि य मरणं, गहभिन्ने सोणिउग्गालो ।।

वृ- संध्यागते नक्षत्रे शुभप्रयोजनेषु प्रारभ्यमाणेषु कलहो राटिर्भवति, विलंबिनक्षत्रे कुभक्तं, विड्डारे परे परेषां शत्रूणां विजयः । आदित्यगते रविगते अनिर्वाणिरसुखं, संग्रहे पुनर्नक्षत्रे यत् क्रियते तत्र व्युद्ग्राहः संग्रामो भवति, राहुहते मरणं, ग्रहभिन्न शोणितोद्गारः । शोणितविनिर्गमः एवंभूतेष्वप्रशस्तद्रव्यक्षेत्र-कालाभावेषु नालोचयेत; प्रशस्तेषु तत्र प्रशस्ते द्रव्ये शाल्यादिप्रशस्तधान्यराशिषु मणिकनकमौक्तिक-कवज्रवैडूर्यपद्मरागादिराशिषु च प्रशस्तं क्षेत्रं साक्षादाह -

[भा.३१३] तप्पडिवक्खे खेत्ते उच्छुवणे सालिचेइघरे वा;
गंभीरसानुनाए, पयाहिणावत्तउदए य ।

वृ- तस्य प्रागुक्तस्याप्रशस्तस्य प्रतिपक्षे प्रशस्ते क्षेत्रे इक्षुवने उपलक्षणमेतत् । आरामे वा पत्रपुष्पफलोपेते सालित्ति वनशब्दोऽत्रापि संबध्यते शालिवने चैत्यगृहे वा शब्दाविकल्पने, तथा गंभीरं नाम भग्नत्वादिदोषवर्जितं, शेषजनेन च प्रायेणालक्षणीयमध्यभागं स्थानं गंभीरमस्थाद्यमिति वचनात्, सानुनादे यत्रोच्चारिते शब्दे प्रतिशब्दः समंतत उत्तिष्ठति, तत्, सानुनादं तथा प्रदक्षिणावर्त्तमुदकं यत्र नद्यां पद्मसरसि वा तत् प्रदक्षिणावर्त्तोदकं तस्मिन्वा च शब्दो वा शब्दार्थः, । क्वचित् वा शब्दस्यैव पाठः, प्रशस्तं कालमाह -

[भा.३१४] उत्तदिने सेसकाले उच्चट्ठाणा गहा य भावंमि;
पुव्वदिसउत्तरा वा, चरंति य जाव नवपुव्वी ।

वृ- उक्तानि यानि दिनानि अष्टम्यादीनि तेभ्यो ये शेषा द्वितीयादयो दिवसास्ते च शेषकालश्च उक्तदिनशेषकालस्तस्मिन् प्रशस्ते व्यतीपातादिदोषवर्जिते उपलक्षणमेतत् प्रशस्ते च करणे प्रशस्ते च मुहूर्त्ते एतत् कालतः प्रशस्तमुक्तं । भावतः प्रशस्तमाह उच्चैस्थानं येषां ते उच्चस्थाना ग्रहा भावे भावविषयं प्रशस्तं किमुक्तं भवति भावतः उच्चस्थानगतेषु ग्रहेषु तत्र ग्रहाणामुच्चैः स्थानमेवं, सूर्यस्य मेष उच्चै स्थानं सोमस्य वृषभः, मंगलस्य मकरः, बुधस्य कन्या, बृहस्पतेः कर्कटकः शुक्रस्य मीनः, शनैश्चरस्य तुला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वेषामपि च ग्रहाणामात्मीयादुच्चैः स्थानात् यत् सप्तमं स्थानं तत् नीचैः स्थानं । अथवा भावतः प्रशस्तायें सोमग्रहा बुधशुक्रबृहस्पतिशशिन एतेषां संबंधिषु राशिषु एतैरवलोकितेषु च लग्नेषु आलोचयेत्, तथा तिस्रो दिशः प्रशस्ता ग्राह्याः, तद्यथा पूर्वोत्तरा चरंती चरंती नाम यस्यां भगवानर्हन् विहरति सामान्यतः केवलज्ञानी मनःपर्यवज्ञानी अवधिज्ञानी चतुर्दशपूर्वी त्रयोदशपूर्वी यावन्नवपूर्वी, यदिवा यो यस्मिन् युगे प्रधान आचार्यः सवा यया विहरति एतासां तिसृणां दिशामन्यतमस्या दिशोभिमुख आलोचनार्होऽवतिष्ठते, तस्येयं सामाचारी ।

[भा.३१५] निसज्जासति पडिहारिय, किइकम्मं काउ पंजलुक्कुडुओ;
बहुपडिसेवरिसा सुयअनुन्ना वेउं निसिंज्जगतो ।

वृ- आत्मीयकल्पैरपरिभुक्तैराचार्यस्य निषद्यां करोति । असति आत्मीयकल्पानामभावे अन्यस्य सत्कान् प्रातिहारिकान् कल्पान् गृहीत्वा करोति । कृत्वा च यद्याचार्यः पूर्वाभिमुखो निषीदति, तत आलोचको दक्षिणत उत्तराभिमुखो अवतिष्ठते, अथाचार्य उत्तराभिमुखो निषन्नाः । तत आलोचको वामपार्श्वे पूर्वाभिमुखस्तिष्ठति, चरंतीं वा दिशं प्रत्यभिमुखो भवति ततः कृतिकर्म्म द्वादशावर्त्तं वंदनकं दत्वा प्रबद्धांजलिर्येन स प्रांजलिः उत्सर्गत उत्कुडुकः स्थितः सन् आलोचयेत् । यदि पुनर्बहुप्रतिसेवितमस्तीति चिरेणालोचना समाप्तिमुपयास्यति तावंतं च कालमुत्कुटुकः स्थातुं न शक्नोति, यदिवा अर्शोरोगवत उत्कुटुकस्य सतो अर्शांसि क्षोभमुपयांति । ततो बहुप्रतिसेवी अर्शःसु च सत्सु गुरुमनुज्ञाप्य निषद्यायामौपग्रहिकपादप्रोंछने वा अन्यस्मिन्वा यथार्ह आसने स्थित आलोचयति, किं पुनस्तदा आलोचनीयं उच्यते चतुर्विधद्रव्यादि तथाचाह -

[भा.३१६] चेयणमचित्तदव्वं जनावय मद्वाणा य होइ खेत्तंमि,
दिननिसिसु भिक्ख दुभिक्खकाले भावंमि हट्ठेयरे ।

वृ- द्रव्यतश्चेतनं सचित्तमुपलक्षणमेतत् मिश्रं वा अचित्तमचेतनं वा अकल्पिकं यत् प्रतिसेवितं, क्षेत्रतो जनपदे वा, कालतो दिने निशि वा सुभिक्षे दुर्भिक्षे वा भावे हट्ठेयरे इति सप्तमी तृतीयार्थे हृष्टेन इतरेण वा ग्लानेन सता यतनया वा दर्प्पतः कल्पतो वा तत् आलोचयति कथमित्याह -

जह बालो जंपंतो जंपंतो कज्जमकज्जं च उज्जुयं भणइ;
तं तह आलोएज्जा मायामयविप्पमुक्को उ ।

यथा बालो मातुः पितुर्वा पुरतो जल्पन् कार्यमकार्यं च ऋजुकमकुटिलं भणति । तथा आलोचकोपि मायामदविप्रमुक्तः सन् तत् आलोचयेत्; यथा ऋजुकभावेनालोचयेत् आलोचनायाश्चेमे गुणाः ।

[भा.३१८] लहुयाहलादीजननं अप्पपरनियतिश्रज्जवं सोही ।
दुक्करकरणं विनाओ निसल्लत्तं वसोहिगुणा ।

वृ- लघोर्भावो लघुता यथा भारवाही अपहृतभारो लघुर्भवति । तथा आलोचकोप्युद्धृतशल्यो लघुर्भवति इति लघुता । तथाह्लादनं ह्लादिरोणादिक इप्रत्ययः । प्रल्हत्तिस्तस्य जननमुत्पत्तिहर्लादिजननं प्रमोदोत्पाद इति यावत् तथा ह्यतिचारधर्म्मततस्य चित्तस्य मलयगिरिपवनसंपर्केणेव आलोचनाप्रदानेनातीचारधर्म्मापगमतो भवति संविग्नानां परममुनीनां महान् प्रमोद इति, तथा अप्पपरनियत्तित्ति आलोचना प्रदानतः स्वयमात्मनो दोषेभ्यो निवृत्तिः कृतांतं च दष्ट्वा अन्येप्यालोचनाभिमुखा भवंति इति अन्येष्यामपि दोषेभ्यो निवर्त्तन मिति. तथा यदतिचारजातं प्रतिसेवितं तत् परस्मै प्रकटता आत्मन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आर्जवं सम्यग्विभावितं भवति आर्जवं नाम अमायाविता तथा अतिचार पंकमलिनस्यात्मनश्चरणस्य वा प्रायश्चित्तजलेन अतिचारपंकप्रक्षालनतो निर्म्मलताशोधिः तथा दुष्करकरणं दुष्करकारिता तथाहि यत् प्रतिसेवनं तन्न दुष्करं, अनादिभवाभ्यस्तत्वात् यत् पुनरालोचनयति तत् दुष्करं प्रबलमोक्षानुयायिवीर्योल्लासविशेषेणैव तस्य कर्तुं शक्यत्वात् तथा विणओ इति आलोचयता चारित्रविनयः सम्यगुपपादितो भवति निस्सल्लत्तमिति सशल्य आत्मा निःशल्यः कृतो भवतीति निःशल्यता एते शोधिगुणाः आलोचनागुणा आलोचनाशोधिरित्यनर्थांतरत्वात् अथ कस्य समीपे आलोचना दातव्या उच्यते । आगमव्यवहारिणः श्रुतव्यवहारिणो वा तथाचाह -

[भा.३१८] आगमसुयववहारी आगमतो छव्विहो उ ववहारो;
केवलमनोहिचोद्दसदसनवपुव्वी नायव्वो ।

वृ- आगमसुयववहारीति व्यवहारशब्दः प्रत्येकमभिसंबध्यते आलोचनार्हो द्विविधस्तद्यथा आगमव्यवहारी श्रुतव्यवहारी च, तत्रागमव्यवहारी षड्विधस्तद्यथा केवली केवलज्ञानी । मनोहित्ति पदैकदेशे पदसमुदायोपचारात् मनःपर्यायज्ञानी अवधिज्ञानी, चोदसदसनवपुव्वी इति पूर्विशब्दः प्रत्येकमभिसंबंध्यते चतुर्दशपूर्वी दशपूर्वी नवपूर्वी ज्ञातव्याः एते चागमव्यवहारिणः प्रत्यक्षज्ञानिन उच्यंतेः चतुर्दशादिपूर्वबलसमुत्थस्यापि ज्ञानस्य प्रत्यक्षतुल्यत्वात् तथाहि येन यथा योतिचारः कृतस्तं तथा सर्वमेते जानंतीति ।

[भा.३१९] पम्हुट्ठे पडिसारण, अपडिवज्जं तयं न खलु सारे ।
जइ पडिवज्जइ सारे दुविहतियारंपि पच्चक्खी ।

वृ- प्रत्यक्षाप्रत्यक्षज्ञानी आगमव्यवहारीत्यर्थः द्विविधमपि मूलगुणविषयमुत्तरगुणविषयं वातिचारमालोचयतो यत् किमप्यालोचनीयं पम्हुट्ठेत्ति विस्मृतं भवति तस्मिन् विस्मृते प्रतिसारणं करोति यथाऽमुकं तवालोचनीयं विस्मृतमिति, तदप्यालोचयेति, केवलं यदि केवज्ञानादिबलेनैतत् जानाति, यथैव भणितः सन् शुद्धभावत्वात् सम्यक् प्रतिपद्यते, वर्तमानबद्धेति वचनतो भविष्यति वर्त्तमानाभिधानात्प्रतिपत्स्यते इति तदा स्मारयति, यदि पुनरेतदवगच्छति यथैष भणितोपि सन् न सम्यक् प्रतिपत्स्यतेइति, तदा तमप्रतिपद्यमानं अप्रतिपत्स्यमानं न खलु नैव स्मारयति निष्फलत्वात् अमूढलक्ष्यो हि भगवानागमव्यवहारी; अत्र एव दत्तायामप्यालोचनायां यथालोचकः सम्यगावृत्तो ज्ञातस्ततस्तस्मै प्रायश्चित्तं प्रयच्छति, अथ न प्रत्यावृत्तस्तती न प्रयच्छतीति; श्रुतव्यवहारिणः प्राह -

[भा.३२०] कप्पपकप्पी उसुए, आलोयवावेति तेउ तिक्खुत्तो ।
सरिसत्थमपलिउंची विसरिसपरिणामतो कुंची ।।

वृ- कल्पग्रहणेन दशाश्रुतस्कंधकल्पव्यवहारा गृहीताः प्रकल्पग्रहेणन निशीथः कल्पश्च प्रकल्पश्च कल्पप्रकल्पं, तदेषामस्तीति कल्पप्रकल्पिनः, दशाकल्पव्यवहारादिसूत्रार्थधरास्तु शब्दात् महाकल्पश्रुतमहानिशीथनिर्युक्तिपीठिकाधराश्च, श्रुते श्रुतव्यवहारिणः प्रोच्यंते, ते चालोचकं त्रिःकृत्वस्त्रीन् वारान् आलोचापयंति ते ह्येकंद्वौ वारावालोचिते अनेन प्रतिकुंचनयालोचितमप्रतिकुंचनया वेति विशेषं नावबुध्यंते । ततस्त्रीन् वारान् आलोचापयंति कथमिति चेत् उच्यते, प्रथमवेलायां निद्रायमाण इव श्रृणोति ततो ब्रूते निद्राप्रमादं गतवानहमिति न किमप्यश्रौषमतो भूयोप्यालोचय, द्वितीयवारमालोचिते भणति न सुट्ठुमयावधारितमनुपयोगभावादतः पुनरप्यालोचय, एवं त्रिष्वपि वारेषु यदि सदृशार्थमालोचितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो ज्ञातव्यमेषो अप्रतिकुंचो अमायावी अथ विसद्दशं तर्हि ज्ञातव्यमेष परिणामतः कुंची कुटिलो मायावी अथैकं द्वौ वा वारावालोचनादापनेन मायावी अमायावी वा किन्नोपलभ्यते, येन त्रीन् वारानित्युक्तं, उच्यते, उपलभ्यते, परं स्फुटतरोपलब्धिनिमित्तं त्रीन्वारानालोचाप्यते, तस्यापि च प्रत्ययो भवति यथाहं विसद्दशभणनेन मायावी लक्षितस्ततो मायानिष्पन्नं मासगुरुप्रायश्चित्तं पूर्वं दातव्यं । तदनंतरमपराधनमित्तिं प्रायश्चित्तमित; अत्रैवार्थे द्दष्टांतमाह -

[भा.३२१] तिन्निउ वारा जह दंडियस्स पलिउंचियंमि अस्सुवमा;
सुद्धस्स होइ मासो, पलिउंचिइतंचिमंवऽनं ।।

वृ- दंडको नामकरणपतिस्तस्य यथा अपन्यायपीडितं करणमुपस्थितं करणमुपस्थितं किं मायाव्येषोऽमायावी चेति परिज्ञानाय त्रीन् वारान्अपन्यायमुच्चारायितुमभियोग, एवं श्रुतव्यवहारिणोपि अतिचारशल्यपीडितं प्रायश्चित्तव्यवहारार्थमुपस्थिमेष प्रतिकुंचनापरो न वेति परिज्ञानार्थं त्रीन् उच्चारयितुं संरंभः, ततो यदा श्रुतव्यवहरिभिस्त्रिकृत्य आलोचनाप्रदापनेनागमव्यवहारिभिः प्रथमवेलायामप्यागमबलेन तस्य प्रतिकुंचितकौटिल्यं ज्ञातं भवति, तदा तस्मिन् प्रतिकुंचिते ज्ञाते अश्वोपमा अश्वद्दष्टांतः क्रियते, यथा आर्य शृणु, तावदिदमुदाहरणं । जहा कस्सइ रणे एगो आसो सव्वलखणसंजुत्तो धावणपवणसमथ्थो, तस्स आसस्स गुणेणं अजेयो, सो राया सव्वे सामंतराइणो आज्ञापयति, ताहे सामंतराइणो अप्पणो सभासु भणंति, नत्थि एरिसो कोइ पुरिसो जो तमवहारित्तो आनेति, सव्वेहिं भणियं, सो पुरिसपंजरत्थो चिट्ठइ, गच्छइ वा न पवनो सक्को हरिउं, एगस्स रन्नो एगेन पुरिसेण भणियं, जइ सो मारेयव्वो तो मारेमि, ताहे रना भणियं, मा अम्हं तस्स वा भवउ वाहएहत्ति, ततो सो तत्थ गतो, तेन छन्नपदे संठिएणश्लक्ष्णाया इषीकाया अग्रभागे क्षुद्रकीकंटकं प्रोतं कृत्वा दिक्करुयधनुएण मेल्लइ तेन सो आसो विद्धो इषीका अश्वमाहत्य पतिता, रिंगिणिकाकंटको अश्वशरीरेऽनुप्रविष्टः, ततोसौ आसो, तेन अव्वत्तसल्लेण परिहायइ पभूयगुणजोग्गासणमपि चरंतो, ततो वेज्जस्स अक्खातो वेज्जेण पिरिचिंतिऊण भणियं; नत्थि अन्नो कोइ रोगो, अवस्समव्वत्तो कोइ सल्लो, ताहे वेज्जेण सो आसो जमगसमगं पुरिसेहिं चिक्खल्लेण आलिंपावितो, ततो जत्थ पढमं सुक्कं दिट्ठं फालेत्ता अवनीतो सो क्षुद्रकंटकीसल्लो जहा सो आसो ससल्लो न सक्केइ सामंतरायाणो निज्झिणिउं पुव्वं एवं तुमंपि किरियाकलावं करेंतो वि संजमवुड्डिमकरेमाणो न कम्माणं जयं करेसि, ता सव्वं सम्मं आलोएहि इति, यदि पुनर्न किमपि तस्य प्रतिकुंचितं ज्ञातं भवति तदा नासावश्वद्दष्टांतः क्रियते, स्वभावत एव तस्य सम्यगालोचकत्वात् तस्य तु शुद्धस्य मासिकं परिहारस्थानं प्राप्तस्य प्रायश्चित्तं भवति मास इतरस्य तु कृतप्रतिकुंचनस्य तथापन्नमासिकं प्रायश्चित्तमिदं चान्यत् मायानिष्पन्नं मासगुरु इतिगाथार्थः ।संप्रति यदुक्तं, जहदंडियस्सेति तद्विभावयति

[भा.३२२] अत्थुप्पत्ती असरिस निवेयणे दंडो पच्छववहारो;
इय लोउत्तरियंमिवि, कुंचियभावं तु दंडंति ।।

वृ- उत्पद्यते यस्मादिति उत्पत्तिः । अर्थस्योत्पत्तिरर्थश्चोत्पद्यते व्यवहारादिति अर्थोत्पतिव्यवहार उच्यते, तस्यायमर्थोत्पत्तौ करणव्यवहारे असद्दशनिवेदने दंडः, इयमत्र भावना यथा कोऽपि पुरुषोऽपन्यायपीडितो राजकरणमुपस्थितो निवेदयते, हं देवदत्तेनापन्यायेन पीडितः । ततः कारणिकाः पृच्छंति कथमन्यायः संवृत्तः, सोऽकथयत्, कथिते करणपतिर्ब्रूते, पुनः कथय, ततो भूयः कथयति, ततः पुनरपि कथय, तत्र यदि तिसृष्वपि वेलासु सद्दशं वक्ति, ततो ज्ञायते यथा अनेन यथावस्थितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्भावः कथितः, अथ विसदृशं, ततो जानाति करणपतिरपि प्रतिकुंच्य कथयति ततः स निर्भर्त्सयति, किमिति राजकुलेपि समागतस्त्वं मृषा वदसीति पूर्वं मायामृषा प्रत्ययं दंड्यते, पच्छववहारो इति पश्चाद् व्यवहारं कार्यते, व्यवहारेपि यदि पराजितो भवति, ततो द्वितीयवेलं दंड्यते । एष दृष्टांतो, दार्ष्टांतिकयोजनामाह; इय इत्यादि इति एवमुक्तप्रकारेण लोकोत्तरेपि वारत्रयमालोचनादापनेन यदि कुंचितो भावो ज्ञातो भवति, ततस्तं कुंचितभावं पूर्वमाचर्यो निर्भर्त्स्ययति । किमित्यालोचनाया-मभ्युपस्थितो मायामृषा वदसि ततो दंडे इति प्रथमतो मायानिष्पन्नेन मासगुरुप्रायश्चित्तेन दंडयति, पश्चात् यदापन्नं मासिकं तेन द्वितीयवेलं दंडयति । अथ वारत्रयमालोचनादापनेपि कथं श्रुतव्यवहारिणो मायामंतर्गतां लक्षयंते तत आह -

[भा.३२३] आगारेहिं सरेहिं य पुव्वावरवाहयाहियगिराहिं;
नाउं कुंचियभावं परोक्खनाणी ववहरंति ।।

वृ- आकाराः शरीरगता भावविशेषास्तत्र यः शुद्धस्तस्य सर्वेप्याकाराः संविग्नभावोपदर्शका भवंति, इतरस्य तु न तादृशाः । स्वरा अप्यालोचयतः शुद्धस्य विविक्ता विस्पृष्टा अक्षुभिताश्च निस्सरंति इतरस्य त्वव्यक्ता अविस्पष्टाः । क्षुभितगद्गदाश्च, तथा शुद्धस्य वाणी पूर्वापराव्याहता, इतरस्य तु पूवापरवि-संवादिनी, तत् एवं परोक्षज्ञानिः श्रुतव्यवहारिण आकारैः स्वरैः पूर्वापरव्याहताभिश्च गीर्भिस्तस्या-लोचकगस्य कुंचितभावं कुटिलभावं ज्ञात्वा तथा व्यवहरंति, पूर्वं मायाप्रत्ययेन प्रायश्चित्तदंडेन दंड्यते, पश्चादपराधप्रत्ययेन प्रायश्चित्तदंडेनेति भावः ।

मू. (२) *जे भिक्खू दोमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा, अपलिउंचियं आलोएमाणस्स दोमासियं पलिउंचियं आलोएमाणस्स तिमासियं ।।*

वृ- द्वैमासिकं प्रायश्चित्तं यो भिक्षुर्द्वाभ्यां मासाभ्यां निर्वृत्तं द्वैमासिकं परिहारस्थानं प्रतिसेव्य आलोचयति तस्याप्रतिकुंच्य मायामकृत्वा आलोचयतो द्वैमासिकं प्रायश्चित्तं शुद्धत्वात् । प्रतिकुंच्यालोचयतस्त्रैमासिकं प्रतिकुंचनानष्पिन्नस्य गुरुमासस्य प्रक्षेपात्, इह द्वैमासिकं परिहारस्थानमात्रमापन्नस्य प्रतिकुंचकस्य दृष्टांतः कुंचिको नाम तापसः तद्यथा, कुंचिगो तावसो सो फलाण अट्ठाए अडविं गत्तो तेण नदीए सयं मतो मच्छो दिट्ठो, तेन अप्पसागारिए पइत्ता खइतो । तस्स तेन अनुचियाहारेण अजीरंतेन गेलन्नं जायं, तेन विज्जो पुच्छिओ, सो भणइ, किं ते खइयं जतो रोगो उपन्नो ? तावसो भणइ फलाइं मोत्तुं अन्नं न किंचि खइयं, वेज्जो भणइ कंदादीहिंत्ते निक्करिसियं सरीरं, तो घयं पिवाहि; तेन पीयं सुट्ठुयरं, गिलाणीभूतो, पुनो पुच्छित्तो वेज्जो, तेन भणियं, समं कहेहि, कहियं मच्छो मे खइत्तो, ततो वेज्जेण संसोहणवमणविरेयणकिरियाहिं लट्ठीकओ, इमो उवणओ, जो पलिउंचइ तस्स पच्छित्तकिरिया न सक्कइ गुणं काउं सम्मं, पुन अइयाररोगं आलोयं तस्स सक्कइ ।

मू. (३) *जे भिक्खू तेमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा, अपलिउंचियं आलोएमाणस्स तेमासियं, पलिउंचियं आलोएमाणस्स चउमासियं ।।*

वृ- अत्र व्याख्या पूर्ववत् नवरं त्रैमासिकमिति त्रिभिर्मासैर्निर्वृत्तं त्रैमासिकं शेषं तथैव केवलं त्रयो मासा अवस्थिता अन्यो मायाप्रत्ययनिष्पन्नश्चतुर्थो मासो गुरुर्दीयत इति चातुर्मासिकं, अत्र प्रतिकुंचकस्य दृष्टांतो योधः ।। दो रायाणो संगामं संगामेंति । तत्थ एगस्स रन्नो एगो मणूसो सूरत्तणेणं अतीव वल्लभो, सो य बहूहिं सल्लितो, ते तस्स सल्ले वेज्जा अवणेइ, अवणिज्जमाणेहिं य सल्लेहिं, सो अतीव दुक्खाविज्जइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो एक्कंमि अंगे सल्लो विज्ञमाणेवि दुक्खाविज्ञामिति वेज्जस्स न कहितो, ताहे सो तेन सल्लेण विघट्टमाणेण बलं न गेण्हइ दुब्बली भवति, पुनो तेन पुच्छिज्ञमाणेण निब्बंधे कहियं, नीणितो सल्लो, पच्छा बलवं जातो, अत्राप्युपनयः प्राग्वत् ।

मू. (४) *जे भिक्खू चाउम्मासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्ञा, अपलिउंचियं आलोएमाणस्स चाउम्मासियं, पलिउंचियं आलोएमाणस्स पंचमासियं ।।*

वृ- अस्य व्याख्या प्राग्वत् नवरं प्रतिकुंचनानिष्पन्नं पंचमो गुरुमासोऽधिको दीयते इति, पांचमासिकं अत्र प्रतिकुंचके दृष्टांतो मालाकारः, दो मालागारा कोमुदीवारो आसन्नीभूतोत्ति पुष्पाणि बहूण आरामतो उच्चिणित्ता एगेण वीही कड्ढेऊणं एगेण पागडाणि कयाणि, बीएण न पागडाणि कयाणि, जेन पागडाणि कयाणि तेन बहूलाभो लद्धो, जेन न पागडाणि, कयाणि, तस्स न कोइ कयगो अल्लीणो नेन न लद्धो लाभो, एवं जो मूलगुणावराहे उत्तरगुणावराहे य न पागडेइ, सो निव्वाणे लाभं न लहइ ।

मू. (५) *जे भिक्खू पंचमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्ञा, अपलिउंचियं आलोएमाणस्स पंचमासियं, पलिउंचियं आलोएमाणस्स छम्मासियं ।।*

वृ- इदमपि तथैव नानात्वमिदं, प्रतिकुंचनायां षष्ठो गुरुमासोऽधिको दीयते, इति षाण्मासिकमत्र प्रतिकुंचके मेघदृष्टांतः यथा मेघो गज्जितानामेगे नोवरिसित्ता, एवं तुमंपि आलोएमित्ति गज्जिता निसिज्जं काउं आलोइउमाढत्तो, पलिउंचेसि, मा विप्रतिज्ञो भवाहि, सम्मं आलोएहि । एतानेव दृष्टांतान् गाथापूर्वार्द्धेन भाष्यकृदाह -

[भा. ३२४/१] कुंचियजोहे मालागारे मेहे पलिउंचिए तिगट्ठाणा ।।

वृ- द्वैमासिकादिपरिहारस्थानेषु परिकुंचिते यथाक्रममिमे कुंचिकादयो दृष्टांताः तद्यथा, द्वैमासिकं परिहारस्थानमापन्नस्य प्रतिकुंचकस्य दृष्टांतः कुंचिकस्तापसः, त्रैमासिकं परिहारस्थानमापन्नस्य योधः, चतुर्म्मासिकं परिहारस्थानमापन्नस्य मालाकारः पंचमासिकं परिहारस्थानमापन्नस्य मेघः, पलिउंचिएत्ति प्रतिकुंचनायां कृतायामाचार्येण सम्यगालोचय मा प्रतिकुंचनां कार्षीरित्युपालब्धः सन् सम्यक् प्रत्यावर्तते, भगवन् मिथ्या मे दुःकृतं सती चोदना सम्यगालोचयामीति, ततः स श्रुतव्यवहारी प्रतिकुंचिते तं तथाप्रत्यावृत्तं संतं पुनरपि त्रीन् वारान् आलोचापयति, तत्र यदि त्रिभिरपि वारैः सदृशमालोचयति, ततो ज्ञातव्यो यथा सम्यगेष प्रत्यावृत्त इति, तदनंतरं च यद्देयं प्रायश्चित्तं तद्दातव्यमिति, । अथ विसदृशमालोचयति ततो भणति अन्यत्र त्वं शोधिं कुरु, नाहं तव शक्नोम्येतादृश्याआलोचनायाः सद्भावमजानानः शोधिं कर्त्तुमिति, अथवा शिष्यः पृच्छति भगवन् एतानि मासादीनि षण्मासपर्यंतानि परिहारस्थानानि कुतः प्राप्तानि सूरिराह तिगट्ठाणा उद्गमादित्रिकरूपात् स्थानात् किमुक्तं भवति ? । उद्गमोत्पादनैषणासु यत् अकल्प्यप्रतिसेवनाया अनाचारकरणं, तस्मादेनाति प्राप्तानि; ।

सांप्रतं षाण्मासिकं परिहारस्थानसूत्रमाह । तेन परं पलिउंचिए वा अपलिउंचिए वा ते चेव षण्मासा; तेनेत्यव्ययं, तत इत्यर्थे ततः पंचमासिकात् परिहारस्थानात् परमित्येतदप्यव्ययं ससम्यर्थप्रधानं परस्मिन् षण्मासिके परिहारस्थाने प्रतिसेविते आलोचनाकाले प्रतिकुंचिते वा अप्रतिकुंचिते वा प्रतिकुंचनया वा अप्रतिकुंचनया वा आलोचिते इत्यर्थः । ते एव प्रतिसेवनानिष्पन्नाः स्थिताः षण्मासाः, नाधिकं प्रतिकुंचनानिमित्तमारोपणं, कस्मादिति चेत् । उच्यते, इह जीतकल्पोयं, यस्य तीर्थकरस्य यावत्प्रमाणमुत्कृष्टं तपःकरणं, तस्य तीर्थे तावदेव शेषसाधूनामुत्कृष्टं प्रायश्चित्तदानं चरमतीर्थकरस्य तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवतो वर्द्धमानस्वामिन उत्कृष्टतपः षाण्मासिकं, ततोऽस्य तीर्थे सर्वोत्कृष्टमपि प्रायश्चित्तदानं षण्मासा एवेति, षण्मासिकपरिहारस्थानं प्रतिसेव्य प्रतिकुंचनयाप्यालोचयतो नाधिकमारोपणमतस्त एव षण्मासाः स्थिता उक्ताः ।

मू. (६) *जे भिक्खू बहुसोविमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा, अपलिउंचियं आलोएमाणस्स मासियं, पलिउंचियं आलोएमाणस्स दोमासियं ।। (एवं)*

मू. (७) *जे भिक्खू बहुसोविदोमासियं - जाव - तेमासियं ।*

मू. (८) *जे भिक्खू बहुसोवितेमासियं - जाव - चाउम्मासियं ।*

मू. (९) *जे भिक्खू बहुसोविचाउम्मासियं - जाव -पंचमासियं ।*

मू. (१०) *जे भिक्खू बहुसोवि पंचमासियं - जाव - आलोएमाणस्स पंचमासियं पलिउचियं आलोएमाणस्स छम्मासियं तेनं परं पलिउचिए वा अपलिउंचिए वा ते चेव छम्मासा ।*

वृ. जे भिक्खू बहुसोवि मासियं परिहारट्ठाणमित्यादि यो भिक्षुर्बहुशोपि त्रिप्रभृतिवारानपि आस्तामेकं द्वौ वा वारावित्यपि शब्दार्थः । मासिकं परिहारस्थानं प्रतिसेव्य आलोचयेत् तस्याप्रतिकुंच्यालोचयतो मासिकमेकं प्रायश्चित्तं, प्रतिकुंच्यालोचयतो द्वितीयो मायानिष्पन्नो गुरुमासो दीयते इति द्वैमासिकंइयमत्र भावना, केनापि गीतार्थेन कारणे अयतनया त्रीन् वारान् बहून् वारान् वा मासिकं परिहारस्थानं प्रतिसेवितमालोचनाकाले चाप्रतिकुंचनयालोचितं तस्मै एकमेव मासिकं प्रायश्चित्तं दीयते, नतु यावतो वारान् प्रतिसेवना मासिकस्य कृतवान् तावंति मासिकानीति कारणप्रतिसेवनायाः कृतत्वात्, अथ प्रतिकुंचनयालोचयति, ततो द्वितीयो मासो मायानिष्पन्नो गुरुर्दीयते । इति द्वैमासिकं, एवं शेषाण्यपि द्वैमासिकादीनि विषयाणि चत्वारि सूत्राणि भावनीयानि, नवरं द्वैमासिकसूत्रे तृतीयो मायानिष्पन्नो गुरुमासो दीयते इति त्रैमासिकं, त्रैमासिकसूत्रे चतुर्थो मायानिष्पन्नो मास इति, चातुर्मासिकं चातुर्मासिकसूत्रे पंचमो मायाप्रत्ययो मास इति पंचमासिकं, पांचमासिकसूत्रे षष्ठो मायानिष्पन्नो गुरुमास इति षण्मासिकं, ततः षण्मासिके परिहारस्थाने आलोचनाकाले प्रतिकुंचनायामप्रतिकुंचनायां वा त एव स्थिताः षण्मासा इति; अमीषां पंचानामपि सूत्राणां सूचकमिदं गाथायाः पश्चार्द्धं ।

[भा. ३२४/२] पंचगमानेयव्वा बहूहिं उक्खडमड्डाहिं वा ।

वृ- पंचगमाः सूत्रप्रकारा ज्ञातव्याः । कथमित्याह । बहूहिं इत्यादि । उक्कडमड्डा । इति देशीपदमेतत् पुनः पुनः शब्दार्थश्च वारंवारं, ततोयमर्थः । बहुभिर्वारैर्विशेषता बहुशब्द इति पदविशेषिता इत्यर्थः, । अत्र चोदक आह -

[भा. ३२५] बहुएसु एगदाने, रागो एक्केक्कदाने दोसो उ ।
एवमगीते चोयग गीयंमि य अजयसेविम्मि ।।

वृ- ननु यूयं न मध्यस्था रागद्वेषकरणात् तथाहि बहुशः प्रतिसेवितेष्वेतेषु पंचसु सूत्रेषु मासिकेषु परिहारस्थानेषु बहुशः प्रतिसेवितेष्वपि एकमेव मासं प्रयच्छथ, द्वैमासिकेषु परिहारस्थानेषु बहुशः प्रतिसेवितेष्वप्येकं द्वैमासिकं, त्रैमासिकेषु परिहारस्थानेषु बहुशः प्रतिसेवितेष्वप्येकं त्रैमासिकं, चातुर्मासिकेषु परिहारस्थानेषु बहुशः प्रतिसेवितेष्वेकं चातुर्मासिकं, पंचमासिकेषु परिहारस्थानेषु बहुशः प्रतिसेवितेषु एकं पंचमासिकं, एवं बहुकेषु बहुशः प्रतिसेवितेषु मासिकादिषु परिहारस्थानेष्वेकदाने एकैकसंख्याकस्य मासिकादेर्दानैर्येष्वेवं प्रयच्छथ, तेषु रागः आद्येषु पंचसूत्रेषु एकैकदाने एकैकवारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् प्रतिसेवितं मासिकादि तस्य परिपूर्नस्य दानेष्वेवं प्रयच्छथ, तेषु विषये द्वेष एव, तुः शब्दः एवकारार्थः न च रागद्वेषवंतः परेषां शोधिमुत्पादयितुं क्षमाः सम्यक् प्रायश्चित्तदानविधिरकरणादिति । अत्र सूरिराह एवमित्यादि । अहो चोदक एवमादिमेषु पंचसु सूत्रेषु यावन्मात्रं प्रतिसेवितं तावन्मात्रस्य परिपूर्णस्य दानमगीते अगीतार्थे प्रतिसेवके, यत् पुनर्बहुशः शब्दविशेषितेषु पंचसु सूत्रेषु बहुशः प्रतिसेवितेष्वपि मासिकादिषु स्थानेष्वेकैकेन संख्यांकस्य मासिकादेर्दानं तत् गीतार्थे अयतनासेविनि अयतनया प्रतिसेवके ततो गीतार्थागीतार्थभेदेन प्रतिसेवकस्य भेदादित्थं प्रायश्चित्तविधानमित्यदोषः अत्रैवार्थे दृष्टांतमाह -

[भा.३२६] जो जत्तिएण रोगो, पसमइ तं देह भेसजं वेज्जो;
एवागमसुयनाणी, सुज्झइ जेणं तयं देंति ।

वृ - यो रोगो यस्मिन् पुरुषे अल्पो महान्वा पुरुषप्रकृतिमपेक्ष्य यावन्मात्रेण प्रशाम्यति, तस्य पुरुषस्य तत् तावन्मात्रभेषजं वैद्यः प्रयच्छति नाधिकं, एवममुना दृष्टांतप्रकारेण, मकारस्य लोपः प्राकृतत्वात् । आगमसुयनाणीति, ज्ञानिशब्दः प्रत्येकमभिसंबंध्यते, आगमज्ञानिनः श्रुतज्ञानिनश्च यो गीतार्थोऽगीतार्थश्च येन यावन्मात्रेण प्रायश्चित्तेन परिणामवशात् शुध्यति, तस्मै तत्तावत्प्रमाणं प्रायश्चित्तं ददाति, ततो यथौचित्यप्रवृत्तेर्न रागद्वेषवत्तेति न काचित्क्षतिः, संप्रति वक्ष्यमाणार्थसूचिकामिमां संग्रहणिगाथामाह ।

[भा.३२७] सुत्तं चोयग मा गद्दभत्ति कोट्ठारतिय दुवेय खल्लाडा;
अद्धाणे सेवियंमी सव्वेसिं घेत्तुणं दिनं ।

वृ - प्रथमतः प्रमाणत्वेन सूत्रमुपन्यसनीयं ततश्चोदकवचनमुत्क्षिप्य मा इति प्रतिषेधो वक्तव्यस्तदनंतरं गर्दभदृष्टांतः ततोऽध्वनि सेवितेऽनेकवारं मासिके परिहारस्थाने तेषां समविषमतया दिवसान् गृहीत्वा दत्तमेकं मासिकं प्रायश्चित्तमित्युक्ते चोदकवचनमुत्क्षिप्य कोष्ठागारत्रयं दृष्टांतत्वेनोपन्यस्तव्यं, तदनंतरं च भूयः परवचनमाशंक्य द्वौ खल्वाडौ दृष्टांतौ करणीयाविति गाथाक्षरयोजना, भावार्थं स्वयमेव भाष्यकृद्वक्ष्यते, तत्र सुत्तं चोयग मा इत्येतत् व्याख्यानयन्नाह -

[भा.३२८] अवियहुसुत्ते भणियं सुत्तं विसमंति मा भणसु एवं;
संभवइ न साहेऊ अत्ता जेनालियं ब्बूया ।

वृ - अपिचेति रागद्वेषवत्ता भावहेत्वंतरसमुच्चये न आस्तां गीतार्थागीतार्थभेदेनयथौचित्यप्रायश्चित्तदानतो न वयं रागद्वेषवंतोऽपि च अन्यच्च सूत्रमेवंविधेष्वर्थेषु प्रमाणं, सूत्रे बहुनिश्चितं विषमास्वपि प्रतिसेवनासु तुल्यं प्रायश्चित्तं भणितं, ततो न कश्चिद्दोषः एतावता सूत्रमिति व्याख्यातं, अत्र चोदक आह । ननु सूत्रमेव विषमं न समीचीनं परस्परविरुद्धत्वात्, तथाह्यादिमेषु पंचसु सूत्रेषु यावत् प्रतिसेवितं तावत् परिपूर्नस्य दानमुत्तरेषु तु पंचसूत्रेषु बहुशः प्रतिसेवितेष्वपि मासिकादिष्वेकैकसंख्याकस्य मासिकादेर्दानं नच विषमासु प्रतिसेवनासु समं प्रायश्चित्तदातुमुचितमिति । एतावता चोदक इति व्याख्यातमिदानीमेतदेव चोदकवचनमुत्क्षिप्यमिति व्याख्यानयति, सुत्तं विसमंतीत्यादि एवमुपदर्शितेन प्रकारेण सूत्रं विषममिति, मा भण मा वादीः, यतः सूत्रस्य अर्थतः कर्त्तारो भगवंतो वीतरागाः सर्वज्ञाः अत्थं भासइ अरिहा इति वचनात् एवं च परमार्थतः आप्ताः क्षीणरागादितया परिपूर्णयथावस्थितार्थतत्वलक्षणसद्भावात् न च तेषामित्थंभूतनामाप्तानां स हेतुः कारणं संभवति, येन ते आप्ता अलीकं ब्रूयुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलीकभाषणहेतो रागादेर्निर्मूलकाषं कर्षणात् उक्तंच-

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतं; यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ।

ननु यद्यप्येवं तथापि विषमाणि खलु प्रतिसेवनावस्तूनि विषमेषु च प्रतिसेवनावस्तुषु कथं तुल्यं प्रायश्चित्तमिति तत्राह -

[भा.३२९] कामं विसमावत्थू तुल्ला सोही तहावि खलु तेसिं;
पंचवणितिपंच खरा अतुल्लमुल्लाय आहरणं ।

वृ- काममित्यनुमतौ, काममनुमन्यामहे विषमाणि वस्तूनि प्रतिसेवनालक्षणानि, तथापि खलु निश्चितं तेषां शुद्धिस्तुल्या भवति प्रतिसेवकभेदात्, एकत्र ह्यगीतार्थः प्रतिसेवकोऽन्यत्र गीतार्थः तथाचात्र पंचवणिजां पंचानां वणिजां । त्रिपंच खराः पंचदश गर्दभाः, पंचवणिजि पंचखराः कथंभूता इत्याह - अतुल्यमूल्या अतुल्यमसदृशं मूल्यं येषां ते, आहरणं दृष्टांतः पंचवणिया समभागसामाइया ववहरंति, तेसिं पन्नरस खरा लाभतो जाता, ते विसमभारवाहित्तेण विसममोल्लत्तेण य समं विभइउमवाएंता भंडिउमारद्धा, ततो ते एकस्य बुद्धिमंतस्स समीवमुवट्ठिया, तेन खराण मुल्लं पुच्छिया तेहिं कहियं, ततो भणति समं विभयामित्ति, धीरा होह, मा भंडेह, ततो तेन एक्को खरो सट्ठिमोल्लो एकस्य वाणियगस्स दिनो दोनि खरा पत्तेयं तीसमो ल्लाबिइयस्सदिणा, तिण्हं खराणं पत्तेयं वीसंवीसं मोल्लं तइयस्स दिन्ना, चउण्हं खराणं पत्तेयं पन्नरस २ मोल्लं ते चउत्थगस्स वाणि यगस्स दिन्ना पंचखरा पत्तेयं बार समोल्ला ते पंचमस्स वाणियगस्स दिन्ना एतदेवाह -

[भा.३३०] विनिउत्तभंडभंडण मा भंडह तत्थ एगोसट्ठीओ,
दो तीस तिन्निवीस चउ पन्नरस पंचबारसग ।

वृ- पंचानां वणिजांसमभागसामाजिकानां विनियुक्तभांडानां विनियुक्तं व्यापारितं भांडं क्रयाणकं यैस्ते तथा तेषां पंचदश खरा अभूवन्निति वाक्यशेषः, ते च विषमभारवाहिनो विषममूल्याश्चततो यद्यपि समविभागेन विभज्यमानरूपास्त्रयस्त्रयो भवंति तथाप्यतुल्यमूल्या इति, परस्परभंडनमभूत् तत्र एकोपरो मध्यस्थः समागत्य ब्रूते, मा भंडयताहं समविभागेन विभज्य दास्यामीति, तत्रैकः पष्ठिकः पष्ठिमूल्य एकस्य दत्त इति वाक्यशेषः, एवं द्वौ त्रिंशन्मूल्यौ द्वितीयस्य त्रयो विंशतिमूल्यास्तृतीयस्य, चत्वारः पंचदशमूल्याः चतुर्थस्य पंच द्वादशमूल्याः पंचमस्य, यथा तेषां पंचानां वणिजां पंचदश खराः परस्परमतुल्य मूल्यतया विभिन्नास्तथा केनापि विभज्य दत्ता, यथा तुल्या लाभप्राप्तिर्भवति, तथा साधूनामपि गीतार्थादिभेदानामनेकविधानामागमव्यवहारिणाश्रुत व्यवहारिणा वा तथा कंचनापि रासभस्थानीया मासा विभज्य दीयंते; यथा तुल्या विशोधिर्भवति इति एतदेवाह-

[भा.३३१] कुसलविभागसरिसउ गुरुसाहूय होंति वणिया वा;
रासभसमा य मासा, मोल्लं पुनरागदोसाउ ।

वृ- कुसलो विभागे कुसलविभागः, राजदंतादित्वाभ्युपगमात् कुशलशब्दस्य पूर्वनिपातः तेन सदृशकस्तुल्यो गुरुरागमव्यवहारी श्रुतव्यवहारी वा साधवश्च भवंति वणिजइव वणिजतुल्याः, वा शब्द उपमानार्थः वा विकल्पोपमानयो रिति वचनात्, रासभसमश्चमासा मूल्यं पुन रागद्वेषावेव तु शब्द एवकारार्थः तथाहि यथा रासभद्रव्यगुणवृद्धिहानितो मूल्यस्य वृद्धिहानी तथा रागद्वेषवृद्धिहानिकृते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिसेवनातः प्रायश्चित्तस्य वृद्धिहानी यथा केनापि तीव्ररागद्वेषाध्यवसायेन मासिकं स्थानं प्रतिसेवितं, तस्य मासः परिपूर्णो दीयते अपरेण मंदाध्यवसायेन द्वे मासिकस्थाने प्रतिसेविते तस्य एकैकस्य मासस्य पंचदश २ दिनानि गृहीत्वा मासो दीयते, शेषं त्यज्यते मंदाध्यवसायेन प्रतिसेवनात् अन्येन मंदतमाध्यवसायेन त्रीणि मासिकस्थानानि प्रतिसेवितानि, तस्यैकैकस्य मासस्य दश दश दिनानि गृहीत्वा मासो दीयते, शेषं सर्वं त्याज्यं, अपरेणातिमंदतमाध्यवसायेन चत्वारि मासिकस्थानानि प्रतिसेविनाति; तस्मै चैकैस्य मासस्य अर्धाष्टमानि २ दिनानि गृहीत्वा मासो दीयते इत्यादि ततो भवति मूल्यं रागद्वेषो एवं सकलद्वैमासिकादिसूत्रेषु बहुशः सूत्रेषु च कारणायतनाप्रतिसेविनो रागद्वेषवृद्धिहानित उपयुज्य बहुविस्तारं वक्तव्यं, तदेव गदभत्ति व्याख्यातमधुना अद्धाणसेवियमीत्यादि व्याख्यायते गीतार्थेनाध्वनि उपलक्षणमेतदन्यस्मिन् कारणांतरे यदयतनया प्रतिसेवितं तत्र बहूनि मासिकस्थानान्यापन्नानि तानि चालोचनाकाले सर्वाण्यप्येकवेलयालोचितानि गुरुश्चालोचनाप्रदानविशेषतो जानाति यथैव गीतार्थः कारणे च प्रतिसेवना कृता परमयतनया ततोऽयतनाप्रसंगनिवारणार्थं सर्वेषामपि मासानां समविषमाणां समविषमतया दिवसान् गृहीत्वा मास एकस्तस्मै दत्तः अगीतार्थोपि यो मंदेनाध्यवसायेन बहूनि मासिकस्थानानि प्रतिसेव्य तीव्रेण वाध्यवसायेन प्रतिसेव्य हा मयादुष्टुकृतमित्येवमादिभिर्निंदनैरालो-चितवान् सोप्येकेन मासेन शुध्यति तथाप्यगीतार्थोऽपरिणमको वा चिंतयेत् द्वैमासिकाद्यापन्नोहं कथमेकेन मासेन शुद्ध्यामि ततः श्रुतव्यवहारी तस्य प्रत्ययकरणार्थमेकैकस्मात् मासात् कपिपयान् कतिपयान् दिवसान् गृहीत्वा मासमेकं प्रयच्छति ।

यथा द्वयोर्मासयोः प्रतिसेवितयोरेकैकस्यार्द्धमासमर्द्धमासं गृहीत्वा इति एवं सर्वेपि मासाः सफलीकृता इति तस्य महति धृतिरुपजायते, यस्त्वागमव्यवहारी स न व्यवहारी सद् द्वैमासिकं प्राप्तस्य द्वावपि मासौ सफलीकरोति किंत्वेकं ददाति, द्वितीयं त्यजति स हि प्रत्यक्षज्ञानी ततो न तद्वचने करयाप्यशुद्ध्याशंकेति यदा पुनः तीव्राध्यवसायो निष्कारणप्रतिसेवी, तस्य मासादिकमापन्नस्य परिपूर्णमासादिकमेव दीयते ।

[भा.३३२] वीसुं दिन्ने पुच्छा, दिट्ठंतो तत्थ दंडललिएणं,
दंडो रक्खो तेसिं भयजननं चेव सेसाणं ।

वृ- एवं गीतार्थानामगीतार्थानां च कारणे निष्कारणे वा विष्वक् पृथक् प्रायश्चित्ते दत्ते पुच्छति शिष्यः पृच्छति किं: कारणमगीतार्थानां निष्कारणे कारणे च विसदृशं प्रायश्चित्तं दत्तमिति । अत्र कोठागारत्तिए इत्यस्य व्याख्याया अवसरः दिट्ठंतो तत्थ दंडललिएणा तत्र पुरुषभेदेन विसदृशप्रायश्चित्तदाने दृष्टांतो दंडलातिकेन दंडालातो गृहीतो येन स दंडलातः सुखादिदर्शनात् निष्टांतस्य परनिपातः । दंडलात एव दंडलातिकः प्राकृतत्वात् स्वार्थिक इकप्रत्ययो यथा पृथिवीकायिका इत्यत्र तेन दंडलातिकेन गृहीतदंडेन राज्ञा इत्यर्थः । यथा तेन दंडलातिकेन राज्ञा राजकार्ये प्रवृत्तानामपि तेषां दंडानां रक्षा भवति मा भूयो ग्रहीतुः कोष्ठागाराणीति निवारणार्थं, तथा शेषाणां भयजननं च भयोत्पादश्च स्यादित्येवमर्थं स्तोको दंडः कृतस्तथा गीतार्थस्यापि कारणे प्रवृत्तस्यायतनाप्रसंगनिवारणार्थमगीतार्थस्य मंदाध्यवसायप्रतिसेविनो दुष्टाध्यवसायप्रतिसेविनो वा, वा बहुभिर्निंदनैर्दत्तालोचनस्य प्रमादनिवारणार्थं मासानां समविषमतया दिवसान् गृहीत्वा मासो दीयते, तथा वा स राजा शेषस्य राजकार्याप्रवृत्तस्य कोष्ठागारमूपकस्य सर्वात्मना दंडं करोति, एवं यो निष्कारणप्रतिसेवितस्य मासमापन्नस्य परिपूर्णं मासादिकं दीयते । अथ के ते दंडाः कथं च तेषां राजा दंडं कृतवानिति तत्कथानकसूचकमिदं गाथाद्वयमाह -

[भा.३३३] दंडं तिगं तु पुरतिगे ठवियं पच्चंतपरनिवारोहे,
भत्तट्ठं तीसतीसं कुंभग्गहआगया जे तु ।

[भा.३३४] कामंममेयकज्जं ।कयवित्तीएवि कीस भे गहियं,
एस पमाओ तुज्झं दस दस कुंभे दलह दंडं ।।

वृ- एगस्स पयंडरन्नो पच्चंति रायाविउट्ठो, ततो तेन पयंडेण रणा, तस्स पच्चासन्नेसु तिसु तिन्नि दंडा विसज्जिया गच्छह पुराणि रक्खह ततो तेसु नयरेसु पत्तेयं पत्तेयं ठिया पच्चंतियराइणा ते आगंतुरोहिया, तेहिं रोहिएहिं खीणभत्तेहिं जेते पुरेसु पयंडस्स रन्नो कोठागारा तेहिं तो पत्तेयं धन्नस्स तीसं तीसं कुंभा गहिया, ततो तेहिं सो पच्चंतितो राया जितो, आगया रन्नो समीवं कहियं सव्वं सवित्थरं तुट्ठो राया पुनो तेहिं कहियं तुज्झं कज्जं करंतेहिं धन्नं गहियं, रन्ना चिंतियं जइ एएसिं दंडो न कीरइ, तो मे पुनो पुनो उप्पन्नपयोगणेहिं कोठागाराए विलुप्पेहिंति नय अन्नेसिंभयं भवंति ।तम्हा मे दंडो कायव्वो, एवं चिंतिऊणं भणति, कामं मम कज्जं तहावि तुज्झं मए वित्ती कया आसि ततो कयवित्तीहिं कीस भे धन्नं मज्झं गहियं, तुज्झं एस पमाओ, ततो अनवत्थपसंगनिवारणत्थं भणति, एस तुज्झं दंडो, ममधन्ने देह एवं भणित्ता राया अनुग्गहं करेइ ।जेहिं कोट्ठागारोहिंतो तीसं कुंभा गहिया तेसु अप्पणिजस्स धन्नस्स दस दस कुंभे पक्खिवह वीसं वीसं कुंभा मुक्का, अक्षरयोजना त्वेवं प्रत्यंतपरनृपावरोधनिमित्तं दंड तिकं पुरत्रिके स्थापितं, तेन च प्रत्येकं भक्तार्थं तीसतीसकुंभगहणत्ति त्रिंशत्त्रिंशतः कुंभानां ग्रहो ग्रहणं कृतं ततस्तं प्रत्यंतनृपं जित्वा आगतास्ते दंडा राजानं विज्ञसवंतो यथा युष्मत्कार्थार्थ त्रिंशत्कुंभा गृहीताः राजा प्राह कामं ममैतत्कार्यं परं युष्माकं मया वृत्तिः कृतासीदिति, कृतवृत्तिभिर्भे भवद्भिः किमर्थं मम धान्यं गृहीतं युष्माकमेष प्रमादस्तस्मात् दंडं दशकुंभान् ददत एष दृष्टांतः अयमर्थोपनयः ।

[भा.३३५] तित्थयरा रायाणो, जइणो दंडाय कायकोठारा ।
असिवाइ वुग्गह पुन अजय पमायारुहण दंदो ।।

वृ- तीर्थंकरा राजानो राजस्थानीयाः, साधवो दंडा दंडस्थानीयाः कायाः, पृथिवीकायिकादयः कोष्ठागाराणि कोष्ठागारतुल्याः ।अशिवादीनि कारणानि, व्युद्ग्रहाः प्रत्यंतपरनृपेण सह ये व्युद्ग्रहास्तत्स्थानीयानि अयतनाप्रमादरोधनार्थं गीतार्थस्यायतनाप्रसंगनिवारणार्थमगीतार्थस्य प्रमादनिवारणार्थं सर्वेषां प्रतिसेवितानां मासानां समविषमतया दिवसान् गृहीत्वा मासो दंडो दीयते इति। अत्र पर आह -

[भा.३३६] बहुएहिवि मासेहिं एगो जइ दिज्जतीउ पच्छित्तं ।
एवं बहुसेवित्ता एक्कासि वियडेमो चोएइ ।।

वृ- यदि गीतार्थस्य कारणेन अयतनया बहुकेष्वपि मासेपु सूत्रे तृतीया सप्तम्यर्थे प्राकृतत्वात् प्रतिसेवितेषु एकवेलायामालोचिता इति कृत्वा एको मासः प्रायश्चित्तं दीयते, ततः इतः प्रभृति वयं बहूनि मासिकादीनि प्रतिसेव्य एक्कसिं एकवेलायां विकटयिष्यामः ।तत एकमेकमासिकादिकं लप्स्यामहे इति चोदयति चोदकः तत्राचार्य आह -

[भा.३३७] मा वय एवं एक्कसिं वियडेमो सुबहुएवि सेवित्ता,
लब्भिसि एवं चोयगदंते खल्लाड खड्डुगं च ।।

वृ- मा वद, मा वादीरेवं, यदुत सुबहून्यपि मासिकादीनि स्थानानि सेवित्वा प्रतिसेव्य एक्कसिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकवेलायां विकटयिष्यामो येनैकमेव मासिकादिकं लप्स्यामहे इति यत् एवं कुर्वन् चोदक ! लप्स्यसे महांतमपराधं, खल्वाटे खड्डुकां ददान इव, अत्र दुवेय खल्लाडा इत्यस्यावसरः द्वौ खल्वाटावत्र दृष्टांतः । एगो खल्लाडो तंबोलवाणियउ पत्रे विकिणइ सो एक्केण चारभडपोट्टेण पत्रे मग्गितो अरे खलाडवाणिया पत्रे देहि, तेन सकसाएण न दिन्ना । अन्ने भणंति थोवा दिन्ना, ततो तेन रूसिएण चारभटपोट्टेण खल्लाडे सिरे खड्डुगा दिन्ना, टक्करा दिन्नेति वुत्तं भवति, वाणीएण चिंतियं, जइ कलहेमि तो मए स दूमितो मारेज्ञा, तम्हा उवाएण वेरनिज्जामणं करेमि, एवं चिंतिऊणा तंबोलवाणिएण उट्ठित्ता हत्थो से मलिओ, वत्थजुयलं दिन्नं, पाएसु पडिओ बहु च से तंबुलं दिन्नं । चारभडपोट्टो पुच्छति, किं कारणं न तुमं रुट्ठो, पच्चुलं ममं पूएसि, पाएसु य पडिसित्ति, वाणिएणा भणियं अम्ह विसए सव्वखल्लाडाणमेरिसा चेव ठिती, चारभडपोट्टेण, चिंतियं, लद्धो मए जीवणोवाओ, ततो पुनोवि चिंतियं तारिसस्स खड्डुगं देमि जो मं अदरिद्दं करेज्ञा, ताहे तेन एगस्स ठक्कुरस्स खल्लाडगस्स खड्डुगा दिन्ना, तेन मारितो एतदेवाह -

[भा.३३८] खल्लाडगंमि खुड्डुगा दिन्ना तंबोलियस्स एगेन;
सक्कारिता जुयलं दिन्नं बिइएण वोरवितो ।

वृ- एकेन चारभटपोतेन तांबूलिकस्य शिरसि खल्वाटे खटुका टक्कारा दत्ता, ततस्तेन वणिजा तांबूलिकेन सत्कार्य तस्मै वस्त्रयुगलं दत्तं, द्वितीयेन खल्वाटेन व्यपरोपितो मारितः एष दृष्टांतो-ऽयमर्थोपनयः ।।

[भा.३३९] एवं तुमंपि चोयग, एक्कसि पडिसेविऊण मासेणं,
मुव्विहसि बिइयगं, पुन लभिहिसि मूलं तु पच्छित्तं ।।

वृ- एवं त्वमपि चोदक एक्कसि एकवारं बहूनि मासिकानि स्थानानि प्रतिसेव्य एकवेलायां सर्वाण्यप्यालोचितानीति मासेन मुक्तो द्वितीयवारमुपेत्य प्रतिसेव्य तथालोचयन् लक्षितस्वभावो मूलं तु शब्दात् च्छेदं वा लप्स्यसे, यथा लब्धवान् चारभटो मरणं अन्यच्च स चारभटो वा इह एकं प्राप्तवान् त्वं पुनः संसारे अनेकानि मरणानि प्राप्स्यसि, तस्मात् प्रतिसेवकपरिणामानुरूप एषप्रायश्चित्त दानविधिर्नालोचनामात्रविशेषकृत इति नान्यथा प्रसंजनीयः एतदेवाह -

[भा.३४०] असुहपरिणामजुत्तेण सेविए एगमेगमासोउ;
दिज्जइ य बहुसु एगो सुहपरिणामो जया सेवे ।

वृ- अशुभपरिणामयुक्तेनासेविते निष्कारणामयतनया प्रतिसेविते इत्यर्थः । एतस्मिन् मासे एको मासः परिपूर्णो दीयते, दुष्टाध्यवसायेन प्रतिसेवनात पुनः प्रत्यावृत्तेरभावाच्च, यदा पुनः शुभपरिणामः सेवते, पुष्टमालंबनमालंब्य प्रतिसेवते, इत्यर्थः दुष्टाध्यवसायेन वा सेवित्वा पश्चाद्गर्हात्मनिंदनं करोति, तस्य बहुष्वपि मासेपु प्रतिसेवितेष्वेको मासो दीयते, इह कश्चित् दंडदानादात्मानमपभ्राजनास्थानं दुःखितं मन्येत, तं प्रति दंडदानानफलमाह -

[भा.३४१] दिन्नमदिन्नो दंडो, सुहदुहजननो उदोणूहवग्गाणं;
साहुणं दिन्नसुहो अदिन्नसोक्खो गिहत्थाणं ।

वृ- द्वौ वर्गौ तद्यथा - साधुवर्गो गृहस्थवर्गश्च, तयोर्द्वयोर्वर्गयोर्दंडो दत्तो, दत्तश्च यथायोगं सुखदुःख जननः तत्र साधूनां दत्तः सन् दंडः सुखहेतुरदत्तः सन् दुःखकारणमिति सामर्थ्यात् गम्यते गृहस्थानामदत्तः सन् सुखावहो दत्तः सन् दुःखावह इति सामर्थ्यात् प्रत्येयं कस्मादेवमिति चेदत आह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३४२] उद्धियदंडो साहु अचिरेण उवेइ सासयं ठाणं ।
सोच्चिय अनुद्धियदंडो संसारपङ्क्तो होइ ।।

[भा.३४३] उद्धियदंडो गिहत्थो, असनवसन विरहितो दुही होइ;
सोच्चिय अनुद्धियदंडो असनवसणभोगवं होइ

वृ- उध्धृत उत्पाटितो गृहीतो दंडो येन स उध्धृतदंडः साधुरचिरेण स्तोकेन कालेनोपैति शाश्वतं स्थानं, प्रायश्चित्तं प्रतिपत्त्यातीचारमलापगमकरणत उत्तरोत्तरविशुद्धसंयमलाभात्; स एव साधुरनुध्धृतदंडः संसारप्रवर्त्तको भवति । अतिचारजातस्य संसारकारणत्वात्; तथा उध्धृतदंडो गृहस्थोऽशनवसनविरहितो भोजनवस्त्रपरिहीनो दुःखी भवति स एवानुध्धृतदंडोऽशनवसनभोगवान् भवति ।

मू. (११) *जेभिक्खू मासियंवा दोमासियंवा जाव पंचमासियं वा एएसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणं पडिसेविता आलोएज्जा अपलिउंचियं आलोएमाणस्स मासियं वा जाव पंचमासियं वा पलिउंचिय आलोएमाणस्स दोमासियं वा जाव छम्मासियं वा तेन परं पलिउंचिएवा अपलिउंचिए वा ते चेव छम्मासा ।*

मू. (१२) *जे भिक्खू बहुसोवि मासियं वा जाव पंचमासियं वा एएसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचियं आलोएमाणस्स मासियं वा जाव पंचमासियं वा पलिउंचयं आलोएमाणस्स दोमासियं जाव छम्मासियं तेन परं पलिउंचिए वा अपलिउंचिए वा ते चेव छम्मासा ।*

मू. (१३) *जे भिक्खू चाउम्मासियं वा साइरेगचाउम्मासियं वा पंचमासियं वा साइरेग पंचमासियं वा एएसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचियं आलोएमाणस्स चाउम्मासियंवा साइरेग चाउम्मासियं वा पंचमासियं वा साइरेग पंचमासियं वा पलिउंचियंआलोएमाणस्स पंचमासियं वा साइरेग पंचमासियं वा छम्मासियं तेनं परं पलिउंचिए वा अपलिउंचिएवा ते चेव छम्मासा ।*

मू. (१४) *(एवं) जे भिक्खू बहुसोवि० ---*

वृ- यो भिक्षुर्मासिकं या द्वैमासिकं वा त्रैमासिकं वा चतुर्मासिकं वा पंचमासिकं वा, वाशब्दाः सर्वे विकल्पार्थास्तथाचाह - एतेषां परिहारस्थानानामन्यतमत् सूत्रे मकारस्य रेफः प्राकृतत्वात् परिहारस्थानं प्रतिसेव्यालोचयेत् तस्येति सामर्थ्यादवसीयते यच्छब्दस्य तच्छब्दापेक्षित्वादप्रतिकुंच्य आलोचयतो मासिकं वा द्वैमासिकं वा त्रैमासिकं वा चातुर्म्मासिकं वा प्रतिकुंच्यालोचयतः । सर्वत्र आपन्नप्रातश्चित्तापेक्षया अधिको मायानिष्पन्नो गुरुमासो दीयते, इति द्वैमासिकादि क्रमेणेह द्वैमासिकं वा त्रैमासिकं वा पंचमासिकं वा षाण्मासिकं वा तेनपरमित्यादि ततः परं पंचमासिकात्परिहारस्थानात्परं परस्मिन् षण्मासिकं परिहारस्थाने प्रतिसेविते आलोचनायां प्रतिकुंचिते वा त एव स्थिताः षण्मासाः । ततः ऊध्धर्वमस्मिन् तीर्थे आरोपणायाः असंभवात् । अत्र शिष्यः प्राह ।

[भा.३४४] कसिणासवणा पढमे, बिइए बहुसोविएसरिसा;
संजोगो पुन तइय तत्थंतिमसुत्त वल्लीवा ।

वृ- इह आदिमानि पंचापि सकलसूत्राणि सकलसूत्रसामान्यादेकं प्रथमं सूत्रं विवक्षितं, द्वितीयानि पंच सूत्राणि बहुशः शब्दविशेषितानि बहुशः शब्दविशेषितान्यपि बहुशः शब्दविशेषयित्वा विशेषात् द्वितीयं सूत्रं, तत्र प्रथमसूत्रे कृत्स्नारोपणा कृता किमुक्तं भवति, यत्प्रतिसेवितं तत्सर्वं परिपूर्णं दत्तं न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः किंचिदपि तस्मात् मुक्तमिति, द्वितीये सूत्रे बहुशोपि सेवितं मासिकादौ परिहारस्थाने झोषित्वा शुद्धिः सदृशी प्रथमसूत्रगमसदृशी दत्ता, एवं प्रथमे द्वितीये च सूत्रे गते अयं तृतीयः सूत्रगमः किंप्रसिद्ध्यर्थमारब्धः । आचार्य आह । संयोगा इत्यादि तृतीयेऽस्मिन् सूत्रे संयोगः पंचपदगतः उपदर्शितः पुनः शब्दो विशेषणार्थः स चैतद्विशिनष्टि, पंचानामादिसूत्रगमानां संयोगज्ञापनार्थमिदं तृतीयं सूत्रमारब्धमिति, तथाहि पंचानां पदानां दशद्विकसंयोगे भंगाः, दशत्रिकसंयोगे, पंच चतुष्कसंयोगे, एकः पंचसंयोगे, तत्र योसावेकः पंचकसंयोगे सोऽनेन सूत्रेऽत्र साक्षात् गृहीतः तथाचाह तत्थंतिमसुत्तत्ति तत्र तेषु द्विकसंयोगादिभंगकेषु मध्ये अंतिमः पंचकसंयोगात्मको भंगः सूत्रेण गृहीतः विभक्तिलोपोऽत्र प्राकृतत्वात् अस्य ग्रहणदितरेपि सर्वे भंगका गृहीताः ।

किमिवेत्यत आह वल्लीवा वा शब्द उपमानार्थे वल्लीवत् यथा वल्ली अग्रे गृहीत्वा समाकृष्टा सर्वा समूलमध्या समाकृष्टा भवति एवमेतेनांतिमसंयोगसूत्रेण सर्वेप्येते द्विकादयः संयोगा गृहीता भवंत्यत एतदर्थमिदं सूत्रारब्धं, तत्र द्विकं संयोगे दशभंगा इमे जे भिक्खू मासियं वा दोमासियंवा एएसिं परिहारठाणाणं अन्नयरं परिहारठाणं पडिसेवित्ता आलोएज्ञा; अपलिउंचित आलोएमाणस्स मासियं वा दोमासियं वा पलिउंचिय आलोएमाणस्स दोमासियंवा तेमासियं वा, १ एवं जे भिक्खू मासियं वा तेमासियं वा २ जे भिक्खू मासियं वा चाउम्मासियं वा ३ जे भिक्खू मासियं वा पंचमासियं वा ४ जे भिक्खू दोमासियं वा तेमासियं वा ५ दोमासियं वा चाउम्मासियं वा ६ दोमासियं वा पंचमासियं वा ७ जे भिक्खू तेमासियं चउमासियं वा ८ तेमासियं वा पंचमासियं वा ९ चाउम्मासियं वा पंचमासियं वा १०; त्रिकसंयोगे दश भंगा इमे तद्यथा जे भिक्खू मासियं वा दोमासियं वा तेमासियं वा, -

एएसिं परिहारठाणाणमन्नयरमिइत्यादि १ जे भिक्खू मासियं वा दोमासियं वा चउमासियं वा २ मासियं वा दोमासियं वा तिमासियं वा पंचमासियं वा ३ मासियं वा तेमासियं वा चउमासियं वा ४ मासियं वा तेमासियं वा पंचमासियं वा ५ मासियं वा चउमासियं वा पंचमासियं वा ६ दोमासियं वा तेमासियं वा चउमासियं वा ७ दोमासियं वा तेमासियं वा पंचमासियं वा ८ दोमासियं वा चउमासियं वा पंचमासियं वा ६ तेमासियं वा चउमासियं वा पंचमासियं वा १० पंचचतुष्कसंयोगे भंगा इमे जे भिक्खू मासियं वा दोमासियं वा तेमासियं वा चउमासियं वा एएसिं परिहारठाणाणमन्नयरं परिहारठाणमित्यादि १ जे भिक्खू मासियं वा दोमासियं वा तेमासियं वा पंचमासियं वा २ मासियं वा दोमासियं वा । चउमासियं वा पंचमासियं वा ३ मासियं वा तेमासियं वा चाउमासियं वा से वा पंचमासियं वा ४ दोमासियं वा तेमासियं वा चाउमासियं वा पंचमासियं वा ५ यस्त्वेकः पंचकसंयोगे भंगः स साक्षात् सूत्रे गृहीतः ।

सूत्र बहुसोवि एमेवेति यथादिमसकलसूत्रपंचकसंयोगे प्रदर्शनपरं तृतीयसूत्रमुक्तमेव अनेनैव प्रकारेण बहुशः शब्दविशेषिते द्वितीयसूत्रपंचकसंयोगप्रदर्शनपरं बहुसोवीति एतदविशेषितं चतुर्थं सूत्रं वक्तव्यं, तद्यथा जे भिक्खू बहुसो मासियं बहुसो दोमासियं, बहुसो तेमासियं वा, बहुसो वा चाउमासियं बहुसो पंचमासियं वा एएसिं परिहारट्ठाणाणं बहुसो पडिसेवित्ता आलोएज्ञा, अपलिउंचिय आलोएमाणस्स मासियं वा दोमासियं वा तेमासियं वा चाउमासियं वा पंचमासियं वा; पलिउंचियं आलोएमाणस्स दोमासियं वा तेमासियं वा चउमासियं वा पंचमासियं वा छमासियं वा तेन परं पलिउंचिय वा अपलिउंचिए वा ते चेव छम्मासा इति । एतदेव निर्युक्तिकृदाह -

[भा. ३४५] जे भिक्खू मासियाइं सुत्तं विभासियव्वं तु;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोमासियं तेमासियं कयाइं एगुत्तरावुड्ढी ।।

वृ- बहुसो इति त्रिप्रभृति न केवलं बहुसो मासिकानि किंतु दोमासिय तेमासियकयाइं इति द्वैमासिकानि त्रैमासिकान्यपि च बहुशः प्रतिसेवनया कृतानि उपलक्षणमेतत् चातुर्मासिकानि पंचमासिकानि च द्रष्टव्यानि, एवंरूपं सूत्रे विभाषितव्यं, बहुशः शब्दविशेषितद्वितीयसूत्रपंचकं गतव्याख्याप्रकारेण व्याख्यातव्यं; एगुत्तरावुड्ढीति द्विकादिसंयोगचिंतायां पदानामेकोत्तरा वृद्धिः कर्त्तव्या एतेनापि द्विकादिसंयोगभंगा द्रष्टव्या इति ख्यापितं, सूत्रस्य तथास्थितत्वात् तथाहि अंतिमः पंचकसंयोगनिष्पन्नो भंगः सूत्रेण साक्षादुपात्तः । अंत्यग्रहणादादिमा अपि द्विकसंयोगादिभंगावली दृष्टांतात् गृहीताऽवसेयास्ते च सर्वसंख्यया षट्विंशतिर्द्विकादिभंगे चैकैकं सूत्रमित्यनेन चतुर्थेन सूत्रेण षड्विंशतिः सूत्राणि सूचितानितृतीयेनापि सूत्रेण षड्विंशतिरिति सर्वमिलितानि संयोगसूत्राणि द्वापंचशत् । पंचादिमानि सकलसूत्राणि, पंच च बहुशः शब्दविशेषितानि इति सर्वसंख्यया द्वाषष्ठिः सूत्राणि एतानि च उद्घातानुद्घातादिविशेषरहितान्युक्तानि, सांप्रतमेतेषामेवोद्घातादिविशेषपरिज्ञानार्थमिदमाह -

[भा. ३४६] उग्घायमनुग्घायमूलुत्तरदप्पकप्पतो चेव;
संजोगा कायव्वा पत्तेयं मीसगा चेव ।।

वृ- उद्घातं लघु अनुद्घातं गुरु उद्घाते अनुद्घाते तथा मूलत्ति मूलगुणापराधे उत्तरत्ति उत्तरगुणपराधे तथा दर्प्पे कल्पतश्चैव कल्पे चैव संयोगा अनंतरोदिताः कर्त्तव्या भणितव्याः, कथमित्याह- प्रत्येकमेकैकस्मिन् उद्घातादिपदे मिश्रका वा, उद्घातानुद्घातसंयोगनिष्पन्नाः, उपलक्षणमेतत्, तेन न केवलं संयोगाः किंत्वादिमानि अपि दशसूत्राण्युद्घातादिभिर्विशेषैर्वक्तव्यानि, तत्रोद्घातविशेषाण्युपदर्श्यते जे भिक्खू उग्घाइयं मासियं परिहारठाणं पडिसेवित्ता, आलोएज्जा, इत्यादि इत्येवमादिमानि पंचसकलसूत्राणि पंच बहुशः शब्दविशेपितानि षड्विंशतिस्तृतीयसूत्रसूचितानि षड्विंशतिः चतुर्थसूत्रसूचितानि, सर्वसंख्यया द्वाषष्टिः सूत्राणि वक्तव्यानि, एवं द्वाषष्टिः सूत्राण्यनुद्घाताभिधानेन वक्तव्यानि, तद्यथा जे भिक्खू अनुग्घातियं मासियपरिहारठाणं पडिसेवित्ता आलोएज्जा इत्यादि ।

एवमेतास्तिस्रो द्वाषष्ठ्यः सूत्राणां सर्वसंख्यया षडशीतं सूत्रशतमत च त्रिंशदसंयोगसूत्राणि षट्पंचाशं शतं संयोगसूत्राणां सांप्रतमुद्घातमिश्रकाभिधानेन संयोगसूत्राणि वक्तव्यानि तानि चैवमुच्चारणीयानि जे भिक्खू उग्घातमासियं अनुग्घातमासियं वा परिहारठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलोएमाणस्स उग्घाइयं मासियं वा अनुग्घातियं मासियं वा, पलिउंचिय आलोएमाणस्स उग्घायदोमासियं वा अनुग्घाइदोमासियं वा, जे भिक्खू उग्घाइयमासियं वा अनुग्घातियं मासियं वा, पलिउंचिय आलोएमाणस्स उग्घायदोमासियं वा अनुग्घाइदोमासियं वा, जे भिक्खू उग्घाइयमासियं वा अनुग्घाइयमासियं वा परिहारठाणं पडिसेवित्ता इत्येवमुद्घातिपदममुंचता अनुद्घातितद्विमासिकादान्यपि एवमेते भंगाः पंच एते च उद्घातितद्विमासिकादीन्यपि । एवमेते भंगाः पंच एते च उद्घातितमासिके अनुद्घातितमासिके द्वैमासिकाद्येकसंयोगेन लब्धाः एवमुद्घातितद्वैमासिकेपि पंच, त्रैमासिकेपि पंच, चातुर्मासिकेपि पंचेत्युभयोरप्येकसंयोगेन सर्वसंख्याया भंगाः पंचविंशतिः, तथा उद्घातितमासिके एवमनुद्घातित मासिकादि द्विकसंयोगे एकभंगा दशएवमुद्घातिते द्वैमासिके त्रैमासिके चतुर्मासिके पंचमासिके च प्रत्येकं दश दशे ति सर्वसंख्यया उद्घातितैकैकसंयोगे अनुद्घातितद्विकसंयोगे भंगाः पंचाशत् इह एकैककस्मिन् अनुद्घातितसंयोगे उद्घातितमासिकद्वैमासिकादिक्रमेण पंच पंच भंगा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लभ्यंते, ततो ये ऽनुद्घातिते त्रिकसंयोगे दश भंगास्ते पंचभिर्गुण्यंते जाता सूत्रं भंगाः पंचाशत् ।।

चतुष्क संयोगे भंगाः पंचपंचभिगुणिता जाताः पंच सर्वसंख्यया उद्घातितेक संयोगेन अनुद्घातिद्विकसंयोगे भंगाः पंचाशत् इह एकैकस्मिन् अनुद्घाततसंयोगे उद्घातितमासिकद्वैमासिकादि-क्रमेण पंच पंच भंगा लभ्यंते, ततो ये ऽनुद्घात्तिते त्रिकसंयोगे दशे भंगास्ते पंचभिर्गुण्यंते जाता सूत्रं भंगाः पंचाशत्, सर्वसंख्यया उद्घाते द्विकसंयोगे भंगानां त्रीणि शतानि दशोत्तराणि । तथा पंचानां पदानां त्रिकसंयोगेपि भंगा दशेत्युक्त्वा तत्र त्रिकसंयोगे चिंतायामप्येकैकस्मिन् उद्घातितसंयोगे भंगा दश दशेत्येकं कसंयोगे पंच, द्विकसंयोगे दश, त्रिकसंयोगे दश, चतुष्कसंयोगे पंच, पंचकसंयोगे एक; प्रत्येकं दशभिर्गूण्यंते जाता क्रमेणेयं भंगानां संख्या पंचाशत्, शतं, शतं, पंचाशत्दश । अत्रापि सर्वसंख्यया भंगानां त्रीणि शतानि दशोत्तराणि । पंचानां चतुष्कसंयोगे भंगाः पंच, तत उद्घातिते चतुष्कसंयोगचिंतायामकैकस्मिन् अनुद्घातितसंयोगे भंगाः पंच पंच लभ्यंते इति, तत्रैकैक संयोगजाःपंच, द्विकसंयोगे एक; प्रत्येकं दशभिर्गूण्यंते जाता क्रमेणेयं भंगानां संख्या पंचाशत्, शतं, शतं पंचाशत्दश । अत्रापि सर्वसंख्यया भंगानां त्रीणि शतानि दशोत्तराणि । पंचानां चतुष्कसंयोगे भंगाः पंच, तत उद्घातिते चतुष्कसंयोगचिंतायामेकैकस्मिन् अनुद्घातितसंयोगे भंगाः पंच पंच लभ्यंते इति, तत्रैकैक संयोगजाः पंच, द्विकसंयोगजा दश, त्रिकसंयोगजा दश, चतुष्कसंयोगजाः पंच, पंचकसंयोगजएकः प्रत्येकं पंचभिर्गुण्यंते ततो जाता क्रमेणयं भंगानां संख्या पंचविंशतिः पंचाशत् पंचाशत् पंचविंशतिः पंच । सर्वसंख्यया उद्घातिते चतुष्कसंयोगे भंगानां पंच पंचाशदधिकं शतां १ पंचसंयोगे पंचानां पदानामेको भंग इत्युद्घातिते पंचकसंयोगचिंतायामनुद्घातिते एकैकसंयोगाः पंच, द्विकसंयोगाः दश, त्रिकसंयोगा दश, चतुष्कसंयोगाः पंच, पंचसंयोग एकः, प्रत्येकमेकेन गुण्यंते एकेन च गुणितं तदेव भवतीति सैवं भंगसंख्या तद्यथा पंच दश दश पंच एक ।

सर्वसंख्यया उद्घातिते पंचकसंयोगा एकत्रिंशत् मूलत आरभ्य भंगानां सर्वसंख्या नवशतान्येकषष्ठधिकानि एतावंति किल सूत्राणि पंचस्वादिमेषु सकलसूत्रेषूद्घातानुद्घातसंयोगतो जातानि एतावंत्ये व बहुशः शब्दविशेषितेष्वपि पंचसु सूत्रेष्वेतेनैव विधिना सूत्राणि द्रष्टव्यानि ।। सर्वसंख्यापिंडनेन मिश्रकसूत्राणि द्वाविंशत्युत्तराण्येकोनविंशतिशतानि । एतानि च तृतीयचतुर्थसूत्रा-भ्यामुत्पन्नानीति तत्र पृथक मिश्रकसूत्राणां संभवः तदेवममीषां मिश्रकसूत्राणा-मेकोनविंशति-शतानि द्वाविंशति । षडशीतं शतं प्राक्तनं सूत्राणामिति सर्वसंख्यया सूत्राणामेकविंशतिशतान्यष्टोत्तराणि। तथा यस्मादपराधो द्विधा तद्यथा मूलगुणे उत्तरगुणे च तत एतानि सर्वाण्यप्यनंतरोदितानि सूत्राणि मूलगुणापराधाभिधानेनाप्यभिधातव्यान्युत्तरगुणापराधाभि-धानेनापीत्येष राशिर्द्वाभ्यां गुण्यते जातानि चत्वारि सहस्राणि द्वे शते षोडशोत्तरे । अपराधोपि च यस्मान्मूलगुणेषूत्तरगुणेषु च दर्प्पतः कल्पतो वाप्ययतनया तत एष राशिर्भूयोद्वाभ्यां गुण्यते जातान्यष्टौ सहस्राणि चत्वारि शतानि द्वात्रिंशदधिकानि। एतावती संक्षेपतः सूत्रसंख्या भणिता इयं चैतावती मंगकवशात्प्रायेण जाता ततो मंगकपरिज्ञानार्थमाह-

[भा. ३४७]　　एत्थ पडिसेवणाओ, एक्कक्कदुगतिगचउक्कपनगेहिं ।

दसदसपंचगएक्कग अदुवअनेगाउ एयाओ ।।

वृ- अत्र च एतस्मिन् सूत्रसमूहे एतावत्यः प्रतिसेवना एवं संख्याकाः प्रतिसेवनाप्रकाराः पंचानां पदानां एकक द्विक त्रिक चतुष्क पंचकैरेकक द्विक त्रिक चतुष्कंपचकसंयोगैर्ये भवंति भंगाः ।। क्रमेण

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

दशदशेत्यादिना इहैकसंयोगे भंगाः पंच साक्षात् सूत्र एव दर्शिता इति नोक्ताः, सामर्थ्यात्त्ववसेया स्ततोऽयमऽर्थः । पंच पंञ्च दश दश पंचक इति तेभ्योऽवसेयाः यथावसातव्या स्तथा प्रागेवोक्ताः ।। अदुव अनेगा तो एयाओ इति । अथवा न केवलमेतावत्य एवैताः प्रतिसेवना, किंत्वन्या सामपि भावादनेका एता द्दष्टव्याः, ताश्चान्याः प्रतिसेवना इमाः । जे भिक्खू पंचराइंदियं पडिसेवित्ता आलोएज्ञा, अपलिउंचियं आलोएमाणस्स पंचराइंदियं मासियं, एवं दश पंचदश विंशति पंचविंशति रात्रिंदिवेष्वपि सूत्राणि वक्तव्यानि; एवमेव पंचसूत्राणि बहुशः शब्दाभिलापेनाभिधातव्यानि; ।। तदनंतरं तृतीयसंयोगसूत्रं षड्‌विंशतिसूत्रात्मकं वक्तव्यं ततश्चतुर्थे संयोगसूत्रं षड्‌विशतिसूत्रात्मकं बहुशः शब्दविशेषितमेवमेतानि सामान्यतो द्वाषष्टिः सूत्राणि भणित्वा तदनंतरमुद्‌घातानुद्‌घातमिश्रमूलोत्तर-दर्पकल्पैः प्रागुक्तप्रकारेण तावत् सूत्राणि वक्तव्यानि यावदष्टौ सहस्राणि चत्वारि शतानि द्वात्रिंश-दधिकानि परिपूर्णानि भवंति, ।। अत्र पंचकादीनि मासिकद्वैमासिकादिभिः सह न वारयितव्यानि यत उपरि पंचसातिरेकसूत्रं वक्ष्यति ।। तत्र च सातिरेकता पंचकादिभिरिति पुनरुक्तता स्यादिति सांप्रतमेतेषां सूत्राणामर्थावगमेनोत्कलितप्रज्ञः सन् शिष्यः पृच्छति;

[भा.३४८] जहमन्ने बहुसो मासियाइं सेवितुं वड्डइ उवरिं,
तह हेड्डा परिहायइ दुविहं तिविहं च आमंति ।।

वृ- इह मासिक द्वैमासिकादि प्रायश्चित्तापत्तिः, प्रतिसेवक परिणामानुरूपा, ततोहं मन्ये चिंतयामि, यथा येन प्रकारेण बहूनिमासिकानि प्रतिसेव्य कदाचित् मासिकमेव प्रायश्चित्तमापद्यते ।। मंदाध्यवसायेन प्रतिसेवनात् कदाचिदुपरि वर्द्धते, तद्यथा कदाचित् द्वैमासिकं तीव्रेणाध्यवसायेन प्रतिसेवनायाः करणात् त्रैमासिकं वा, यावत् षाण्मासिकं वा कदाचिदतिदुष्टाध्यवसायेन प्रतिसेवनात् छेदं वा कदाचिन्मूलं वा यावत् कदाचित् पारांचितं वा; तथा तेन प्रकारेणाधस्तादपि परिहीयते हानिमुपगच्छति ।। तद्यथा मासिकं प्रतिसेव्य कदाचित् भिन्नमासमापद्यते, कदाचित् पंचविंशतिरात्रिंदिवं यावत् रात्रिंदिवपंचकं दुविहं तिविहं चेति, द्विविधौ प्रकारौ मासलक्षणौ यस्य तत् द्विविधं द्वैमासिकमित्यर्थः ।। तदेवं त्रिविधं त्रैमासिकं, च शब्दात् चातुर्मासिकं पांचमासिकं षाण्मासिकं च प्रतीत्योक्तरूपेण प्रायश्चित्तवृद्धिहानी वक्तव्ये, तद्यथा द्वैमासिकं स्थाने प्रतिसेविते कदाचित् तदेव द्वैमासिकमापद्यते कदाचित् त्रैमासिकं कदाचित् चातुर्मासिक-मेवं यावत् पारांचितं अधस्ताद्धानिरेवं द्वैमासिकं प्रतिसेव्य कदाचित् मासिकप्रायश्चित्तं लभते, कदाचित् भिन्नमासमेवं यावत् पंचरात्रिदिवं एवं त्रैमासिकं चातुर्मासिक पांचमासिक षण्मासिकेष्वपि भावनीयं । अत्राचार्य आह, आमंति, आम शब्दोऽनुमतौ संमतमेतत् तदस्माकं सर्वमिति भावः ।।

[भा.३४९] केन पुन कारणेणं जिनपन्नत्तानि कानि पुन तानि ।
जिन जाणंति उ ताइं चोयग पुच्छा बहु नाउं ।।

वृ- शिष्यः प्रच्छति केन पुनः कारणेन मासिकादौ प्रायश्चित्त स्थाने प्रतिसेविते प्रायश्चित्तस्य वृद्धिहानी भवतः ।। आचार्य आह, अत्र कारणानि जिनप्रज्ञप्तानि सर्वज्ञोपदिष्टानि कानि पुनस्तानीति चेदुच्यते । रागद्वेपहर्षादीनि, तथाहि रागाध्यवसायानां चोपर्युपरि वृद्ध्या यदि वा सिंहव्यापादकस्येव पश्चाद्धर्ष वृद्धया मासिक प्रतिसेवनाया मप्युत्तरोत्तर प्रायश्चित्त वृद्धिर्भवति, तथा प्रथमत एव रागाध्यवसायहानितो द्वेषाध्यवसायहानितो वा, यदिवा पश्चात् ।। हा दुट्ठुकयं, हा दुट्ठुकारियं दुट्ठुअनुमयं चेत्यनुतापकरणतो मासिकप्रतिसेवनायामपि भिन्नमासः, पंचविंशतिर्वा रात्रिंदिवानि एवम धोऽधस्तात् प्रायश्चित्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हानिर्भवति, ततोरागद्वेपहर्षादीन्येव वृद्धिहानिर्मंतिकरणानि; ।।पुनः शिष्यः पृच्छति, ननु यदि प्रायश्चित्त वृद्धि हानिषु रागद्वेषहर्षादीनि वृद्धिहानिर्मंति करणानि, ततस्तानि प्रतिसेवकगतानि परमार्थतो जिना एव तु शब्द एवकारार्थो भिन्नक्रमत्वादत्र संबंध्यते, केवल्यवधिमनःपर्यायज्ञानिचतुर्दशदशनवपूर्विणो जानंति, केवलादिबलात् (भावात्); ये पुनः कल्पप्रकल्पव्यवहारिणस्ते कथं जानंति ? तेषामतिशयाभावात्, अत्राचार्य प्रतिवचनं, तेऽपि जानंति तदुपदिष्ट श्रुतज्ञानप्रमाणत स्तथाहि ।। तेऽपि वारत्रयमालोचनां दापयंतः श्रुतोपदेशानुसारेणाऽवबुध्यंते रागद्वेषाद्यध्यवसायस्थानानां वृद्धिं हानिं चेति, चोयगपुच्छा बहुंनाउंति ।। बहुशः शब्द विशेषितेषु सूत्रेषु बहुशब्दोऽस्ति, तमर्थतो ज्ञातुं चोदकस्य पृच्छा, यथा भगवन् तेषु सूत्रेषूपात्तस्य बहुशब्दस्य कोर्थ ? इति, आचार्य आह -

[भा.३५०] तिविहं च होति बहुगं, जहन्नयं मज्झियं च उक्कोसं ।
जहन्नेण तिन्नि बहुगा, उक्कोसो पंच चुलसीया ।।

वृ- त्रिविध बहुकं भवति, तद्यथा जघन्यं मध्यमं उत्कृष्टं च, तत्र जघन्येन त्रीणि बहूनि किमुक्तं भवति, जघन्येन त्रयो मासा बहव उक्ताः, उत्कर्षतः पंचमासशतानि चतुरशीत्यधिकानि एतेषां मध्ये यानि । प्रायश्चित्तस्थानानि चतुरादीनि यावत् पंचशतानि त्र्यशीत्य अधिकानि तानि मध्यमतः ।। संप्रति यथा प्रायश्चित्तं दीयते, तथा भणनीयं; तत्र मासादारभ्य यावत् षण्मासास्तावत् स्थापनारोपणा व्यतिरेकेणापि सूत्रेणैव दीयते, ततः पराणि तु यानि सप्तमासादीनि प्रायश्चित्तानि मध्यमानि, उत्कृष्टं यत् प्रायश्चित्तं तत् स्थापनारोपण प्रकारेणैव दीयते, इति तत् प्रतिपादनार्थमिदमाह -

[भा.३५१] ठवणा संचयरासी, माणाइपभूयकित्तिया सिद्धा ।
दिठा निसीह नामे सव्वेवि तहा अनायारा ।।

वृ- स्थाप्यते इति स्थापना वक्ष्यमाणेनारोपणाप्रकारेण शुद्धा भूतेभ्यः संचयमासेभ्यो ये शेषा मासास्तेषां प्रतिनियतदिवसपरिमाणतया व्यवस्थापनं; ताभ्यां स्थापनारोपणाभ्यां संचयनं-संकलनं संचयः, किमुक्तं भवति ? षण्णां मासानामुपरि प्रतिसेवनायां कृतायां कुतोपि मासात् पंचदश रात्रिंदिवसानि कुतोपि दश कुतोपि पंच गृहीत्वा स्थापनारोपणाविधानेन षण्मासपूरणं संचयः ।। तथा रासित्ति एष प्रायश्चितराशिः, कुत उत्पद्यते ? इति वक्तव्यं, तथामानानि प्रायश्चित्तस्य वक्तव्यानि, यथा प्रथम तीर्थकृतस्तीर्थे प्रायश्चितमानं संवत्सरः, मध्यमानामष्ट मासाः, चरमस्य षण्मासाः, तथा प्रभवः प्रायश्चित्तदाने स्वामिनः केवलिप्रभृतयो वक्तव्याः ।। तथा कत्तियासिद्धा; इति कियंतः खलु प्रायश्चित्तभेदाः सिद्धा इति वक्तव्यंः, तथा एते सर्वेपि प्रायश्चित्तभेदा दृष्टा निशीथनाम्नि अध्ययने न केवलमेते, किंतु तथा सर्वेप्यनाचार अतिचार अतिक्रमादयो निशीथनाम्नि दृष्टाः, एष द्वारगाथासंक्षेपार्थः। संप्रति प्रतिद्वारं व्यासार्थो भणनीयस्तत्र यान् प्रति स्थापनारोपणे क्रियेते तानुपदर्शयति -

[भा.३५२] बहुपडिसेवी सो यो, वि अगीतो अविय अपरिणामोवि ।
अहवा अतिपरिणामो तप्पच्चय कारणे ठवणा ।।

वृ- इह प्रायश्चित्तप्रतिपत्तारः पुरुषा इमे तद्यथा, गीतार्थोऽगीतार्थः परिणामकोऽपरिणामकोऽति-परिणामकश्च, तत् यः प्रायश्चितप्रतिपत्ता बहूनां मासिकस्थानानां प्रतिसेवी एकस्मिन् हि मासिके स्थाने प्रतिसेविते प्रायो न स्थापनारोपणाविधिस्ततो बहुसेवीत्युक्तं सोपि च गीतोऽगीतार्थः ।। गीतार्थे हि प्रायश्चित्तप्रतिपत्तरिच बहुष्वपि मासेषु प्रतिसेवितेषु न स्थापनारोपणे क्रियेते, तस्य गीतार्थतया ताभ्यां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनापियदुक्तार्थग्राहित्वात्, ततोऽगीतार्थ इत्युक्तं, सोपि यदि परिणामको भवेत्, तर्हि तमपि प्रतिस्थापनारोपणे तस्यापि परिणामकतया ताभ्यां विनापि यदुक्तार्थप्रतिपत्तेः, तत आह, अपिच अपिच अपरिणामोपि न विद्यते, परिणामो यदुक्तार्थपरिणमनं यस्य स, तथा आस्ताम गीतार्थः ।। किंत्वपरिणामकश्चेत्यपि शब्दार्थः, अथवा अतिपरिणामः अतिव्याप्त्या परिणामो यथोक्तस्वरूपो यस्यासावतिपरिणामस्तत्प्रत्ययकारणात् तयोरगातीर्थयोरपरिणामातिपरिणामयोः प्रत्ययो ज्ञानं यावंतो मासाः प्रतिसेवितास्तावंतः सर्वेपि सफलीकृता इत्येवंरूपं स्यादिति हेतोः स्थापनाग्रहणेनारोपणापि गृह्यते इति आरोपणापि क्रियते तद्यथा, यावंतो मासा दिवसा वा प्रतिसेविता स्तावंतः सर्वे एकत्र स्थाप्यंते, स्थापयित्वा च यत् संक्षेपार्ह विंशिकादिकं प्रतिसेवितं तत् स्थाप्यते, एषा स्थापना; तदनंतरं येऽन्ये मासाः प्रतिसेवितास्ते सफली कर्त्तव्या इत्येकैकस्मात् मासात् प्रतिसेवनापरिणामानुरूपं स्तोकान् स्तोकतरान् समान् विषमान् वा दिवसान् गृहीत्वा एकत्र रोपयति एषा आरोपणा, एषा चोक्तर्षतस्तावत् कर्त्तव्या, यावत्या स्थापनया सह संकलय्यमाना षण्मासाः पूर्यंते नाधिकाः ।। ततः स्थापनारोपणयो र्यदेकत्र संकलनमेष संचयः, अयं स्थापनारोपणासंचयानां परस्परप्रतिभक्तोऽर्थः, अनेन हि प्रकारेण प्रायश्चित्तदानेतिपरिणामकोऽपरिणामको वा चिंतयति, सर्वे मासाः सफलीकृता इति, शुद्धोहमिति; गीतार्थ परिणामकयोः पुन र्न स्थापनारोपणा प्रकारेण प्रायश्चित्तं दीयते, प्रयोजनाभावात् किंत्वेवमेव तथाचाह -

[भा.३५३] एगंमि नेगदाने नेगेसु य एगदानमेगेगं ।
जं दिज्जइ तं गिण्हइ गीयमगीतो य परिणामी ।।

वृ- यो गीतार्थो यश्चागीतार्थोपि परिणामी तस्मै एकस्मिन् मासे प्रतिसेविते रागद्वेषहर्षोत्तरोत्तरवृद्ध्या प्रतिसेवनात् यदि अनेक दानं, अनेके अनेकेषु मासेषु प्रतिसेवितेषु कारणे मंदाध्यवसाये वा प्रतिसेवनात् तीव्राध्यवसायतः प्रतिसेवनाद्वा पश्चाद् हा दुष्टु मया कृतमित्यादि बहुनिंदनादेकदानमेको मासो दीयते, बहवो मासा दीयंते, अथवा एकस्मिन् मासे प्रतिसेविते एकदानमेकः-परिपूर्णो मासो दीयते, दुष्टाध्यवसायेन प्रतिसेवनात्, पश्चाच्च हर्षरागद्वेषवृद्ध्यासंभवतोनेकमासदानायोगात् उपलक्षणमेतत् तेनैतदपि द्रष्टव्यं, बहुषु मासेषुसप्ताष्टादि संख्येषु प्रतिसेवितेषु यदि बहवो मासाः षट् पंच चत्वारो वा दीयंते, तथापि तत् सम्यग् गृह्णाति, श्रद्धत्ते च, शुद्धिं प्राप्तोहमिति ततस्तयोन स्थापनारोपणप्रकारेण प्रायश्चित्तदानमिति ।। यदि पुनरपरिणामकेऽतिपरणिमेक वा अगीतार्थे न स्थापनारोपणाप्रकारेणदीयते, तदा बहवो दोषा; तत्र अपरिणामके दोषं दर्शयति;

[भा.३५४] बहुएसु एगदाने, सो च्चिय सुद्धो न सेसया मासा ।
मा अपरिणामे उ संका, सफला मासा कया तेन ।।

वृ- बहुकेषु मासेषु प्रतिसेवितेषु यदा प्रागुक्तकारणवशात् एको मासःस्थापनारोपणाव्यतिरेकेण-परिणामके दीयते, तदा तस्मिन्नपरिणामिके एवमाशंका स्यात्, यथा यस्यैकमासस्य मे दत्तं प्रायश्चित्तं स एवैको मासः शुद्धो, न शेषा मासास्ततो नाद्याप्यहं शुद्ध इति, तस्मादेवंभूता आशंका मा भूदित्यपरिणामके स्थापनारोपणाप्रकारेण सर्वे मासाः सफलाः कृताः, समस्तमाससफलीकरणार्थं तत्र स्थापनारोपणे क्रियेते, इतिभावः, अतिपरिणामके दोषानुपदर्शयति -

[भा.३५५] ठवणामेत्तं आरोवणत्ति नाऊणमति परिणामो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुञ्जा व अइपसंगं बहुए सेवितुमाविगडे ।।

वृ- अतिपरिणामकेपि यदि बहुकेपु मासेपु प्रतिसेवितेष्वेको मासः स्थापनारोपणाद्व्यतिरेकेण दीयते, ततः सोप्येवं चिंतयत्, भापेत वा, यथा यदेतदागमे गीयते आरोवणेत्ति प्रायश्चित्तमिति, ततः स्थापनामात्रं, मात्र शब्दस्तात्पर्यार्थविश्रांतस्तुल्यवाची यदाह, निशीथचूर्णिकृत्, मात्रशब्दस्तुल्यवाचीति, यथाहि स्थापना शक्रादेः शक्रादिलक्षणतात्त्विकार्थशून्या एवमारोपणाप्यागमे गीयमाना तात्त्विकार्थशून्या बहुष्वपि मासेपु प्रतिसेवितेष्वेकस्य मासस्य प्रदानात्, यद्वा स्थापनामात्रमारोपणेति ज्ञात्वाऽतिपरिणामोऽतिप्रसंगं कुर्यात्, पुनःपुनस्तत्रैव प्रवर्त्ततेः बहुकेष्वपि मासेपु प्रतिसेवितेष्वेकस्य प्रायश्चित्तं लभे इति बुद्धेः, यदिवा अकल्प्यप्रतिसेवनया बहून्मासान् प्रतिसेव्य सर्वान् मासान् नाविकटयेत्, नालोचयेत् किंत्वेकमेव बहुष्वपि मासेषु प्रतिसेवितेष्वेकमासस्तत्त्वतः प्रायश्चित्तमित्यवगमात् ।।तस्मादपरिणामकेऽतिपरिणामके च सकलमाससफलीकरणाय स्थापनारोपणाप्रकारेण प्रायश्चित्तं दातव्यं इहस्थापनायाश्चत्वारि स्थानानि तद्यथा, प्रथमं त्रिंशत्स्थानात्मक, द्वितीयं त्रयस्त्रिंशत्स्थानात्मकं, तृतीयं पंचत्रिंशत्स्थानात्मकं चतुर्थमेकोनाशीत्यधिकस्थानशतात्मकमारोपणाया अपि चत्वारि स्थानानि तद्यथा, प्रथमं त्रिंशत्स्थानात्मकं द्वितीयं त्रयस्त्रिंशत्स्थानात्मकं तृतीयं पंचत्रिंशत्स्थानात्मकं चतुर्थमेकोनाशीत्यधिकस्थानकशतप्रमाणमतः सांप्रतमेतेषां चतुर्णां स्थापनास्थानानां चारोपणास्थानानां यानि जघन्यानि स्थानानि तानि प्रतिपादयति ।

[भा.३५६] ठवणा वीसिय पक्खिय पंचिय एगाहिया उ बोधव्वा ।
आरोवणाग्नि पक्खिय पंचिय तह पंच एगा ही ।।

वृ- स्थापनायाः प्रथमे स्थाने जघन्ये स्थापना विंशिका विंशतिरात्रिंदिवसप्रमाणा द्वितीये पाक्षिकी तृतीये पंचिका पंचदिवसात्मिका चतुर्थे च एकाहिका एकाहमात्राः आरोपणापि प्रथमस्थाने जघन्या पाक्षिकी द्वितीये पंचिका पंचदिनप्रमाणा तृतीयेपि पंचिका चतुर्थे एकाहिका सर्वजघन्यान्येतानि स्थापनारोपणास्थानानि ।। आह च चूर्णिकृत् ।। एयाणि सव्वजहन्नगाणि ठवणा रोवणा ठाणाणि इतिः इह न ज्ञायते, कस्मिन् जघन्ये स्थापनास्थाने किं जघन्यस्थापनास्थानं भवति, तत् परिज्ञानार्थमिदमाह

[भा.३५७] वीसाए अद्धमासं पक्खे पंचाहमारोहिज्जा हि ।
पंचाहे पंचाहं एगाहे चेव एगाहं ।।

वृ- विंशिकायां विंशिकारूपे जघन्ये स्थापनास्थाने जघन्यमारोपणास्थानमर्धमासमारोहयेत्, स्वबुद्धावारोपयेत्, जानीयादित्यर्थः ।।तथा पक्षे पक्षप्रमाणे जघन्ये स्थापनास्थाने पंचाहं पंचाहप्रमाणं जघन्यमारोपणास्थानं, तथा पंचाहे पंचाहप्रमाणे जघन्येस्थापनास्थाने पंचाहप्रमाणमेव जघन्यमारोपणास्थानमेकाहे एकदिनप्रमाणें जघन्ये स्थापनास्थाने जघन्यमारोपणास्थानमेकाहमेव, एकदिनप्रमाणमेव; संप्रति प्रथमेस्थापनामेकाहे एकदिनप्रमाणें जघन्ये स्थापनास्थाने जघन्यमारोपणास्थानमेकाहमेव, एकदिनप्रमाणमेव; संप्रति प्रथमेस्थापनास्थाने या जघन्या स्थापना, या च उत्कृष्टा तां प्रतिपादयति ।

[भा.३५८] ठवणा होइ जहन्ना वीसइ राइंदियाइं पुन्नाइं ।
पणठं चेव सयं ठवणा उक्कोसिया होति ।।

वृ- प्रथमे स्थापनास्थाने जघन्या स्थापना भवति, पूर्णानि परिपूर्णानि विंशतिरात्रिंदिवसप्रमाणेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावः ।। उत्कृष्टा भवति स्थापना पंचषष्ठं शतं पंचषष्ट्यधिकं रात्रिदिवानां शतं, शेषाणि तु स्थानानि मध्यमानि, संप्रति प्रथमे आरोपणस्थाने या जघन्या आरोपणा या चोत्कृष्टा तां प्रतिपादयिपुराह -

[भा.३५९] आरोवणा जहन्ना पन्नरसराइंदियाइं पुन्नाइं ।
उक्कोसं सट्ठिसयं, दोसुवि पक्खेवगो पंच ।।

वृ- प्रथमे आरोपणास्थाने जघन्या आरोपणा पूर्णानि परिपूर्णानि पंचदश रात्रिंदिवानि, उत्कृष्टां पुनरारोपणां जानीयात्; षष्ठिशतं षष्ठ्यधिकं रात्रिंदिवशतं शेषाणि तु स्थानानि मध्यमानि तत्परिज्ञानार्थमाह दोसुवि पखेवगो पंच, द्वयोरपि स्थापनारोपणयोः प्रत्येकं जघन्यपदादारभ्योत्तरोत्तरे मध्यमे स्थाने प्रक्षेपकः पंच पंच परिणामो ज्ञातव्यो, यावदुत्कृष्टं पदं, इयमत्र भावना, प्रथमे स्थापनास्थाने जघन्या स्थापना विंशतिका, ततः पंचकप्रक्षेपेऽन्या द्वितीया पंचविंशतिदिनमाना, ततः पुनः पंचकप्रक्षेपे तृतीया त्रिंशद्दिना, एवं पंच पंच परिवर्धयता तावन्नेतव्यं, यावत् पंचषष्ठरात्रिंदिवशतप्रमाणा त्रिंशत्तमा स्थापनेति, तथा प्रथमे आरोपणास्थाने जघन्यारोपणा पक्षप्रमाणा ततः पंचकप्रक्षेपे विंशतिदिनप्रमाणा द्वितीया, ततोपि पंचकप्रक्षेपे पंचविंशतिदिनमाना तृतीया, एवं यथोत्तरं पंच पंच परिवर्धयता तावन्नेयं यावत् षष्ठ्यधिकरात्रिंदिवशतप्रमाणा त्रिंशत्तमेति, एतदेव सुव्यक्तमाह -

[भा.३६०] पंचण्हपरिवुड्ढीं, उक्कड्डी चेव होइ पंचण्हं ।
एएण पमाणेणं, नेयव्वं जाव चरिमिंति ।।

वृ- स्थापनायामारोपणायां च प्रत्येकं जघन्यपदादारभ्योत्तरोत्तरस्थान जिज्ञासायां पंचानां परिवृद्धिर्ज्ञातव्या; प्रत्येकमेवमेवांतिमस्थापनादारभ्य क्रमेणाधोऽधः स्थानचिंतायां पंचानामपकृष्टिर्हानि-र्भवत्यऽव सातव्या तद्यथा-पंचषष्ठ्यधिकरात्रिंदिवशतप्रमाणा सर्वोत्कृष्टा त्रिंशत्तमा स्थापना, ततः पंचानामपसारणे रात्रिं दिवषष्ठ्यधिकशतमाना एकोनत्रिंशत्तमा मध्यमा, ततोपि पंचानामपगमे पंचपंचाशदधिकशतप्रमाणा अष्टाविंशतितमा, एवं क्रमेणाधोधस्तात् पंच पंच परिहापयता तावन्नेतव्यं, यावत् विंशतिदिनप्रमाणा प्रथमा स्थापना, तथा षष्ठ्यधिकरात्रिंदिवशतप्रमाणा सर्वोत्कृष्टा त्रिंशत्तमा आरोपणा, ततः पंचानामपगमे पंचपंचाशदधिकशतमाना एकोनत्रिंशत्तमा मध्यमा, ततोपि पंचानामपगमे पंचाशच्छतप्रमाणा अष्टाविंशतितमा, एवं क्रमेणाधोधः पंच पंच परिहापयता तावन्नेयं, यावत् प्रथमा पक्षप्रमाणेति, तथा चाह, एएणेत्यादि एतेन पूर्वानुपूर्व्या पंचकपरिवृद्धिरूपेण पश्चादनुपूर्व्या पंचकापकृष्टिरूपेण प्रमाणेन पूर्वानुपूर्व्या जघन्यपदादारभ्य पश्चादनुपूर्व्यामुत्कृष्टात् स्थानात् प्रभृति तावन्नेतव्यं, यावच्चरमं स्थानं परिवृद्धौ सर्वांतिमं स्थानं चरममपकृष्टौ जघन्यमादिमं चरममिति, अथवेवं गाथा अन्यथा आख्यायते, पूर्वं किल स्थापनायामारोपणायां च प्रत्येकं जघन्यमध्यमोत्कृष्टभेदभिन्नानि स्थानानि उक्तानि, सांप्रतमेकैकस्मिन् स्थापना स्थाने जघन्यादौ कियत्यारोपणास्थानानि एकैकस्मिन् वारोपणास्थाने कियंति स्थापनास्थानानीत्येतत् प्रतिपादयति पंचण्ह परिवुड्ढि इत्यादि पूर्वस्मात् स्थापनास्थनादारोपणास्थानाद्वा उत्तरस्मिन्नुत्तरस्मिन् स्थापनास्थाने आरोपणस्थाने वा वृद्धिर्भवति, यस्मिंश्च यदपेक्षया स्थापनास्थाने आरोपणास्थाने वा पंचानां वृद्धिर्भवति, तस्मिन् तदपेक्षया स्थापनास्थाने आरोपणाचिंतायामारोपणास्थाने वा स्थापनास्थानचिंतायामंते पंचानामपकृष्टिर्हा-निर्भवति, एतेन प्रमाणेन पंचकपरिवृद्धिरूपेण पंचकहानिरूपेण च तावन्नेयं, यावदेकत्रांतिमं चरममपरत्रादिमं चरममिति, तथाहि विंशिकायां स्थापनायां जघन्या पाक्षिकी आरोपणा, ततोऽन्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विंशतिका, ततोप्यन्या पंचविंशतिदिनमाना, ततोप्यन्या त्रिंशिका एवं पंच पंच आरोपयता तावन्नेयं, यावत्तस्यामेव विंशिकायां सर्वोत्कृष्टषष्ठ्यधिकदिनशतप्रमाणा त्रिंशत्तमा आरोपणा, तथा पंचविंशतिकायां स्थापनायां जघन्या पाक्षिकी आरोपणा, ततोऽन्या विंशतिका ततोप्यन्या ।

पंचविंशतिदिनमाना ततोप्यन्या त्रिंशद्दिना एवं पंच पंच आरोपयता तावन्नेयं, यावत्तस्यामेव विंशतिकाया सर्वोत्कृष्टा पष्ठ्यधिकदिनशतप्रमाणा त्रिंशत्तमा आरोपणा, तथा पंचविंशतिकायां स्थापनायां जघन्या पाक्षिकी आरोपणा ततोन्या विंशतिका ततोप्यन्या पंचविंशतिदिना ततोन्यात्रिंशद्दिना एवं च परिवर्धयता तावद्गंतव्यं, यावदेकोनत्रिंशत्तमा पंचपंचाशदधिकदिन शतमाना सर्वोत्कृष्टा आरोपणा, अस्यामेकोनत्रिंशदारोपणास्थानानि, पूर्वस्थानापेक्षया अस्याः स्थापनायाः पंचभिर्दिनैः परिवर्धमानतया पर्यंते पंचानां दिनानां त्रुटित्वात् एवमुत्तरत्रापि भावनीयं, तथा त्रिंशद्दिनायां स्थापनायां जघन्या पाक्षिकी आरोपणा, ततोऽन्या विंशतिदिना ततोप्यन्या पंचविंशतिदिना एवं पंच पंच परिवर्धयता तावन्नेतव्यं, यावत्सर्वोत्कृष्टा पंचाशत्शतदिनाऽष्टाविंशतितमारोपणा, अस्यामष्टाविंशतिरारोपणा-स्थानानि तथा पंचत्रिंशद्दिनायां स्थापनायां जघन्या पाक्षिकी आरोपणा, ततोऽन्या विंशतिदिना ततोप्यन्या पंचविंशतिदिना एवं पंच पंचारोपयता तावद्गंतव्यं, यावत्सर्वोत्कृष्टा पंचचत्वारिंशद्दिनशत-माना सप्तविंशतितमारोपणा, अस्यां सप्तविंशतिरारोपणास्थानानि कारणं प्रागेवोक्तं, एवमुत्तरोत्तर-स्थापनासंक्रांतावंतिममंतिमं स्थानं परिहरता तावन्नेतव्यं, यावत् पंचषष्ठिदिनशतायां त्रिंशत्तमायां स्थापनायामेकैव जघन्या पाक्षिकी आरोपणा नान्येति, तथा पाक्षिक्यामारोपणायां जघन्या विंशतिदिना स्थापना ततोऽन्या पंचविंशतिदिना मध्यमा, ततोप्यन्या त्रिंशद्दिना, एवं पंच पंच परिवर्धयता तावन्नेतव्यं, यावत्पंचषष्ठिदिनशतप्रमाणा सर्वोत्कृष्टा त्रिंशत्तमा स्थापना, तथा विंशिकायामारोपणायां जघन्या स्थापना विंशतिदिना, ततोन्या मध्यमा पंचविंशतिदिना, ततोप्यन्या त्रिंशद्दिना एवं यथोत्तरं पंच पंच विलगयता तावद्गंतव्यं,, यावत् षष्ठ्यधिकदिनशतमाना सर्वोत्कृष्टा एकोनत्रिंशत्तमा स्थापना, पूर्वारो-पणातो ह्यस्यामारोपणायां पंच दिनान्यधिकानि तानि चोपरि त्रुटितानीत्येकोन त्रिंशदेवास्यामारोपणायां स्थापनास्थानानि, तथा पंचविंशतिदिनायामारोपणायां जघन्या विंशिका स्थापना, ततोऽन्या पंचविं-शतिदिना मध्यमा, ततोप्यन्या त्रिंशद्दिना एवं पंच पंच परिवर्धयता तावन्नेयं, यावत् पंचपंचाशद्दिनशत-माना सर्वोत्कृष्टाऽष्टाविंशतितमा स्थापना, अस्यां हि प्रागुक्तयुक्त्याष्टाविंशति स्थापनास्थानानि, एव-मुत्तरोत्तरारोपणासंक्रांतावंतिममंतिमं स्थापनास्थानं परिहरता तावद्गतव्यं, यावत् षष्ठिदिनशतमायारोप-णायां जघन्या विंशिका स्थापनेति, यथा च प्रथमे स्थापनास्थाने आरोपणास्थाने च प्रत्येकं संवेधतश्च स्थापना कृता, तथा द्वितीये तृतीये च कर्त्तव्या, तद्यथा द्वितीये स्थापनास्थाने जघन्या स्थापना पाक्षिकी,

ततः पंचकप्रक्षेपेऽन्या विंशतिदिना तत्रापि पंचकप्रक्षेपेऽन्या पंचविंशतिदिना एवं पंच पंच प्रक्षिपता तावद्गंतव्यं, यावत् पंचसप्ततिरात्रिंदिवशतप्रमाण त्रयस्त्रिंशत्तमा स्थापनेति, तथा द्वितीये स्थाने जघन्यारोपणा पंचाहिका, ततः पंचकप्रक्षेपे दशाहिका ततोपि पंचकप्रक्षेपे पाक्षिकी, एवं पंच पंच परिवर्धयता तावन्नेयं, यावत्पंचषष्ठिदिनशतमाना त्रयसिंस्त्रशत्तमा सर्वोत्कृष्टा आरोपणेति, इदानीं संवेधभावना पाक्षिक्यांस्थापनायां जघन्या पंचाहिका आरोपणा, ततोऽन्या दशदिना मध्यमा, ततोप्यन्या पाक्षिकी, ततोप्यन्या विंशतिदिना, एवं पंच पंच परिवर्धयता तावद्गतव्यं, यावत्त्रयस्त्रिंशत्तमा पंचषष्ठिदिनशतमाना सर्वोत्कृष्टा आरोपणा, अस्यां त्रयस्त्रिंशदारोपणास्थानानि तथा विंशिकायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापनायां जघन्या पंचाहिका आरोपणा, ततोन्या दशदिना ततोन्या पाक्षिकी,

एवं विंशिकां स्थापनाममुंचता पंच पंच परिवर्धयता तावन्नेयं, यावत्षष्ठिशतदिनमाना सर्वोत्कृष्टा, द्वात्रिंशत्तमा आरोपणा, अस्यां द्वात्रिंशदारोपणास्थानानि पूर्वस्थापनातोऽस्यां पंचकपरिवृद्धेरंते पंचानां त्रुटितत्वात्, पंचविंशतिदिनायां स्थापनायां जघन्या पंचाहिका आरोपणा, ततोऽन्या मध्यमा दशदिना, ततोप्यन्या पाक्षिकी, एवं पंचविंशतिदिनानां स्थापनाममुंचता पंच पंच परिवर्धयता तावन्नेयं, यावत्पंचपंचाशद्दिनशतमाना सर्वोत्कृष्टा एकत्रिंशत्तमा आरोपणा, एवमुत्तरोत्तरस्थापनास्थान-सक्रांतावंतिममंतिमं स्थानं परिहरता तावन्नेयं, यावत् पंचसप्ततिरात्रिंदिवशतमानायां स्थापनायामेकैव जघन्या पंचाहिकारोपणेति, तथा पंचाहिकायामारोपणायां जघन्या पाक्षिकी स्थापना, ततोऽन्या मध्यमा विंशतिदिना, ततोप्यन्या पंचविंशतिदिना, एवं पंचाहिकामारोपणामपरित्यजता पंच पंच परिवर्धयता तावद्वंतव्यं, यावत् पंचसप्ततिदिनशतमाना सर्वोत्कृष्टा त्रयस्त्रिंशत्तमा स्थापना, तथा दशाहिकाया-मारोपणायां जघन्या पाक्षिकी स्थापना ततोऽन्या मध्यमा विंशतिदिना ततोप्यन्या पंचविंशतिदिना एवं दशाहिकामारोपणाममुंचता पंच पंच परिवर्धयता तावद्वंतव्यं, यावत् सप्ततिदिनशतमाना सर्वोत्कृष्टा, द्वात्रिंशत्तमा स्थापना, अस्यां द्वात्रिंशदेव स्थापनास्थानानि, पूर्वारोपणातोऽस्यामारोपणायां पंचकवृद्धेरंते पंचानां त्रुटितत्वादेवमुत्तरोत्तरारोपणास्थानसंक्रांतावंतिममंतिमं स्थानं परिहरता तावद्वंतव्यं, यावत् पंचषष्ठिदिनाशतमानायां त्रयस्त्रिंशत्तमायामारोपणायामेकैव जघन्या पाक्षिकी स्थापनेति ।।

तथा तृतीये स्थापनास्थाने जघन्या पंचाहिका स्थापना, ततः पंचानां प्रक्षेपोऽन्या मध्यमा दशदिना, ततोपि पंचकप्रक्षेपेऽन्या पाक्षिकी एवं पंच प्रक्षिपता तावद्वंतव्यं, यावत् पंचसप्ततिरात्रिंदिवशतप्राण पंचत्रिंशत्तमा स्थापनेति, तथा तृतीये स्थाने जघन्यारोपणा पंचदिना, ततः पंचकप्रक्षेपेऽन्या मध्यमा दशदिना, ततोपि पंचकप्रक्षेपेऽन्या पाक्षिकी एवं पंच पंच प्रक्षिपता तावद्वंतव्यं, यावत्पंचसप्तति दिनशतमाना सर्वोत्कृष्टा पंचत्रिंशत्तमा आरोपणेति, संप्रति संवेधभावना पंचदिनायां स्थापनायां जघन्या आरोपणा पंचदिना, ततोऽन्या मध्यमा दिनदशकमाना ततोपि अन्या पाक्षिकी, एवं पंचदिनां स्थापनाममुंचता पंच पंच परिवर्धयता तावन्नेयं, यावत् पंचत्रिंशत्तमा सप्ततिदिनशतमाना सर्वोत्कृष्टा आरोपणा, अस्यां पंचत्रिंशदारोपणास्थानानि, तथा दशदिनायां स्थापनायां जघन्या पंचाहिका आरोपणा, ततोऽन्या दशदिना, ततोप्यन्या पाक्षिकी, एवं दशदिनां स्थापनाममुंचता पंच पंच परिवर्धयता तावद्वंतव्यं, यावदुत्कृष्टा चतुस्त्रिंत्तमा सप्ततिदिनशतमाना आरोपणेति, अस्यां चतुस्त्रिंशदारोपणास्थानानि, एवमुत्तरोत्तरस्थापनास्थानसंक्रांतौ अंतिममंतिमं स्थानं परिहरता तावद्यातव्यं, यावत्पंचसप्ततिदिन-शतमानायां स्थापनायामेकैव जघन्या पंचदिना आरोपणेति; तथा पंचदिनायामारोपणाया जघन्या पंचदिना स्थापना, ततोऽन्या मध्यमा दशदिना, ततोप्यन्या पंचदशदिना एवं पंचदिनामारोपणाम-परित्यजता पंच पंच परिवर्धयता तावद्वंतव्यं, यावत् पंचसप्ततिदिनशतमाना सर्वोत्कृष्टा पंच त्रिंशत्तमा स्थापना, ततो दशदिनायामारोपणायां जघन्या पंचदिना स्थापना ततोऽन्या पंचदिना स्थापना ततोऽन्या मध्यमा च दशदिना स्थापना, ततोऽन्या पंच दशदिना एवं दशदिनामारोपणाममुंचता पंच पंच परिवर्धयमानेन तावद्वंतव्यं, यावत् सप्ततिदिनशतमाना सर्वोत्कृष्टा चतुस्त्रिंशत्तमा स्थापना, एवमुत्तरोत्तरारोपणास्थानसंक्रांतावंतिममंतिमं स्थानं परिहरता तावन्नेयं, यावत् पंचसप्ततिदिनशतमानायां पंचत्रिंशत्तमायामारोपणायामेकैव जघन्या पंचदिना स्थापनेति, चतुर्थे स्थाने स्थापनास्थाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोपणास्थाने च न पंचकवृद्धिर्नापि पंचकापकृष्टिः, किंतु वृद्धिर्हानिर्वा एकोत्तरा, ततो यद्यपि तद्भावना ऽधिकृतगाथाक्षराननुयायिनी तथापि विनेयजनानुग्रहाय क्रियते ।।

तद्यथा, चतुर्थ स्थापनास्थाने जघन्या स्थापना एकदिना, अन्या मध्यमा द्विदिना, अन्या त्रिदिना, एवमेकैकं प्रक्षिपता तावद्गंतव्यं, यावदेकोनाशीत्यधिकदिनशततमा स्थापनेति, तथा चतुर्थस्थाने जघन्यारोपणा एकदिना, ततोऽन्या मध्यमा द्विदिना, ततोऽन्या त्रिदिना, एवमेकैकं परिवर्धयता तावद्गंतव्यं, यावदेकोनाशीत्यधिकदिनशतमाना सर्वोत्कृष्टा एकोनाशीत्यधिकशततमा आरोपणेति, संप्रति संवेधभावना एकदिनायां स्थापनायां जघन्यारोपणा एकदिना, ततोऽन्या द्विदिना, मध्यमा ततोऽन्या त्रिदिना एवमेकदिनां स्थापनाममुंचता एकैकं परिवर्धयता तावद्गंतव्यं यावदेकोनाशीत्यधिकदिनशतमाना सर्वोत्कृष्टा एकोनाशीतिशततमारोपणा अस्यामेकोनाशीत्यधिकशतप्रमाणान्यारोपणास्थानानि, तथाहि द्विदिनायां स्थापनायां जघन्यारोपणा एकदिना, ततोऽन्या द्विदिना मध्यमा, ततोऽन्या त्रिदिना एवं द्विदिनां स्थापनाममुंचता एकैकं परिवर्धयता तावन्नेयं, यावदष्टसप्तत्यधिकदिनशतमाना सर्वोत्कृष्टा अष्टसप्ततिशततमा आरोपणा, अस्यामष्टसप्ततिशतप्रमाणान्यारोपणास्थानानि, पूर्वस्थापनातोऽस्यां स्थापनायामेकस्य परिवृद्धत्वेन एकस्य त्रुटितत्वात् ।।

एवमुत्तरोत्तरस्थापनास्थानसंक्रांतौ तदंतिममंतिमं स्थानं परिहरता तावद्यातव्यं, यावदेकोनाशीत्यधिकशततमायां स्थापनायामेकैव जघन्या एकदिना आरोपणेति, तथा एकदिनायामारोपणायां जघन्या स्थापना एकदिना, ततोन्या मध्यमा द्विदिना, ततोऽन्या त्रिदिना, एवमेकदिनामारोपणाममुंचता एकैकं परिवर्धयता तावद्गंतव्यं, यावदेकोनाशीत्यधिकदिनशतमाना सर्वोत्यकृष्टा एकोनाशीतिदिनशततमा स्थापना, अस्यामेकोनाशीत्यधिकशतसंख्यानिस्थापनास्थानानि, तथा द्विदिनायामारोपणायां जघन्या स्थापना एकदिना, ततोऽन्या द्विदिना मध्यमा, ततोऽन्या त्रिदिना एवं द्विदिनामारोपणाममुंचता एकैकंपरिवर्धयता तावद्गंतव्यं, यावदष्टसप्तत्यधिकदिनशतमाना सर्वोत्कृष्टा अष्टसप्ततिशतमाना स्थापना अस्यामष्टसप्ततिप्रमाणानि स्थापनास्थानानि, कारणं प्रागुक्तमनुसर्त्तव्यं, एवमुत्तरोत्तरारोपणास्थानसंक्रांतावंतिममंतिमं स्थानं परिहरता तावद्गंतव्यं, यावदेकोनाशीत्यधिकशततमायामारोपणायामेकैव जघन्या एकदिना स्थापनेति, इह एकैकस्मिन् स्थापनास्थाने आरोपणा जघन्या मध्यमा उत्कृष्टा च प्रतिपादिता, ततःसांप्रतमुत्कृष्टारोपणापरिज्ञानार्थमाह ।।

[भा.३६१] जो ठणवणा उद्दिट्ठा, छम्मासा ऊणिया भवे ताए ।
आरोवण उक्कोसा तीसे ठवणाए नायव्वा ।।

वृ- षण्णां मासानामशीतदिवसशतं भवति, तत् स्थापयित्वा या स्थापना उदिष्टेति, यस्याः स्थापनायाः उत्कृष्टा आरोपण ज्ञातुमिष्टा सा उदिष्टेत्यभिधीयते, उद्दिष्टा ईप्सिता, इत्यनर्थांतरं तया षण्मासाः षण्मासदिवसा ऊनकाः क्रियंते, किमुक्तं भवति तामुद्दिष्टां स्थापनां षण्मासादिवसेभ्यो अशीत्यधिकशतप्रमाणेभ्यः शोधयेत्, ततो यच्छेषभवतिष्ठते, ततस्याः ईप्सितायाः स्थापनाया उत्कृष्टा आरोपणा भवति ज्ञातव्या० ।। यथा विंशतिदिनायाः स्थापनाया उत्कृष्टा आरोपणा ज्ञातुमिष्टा, ततो विंशतिरशीत्यधिकशतात् षण्मासदिवससंख्याभूतात् शोध्यते, जातं षष्ठ्यधिकं शतं, एषा विंशिकायाः स्थापनाया उत्कृष्टा आरोपणा, ततः परमारोपणाया असंभवात्, विंशत्या सह षण्णां मासानां परिपूर्णानां भावात्, षण्मासाधिकस्य च प्रायश्चित्तस्यादानात् ।। तथा पंचविंशतिदिनायाः किलोत्कृष्टा आरोपणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञातुमिष्टा ततोऽशीत्यधिकशतात् पंचविंशतिः शोध्यते जातं पंचपंचाशदधिकं शतं एषा पंचविंशदिनायाः स्थापनाया उत्कृष्टा आरोपणा, एवं सर्वत्र भावनीयं, सांप्रतमारोपणास्थाने उत्कृष्टस्थापनापरिज्ञानार्थमाह -

[भा.३६२] आरोवणा उद्दिट्ठा, छम्मासा ऊणागा भवे ताए ।
आरोवणाए तीसे, ठवणा उक्कोसिया होइ ।।

वृ- आरोवणा उद्दिठा या आरोपणा उदिष्टा स्थापना किल ज्ञातुमिष्टेतिभावः, तथा षण्मासा ऊनकाः क्रियतन्ते, सा षण्मासदिवसेभ्यः शोध्यते इत्यर्थः, ततो यच्छेषमवतिष्ठते, तत्तस्या ईप्सिताया आरोपणाया उत्कृष्टा स्थापना भवति, यथा पंचदशदिनायाः आरोपणाया उत्कृष्टा स्थापना ज्ञातुमिष्टा, ततः पंचदश अशीत्यधिकशतादपनीयंते, जातं पंचषष्ठयधिकं शतं तावत्प्रमाण पंचदशदिनाया, आरोपणाया उत्कृष्टा स्थापना भवति, तथा विंशतिदिनाया आरोपणाया उत्कृष्टा स्थापना किल ज्ञातुमिष्टेति, विंशतिरशीत्यधिकशतादपनीयते, जातं षष्ठ्यधिकशतं एतावती विंशतिदिनाया आरोपणाया उत्कृष्टा स्थापना, एवं सर्वत्रापि भावनीयं, सांप्रतं प्रथमे स्थाने कियंति स्थापनास्थानानि कियंत्यारोपणास्थानानि कियंतो वा स्थापनारोपणास्थानानां संवेधतः संयोगा इत्येतप्ररूपणार्थमाह -

[भा.३६३] तीसं ठवणाठाणा तीसं आरोवणाए ठाणाइं ।
ठवणाणं संवेहो चत्तारिसियाउ पन्नठा ।।

वृ- प्रथम स्थाने त्रिंशत् स्थापनास्थानानि, त्रिंशच्चारोपणायाः स्थानानि, एतच्च प्रागेवानेकशो भावितमिति न भूयो भाव्यते, ठवणाणमित्यादि स्थापनानामारोपणाभिः सह संवेधाः संयोगाः सर्वसंख्ययाः चत्वारि शतानि पंचषष्ठानि भवंति; तथाहि प्रथमे विंशतिदिनरूपे स्थापनास्थाने त्रिंशदारोपणास्थानानि, द्वितीये पंचविंशतिदिनरूपे एकोनत्रिंशत् तृतीयेऽष्टाविंशतिरेवमेकैकरूपहान्या तावद्वक्तव्यं, यावत् पंचषष्टिदिनशतरूपे त्रिंशत्तमे स्थापनास्थाने एकमारोपणास्थानमेतानि च सर्वाण्यप्येकत्र लिखितानि, यथोक्तसंख्याकानि भवंति; स्थापनाग्रहणे चारोपणापि गृह्यते; अनयोः परस्परसंवेधात्, तत एतदपि द्रष्टव्यमारोपणास्थानानां स्थापनाभिः सह संवेधाः, सर्वसंख्या चत्वारि शतानि पंचषष्टीनि भवंति; तथाहि प्रथमे पंचदशदिनरूपे आरोपणास्थाने त्रिंशत्स्थापनास्थानानि, द्वितीये विंशतिदिनरूपे एकोनत्रिंशत्, तृतीयेऽष्टाविंशतिरेवमेकैकरूपहान्या तावत् वक्तव्यं यावत् षष्ठिदिनशतप्रमाणे त्रिंशत्तमे आरोपणास्थाने एकविंशतिदिनं स्थापनास्थानमेतच्चसर्वं प्रागेव सप्रपंचं भावितमेतानि च सर्वाण्यप्येकत्र मिलितानि यथोक्तसंख्याकानि भवंति, यथोक्तसंवेधसंख्या-परिज्ञानार्थमेव करणगाथामाह ।

[भा.३६४] गच्छुत्तरसंवग्गो, उत्तरहीनंमि पक्खिवे आइं ।
अंतिमधनमादिजुयं, गच्छद्धगुनं तु सव्वधनं ।।

वृ- इह यद्यपि प्रथमे स्थाने त्रिंशदारोपणास्थानानि, द्वितीये एकोनत्रिंशत् तृतीये अष्टाविंशतिरिति क्रमस्तस्तथापि संकलनायां यथोत्तरमंका निवेश्यंते, इत्येकद्वित्र्यादिक्रमः, तत्र गच्छः त्रिंशत् त्रिंशतोऽकस्थानानां भावादुत्तरमेकं, एकोत्तराया वृद्धेर्भावात्, आदिरप्येकं सर्वांकस्थानानामादावेकस्य भावात् गच्छस्य त्रिंशत् उत्तरेण एकेन संवर्गो गुणनं, गच्छोत्तरसंवर्गस्तस्मिन् किमुक्तं भवति; त्रिंशदेकेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुण्यते, एकेन च गुणितं तदेव भवतीति जाता त्रिंशदेव, तत्र उत्तरहीणमिति उत्तरेणैकेन हीनं, तस्मिन् कृते एकेन हीना त्रिंशत् क्रियते इत्यर्थः, जाताएकोनत्रिंशत् ततः प्रक्षिपेदादिममेकं जाता भूयस्त्रिंशत् एतदंतिमधनमंतिमे अंकस्थाने परिमाणमेतत्, आदिना एकेन युतं क्रियते, जाता एकत्रिंशत् गच्छस्त्रिंशत् तस्यार्धं पंचदश तैः सार्द्धं एकत्रिंशता गुण्यते, जातानि संवेधानां चत्वारि शतानि पंचपष्ट्यधिकानि अथवाऽयमन्यो गणितप्रकारः -

[भा. ३६५] दो रासीउ ठविज्जा, रूवं पुन पक्खिवाहि एगत्तो ।
जत्तो य देइ अद्धं तेन गुनं जाण संकलियं ।।

वृ- राशिर्गच्छ इत्यर्थांतरं, ततो द्वौ राशी स्थापयेत्, किमुक्तं भवति ? द्वौवारावुपर्यधोभागेन त्रिंशतं स्थापयेत् तत एकत एकस्मिन् राशौ रूपं पुनः प्रक्षिपेत् जातः स एकत्रिंशत् यतश्च यस्माच्च राशेरर्धमात्मानं ददाति तस्यार्धं गृह्यते, तत्रेह त्रिंशदर्धमर्पयति तेनैकत्रिंशदिति, त्रिंशतोर्धं पंचदशगृह्यन्ते, तेन इतरो राशिरेकत्रिंशल्लक्षणो गुण्यते, गुणिते च सति यत् जायते, तज्जानीहि, संकलितं सर्वसंवेधसंकलनं तच्च चत्वारि शतानि पंचपष्ठीनि, इह चत्वारि स्थापनास्थानानि चत्वारि चारोपणास्थानानि तत्र कस्मिन् स्थापनास्थाने कियंति स्थापनापदानि कस्मिन्नारोपणास्थाने कियंत्यारोपणापदानीत्येतत् परिज्ञानाय करणमाह -

[भा. ३६६] आसीया दिवससया, दिवसा पढमाण ठवणरूवणाण ।
सो हि उत्तरभइए ठाणादुराहंपि रूवजुया ।।

वृ- षण्णां मासानामशीतं दिवसशतं भवति, तस्मादशीतात् दिवसशतात् प्रथमयोः स्थापनारोपणयोर्ये दिवसास्तान् शोधयेत्, शोधयित्वा च यत्र यदुत्तरा वृद्धिस्तत्र तदुत्तरं तत्राद्येषु त्रिपु स्थापनास्थानेपु त्रिपु चारोपणास्थानेषु पंचानां पंचोत्तरा वृद्धिरिति, तत्रोत्तरं पंचचरिमे स्थापनास्थाने चरिमे चारोपणास्थाने पदानामेकोत्तरा वृद्धिरिति, तत्रोत्तरमेकः, ततस्तेनोत्तरेण भक्ते सति यदागच्छति, तावंति रूपयुतानि द्वयोरपि स्थापनारोपणयोः स्थानानि, एप गाथार्थः, भावार्थस्त्वेवं पट्सु मासेपु किल दिवसानामशीतं शतमित्यशीतं शतं ध्रियते ।। ततः प्रथमे स्थाने प्रथमायाः स्थापनाया दिनानि विंशति प्रथमाया आरोपणायाः पंचदशेत्युभयमीलने जाता पंचत्रिंशत् सा शोध्यते, जातं पंचचत्वारिंशतं, तत उत्तरेण पंचलक्षणेन भागो ह्रियते, लब्धा एकोनत्रिंशत् । सा रूपयुता क्रियते, प्रथमस्थापनारोपणयोः प्रथमत एव शोधित्वात्, जाता त्रिंशत्, एतावंति प्रथम स्थाने स्थापनापदानि, एतावंत्येव चारोपणापदानि, तथा द्वितीये स्थाने प्रथमस्थापनाया दिवसां पंचदश प्रथमारोपणायाः पंच उभयेपा मीलने जाता विंशतिः सा अशीतिशताच्छोध्यते, जातं षष्ठं शतं, तस्योत्तरेण पंचकलक्षणेन भागो ह्रियते, लब्धा द्वात्रिंशत् रूपयुता क्रियते, जाता त्रयस्त्रिंशत्, एतावंति द्वितीये स्थाने स्थापनापदान्येतावंत्येव चारोपणापदानि, तृतीये स्थाने प्रथमस्थापनाया दिवसाः पंच, प्रथमारोपणाया अपि पंच उभयमीलने जाता दश, ते अशीतात् शतात् अपनीयंते, जातं सप्ततिशतं, ।। तस्योत्तरेण पंचकलक्षणेन भागो ह्रियते, लब्धा चतुस्त्रिंशत् सा रूपयुता क्रियते, जाता पंचत्रिंशत् एतावंति तृतीये स्थाने स्थापनापदान्येतावंत्येव चारोपणापदानि, चतुर्थे स्थाने प्रथम स्थापनाया एकं दिनं प्रथमारोपणाया अपि चैकं उभयमीलने जाते द्वे दिने, ते अशीतात् शतात् शोध्यते, जातमष्टसप्ततं शतं ।। तस्योत्तरेण एकैकलक्षणेन भागो ह्रियत, लब्धमष्टसप्ततं शतं तद्रूपयुतं क्रियते, जातमेकोनाशीतिशतमेतावंति चतुर्थे स्थाने स्थापनापदानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतावंत्येव चारोपणापदानि उत्तरभइए उत्युक्तं तत्र कस्मिन् स्थाने किमुत्तरमित्युत्तरविभागकरणार्थं माह-

[भा.३६७] ठवणा रूवणाण तिण्हं उत्तरं तु पंच पंच विन्नेया ।
एगुत्तरिया एगा सव्वावि हवंति अट्ठेव ।।

वृ- तिसृणाभाद्यानां स्थापनानां तिसृणाभाद्यानाभारोपणानां च पदचिंतायामुत्तरं पंच पंच विज्ञेयाः तिसृष्वपि पदानां यथोत्तरं पंचोत्तरवृद्ध्या प्रवर्धमानत्वात्, एका चतुर्थी आरोपण एकोत्तरवृद्ध्या प्रवर्धमाना ततस्तत्रोत्तरमेकं जानीयात्, सर्वसंख्य या च सर्वा अपि स्थापनारोपणा अष्टौ भवंति, चतस्रः स्थापनाश्चतस्र आरोपणा इत्यर्थः ।। संप्रति करणवशात् यल्लब्धं पदपरिमाणं तत् दर्शयति ।।

[भा.३६८] तीसा तेत्तीसावि य पणतीसा अउनसीयसयमेव ।
एए ठवणाण पया, एवइया चेव रुवणाणं ।।

वृ- एतानि च तिसृणामपि स्थापनानां यथाक्रमं पदानि तद्यथा, प्रथमायास्त्रिंशत् द्वितीयाया-स्त्रयस्त्रिंशत्, तृतीयायाः पंचत्रिंशत्, चतुर्थ्या एकोनाशीतं शतं, एतावंत्येव चतसृणाभप्यारोपणनां यथाक्रमं पदानि तद्यथा प्रथमायास्त्रिंशत् द्वितीयस्याः त्रयस्त्रिंशत् तृतीयस्याः पंचत्रिंशत् चतुर्थ्या एकोनाशीतं शतमिति, अथ का स्थापना का आरोपणा च कतिषु मासेषु प्रतिसेवितेषु द्रष्टव्येत्येतत्परि-ज्ञानार्थमाह -

[भा.३६९] ठवणारोवणा दिवसे माणाउ विसोहइत्तु जं सेसं ।
इच्छियरुवणाए भए असुज्झमाणे खिवइ ज्झोसं ।।

वृ- मानात् षण्णां मासानां दिवसपरिमाणादशीत्यधिकशतरूपात् विवक्षितायाः स्थापनाया विवक्षितायाश्चारोपणाया ये दिवसास्तान् विशोधयेत्, विशोध्य च यच्छेषमुपलभ्यते, तत् ईप्सितया अधिकृतया यस्या दिवसाः पूर्वं विशोधितास्तया इत्यर्थः ।। आरोपणयाभजेद् भागं हियात भागे च हृते यदि राशिर्निर्लेपः शुध्यति, ततोन किमपि प्रक्षिप्यते, केवलं सा आरोपणा कृत्स्नभागहरणात् कृत्स्नेति व्यवह्रियते, ।। यदि पुनर्निर्लेपो न शुद्धयति, ततः क्षिपति झोषां यस्मिन् प्रक्षिप्ते समो भागहारो भवति, स राशिः समकरणो झोष उक्तंच, झोसित्ति वा समकरणत्ति वा एगठं ।। सा च आरोपणा अकृत्स्नभागहरणात् अकृत्स्नेति व्यवहर्त्तव्या, तथाच यथोक्तस्वरूपमेव झोषमुपदर्शयति ।

[भा.३७०] जेत्तियमेत्तेणं जो, सुद्धं भागं पयच्छती रासी ।।
तत्तियमेत्तं पक्खिव अकसिणरूवणाए झोसग्गं ।।

वृ- यावन्मात्रेण प्रक्षिप्तेन सोऽधिकृतराशिः शुद्धं निर्लेपं भागं प्रयच्छति, तावन्मात्रं प्रक्षिप, एतत् अकृत्स्ना, आरोपणाया उक्तशब्दार्थाझोषाग्रं झोषपरिमाणं; यथा केनापि पृष्टं, विंशिका स्थापना पाक्षिकी चारोपणा कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते, त्रयोदशभिर्मासैः; कथमेतदवसीयते, इति चेदुच्यते, इह षण्णां मासानामशीतं दिवसशतमित्यशीतं शतं ध्रियते ततो विंशिकायाः स्थापनाया विंशतिदिनानि पाक्षिक्याश्चारोपणायाः पंचदशदिनानि शोध्यंते, ठवणारोवणादिवसे माणाइ विसोहइ त्तु इति वचनात्, शेषं जातं, पंचचत्वारिंशं शतं इच्छियरुवणाए भइए इति वचनात् अधिकृतया पंचदशदिनया आरोपणाया भागो ह्रियते, तत्र चोपरितनो राशिः शुद्धं भागं न प्रयच्छति, पंचसु प्रक्षिप्तेषु प्रयच्छतीति पंचपरिमाणोऽत्र झोषः प्रक्षिप्यते, ततो भागे हृते लब्धा दशमासाः तथा दिवसाः पंचहि भइया दुरूवहीणाउ ते भवे मासा इति वक्ष्यमाणवचनात् ।।स्थापनादिवसानां विंशतेः पंचभिर्भागो ह्रियते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धाश्चत्वारस्ते द्विरूपहीनाः क्रियंते, स्थितौ द्वौ मासौ स्थापनायाः तथा पंचदशदिनाया आरोपणायाः पंचभिर्भागो ह्रियते, लब्धास्त्रयस्ते द्विरूपहीनाः कृता जात एको लब्ध आरोपणाया एको मासः, तेन यदि वा प्रथमेयमोपणेति लब्धा मासा दश एकेन गुण्यते जाता दशैव एकेन गुणितं, तदेव भवतीति न्यायात्, ततो द्वौ स्थापना पंचविंशतिदिना चारोपणा कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते, त्रयोविंशतिभिर्मासैस्तथाहि स्थापनादिवसा विंशतिरारोपणादिवसाः पंचविंशतिरेतेमिलिताः पंचचत्वारिंशत् ते षण्मासदिवसेभ्योऽशीतिशतसंख्येभ्यः शोध्यंते, जातं शेष. पंचत्रिंशत्शतं, ततोऽधिकृतया पंचविंशतिदिनया आरोपणया तस्य भागो ह्रियते, तत्रोपरितनो राशिः शुद्धं भागं न प्रयच्छति, पंचदशसु च प्रक्षिप्तेषु प्रयच्छतीति पंचदशपरिमाणोऽत्र झोषः प्रक्षिप्यते, लब्धाः षण्मासाः, तथाधिकृतारोपणायाः पंचभिर्भागो ह्रियते, लब्धा पंचः, ते द्विरूपहीनाः क्रियंते, जातास्त्रयः एतावंतश्चारोपणाया मासा यदि चेयं तृतीयारोपणेति तिण्हंपि गुणसु लद्धं इच्छियरूवणाए जइ मासा इति वक्ष्यमाणवचनात् ते षण्मासास्त्रिभिर्गुण्यंते, जाता अष्टादश द्वौ स्थापनामासौ त्रयश्चारोपणामासा इति, सर्वसंख्यया त्रयोविंशतिमासाः अथवा अन्यथा झोषपरिमाणं कथयति -

[भा.३७१] ठवणा दिवसे माना विसोहइत्ताण भयह रूवणाए ।।
जो छेयं सविसेसो अकसिणरूवणाए सो झोसो ।।

वृ- मानात् षण्मासदिवसपरिमाणात् अशीतिशतात् स्थापनादिवसात् अधिकृतस्थापनावासरान् विशोधय, विशोध्य च यच्छेषमवतिष्ठते, तदारोपणया अधिकृतारोपणादिवसैर्भज, भागहारं कुर्यात्, भागे च हृते यः छेदादंशानां विश्लेपः इह विश्लेषे कृते सति यदवतिष्ठते, तदपि विश्लेषतो जातत्वात् विश्लेपः, स तावत्प्रमाणोऽकृत्स्नारोपणायां झोषः, यथा षण्मासदिवसपरिमाणभूतात् अशीतिशतात् विंशिकायाः स्थापनायाः दिवसा विंशतिरिति, ततो विंशतिःशोध्यंते जातं षष्ट्यधिकं शतं ।। ततः पाक्षिक्यामारोपणायां संचयमासा ज्ञातुमिष्टा इति, पंचदशभिर्भागो ह्रियते, स्थिताः शेषा दश अधस्ताच्छेदः पंचदश, तेभ्यो दश विश्लिष्यंते, स्थिताः पंच आगतं पंचदशिक्यामकृत्स्नारोपणायां पंचको झोषः, तथा अशीतिशतात् स्थापनादिवसा विंशतिः शोध्यंते, जातं षष्टं शतं ।। ततः पंचविंशतिदिनाया आरोपणायाः संचयमासा ज्ञातुमिष्टा इति, पंचविंशत्या भागो ह्रियते, तथा शेषा । दश छेदोऽधस्तात् पंचविंशतिस्तस्या दश विश्लिष्यंते, स्थिताः पंचदश आगतं पंच विंशतिदिनायामारोपणायां पक्षो झोषः, एवं सर्वत्र भावनीयं ।

[भा.३७२] जत्थ पुन देइ सुद्धं, भागं आरोवणाउ सा कसिणा ।।
दोण्हंपि गुणसु लद्धं इच्छियरूवणाए जइ मासा ।।

वृ- यस्यां पुनरारोपणायामुपरितनो राशिः शुद्धं भागं प्रयच्छति, न किंचित् पश्चाद्यस्यावतिष्ठते, इति भावः सा आरोपणा कृत्स्ना भागहरणात् कृत्स्नेति प्रतिपत्तव्या, यथा विंशतिदिना, तथाहि केनापि पृष्टं विंशिका स्थापना विंशिका चारोपणा कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते, अष्टादशभिर्मासैः, कथमेतदवसेयमिति चेत् ? उच्यते, षण्णां मासानामशीतं दिवसशतं, तेभ्यो विंशतिर्दिनानि, स्थापनाया विंशतिर्दिनान्यारोपणायाः शोध्यंते, जातं शेषं चत्वारिंशततं, तत इच्छियरुवणाए भए इति वचनात्, विंशिकया आरोपणया भागो ह्रियते, भागे च हृते उपरितनो राशिर्निर्लेपः, शुद्ध एषा कृत्स्नारोपणा लब्धाः सप्तमासाः ततो दोण्हंपि गुणसुलद्धं इच्छियरूवणाए जइ मासा इति, वक्ष्यमाणवचनात् इयमारोपणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रागुक्तक्रमेण द्वाभ्यां मासाभ्यां निष्पन्नेति सप्तमासा द्वाभ्यां गुण्यंते, जाताश्चतुर्दशमासाः, ततो द्वौस्थापनामासौ चारोपणामासाविति समुदिताश्चत्वारः ते चतुर्दशसु प्रक्षिप्यंते, आगतं विंशिका स्थापना विंशिका चारोपणा अष्टादशभिर्मासैर्निष्पन्नेति, दोण्हंतु इत्यादि द्वायोरपि आरोपणायाः कृत्स्नाकृत्स्न-योर्लब्धुमीप्सिताया आरोपणाया यतिमासा यतिभिर्मासैरीप्सितारोपणा निष्पन्नेति यावत् ततिभिर्गुणय, यद्येकेन मासेन निष्पन्ना तत एकेन गुणाय, अथ द्वाभ्यां मासाभ्यां निष्पन्ना तर्हि द्विकेनाप्यथ त्रिभिस्ततस्त्रिभिरित्यादि, अथवा द्वयोरप्यारोपणयोः कृत्स्नाकृत्स्नयोर्लब्धं, यतिमासास्तत ईप्सितया आरोपणया गुणय, यदिप्रथमा तत एकेन गुणयते, अथ द्वितीया ततो द्वाभ्यामथ तृतीया ततस्त्रिभिरित्यादि, एतच्च प्रागपि भावितं, तदेवमशीतिशतात् स्थापनारोपणादिवसेषु शोधितेषु यच्छेषं तद्वक्तव्यतोक्ता, संप्रति स्थापनारोपणादिवसेभ्यो यथा मासा आगच्छंति मासेभ्यो वा दिवसास्तथा प्रतिपादयति -

[भा.३७३] दिवसा पंचहिं भइया दुरूवहीणाउ ते भवे मासा ।।
मासा दुरूवसहिया पंचगुणा ते भवे दिवसा ।।

वृ- स्थापनाया आरोपणाया वा दिवसाः पंचभिर्भज्यंते, पंचभिस्तेषां भागो ह्रियते इति भावः, ततो भागे हृते लब्धास्ते द्विरूपहीनाः क्रियंते, ततो रूपद्वयं स्फेटयते इति भावः, रूपद्विक वा स्फेटिते यदवशिष्यते, ते भवेयुर्मासा, यथा विंशिकायाः स्थापनाया दिवसा विंशति स्तेषां पंचभिर्भागो ह्रियते, लब्धाश्चत्वारस्ते द्विरूपहीनाः क्रियंते, स्थितौ द्वौ, आगतं विंशिका स्थापना द्वाभ्यां मासाभ्यां निष्पन्ना, तथा पाक्षिक्या आरोपण्याया दिनानि पंचदश तेषां पंचभिर्भागहरणं लब्धास्त्रयस्ते द्विरूपहीनाः क्रियंते, स्थित एक आगतं पाक्षिकी आरोपणा एकन मासेन निष्पन्ना, विंशिकारोपणा विंशिका स्थापना च द्विमासनिष्पन्ना भावनीया, तृतीयायाः पंचविंशतिदिनाया आरोपणायाः दिवसाः पंचविंशतिस्तेषां पंचभिर्भागहारो, लब्धाः पंच ते द्विरूपहीनाः कृताः स्थितास्त्रयः, आगतं पंचविंशतिदिना, तृतीयारोपणा त्रिभिर्मासैर्निष्पना एवं सर्वत्र भावनीयं, मासा दूरूवसहिया इत्यादि, यतिमासाः स्थापनायामारोपणायां वाधिकृतकरणवशाल्लब्धास्ते दिवसा नयनाय द्विरूपसहिताः क्रियंते, तत पंचगुणास्ततो भवेयु यथोक्ता दिवसाः, यथा विंशिकायाः स्थापनाया द्वौ मासौ तौ द्विरूपसहितौ क्रियेते, जाताश्चत्वारस्ते पंचभिर्गुण्यंते, आगतं विंशिकायाः स्थापनाया विंशतिर्दिनानि तथा पाक्षिक्या आरोपणाया एको मासः, स द्विरूपसहितः क्रियते, जातास्त्रय स्ते पंचभिर्गुण्यते, आगतं पाक्षिक्या आरोपणायाः पंचदश दिनानि तथा पंचविंशतिदिनाया आरोपणायास्त्रयो मासास्ते द्विरूपयुताः क्रियंते, जाताः पंच ते पंचभिर्गुण्यंते, आगतं पंचविशंतिर्दिनानि एवं सर्वत्र भावनीयं, तदेवं करणान्यभिधायोपसंहारमाह,

[भा.३७४] ठवणारोवणसहिया संचयमासा हवंति एवइया ।।
कत्तो किं गहियं तिय ठवणामासे ततो सोहे ।।

वृ- पूर्वं ठवणारोवणदिवसे माणाउ विसोहइत्तु इत्यादि करणवशात् ये लब्धा मासास्तेऽनंतरोक्त-करणवशादानीता ये स्थापनारोपणा मासा स्तत्सहिताःक्रियंते, ततः शिष्येभ्यः एवं प्ररूपय, अस्यां स्थापनायामस्यां चारोपणायामेतावंतः संचयमासाः, सर्वप्रायश्चित्तसंकलनमासा भवंति, तदेवं यतिभि-र्मासैः प्रतिसेवितैर्या स्थापना आरोपणा च निष्पन्ना, तदेतत् प्रतिपादितमधुना तस्यां तस्यां स्थापनाया-मारोपणायां संचयमासानां मध्येकुतो मासात् किं गृहीतमिति प्रतिपादनार्थमाह, कत्तो इत्यादि - शिष्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृच्छति, तस्यां तस्यां स्थापनायामारोपणायां च संचयमासानां मध्ये कुतो मासात् किं गृहीतमत्र सूरिः करणमाह, ठवणामासे ततो सोहे, ततः संचयमाससंख्यातः स्थापनामासान् शोधयेत् शोधिते च सति

[भा. ३७५] दिवसेहिं जइहिं मासो निप्फन्नो हवई सव्व रूवाणं ।।
तइहिं गुणियाउ मासा, ठवणदिनदिनजुया उ छम्मासा ।।

वृ- सर्वासामारोपणानां यतिभिर्दिवसैर्मासो भवति, निष्पन्नस्ततिभिर्गुणितास्ते मासाः कर्त्तव्याः, पुनः स्थापनादिनयुक्तास्ततस्ते पण्मासा भवंति, यथा प्रथमायामारोपणायां त्रयोदशं संचयमासास्तेभ्यः स्थापनामासौ द्वौ शोधितो, स्थिताः पश्चादेकादश, अत्रारोपणायामेको मासः, स च पंचदशभिर्दिनैर्निष्पन्न इति, ते एकादश पंचदशभिर्गुण्यंते, जातं पंचषष्टंशतं, ततो विंशतिर्दिवसाः स्थापनासत्काः प्रक्षिप्यंते, जातं पंचाशीतं शतं पंचझोष इति ते त्यक्ता जाताः षण्मासाः आगतं द्वाभ्यां स्थापनीकृताभ्यां मासाभ्यां दश दश दिनानि गृहीतानि, शेषेभ्यस्त्वेकादशभ्यः पंचदश पंच दिनानि, केवलं तन्मध्यात्पंचझोषः कृतः पंचदिनानि त्यक्तानीति भावः, झोषशब्दस्य तत्त्वतस्त्यागवाचित्वादत एव च यान्यमूनि पंचदिनानि त्यक्तानि, तान्येव प्राक्राशिसमकरणार्थं प्रक्षिप्तानीति समकरणप्रक्षेपणीयो राशिर्झोषशब्देनोक्ताः, एवं सर्वत्र झोषभावना भावनीया, तथा विंशिकायां स्थापनायां विंशिकायां चारोपणायामष्टादश किल संचयमासास्तेभ्यो द्वौ स्थापनामासौ शोधितो जाताः षोडश, अत्र विंशतिदिनारोपणा द्विमासेत्येकैको मासो दशभिर्दिनैर्निष्पन्नस्ततस्ते षोडश दशभिर्गुण्यंते, जातं षष्टं शतं ।। ततः स्थापनादिवसा विंशतिः प्रक्षिप्यंते, जातमशीतं शतं आगतमत्र द्वाभ्यां स्थापनामासाभ्यां दश दश वासरा गृहीताः शेषेभ्योपि षोडशेभ्यो मात्रतो दश दशेति तथा विंशिकायां स्थापनायां पंचविंशिकायां चारोपणायां त्रयोविंशतिः संचयमासास्तेभ्यो द्वौ स्थापनामासौ शोधितो, जाता पश्चादेकविंशतिः, पंचविंशतिदिना चारोपणा त्रिभिर्मासैर्निष्पन्नेत्येकैको मासः, स त्रिभागैरष्टभिर्दिनैर्निष्पन्नस्तत एकविंशतिरष्टभिर्गुणिता, जातमष्टषष्टं शतं त्रिभागगुणिते च लब्धाः सप्त तेपि तत्र प्रक्षिप्यंते, जातं पंचसप्ततं शतं तत्र विंशतिः स्थापनादिवसाः प्रक्षिप्यंते, जातं पंचनवतं शतं तत्र पंचदश दिनानि झोष इति तान्यपनीयंते, जातमशीतं शतमागतमत्र द्वाभ्यां स्थापनीकृताभ्यां मासाभ्यां दश दश रात्रिंदिवानि गृहीतानि, शेषेभ्यस्त्वेकविंशतिमासेभ्यो मात्रतः सत्रिभागान्यष्टावष्टौ रात्रिंदिवानि, केवलं तत्रापि पंचदश दिनानि झोषीकृतानीति, तदेवं स्थापनातः शेषमासेभ्यो मात्रतो यत् गृहीतं, तत्प्रतिपादितमधुना शेषमासेभ्यो यत् येभ्योविशेषतो गृहीतं तत् प्रतिपादनार्थं करणमाह -

[भा. ३७६] रुवणाई जइ मासा, तइभागं तं करे ति पंचगुणं ।।
सेसं च पंचगुणियं ठवणादिवसा जुया दिवसा ।।

वृ- स्थापनामासेषु शोधितेषु यच्छेषमवतिष्ठते, तत् आरोपणायां यतिमासास्ततिभागं तावत्संख्याकभागं करोति, कृत्वा चाद्यभागं त्रिपंचगुणं पंचदशगुणं करोति, शेषं तु समस्तमपि पंचगुणं एतच्चैवं द्रष्टव्यं, पाक्षिक्यादिष्वारोपणासु यदिपुनरेकदिना द्विदिना यावच्चतुर्दशदिना आरोपणा तदा यतिदिना आरोपणा ततिगुणं कुर्यात्, ततस्ते दिवसा स्थापनादिवसयुताः क्रियंते, ततो दिवसाः षण्मासदिवसा भवंति, तद्यथा प्रथमासां स्थापनायां प्रथमायां चारोपणायां त्रयोदश संचयमासाः तेभ्यो द्वौ स्थापनामासौ शोधितो जाता एकादश, अन्यं तु ब्रुवते, अत्रायं वृद्धसंप्रदायः यद्येकस्मात् मासान् निष्पन्ना आरोपणा, ततः प्रतिसेवितमासेभ्यः स्थापनाया आरोपणायाश्च मासाः शोधयितव्याः अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्व्यादिमासै निष्पन्नारोपणा ततः प्रति सेवितमासेभ्यः स्थापनामासा एव शोध्यंते, नारोपणामासा इति ततः तन्मतेन द्वौ स्थापनामासावेकश्चारोपणामास इति त्रयः संचयमासेभ्यः त्रयोदशभ्यः शोध्यंते, जाता दशेति । तत्र स्वमते अधिकृतारोपणा एकमासनिष्पन्नेति एकादश भागेन क्रियंते, एकभागकृतं च तत्तथारूपमेव भवतीति जाताः समुदिता एव ते एकादश, ततः तिपंच गुणितमिति वचनात् पंचदशभिर्गुण्यंते, जातं पंचषष्टं शतं ।। तत्र स्थापना दिवसाः विंशति प्रक्षिप्ता जातं पंचाशीतं शतं ततः पंच रात्रिदिवान्यत्र झोषीकृतानीति तान्यपसार्यते, जातमशीतं शतं, मतांतरेण तु ते दशमासा एक भागीकृताः पंचदशभिर्गुण्यते, जातं पंचाशं शतं ।। ततः स्थापना दिवसा विंशति रारोपणा दिवसाः पंचदश प्रक्षिप्यंते, जातं पंचाशीतं शतं ।। पंच दिनानि झोष इति तानि ततोऽपनीयंते, जातमशीतं दिवसशतमा- गतं, द्वाभ्यां स्थापनीकृताभ्यां मासाभ्यां दश दश दिनानि गृहीतानि, शेषेभ्यस्त्वेकादशमासेभ्य पंचदश पंचदश दिनानि यावत् पंच दिनानि झोषीकृत्वानि तथा विंशिकायां स्थापनायां विंशिकायां चारोपणाया- मष्टादश संचयमासास्तेभ्यां द्वौ स्थापनामासावपनीतौ, जाताः षोडश, ततोऽत्रारोपणा द्वाभ्यां मासाभ्यां निष्पन्नेति कृत्वा ते षोडश द्वाभ्यां भागाभ्यां क्रियंते, एकतोप्यष्टावुपरितोप्यष्टावधः तत्रोपरितनभाद्यभागं तिपंचगुणमिति वचनात् पंचदशभिर्गुणयेत्, जातं विंशं शतं ।। अधस्तनास्त्वष्टौ सेसं च पंचगुणियमिति वचनतः पंचभिर्गुण्यंते, जातं चत्वारिंशित् ।। उभयमिलिते जातं षष्टं शतं ।।

अत्र स्थापनामासाभ्यां दश दश रात्रिदिवानि गृहीतानि, अष्टाभ्यो मासेभ्यः पंचदश पंचदशान्येभ्यस्त्वष्टाभ्यः पंच पंचेति तथा विंशिकायां स्थापनायां पंचविंशिकायां चारोपणायां त्रयोविंशतिः संचयमासास्तेभ्यो द्वौ स्थापनामासौ शोधितौ जाताः पश्चादेकविंशतिरत्रारोपणा त्रिभिर्मासैर्निष्पन्ने ति कृत्वा ते एकविंशतिः संचयमासास्त्रिभागाः क्रियंते, जातास्त्रयः सप्तकाः पुंजाः ततः प्रथमे सप्ततिपंचगुणमिति वचनात् पंचदशभिर्गुण्यंते, जातं पंचोत्तरशतं तत्र पक्षो झोष इति पंचदश शोध्यंते, जाता नवतिः शेषौ च द्वौ भागौ सप्तकौ शेषं च पंचगुणमिति वचनात्, प्रत्येकं पंचभिर्गुण्यंते, जाता उभयत्र प्रत्यंकं पंचत्रिंशत् उभयमीलने जाताः सप्ततिः सा पूर्वराशौ प्रक्षिप्ता जातं षष्ट्यधिकं शतं। अत्र विंशतिः स्थापनादिनाः प्रक्षिप्ता जातमशीतं शतमागतमत्र द्वाभ्यां स्थापपनीकृताभ्यां मासाभ्यां दश दश वासरा गृहीताः सप्तभ्यो मासेभ्यः पंचदश चतुर्दशभ्यो मासेभ्यः पंच पंच पंचदश वासराश्च झोषीकृता इति एवं सर्वत्र भावनीयं, तदेवं या स्थापना आरोपणा च यतिभिर्मासैः प्रतिसेविते निष्पन्ना यस्यां च स्थापनायामारोपणायां च संचयमासानां मध्ये यतो मासात् यत् गृहीतं तदेतत् सर्वं प्रतिपादित मधुना यत्स्थापनाया आरोपणायाश्च मासानयनाय करणमुक्तं, दिवसा पंचहिं भइया इत्यादि तत् प्रथमस्थाने एवं सर्वात्मना व्यापि न द्वितीयादिषु स्थाने तेषु हि क्वचित्तदप्यस्ति, क्वचिदन्यथापि ततस्तत्रोभयं विवक्षुः प्रथमतस्तावदेव करणमाह -

[भा. ३७७] दिवसा पंचहिं भइया, दुरूपहीना य ते भवे मासा ।।
मासा दुरूवसहिया पंचगुणा ते भवे दिवसा ।।

वृ. अस्या व्याख्या पूर्ववत् ।

[भा. ३७८] जत्थ य दुरूवहीनं न होज्ज भागं च पंचहि न दिज्जा ।
तेहिं ठवणारूवणा मासो एगो उ ते चेव ।।

वृ- यत्र पुनः स्थापनासु आरोपणासु च पंचदिनादिकासु पंचभिर्भागे हृते यल्लब्धं तत् द्विरूपहीनं भवेत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचदिनादिकासु नवदिन पर्यंतासु द्वायोरेव रूपयोरसंभवात्, दशादिकासु चतुर्दशदिन पर्यंतासु द्विहीनरूपतायां शून्यतापत्तेः, यदिवा यत्सु स्थापनास्वारोपणासु चैकदिनादिषु चतुर्दिनपर्यंतासु पंचभिर्भागमुपरितनो राशिर्न दद्यात् स्तोकत्वात्, तत्र तासु स्थापनास्वारोपणासु चैको मासो द्रष्टव्यः ।। दिनाउ ते चेवत्ति-दिनान्यपि तान्येव यान्युपात्तानि न पुनर्मासंख्यां द्विरूपसहितां कृत्वा पंचभिश्च गुणयित्वा दिनान्यानेतव्यानीति भावः, अथ कियंतो दिवसाः स्थापनायामारोपणायां च प्रागुक्तकरणमंतरेणैव मेवैकस्मान्मासात् प्रतिपत्तव्याः ? तत्र आह -

[भा.३७९] एकादीया दिवसा नायव्वा जाव होंति चउदसओ ।
एकातो मासातो निष्फन्ना परतो दुगहीना ।।

वृ- एकस्मान्मासात् निष्पन्ना दिवसा एकादयो ज्ञातव्या, यावत्त चतुर्द्दश भवंति, किमुक्तं भवति, एकदिनादिकाश्चतुर्द्दशदिनपर्यंताः स्थापना आरोपणाश्च दिवसा पंचहिं भइया, इत्यादि करणप्रयोगमंतरेणैवमेव एकस्मान् मासात्प्रतिपत्तव्या इति, परतो दुगहीणत्ति, परतः पंचदशदिनादिकासु स्थापनास्वारोपणासु च दुगहीणत्ति पदैकदेशे पदसमुदायोपचारात् दिवसा, पंचहिं भइया, दुरूवहीना इति करणतो मासाः प्रत्येतव्याः, तत्रैव प्रकारांतरमाह -

[भा.३८०] जइ वा रूवहीने कयंमि होज्जा जहिं तु आगासं ।।
तत्थवि एगो मासो, दिवसो ते चेव दोण्हंपि ।।

वृ- यदिवेति प्रकारांतरेण तच्च प्रकारांतरमिदं पूर्वं दशदिनादिकासु चतुर्द्दशदिनपर्यतासु द्विरूपहीनतया एवासंभवत एको मास उक्तो, यदिवा भवतु तत्र द्विरूपहीनता तथाप्येतत् करणवशात्तत्रैको मासः प्रतिपत्तव्य इति, तदेव करणमाह ।। दुरूवहीने इत्यादि यत्र यासु दशदिनादिकासु चतुर्द्दशदिनपर्यंतासु पंचभिर्भागे हृते यल्लब्धं, तस्मिन् द्विरूपहीने कृते सति भवेदाकाशं शून्यं, तत्राप्येको मासो द्रष्टव्यः, दिवसा अपि द्वयानां स्थापनाऽरोपणानां तएव ज्ञेया, ये उपात्ता नतु प्रागुक्तकरणवशतो माससंख्यात आनेतव्या इति भावः । अथ यत्रोत्कृष्टा स्थापनारोपणा वा तत्रस्थापनारोपणाभ्यामेव पणां मासानां परिपूर्णभवनात् ठवणारोवणदिवसे माणाउ विसोहइत्तु जं सेसमित्यादि करणं न प्रवर्त्तते, तदप्रवृत्तौ च कथं संचयमाससंकलनं कर्त्तव्य तत आह -

[भा.३८१] उक्कोसा रुवणाणं मासा जे होंति करणनिद्दिठ्ठा ।।
ते ठवणामासजुया संचयमासाउ सव्वासिं ।।

वृ- सर्वासामुत्कृष्टानामारोपणानां ये मासा भवंति, करणनिर्दिष्टाः दिवसा पंचहिं भइया इत्यादिना आरोपणाकरणेन निर्द्दिष्टास्ते स्थापनामासयुताः स्थापनायां ये करणवशतो लब्धा मासाः संयुक्ताः संचयमासा द्रष्टव्याः, यथा विंशिकायां स्थापनायां षष्टदिनशतायामारोपणायां द्वात्रिंशन्मासाः तथाहि स्थापनायां द्वौ मासौ लब्धौ, तौ च प्रागेव भावितौ, आरोपणायाः पंचभिर्भागो हियते, लब्धा द्वात्रिंशत् सा द्विरूपहीना क्रियते जाता त्रिंशत् स्थापनामासौ तत्र प्रक्षिप्तावागतं द्वात्रिंशत् प्रतिसेविता मासाः, अथात्र कुतो मासात् किं गृहीतं ? उच्यते, द्वौ द्वात्रिंशतः संचयमासेभ्यः स्थापनामासौ शोध्येते, स्थिताः पश्चात् त्रिंशन्मासाः ततइयमारोपणा त्रिशता मासैनिष्पन्ना त्रिंशत्तमा चेति त्रिंशद्भागाः क्रियंते, आगत एकैकस्मिन् भागे एकैको मासः, तत्र प्रथमो भागः पंचदशभिर्गुण्यते, जाता पंचदश, शेषा एकोनत्रिंशत् पंचभिर्गुण्यते, जातं पंचचत्वारिंशत्शतं उभयमीलने षष्टं शतं । तत्र स्थापनादिवसा विंशतिः प्रक्षिप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातमशीतं शतमागतमत्र द्वाभ्यां स्थापनीकृताभ्यां मासाभ्यां दश दश दिवसा गृहीताः, एकस्मात् पंचदश शेषेभ्यः पंच पंचेति एवं सर्वत्र भावनीयं तत्र प्रथमं स्थाने यावती प्रथमा स्थापना यावती च प्रथमारोपणा यावंतश्च तत्र संचयमासास्तदेतत्प्रतिपादयति-

[भा.३८२] पढमा ठवणा वीसा, पढमा आरोवणा भवे पक्खे ।।
तेरसहिं मासेहि पंचउ राइंदिया झोसो ।।

वृ- प्रथम स्थाने प्रथमा स्थापना विंशिका विंशतिदिना प्रथमा चारोपणा भवति, पक्षः पक्षप्रमाणा एषा स्थापनारोपणा च त्रयोदशभिर्मासैर्निष्पन्ना, तथा एषारोपणा अकृत्स्ना ततोऽवश्यमस्यां झोषोऽभूदिति, झोषपरिमाणमाह, पंचरात्रिंदिवानि झोषः एतद्विषया भावना प्रागेव कृता, न भूयोपि क्रियते, अधुना प्रथम स्थाने एव प्रथमस्थापनाया द्वितीयारोपणायाश्च यावद्दिना भवंति, यावद्भिश्च संचयमासैरेषा स्थापनारोपणा च निष्पन्ना तदेतत् प्रतिपादयति -

[भा.३८३] पढमा ठवणा वीसा, बिइया आरोवणा भवे वीसा ।
अठारसमासेहिं एसा पढमा भवे कसिणा ।।

वृ- प्रथम स्थाने प्रथमा स्थापना विंशतिर्द्वितीया आरोपणा भवेद्विंशिका विंशतिदिना एषा स्थापना आरोपणा च निष्पन्ना अष्टादशभिर्मासैरेषा चारोपणा कृत्स्नभागहरणात् कृत्स्ना प्रथमा स सर्वासां कृत्स्नारोपणानामिति, एवद्विषयापि भावना प्रागेवकृतेति न भूयः क्रियते, संप्रति प्रथम स्थाने प्रथमायां स्थापनायां यावद्दिना तृतीया आरोपणा यतिभिश्च संचयमासैस्ते उभे निष्पन्ने तत् प्रतिपादयति -

[भा.३८४] पढमा ठवणा वीसा तइया आरोवणा उ पणवीसा ।।
तेवीसा मासेहिं पक्खोउ तहिं भवे झोसो ।।

वृ- प्रथम स्थाने एव प्रथमा स्थापना विंशतिदिना तृतीया चारोपणा पंचविंशतिदिना एषा प्रथमा स्थापना तृतीया चारोपणा त्रयोविंशतिभिर्मासैर्निष्पन्ना, इयमप्यकृत्स्नारोपणा इति झोसोऽत्राभूत् अतो झोषपरिमाणमाह पक्षस्तत्र तस्यां तृतीयायाभारोपणायां झोष इति विशेषः स्थापनारोपणानां दिनपरिमाणे संचयपरिमाणे चेति, देशपरिमाणमाह -

[भा.३८५] एवं एया गमिया, गाहातो होंति आनुपुव्वीए ।।
एएगा कमेण भवे चत्तारिसयाउ पणट्ठा ।।

वृ- एवमुक्तेन प्रकारेण एसोऽनंतरोदितो दिनमानादिलक्षणो गमः प्रकारो यासां ता एतद्गमिका गाथा भवंत्यानुपूर्व्यानुक्रमेणाऽन्यापि ज्ञातव्या, यथा —

पढमा ठवणा वीसा चोत्था आरोवणा भवे तीसा ।
छव्वीसा मासेहिं वीसइराइंदिया झोपो ।।

इत्यादि; अथानेन प्रकारेण कियत्संख्याका गाथा अनुगंतव्याः तत आह, एएणेत्यादि एतेन क्रमेण चत्वारिशतानि पंचषष्टानि गाथानां भवंति, इयमत्र भावना विंशिकां स्थापनाममुंचता पंच पंच आरोपणायां प्रक्षिप्ताः तावन्नेतव्यं, यावदंतिमा आरोपणा एतासु संचयमासानयनाय प्रागुक्तकरणलक्षणं प्रयोक्तव्यं, तद्यथा अशीतात् दिवसशतात् प्राक् स्थापनारोपणादिवसाः शोधयितव्याः, ततो यच्छेषमवतिष्ठते, तस्याधिकृताया आरोपणाया भागो हर्त्तव्यस्तत्र यदि शुद्धं भागं न प्रयच्छति, ततो यावता प्रक्षिप्तेन परिपूर्णो भागः शुद्ध्यति, तावन्मात्रो झोपः प्रक्षेपणीयः, तत्प्रक्षेपानंतरं च भागे हृते ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धा मासास्ते यतिभिर्मासैरारोपणा निष्पन्नाः ततिभिर्गुणयितव्यास्ततः स्थापनारोपणमासा अपि तत्र प्रक्षिप्यंते, ततः समागच्छति प्रतिसेवितमासपरिमाणमिति कृत्वामासात् किं गृहीतमित्यस्यामपि जिज्ञासायां संचयमासेभ्यः प्रथमं स्थापनामासाः शोधयितव्यास्ततः शेषा ये मासास्तिष्ठंति, यतिभिर्मासैर्निष्पन्ना यत्संख्याका वा आरोपणा तावंतो भागाः कर्त्तव्याः, तत्र प्रथमो भागः पंचदशभिर्गुणयितव्यः, शेषाः सर्वे पंचभिर्गुणनीयाः एते सर्वेपि दिवसा एकत्र मीलयितव्याः; यश्चझोषः प्रक्षिप्तः स शोधयितव्यः ततः स्थापनादिवसाः प्रक्षेपणीयाः; आगतफलमप्येवं कथनीयं, यतिभिर्दिवसैः स्थापनामासो निष्पन्नस्ततिदिवसाः स्थापनीकृतेभ्यो मासेभ्यः प्रत्येकं गृहीता यावंतश्च मासाः पंचदशभिर्गुणितास्तावद्भ्यः पंचदशशेषेभ्यः पंच पंचेति एवं पंचविंशिकायामपि स्थापनायां पाक्षिक्यादय आरोपणा द्रष्टव्याः, यावच्चरमा पंचपंचाशद्दिनशतमाना त्रिंशत्कायां स्थापनायां पाक्षिक्यादय आरोपणा यावत् पंचाशद्दिनशतमाना एवं तावत् यावच्चरमायां स्थापनायां पंचषष्टिदिनशतमानायां पाक्षिक्येकारोपणा एतासु च पूर्वभणितेन प्रकारेण चत्वारिंशतानि पंचषष्टाधिकानि गाथानां कर्त्तव्यानीति प्रथमं स्थापनारोपणास्थानं समाप्तं ।।

संप्रति द्वितीयं स्थापनारोपणास्थानं प्रतिपिपादयिपुरिदमाह -

[भा. ३८६] तेत्तिसं ठवणपया तेत्तीसारोवणाए ठाणाइं;
ठवणाणं संवेहो, पंचेव सयाउ एगट्ठा ।।

वृ- द्वितीये स्थाने त्रयस्त्रिंशत् स्थापनापदानि, त्रयस्त्रिंशच्चारोपणायाः स्थापनापदानि एतच्च प्रागेव भावितमिति न भूयो भाव्यते, संप्रति संवेधपरिमाणमाह, ठवणाणमित्यादि स्थापनानामारोपणाभिः सह संवेधाः सर्वसंख्यया भवंति, पंचशतान्येकषष्टानि एकषष्ट्यधिकानि ।। कथमेतदवसातव्यमिति चेदुच्यते, इह संवेधसंख्यानयनाय प्रागुक्ता गच्छोत्तरसंवग्गे इत्यादि करणगाथा गच्छश्चात्र त्रयस्त्रिंशत् तथा च गच्छानयनाय पूर्वसूरिप्रदर्शितेयं करणगाथा ।

[भा. ३८७] ठवणारोवणविजुया छम्मासा पंचभागभइया जे ।।
रूवजुया ठवणपया तिसु चरिमा देसभागेक्को ।।

वृ- अस्या व्याख्या - षण्णां मासानां समाहारः षण्मासं, तस्मात् षण्मासात् स्थापनारोपणदिवसैर्विरहितात् तदनंतरं पंचभागसक्तात् ये लब्धास्ते रूपयुताः संतो यावंतो भवंति, एतावंति स्थापनापदानि एतावान् तत्र गच्छ इति भावः, एतच्च त्रिष्वाद्येषु स्थानेषु द्रष्टव्यं, चरमेपि स्थाने एष एवादेशः, केवलमेकेन भागो हर्त्तव्यः, एष गाथाक्षरार्थः भावार्थस्त्वयं प्रथमे स्थाने प्रथमा स्थापना विंशतिदिना प्रथमा चारोपणा पंचदशदिना उभयमीलने दिनानि पंचत्रिंशत्तानि षण्मासदिवसेभ्योऽशीतशतप्रमाणेभ्यः शोध्यंते, जातं पंचचत्वारिंशंशतं, तस्य पंचभिर्भागो ह्रियते, लब्धा एकोनत्रिंशत् सा रूपयुता क्रियते, जाता त्रिंशत् आगतं प्रथमे स्थाने त्रिंशत् गच्छः, तथा द्वितीये स्थाने प्रथमा स्थापना पंचदशदिना प्रथमा चारोपणा पंचदिना उभयमीलने जातानि दिनानि विंशतिः, षण्मासदिवसेभ्यो अशीतशतप्रमाणेभ्यः शोध्यंते, जातं षष्टिशतं ।। तस्य पंचभिर्भागो ह्रियते, लब्धा द्वात्रिंशत् सा रूपयुता क्रियते, जाता त्रयस्त्रिंशत्, आगतं द्वितीये स्थाने त्रयस्त्रिंशत् गच्छः, उत्तरमेकः आदिरप्येकः अत्र भावना प्रागुक्तानुसर्त्तव्याः, तत्र गच्छस्त्रयस्त्रिंशत् एकेन गुण्यते, एकेन गुणितं तदेव भवतीति जातात्रयस्त्रिंशद्दिवसा उत्तरेणैकेन हीना क्रियते, जाता द्वात्रिंशत् तत्रादिममेककलक्षणं प्रक्षिपेत् जाता भूयस्त्रयस्त्रिंशत् एतदंतिमं धनं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतद्यांतिमं धनमादिना एककेन युतं क्रियते, जाता चतुस्त्रिंशत्, सा गच्छार्धेन गुणयितव्या, तत्र गच्छराशेर्विषमत्वात् परिपूर्णमर्धं न लभ्यते इति चतुस्त्रिंशदर्धं क्रियते, जाता सप्तदश, ते गच्छेन परिपूर्णेन गुण्यंते, जातानि पंचशतान्येकषष्ठानि ।। संप्रत्यस्मिन् द्वितीये स्थाने कतिदिना प्रथमा स्थापना कतिदिना च प्रथमारोपणा सा च प्रथमा स्थापनारोपणा च कतिभिः संचयमासैः प्रतिसेवितैर्निष्पन्नेत्येतत् प्रतिपादयति -

[भा.३८८] पढमा ठवणा पक्खो, पढमा आरोवणा भवे पंच ।
चोत्तीसा मासेहिं एसा पढमा भवे कसिणा ।।

वृ- द्वितीये स्थाने प्रथमा स्थापना पक्षः, पक्षप्रमाणा प्रथमारोपणा भवति, पंच पंच पंचदिना एषा स्थापनारोपणा च निष्पन्ना चतुस्त्रिंशता मासैः प्रतिसेवितैः; कथमिति चेदुच्यते, षण्मासानां दिवसाः अशीतं शतं तस्मात् ठवणारोवणादिवसे मानाउ विसोहइत्तुमिति वचनात् स्थापना दिवसाः पंचदश आरोपणा दिवसाः पंच उभयमीलने विंशतिः शोध्यंते, जातं षष्ठं शतं ।। ततोऽधिकृतया पंचकलक्षणया आरोपणया भागो ह्रियते, लब्धा द्वात्रिंशन्मासाः राशिश्चात्र निर्लेपः शुद्ध इत्येषारोपणा कृत्स्ना, तथा चाह, एषा आरोपणा भवति कृत्स्ना कृत्स्नभागहरणात् सा चान्यासां कृत्स्नारोपणानां प्रथमा स्थापनादिवसानां च मासानयनाय पंचभिर्भागो ह्रियते, लब्धास्त्रयः ते द्विरूपहीनाः क्रियंते, जात एककः आगत एको मासः आरोपणायामप्येको मासो लब्धः, जत्थ उ दुरूवहीनं न होज्ज इत्यादि वचनात्, ततः एकः स्थापनामास एक आरोपणामास इति द्वौ मासौ तौ पूर्वराशौ प्रक्षिप्येते, आगतं चतुस्त्रिंशन्मासाः प्रतिसेविताः अथ कुतो मासात् किं गृहीतं, ? उच्यते, चतुस्त्रिंशतः प्रतिसेवितमासेभ्यः एकः स्थापनामासः शोध्यते, जातास्त्रयस्त्रिंशत् ते आरोपणया पंचदिनमानया भागे हृते लब्धा इति पंचभिर्गुण्यंते, जातं पंचषष्टिशतं ।। तत्र स्थापनादिवसा पंचदश प्रक्षिप्ता जातमशीतं शतमागतमेकस्मात् स्थापनीकृतान्मासात् पंचदश दिनानि गृहीतानि, शेषेभ्यस्तु पंच पंचेति, अधुना द्वितीये स्थाने प्रथमायां स्थापनायां यावद्दिना द्वितीया आरोपणा यतिभिश्च संचयमासैः प्रतिसेवितैः प्रथमा स्थापना द्वितीया चारोपणा निष्पन्ना, तदेतत्प्रतिपादयति -

[भा.३८९] पढमा ठवणा पक्खो, बितीया आरोवणया भवे दसेउ ।
अट्ठारसमासेहिं पंचयराइंदिया झोसो ।।

वृ- द्वितीये स्थाने प्रथमा स्थापना पक्षो द्वितीया चारोपणा दशदशदिना भवंति, एषा च स्थापना आरोपणा च अष्टादशमासैः प्रतिसेवितैर्निष्पन्ना, तथाहि अशीतात् दिनशतात् स्थापनादिवसाः पंचदश आरोपणादिवसा दश उभयमीलने पंचविंशतिः शोध्यंते, जातं पंचपंचाशतं शतं ।। ततोधिकृतया दशदिनया रोपणया भागो ह्रियते तत्र शुद्धो भागो न शुद्धयति, पंचसु प्रक्षिप्तेसु शुद्धयतीति, पंचकोऽत्र झोषः तथाचाह- पंचरात्रिंदिवानि झोष इति लब्धाः षोडशमासाः स्थापनायां च प्रागुक्तप्रकारेणैको मास आरोपणायास्तु दशदिनात्मिकायाः पंचभिर्भागो ह्रियते, लब्धौ द्वौ तौ रूपहीनौ कृतौ जातं शून्यं, लब्ध एको मासः, जइवादुरूवहीणे कयम्मि होज्ञा जहिं तु आगासं, तत्थवि एगो मासो इति वचनात् तौ द्वावपि मासौ पूर्वराशौ प्रक्षिप्येते, आगतमष्टादश मासाः प्रतिसेविताः । अथ कुतो मासात् किं गृहीत् ? उच्यते षोडशमासेभ्यो दश दशरात्रिंदिवानि, पंच झोषीकृतानि स्थापनामासात् पंचदश आरोपणा-मासाद्दशकप्रत्यय इति उच्यते, षोडश दशभिर्गुणितो जातं षष्टं शतं ।। पंच झोषीकृतास्ततः शोध्यंते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातं पंचपंचाशं शतं, ततः स्थापनादिवसाः पंचदश आरोपणादिवसा दस उभयमीलने पंचविंशतिः प्रक्षिप्यंते जातमशीतं शतं ।

[भा.३९०] पढमा ठवणा पक्खो, तइया आरोवणा भवे पक्खो ।
बारसहिं मासेहिं एसा बिइया भवे कसिणा ।।

वृ- द्वितीये स्थाने प्रथमास्थापना पक्षस्तृतीया चारोपणा भवति पक्षः एषा स्थापना आरोपणा च द्वादशभिर्मासैर्निष्पन्ना, कथमवसीयते इति चेदुच्यते, अशीतात् दिवसशतात् स्थापनादिवसाः पंचदश आरोपणादिवसाश्च पंचदश उभयमीलने त्रिंशत् शोधिता जातं पंचाशं शतं ।। ततोऽधिकृतया पंचदशदिनया आरोपणया भागो ह्रियते, लब्धा दशमासाः प्रागुक्तप्रकारेण चैकोमासः स्थापनाया आरोपणायां मासमिति द्वौ मासौ तत्र प्रक्षिप्तौ, आगतं द्वादशमासैः प्रतिसेवितैर्निष्पन्ना, अथ कुतो मासात् किं गृहीतमुच्यते, एकैकस्मात् पंचदश वासराः तथाहि द्वादश मासाः, पंचदशभिर्गुणिता जातमशीतं शतमिति ।

[भा.३९१] एवं एया गमिया गाहातो हुंति आनुपुव्वीए ।
एएण कमेण भवे, पंचेव सयाउ एगट्ठा ।।

वृ- एवमुक्तप्रकारेण एतत्गमिका अनंतरोक्तप्रकारा गाथा आनुपूर्व्या क्रमेण भवंत्यन्या अपि ज्ञातव्याः, कियत्कियत् संख्याकास्ता एतेन क्रमेण ज्ञातव्या इत्याह एतेन क्रमेण भवंति, पंचशतान्येकषष्ठानि गाथानामिति, इयमत्र भावना पाक्षिकी स्थापनाममुंचता आरोपणायां च पंच पंच प्रक्षिपता तावन्नेतव्यं, यावत्त्रयस्त्रिंशत्तमा पंचषष्ठदिनशतमाना आरोपणा, ततो विंशतिदिनां स्थापनामुंचता पंचाहिकायामारोपणायां पंच पंच प्रक्षिपता तावन्नेतव्यं, यावत् द्वात्रिंशत्तमा षष्टदिनशतमाना आरोपणा, एव स्थापनासु पंच पंच प्रक्षिपता आरोपणासु चैकैकं स्थानमुपरितनभागात् परिहरता तावन्नेतव्यं, यावद्गाथानां पंचशतान्येकषष्टानि भवंति, द्वितीयं स्थापनारोपणायां स्थानं समाप्तं, संप्रति तृतीयं स्थापनारोपणास्थानं प्रतिपादयन्निदमाह -

[भा.३९२] पणतीसं ठवणपया पणतीसा रोवणाइं ठाणाइं ।
ठवणाणं संवेहो छच्चेव सया भवे तीसा ।।

वृ- तृतीये स्थाने पंचत्रिंशत् स्थापनापदानि पंचत्रिंशच्चारोपणायाः स्थानानि पदानि एतदपि पूर्वमेव भावितं, संप्रति संवेधपरिमाणमाह- ठवणाणमित्यादि स्थापनानामारोपणाभिः सह संवेधाः सर्वसंख्यया भवंति, षट्शतानि त्रिंशानि ।। एतानि च गच्छोत्तर संवग्गो इत्यादि करणवशादानेतव्यानि, तत्रगच्छः पंचत्रिंशत् कथमिति चेदुच्यते, ठवणारोवणविजुयाइत्यादि करणवशात् तथाहि अशीतात् शतात् पंच दिनानि प्रथमास्थापनायाः पंच दिनानि प्रथमारोपणाया उभयमीलने दश शोध्यंते, जातं सप्ततं शतं तस्य पंचभिर्भागो ह्रियते, लब्धा चतुस्त्रिंशत् सा रूपयुता क्रियते, आगतः पंचत्रिंशत् गच्छः उत्तरमेक आदिरप्येकः ततः पंचत्रिंशदेकेन गुण्यते, एकेन गुणितं तदेव भवतीति जाता पंचत्रिंशदेव सा उत्तरेणैकेन हीना क्रियते, जाता चतुस्त्रिंशत् तत्रादिमेकं प्रक्षिपेत् भूयोऽभवत्पंचत्रिंशत् एतदंतिमधनमंतिमेऽकस्थाने परिमाणं एतत् आदियुतं क्रियते, जाता षट्त्रिंशत् गच्छार्धेन गुणयितव्या, तत्र गच्छराशिर्विषमत्वात् परिपूर्णं अर्धं न ददातीति षट्त्रिंशदर्द्धीक्रियते जाता अष्टादश शते गच्छेन परिपूर्णेन गुण्यते जातानि षट्शतानि त्रिंशदधिकानि, संप्रत्यस्मिन् तृतीये स्थाने कियद्दिना च प्रथमारोपणा सा च स्थापनारोपणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च कियद्भिः संचयमासैः प्रतिसेवितै-र्निष्पन्नेत्येतदभिधित्सुराह -

[भा.३९३] पढमा ठवणा पंच उ, पढमा आरोवणा भवे पंच ।
छत्तीसा मासेहिं एसा पढमा भवे कसिणा ।।

वृ- तृतीये स्थाने प्रथमा स्थापना पंच पंचदिनप्रमाणा प्रथमा आरोपणा भवति पंच पंचदिना एषा स्थापना आरोपणा च निष्पन्ना षड्त्रिंशता मासैः प्रतिसेवितैः कथमिति चेदुच्यते, अशीतात् शतात् पंच स्थापनादिवसाः पंच आरोपणादिवसाः उभयमीलने दश शोधिता जातं सप्ततं शतं एतस्य पंचदिनाया आरोपणाया भागो ह्रियते, लब्धाः चतुस्त्रिंशत् मासाः एकस्थापनायां पूर्वप्रकारेण मास एक आरोपणायामिति द्वौ मासौ तत्र प्रक्षिप्तौ जाताः षड्त्रिंशत्मासाः अथ कुतो मासात् किं गृहीतमुच्यते, प्रतिसेवितमासेभ्यः षट्त्रिंशदेकः स्थापनामासः शोधिते जाता पंचत्रिंशत् यद्येकद्वि त्र्यादिना आरोपणा पंचदिना दशदिना वा ततस्तयैवारोपणया संचयमासा गुण्यंते, इति वचनादत्र पंचदिना रोपणेति पंचभिर्गुण्यंते जातं पंचसप्ततं शतं ।। स्थापनादिनाश्च पंच तत्रैव प्रक्षिप्ता जातमशीतं शतमागतमेकै- कस्मात् मासात् पंच पंच रात्रिंदिवानि गृहीतानि अत्र भागः शुद्धः पतित इति कृत्स्नैषारोपणा सर्वासां च कृत्स्नारोपणानामाद्येति । प्रथमा तथा चाह एसा पढमा भवे कसिणा-

[भा.३९४] पढमा ठवणा पंचउ, बिइया आरोवणा भवे दसउ ।
एगुणवीसमासेहिं, पंचहिं राइंदिया झोसो ।।

वृ- तृतीये स्थाने प्रथमा स्थापना पंचपंचदिना द्वितीया आरोपणा भवति दशदशदिना एषा प्रथमा स्थापना द्वितीया चारोपणा निष्पन्ना, एकोविंशत्या मासैः प्रतिसेवितैः । तथाहि अशीतात् पंच स्थापनादिवसा दश आरोपणादिवसाः उभयमीलने पंचदश शोध्यंते, जातं पंचषष्टं शतं ।। अस्य दशभिर्भागो ह्रियते, तत्र परिपूर्णो भागो न पततीति पंच रात्रिंदिवानि झोषः प्रक्षिप्यते तथाचाह - पंचराइंदिया झोसो, झोषे च प्रक्षिप्ते लब्धाः सप्तदस मासाः एकः स्थापनाया मास एक आरोपणाया इति द्वौ मासौ तत्र प्रक्षिप्तौ जाता एकोनविंशतिरागतमेकोनविंशत्या प्रतिसेवितैर्मासैर्निष्पन्नेति ।। अथ कुतो मासात् किं गृहीतमुच्यते, प्रतिसेवितमासेभ्य एकोनविंशतेरेकः स्थापनामासः शोधितो, जाता अष्टादश मासाः अत्र दशदिनारोपणेति दशभिर्गुण्यंते जातमशीतं शतं, पंच वासरा झोष इति पंच ततोऽपसारिता जातं पंचसप्ततं शतं, अत्र स्थापनादिवसाः पंच प्रक्षिप्ता जातमशीतं शतं आगतं, स्थापनीकृतात् मासात् पंच रात्रिंदिवानि गृहीतानि, पंच झोषीकृत्यशेषेभ्यो दश दश रात्रिंदिवानीति ।

[भा.३९५] पढमा ठवणा पंचउ तइया आरोवणा भवे पक्खो ।
तेरसहिं मासेहिं पंचउ राइंदिया झोसो ।।

वृ- तृतीये स्थाने प्रथमा स्थापना पंचपंचदिना, तृतीया चारोपणा भवति पक्षः, पक्षप्रमाणा एषा प्रथमा स्थापना, तृतीया चारोपणा त्रयोदशभिः प्रतिसेवितैर्मासैर्निष्पन्ना, तथाहि अशीतात् दिवसशतात् पंच स्थापनादिवसाः पंचदश आरोपणादिवसा, उभयमीलने विंशतिः शोध्यंते, जातं षष्टं शतं ।। तस्याधिकृतया पंचदशदिनया आरोपणया भागो ह्रियते, तत्र शुद्धो भागो न पततीति पंच झोषः प्रक्षिप्यते, तथा चाह, पंचउराइंदिया झोसो झोषे च प्रक्षिते लब्धा एकादश एकः स्थापनाया मासः, एक आरोपणाया इति द्वौ मासौ तत्र प्रक्षिप्ता वागतं त्रयोदशभिर्मासैः प्रतिसेवितैर्निष्पन्ना, अथ कुतो मासात् किं गृहीतमुच्यते, प्रतिसेवितमासेभ्यस्त्रयोदशभ्य एकः स्थापनामासः शोधितः स्थिताः पश्चात् द्वादश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोपणा एकमासनिष्पन्नेत्येकभागीक्रियंते, आद्यश्च भागः पंचदशभिः किल गुणयितव्य इति, पंचदशभिस्ते द्वादशापि गुण्यंते, जातमशीतं शतं, पंच झोप इति ततोऽपनीयंते, जातं पंचसप्ततं शतं, तत्र पंच स्थापनादिवसाः प्रक्षिप्यंते, जातमशीतं शतमागतमत्र स्थापनीकृतान्मासात् पंच दिवसा गृहीताः शेषेभ्यस्तु द्वादशमासेभ्यः पंच झोषीकृत्य पंचदश पंचदशेति ।

[भा.२९६] एवं एया गमिया गाहाओ होंति आनुपुव्वीए ।
एएण कमेण भवे, छच्चेव सयाइं तीसाइं ।।

वृ- एवमुक्तेन प्रकारेण एतद्गमिका अनंतरोदितगमा गाथा आनुपूर्व्या क्रमेणान्या अपि भवंति ज्ञातव्याः कियत्संख्याका इत्याह- एतेनानंतरोदितेन क्रमेण भवंति गाथानां षट्शतानि, किमुक्तं भवति, पंचदिनां स्थापनाममुंचतारोपणायां च यथोत्तरं पंच पंच प्रक्षिपता तावद् गंतव्यं, यावत् पंचत्रिंशत्तमा पंचसप्तत शतदिना आरोपणा पुनर्दशदिनां स्थापनां कृत्वा यथोक्तप्रकारेण तावन्नेयं यावच्चतुस्त्रिंशत्तमा सप्ततदिनशतारोपणा एवं स्थापनासु पंच पंच प्रक्षिपता आरोपणास्वेकैकमुपरितनं स्थानं हापयता तावन्नेयं यावत् गाथानां षट्शतानि त्रिंशदधिकानि भवंति, तृतीयं स्थापनारोपणास्थानं समाप्तं; संप्रति चतुर्थं स्थापनारोपणास्थानं प्रतिपिपादयिषुरिदमाह -

[भा.२९७] अउनासीयं ठवणा न सयं आरोवणावि तह चेव ।
सोलस चेव सहस्सा दसोत्तरसयं च संवेहो ।।

वृ- चतुर्थे स्थाने एकोनाशीतं स्थापनानां स्थापनापदानां शतं भवति, आरोपणाया अपि तथैव ज्ञातव्यं, किमुक्तं भवति, आरोपणानामपि पदानां शतमेकोनाशीतं भवतीति, एतच्च प्रागेव भावितं, संप्रति संवेधपरिमाणमाह, स्थापनानामारोपणाभिः सह संबंधे संयोगाः षोडश सहस्राणि दशोत्तरं शतं भवंतीति एव संख्याकाश्च संवेधा गच्छोत्तरंसंवर्गे इत्यादि करणवशादानेतव्यः ।।गच्छश्चात्र एकोनाशीतं शतं, तथाहि अशीतात् शतात् प्रथमस्थापना दिवस एकः प्रथमारोपणादिवस एक इत्युभयमीलने द्वौ शोधितौ, जातमष्टसप्ततं शतं तस्य चरमादेसभागेक्को इति वचनादेकेन भागो ह्रियते, लब्धमष्टसप्ततमेव शतं तत्र रूपं प्रक्षिप्तं, जातमेकोनाशीतशतं उत्तरमेक आदिरप्येकस्तत्र गच्छ एकोनाशीतशतलक्षण उत्तरेणैकेन गुण्यते, जातं तदेव एकोनाशीतं शतं तदेकेन हीनं क्रियते, जातमष्टसप्ततं शतं, तत्रादिमेकं प्रक्षिपेत्, भूयस्तदेवाभूदेकोनाशीतं शत मेतदंतिमधनं एतत् आदिना एकेन युतं क्रियते, जातमशीतं शतं गच्छराशिरत्र विषम इत्यस्यैवाशीतस्य शतस्यार्धं क्रियते जाता नवतिः, सा गच्छेन परिपूर्णेन एकोनाशीतशतप्रमाणेन गुण्यते, आगतं षोडश सहस्राणि शतं दशोत्तरमिति, अथास्मिन् चतुर्थे स्थाने कतिदिना प्रथमा स्थापना कतिदिना च प्रथमारोपणा कतिमिश्च सा प्रथमा स्थापना आरोपणा च प्रतिसेवितैर्मासैर्निष्पन्नेत्यत आह -

[भा.२९८] पढमा ठवणा एक्को पढमा आरोवणा भवे एक्को ।
आसीया माससया एसा पढमा भवे कसिणा ।।

वृ- चतुर्थे स्थाने प्रथमा स्थापना एको दिवसः एकदिनप्रमाणा इत्यर्थः प्रथमा आरोपणा भवत्येकएकदिना, एषा स्थापना आरोपणा च अशीतादशीत्यधिकात् मास शतात् निष्पन्ना, तथाहि अशीतात् शतादेकः स्थापनादिवस एक आरोपणादिवस इति द्वौ शोधितौ जातमष्टसप्ततं शतं, तस्य एकदिनप्रमाणया भागो ह्रियते, लब्धमष्टसप्तमेव शतं, एकः स्थापनामास एक आरोपणामास इति द्वौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र प्रक्षिप्तौ, लब्धमशीतं मासशतं, अथ कुतो मासात् किं गृहितमुच्यते, एकैकस्मात् मासात् एकैको दिवसः, अत्र भागः शुद्धः पतित इति कृत्स्नारोपणा सा चान्यासां कृत्स्नारोपणानामाद्येति प्रथमा, तथा चाह ।। एसा पढमा भवे कसिणा ।।

[भा.३९९] पढमा ठवणा एक्को बिइया आरोवणा भवे दोन्नि ।
एगा नउअ मासेहिं एगोउ तहिं भवे झोसो ।।

वृ- चतुर्थे स्थाने प्रथमा स्थापना एकः एकवासरा द्वितीया आरोपणा भवति द्विदिने द्विदिनप्रमाणा, एषा स्थापना आरोपणा च निष्पन्ना एकनवतिमासैस्तथाहि अशातीत् शतात् एकस्थापनादिवसो द्वावारोपणादिवसौ उभयमीलने त्रयः शोध्यंते, जातं सप्तसप्ततं शतं, तस्याधिकृतया द्विदिनप्रमाणया आरोपणया भागो ह्रियते, तत्र भागः शुद्धो न पततीत्येको झोपः प्रक्षिप्यते, तथाचाह ।। एगोऽतहिं भवेझोसो, ततो जातमष्टसप्ततं शतं, भागे हृते लब्धा एकोन नवतिरेकः स्थापनामासः एक आरोपणामास इति द्वौ मासौ तत्र प्रक्षिप्तौ, आगता एकनवतिमासाः, अथ कुतो मासात् किं गृहीतमुच्यते, एकेन नवतिसंख्याकेभ्यः संचयमासेभ्यः एकः स्थापनामासः शोध्यते, जाताः पश्चान्नवतिमासाः द्विदिना आरोपणेति द्वाभ्यां गुण्यंते, जातमशीतं शतं एको झोप इति स ततः शोध्यते, ततोऽभवदेकोनाशीतं शतं, तत्र स्थापनादिवस एकस्तत्र प्रक्षिप्तो, जातमशीतं शतमागतमेकस्मात् स्थापनीकृतात् मासात् एको दिवसो गृहीतः शेषेभ्यः एवं झोषीकृत्य द्वौ द्वौ दिवसाविति ।।

[भा.४००] पढमा ठवणा एक्को, तइया आरोवणा भवेतिन्नि ।
एगट्ठी मासेहिं, एगोउ तहिं भवे झोझो ।।

वृ- चतुर्थे स्थाने प्रथमा स्थापना एकः एकदिना तृतीया आरोपणा त्रीणि दिनानि एषा स्थापना आरोपणा च निष्पन्ना एकषष्ठिमासैस्तथाहि अशीतात् दिवसशतात् एकः स्थापनायाः दिवसस्त्रय आरोपणाया उभयमीलने चत्वारः शोध्यंते, जातं षट्सप्तत् शतं ।। तस्य त्रिभिर्भागो ह्रियते, आरोपणायास्त्रिदिननिष्पन्नत्वात् तत्र भागः शुद्धो न पततीत्येको झोपः प्रक्षिप्यते, जातं सप्तसप्ततं शतं भागे हृते लब्धा एकोनषष्ठिर्मासाः, एकः स्थापनाया मास, एक आरोपणाया मास इति द्वौ मासौ तत्र प्रक्षिप्तौ आगतमेकषष्ठिभिर्मासैः प्रतिसेवितैर्निष्पन्ना, अथ कुतो मासात् किं गृहीतमुच्यते - संचयमासेभ्यः एकषष्ठिसंख्याकेभ्यः एकः स्थापनामासः शोध्यते, जाता षष्ठिः, त्रिदिना अधिकृता आरोपणेति ते त्रिभिर्गुण्यते, जातमशीतं शतमेको झोष इत्येकस्ततोऽपनीतो जातमेकोनाशीतं शतमेकः स्थापनादिवसस्तत्र प्रक्षिप्तो जातमशीतं शत मागतमेकस्मात् स्थापनीकृतान्मासात् एकदिनं गृहीतं, शेषेभ्यः षष्ठिमासेभ्यः एकं दिनं झोषीकृत्य त्रीणि त्रीणि दिनानीति ।

[भा.४०१] एवं खलु गमियाणं गाहाणं होंति सोलस सहस्सा ।
सयमेगं च दसहियं, नायव्वं आनुपुव्वीए ।।

वृ- एवमुक्तेन प्रकारेण गमिकानामुक्तरूपगमोक्तानां गाथानामानुपूर्व्या क्रमेण खलु निश्चितं भवंति ज्ञातव्यानि षोडश सहस्राणि शतमेकं च दशाधिकमिति, एतदुक्तं भवति, एकदिनां स्थापनाममुंचता आरोपणायां यथोत्तरमेकैकमारोपयता तावन्नेयं यावदेकोनाशीतदिनशता चरमारोपणा द्विदिनादिष्वपि स्थापनास्वेकादिकारोपणादि तावत् ज्ञेया, यावत् स्वस्वचरमा आरोपणा, एवं षोडश सहस्राणि गाथानां शतमेकं च दशोत्तरं पूरणीयमिति, एतासु च स्थापनारोपणासु मासकरणं कुर्वता एकादिषु चतुर्दिनपर्यंतासु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचभिर्भागमददानासु पंचदिनादिषु नवदिनपर्यंतास्वऽशुध्यति, रूपद्विके दशदिनादिषु चतुर्द्दिनपर्यंतासु रूपद्विकशुद्धौ जायमाने शून्ये मास एको गृहीतव्यः। एवं पंचदशदिनादिष्वप्येकोनविंशतिदिनपर्यंतास्वेकोनविंशतिदिनादिषु चतुर्विंशतिदिनपर्यंतासु द्वौ मासावेवं सर्वत्र यावत् पंचकं न पूर्यते, तावत् पूर्व संख्याकान् मासान् ददता पंचके तु पूर्णे रूपमधिकंप्रक्षिपता भावनीयं, तदेवमुक्तं स्थापनासंचयद्वारमधुना राशिद्वारमाह-

[भा.४०२] असमाहि ठाणा खलु सबला य परीसहा य मोहंमि ।
पलितोवम सागरोवम परमाणु ततो असंखेज्ञा ।।

वृ- एप प्रायश्चित्तराशिः कुत उत्पन्नः ? उच्यते, यानि खल्वसमाधिस्थानानि विंशतिः खलु शब्दः संभावने, स चैतत् संभावयति, असंख्यातानि देखलापुरुषभेदतोऽसमाधिस्थानानि, एवमेकविंशतिः सबलानि, द्वाविंशतिः परीषहाः, तथामोहे मोहनीये कर्म्मणि येऽष्टाविंशतिर्भेदाः, अथवा मोहे मोहविषयाणि त्रिंशत्स्थानानि एतेभ्योऽसंयमस्थानेभ्य एष प्रायश्चित्तराशिरुत्पद्यते, भूयः शिष्यः पृच्छति, कियंति खलु तान्यसंयमस्थानानि ? उच्यते, पलितोवमेत्यादि पल्योपमे सागरोपमं यावंति वालाग्राणि तावंति न भवंति, किंतु व्यावहारिकपरमाणुमात्राणि यानि वालाग्राणां खंडानि तेभ्योऽसंख्येयानि, इयमत्र भावना, यावंति खलु पल्योपमे वालाग्राणि, तावंत्यसंयमस्थानानि भवंति नायमर्थः, यावंति सागरोपमे वालाग्राणि तावंति नायमर्थः समर्थः, यद्येवं तर्हि सागरोपमे यानि वालाग्राणि प्रत्येकमसंख्येयखंडानि क्रियंते, तानि च खंडानि सांव्यवहारिकपरमाणु तावंति भवंति, नायमप्यर्थः समर्थः, कियंति पुनस्तानि भवंति ? उच्यते, तेभ्योप्यसंख्येयगुणानि, अन्ये तु ब्रुवते, परमाणुमात्राणि खंडानि सूक्ष्मपरमाणुमात्राणि खंडानि, सूक्ष्मपरमाणुमात्राणि द्रष्टव्यानि, तदसम्यक् सूक्ष्मपरमाणवो हि तत्रानंताः, असंयमस्थानानि चोत्कर्पतोप्यसंख्येयलोकाकाशप्रदेशप्रमाणानीति; गतं राशिद्वारमधुना मानद्वारमाह-

[भा.४०३] बारस अठय छक्कग मानं भणियं जिनेहिं सोहिकरं ।
तेन परं जे मासा, सा हणंता परिसडंति ।।

वृ- मीयते परिछिद्यते वस्त्वनेनेति मानं, तत् द्विधा द्रव्ये, भावे च, तत्र द्रव्येषु प्रस्थकादिषु. भावतः पुनरिदं मानं प्रायश्चित्तमानं जिनैस्तीर्थकृद्भिस्त्रिविधं शोधिकरं भणितं, तद्यथा प्रथमतीर्थकरस्य द्वादश मासा मध्यमतीर्थकृतामष्टौ मासाः वर्धमानस्वामिनः पट्कंषण्मासाः इतोऽधिकं न दीयते, किंतु वह्वपि प्रतिसेवितेषु मासेष्वेतावनमात्रमेव, अत्र प्रस्थकदृष्टांतो यथा प्रस्थकेन मीयमानं धान्यं तावन्मीयते, यावत्प्रस्थकस्य शिखा परिपूर्णा भवति, ततः परमधिकमारोह्यमानमपि परिपतति, एवं पण्णां मासानामधिकं यद्यपि प्रतिसेवितं, तथापि तत् स्थापनारोपणप्रकारेण संहन्यमानं परिशटति, तथा चाह-तेनपरमित्यादि तत उक्तरूपात् पण्मासादिकात् मानात् परमित्यव्ययं परा ये मासास्ते स्थापनारोपणाप्रकारेणा संहन्यमानाः संघात्यमानाः परिशटंति, तावन्मात्रेणापि च प्रायश्चित्तप्रतिपत्तारः शुध्यंति, शुद्धस्वभावत्वात् भगवतां तीर्थकृतामाज्ञैषा सम्यगनुष्टेया इति, संप्रति प्रभुद्वारमाह-

[भा.४०४] केवलमनपज्ञव नाणिणो य तत्तो य ओहिनाण जिना; ।
चोद्दसदसनवपुव्वी, कप्पधर पकप्पधारीय ।।

वृ- केवलमनपज्ञवनाणिणोत्ति ज्ञानिशद्धः प्रत्येकमभि संबध्यते, केवलज्ञानिनो मनपर्यायज्ञानिनश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तदनंतरमवधिज्ञानेन जिना अवधिज्ञानजिनाः, जिनशब्दो विशुद्धावधिप्रदर्शकः, विशुद्धावधिज्ञाना इत्यर्थः ।। ततश्चतुर्दशपूर्विणो, दशपूर्विणो नवपूर्विणश्च इहासतां नवपूर्विणः, न परिपूर्णनवपूर्वधराः, किंतु नवमस्य पूर्वस्य यत् तृतीयमाचारनामकं वस्तु तावन्मात्रधारिणोपि नवपूर्विणः, तथा कल्पधराः कल्पव्यवहारधारिणः प्रकल्पो निशीथाध्ययनं तद्धारिणः च शब्दोऽनुक्तसमुच्चयार्थः, तदेवानुक्तं च शब्देन सूचितं दर्शयति -

[भा.४०५] घेप्पंति चसद्देणं, निज्जुत्तीसुत्तपेढियधराव ।
आणाधारण जीए होंति पहुणो उ पच्छित्ते ।।

वृ- चशब्देन गृह्यंते नियुक्तिसूत्रपीठिकाधराः, तत्र निर्युक्तिर्या भद्रबाहुस्वामिकृता, सूत्रपीठिका निशीथकल्पव्यवहारप्रथमपीठिका गाथारूपाः तथा आज्ञायां धारणे जीते च ये व्यवहारिण आज्ञाव्यवहारिणो धारणाव्यवहारिणो जीतव्यवहारिणश्च एते प्रायश्चित्तदाने प्रभवः, तदेवं गतं प्रभुद्वारमिदानीं कियंति सिद्धानि प्रायश्चित्तस्थानानीति द्वारावसरः, तत्र शिष्यः पृच्छति कियंति खलु प्रायश्चित्तानि ? आचार्य आह, ।। अर्थत अपरिमितानि, सूत्रतः पुनरिदं परिमाणं ।।

[भा.४०६] आनुग्घाइयमासाणं दो चेव सया हवंति बावन्ना ।
तिन्नि सया बत्तीसा होंति अउग्घाइयाणंपि ।।

[भा.४०७] पंचसया चुलसीया सव्वेसिं मासियाण बोधव्वा ।
तेन परं वोच्छामी चाउमासाण संखेवं ।।

वृ- अनुद्घातिता नाम गुरवः, उद्घातिता लघवः, निशीथनाम्नि अध्ययने प्रथमोद्देशके अनुद्घातिता गुरवो मासा अभिहितास्तेषामेकत्र संक्षिप्ता नाम द्वे शते द्वापंचाशद् द्विपंचाशदधिके भवतः, द्वितीयतृतीयचतुर्थपंचमोद्दशकेषु उद्घातिता मासा उक्तास्तेषामुद्घातितानां मासानामेकत्र संक्षिप्तानां त्रीणि शतानि द्वात्रिंशानि भवंति, एतेषां सर्वेषामप्युद्घातितमासानामनुद्घातितमासानां चैकत्र मीलने मासानां प्रायश्चित्तानां बोधव्यानि पंचशतानि चतुरशीतानि । तेन परमित्यादि अतः परं चातुर्मासिकानां संक्षेपं वक्ष्ये, प्रतिज्ञातमेव निर्वाहयति ।

[भा.४०८] छच्चसया चोयाला चाउमासाण होंति अनुग्घाया ।
सत्तसया चउवीसा चाउमासाण उग्घाया ।।

[भा.४०९] तेरसय अट्ठसट्ठा, चाउमासाण होंति सव्वेसिं ।
तेन परं वोच्छामी सव्वसमासेण संखेवं ।।

वृ- षष्ठसप्ताष्टमनवमदशमैकादशोद्देशकेषु अनुद्घातितानि चातुर्मासिकान्युक्तानि, एतेषामेकत्र संक्षिप्तानां भवंति षट्शतानिचतुश्चत्वारिंशानि ।। गाथायां होंति अनुग्घाया इत्यत्र षष्ठ्यर्थे प्रथमा प्राकृतत्वात् एवमुत्तरार्धेपि द्वादशत्रयोदशचतुर्दशपंचदशषोडशसप्तदशाष्टादशैकोनविंशतिमेष्वष्टसूद्देशकेषु उद्घातिता चतुर्मासिका उक्तास्तेषामेकत्र संक्षिप्तानां सप्तशतानि चतुर्विंशानि ।। उद्घातितानामनुद्घातितानां सर्वेषां चतुर्मासानामेकत्र मीलितानां भवंति त्रयोदशशतानि अष्टषष्ठानि ।। तेन परमित्यादि ततः परं सर्वेषां मासिकानां चातुर्मासिकानां च यः समासो मीलनं तेन संक्षेपं सर्वसंख्या संग्रहं वक्ष्ये, प्रतिज्ञातमेव निवार्हयति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४१०] नवयसया य सहस्सं ड्डाणाणं पडिवत्तिओ होंति ।
बावन्ना ठाणाइं सत्तहिं आरोवणा कसिणा ।।

वृ- स्थानानां मासादिप्रायश्चित्तस्थानानां प्रतिपत्तयः प्रतिपादनानि सहस्रं नवशतानि द्वापंचाशच्च स्थानानि ।। तथाहि भवंति सर्वाणि प्रागुक्तानि मासादिप्रायश्चित्तस्थानान्येकत्र मीलितान्येतावंतीति सप्ततिः पुनरारोपणा कृत्स्नाऽथ कोऽस्य सूत्रस्याभिसंबंध ? उच्यते, नन्वेष एवं संबंधः कियंति प्रायश्चित्तानि सिद्धानि कियत् पश्चाऽरोपणा जघन्या अजघन्योत्कृष्टास्तथा कृत्स्ना अकृत्स्ना च सिद्धास्तत्र प्रथमे स्थापनारोपणास्थाने एक जघन्या त्रिंशत् उत्कृष्टा एकैकस्यां स्थापनायां आरोपणाभिः सह संवेधे एकैकस्या उत्कृष्टाया लभ्यमानत्वात् अजघन्योत्कृष्टानां चत्वारिंशतानि चतुस्त्रिंशदधिकानि ।। द्वितीये स्थापनारोपणास्थाने एक जघन्या त्रयस्त्रिंशत् उत्कृष्टा अजघन्योत्कृष्टानां पंचशतानि सप्तविंशानि ।। तृतीये स्थापनारोपणास्थाने एका जघन्या पंचत्रिंशत् उत्कृष्टऽजघन्योत्कृष्टा पंचशतानि चतुर्णवतानि। चतुर्थे स्थापनारोपणास्थाने एका जघन्या एकोनाशीत शतमुत्कृष्टानां पंचदश सहस्राणि नवशतानि त्रिंशानि ।। अजघन्योत्कृष्टानां तथा प्रथमे स्थापनारोपणास्थाने सप्ततिरारोपणाः कृत्स्नाः कृत्स्नभागहारिण्य इत्यर्थः, झोषविरहिता इति यावत्, ताश्चेमाः -

[भा.४११] सव्वेसिं ठाणाणं, उक्कोसारोवणा भवे कसिणा ।
सेसा चत्ता कसिणा ता खलु नियमा अनुक्कोसा ।।

वृ- प्रथमे स्थापनारोपणास्थाने त्रिंशत् स्थानानि तेषां च सर्वेषामपि स्थानानामंतिमारोपणा उत्कृष्टा भवति, ताश्च सर्वसंख्यया त्रिंशत् एताश्च नियमतो झोषविरहिता इति कृत्स्नाः, शेषाश्चोत्कृष्टारोपणाव्यतिरिक्तानामारोपणानां मध्ये झोषविरहिततया कृत्स्नारोपणाश्चत्वारिंशत् ताश्च खलु नियमान्नियमेन अनुत्कृष्टा जघन्यामध्यमावाइत्यर्थ एता उत्कृष्टानां मीलिता जाताः सप्ततिः, अथ कास्ता अनुत्कृष्टात्वारिंशत् कृत्स्ना इत्यत आह -

[भा.४१२] वीसाए ऊवीसा चत्त असीयाय तिन्नि कसिणाओ ।
तीसाए पक्खपणवीस तीस, पन्नाय पन्नसयरी ।।

[भा.४१३] चत्ताए वीस पणतीस सत्तरी चेव तिन्नि कसिणाओ ।
पणयालाए पक्खो पणयाला चेव दो कसिणा ।।

[भा.४१४] पन्नाए पन्नठी पणपन्नाए य पन्नवीसा य ।
सट्ठि ठवणाए पक्खो वीसा तीसा य चत्ताय ।।

[भा.४१५] सयरीए पणपन्ना, तत्तो पन्नत्तरीए पक्ख पणतीसा ।
असतीए ठवणाए वीसा पणुवीस पन्ना सा ।।

[भा.४१६] नउईए पक्खतीसा पणयाला चेव तिन्नि कसिणाओ ।
सतीयाए वीस चत्ता पंचुत्तरि पक्ख पनवीसाउ ।।

[भा.४१७] दसुत्तरसइयाए पनतीसा वीस उत्तरे पक्खो ।
वीस तीसा य तहा कसिणाओ तिन्नि बीए य ।।

[भा.४१८] तीसुत्तर पणुवीसा पनतीसे पक्खिया भवे कसिणा ।
चत्तला वीसाऊ, पन्नासं पक्खिया कसिणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- विंशिकायां विंशतिदिनायां स्थापनायां विंशतिर्विंशतिदिना एवं एवंचत्वारिंशद्दिना अशीतिदिना च एतास्तिस्रोप्यारोपणाः कृत्स्नाः, । तथा त्रिंशति त्रिंशद्दिनायां स्थापनायामिमाः पंचारोपणाः कृत्स्नाः तद्यथा पक्षः पंचविंशतिस्त्रिंशत् पंचाशत् पंचसप्ततिश्च । तथा चत्वारिंशति स्थापनायामिमास्तिस्र आरोपणाः कृत्स्नास्तद्यथा विंशतिदिना पंचत्रिंशद्दिना सप्ततिदिना च । तथा पंचचत्वारिंशति स्थापनायामिमे द्वे कृत्स्ने आरोपणे तद्यथा पक्षः पक्षप्रमाणा पंचचत्वारिंशच्च पंचचत्वारिंशद्दिना च । पंचाशद्दिनायां स्थापनायां च एका पंचषष्ठिदिना कृत्स्ना आरोपणा । पंचपंचाशद्दिनायामप्येका पंचविंशतिः ।। षष्ठिदिनायां स्थापनायामारोपणाः कृत्स्नाश्चतस्रस्तद्यथा पक्षो विंशतिस्त्रिंशत् चत्वारिंशत्। सप्ततिदिनायां स्थापनायामेका पंचपंचाशद्दिना कृत्स्नारोपणा ।। पंचसप्ततिदिनायां स्थापनायां द्वे कृत्स्ने आरोपणे पाक्षिकी पंचविंशद्दिना च ।। अशीतिदिनायांस्थापनायां च एका पंचषष्ठिदिना कृत्स्ना आरोपणा पंचपंचाशद्दिनायामप्येका पंचविंशतिः । षष्ठिदिनायां स्थापनायामारोपणाः कृत्स्नाश्चतस्रस्तद्यथा पक्षो विंशतिस्त्रिंशत् चत्वारिंशत् । सप्ततिदिनायां स्थापनायामेका पंचपंचाशद्दिना कृत्स्नारोपणा ।।

पंचसप्ततिदिनायां स्थापनायां द्वे कृत्स्ने आरोपणे पाक्षिकी पंचविंशद्दिना च ।। अशीतिदिनायां स्थापनायां तिस्रः कृत्स्ना आरोपणास्तद्यथा विंशतिः पंचविंशतिः पंचाशद्दिना च । नवतिदिनायां स्थापनायामिमास्तिस्रः । कृत्स्ना आरोपणाः पक्षस्त्रिंशत् पंचचत्वारिंशच्च । शतिकायां स्थापनायां द्वे कृत्स्ने आरोपणे विंशतिदिना चत्वारिंशद्दिना च । पंचोत्तरशतिकायां पुनः स्थापनायामिमे द्वे कृत्स्ने आरोपणे पाक्षिकी पंचविंशतिदिना च । दशोत्तरशतिकायां स्थापायामेका पंचत्रिंशत् कृत्स्नारोपणा । विंशत्युत्तरशतिकायां स्थापनायामेतास्तिस्रः कृत्स्ना आरोपणास्तद्यथा पाक्षिकी विंशतिदिना त्रिंशद्दिना च । त्रिंशदुत्तरशतिकायां स्थापनायामेका पंचविंशतिदिना कृत्स्ना आरोपणा । पंचत्रिंशदुत्तरशतिकायां स्थापनायामेका पाक्षिक्यारोपणा कृत्स्ना । चत्वारिंशदुत्तरशतिकायां स्थापनायां पुनरप्येका कृत्स्नारोपणा विंशतिदिना । पंचाशदुत्तरशतिकायां स्थापनायामेका पाक्षिक्यारोपणा कृत्स्ना एवमेताश्चत्वारिंशत् त्रिंशदुत्कृष्टाः सर्वा मिलिताः सप्ततिः कृत्स्ना आरोपणा शेषाः पंचनवतिः त्रिंशतसंख्या अकृत्स्ना आरोपणाः, एवं शेषेष्वपि त्रिषु स्थापनारोपणास्थानेषु कृत्स्नारोपणानां परिणाणमुपयुज्य परिभावनीयमिति, अतः परमेतासां सर्वासामपि स्थापनारोपणानां स्वरूपं येन लक्ष्यते, तद्विभणिषुरिदमाह-

[भा.४१९] सव्वासिं ठवणाणं एत्तो सामन्नलक्खणं वोच्छं ।
मासग्गे झोसग्गे हीनाहीने य गहणेय ।।

वृ- चतुर्ष्वपि स्थापनारोपणास्थानेषु याः स्थापना आरोपणाश्चान्योऽन्यानुवेधतो भवंति, । तासां सर्वासामपि स्थापनानामारोपणानां च इति उर्ध्व सामान्येन सकलव्यापितया लक्षणं लक्ष्यते, येन तासां तल्लक्षणमुक्तानुक्तस्वरूपं वक्ष्ये, केत्याह मासाग्रे प्रतिसेवितसंचयमासानां परिमाणे तथा प्रतिसेवितमासानयननिमित्तमेवारोपणादिवसैर्भागे ह्रियमाणे कियति प्रक्षिप्ते शुद्धं भागं दास्यतीत्येवं झोषाग्रे झोषपरिमाणे लक्षणंवक्तव्यं, तथा हीनाहीने च ग्रहणे च हीनग्रहणं नाम विषमग्रहणं अहीनग्रहणं समग्रग्रहणमेतच्च यथासंचयमासेभ्यो भवति, तथा लक्षणं वक्तव्यं, तत्र मासपरिमाणविषयं लक्षणमभिधित्सुरिदं पूर्वोक्तमेव तावदाहः-

[भा.४२०] जइमि भवे आरोवणा तति भागं करे तिपंचगुणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसं पंचहिं गुणए ठवणादिणजुया उ छम्मासा ।।

वृ- इयमर्थत प्रागेव व्याख्याता परमन्यथा कियान् शब्दसंदर्भ इति भूयोपि व्याख्यायते, संचयमासेभ्यः स्थापनामासेपु शुद्धेषु यच्छेपमवतिष्ठते, तत् जइमित्ति यतिमासा भवत्यारोपणा, किमुक्तं भवति, यतिभिर्मासैनिष्पन्ना आरोपणा यतिभागं तावत्संख्याकं भागं करोति कृत्वा चाद्यं तिपंचगुणमिति त्रिपंचगुणं पंचदशगुणं करोति, शेषं समस्तमनेकभागात्मकमपि संपिंड्य पंचभिर्गुणयेत्, ततः स्थापनादिनयुताः षण्मासा भवंति, एतत्कर्म पंचदशादिष्वारोपणासु कर्त्तव्यं, एकादिषु चतुर्द्दशदिनपर्यंतासु पुनरारोपणासु यावंत्यारोपणादिनानि तावद्भिर्गुणयितव्यं, एवं संचयमासानां मध्ये यावतो मासात् यत् गृहीतं तद्दिनपरिमाणाभिधानतो मासपरिमाणविषयलक्षणमभिहितं संप्रत्येतदेव प्रकारांतरेणाभिधित्सुराह-

[भा.४२१] जतिमि भवे आरुवणा ततिभागं तस्स पनरसहिं गुणए ।
ठवणारोवणसहिया छम्मासा होंति नायव्वा ।।

वृ- ये संचयमासास्ते पूर्वं स्थापनारोपणामासविशुद्धाः कर्त्तव्याः तोत जइमीति यतितमा प्रथमा द्वितीया तृतीया इत्यादि आरोपणा ततिभागस्थास्ते कर्त्तव्याः तत्र यद्येकभागस्थास्ततः सर्वानपि पंचदशभिर्गुणयति, गुणने च कृते स्थापनारोपणादिवससहिता झोषविशुद्धास्ते पण्मासा भवंति, अथानेककभागस्थास्तर्हि अनेकस्य भागस्य आद्यं भागं पंचदशभिर्गुणयेत्, शेषान् समस्तानपि पंचगुणानिति वाक्यशेषस्तेन स्थापनारोपणदिवससहिताः षण्मासा ज्ञातव्या भवंति, तद्यथा विंशतिदिनायां स्थापनायां पंचदशदिनायां चारोपणायां त्रयोदश संचयमासास्तेभ्य एक आरोपणामासो द्वौ स्थापनामासावुभयमीलने त्रयो मासाः शोधिता जाता दश मासा इयमारोपणा प्रथमे स्थाने प्रथमेति ते दश मासा एकभागस्थाः क्रियंते, कृत्वा पंचदशभिर्गुण्यंते, जातं पंचाशं शतं ।। अत्र झोपः पंचक इति पंच ततो विशोधिता जातं पंचचत्वारिंशं शतं ।। तत्र स्थापनादिवसा विंशतिः आरोपणादिवसाः पंचदशेति मीलिताः पंचत्रिंशत् ते प्रक्षिप्यंते, जातमशीतं शतमिति, तथा विंशतिदिनायां स्थापनायां पंचविंशतिदिनायां आरोपणायां पंचविंशतिदिनायां आरोपणायां त्रयोविंशतिः संचयमासाः तेभ्यो द्वौ स्थापनामासौ त्रय आरोपणामासा उभयमीलने पंचमासाः शोधिता जाता अष्टादश इयमारोपणा प्रथमे स्थाने तृतीयेति त्रिभागस्थाः क्रियंते, जाता एकैकस्मिन् भागे षट् षट् तत्राद्यो भागः पंचदशभिर्गुण्यते, जाता नवतिः, अत्र पक्षो झोष इति तेभ्यः पंचदश शोधिता जाता पंचसप्ततिः ।। शेषौ द्वावपि भागावेकत्र मीलितौ जाता द्वादश, ते पंचभिर्गुण्यंते जाता षष्ठिः ते पूर्वराशौ प्रक्षिप्यंते, जातं पंचत्रिंशंशतं । तत्र स्थापनादिवसाः विंशतिरारोपणादिवसाः पंचविंशतिः उभयमीलने पंचचत्वारिंशत् प्रक्षिप्ता जातमशीतं शतमेवमन्यत्रापि भावनीयं, नवरमेतत्कर्म्म कचिदेव प्रतिनियतेपु पदेपु कर्त्तव्यं, नावश्यं सर्वत्रेति संप्रति गुणकारवशेन यथा कृत्स्नारोपणापरिज्ञानं भवति तथा प्रतिपादयति -

[भा.४२२] जेन उ पण गुणिएहोऊणं सो न होइ गुणकारो ।
तस्सुवरि जेन गुणे होइ समं सहु गुणकारो ।।

वृ- जेणउ पएण गुणिया पदमेकद्वित्र्यादिकं येन पदेन दशादिलक्षणेन गुणिते आरोपणादिवसं षण्मासपरिमाणमशीतं दिवसशतमूनमुपलक्षणमेतत् अधिकं वा भवति, समकरणं प्रतीत्य गुणकारो न भवति, यथा पाक्षिक्या आरोपणाया दशादिकस्तथाहि विंशिकायां स्थापनायां पाक्षिकी आरोपणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दशभिर्गुणिता, जाताः पंचाशंशतं ।। तत्र स्थापनादिवसा विंशतिः प्रक्षिप्ता जातं सप्ततं शतं ।। तदेवं दशभिर्गुणने ऊनाः षण्मासा एकादशभिर्गुणने अधिका इति पाक्षिक्यामारोपणायां समकरणं प्रतीत्य न दशादिको गुणकार इतीयमकृत्स्नारोपणेति प्रतिपत्तव्यं, तस्सुवरिमेत्यादि तस्याधिकृतस्य विंशिकादिरूपस्य पदस्योपरि त्रिंशत्प्रभृतिके स्थापनापदे येन गुणकारेण दशादिलक्षणेन गुणने षण्मासदिवसपरिमाणं समं भवति, स तत्र गुणकारस्तेन गुणकारेण सा आरोपणा तस्मिन् स्थापनापदे कृत्स्नेत्यवगंतव्या यथा पाक्षिक्येवारोपणा त्रिंशत्स्थापनायां तथाहि पंचदशदिनारोपणा दशभिर्गुणिता जातं पंचाशं शतं, त्रिंशत् स्थापनादिवसाः प्रक्षिप्ता जातमशीतं शतं ।। एवं पंचचत्वारिंशद्दिने स्थापनापदे नवभिः, षष्ठिदिनेऽष्टभिः, पंचसप्ततिदिने सप्तभिर्नवतिदिने षड्भिः, पंचोत्तरशतदिने पंचभिः, विंशत्युत्तरशतदिने चतुर्भिः पंचत्रिंशदुत्तरशतदिने त्रिभिः पंचाशशतदिने द्वाभ्यां षष्ठिशतदिने एकेन गुणने, समं षण्मासदिवसपरिमाणं भवति, पंचचत्वारिंशदादिषु स्थापनापदेषु पाक्षिक्यारोपणा कृत्स्ना प्रतिपत्तव्या, तथा विंशिकायां आरोपणायां विंशतिदिने स्थापनापदेऽष्टभिः चत्वारिंशद्दिने सप्तभिः षष्ठिदिने षड्भिरशीतिदिने पंचभिः, शतदिने चतुर्भिः, विंशतिशतदिने त्रिभिः, चत्वारिंशशतदिने द्वाभ्यां, षष्ठिदिनशतदिने एकेन समं षण्मासदिवसपरिमाणं भवतीति, विंशिकाप्यारोपणा विंशिकादिषु स्थापनापदेषु कृत्स्नेत्यवसेया । एवं शेषा आरोपणा गुणकारैर्विचारयितव्या इति, एतदेव सुव्यक्ततरमाह

[भा.४२३] जइहिं गुणा आरोवण ठवणाजुत्ता हवंति छम्मासा ।
तावइयारुवणाओ हवंति सरिसा भिलावाओ ।।

वृ- यतिभिर्यावद्भिर्गुणकारैर्गुण्यते स्म, गुणा गुणिता आरोपणा तदनंतरं स्थापनायुक्ता स्थापनादिवसयुक्ताः षण्मासा भवंति, तावत्यो गुणकारसंख्यास्तुल्यास्ता आरोपणाः कृत्स्ना इति गम्यते प्रतिपत्तव्याः कथंभूतास्तास्तावत्यः कृत्स्नारोपणा इत्याह, सदृशाऽभिलापा एकाभिलापा इति भावः, यथा पाक्षिकी आरोपणा त्रिंशद्दिनादिषु स्थापनादिषु दशादिभिर्गुणकारैर्गुणितास्तदनंतरं च स्थापनादिवसयुताः षण्मासान् पूरयतीति दश कृत्स्ना आरोपणाः सदृशाभिलापा एवमन्या अपि तैस्तैर्गुणकारैस्तावत् संख्याकैस्तेषु तेषु स्थापनापदेषु गुणितास्तदनंतरं तत्र स्थापनादिवसयुक्ताः षण्मासपूरिकास्तावत्संख्याकाः कृत्स्ना आरोपणाः सदृशाभिलापा भावनीया संप्रति आलोचकमुखात् प्रतिसेवितमासाग्रं श्रुत्वा तन्मासाग्रस्थापनायामारोपणायां च स्थापयित्वारोप्य च परस्मै विविक्तमुपदर्शयेदित्युपदेशमाह ।

[भा.४२४] ठवणारोवणमासे, नाऊणं तो भणाहि मासग्गं ।
जेन समं तं कसिणं, जेनऽहियं तं च झोसग्गं ।।

वृ- आलोचकमुखात् प्रतिसेवितमासपरिमाणमाकर्ण्य तदनंतरमेतावंतो मासाः स्थापनायामेतावंत आरोपणायामिति ज्ञात्वा ततः संचयमासाग्रं विविक्तमालोचकाय भण, प्रतिपादय, यथाऽष्टापंचाशत् प्रतिसेवितमासा आलोचकमुखादुपलब्धाः, तत आचार्येण स्थापनारोपणादक्षेण विंशिकास्थापना पंचाशशतिका चारोपणा स्थापिता तत्र स्थापनारोपणादिवसानामेकत्र मीलने जातं सप्ततं शतं ।। ततः षण्मासदिवसेभ्योऽशीतिशतसंख्येभ्यः शोधितं, स्थिताः पश्चात् दश, तेषामधिकृतया पंचाशशतिकया आरोपणया भागो ह्रियते तत्र भागो न लभ्यते इति चत्वारिंशं शतं प्रक्षिप्तं, ततो भागे हृते लब्ध एकोमास इयमारोपणा अष्टाविंशतिमासनिष्पन्ना अष्टाविंशतितमा चेति एकोऽष्टाविंशत्या गुणितो जाता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टाविंशतिः । तत एवमालोचकाय कथयति, यथा द्वौ स्थापनामासौऽष्टाविंशतिरारोपणामासा एते मिलितास्त्रिंशत् अष्टाविंशतिरन्ये मासा आरोपणाया भागे हृते लब्धा एवं सर्वत्र संचयमासाग्रलोचकाय विविक्तं भणनीयमिति, येन पुनरारोपणाभागहारेण भागे ह्रियमाणे झोषविरहेण समं शुध्यति, तत्कृत्स्नमारोपणं द्रष्टव्यं, येन यावत्प्रमाणेन तु दिवसमीलनचिंतायां षण्मासपरिमाणमधिकं भवति, तच्च तावत्प्रमाणं पुनर्झोषाग्रं झोषपरिमाणमवसातव्यं, यथा विंशिकायां स्थापनायां पाक्षिक्यामारोपणायां पंचेति एतेन झोषपरिमाणलक्षणमुक्तं द्रष्टव्यं -

[भा.४२५] जत्थउ दु रूवहीणा, न होंति तत्थओ हवंति सा भावी ।
एक्काई जा चोद्दस, एक्का तो सेस दुगहीना ।।

वृ- इह सर्वासां स्थापनानामारोपणानां च दिवसेभ्यो मासानामुत्पादनाय पंचभिर्भागो हर्त्तव्यः, तत्र भागे हृते यल्लब्धं तन्नियमात् द्विरूपहीनं कर्त्तव्यं, यत्र पुनरारोपणाशुद्धहीना लब्धामासा न भवंति, एकादिषु चतुर्दिनपर्युंतासु पंचभिर्भागहारस्य एवासंभवात् पंचदिनादिषु नवदिनपर्यंतासु पंचभिर्भागे हृते लब्धस्य द्वयोरूपयोरभावात् दशदिनादिशु चतुर्दशदिनपर्यंतासु शुद्धिरूपापसरणे शून्यस्य भावात् ता एकादय एकदिनादयो यावच्चतुर्दशदिनपर्यंताः स्थापनारोपणाश्च स्वाभाविका एकस्मात् मासात् द्रष्टव्याः किमुक्तं भवति, स्वभावेनैव न तु मासोत्पादननिमित्तकरणप्रयोगत एकस्मान्मासान्निर्वृताः प्रतिपत्तव्या इति ।। सेसदुगहीनत्ति शेषाः पुनः पंचदशदिनादयः स्थापना आरोपणाश्च द्विकहीना ज्ञेयाः पंचभिर्भागे हृते लब्धद्विरूपहीन स्वभावात् उपचारतो द्विकहीना उक्ताः ।।

[भा.४२६] उवरिं सु पंचभइए जइ सेसा तत्थ केइ दिवसा उ ।
ते सव्वे एगातो, मासातो होंति नायव्वा ।।

वृ- पंचदशदिनायाः स्थापनाया आरोपणायाश्च उपरिषोडशदिनादिषु स्थापनारोपणासु पंचभिर्भागे हृते उपरभिगलब्धेभ्यः शेषा ये एकद्विकादयो दृश्यंते ते सर्वे लब्धानां पूरणभूतत्वादेकस्मात् मासाद् भवंति ज्ञातव्याः, किमुक्तं भवति, तेषु शेषीभूतेष्वपि स एवैको मासो गृह्यते, यः पंचदशदिनायां लब्ध इत्येवमेकविंशतिदिनादिष्वपि भावनीयं, संप्रति हीनाहीने ग्रहणे लक्षणं प्रतिपिपादयिषुर्यथा स्थापनारोपणामासेभ्यः शेषसंचयमासेभ्यश्च दिवसग्रहणं क्रियते, तथा प्रतिपादयति ।

[भा.४२७] होइ समे समगहणं तहवि य पडिसेवणाउ नाऊणं ।
हीनं वा अहियं वा सव्वत्थ समं वा गेण्हेज्जा ।।

वृ- स्थापनारोपणादिवसानां दिवसपरिमाणे समे तुल्ये तासु स्थापनारोपणासु मासेभ्यो दिवसग्रहणं समं भवति, यावंतः स्थापनामासेभ्यः प्रत्येकं दिवसा गृहीतास्तावंत आरोपणामासेभ्योपीति भावः, शेषमासेभ्यो दिवसग्रहणं समं विषमं वा यथा सप्तदिनायां स्थापनाया सप्तदिनायां चारोपणायां तथाह्यत्र पूर्वकरणप्रयोगतः षड्विंशतिसंचयमासा लब्धाः, तत्र स्थापनारोपणामासाभ्यां सप्त सप्त दिनानि गृहीतानि, ये चारोपणया भागे हृते लब्धाश्चविंशतिमासास्तेष्वेकस्मात् पंच दिनानि गृहीतानि, द्वयोर्दिनयोर्झोषे पतितत्वात् शेषेभ्यस्तु त्रयोविंशतिमासेभ्यः सप्त सप्त दिनानीति एवमन्यास्वपि स्थापनारोपणासु तुल्ये दविसपरिमाणे स्थापनारोपणामासेभ्यस्तुल्यदिवसग्रहणं, शेषमासेभ्यस्तुल्यं विषमं वा भावनीयं, कासुचित् पुनः स्थापनारोपणासु यद्यपि दिवसपरिमाणं समं भवति, तथापि प्रतिसेवनां ज्ञात्वा कस्यापि मासस्य कीदृशी प्रतिसेवना उत्कटरागाद्यध्यवसाया इति ज्ञात्वा तदनुरोधतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापनारोपणासु दिवसग्रहणं कदाचिद्धीनं कदाचिदतिरिक्तं वा, किमुक्तं भवति, कदाचित् स्थापनायां हीनमारोपणायामधिकं कदाचिदारोपणायां हीनं स्थापनायामधिकं यथा विंशिकायां स्थापनायां विंशिकायामारोपणायामत्र हि द्वाभ्यामपि स्थापनामासाभ्यां प्रत्येकं दश दश दिवसा गृहीता आरोपणाया मासयोस्त्वेकस्मात् पंचदश एकस्मात् पंच अथवा स्थापनाया मासयोरेकस्मात् पंचदश दिवसा गृहीता अपरस्मात् पंच आरोपणामासाभ्यां तु द्वाभ्यां प्रत्येकं दश दशेति प्रतिसेवनाविशेषमंतरेण तु स्थापनामासाभ्यां आरोपणामासाभ्यां च प्रत्येकं दश दश दिवसा गृह्यंते इति, ।।सव्वत्थ समं वा गेण्हेज्जा, कदाचित् पुनः सर्वत्र स्थापनायामारोपणायां तथा आरोपणाया भागे हृते ये लब्धा मासास्तेषु च समं दिवसग्रहणं भवति, यथा प्रथमे स्थाने विंशिकायां स्थापनायां विंशिकायामारोपणायां द्वितीये स्थाने पाक्षिक्यां स्थापनायां पाक्षिक्यामारोपणायां तृतीये स्थाने पंचदिनायां स्थापनायां पंचदिनायामारोपणायां, चतुर्थे स्थाने एकदिनायां स्थापनायां एकदिनायां चारोपणायामेवमन्यास्वपि द्वित्र्यादिदिनासु स्थापनारोपणासु यथायोगं भावनीयं -

[भा.४२८] विसमाआरोवणातो विसमं गहणं तु होइ नायव्वं ।
सरिसेवि सेवियम्मी जहा झोसो खलु विसुद्धो ।।

वृ- इह आरोपणाग्रहणेन स्थापनापि गृहीता द्रष्टव्या, तत्र प्रतिसेवनां कुर्वता यद्यपि सर्वेपि मासाः सदृशापराधप्रतिसेवनेन प्रतिसेवितास्तथापि सदृशे सेवितेपि सदृश्यामपि प्रतिसेवनायां याः स्थापनारोपणाः परस्परं दिवसमाने विषमास्ताभ्यस्तदनुरोधेन आरोपणाया भागे हृते ये लब्धा मासास्तेषु दिवसग्रहणं विषमं भवति ज्ञातव्यं, स्थापनारोपणादिवसानां परस्परविषमत्वतस्तेष्वपि ग्रहणं विषमं भवतीति प्रतिपत्तव्यमिति भावः, एवं विषमासु कृत्स्नारोपणास्वभिहितं, याः पुनरारोपणा विषमा अकृत्स्नाश्च तत्र दिवसग्रहणं कुर्वता यथा झोषो विशुध्यति, तथा खलु निश्चितं-कर्त्तव्यं नान्यथेति ।

[भा.४२९] एवं खलु ठवणातो आरुवणातो विसेसतो होंति ।
ताहिं गुणा तावइया नायव्व तहेव झोषाय ।।

वृ- एवमुक्तप्रकारेण स्थापनात आरोपणा विशेपतो भवंति, तथाहि यदा स्थापनामासशुद्धाः शेषामासा यावंतोऽधिकृतायामारोपणायां मासास्तावत्संख्याका भागाः क्रियंते, कृत्वा च प्रथमो भागः पंचदशगुणः क्रियते, शेषाः पंचगुणा यदिवा सर्वेप्यारोपणादिवसगुणा मासाः क्रियंते, एवमारोपणाया दिवसपरिमाणं लब्धं भवति, तदा एतावद्भिः स्थापनादिवसैः प्रक्षिप्तैः षण्मासाः पूर्यंते इति तदनुसारतः स्थापनादिवसाः स्थाप्यंते, तत आरोपणानुरोधिनी स्थापनेति स्थापनात आरोपणा विशेषवती तथाचाह, ताहिं गुणा तावइया इति ताभिरारोपणामाससंख्याभिरारोपणादिवससंख्याभिर्वा आरोपणया भागे हृते ये लब्धा मासास्ते गुणाः गुणिताः, स्थापनारोपणादिवसयुक्तास्तावंतः संचयमासा आगच्छंति, नतु स्थापनामाससंख्याभिः स्थापनादिवससंख्याभिर्वागुणितास्ततो विशेषवत्यः स्थापनाभ्य आरोपणा इति, नायव्वतहेव झोसा य इति, झोषा अपि तथैव ज्ञातव्यास्तद्यथा आरोपणया भागे ह्रियमाणे यावता भागो न शुध्यति, तावत्प्रमाणा ज्ञातव्या झोषा इति-

[भा.४३०] कसिणा आरुवणाए समगहणं होंति तेसु य मासेसु ।
आरुवणा अकसिणाए वि समं झोसो जहा सुज्झे ।।

वृ- कृत्स्ना आरोपणा नाम या झोषविरहिता, तस्यां कृत्स्नायामारोपणायां आरोपणया भागे हृते ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धा मासास्तेष्वेकभागः, तेष्विति वाक्यशेषः समं दिवसग्रहणं भवति, अथ द्वयादिभागस्थास्ततः प्रत्येकं भागेषु ग्रहणं द्रष्टव्यं तद्यथा आद्यभागगतेषु मासेषु प्रत्येकं पंचदशदिवसग्रहणं, शेषभागगतेषु पुनः सर्वत्र पंचदिवसग्रहणमिति ।। अकृत्स्नायामारोपणायां पुनर्नियमतो विषमं दिवसग्रहणं, तद्यावश्यंभावि विषमं दिवसग्रहणं झोषवशाद् भवति तथाचाह, झोषः यथा शुध्यति, तथा दिवसग्रहणं भवति, ततो विषममिति दिवसग्रहणविषयं च करणमिदं -

[भा.४३१] जइ इच्छसि नाऊणं ठवणारोवण जहाहि मासेहिं ।
गहियं तद्दिवसेहिं तम्मासेहिं हरे भागं ।।

वृ- अस्यायमर्थः यदि दिवसग्रहणंज्ञातुंइच्छसि, ततः स्थापनारोपणाः स्थापनारोपणामासान्मासेभ्यः संचयमासेभ्यो जहाहि परित्यज च, परित्यज्य च कुतो मासात् किं गृहीतमिति जिज्ञासायां तद्दिवसेभ्यः स्थापनारोपणाशुद्धशेषसंचयमासदिवसेभ्यः, किमुक्तं भवति, षण्मासदिवसेभ्यः स्थापनारोपणादिवस-रहितेभ्यः तन्मासैः स्थापनारोपणादिवसरहितशेषषण्मासदिवसमासैः स्थापनारोपणामासशुद्धशेष-संचयमासैर्भागं हरेत्, तत्र यल्लब्धं तान् दिवसान् जानीहि, शेषं पुनर्जानीयात् दिवसभागान् स्थापना रोपणादिवसानां तु स्थापनारोपणामासैरेवभागो हर्त्तव्यः तथापि यल्लब्धं ते दिवसा यच्छेषं ते दिवसभागा इति, यथा प्रथमे स्थाने विंशिकायां स्थापनायां पंचदशदिनायां चारोपणायां पूर्वप्रकारेण त्रयोदशसंचयमासा लब्धास्तेभ्यः स्थापनामासौ द्वावेक आरोपणामास उभयमीलने त्रयः शोध्यंते जाताः पश्चाद्दश ततः स्थापनारोपणादिवसाः पंचत्रिंशत्रहिता ये षण्मासदिवसाः, पंचचत्वारिंशतं ।। ते किल तद्दिवसास्तेभ्यः तन्मासैस्तैः शेषीभूतैर्दशभिर्मासैर्दशकेनेत्यर्थः भागो ह्रियते, हृते च भागे लब्धाश्चतुर्द्दश शेषास्तिष्ठंति पंच, आगतमेकैकस्मात् चतुर्द्दश चतुर्द्दश दिवसा गृहीताः पंचपंचदिवसस्यदश भागाः, यदिवा एकस्मात्मासाद्यतुरः सार्धान् दिवसान् गृहीत्वा शेषेसु मासेष्वर्धमर्धं प्रक्षिपेत्, तत आगतं नवभ्यो मासेभ्यः प्रत्येकंपंचदश दिवसा गृहीता एकस्माद्दश, एतत् प्रागुक्तमनुस्मारितं, स्थापनादिवसानां विंशतेः स्थापनामासाभ्यां भागो ह्रियते, लब्धा एकैकस्मिन् मासे दश दश दिवसा आरोपणामासस्त्वेक एव, तत्र पंचदश दिवसा लब्धा, आगतं स्थापनामासाभ्यां दश दश दिवसा गृहीता आरोपणामासात् पंचदश एवं विषमदिवसग्रहणं सर्वत्रानेतव्यं, यत्र पुनः स्थापनारोपणा च नास्ति, अकृतत्वात् अथ च सेवितमासा ज्ञायंते, तत्राशीतस्य शतस्य सेवितमासैर्भागे हृते यल्लभ्यते, तद्दिवसग्रहणं प्रत्येकमासेभ्योऽवगंतव्यं, उक्तं च -

जहिं नत्थि ठवण आरोवणा य नज्जंति सेविया मासा ।
सेवियमासेहिं भए अस्सीयं लद्धमागहियं ।।

[भा.४३२] एवंतु समासेणं भणियं सामन्नलक्खणं बीयं ।
एएण लक्खणेणं झोसेयव्वाउ सव्वाओ ।।

वृ- एवमुक्तेन प्रकारेण सामान्येनैव तु शब्द एवकारार्थो भिन्नक्रमत्वादेवं संबंध्यते, सामान्यलक्षणे बीजमिव बीजं सकलमाससामान्यलक्षणावगमप्ररोहसमर्थं किंचिद् भणितं, एतेनानंतरोदितेन बीजकल्पेन लक्षणेन सर्वा अपिकृत्स्ना अकृत्स्ना चारोपणा झोषयितव्याः, स्वबुद्धौ शिष्यबुद्धौ च यथावस्थिततया प्रक्षेपणीयाः, तदेवं कियंतः सिद्धा इति द्वारमुक्तम्; अधुना दिट्ठा निसीहमाने इति द्वारं व्याचिख्यासुराह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४३३] कसिणाऽकसिणा एया सिद्धातो भवे पकप्पनामंमि ।
चउरो अतिक्कमादि सिद्धा तत्थेव अज्झयणे ।।

वृ- कृत्स्ना अकृत्स्नाश्चारोपणा एते अनंतरोदितसामान्यलक्षणाः प्रकल्पनाम्नि निशीथे अध्ययने सिद्धाः प्रतीताः एतेन दिट्ठा निसीहनामे इति व्याख्यातमधुना तत्थेव तहा अतीयारा इति व्याख्यानयति, चउरो इत्यादि अतीचारा ये चत्वारोऽतिक्रमादयस्तेपि प्रायश्चित्तभेदास्तत्रैव प्रकल्पनाम्न्यध्ययने सिद्धाः, संप्रति तानेवातिक्रमादीन् दर्शयति ।

[भा.४३४] अतिक्कमे वइक्कमे चेव अतियारे तहा अनायारे ।
गुरुतोय अतीयारो गुरुयतरगो अनायारो ।।

वृ- अतिक्रमणं प्रतिश्रवणतो मर्यादाया उल्लंघनमतिक्रमः विशेषेण पदभेदनतोऽतिक्रमणो व्यतिक्रमः, तथा अतिचरणं ग्रहणतो व्रतस्यातिक्रमणमतीचारः, आचारस्य साध्वाचारस्याभावः परिभोगतो ध्वंसोऽनाचारः, एत चातिक्रमादय आधाकर्माधिकृत्यैवं व्याख्याताः, आधाकर्मणा निमंत्रितः सन् यः प्रतिशृणोति, सोऽतिक्रमे वर्त्तते, तद्ग्रहणनिमित्तं पदभेदं कुर्वन् व्यतिक्रमे गृह्णातो अतीचारे, भुंजानो अनाचारे, एवमन्यदपि परिहारस्थानमधिकृत्यातिक्रमादयो योजनीयाः, एतेषु च प्रायश्चित्तमिदम्, अतिक्रमे मासगुरु व्यतिक्रमे पि मासगुरु काललघु अतिचारे मासगुरु द्वाभ्यां विशेषितं, तद्यथा तपोगुरु कालगुरु च अनाचारे मासगुरु व्यतिक्रमे पि मासगुरु काललघु अतिचारे मासगुरु द्वाभ्यां विशेषितं, तद्यथा तपोगुरु कालगुरु च अनाचारे चतुर्गुरु, यस्मात् गुरुको अतीचारश्च शब्दोऽनुक्तसमुच्चायार्थः, स चैतत् समुच्चिनोति, अतिक्रमात् व्यतिक्रमो गुरुकस्तस्मादपि गुरुकोऽतीचार इति, ततोप्यतीचारात् गुरुतरकोऽनाचारः, तत इत्थं प्रायश्चित्तविशेषः ।

[भा.४३५] तत्थ भवे न उ सुत्ते अतिक्कमादीउ वन्निया केई ।
चोयगसुत्ते सुत्ते अतिक्कमादीउ जोएज्जा ।।

वृ- तत्र एवमुक्ते भवेन् मतिश्चोदकस्य यथा नतु नैव सूत्रे निशीथाध्ययनलक्षणे केचिदतिक्रमादय उपवर्णिताः संति, ततः कथं चत्वारो अतिक्रमादयस्तत्रैवाध्ययने सिद्धा इति, सूरिराह ।। चोदकसर्वोप्येष प्रायश्चित्तगणो अतिक्रमादिषु भवति, ततः साक्षादनुक्ता अपि सूत्रे तानतिक्रमादीन् योजयेत्; अर्थतः सूचितत्वात् कथमर्थतः सूचिता इत्याह -

[भा.४३६] सव्वेवि य पच्छित्ता, जे सुत्ते ते पडुच्चऽनायारं ।
थेराण भवे कप्पे जिनकप्पे चउसु विपएसु ।।

वृ- यानि कानिचित् सूत्रेऽभिहितानि प्रायश्चित्तानि सर्वाण्यपि स्थविराणां कल्पे स्थविरकल्पिकानामनाचारं प्रतीत्य भवंति, यतः स्थविरकल्पिकानां त्रिष्वतिक्रमादिषु पदेषु प्रायश्चित्तं भवति, तथाहि प्रतिश्रुतेपि यदिस्वतः परतो वा प्रतिबाधतः पदभेदं न कुरुते, कृतेपि वा पदभेदं न गृह्णाति, गृहीतेपि यदि न भुक्तं किंतु परिठापयति तदा स मिथ्यादुष्कृतमात्रप्रदानेनापि शुध्यति, इति न सूत्राभिहितप्रायश्चित्तविषयः, भुंजानसत्त्वनाचारेवर्त्तते, इतितस्य सूत्रोक्तंप्रायश्चित्तविषयता, जिनकल्पे जिनकल्पिकानां पुनः चतुर्ष्वप्यतिक्रमादिषु पदेषु प्रायश्चित्तं भवति, किंत्विदं प्रायस्ते न कुर्वंति, तदेवं सर्वमपि सूत्राभिहितं प्रायश्चित्तं, यतोऽनाचारमधिकृत्य प्रवृत्तमनाचारश्चातिक्रमाद्यविनाभावी, ततोऽर्थतः सूचितत्वात्, प्रतिसूत्रमतिक्रमादयो योजनीयाः इति स्थितं, ननु यद्येतत् सर्वं निशीथसिद्धांते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो निशीथमपि कुतः सिद्धमित्यत आह -

[भा.४३७] निसीहं नवमा पुव्वा, पच्चक्खाणस्स तइय वत्थूओ ।
आयारनामधेज्जा, वीस इमा पाहुडछेया ।।

वृ- प्रत्याख्यानस्याभिधायक नवमं पूर्वं प्रत्याख्याननामकं तस्मात्: तत्रापि तृतीयादाचारनामधेयाद्वस्तुनस्तत्रापि विंशतितस्मात् प्राभृतछेदान्निशीथमध्ययनं सिद्धं, इयमत्र भावना उत्पादपूर्वादीनि चतुर्दश पूर्वाणि, तत्र नवमं पूर्वमं प्रत्याख्याननामकं तस्मिन् विंशतिवस्तूनि, वस्तूनि नाम अर्थाधिकारविशेषास्तेपु विंशतौ वस्तुपु तृतीयमाचारनामधेयं वस्तु तत्र विंशतिः प्राभृतभेदाः, परिमाणपरिछिन्नाः, प्राभृतशब्दवाच्याः छेदा अर्थछेदास्तेपु यो विंशतितमः प्राभृतछेदः, तस्मान्निशीथं सिद्धमिति, अत्राह शिष्यः, सर्वसाधूक्तं किंतु -

[भा.४३८] पत्तेयं पत्तेयं पए पए भासिऊण अवराहे ।
तो केन कारणेणं दोसा एगत्तमावन्ना ।।

वृ- एकोनविंशतावुद्देशकेपु पदे पदे सूत्रे सूत्रे वा यदिवा उद्देशके प्रत्येकं प्रत्येकं एकस्य दोपस्य प्रति प्रत्येकं अत्राभिमुख्ये प्रतिशब्दो यथा प्रत्यग्नि शलभाः पतंतीत्यत्र वीप्सायामतः प्रत्येकशब्दस्य वीप्साविवक्षायां द्विवचनं अपराधान् अपराधे सति मासिकादिकं प्रायश्चित्तं दीयते इति उपचारतः प्रायश्चित्तानेयावापराधशब्देनोक्तानि, तान् भणित्वा यथा केपुचिदपराधेपु मासलघु, केषुचित् मासगुरु, केपुचिच्चातुर्मासलघु, केषुचिच्चातुर्मासगुरु, एवं सूत्रतो अर्थतश्च केषुचिल्लघुपंचकं, केषुचिद्गुरुपंचकमेवं, यावत् केषुचिद् भिन्नलघु, केषुचिद् भिन्नमासगुरु, तथा केषुचिदपराधेषु षट्लघु केषुचित् षट्गुरु, केषुचित् छेदंकेषु चित् मूलं, केषचिदनवस्थाप्यं, केपुचित् पारांचित, एवं दोपेषु प्रत्येक प्रत्येकं प्रायश्चित्तानि भापित्वा भूय इदमुक्तं यथा एकः पुरुषो गुरुकं मासिकमापन्नोऽपरो लघुमासिकं, तयोर्द्वयोरपि कदाचित् गुरुकं मासिकं दद्यात्, कदाचिल्लघुमासिकं, तथा एको लघुपंचकमापन्नोऽपरो गुरुपंचकं, तयोर्द्वयोरपि कदाचिल्लघु पंचकं दद्यात् गुरुपंचकं, तथा एकः पंचकमापन्नोऽपरोदशकं, तयोर्द्वयोरपि कदाचित् पंचकं दद्यात्, कदाचित् दशकमेवं, पंचदशक विंशति रात्रि भिन्नमास मास द्विमास त्रिमास चतुर्मास पंचमास षण्मास छेदादिक्रमेण तावद् वाच्यं, यावत् पारांचितं तद्यथा एकः पंचकमापन्नोऽपरः पारांचित् तयोर्द्वयोरपि कदाचित् पंचकं दद्यात्, कदाचित्पारांचित्तमिति, एवं दशकादिकमपि स्वस्थाने गुरुलघु विकल्पतः परस्थाने पंचदशादिभिः सहवक्तव्यं, यावत्पारांचितमेतच्च तदोपपद्यते, यदा दोपाणामेकत्वं भवति, तच्चदुरुपपादमतः पृच्छति, तो केनेत्यादि, यतो दोषेषु प्रत्येकं प्रायश्चित्तान्युक्त्वा पश्चात् दोपाणामेकत्वे प्रायश्चिताञ्ययुक्तानि, ततः कथय केन(प्रकारेण) कारणेन दोषाः परस्परंगुरुगुरुतरादिन या महदं तराला अपि एकत्वमापन्नाः सूरिराह-

[भा.४३९] जिन चोद्दसजातीए आलोयण दुब्बलेय आयरिए ।
एएण कारणेणं दोसा एगत्तमावन्ना ।।

वृ- जिनं प्रतीत्य चोदसत्ति चतुर्दशपूर्वधरमुपलक्षणमेतत् यावद् भिन्नदशपूर्वधरं प्रतीत्य तथा जातिएत्ति एकजातीयं प्रतीत्य तथा आलोचनां प्रतीत्य दुर्बलं प्रतीत्य आचार्यं प्रतीत्य दोपाणामन्यथात्वमपि भवति, तत एतेन जिनाद्याश्रयलक्षणेन कारणेन दोषा एकत्वमापन्नाः, जिनादीन् प्रतीत्य दोपाणामेकत्वमभूदिति भावः तद्यथाद्ययोर्द्वयोर्यथाक्रमं घृतकुटनालिकादृष्टांतावपरयोस्तुद्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योर्यथाक्रममेकानेक द्रव्यमेकानेकनिषद्या च विषय इति दर्शयति ।

[भा.४४०] घयकुडगो उ जिनस्सा चोद्दसपुव्विस्स नालिया होइ ।
दव्वे एगमनेगा निसज्ज एगा अणेगाय ।।

वृ- जिनस्य जिनविपये घृतकुटको दृष्टांतः, चतुर्दशपूर्विणो नालिका भवति दृष्टांतः, एकजातीयस्य एकानकद्रव्यविषयः आलोचनायामेकानेकनिषद्याविषयः, तत्र यथा जिनं प्रतीत्य दोषा एकत्वमापन्नास्तथा विभंगिप्रयुक्तघृतकुटदृष्टांतेन भण्यते -

[भा.४४१] उप्पत्तिं रोगाणं तस्समने ओसहे य विब्भंगी ।
नाउं तिविहामयीणं देंति तहा उसहगहणं तु ।।

वृ- मिथ्यादृष्टिरुत्पन्नाऽवधिर्विभंगी स हि चिकित्सां करोति, न साधुरिति तदुपादानं विभंगिनो विभंगज्ञानि रोगाणामुत्पत्तिं उत्पद्यंते रोगा अस्यामुत्पत्तिर्निदानं तां ज्ञात्वा तथा तदित्यनेन रोगाः संबध्यंते, शम्यंते उपशमं नीयंते रोगा यैस्तानि शमनानि औषधानि तेषां रोगाणां शमनानि तच्छमनानि तानि औपधानि यथावत् ज्ञात्वा त्रिविधा वातादिजन्यरोगयोगतस्त्रिप्रकाराः, आमः यो रोगः स येषां विद्यते, ते आमयिनः त्रिविधाश्च ते आमयिनश्च तेषां त्रिविधामयिनां तथा औपधगणं ददति, प्रयच्छंति, यथानियमतो रोगोपशमो भवित, औषधप्रदाने च चत्वारो भंगास्तद्यथा-

[भा.४४२] एक्केनेक्के छिज्जइ, एक्केनअनेगऽनेगहिं एक्को ।
नेगेहिंपि य नेगे, पडिसेवा एव मासेहिं ।।

वृ- क्वचित् एकेन घृतकुटेन एको वातादिको रोगः छिद्यते, एष प्रथमो भंगः क्वचिदेकेनघृतकुटेन अनेके त्रयोपि वातादयो दोषाः छिद्यंते, एप द्वितीयः तथा कचिदनेकैर्घृतकुटैरेकोऽत्यंतमवगाढो रोगो वातादिकश्छेदमुपयाति एप तृतीयः, कचिदनेकैर्धतकुटैरनेके वातादयो दोषा उपशाम्यंति, एप चतुर्थो भंगः, एवं प्रतिसेवाप्येकानेकमासविपया चतुर्थभंगिकया एकानेकैर्मासैः शुध्यतीति घृतकुटदृष्टांतः उपलक्षणं, तेन सामान्यतोपि औपधदृष्टांतोपि द्रष्टव्यः, तत्रापि चतुर्भंगिका तामेवाह -

[भा.४४३] एक्कोसहेण छिज्जंति केवि कुवियाओ तिन्नि वायादी ।
बहुएहिं छिज्जंती, बहुए एक्केकतो वावि ।।

वृ- एकेनौपधेन तथाविधेन केनचित् वातादयस्त्रयोपिकुपिताश्छिद्यंते, उपशमं नीयंते इति भावः एष हि द्वितीयो भंगः, तथा बहुभिरौषधैर्बहवो वातादयो रोगाश्छिद्यंते, एष चतुर्थो भंगः, तथा एक्कैकतो वावित्ति एकोनौपधेनैको वातादिको रोगो उत्पन्नः अवगाढः छिद्यते, एप तृतीयो भंगः ।।इयमत्र भावना यथा विभंगज्ञानिनः सर्वरोगाणां निदामेकानेकौषधसामर्थ्यं चावबुध्यमाना उपसंपन्नानां रोगिणां घृताद्यौपधगणं प्रयुंजते, तेन च प्रयुज्यमानेन घृतकुटेन औपधेन वा कदाचिदेकेनैको रोगउपशमं नीयते, कदाचिदेकेन अनेके कदाचिदनेकैरेकः कदाचिदनेकैरनेक एवं भगवंतोपि जिनाः केवलिनो मासार्हं रागादिभिरासेवितो मास इत्ययमवश्यं मासेन शुध्यतीति जानानाः तस्मै एकं मासं प्रयच्छंति, एप प्रथमो भंगः, तथा यद्यपि बहवो मासाः प्रतिसेवितास्तथापि मंदुनाभावतः प्रतिसेविता यदिवा प्रश्चात् हा दुष्टुकृतमित्यादिनिंदनैः प्रतनूकृता स्तत एप एकेन मासेन शुध्यतीति जानानां एकं मासं प्रयच्छंति, यदिवा पंचरात्रिं आदिकं एष द्वितीयो भंगः, एकेन मासेन पंचरात्रादिना वा बहूनां मासिकादिपरिहारस्थाना-नामुपशमनात्, तथा येन तीव्रेण रागाद्यध्यवसायेन एको मास एकं पंचरात्रादिकं वा प्रतिसेवितं, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किलैकेन मासेन पंचरात्रादिना वा न शुध्यतीतितस्मै अनेकान् मासान् प्रयच्छंति उपर्युपरि रागद्वेषादिवृद्धिं पश्यंतः, छेदमपि मूलमपि यावत्पारांचितमपि प्रयच्छंति, एष तृतीयो भंगः, अनेकैर्मासैश्छेदादिभिर्वा पारांचिपर्यंतैरेकस्य मासस्य पंचरात्रादिकस्य शोधनात्, तथा बहुषु मासेषु प्रतिसेवितेषु नूनमेष बहुभिर्मासैः शोधिमासादयष्यितीत्यवबुध्यमानाः स्थापनारोपणाव्यतिरेकेण षण्मासान् प्रयच्छंति, परतस्तपः प्रायश्चित्तदानस्यासंभवात् एष चतुर्थो भंगोऽनेकैर्मासैरनेकेषां मासानां शोधनात्, उपनययोजनमाह ।।

[भा.४४४] विब्भंगीव जिना खलु रोगी साहूय रोग अवराहा ।
सोही य ओसहाइं तीए जिनाउ विसोहेंति ।।

वृ- इह विचारप्रक्रमे विभंगिनो विभंगीतुल्याः खलु जिनाः प्रतिपत्तव्याः, रोगिणो रोगितुल्याः साधवः रोगा रोगतुल्या अपराधा मूलगुणोत्तरगुणापराधा औषधानि औषधतुल्या शोधिः प्रायश्चित्तलक्षणा यतस्तया शोध्या कृत्वा जिना अपि शोधयंति, नैवमेव तत औषधस्थानीया शोधिः एवं जिनं प्रतीत्य दोषा एकत्वमापन्नाः संप्रति यथा चतुर्दशपूर्विणमधिकृत्य दोषाणामेकत्वं भवति, तथा प्रतिपादयति -

[भा.४४५] एसेव य दिट्ठंतो, विब्भंगिकएहिं विज्ज सत्थेहिं ।
भिसज्जा करेंति किरियं, सोहेंति तहेव पुव्वधरा ।।

वृ- एष एव घृतकुटलक्षण औषशधलक्षणो वा दृष्टांतश्चतुर्दशपूर्विणोपि योजनीयः, यतो यथा भिषजो भिषग्वरा विभंगिकृतैर्वैद्यशास्त्रैर्विभंगिवत् चतुर्भंगिकविकल्पेनाऽपि तथा रोगापनयनक्रियां कुर्वंति, तथा चतुर्दशपूर्वधरास्त्रयोदशपूर्वधरा यावदभिन्न दशपूर्वधरा जिनोपदिष्टैः शास्त्रैर्जिना इव चतुर्भंगविकल्पतः प्रायश्चित्तप्रदानेन प्राणिनोपराधमलिनान् शोधयंति, ततस्तत्रापि घृतकुटदृष्टांतः केवलौषधदृष्टांतो वा योजनीय इति, आह परः ननु जिनाः केवलज्ञानसामर्थ्यतः प्रत्यक्षे रागादिवृद्ध्यवृद्धी पश्यंति, ततस्ते चतुर्भंगविकल्पतः प्रायश्चित्तं ददतु, तथा शुद्धिदर्शनाच्चतुर्दशपूर्विणस्तु साक्षात् नैवेक्षंते ततः कथं ते तथादधुरिति, नैष दोषः, तेषामपि तथाज्ञानात्, तथाचात्र नाकिकादृष्टांतः ।।

[भा.४४६] नालीए परुवणया, जह तीए गतो उ नज्जए कालो ।
तह पुव्वधरा भावं, जाणंति विसुज्झए जेन ।।

वृ- नालिका नाम घटिका, तस्याः पूर्वं प्ररूपणा कर्त्तव्या, यथा पादलिप्तकृतविवरणे कालज्ञाने सा चैवं-

दाडिमपुप्फागारा लोहमयी नालिगा उ कायव्वा ।
तीसेतलंमि छिद्दं छिद्दपमाणं च मे सुणह ।।
छन्नउयमूलवालेहिं तिवस्स जाया एगयकुमारीए ।
उज्जुकयपिंडिएहिं कायव्वं नालियाछिद्दं ।।
अहवा दुवस्स जाया एगयकुमारीए पुच्छवालेहिं ।
विहिं विहिं गुणेहिं तेहिं उ कायव्वं नालियाछिद्दं ।।
अहवा सुवणमासेहिं, चउहिं चउरंगुला कया सूई ।
नालयतलंमि तीए कायव्वं नालियाछिद्दं ।।

वृ- इत्यादि, तया नालिकया यथोदकसंगलनेन दिवसस्य रात्रेर्वा गतोऽतीतो वाऽवशिष्टो वा कालो ज्ञायते, यथा एतावत् दिवसस्य रात्रेर्वा गतमेवावत्तिष्ठति, तथा पूर्वधरा अपि चतुर्दशपूर्वधरादयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलोचयतां भावमभिप्रायं दुरुपलक्षमप्यागमबलतः सम्यग् जानंति, ज्ञाते च भावे यो येन प्रायश्चित्तेन शुध्यति, तस्मै तत् चतुर्भंगिकविकल्पतो जिना इव प्रयच्छंतीति, न किंचिदनुपपन्नं, तदेवं चतुर्दशपूर्विणमधिकृत्य दोपा एकत्त्वमापन्ना इति भावितम्, अधुना यथा जातिं प्रतीत्य दोषा एकत्वमापद्यंते, तथा प्रतिपादयति-

[भा.४४७] मासचउमासेहिं, बहुहिं वेगं तु दिज्ञए सरिसं ।
असनाई दव्वाई, विसरिसि वत्थूसु जं गरुयं ।।

वृ- जातिर्द्विधा, प्रायश्चितैकजातिर्द्रव्यजातिश्च तत्र प्रायश्चित्तकजातिमधिकृत्येदमुच्यते, मासचतुर्मासिकैर्बहुभिरपि प्रतिसेवितैरेकं मासं चतुर्मासादिकं दीयते, इयमत्र भावना बहुपु लघुमासिकेपु प्रतिसेवितेष्वेकवेलायामालोचितेषु प्रतिसेवनायां मंदानुभावकृतत्वात् प्रतिसेवितमासानामपि साद्दश्यत्वात् आलोचनायामपि सर्वेषामशठभावेनैकवेलायामालोचितत्वात्; एकं लघुमासिकं दातव्यं, एवं बहुषु गुरुमासिकेपु प्रतिसेवितेष्वेकं गुरुकं, वहुपु लघुपु द्वैमासिकेष्वेकं लघु द्वैमासिकं बहुपु गुरुद्वैमासिकेष्वेकं गुरु द्वैमासिकं, एवं त्रैमासिकं चातुर्मासिक पांचमासिकंषाण्मासिकेष्वपि भावनीयं, विसरिसवत्थूसु जं गरुयमिति विसद्दशवस्तुपु यत् गुरुकं तद्दातव्यं, तद्यथा बहुषु लघुगुरुमासिकेपु प्रतिसेवितेष्वेकं गुरुकं, बहुषु लघुगुरुद्वैमासिकेष्वेकं गुरु द्वैमासिकमेव त्रैमासिक चातुर्मासिक पांचमासिक पण्मासिकेष्वपि द्रष्टव्यं, तथा बहुषु मासिकेषु बहुषु च द्वैमासिकेपु प्रतिसेवितेष्वेकं द्वैमासिकमेवं त्रैमासिक चातुर्मासिक पांचमासिक पण्मासिकेष्वपि भावनीयं, बहुषु मासिकेषु द्वैमासिके त्रैमासिकेषु चातुर्मासिकेषु पांचमासिकेपु षाण्मासिकेषु प्रतिसेवितेष्वेकं षाण्मासिकमिति, संप्रति द्रव्यजातिमधिकृत्य दोषाणामेकत्वं भावयति -

असनाई दव्वाई इति, द्रव्याणि अशनादीनि अशनपानखादिमस्वादिमानि तान्येकान्यधिकृत्य दोषाणामेकत्वमुपजायते, तत्रैव द्रव्यमधिकृत्यैवं अनेकानि अशनैक द्रव्यविषयाण्याधाकर्मिकान्यभवन्, तत्रैकमाधाकर्मिकं चतुर्गुरु दीयते यदिवा बहून्याहृतान्यभवन् तत्रैकमाहृतनिष्पन्नं मासिकं दीयते, एवमुदकार्द्रराजपिंडादिष्वपि भावनीयं, अनेकद्रव्याण्यधिकृत्यैवं अशनमाधाकर्म्मिकं पानमाधाकर्म्मिकं प्रतिसेवितं, तेषा सर्वेष्वेकवेलमालोचितेषु एकमाधाकर्म्मिकं चतुर्गुरु दीयते, बहुष्वनेकद्रव्यविषयेषूदकार्देषु एकमुदकार्द्रनिष्पन्नं मासलघु दीयते, एवमनेकद्रव्यविषयेष्वपि स्थापनौद्देशिकादिष्वपि भावनीयं, विसरिसवत्थूसु जं गुरुयमित्येतदत्रापि संबध्यते, तद्यथा एकमशनं राजपिंडो अपरमशनमाहृतमन्यदुदकार्द्रमपरमाधाकर्म्मिकमत्रैकमेव गुरुतरमाधाकर्म्मिकनिष्पन्नं चतुर्गुरु दीयते, एवं पानकादिष्वपि स्वादिममौद्देशिकमत्राप्येकमाधाकर्मिकनिष्पन्नं चतुर्गुरु दीयते अत्र चागारी द्दष्टांतः यथा एगो रहगारो तस्स भज्जाए बहू अवराहा कया, न य भत्तुणा नाया, अन्नया सा घरं उग्घाडदुवारं पमोतुं पमायाओ सयज्झियघरे ठिया, तत्थ य घरं साणो पविट्ठो, तस्समयं च पई आगतो, तेन साणो दिट्ठो पच्छा सा अगारी आगया, अवराहकारिणीति भत्तुणा पिट्टिउमारद्धा सा चिंतेइ, अन्नेवि मे बहू अवराहा अत्थि, ते विमाणाउं एस पिट्टिहिइ, ता इयाणिं चेव सव्वे कहेमि, गावी वच्छेण पीता वासी हारिया कंसभायणमवि हत्थातो पडियं भिन्नं, पडओवि तुम्हाणं नट्ठोत्ति, एवमादि अवराहे, एकसरा कहिएसु तेन सा एकवारं पिट्टिया, एवं लोकोत्तरेपि अनेकेष्वपराधपदेष्वेकप्रायश्चित्तदंडो दीयते, तदेवं दव्वे एगमनेगत्ति, गतमिदानीमालोचनादीनि त्रीणि द्वाराणि वक्तव्यानि, तेषां यथाक्रममिमे द्दष्टांताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४४८] अगारी दिट्ठंतो एगमनेगे य ते य अवगहा ।
भंडी चउक्कभंगो सामी पत्तेय तेनंमि ।।

वृ- आलोचनायामगारी दृष्टांतः, तेषु चापराधेषु विपर्ययेषु अगारी दृष्टांतस्ते अपराधा एकोऽनेके च दुर्बले भंडी दृष्टांतः; तत्र च भंड्या चतुष्कभंगः भंगचतुष्टयमिति भावः आचार्ये स्वामित्वप्रासंस्तेन-दृष्टान्तता; तत्रालोचनाविकल्पा इमे -

[भा.४४९] निसज्जे वियऽणाए एगमणेगा य होइ चउभंगो ।
वीसरिउस्सणपए बिइयतिचरिमे सिया दोवि ।।

वृ- इह स्त्रीत्वे पुंस्त्वं प्राकृतत्वात् निषद्याविकटनायां च भवति, चतुर्भंगी चर्तुणां भंगानां समाहारश्चतुर्भंगी गाथायां स्त्रीत्वेपि पुंस्त्वं प्राकृतत्वात् कथं चतुर्भंगीत्यत आह - एकानेका च एका निषद्या अनेका च तथा एका विकटना अनेका वा इयमत्र भावना, एका निषद्या एका आलोचना इहालोचनां ददानेनगुरोर्निषद्या कर्त्तव्या, यावतश्च वारान् आलोचनां ददाति, तावतो वारान् निषद्यां करोति, तत्र यदा विधिना अशेषानप्यतीचारानविघ्नेनैकवेलायामालोचयति, तदा एकस्यामेव निषद्यायां सर्वातीचारलोचनात् प्रथमो यथोक्तभंगः ।। वीसरिउस्सणपएबिइयतिणि द्वितीयो भंगो बिस्मृतौ, तृतीयो भंग उसणपदेप्रभूतपदेषु किमुक्तं भवति, द्वितीयो भंग एका निषद्या अनेकालोचना एष विस्मृतातिचारस्य, यदिवा मायाविन आलोच्य वंदिते गुरौ पुनः स्मरणतो मायाविनः पश्चात् सम्यगालोचनापरिणामपरिणतस्य गुरौ तथा निविष्ट एव वंदनकं दत्वा आलोचयतो वंदितव्यः तृतीयो अनेका निषद्या एका आलोचना एष प्रभूतेन कालेन प्रतिसेविते बहुकस्य एकदिने नालोचनामपारयतोऽन्यस्मिन्नन्यनस्मिन् दिने निषद्यां कृत्वालोचयतो भावनीयः, यदिवा निषदनं निषद्या गुरौ बहुवेलं कायिकाभूमिगतप्रत्यागतेऽनेका निषद्या एकालोचनेति, चरिमे सिया दोवि चरमभंगे अनेका निषद्या अनेका आलोचना इत्येवंरूपे अशठभावोपेतस्य स्यातां द्वे अपि कारणे विस्मृतत्वं, यदिवा अपराधबाहुल्यं इदमुक्तं भवति, प्रभूतेन कालेन प्रभूतमासेवितमतो बहुविस्मृतमित्यन्यस्मिन् अन्यस्मिन् दिने स्मृत्वा आलोचयतो, यदिवा अपराधबाहुल्यत एकदिनेनालोचयितुमप्रपारयतोऽपरस्मिन्नपरस्मिन्नहन्यालोचयतो यथोक्तस्वरूपचतुर्थोभंगः, तत्र एका निषद्या एकालोचनेति प्रथमे भंगे एकमेव गुरुतरं प्रायश्चित्तं दीयते, शेषाणां सर्वेषामपि प्रायश्चित्तानामाच्छादकं, तथाचोक्तं तं चेगं ओहाडणं दिज्जइ इति, अस्यायमर्थः तदेकं गुरुतरं प्रायश्चित्तं शेषाणां प्रायश्चित्तानामवघाटनमाच्छादकं दीयते, इति अत्र दृष्टांतः क्षारयोगः यथाहि पंकापनयनाय प्रयुक्तः क्षारयोगोऽवशेषमपि मलं शोधयति, तथैकमप्यवघाटनं प्रायश्चित्तानि शोधयतीति उक्तं च ।

जहा पंकावणयणपउत्तो खारजोगो सेसमलंपि सोहेइ ।
तहा ओहाडणं पच्छित्तं, पि सेसपच्छित्ते सोहेइ ।। इति

अथवा स एवागारी दृष्टांतो, यथा सा अगारी एकापराधे हन्यमाना अन्यानप्यपराधान् कथयंत्येकवारं पिट्टिता, यदि पुनर्बहवोऽपराधाः कृता इत्यस्मिन्नन्यस्मिन् दिवसे एकैकमपराधं कथयेत् तर्हि यावतो वारान् कथयेत् तावतो वारान् हन्येत, एवमत्रापि यद्येकैकमपरस्मिन्नहन्यालोचयेत्, ततो यावंतोऽपराधास्तावंति प्रायश्चित्तान्याप्नुयादेकनिषद्यायामेकालोचनायांत्वेकमेव गुरुतरकं प्रायश्चित्तं दीयते, इति द्वितीये भंगे बहुप्रतिसेवितमशठेन सता सर्वं न स्मृतं, तद्यदि पश्चादालोचयति, तथापि यथा प्रथमे भंगे गुरुतरकमेकं शेषं प्रायश्चित्तानामाच्छादकं दत्तं, तथात्रापि अशठभावेन नालोचितवान् ततो यावंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायश्चित्तान्यालोचयति तावंति दीयंते इति, तृतीयेपि भंगे बहुप्रतिसेवितमोतऽशठस्य सत एकनिषद्ययालोचना न समापित्सुपगता, ततो यस्मिन् दिने समाप्तिमुपयाति, तस्मिन् दिने प्रथमभंगक इवैकं गुरुतरकं प्रायश्चित्तं दातव्यं, अथ शठतया अन्यस्मिन् अन्यस्मिन्नहन्यालोचयति, तर्हि यावंत्यपराधपदानि आलोचयति, तावंति प्रायश्चित्तानि दातव्यानि, चरमभंगेपि यद्यशठभावतो विस्मृततया बहुप्रतिसेवनातो वा अनेकेषु दिवसेष्वालोचना समाप्तिं गच्छति, ततस्तत्रापि प्रथमभंगक इवैकं गुरुतरकमवघाटनं प्रायश्चित्तं देयमथ मायावितया ततो यावंत्यपराधपदानि तावंति प्रायश्चित्तानि दातव्यानीति, इह आगारी दृष्टांतः पूर्वमुपक्षिप्तमिदानीं कथयति -

[भा.४५०] गावी पीया वासी, य हारिया भायणं च ते भिन्नं ।
अज्जेव ममं सुहयं कारउ पडओवि ते नट्ठो ।।

[भा.४५१] एगावराहदंडे अन्नेय कहेय गारिहम्मंती ।
एवंनेगपएसुवि दंडो लोगुत्तरो एगो ।।

वृ- अगारी गृहस्था रथकारस्य भार्या, एकापराधदंडे शून्ये गृहं चाप्रविष्टइत्येकस्यापराधस्य दंडे पिट्टनलक्षणे भर्त्राक्रियमाणे हन्यमानाऽचिंतयत् बहवोऽपराधा मया कृतास्ततो मा प्रतिदिवसमेव मां हन्यात्, किं अद्यैव मां सुहतां करोतु, एवं चिंतयित्वा अन्यानप्यपराधान् कथयति, यथा गौर्वत्सेन पीता, किमुक्तं भवति, गां वत्सो धावितवान्, तथा वासी च हारिता क्वापि मुक्ता कस्मै समर्पिता वा न जानामि, तथा भाजनमपि कांस्यभाजनमपि ते तव संबंधी यत्र भवान् भुंक्ते हस्तात् पतितं सत् भग्नं तथा पटोपि ते तवसम्बन्धी नष्टो न दृश्यते केनापि हृत इति भावः एवं लोकोतरेपि एक निषद्यायामे कालोचाना-यामित्यादि, चतुर्भङ्ग्याममायाविनो अनेकेष्वपराधपदेषु दण्ड एको गुरुतरको दीयते, अथवा अत्रैवालोचनविषयेऽयमन्यो दृष्टान्तः

[भा.४५२] नेगासु चोरियासु मारणदंडो न सेसया दंडा ।
एवमनेग पएसुवि एक्को दंडो न उ विरुद्धो ।।

वृ. एगो चोरो तेन च बाहुयाओ चोरियाओ कयाओ तं जहा, कस्सइ भाणं हरियं, कस्सइ पडओ, कस्सइ हिरणं कस्सइ रुप्पं, अनया तेन राउले खत्तं खणियं रयणा हिया दिट्ठो, आरक्खगेहिं गहितो रन्नो उवढवितो, तस्समयं च अने बहवो उवठिया भणंति, अम्हवि एएण हडं, ततो रन्ना रयणह रित्ति काउं तस्स मारणदंडो एक्को आणत्तो, सेस चोरिया दंडा तत्थेव पविट्ठा तथा चाह, अनेकासु चोरिकासु रत्नचोरिकानिमित्तं तस्यैको मारणदंडः प्रयुक्तो, न शेष चोरिका दंडा स्तेषां तत्रैव प्रविष्टत्वात्, एवं लोकोत्तरेप्यनेकपदेषु गुरु कैकपदनिमित्त एको दंडोऽविरुद्धः शेषदंडाना तत्रैव प्रवेशत्, तदेवमालोचनां प्रत्येकत्वं दोषाणामुपपादितं, साम्प्रतं दुर्बलं प्रतीत भाव्यते, तत्र भंडी दृष्टांत स्तत्रापि भङ्ग चतुष्टयं, तद्यथा भंडी बलिका बलीवर्द्धा बलिका ? भंडी बलिका बलिवर्द्धा दुर्बलाः, २ भंडी दुर्बला बलीवर्द्धा दुर्बलिकाः ३ दुर्बलाबलीवर्द्धाश्च दुर्बलिकाः ४ तत्र प्रथमभंगे बाह्यं परिपूर्णमारोप्यते, द्वितीयभंगे यावत् बलीवर्द्धा आक्रष्टुं शक्नुवंति तावदारोप्यते तृतीयभंगे यावता आरोपितेन भंडा न भज्यते तावदारोहयते चरमभंगे यावन्मात्रेण न भंडी भंगमुपयाति, यावद्यबलीवर्द्धा आक्रष्टुमलं तावदारुह्यते एष दृष्टांतोऽयमुपनयः -

[भा.४५३] संघयणं जह सगडं धित्तीउ धोज्ञेहि होंति उवनीया ।
बिय तिय चरिमे भंगे, तं दिज्जइ जं तरइ वोढुं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ - यथा शकटं तथा संहननं शकटस्थानीयं संहननमित्यर्थः, धृतयो धुर्येर्धौरेयैर्भवंत्युपनीता उपनयं नीताः धौरेयतुल्या धृतय इति भावः अत्रापि भंगचतुष्टयं, तत्र प्रथमे भंगे यावदापन्नं तत्सर्वं दीयते, द्वितीये धृत्यनुरूपं, तृतीये संहननानुरूपं, चतुर्थे धृतिसंहननानुरूपं तथा चाह, बियतियेत्यादि, द्वितीयतृतीये चरमे भंगे तत् प्रायश्चित्तं धृत्याद्यऽनुरूपं दीयते, यत् शक्नोति वोढुमिति, सांप्रतमाचार्यमधिकृत्य दोषाणामेकत्वं यथोपपद्यते तथा भाव्यते, तत्र स्वामित्वप्राप्तस्तेन दृष्टांतस्तमेवाह ।।-

[भा.४५४] निवमरणमूलदेवो आसेहि वासे य पट्टि नउ दंडो ।
संकप्पियगुरुदंडो मुच्चइ जं वा तरइ वोढुं ।।

वृ - एगत्थ नगरे राया अपुत्तो मतो, तत्थवि रज्जचिंतगेहिं तत्थ देवयाराहणनिमित्तं आसो य हि वासीओ, हत्थीय, इतो य मूलदेवो चोरियं करेंतो आरखगेहिं गहितो, तेहिं रज्जचिंतगेहिं बज्झो आनंतो नगरं हिंडाविज्जइ, इतो य सो आसो हत्थी य मुक्को तेहिं अट्ठारसपयइपरिवारेहिं दिट्ठो मूलदेवो आसेन हिसियं, पट्टी अज्झिड्डीया, हत्थिणा गुलुगुलाइयं गंधोदकं करे घेत्तुं अहिसित्तो खंधे य अट्ठितो, सामुद्रिकलक्षणपाठकैरादिष्ट एष राजा इति, तस्य चोरिकापराधाः सर्वेमुक्ताः, राज्ये स्थापितस्तथाचाह नृपमरणमभूत् ततोऽश्वोऽधिवासितोऽश्वाधिवासः कृतः, तेनाश्वेन मूलदेवस्य पृष्टं दत्तं, ततो मूलदेवो राजा बभूव, न पुनस्तस्य चौरिकादंडः कृतः एप दृष्टांतोऽयमुपनयः एकस्य साधोर्बहुश्रुतस्य अपराधे प्रायश्चित्तं दंडो गुरुकः संकल्पित आचार्यश्च कालगताः स चाचार्यपदयोग्य इत्याचार्यः स्थापितः गच्छे च सूत्रार्थः तदुभयादिभिः संग्रहः कर्त्तव्यः, तत् यत् शक्नोति वोढुं तद्दीयते, अथ न शक्नोति, तर्हि न किंचिद्दीयते, तथा चाह संकप्पेत्यादि संकल्पितगुरुदंड आचार्यपदे स्थापितः सन् एवमेव उच्यते, यद्वा शक्नोति वोढुं तद्दीयते इति, एवमाचार्यमधिकृत्य दोषा एकत्वमापन्नाः अत्राह चोदकः साधूक्तमिदं दोषैकत्वकारणं, किमनया एतावत्प्रमाणया स्थापनारोपणाभ्यामाकृष्टिविकृष्टया इतः पंच दिवसा गृहीता, इतो दशेत्यादिरूपया गुरुणा ह्यागममनुसृत्य यत्प्रायश्चित्तमाभवति, तत्स्थापनारोपणाभ्यामंतरेणैव दीयतामिदं ते प्रायश्चित्तमिति, अत्र सूरिराह-

[भा.४५५] चोयगपुरिसा दुविहा, गीयागीयपरिणामि इयरे य ।
दोण्हवि पच्चयकरणं सव्वे सफला कया मासा ।।

वृ - चोदकपुरुषा द्विविधास्तद्यथा, गीयागीयत्ति गीतार्था अगीतार्थाश्च, अगीतार्था द्विविधाः परिणामिनः, इतरे च, इतरे नाम अपरिणामा अतिपरिणामाश्च तत्र गीतार्थानामपि च परिणामिकानां परिहारस्थानमापन्नानां यत् दातव्यं, तत् स्थापनारोपणाभ्यामाकृष्टिविकृष्ट्या विना दीयते, अत्र दृष्टांतो वणिक् ।। एगो वाणियओ तस्स वीसं भंडीतो एकजातीयभंडभरियाओ सव्वा तो समभरतो तस्स गच्छतो सुंकठाणेसु कियतो उवठितो भणइ, सुंकं देहि, वणिओ भणइ, किं दायव्वं, सुंकिओ भणइ, वीसतिमो भागो, तहेव वणिएण सुंकिएण य परिच्छिन्ना मा ओयारणपव्वारोहेसु विक्खेवो हवउत्ति एका भंडी सुंके दिन्ना, एवं सव्वेसिं गीयत्थाणमगीयत्थाण पारिणामगाणं विणा आकढिविगढिए पायच्छित्तं दिज्जइ, जे उन अगीयत्था अपरिणामगा अतिपरिणामगा य ते जइ छण्हं मासाणं परेणं आवणा, तेसिं दोण्हं पच्चयकरणट्ठा सव्वे मासा ठवणारोवणविहाणेण सफलीकाउं दिज्जंति, तथा चाह दोण्हवीत्यादि द्वयानामपि अपरिणामकानामतिपरिणामिकानां च प्रत्ययकारणं स्यात्, इति हेतोः सर्वे मासाः स्थापनारोपणाभ्यां सफलाः कृता अत्र दृष्टांतो मुर्खमरुकेन, मुक्खमरुगस्स वीसं भंडीतो एगजातीयभंडभारियातो सव्वातो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समभारियातो तस्स गच्छतो सुंकठाणेसुं किता उवठितो भणइ, एगं भंडिं दाउं वच्च, किं मम उयारणविक्खेवेण मुक्खमरुगो भणइ उयारित्ताए एक्कक्कातो वीसइमं भागं गेण्हसु, सुंकिएण तस्स सव्वभंडीतो उयारित्ता, एक्केकातो वीसइमो भागो गहितो, मरुगसरिच्छा अगीया, सुंकियसरिसो गुरु, अहवा निहिदिट्ठंतो कज्जा कज्जे जयमाणा जयमाणासु, एक्केण वाणिएण निही उक्खणितो, तं अणेहिं नाउं निवेइयं वणिओ दंडितो निही य से हडो, एवं मरुएणवि निही दिट्ठो, रणो निवेइओ, रणो पुच्छितो, तेन सव्वं कहियं, मरुगो पूइतो निहीवि से दिक्खिणादिन्नो, एवं जो कज्जे जयणागारी तस्स सव्वं मरुगस्सेव मुच्चइ, जो कज्जे अजयणागारी अकज्जे य जयणागारी य अजयणागारी य, एतेसु वणिगस्सेव पच्छित्तं दिज्जइ, नवरं कज्जे अजयणाकारिस्स लघुतरं दिज्जइ एतदेवाह -

[भा.४५६] वणिमरुगनिही य पुनो, दिठंता तत्थ होंति कायव्वा ।
गीयत्थमगीयाण य उवणयणं तेहिं कायव्वं ।।

वृ- गीतार्थानामगीतार्थानां च विषये वणिक्मरुकनिधयः पुनः दृष्टांता भवंति, कर्त्तव्याः, तत्र वणिजा गीतार्थानामुपनयनं कर्त्तव्यं, मरुकेनागीतार्थानां एवमेतद्यानंतरमेव भावितं, तत्र वणिग्मरुकदृष्टांतावेव भावयति ।

[भा.४५७] वीसं वीसं भंडी वणिमरुसव्वा य तुल्लभंडातो ।
वीसइ भागं सुंकं मरुगसरित्थो इहमगीतो ।।

वृ- वणिजा मरुकेण च प्रत्येकं विंशतिविंशतिभांड्यो गंत्र्यः कृताः, कथं भूता इत्याह, सर्वास्तुल्यभंडाः तुल्यक्रयाणकाः तत्र शौल्किको विंशतितमो भागः प्रत्येकमेकैकं विंशतितमं भागं याचितवान्, वणिक् एकां भांडीमेव दत्तवान्, मरुकस्तु प्रत्येकं प्रत्येकं भंडीभ्य एकैकं विंशतितमं भागं, अत्र वणिक्सदृशो गीतार्थो, मरुकसदृशः पुनरिह अगीतोऽगीतार्थः, अथवा कार्याकार्येषु यतनायतनयोर्निधिलाभे यौ वणिग्मरुकौ दृष्टांतौ कर्त्तव्यौ, तथा चाह, अथवा -

[भा.४५८] वणिमरुगाय निहिलंभ निवेइए वणिय दंडो ।
मरुए पूय विसज्जण इय कज्जमकज्ज जयमजओ ।।

वृ- अथवेति प्रकारांतरे एतद्यप्रकारांतरमिदं पूर्वं गीतार्थागातार्थयोवणिग्मरुकदृष्टांतावुक्ताविदानीं तु कार्याकार्येषु यतनायामयतनायां च निधिलाभोपलिक्षितौ वणिग्मरुकदृष्टांतावुच्येते, इति, वणिजा निधिलाभे अनिवेदिते वणिजो राज्ञा दंडः कृतः, मरुकेणनिधिलाभे निवेदिते तस्मिन् मरुके राज्ञा पूजा कृता, विसर्जनं च प्रदानं च निधिः मरुकाय कृतं इत्येवममुना दृष्टांतेन कार्यमकार्यं वाऽधिकृत्य यतमानोऽयतमानश्चोपनेतव्यः, यः कार्ये यतनाकारी, स मरुक इव पूज्यः, सर्वमपि च तस्य प्रायश्चित्तं मुच्यते, कार्ये अयतनाकारी अकार्ये यतनाकारी अकार्ये यतनाकारी च वणिगिव दंड्यते नवरं कार्येऽयतनाकारिणः स्तोको दंडः, अथवा यदधस्तादवाचि आचार्यस्य सर्वमुच्यते, किमिति वा शेषाः साधवः सर्वं प्रायश्चित्तं बाह्यं अत्र निधिदृष्टांतस्तथा चाह-

[भा.४५९] मरुयसमाणो उ, गुरू मुच्चइ पुव्वंपि सव्वं से ।
साहू वणिउव्व जहा, वाहिज्जइ सव्वपच्छित्तं ।।

वृ- कथानकं प्रागुक्तमेव उपनयनस्त्वन्यथा, यथा मरुको निधिलाभनिवेदनेन राज्ञो अनुग्रहं कृतवान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा आचार्योपि गच्छोपग्रहं करोति, गच्छोपग्रहणं च कुर्वन् भगवदाज्ञां पालयति, ततो मरुकवत् स पूज्यः, सर्वं च तस्य प्रायश्चित्तं मुच्यते इत्यदोषः, तथा चाह, मरुकसमानो गुरुरिति पूज्यते, अत एव च से तस्य पूर्वं प्रायश्चितं मुच्यते, साधुः पुनर्यथा वणिक तथा द्रष्टव्यः, ततः सर्वं प्रायश्चित्तं वाह्यते, अथवा वणिक् मरुयनिही य पुणो इत्यत्र वणिग्दृष्टांतोऽगीतार्था नाम्, मरुकदृष्टांतोगीतार्थनामुभयेषामपि यादृशः, षण्मासालोचनायामाचार्यस्य विनयोपचारः करणीयस्तथा मासिकालोचनायामपि इत्यत्रार्थे निधिदृष्टांतस्तथा चाह:-

[भा.४६०] अहवामहानिहिम्मी जो उवयारो स एव थोवेवि ।
विनया दुवयारो पुन, जो छम्मासे समासे वि ।।

वृ- अथवेति निधिशब्दस्यार्थांतरार्थदृष्टांते चोपदर्शने महानिधावुत्खनितव्ये, यो यादृश उपचारः क्रियते, स एव तादृश एव स्तोकेपि निधावुत्खनितव्ये करणीयः, एवमपराधालोचनायामपि यादृशः षण्मासालोचनायां विनयाद्युपचारः क्रियते, आदिशब्दात् प्रशस्तद्रव्यक्षेत्रकालभावपरिग्रहः स तादृशो मासेपि मासिकायामपि कर्त्तव्यः, अत्राह परो यदिदं सूत्रखंडं यूयं प्ररूपयथ तेन परं पलिउंचए वा अपलिउंचिए वा ते चेव छम्मासा इति, स किमेप सर्वस्यापि नियम उत पुरुषविशेषस्य ? सूरिराह ।।

[भा.४६१] सुबहूहिंवि मासेहिं छम्मासाणं परं न दायव्वं ।
अविकोवियस्स एवं विकोविए अन्नहा होइ ।।

वृ- षण्मासेभ्यः परतः सुवहुभिरपि मासैः प्रतिसेवितैः प्रायश्चित्तं पण्मासानां परं सप्तमासादिकं न दातव्यं, किंतु षण्मासावधिकमेव, यतोऽस्माकमेतावदेव भगवता वर्धमानस्वामिना तपोर्हं प्रायश्चित्तं व्यवस्थापितं, एतच्चैवमुक्तप्रकारेण स्थापनारोपणाप्रकारेणलक्षणेन दातव्यं, अविकोविदस्य अपरिणामकस्य अतिपरिणामकस्य वा अगीतार्थस्य च, इयमत्र भावना, सर्वस्याप्येष नियमो यदुत सुबहुष्वपि षण्मासेभ्यः परतो मासेषु प्रतिसेवितेषु प्रायश्चित्तं षण्मासावधिकमेव दातव्यं, न ततोधिकमपि, केवलमेतावांस्तु विशेषो योऽपरिणामको अतिपरिणामिको वा तस्यागीतार्थस्यस्थाप- नारोपणाप्रकारेण सर्वान् मासान् सफलीकृत्य षाण्मासिकं तपो दीयते, यस्तु विकोविदो गीतार्थोऽगीतार्थो वा परिणामकस्तस्मिन्नन्यथा भवति प्रायश्चित्तदानं, किमुक्तं भवति, विकोविदस्य पण्मासानां परतः सुबहुष्वपि मासेषु प्रतिसेवितेषु शेषं समस्तं त्यक्त्वा षण्मासा दीयंते, न पुनरस्ति तत्र स्थापनारोपणाप्रकार इति, आह परो, यदि भगवता तपोर्हे प्रायश्चित्ते उत्कर्षतः षण्मासा दृष्टास्ततः षण्मासातिरिक्तमा- सादिप्रतिसेवने छेदादि कस्मान्नदीयते, येन शेषं समस्तमपि त्यज्यते इति तत्राह -

[भा.४६२] सुबहूहिं वि मासेहिं छेदो मूलं तहिं न दायव्वं ।
अविकोवियस्स एवं विकोविए अन्नहा होंति ।।

वृ- यो नामागीतार्थोऽपरिणामकोऽतिपरिणामिको वा यो वा छेदादिकं नश्रद्दधाति तस्य एवमवसातव्यं, षण्मासानामुपरि सुबहुभिरपि मासैः प्रतिसेवितैः छेदो मूलं वा न दातव्यपरिणामादिस्व- भावतया तस्य छेदमुलानर्हत्वात्, किंतुस्थापनारोपणाप्रकारेण सा दीयंते; विकोविदे गीतार्थेऽगीतार्थे परिणामके तदेव षण्मासदानमन्यथा भवति, स्थापनारोपणाप्रकारमंतरेणापि एवमेव दीयंते षण्मासा इति भावः, अयमत्र संप्रदायः, अविकोविदा उक्तस्वरूपा निःकारणं प्रतिसेवनया यतनया प्रतिसेवनया वा अभीक्ष्णप्रतिसेवनया वा यदिवा कथमपि छेदमूलादिकं प्राप्तास्तथापि तेषां छेदो मूलं वा न देयं, किंतु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षाण्मासिकं तपः, यदि पुनरकोविदोप्युपेत्य पंचेन्द्रियघातं करोति, दर्पेण वा मैथुनं प्रतिसेवते, तदा तपः छेदो मूलं वा दीयते, विकोविदस्य पन्नां मासानामुपरि बहुष्वपि प्रतिसेवितेषु मासेषु प्रथमवेलायामुद्घातिताः षण्मासा दीयंते, द्वितीयवेलायामनुद्घातितास्तृतीयवेलायां छेदो मूलं वा इति, अथ कीदृशो विकोविदः कीदृशो वा अविकोविद इत्यत आह-

[भा.४६३] गीतोविकोविदो खलु कयपच्छित्तोसिया अगीतोवि ।
छमासियपट्ठवणाए तस्स सेसाण पक्खेवो ।।

वृ- गीतो गीतार्थः खलु कृतप्रायश्चित्तो विकोविदः, योप्युक्तो यथा आर्य यदीयं भूयः सेविष्यसे, ततः छेदं मूलं वा दास्यामः, सोपि कोविदः, तद्विपरीतोऽगीतार्थः यश्च प्रथमतया प्रायश्चित्तं प्रतिपद्यते, यश्चोक्तोपि तथा न सम्यक् परिणमयति, स स्याद् भवेदकोविदः, तत्र यदि कोविदः षट्मासेषु तपसा कर्त्तुमारब्धेष्वंतरा यदिवा मासादिकं प्रतिसेविते तत् तस्य पूर्वप्रस्थापितषण्मासस्य ये शेषा मासा दिवसा वा तिष्ठंति.तेषां मध्ये प्रक्षिप्यंते, न पुनः षण्मासपरिपूर्णानंतरं तद्विषयं भिन्नं प्रायश्चित्तं दातव्यमिति तथा चाह षण्मासप्रस्थापनायां षण्मासेषुतसा कर्त्तुमारब्धेषुइत्यर्थः तस्यमासिकादेरपांतराले प्रतिसेवितस्य षण्मासस्ययेशेषामासा स्तिष्ठंति, तेषांमध्ये अनुग्रह कृत्स्नेननिर नुग्रहकृत्स्नेन वा प्रक्षेपः, आह, एतत् तपः छेदमूलार्हं प्रायश्चित्तं कुत उत्पद्यते; सूरिराह-

[भा.४६४] मूलातिचारे चेयं, पच्छित्तं होइ उत्तरेहिं वा ।
तम्हा खलु मूलगुणेऽनतिक्कमे उत्तरगुणे वा ।।

वृ- एतत्तपः छेदमूलार्हं प्रायश्चित्तं यस्माद् भवति, मूलातिचारमूलगुणतिचारे प्राणातिपातादि प्रतिसेवने इत्यर्थः, उत्तरैर्वा उत्तरगुणैर्वा पिंडविशुद्धयादिभिरतिचर्यमाणैर्भवति प्रायश्चित्तं, तस्मात् मूलगुणात् प्राणातिपातादिसेवनया उत्तरगुणाद्वा उद्गमादिदोषासेवनया नातिक्रमेत्, अत्र पर आह-

[भा.४६५] मूलव्वयाइयारा जयाऽसुद्धाचरणभंसगा होंति ।
उत्तरगुणातियारा, जिनसासने किं पडिकुट्ठा ।।

वृ- यदि मूलगुणातिचारा अशुद्धा इति कृत्वा चरणभ्रंशका भवंति, ततः साधूनामुत्तरगुणाति-चाराश्चरणस्याभ्रंशकाः प्राप्ता मूलगुणातिचाराणां चरणभ्रंशकतया प्रतिपन्नत्वात्, ततः किमुत्तरगुणा जिनशासने प्रतिक्रुष्टाः न युक्तस्तेषां प्रतिषेधो दोषाकारित्वादिति भावः ।

[भा.४६६] उत्तरगुणातियारा जयसुद्धा चरणभंसया होंति,
मुलव्वयातियारा, जिनसासने किं पडिकुट्ठा ।।

वृ- यदि उत्तरगुणातिचारा अशुद्धा इति कृत्या चरणभ्रंशका भवंति, ततः मूलव्रतातिचारांश्चरण-भ्रंशकान् प्राप्नुवंति, उत्तरगुणातिचाराणां चरणभ्रंशकतया प्रतिपन्नत्वात् तथाच सति मूलव्रतातिचाराः किं जिनशासने प्रतिक्रुष्टाः दोषाभावात् अत्र सूरिराह -

[भा.४६७] मूलगुणउत्तरगुणा जम्हा भंसंति चरणसेढितो ।
तम्हा जिनेहिं दोनिवि, पडिकुट्ठा सव्वसाहूणं ।।

वृ- यस्मात् मूलगुणा उत्तरगुणा वा पृथक् पृथक् युगपद् वा अतिचर्यमाणाश्चरणश्रेणीसंयमश्रेणीतो भंशयति साधून् ततो जिनैः सर्वज्ञैर्द्वयोरपि मूलगुणातिचारा उत्तरगुणातिचाराश्च प्रतिक्रुष्टाः अन्यच्च मूलगुणेष्वतिचर्यमाणेषु मूलगुणा स्तावद्धता एव किंतूत्तरगुणा अपि हन्यंते, उत्तरगुणेष्वतिचर्यमाणेषूत्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणास्तावद्धता एव, किंतु मूलगुणा अपि हन्यंते तथा चात्र दृष्टांतमाह -

[भा.४६८] अग्गघातो हणे मूलं, मूलघातोउ अग्गयं ।
तम्हा खलु मूलगुणा न संति न य उत्तरगुणा य ।।

वृ- यथा तालद्रुमस्याग्रसूच्या घातो मूलं हंति मूलघातोपि चाग्रं हंति, एवं मूलगुणानां विनाश उत्तरगुणानपि नाशयति, उत्तरगुणानामपि विनाशो मूलगुणान् तस्मात्मूलगुणातिचाराश्च जिनैः प्रतिक्रुष्टाः, अत्र चोदक आह, यदि मूलगुणानां नाशे उत्तरगुणानामपि नाश उत्तरगुणानां नाशे मूलगुणानामपि, तस्मात्ततो न खलु नैव मूलगुणा संति, नाप्युत्तरगुणाः यस्मान्नास्ति य संयतो, यो मूलोत्तरगुणानामन्यतमं गुणं न प्रतिसेवते, अन्यतमगुणप्रतिसेवने च द्वयानामपि मूलोत्तरगुणानामभावः, तेषामभावे सामायि-कादिसंयमाभावः, तदभावे बकुशादिनिर्ग्रंथानामभावस्ततः प्राप्तं तीर्थमचारित्रमिति, अत्र सूरिराह -

[भा.४६९] चोयग छक्कायाणं, तु संजमो जाऽनुधावए ताव ।
मूलगुणउत्तरगुणा दोणिवि अनुधावते ताव ।।

वृ- चोदक यावत् षट्जीवनिकायेषु संयमोऽनुधावति, अनुगच्छति, प्रबंधेन वर्तते, तावत् मूलगुणा उत्तरगुणाश्च द्वयेप्येते अनुधावंति, प्रबंधेन वर्त्तते ।

[भा.४७०] इत्तरसामाइयछेयसंजमा तह दुवे नियंठाय ।
बउस पडिसेवगातो अनुसज्जंते य जा तित्थं ।।

वृ- यावत् मूलगुणा उत्तरगुणाश्चानुधावंति, तावदित्वरसामायिकछेदसंयमावानुधावतः, यावच्चेत्वरसामायिकछेदोपस्थापनसंयमौ तावद्द्वौ निर्ग्रंथावनुधावतः तद्यथा बकुशः प्रतिसेवकश्च तथाहि यावत् मूलगुणप्रतिसेवना, तावत् प्रतिसेवको, यावदुत्तरगुणप्रतिसेवना, तावद् बकुशः, ततो यावत् तीर्थं तावत् बकुशाः प्रतिसेवकाश्च अनुसज्जंति, अनुवर्त्तंते, ततो नाचारित्रं प्रसक्तं प्रवचनमिति, अथ मूलगुणप्रतिसेवनायामुत्तरगुणप्रतिसेवनायां वा चारित्रभ्रंशेऽस्ति कश्चिद्विशेष उत नास्ति ? अस्तीति ब्रूमः, कोसावित्याह -

[भा.४७१] मूलगुणदइयसगडे, उत्तरगुणमंडवे सरिसवाई ।
छक्कायरक्खणट्ठा दोसुवि सुद्धे चरणसुद्धी ।।

वृ- मूलगुणेषु दृष्टांतो दृतिः, शकटं च केवलम्, उत्तरगुणा अपि तत्र दर्शयितव्याः, उत्तरगुणेषु दृष्टांतो मंडपे सर्षपादि, आदिशब्दात् शिलादिपरिग्रहः, अत्रापि मूलगुणा अपि दर्शयितव्याः इयमत्र भावना, एकेनापि मूलगुणप्रतिसेवनेन ततक्षणादेव चारित्रभ्रंश उपजायते, उत्तरगुणप्रतिसेवनायां पुनः कालेन अत्र दृष्टांतो दृतिकः, तथाहि यथा दृतिक उदकभृतः, पंचमहाद्वारस्तेषां महाद्वाराणामेकस्मिन्नपि द्वारे मुत्कलीभूते तत्क्षणादेव रिक्तीभवति, सुचिरेण तु कालेन पूर्यते, एवं महाव्रतानामेकस्मिन्नपि महाव्रत अतिचर्यमाणे तत्क्षणादेव समस्त चारित्रभ्रंशो भवति, एकमूलगुणघाते सर्वमूलगुणानां घातात्, तथा च गुरवो व्याचक्षते, एकव्रतभंगे सर्वव्रतभंग इति, एतन्निश्चयनयमतं, व्यवहारतः पुनरेकव्रत भंगे तदेवैकं भग्नं प्रतिपत्तव्यं, शेषाणां तु भंगः क्रमेण, यदि प्रायश्चित्तप्रतिपत्या नाऽनुसंधत्ते इति, अन्ये पुनराहु श्चतुर्थमहाव्रतप्रतिसेवने तत्कालमेव सकलचारित्रभ्रंशः, शेषेसु पुनर्महाव्रतेष्वभीक्ष्णं प्रतिसेवनया महत्यतिचरणे वा वेदितव्यः, उत्तरगुणप्रतिसेवनायां पुनः कालेन चरणभ्रंशो, यदि पुनः प्रायश्चित्त-प्रतिपत्त्या नोज्चालयति, एतदपि कुतोऽवसेयमिति चेत् उच्यते, ते शकटदृष्टांतात्तथाहि, शकटस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलगुणा द्वे चक्रे उद्धी अक्षश्च, उत्तरगुमा वधनकीलकलोहपट्टकादयः गलैर्मूलगुणैरुत्तरगुणैश्च सुसंप्रयुक्तं सत् शकटं यथा भारवाहनक्षमं भवति, मार्गे च सुखं भवति, साधुर्गपि मूलगुणैरुत्तरगुणैश्च सुसंप्रयुक्तः सन् अष्टादशशीलांगसहस्रभारवहनक्षमो भवति, विशिष्टविशिष्टतरोत्तरसंयमाध्यवसायस्थानपथे च सुखं वहति, अथ शकटस्य मूलांगानामेकमपि मूलांगं भग्नं भवति, तदा न भारवहनक्षमं, नापि मार्गे वर्त्तते, उत्तरांगैस्तु कैश्चिद्विनापि शकटं कियत्कालं भारक्षमं भवति, प्रबहति च मार्गे कालेन पुनर्गच्छताऽन्यान्यपि परिशटनादयोग्यमेव तदुपजायते ।

एवमिहापि मूलगुणानामेकस्मिन्नपि मूलगुणे हते न साधुनामष्टादशशीलांगसहस्रभारवहनक्षमता, नापि संयमश्रेणिपथे प्रवहनं, उत्तरगुणैस्तु कैश्चित् प्रतिसेवितैरपि भवति कियंतं कालं चरणभारवहन-क्षमता, संयमश्रेणिपथे प्रवर्त्तनं च, कालेन पुनर्गच्छता तत्राप्यन्यान्यगुणप्रतिसेवनातो भवति समस्त-चारित्रभ्रंशस्ततः शकटदृष्टांतादुपपद्यते, मूलगुणानां एकस्यापि मूलगुणस्यन नाशे तत्कालं चारित्रभ्रंश, उत्तरगुणनाशे कालक्रमेणेति, इतश्चैतदेवं मंडपसर्षपादिदृष्टांतात्, तथाह्येरंडादि मंडपे यद्येको द्वौ बहवो वा सर्षपा, उपलक्षमेतत् तिलतंदुलादयो वा प्रक्षिप्यंते, तथापि न स मंडपो भंगमापद्यते, अतिप्रभूतैः आढकादिसंख्याकैर्भज्यते, अथ तत्र महती शिला प्रक्षिप्यते, तदा तयैकयापि तत्क्षणादेव ध्वंसमुपयाति, एवं चारित्रमंडपोप्येकाद्वित्र्यादिभिः उत्तरगुणैरतिचर्यमाणैर्न भंगमुपयाति, बहुभिस्तु कालक्रमेणातिचर्य-माणैर्भज्यते, शिलाकल्पेन पुनरेकस्यापि मूलगुणस्यातिचारेण तत्कालं भ्रंशमुपगच्छतीति, तदेवं यस्मात्मूलगुणातिचरणे क्षिप्रमुत्तरगुणातिचरणे कालेन चारित्रभ्रंशो भवति, तस्मान्मे मूलगुणा उत्तरगुणाश्च निरतिचाराः स्युरिति षट्कायरक्षणार्थं सम्यक् प्रतिपत्तव्यं, षट्कायरक्षणे हि मूलगुणा उत्तरगुणाश्च शुद्धा भवंति तेषु च द्वयेष्वपि शुद्धेषु, अत्र गाथायामेकवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययोपि भवतीति, चरणशुमिद्धश्चारित्रशुद्धिः, अत्र शिष्य प्राह, ये प्राणातिपातादिनिवृत्त्यात्मकाः पंचमूलगुणास्ते ज्ञाता ये तूत्तरगुणास्तान्न जानीमस्ततः के ते उत्तरगुणा इति सूरिराह-

[भा.४७२] पिंडस्स जा विसोही, समितीओ भावना तवो दुविहो ।
पडिमा अभिग्गहावि य, उत्तरगुणा मो वियाणाहि ।।

वृ- पिंडस्यया विशोधिर्याश्च ईर्य्यासमित्यादिका याश्च भावना महाव्रतानां, यच्च द्विभेदं तपः, याश्च प्रतिमा भिक्षूणां द्वादश ये चाभिग्रहा द्रव्यादिभेदभिन्ना एतानुत्तरगुणान् मो इति पादपूरणे विजानीहि, एतेषां चोत्तरगुणानामियं क्रमेण संख्या ।।

[भा.४७३] बायाला अट्ठेवउ पणवीसा बार बारस य चेव ।
दव्वाइचउरभिग्गह, भेया खलु उत्तरगुणाणं ।।

वृ- उत्तरगुणानां प्रागुक्तानां पिंडविशुध्यादीनां क्रमेण खल्वमी भेदास्तद्यथा, पिंडविशुद्धेर्द्वाचत्वारिं-शद्भेदाः षोडशविध उद्गमः, षोडशविधा उत्पादना, दशविधा एषणा च, समितीनामष्टौ भेदास्तद्यथा पंच ईर्यासमित्यादयस्तथा मनःसमितिर्वाक्समितिः कायसमितिरित्यष्टौ, भावनानां भेदाः पंचविंशतिः, एकैकस्य महाव्रतस्य पंच पंच भावनाः सद्भावात्, तपसो द्विविधस्यापि सर्वसंख्यया भेदा द्वादश, द्विविधं हि तपो बाह्याभ्यंतरभेदात्, बाह्याभ्यंतरस्य च प्रत्येकं षट्भेदा इति, प्रतिमानां भेदा द्वादश, ते च मासीसत्तं ताइत्याद्यावश्यकग्रंथतो वेदितव्याः, अभिग्रहभेदाश्चत्वारो द्रव्यादिकाः द्रव्याभिग्रहाः क्षेत्राभिग्रहाः कालाभिग्रहा भावाभिग्रहाश्च तदेवमुक्ता उत्तरगुणाः; संप्रति यदधस्तात् प्रायश्चित्तमुपवर्णित्, तद्व्रतानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषाणामिमे विशेषा इति प्रतिपादयति ।

[भा.४७४] निग्गयवट्टंतावि य संचइया खलु तहा असंचइया ।
एक्केक्काते दुविहा उग्घाया तहा अनुग्घाया ।।

वृ- ये प्रायश्चित्तं वहंति, ते द्विविधास्तद्यथा निर्गताः वर्तमानाश्च वर्तमानाश्च निर्गता नाम ये तपोर्हं प्रायश्चित्तमतिक्रांताच्छेदादिप्राप्ताः, वर्त्तमाना ये तपोर्हे प्रायश्चित्ते वर्त्तंते, तत्र ये वर्त्तमानास्ते पुनर्द्विविधाः संचयिता असंचयिताश्च संचयः संजात एषामिति संचयिताः, तारकादिदर्शनादितच्प्रत्ययः येषां षण्णां मासानां परतः सप्तमासादिकं यावदुत्कर्षतोऽशीतं शतं मासानां प्रायश्चित्तं प्राप्तास्ते संचयितास्तेषां मासेभ्यः स्थापनारोपणाप्रकारेण दिवसान् गृहीत्वा षण्मासावधिकं प्रायश्चित्ते वर्त्तंते, ते संचयिता असंचयिताश्च एकेके द्विविधा उद्घातास्तथा अनुद्घाता, उद्घातो नाम लघुरनुद्घातो नाम गुरुस्तत्र ये संचये असंचये च उद्घाते वर्त्तंते, ते संचयिता असंचयिताश्च उद्घाताः, ये पुनरनुद्घाते वर्त्तंते, संचयिता असंचयिताश्च ते अनुद्घाता; सांप्रतमेनामेवगाथां यथोक्तव्याख्यानेनव्याख्यानयति ।।

[भा.४७५] छेयाईआवणाउ निग्गयाते तवाउ बोधव्वा ।
जे पुन वट्टंति तवे, ते वट्टंता मुनेयव्वा ।।

[भा.४७६] मासादीआवणे जा, छम्मासा असंचयं होइ ।
छम्मासाउ परेणं, संचइयं तं मुनेयव्वं ।।

वृ- ये छेदादिप्रायश्चित्तमापन्नास्ते निर्गता उच्यंते, कुतस्ते निर्गता इत्याह, ते तवाउ बोधव्वा, ते निर्गतास्तपसस्तपोर्हात् प्रायश्चित्तात्तु बोधव्वा, ये पुनर्वर्त्तंते, तपसि तपोर्हे प्रायश्चित्ते, ते वर्त्तमाना ज्ञातव्याः, मासादी इत्यादि-मासादिकं प्रायश्चित्तस्थानमापन्ने मासादारभ्य यावत् षण्मासास्तावत् प्रायश्चित्तमसंचयं असंचयसंज्ञं भवति, षण्मासात् षड्भ्यो मासेभ्यः परेण परतो यत् प्रायश्चित्तं तत् संचयितं ज्ञातव्यं, उद्घातानुद्घातविशेषस्तु सुप्रतीत इति न व्याख्यातः; संप्रति संचयासंचये-पूद्घातानुद्घातेषु प्रस्थापनविधिं विवक्षुरिदमाह -

[भा.४७७] मासाइ असंचइए, संचइए छहिं तु होइ पट्ठवणा ।
तेरसपय असंचइए संचये एक्कारस पयाइं ।।

वृ- असंचयितेप्रायश्चित्तस्थाने प्रस्थापना मासादि मासप्रभृतिका, संचयिते पुनः प्रस्थापना नियमतः षड्भिर्मासैर्भवति, प्रस्थापना नाम दानं, उक्तं च निशीथचूर्णौ; पट्ठवणा नाम दाणंति, इयमत्र भावना, असंचयिप्रायश्चित्तस्थाने विषये यो मासिकं प्रायश्चित्तस्थानमापन्नस्तस्य मासिकी प्रस्थापना द्वौ मासावापन्नस्य द्वैमासिकी, त्रीन् मासान्नापन्नस्य त्रैमासिकी एवं यावत् षण्मासानापन्नस्य षाण्मासिकी, यः पुनः संचयापन्नस्तस्य नियमात् षाण्मासिकी प्रस्थापनातत्रासंचये प्रस्थापनायाः पदानि त्रयोदश, संचये एकादश, तत्रा संचये प्रस्थापनायाः पदानि त्रयोदशामूनि ।।

[भा.४७८] तवतियं छेयतियं वा मूलतियं अनवट्ठावणतियं च ।
चरमं च एक्कसरयं, पढमं तववज्जियं बिइयं ।।

वृ- तपस्त्रिकं, छेदत्रिकं मूलत्रिकं, अनवस्थाप्यत्रिकं चरमं पारांचितं, तदेकसरं एकवारं दीयते, इदमुक्तं भवति, असंचये उद्घातं मासादिकमापन्नस्य प्रथमवेलाया मुद्घातो मासो दीयते, द्वितीयवेलाया-मुद्घातचातुर्मासकं, तृतीयवेलायामुद्घातषण्मासिकं, चतुर्थवेलायां छेदः पंचमवेलायामपि छेदः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठवेलायामपि छेदः, सर्वत्र त्रीणि त्रीणि दिनानि छेदः सप्तमवेलायां मूलमष्टमवेलायां मूलं, नवमवेलाया-मपि मूलं, दशम वेलाया मनवस्थाप्य मेकादश वेलाया मनवस्थाप्यं, द्वादश वेलायामप्य नवस्थाप्यं त्रयोदशवेलायां पारञ्चितमिति । एवमनुद्घातितेऽपि असंचये त्रयोदशपदानि प्रस्थापनायां वक्तव्यानि। 'पढमं' ति प्रथममसंचयं पदं पदम् ।। द्वितीयं संचयपदं 'तववज्जियं' ति मासचतुर्मासलक्षणाभ्यामाद-मिभ्यां वर्जितमेकादशपदं भवति । एतदेव व्याख्यानयति-

[भा.४७९] बिइयं संचइयं खलु तं आइपएहिं दोहिं रहियं तु ।
छम्मासतवादीयं एक्कारसपएहिं चरमेहिं ।।

वृ- द्वितीयं खलु संचयितमुच्यते । तत् द्वाभ्यामादिदाभ्यां रहितं षण्मासतपआदिकं षण्मासतपःप्रभृतिकं चरमैरेकादशपदैर्द्रव्यम् । तत्रापीयं भावना-संचयितप्रायश्चित्तस्थानमापन्नस्य प्रथममुद्घातं षाण्मासिकं तपो दीयते । द्वितीयवेलायां च्छेदः, तृतीयवेलायां च्छेदः, चतुर्थवेलायामपि च्छेदः, पञ्चमवेलायां मूलं, षष्ठवेलायां मूलं, सप्तमवेलायामपि मूलं, अष्टमवेलायामनवस्थाप्यं, नवमवेलायामनवस्थाप्यं, दशमवेलायामनवस्थाप्यं, एकादशवेलायां पाराञ्चितमिति । एतदेवाह -

[भा.४८०] छम्मास तवो च्छेदा इयाण तिगतिग तहेक्क चरमं च ।
संवट्टियावराहे, एक्कारस पयाउ संचइए ।।

वृ- संचयिते कथंभूते ? इत्याह-संवर्तितापराधे संवर्तिताः-पिण्डीभूता अपराधा यत्र तत् संवर्तितापराधं । तथाहि-बहुषु मासेषु प्रतिसेवितेषु स्थापनारोपणाप्रकारेम तेभ्यो मासेभ्यो दिनानि दश दश पञ्च पञ्चेत्यादिरूपतया गृहीत्वा षाण्मासिकं तपः । ततः छेदादीनां त्रिकं त्रिकं । किमुक्तं भवति ? तदनन्तरं वेलात्रयमपि यावत् च्छेदत्रिकं, ततो मूलत्रिकं तदनन्तरमनवस्थाप्य त्रिकं । तथा एकमेक वेलं वा चरमं पाराञ्चितमिति । एवं अनुद्घातितेऽपि संचयिते एकादश पदानि वाच्यानि । सम्प्रति येऽत्र प्रायश्चित्तस्यार्हाः पुरुषास्तान् प्रतिपादयति-

[भा.४८१] पच्छित्तस्स उ अरिहा इमे उ पुरिसा चउव्विहा होंति ।
उभयतर आयतरगा परतरगा अनतरगा य ।।

वृ- प्रायश्चित्तस्यार्हा योग्या इमे चतुर्विधाश्चत्वारः पुरुषा भवन्ति । तद्यथा - उभयतरा आत्मतरकाः परतरका अन्यतरकाश्च । तत्र ये उत्कर्षतः षण्मासानपि यावत्तपः कुर्वतोऽग्लानाः सन्तः आचार्यादीनामपि वैयावृत्यं कुर्वन्ति, तत् लब्ध्युपेतत्वात्, ते उभयमात्मानं परं चाचार्यादिकं तारयन्तीत्युभयतराः । पृषोदरादित्वात् ह्रस्वः ये पुनस्तपोबलिष्ठा वैयावृत्यलब्धिहीनास्ते तप एव यथोक्तरूपं कुर्वन्ति, न वैयावृत्यमाचार्यादीनामित्यात्मानं केवलं तारयन्तीत्यात्मतराः । स्वार्थिकप्रत्ययविधानात् आत्मतरकाः । ये पुनस्तपः कर्तुमसमर्था वैयावृत्यं चाचार्यादीनां कुर्वन्ति, ते परं तारयन्तीति परतरकाः । येषां तपसि वैयावृत्ये च सामर्थ्यमस्ति केवलमुभयं युगपत्कर्तुं न शक्नुवन्ति, किन्त्वन्यतरत् ते एकस्मिन् काले आत्मपरयोरन्यमन्यतरं तारयन्तीति अन्यतरकाः ।।

[भा.४८२] आयतर परतरे वि य, आयतरे अभिमुहे य निक्खित्ते ।
एक्केक्कमसंचइए, संचइ उग्घायमनुग्घाया ।।

वृ- आत्मतरश्च स परतरश्च आत्मतरपरतर उभयतर इत्यर्थः । यश्चात्मतर एतौ द्वावपि प्रायश्चित्तवहनाभिमुखौ भवतः । ततस्तस्मिन् प्रत्येकं प्रायश्चित्तमभिमुखमुच्यते । यस्तु परतरोऽन्यतरको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा यावत् वैयावृत्यं करोति, तावत्तयोः प्रायश्चित्तं निक्षिप्तं क्रियते, इति तन्निक्षिप्तमभिधीयते । एकैकमभिमुखं निक्षिप्तं च द्विधा संचयितमसंचयितं च, पुनरेकैकं द्विधा-उद्घातमनुद्घातं च । तदेतत् संक्षेपत उक्तमिदानीं विस्तरोऽभिधेयस्तत्र यः प्रथम उभयतरस्तस्येमं दृष्टान्तमाचार्याः परिकल्पयन्तिः सेवक दृष्टान्त भावना ।

[भा.४८३] जह मासतो उ लद्धो, सेवियपुरिसेन जुयलयं चेव ।
तस्स दुवे तुट्ठीतो वित्तीय कया जुयलयं च ।।

वृ- एगो सेवगपुरिसो, रायं ओलग्गइ । सो राया तस्स वित्तिं न देइ । अन्नया तेन राया केणइ कारणेण परितोसितो । ततो तेन रन्ना तस्स तुट्ठेण पइदिवसं सुवन्नमासगो वित्ति कया । पहाणं च सेवत्थजुयलं दिन्नं, तथा चाह- 'जहेत्यादि' यथेति दृष्टान्तोपन्यासे माषकः सुवर्णमाषकः सेवकपुरुषेण लब्धो, युगलं च वस्त्रयुगलं च तस्य च सेवकपुरुषस्य द्वे तुष्ट्यौ जाते- एकं वृत्तिः कृता द्वितीयं वस्त्रयुगलमिति एष दृष्टान्तोऽयमुपनयः ।

[भा.४८४] एवं उभयतरस्सा दो तुट्ठीओ उ सेवगस्सेव ।
सोही य कयामेत्ती वेयावच्चे निउत्तो य ।।

वृ- एवं सेवकपुरुषदृष्टान्तप्रकारेण उभयतरस्य सेवकस्येव द्वे तुष्ट्यौ भवतस्तद्यथा-एकं तावन्मे प्रायश्चित्तदानेन शोधिः कृता, द्वितीयं वैयावृत्ये नियुक्तस्य महती मे निर्जरा भविष्यति । अथ प्रायश्चित्तं वहन् वैयावृत्त्यं च कुर्वन् यदि पुनरपि श्रोत्रादीनां पञ्चानामिन्द्रियाणामन्यतमेनेन्द्रियेण । आदिशब्दात् क्रोधादिभिश्च स्तोकं बहु वा प्रायश्चित्तमापद्यते । यदि अन्यदपि प्रायश्चित्तमापद्यते तदा कथम् ? उच्यते-

[भा.४८५] सो पुन जइ वहमाणो, आवज्जइ इंदिया इह पुनोवि ।
तं पि य से आरुहिज्जइ, भिन्नाइं पंचमासंतं ।।

वृ- स पुनरुभयतरः प्रायश्चित्तं वहन् वैयावृत्यं च कुर्वन् यदि पुनरपि श्रोत्रादीनां पञ्चानामिन्द्रियाणामन्यतमेनेन्द्रियेण । आदिशब्दात्क्रोधादिभिश्च स्तोकं बहु वा प्रायश्चित्तमापद्यते । तत्र स्तोकं विंशतिरात्रिंदिवादारभ्य पश्चादानुपूर्व्या यावत् पञ्चरात्रिंदिवं बहुपाराञ्चितादारभ्य पश्चादनुपूर्व्या यावत्मासिकं तदपि से तस्य आरुह्यते, भिन्नादिभिन्नमासादि । आदिशब्दात्सकलमासादिपरिग्रहः पञ्चमासान्तं पञ्चमासपर्यन्तं इयमत्र भावना-स्तोकं बहु वा यथोक्तस्वरूपं यदि प्रायश्चित्तस्थानमापन्नस्तथापि तस्य भिन्नमासादि दीयते । कस्मादिति चेदत आह-

[भा.४८६] तवबलितो सो जम्हा, तेन तेन अप्पे वि दिज्जये बहुयं ।
परतर उ पुन जम्हा, दिज्जइ बहुए वितो तोवं ।।

वृ- यस्मादुभयतरकः प्रायश्चित्ततपः करणे धृतिसंहननबलिष्टस्तेन कारणेन रेफः पादपूरणे 'इजेराः' पादपूरणे इतिवचनात् । अल्पेऽपि पञ्चरात्रिं दिवादिके प्रायश्चित्तस्थाने बहुकं भिन्नमासादि दीयते । यस्माच्च परतरः परमाचार्यादिकं वैयावृत्यकरणतस्तारयति । ततो बहुकेऽपि पाराञ्चितादिके प्रायश्चित्ते प्राप्ते स्तोकं भिन्नमासादि दीयते, तदेवं स्तोके बहुके वा प्रायश्चित्तस्थानं प्राप्ते भिन्नमासादिदाने कारणमुक्तम् । सम्प्रति भिन्नमासादि यथा दातव्यं तथा प्रतिपादयति -

[भा.४८६] वीसड्डारस लहु गुरु, भिन्नाणं मासियाणमावन्नो ।
सत्तारस पन्नारस, लहुगुरुगा मासिया होंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- स उभयतरकः प्रस्थापितंप्रायश्चित्तं वहन् वैयावृत्यं च कुर्वन् यदिस्तोकं बहुं वा उद्घातमनुद्घातं वा प्रायश्चित्तस्थानमन्यदापन्नस्ततो यदि पूर्वप्रस्थापितं प्रायश्चित्तमुद्घातं तमुद्घातो भिन्नमासो दीयते। यदि पुनरप्याद्यते ततो भूयोऽपि भिन्नमासो दीयते, एवं विंशतिवारान् भिन्नमासो दातव्यः । यदि विंशतेर्वारेभ्यः परतोऽपि भूय आपद्यते, ततः स्तोके बहुके वा प्रायश्चित्ते प्राप्ते लघुमासो दीयते । एवं भूयो भूयस्तावद्यावत् सप्तदश वारा नवरमत्र स्तोकं पञ्चकादिभिन्न मासान्तं बहु द्विमासादि पाराश्चितान्तं ततः परतो यदि पुनरपि भूयो भूय आपद्यते, ततोऽन्यत् सप्तदशवारान् द्वैमासिकं दातव्यं । अत्र स्तोकं पञ्चकादिलघुमासपर्यन्तं बहुत्रिमासादिपाराञ्चितान्तं । एवं त्रैमासिकादिष्वप्यधस्तनानि स्थानानि स्तोकमुपरितनानि बहु वेदितव्यानि । ततः सप्तदशवारेभ्यः परतो यदि भूयः पुनः पुनरापद्यते ।। ततस्त्रैमासिकं सप्तदश वारान् दीयते । ततोऽपि परतो यदि पुनः पुनराद्यते, ततः सप्तवारान् लघु चातुर्मासिकं दीयते । ततोऽपि परतो यदि पुनर्भूयो भूय आपद्यते ततः पञ्च वारान् लघु पञ्च मासिकं दीयते । यदि ततोऽपि परतो भूय आपत्तिस्ततः एकवारं लघु षाण्मासिकं दीयते । तदनन्तरं यदि पुनरपि भूयो भूय आपत्तिस्ततस्त्रीन् वारान् छेदो दीयते । यदि ततः परमपि पुनः पुनरापत्तिस्ततस्त्रीन् वारान् मूलं दीयते । ततोऽपि परतो भूयो भूय आपत्तौ त्रीन् वारान् अनवस्थाप्य दानं । तदनन्तरं यदि पुनरप्यापद्यते ततः एकं वारं पाराञ्चितं दानमिति । एवमसञ्चयितमुद्घातितं गतमथासञ्चयमनुद्घातितं प्रस्थापितं । ततोमल्पं बहु वा यदि प्रायश्चित्तस्थानमापद्यते तर्हि गुरुको भिन्नमासो दीयते । ततः पुनः पुनरापत्तौ स अष्टादश वारान् दीयते । ततः परं भूयो भूय आपत्तौ पञ्चदश वारान् गुरुमासिकं । ततः परं पञ्चदश वारान् गुरु द्वैमासिकं । ततः परं पञ्चदश वारान् गुरु द्वैमासिकं । ततः परं पञ्चदश वारान् गुरु त्रैमासिकम् ततो भूयोपि परं पंचवारान् गुरुचातुर्मासिकम् । ततः परं यदि भूयो भूय आपत्तिस्ततस्त्रीन् वारान् गुरुपञ्चमासिकं । तदनन्तरमेकवारं षट्गुरु । ततः परं छेदत्रिकं, ततो मूलत्रिकं, ततोऽनवस्थाप्य त्रिकं । तत परमेकं वारं पाराञ्चितम् । सम्प्रत्यक्षरार्थो विव्रियते- यदि पूर्वस्थापितमुद्घातमनुद्घातंच प्रायश्चित्तं वहतो लघुभिन्नानां मासिकानां विंशतिवारान् प्रदानम्, अनुद्घातं प्रायश्चित्तं वहतो गुरुभिन्नानां मासिकानामष्टादश वारान्। तदनन्तरं भूयो भूय आपत्तावुद्घातं प्रायश्चित्तं वहतः सप्तदश वारान् लघुमासिका भवन्ति, अनुद्घातं प्रायश्चित्तं वहतः पञ्चदश वारान् गुरुमासिकाः ।।

[भा.४८८] उग्घाइयमासाणं सत्तरसेव य अनुमवंतेनं ।
नायव्वा दोन्नि तिन्नि य, गुरुया पुन होंति पन्नरस ।।

[भा.४८९] सत्त चउक्का उग्घाइयाणं, पंचेव होंत अनुग्घाया ।
पंच लहुयाओ पंच उ गुरुगा पण पंचगा तिन्नि ।।

वृ- उद्घातितमासानामनुद्घातितमासानां ये सप्तदश वारा स्तान् अमुञ्चता ज्ञातव्यौ द्वौ मासौ, त्रयश्च मासा ज्ञातव्याः ये पुनर्गुरुका द्वौ त्रयश्च मासास्ते पञ्चदश वारान् ज्ञातव्याः । किमुक्तं भवति ? उद्घातितं प्रायश्चित्तं वहतो मासिकानन्तरं भूयो भूय आपत्तौ द्वौ मासौ सप्तदश वारान् दीयते । ततोऽपि भूयो भूय आपत्तौ सप्तदश वारान्त्रीन् मासान् अथानुद्घातितं प्रायश्चित्तं वहति, तर्हि गुरुमासिकानन्तरं भूयो भूय आपत्तौ द्वौ गुरुकौ मासौ पञ्चदश वारान् दीयते । तदनन्तरं पञ्चदशवारान् त्रीन् गुरुकान् मासानिति सप्तचउक्केत्यादि उद्घातितानां चतुष्काः सप्त भवन्ति । अनुद्घातितानामत्र गाथायां प्रथमा षष्ठ्यर्थे चतुष्काः पञ्च भवन्ति लघुकाः पञ्च मासा पञ्च वारान् भवन्ति, गुरुकाः पुनः पञ्चकाः पञ्चमासास्त्रीन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वारा निदमुक्तं भवति- उद्घातं प्रायश्चित्तं वहतः त्रैमासिकानन्तरं भूयो भूय आपत्तौ सप्तवारान् लघुकाश्चत्वारो मासा दीयन्ते । तदनन्तरं पञ्चवारान् लघुकाः पञ्चमासाः अनुद्घातितं प्रायश्चित्तं वहतः त्रैमासिकानन्तरं पुनरापत्तौ पञ्च वारान् गुरुका श्चत्वारोमासाः तदनन्तरं त्रीन् पञ्च गुरुमासान् ।। साम्प्रतमत्रैवासञ्चये उद्घातानुद्घातापत्तिस्थानानानां सुखावगमोपायमाह—

[भा.४९०] उक्कोसा उग्घाते वा ठाणे ठाणे दुवे परिहरेज्जा ।
एवं दुगपरिहानी, नेयव्वा जाव तिन्नेव ।।

वृ- उत्कृष्टं नाम उद्घातभिन्नमासगतं विंशतिलक्षणं तस्मादारभ्योद्घातगते स्थाने स्थाने यदुत्कृष्टं तदपेक्षया अनुद्घात गतेषु स्थानेषु द्वौ द्वौ परिहापयेत् । एवं द्विकपरिहानिस्तावत् ज्ञातव्या यावदुद्घातगतपञ्चकोत्कृष्टापेक्षया अनुद्घाते त्रय इति । इयमत्र भावना-उद्घाते भिन्नामासे विंशतिः, अनुद्घाते द्विकपरिहान्या अष्टादश । तथा उद्घाते मासे सप्तदश, अनुद्घाते पञ्चदश । एवं द्विमासे त्रिमासेऽपि । तथा उद्घाते चतुर्मासे सप्त अनुद्घाते पञ्च । तथा उद्घाते पञ्चमासे पञ्च अनुद्घाते त्रय- इति । तदेवमापत्तिस्थानान्युक्तानि ।। उद्घातानुद्घातदानविधिः साम्प्रतमेतेषां दानविधिमाह-

[भा.४९१] अट्ठट्ठ अवनेत्ता सेसा दिज्जंति जाव उ तिमासो ।
जत्थठगावहारो न होज्ज तं झोसए सव्वं ।।

वृ- ये भिन्नमासादयो विंशत्यादिवारा आपन्नास्तेभ्यः प्रत्येकमष्टावष्टावपनयेत् । अपनीय शेषा दीयंते, एवं तावत् वाच्यम् यावत्रिमासाः त्रैमासिकं । अयमत्र भावार्थः । विंशतिवाराः किलोद्घाता भिन्नमासा आपन्नास्तत्राष्टौ भिन्नमासा झोषिताः, शेषा द्वादश दीयन्ते । तेऽपि स्थापनारोपणाप्रकारेणाधिकं परिशाट्या षण्मासाः कृत्वा दीयन्ते । तथा अष्टादश अनुद्घाता भिन्नमासा आपन्नास्तेभ्योऽष्टौ त्यक्त्वा शेषा दश भिन्नमासाः प्रदातव्याः । तेऽपि स्थापनारोपणाप्रकारेण अधिकं समस्तमपि त्यक्त्वा षण्मासाः कृत्वा दानीय इति । तथा सप्तदशवारा लघुमासाः प्राप्तास्तेभ्योऽष्टौ परित्यज्य शेषा नवलघुमासा दीयन्ते। पञ्चदशवारा गुरुमासा आपन्नास्तेभ्योऽष्टौ परित्यज्य शेषाः सप्त गुरुमासा देयाः । एवं द्वैमासिके त्रैमासिकेऽपि वाच्यम् । सर्वत्र स्थापनारोपणाप्रकारेणाधिक्यं त्यक्त्वा षण्मासाः कृत्वा देयाः । अथ अष्टकझोषणाभिधानं किमर्थम् ? एतदेव कस्मान्नोक्तं विंशत्यादयो भिन्नमासादयः स्थापनारोपणाप्रकारेण षण्मासीकृत्य दातव्या इति ? उच्यते । मध्यमतीर्थकृतामष्टमासिकी या तपोभूमि स्तदनुग्रहाऽर्थमित्यदोषः । उक्तं च निशीथचूर्णौ- 'अष्टमसिया मज्झिमातवो भूमी तीए अनुग्गहकरणत्थमट्ठमभागहारझोसणा कया इति । यत्र पुनश्चतुर्मासिके वा पञ्चमासिके वा अष्टकापहारो न भवेत् । अष्टानामेवासम्भवात् । तं सर्वं झोषयेत्सर्वमपि तत्परित्यजेत् न किमपि तत्र दानं भवतीति भावः । येभ्योऽष्टकापहारे यदवतिष्ठते के तदेतदुभयं दर्शयति—

[भा.४९२] बारस दस नव चेव य सत्तेव जहन्नगाइं ठाणाइं ।
वीसठारस सत्तरस, पन्नरठाणाण बोधव्वा ।।

वृ- द्वादश दश नव सप्तेत्यमूनि जघन्यानि स्थानानि बोधव्यानि । जघन्यतो येषां विंशत्याद्यपेक्षयामीषां स्तोकत्वात् केषां स्थाने इत्याह-विंशत्यष्टादशसप्तदशपञ्चदशस्थानानां स्थाने इदमुक्तं भवति- विंशतिस्थानानामष्टकापहारे द्वादश स्थानानि । अष्टादशानामष्टकापहारे दश । सप्तदशानामष्टकापहारे नव । पञ्चदशानामष्टकापहारे सप्तेति ।।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

[भा.४९३] पुनरवि जे अवसेसा मासा जहिं पि छन्हमासाणं ।
उवरिं झोसेउणं, छम्मासा सेस दायव्वा ।।

वृ- अष्टकापहारे कृते सति पुनरपि षन्नां मासानामुपरि येऽवशेपा मासा वर्तन्ते जेहिं जेहिं पीत्यादि अनुग्रहकृत्स्नविषयमेतत् यैरपि च दिवसैर्मासैर्वा पूर्वं प्रस्थापितानां षन्नां मासानामुपरि गच्छति तत्सर्वं स्थापनारोपणाप्रकारेण झोषयित्वा षण्मासाः शेषा दातव्याः । अनुग्रहचिन्तायां पूर्वं स्थापितषण्मासो-द्व्युढदिवसैः सह परिपूर्णीकृत्य षण्मासाः शेषा दातव्या । निरनुग्रहकृत्स्नचिन्तायां परिपूर्णाः षण्मासाः शेषा देयाः । झोषस्तु पूर्वप्रस्थापितषण्मासविषय इति ।।

[भा.४९४] छहिं दिवसेहिं गएहिं, छण्हं मासाण होति पक्खेवो ।
छहिं चेव य सेसेहिं छण्हं मासाण पक्खेवो ।।

वृ- सूत्रे तृतीया सप्तम्यर्थे । ततोऽयमर्थः । षट्सु दिवसेपु गतेषु षण्मासानां भवति प्रक्षेपः । इयमत्र भावना-ये ते प्रस्थापिताः षण्मासास्तेषां षड् दिवसा व्यूढास्तदनन्तरमन्यान् षण्मासानापन्नास्ततः पूर्वं प्रस्थापितषण्मासानां पञ्चमासाश्चतुर्विंशतिदिनाश्च झोष्यंते । झोषयित्वा च तत्र पाश्चात्याः षण्मासाः प्रक्षिप्यन्ते । ते च यथा प्रक्षिप्यन्ते यथा पूर्वप्रस्थापितषण्मासाव्यूढदिवसैः सह षण्मासा भवन्ति । एवं पाश्चात्यानामपि षण्मासानां षड् दिवसा झोपिता इति । एतद् धृतिसंहननाभ्यां दुर्बलमपेक्ष्यानुग्रहकृत्स्न-मेष मित्रवाचकक्षमाश्रमणानामादेशः । साधुरक्षितगणिक्षमाश्रमणाः पुनरेवं ब्रुवते, छहिं चेवयेत्यादि, षट्सु चेव दिवसेषु षण्मासानां प्रक्षेपः । इदमुक्तं भवति ?-ये पूर्वप्रस्थापिताः षण्मासास्ते षड्भिर्दिवसैरूनाः परिपूर्णाव्यूढाः शेषाः षट् दिवसास्तिष्ठन्ति । अत्रान्तरे अन्यान् षण्मासानापन्नास्ते षण्मासास्तेष्वेव षट्सु दिवसेषु प्रक्षिप्यन्ते । किमुक्तं भवति ? तेषां षन्नां मासानां षट् दिवसाः प्रायश्चित्तं, शेषं समस्तमपि झोषितं । पूर्वप्रस्थापितषण्मासानामपि षट् दिवसाः झोषिताः । एतत् धृतिसंहननदुर्बल-मपेक्ष्यानुग्रहकृत्स्नमिति; सम्प्रति निरनुग्रहकृत्स्नमाह—

[भा.४९५] एवं बारस मासा छद्दिवसूना य जेट्ठपठवणा ।
छद्दिवसएऽनुग्गह निरनुग्गह छागपक्खेवो ।।

वृ- इह निरनुग्रहकृत्स्ने आदेशद्वयं एकस्तावदयमादेशः । पूर्वप्रस्थापितानां षण्मासानां षट् दिवसा व्यूढास्तेषु षट्सु दिवसेषु व्यूढेषु अन्यत् षाण्मासिकमापन्नः । ततः पूर्वप्रस्थापिताः षण्मासास्तेष्वेव षट्सु दिवसेषु व्यूढेषु परिसमाप्यन्ते । किमुक्तं भवति ? । ये व्यूढाः षट् दिवसास्ते व्यूढा एव शेषा पञ्च मासाश्चतुर्विंशतिदिवसा झोपिताः यत्पुनरन्यत् षाण्मासिकं तत्परिपूर्णं दीयते । एवं षट् मासाः षडिभर्दिवसैरधिका भवन्ति । एतत् धृतिसंहननबलिष्ठस्य निरनुग्रहकृत्स्नं द्वितीय आदेशः, पूर्वप्रस्थापितानां षण्मासानां षट् दिवसाः शेषास्तिष्ठन्ति । अन्यत्समस्तमपि व्यूढं ततोऽन्यान् षण्मासान् प्राप्तः । ततो ये शेषाः षट् दिवसास्ते झोष्यन्ते पाश्चात्यं षाण्मासिकं परिपूर्णं दीयते । धृतिसंहनन-बलिष्ठत्वात् । एवं च षण्मासाः षडिभर्दिवसैर्न्यूनाः पूर्वस्थापिताः पाश्चात्याः परिपूर्णाः षण्मासाः ततः सर्वसंकलनया द्वादश मासाः षडिभर्दिवसैर्न्यूना भवन्ति । एषा ज्येष्ठा प्रस्थापनादानं । नातः परा तपोऽर्हे प्रायश्चित्ते उत्कृष्टतरा प्रस्थापनास्तीति भावः, अत्रापि सानुग्रहनिरनुग्रहचिन्तां कुर्वन्नाह-छद्दिवसगएत्यादि पूर्वप्रस्थापितानां षण्मासानां षट्सु दिवसेषु गतेषु यदन्यदापन्नं षण्मासादिकं तपस्तदारोप्यते । पूर्वप्रस्थापिताश्च अव्यूढेषु षट्दिवसा शेषा अव्यूढाः सन्ति । अन्यच्च समस्तमपि व्यूढमिति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे अन्यत् पाण्मासिकमापन्नस्तत्परिपूर्णमारोप्यते । प्राकृताश्च शेषीभूताः पट् दिवसाः त्यज्यन्ते एतन्निरनुग्रहकृत्स्नं । इति ।

[भा.४९६] चोएइ रागदोसे दुब्बलबलिए व जाणए चक्खू ।
भिन्ने खंधग्गिम्मिय, मास चउमासिए चेडे ।।

वृ- परश्चोदयति, यूयं रागद्वेषवन्तस्तथाहि यस्य षणां मासानां षट्सु दिवसेषु शेषीभूतेष्वन्यत् षाण्मासिकमापन्नं पट्सु दिवसेषु परिसमाप्यते । तस्य दुर्बलस्योपरि रागो यतो यूयं जानीथ एष बलिकः सन् सुखं विनयवैयावृत्यं करोति । यस्य पुनः पूर्वप्रस्थापितषण्मासानां पञ्चसु मासेषु चतुर्विंशतौ दिवसेषु व्यूढेषु षट् दिवसाः शेषीभूता झोषिताः ।। अन्यत् पाण्मासिकमारोपितं, तस्य बलिष्ठस्योपरि विद्वेषः । अत्रापि जानीथ यथैष तपःकृशशरीरो नास्माकं शक्नोति वैयावृत्यं कर्तुं तस्माद्दीयतामस्य निरनुग्रहप्रायश्चित्तमिति । एवं भवन्तः कुर्वन्तो नूनं चक्षुर्मलं कुरुथ । चक्षुर्मलो नाम यदेकं चक्षुरुन्मीलयति अपरं निमीलयति । एवमेकं सानुग्रहप्रायश्चित्तदानेन जीवापयथ । अपरं निरनुग्रहप्रायश्चित्तदानेन मारयथेति । अत्राचार्य आह भिन्नेत्यादि पश्चार्द्धं भिन्नो नाम तत्कालमरणिनिर्मन्थनेन नवोदितोऽग्निः स यथा महति काष्ठादिके प्रक्षिप्ते तद्दग्धुमसमर्थो भवति, शीघ्रं च विध्यायति, स एव श्लक्ष्णकाष्ठछगणादिचूर्णादिषु स्तोकं प्रक्षिप्यमाणेषु क्रमेण प्रबल उपजायते । स्कन्धाग्निर्नाम महत्काष्टं प्रज्वल्याग्निरूपतया परिणमितः स महत्यपि काष्ठादिके प्रक्षिप्ते तद्दग्धुं समर्थो भवति । प्रबलः प्रबलतरश्चोपजायते । एवं दुर्बलस्य पट्सु मासेषु पूर्वप्रस्थापितेषु बहुषु व्यूढेषु षट्सु दिवसेषु शेषीभूतेषु यदि वा पट्सु मासेषु पूर्वस्थापितेषु षट्सु दिवसेषु व्यूढेषु यदन्यत् षाण्मासिकं तपः पृथिग् दीयते । ततः सभिन्नाऽग्निरिव विषीदति धृतिसंहननाभ्यां बलीयानिति न विद्राति न च विषादमुपगच्छति, स्कन्धाग्निरिव । तथा द्वौ चेटौ, तद्यथा-मासजातश्चतुर्मासजातश्च तत्र यदि मासजातस्य चेटस्य चतुर्मासचेटाहारो दीयते, तदा सोऽजीर्णेन विद्राति, चतुर्मासजातस्यापि यदि मासजातवदाहारो दीयते, तदा स तेनाहारेण नात्मानं सन्धारयितुमलं । एवं यो दुर्बलस्तस्य यदि बलिष्ठं प्रायश्चित्तं दीयते, तदा स विद्राति दुर्बलत्वात् मासिकचेटकवत्, बलिष्ठस्यापि यदि दुर्बलप्रयाश्चित्तं दीयते, तदा स तावता न शुद्धिमासादयतीत्यशुद्धया विषीदति । ततो यथा भिन्नाग्नौ स्तोकमिन्धनं स्कंधाग्नौ प्रभूतमिन्धनं तथा मासजाते चेटे स्तोकमाहारं, चतुर्मासजाते प्रभूतमाहारं प्रयच्छतो न रागद्वेषवत्तायोग्यतानुरूपप्रवृत्तः । तथा दुर्बले बलिष्ठे च यथोक्तरूपं प्रायश्चित्तं ददाना न वयं रागद्वेषवंत इति उक्त उभयतरकः ।

इदानीं आत्मतरकादयो वक्तव्याः । परमुभयतरसदृशोऽन्यतर इति स एवोत्क्रमेण प्रथमतो भण्यते तस्य स्वरूपमिदम्यथा एकेन स्कन्धेन द्वेकापोत्यौ युगपत् वोढुं न शक्नोति तथा सोऽप्यन्यतरकः प्रायश्चित्तवैयावृत्ये युगपत्कर्तुं न शक्नोति । स च संचयितमसंचयितं वा प्रायश्चित्तमापन्नोऽथ च तदा गुरूणामन्यो वैयावृत्यकरो न विद्यते । ततस्तदापन्नं प्रायश्चित्तं निक्षिप्तं क्रियते । एतेन यदुक्तमधस्तात् निक्षिप्तमिति तद्भावितमवसेयं । गुरूणां वैयावृत्यं कार्यते तच्च वैयावृत्यं कुर्वन् यदीन्द्रियादिभिरन्यदापद्यते तत्सर्वं झोष्यते यदा तु वैयावृत्यं समाप्तं भवति, तदा तत्प्राग् निक्षिप्तं प्रायश्चित्तमुत्क्षिप्यते । तच्च वहन् यदीन्द्रियादिभिरन्यदापद्यते तदनेन विधिना दातव्यं ।

[भा.४९७] सत्त चउक्का उग्घाइयाण पंचेव होंति अनुग्घाया ।
पंच लहु पंच गुरुगा, गुरुगा पुनपंचगा तिन्नि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४१८] सत्तारस पन्नारस निक्खेवा होंति मासियाणं तु ।
वीसट्ठारस भिन्ने तेन परं निक्खिणवयाउ ।।

वृ- सोऽन्यतरः पूर्वप्रस्थापितं प्रायश्चित्तं वहन् यदि स्तोकं बहु उद्घातमनुद्घातं वा प्रायश्चित्तस्थानमापन्नस्ततो यदि पूर्वप्रस्थापितं प्रायश्चित्तमुद्घातस्तत उद्घातो भिन्नमासो दीयते । यदि पुनरापद्यते तदा भूयोऽपि भिन्नमासदानमेवं भूयो भूय आपत्तौ विंशतिवारान् भिन्नमासा दातव्याः ।। तदनन्तरं सप्तदशवारा लघुमासाः । एवं द्विमासत्रिमासा अपि वक्तव्यास्तदनन्तरमपि भूयो भूय आपत्तौ सप्तवाराश्चतुर्मासाः ७ । ततः परं पञ्चवाराः । पञ्च लघुमासाः ५ । तदनन्तरं त्रीन्वारान् च्छेदः । ततः परं वारत्रयं मूलं, तदनन्तरं वारत्रयमनवस्थाप्यं, तदनन्तरमेकं वारं पाराञ्चितमिति ।

अथ तस्य पूर्वस्थापितमनुद्घातितं । ततोऽष्टादश वारा गुरुभिन्नमासा दातव्याः । तदनन्तरं पञ्चदशवारा गुरुमासाः । एवं द्विमासास्त्रिमासा अपि वक्तव्याः । तदनन्तरं पञ्चवाराश्चत्वारो गुरुमासाः। ततोऽपि परं त्रिवाराः पञ्च गुरुमासाः ३ । ततो वारत्रयं छेदः ४ । तदनन्तरं वारत्रयं मूलं । ततः परं वारत्रय-मनवस्थाप्यं । एवं संचयितेऽप्युद्घातेऽनुद्घाते वक्तव्यम् । नवरमादिमास्तपोभेदा न वक्तव्याः । किन्तु प्रथमत एव षाण्मासिकं, तदनन्तरं च्छेदत्रिकादि अष्टकापहारादिकं पूर्ववद्वक्तव्यम् । अधुना-क्षरगमनिका-इह विचित्रा व्याख्या प्रवृत्तिरिति पश्चानुपूर्व्या व्याख्या विधेया । पूर्वप्रस्थापितमुद्घात-मनुद्घातं च वहतो यथाक्रमं भिन्ने भिन्नमासविषये दानं विंशत्यष्टादशवारान् । किमुक्तं भवति ? पूर्वप्रस्थापितमुद्घातं प्रायश्चित्तं वहतो विंशतिवारा भिन्नमासा दातव्याः । अनुद्घातं वहतोऽष्टादश वारा भिन्नमासाः तेनपरमित्यादि, ततो भिन्नमासदानात् पश्चानुपूर्व्या परं प्रागिति भावार्थः । निक्षेपणता निक्षिप्तता आसीत् विंशत्यष्टादशवारानन्तरं च उद्घातं पूर्वप्रस्थापितं वहतो मासिकानां लघूनां मासिक द्वैत्रैमासिकानां सप्तदशक्षिपा भवन्ति । सप्तदशवारं दानं भवतीत्यर्थः । अनुद्घातं पूर्वप्रस्थापितं वहतो मासिकानां निक्षेपाः पञ्चदश भवन्ति । पञ्चदशवारं मासिकानां दानमित्यर्थः । तथा उद्घातितानां चतुष्कमासचतुष्टयानि सप्त भवन्ति । अनुद्घाताः चतुष्काः पञ्च भवन्ति । तथा पञ्च मासा लघुकाः पञ्च भवन्ति, गुरुकाः पुनः पञ्चकाः पञ्चमासास्त्रय इदमुक्तं भवति ? पूर्वप्रस्थापितमुद्घातं वहतस्त्रिमास-दानानन्तरं सप्तवाराश्चत्वारो लघुमासा दातव्यास्तदनन्तरं पञ्चवाराः पञ्चमासा लघवः अनुद्घातं पूर्वप्रस्थापितं वहतो गुरुमासत्रिमासदानानन्तरं पञ्चवारा लघवः गुरुवश्चतुर्मासा दातव्याः । ततः परं गुरवः पञ्च मासास्त्रिवारा इति तदेवमेकेषामाचार्याणां व्याख्यानमुपदर्शितमन्ये पुनरेवं व्याख्यानयन्ति–

अन्यतरो नाम द्विधा आत्मतरः परतरश्च । तत्रात्मतरस्य प्रायश्चित्तदानविधानमिदम्-सत्तचउक्काउग्घाइयाणमित्यादि, यदि पूर्वस्थापितमुद्घातं वहन् भूयो भूयोऽन्यदापद्यते प्रायश्चित्तं तदा प्रथमत एव सप्तवारा उद्घातितानां लघूनां मासानां चतुष्का दातव्याः । सप्तवारा लघवः चतुर्मासा देयाः, तदनन्तरं पञ्चवारा लघवः पञ्चमासास्तदनन्तरं वारत्रयं च्छेदः । ततः परं वारत्रिकं मूलं । ततो वारत्रिकमनवस्थाप्यं । तत एकवारं पाराञ्चितम् । अथानुद्घातं पूर्वप्रस्थापितं वहन् पुनः पुनरापद्यते प्रायश्चित्तं । तत आदौ पञ्च वारा अनुद्घाता गुरुवश्चत्वारो मासा दाने भवन्ति । तदनन्तरं त्रीन्वारान् पञ्च मासा गुरुवस्ततो वारत्रयं च्छेदं । तदनन्तरं वारत्रयं मूलं, ततो वारत्रयमनवस्थाप्यं । तत एकवारं पाराञ्चितं यस्त्वन्यतर परतरस्तस्येदं प्रायश्चित्तविधानम्-सत्तरसपन्नरसेत्यादिपूर्वप्रस्थापितमुद्घातं प्रायश्चित्तं वहन् यदि भूयो भूयो भूयः स्तोकं बहु वा अन्यत् प्रायश्चित्तमापद्यते । ततस्तस्य सप्तदश त्रैमासिकानां निक्षेपा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति । सप्तदशवारं त्रैमासिकं दीयते इति भावः । तदनन्तरं भूयो भूय आपत्तौ सप्तदश निक्षेपा द्वैमासिकानां । तदनन्तरं सप्तदश निक्षेपा मासिकानां ततपरं निक्षेपणता निक्षेपणं दानं भिन्ने भिन्नमासस्य विंशतिवारान् । ततः परं वारत्रयं छेद स्तदनन्तरं वारत्रयं मूलं, ततः परं वारत्रयमनवस्थाप्यं, तत एकवारं पाराञ्चितं - अनुद्घातं पूर्वप्रस्थापितं वहन् यदि भूयो भूयः स्तोकं बहु वा प्रायश्चित्तमन्यदापद्यते । तस्य पञ्चदश गुरूणां द्वैमासिकानां निक्षेपा भवन्ति । पञ्चदशवारं द्वैमासिकं गुरु दीयते इत्यर्थः । तत परं निक्षेपणता भिन्नमासानां गुरूणामष्टादशवारान्, ततः परं वारत्रयं च्छेदस्तदनन्तरं वारत्रयं मूलं, ततोऽनवस्थाप्यत्रिकं, ततः एकवारं पाराञ्चितमिति उक्तोऽन्यतरः ।।-

साम्प्रतमात्मतरस्य प्रायश्चित्तदानमुच्यते-संचयितमसंचयितं वा प्रत्येकमुद्घातमनुद्घातं वा वहन् यदि भूयो भूयः स्तोकं बहु वान्यदिन्द्रियादिभिः प्रायश्चित्तमापद्यते । तदा सप्तवारं लघुमासिकं दीयते । तत परं भूयो भूय आपत्तौ चतुर्वारं लघुकं चातुर्मासं । ततः परं च्छेदत्रिकं, तदनन्तरं मूलत्रिकं । तदनन्तरं अनवस्थाप्यत्रिकं । तत एकवारं पाराञ्चितं । यदि पुनः पूर्वप्रस्थापितमनुद्घातं वहन् स्तोकं बहु वान्यदापद्यते, भूयो भूयस्ततः पञ्चवारान् गुरुमासिकं दीयते । ततः परं त्रीन् वारान् चतुर्गुरुकं, ततो वारत्रयं च्छेदस्तदनन्तरं वारत्रयं मूलं ततो वारत्रयमनवस्थाप्यं, तत एकवारं पाराञ्चितमेतदेवाह-

[भा.४९९] आइत्तरमाइयाणं मासा लहुगुरुगसत्तपंचेव ।
चउतिगचाउम्मासा तत्तो य चउव्विहो भेओ ।।

वृ- आत्मतरो नाम यस्य वैयावृत्यकरणे लब्धिर्नास्ति । आदिशब्दात् परतरपरिग्रहः आत्मतरआदिर्येषां ते आत्मतरादयः आत्मतराः परतराश्चेत्यर्थः । तेषामात्मतरादीनां प्रायश्चित्तदाविधिरुच्यते - तत्रात्मतराणामयमुद्घातं पूर्वप्रस्थापितं वहतां सप्तवारान् लघुमासा दीयन्ते । तदनन्तरं चतुरो वारान् चतुर्मासा लघवः । ततश्चतुर्विधो भेदस्छेदमूलानवस्थाप्य पाराञ्चितलक्षणो दातव्यः । अनुद्घातं पूर्वप्रस्थापितं वहतां पञ्च वारान् गुरुमासा दीयन्ते । तदनन्तरं त्रीन् वारान् गुरवश्चतुर्मासाः । ततो यथोक्तरूपश्चतुर्विधो भेदः । सम्प्रति परतरस्य प्रायश्चित्तदानविधिरभिधीयते । परतरो नाम यस्य वैयावृत्यकरणे लब्धिरस्ति न तपसि, ततः स यदा तपः करोति न तदा वैयावृत्यं कर्तुं समर्थ इति । अत्रापि एकस्कन्धेन कापोतीद्वयं वोढुं न शक्यमिति दृष्टान्तो वक्तव्यः । यश्च प्रायश्चित्तं संचयितमसंचयितं वापन्नस्तत् तु यावद्वैयावृत्यं करोति, तावत् निक्षिप्तं क्रियते, वैयावृत्यं च कुर्वन् यद्यन्यदापद्यते तत् सर्वं झोष्यते । वैयावृत्त्ये च समाप्ते तत् पूर्वनिक्षिप्तं प्रस्थाप्यते, तच्च वहन् यदि भूयो भूयः इन्द्रियादिभिरन्यदापद्यते । तत उद्घातं पूर्वप्रस्थापितं वहतः सप्तवारान् लघुमासिकं दीयते । तदनन्तरं पञ्चवारान् चतुर्लघुकं । ततः परं वारत्रयं च्छेदस्तदनन्तरं वारत्रयं मूलं, ततः परं वारत्रयमनवस्थाप्यं, ततः एकवारं पाराञ्चितमिति । अनुद्घातं पूर्वप्रस्थापितं वहतः षट्वारान् गुरुमासिकं दीयते । तदनन्तरं चतुरो वारान् चतुर्गुरुकं । ततः परं वारत्रयं च्छेदस्तदनन्तरं वारत्रयं मूलं, ततः परं वारत्रयमनवस्थाप्यं । तत एकवारं पाराञ्चितं । एतदेव सुव्यक्तार्थमाह–

[भा.५००] आवन्नो इंदिएहिं परतरए झोसणा ततो परेणं ।
मासलहुगाय सत्त उ छच्चेव होंति मास गुरु ।।

[भा.५०१] चउ लहुगाणं पनगं चउगुरुगाणं तहा चउक्कं च ।
तत्तो च्छेदादीयं, होइ चउक्कं मुनेयव्वं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- परतरको वैयावृत्त्यं तु कुर्वन् यदि इन्द्रियादिभिः स्तोकं बहु वा आपद्यते प्रायश्चित्तं ततस्तस्मिन् परतरके ततो वैयावृत्यकरणादारभ्य यावद्वैयावृत्यं करोति तावत् परोपकारीति । स्तोकं बहु वा यदन्यदापद्यते, तस्य सर्वस्य झोषणता परित्यागः । ततो वैयावृत्यसमाप्त्यनन्तरं पूर्वनिक्षिप्तं प्रायश्चित्तमुद्घातं वहतो भूयो भूय आपत्तौ मासलघुकाः सप्त भवन्ति दातव्याः, सप्तवारान् लघुमासो दीयते इति भावः । अनुद्घातं वहतः षट् भवन्ति मासगुरवो देयाः षट् वारान् गुरुमासो दीयते इत्यर्थः । च उलहुगाणमित्यादि उद्घातं वहतः सप्तवारलघुमासिकदानानन्तरं भूयो भूय आपत्तौ चर्तुलघुकानां पञ्चकं दात्तव्यम् । पञ्च वारान् चत्वारो मासलघुका दातव्या इत्यर्थः । अनुद्घातं वहतः षड्वारगुरुमासिकादानानन्तरं चतुर्गुरुकाणां चतुष्कं चतुरो वारान् चतुर्गुरुकं देयम् । ततः परमभुयस्यापि च्छेदादि चतुष्कं च्छेदमूलानवस्थाप्य पाराञ्चित लक्षणं भवति । पूर्वप्रकारेण दानबुद्धया ज्ञातव्यं । साम्प्रतं झोषणा ततो परेणं एतस्य व्याख्यानार्थमाह–

[भा.५०२] तं चेव पुव्वभणियं परतरए नत्थि एगखंधादी ।
दो जोए अचयंते, वेयावच्चट्ठया झोसो ।।

वृ- यत्पूर्वमन्यतरके भणितं यथा नास्त्येतत् यत् एगखंधाई एकेन स्कन्धेन एककालं द्वे कापोत्या वुह्येते इति तदेव परतरकेऽपि सर्वं भणनीयम् । ततो द्वौ योगौ तपःकरणवैयावृत्यलक्षणौ युगपदशक्नुवन् संचयितमसंचयितं वा यदापन्नस्तन्निक्षिप्तं कृत्वा वैयावृत्यं कुरुते । वैयावृत्यं च कुर्वतो यद्यदापन्नं स्तोकं बहु वा तस्य सर्वस्यापि वैयावृत्यार्थतया प्रवृत्तत्वात् झोषः परित्यागः कर्त्तव्यः । तदेवं तपो भणितं यानि यत्र भिन्नमासादीनि मासादीनि वा तपःस्थानानि षट् पञ्चेत्यादिलक्षणानि तावन्ति दिनानि च्छेदप्राप्ते च्छेदाः कर्तव्याः । अथ मूलं कीदृशस्य देयमुच्यते-

[भा.५०३] तवतीयमसद्दहए तवबलिए चेव होइ परियागे ।
दुब्बल अप्परिणामे अत्थिरअबहुस्सुए मूलं ।।

वृ- यो मासादिकं षण्मासपर्यन्तं तपोऽतीतो व्युत्क्रान्तः । किमुक्तं भवति ? । मासादिना षण्मासपर्यन्तेन तपसा यो न शुद्धयति, तपोग्रहणमुपलक्षणं देशच्छेदमपि योऽतीतो देशच्छेदेनापि यो न शुद्धयतीति भावः, तस्य मूलं दीयते, इति सर्वत्र सम्बद्धयते । तथा असद्दहिए इति तपसा पापं शुद्धयतीति एतद्यो न श्रद्दधाति, तस्मिन्नप्यश्रद्दधाने मूलं अथवा अश्रद्दधानो नाम मिथ्यादृष्टिः । ततो यो अश्रद्दधान एव सन् व्रतेषु स्थापितः पश्चात्सम्यक्त्वं प्रतिपन्नः सन् सम्यगावृत्तो भवति तस्य मूलं देयं यथा गोविन्दवाचकस्य दत्तमिति । तव बलिएत्ति तपसा बलिको बलिष्ठोऽसौ तपोबलिकः । किमुक्तं भवति ? । महतापि तपसा यो न क्लाम्यति, यत्र तत्र स्वल्पे प्रयोजने तपः करिष्यामीति विचिन्त्य प्रतिसेवते । यदि वा षाण्मासिके तपसि दत्ते वदति समर्थोऽहमन्यदपि तपः कर्तु तदपि मे देहीति तस्मिन् तपोबलिके मूलं पर्याये इति यस्य च्छेदेन छिद्यमानः पर्यायो न पूर्यते न पूर्यते स्तोकत्वात् । अथवा च्छेदपर्यायं यो न सम्यक् श्रद्दधाति । यथा कोऽयमर्थजरतीयो न्यायः कियत्पर्यायस्य च्छिद्यते कियन्नेति, च्छिद्यते तर्हि मूलत एव च्छिद्यतां । यदि वा न किमपीति, यदि वा वक्ति रत्नाधिकोऽहं बहुकेऽपि परिच्छिन्ने पर्याये अस्ति मे दीर्घः पर्याय इति न किमपि च्छेत्स्यति, तस्य सर्वस्यापि पर्याये हीनस्य पर्याये श्रद्धानरहितस्य पर्याये गर्वितस्य मूलं, तथा यो बहु प्रायश्चित्तमापन्नोऽथ च धृतिसंहननाभ्यां दुर्बलत्वात् तपःकर्तुमसमर्थस्तस्मिन् दुर्बले मूलं, तथायोऽपरिणामत्वात् ब्रूते । यदेतत्तपः षाण्मासिकं युष्माभिर्मे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दत्तमेतेनाहं न शुद्धयामि प्रायश्चित्तस्य बहुत्वात् तस्मिन्नप्यपरिणामे मूलं, तथा यो धृतिदुर्बलतया पुनः पुनः प्रतिसेवते तस्मिन्नस्थिरे धृत्यवष्टम्भरहिते मूलं, तथाऽबहुश्रुतोऽगीतार्थः । अथवानवस्थाप्यंपाराञ्चितं वा आपन्नस्तस्य वाऽबहुश्रुततया तद्दानायोग्यता तस्मिन्नप्यबहुश्रुते मूलं दातव्यमिति । साम्प्रतमाचार्यो विशेषं दर्शयितुकामो यदेवाधस्तादुक्तं तदेव प्रच्छयन्नाह —

[भा.५०४] जहमन्ने एगमासियं सेविऊण एगेन सो निग्गच्छे ।
तहमन्ने मासिय सेविऊण चरमेन निग्गच्छे ।।

वृ- चोदको वक्ति-अहं एवं मन्ये यथा मासिकं परिहारस्थानं सेवित्वा सोऽधिकृतप्रायश्चित्तप्रतिपन्ना एकेन मासेनेति गम्यते निर्गच्छति शुद्धयति । तथा आस्तामन्येन द्वैमासिकादिना एतदप्यहमन्ये, अतिशयज्ञापनार्थं भूयो मन्ये इत्युपादानं मासिकं सेवित्वा चरमेण पाराञ्चितेन निर्गच्छति शुद्धयति । एवं चोदकेनोक्ते सत्याचार्य आह-सत्यमेतत् । यथा मासिकं सेवित्वा मासेन स निर्गच्छति तथा मासिकं सेवित्वा कदाचिच्चरमेण शुद्धयति । इह मासिकं सेवित्वा मासेन शुद्धयतीत्यादि गमो गृहीतो मासिकं सेवित्वा चरमेण शुद्धयति । इत्यन्तगमः आद्यन्तग्रहणे मध्यमस्यापि ग्रहणमिति शेषा अपि गमाः सूचिताः। मासिकग्रहणेन द्वैमासिकादीन्यपि । तद्यथा - मासं सेवित्वा मासेन निर्गच्छति तथा मासं सेवित्वा द्वाभ्यां मासाभ्यां निर्गच्छति, मासं सेवित्वा त्रिभिर्मासैर्निर्गच्छति, मासं सेवित्वा चतुर्भिर्मासैर्निर्गच्छति, मासं सेवित्वा पञ्चभिर्मासैर्निर्गच्छति, मासं सेवित्वा षड्भिर्मासैर्निर्गच्छति । मासं सेवित्वा च्छेदेन निर्गच्छति, मासं सेवित्वा मूलेन निर्गच्छति । मासं सेवित्वा अनवस्थाप्येन निर्गच्छति, मासं सेवित्वा चरमेण पाराञ्चितेन निर्गच्छति, तथा द्वैमासिकं सेवित्वा द्वाभ्यां मासाभ्यां निर्गच्छति । द्वैमासिकं सेवित्वा त्रिभिर्मासैर्निर्गच्छति एवं यावत् द्वैमासिकं सेवित्वा चरमेण निर्गच्छति, तथा त्रैमासिकं सेवित्वा त्रिभिर्मासैर्निर्गच्छति, त्रैमासिकं सेवित्वा चतुर्भिर्मासैर्निर्गच्छति । एवं यावत् त्रैमासिकं सेवित्वा चरमेण निर्गच्छति, तथा चातुर्मासिकं सेवित्वा चतुर्भिर्मासैर्निर्गच्छति यावच्चरमेण निर्गच्छति । तथा पञ्चमासिकं सेवित्वा पञ्चभिर्मासैर्निर्गच्छति । एवं यावच्चरमेण निर्गच्छति, तथा पाण्मासिकं सेवित्वा षड्भिर्मासैर्निर्गच्छति यावच्चरमेण निर्गच्छति । छेदं सेवित्वा च्छेदेन निर्गच्छति, यावच्चरमेण निर्गच्छति, मूलं सेवित्वा मूलेन निर्गच्छति यावच्चरमेण, अनवस्थाप्यं सेवित्वा अनवस्थाप्येन निर्गच्छति, अनवस्थाप्यं सेवित्वा चरमेण निर्गच्छति । अत्र शिष्यः प्राह-यस्मिन्नापन्ने यत्तदेव दीयते तदापत्तिसमं दानमुचितं अन्यदृशत्वासेविते यदन्यादृशं दीयते । तत्र को हेतुः ? । आचार्य आह-

[भा.५०५] जिननिल्लेवणकुडए मासे अपलिउंचमाणे सट्ठाणं ।
मासेण विसुज्झिहिई, तो देई गुरुवएसेणं ।।

वृ- जिनाकेवलिनो जिनग्रहणादवधिमनः पर्यायज्ञानिनः चतुर्दशदशनवपूर्वधरा गृहीताः एते यथावस्थिताः संक्लेशविशोधीः परिज्ञाय अपराधनिष्पन्नं मासकादिभावनिष्पन्नं च द्विमासिकादि यथा विशुद्धयति तथा तद्विशोधिनिमित्तं प्रायश्चित्तं ददति । तत्राध्यवसानेन मासे प्रतिसेविते यद्यप्रतिकुञ्चितमालोचयति । ततस्तस्मिन्नालोचनायामप्रतिकुञ्चति स्वस्थानं मासमेव प्रयच्छन्ति । अथ प्रतिकुञ्चनया आलोचयति । अथवा यानि द्वैमासिकादीनां प्रायश्चित्तानामर्हाणि यानि अध्यवसाय स्थानानि तैर्मासः प्रतिसेवितः । एष द्विमासादिभिर्मासैर्विशोत्स्यतीति जिनाः केवलादिबलतः श्रुतव्यवहारिणो वा गुरूपदेशेनाधिकमपि प्रायश्चित्तं प्रयच्छंति । अत्र चार्थे निल्लेवण कुडे इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्लेपनकुटदृष्टान्तः । निर्लेपनो रजकः । कुटो जलभृतो घटः । यथा जलकुटैर्वस्त्राणि रजकः प्रक्षालयति तथापराधपदानि जिनादयो मासादिभिः शोधयन्ति । अथवा निर्लेपनं लेपस्य मलस्याभावः । कुटो जलकुटः स दृष्टान्तः । अत्र चत्वारो भङ्गाः-एकं वस्त्रमेकेन जलकुटेन निर्लेपनं क्रियते १, एकवस्त्रमनेकैर्जलकुटैः २, अनेकानि वस्त्राणि एकेन जलकुटेन ३, अनेकानि वस्त्राणि अनेकजलकुटैः ४ । तत्र प्रथमद्वितीयभङ्गव्याख्यानार्थमाह—

[भा.५०६] एगुत्तरिया घडच्छ क्कएण च्छेयादि होंति नियमाणं ।
एएहिं दोसवुड्ढी कप्पिज्जइ दोहिं ठाणेहिं ।।

वृ- एकोत्तरिका घटस्य वृद्धिः, घटषट्केन परिसमापयितव्या । इयमत्र भावना-कोऽप्यल्पमलः पट एकेन जलकुटेन शुद्धयति । स गृह एव प्रक्षाल्यते, एष प्रथमो भंगः । ततो मलिनतरः कठिनमलो वा पटो द्वाभ्यां कुटाभ्यां शुद्धिमासादयति, सोऽपि गृह एव प्रक्षाल्यते । ततोऽपि मलिनतरस्त्रिभिः कुटैः सोऽपि गृहे प्रक्षाल्यते । एवमेकोत्तरिका वृद्धिस्तावज्ज्ञेया यावत् कोऽपि मलिनतरः षड्भिर्जलकुटैः शुद्धयति । सोऽपि गृहे एव प्रक्षाल्यते । अत्र वस्त्रस्थानीयान्यपराधपदानि मलस्थानीयानि रागद्वेषाध्यवसायस्थानानि तज्जनितो वा कर्मसंचयः, जलकुट स्थानीयानि मासिकादीनि प्रायश्चित्तानि, तथा ह्यल्पमपराधपदमेकेन मासेन शुद्धयति । ततो गुर्वपराधपदं द्वाभ्यां मासाभ्यां, गुरुतरमपराधपदं त्रिभिर्मासैस्ततोऽपि गुरुतरं चतुर्भिर्मासैर्यावत् गुरुतरमपराधपदं षड्भिर्मासैः । छेयाइं होंति निग्गमनमिति ये गाढगाढतरादिमलाः पटास्ते गृहान्निर्गत्य बहिः सरित्तडागादि गत्वा प्रभूतप्रभूततरैः क्षारगोमूत्रादिभिर्बहुबहुतरैराच्छोटनपिट्टनादिभिर्महन्महत्तरप्रयत्नैः शुद्धिमासादयन्ति । तथापराधपदान्यपि गाढगाढतराध्यवसायनिर्वर्तितानि च्छेदमूलानवस्थाप्य पाराञ्चितैः पर्यायादिभ्यो निःकाशेन शुद्धयन्ति। ततो निर्गमनं निर्गमनतुल्याश्छेदादयो भवन्ति । अथ कथं जलकुटबहिर्निगमनतुल्यामासादिच्छेदादय इति अत्राह-एएहिं इत्यादि । एताभ्यामनन्तरोदिताभ्यां द्वाभ्यां स्थापनाभ्यां मासादिच्छेदादिलक्षणाभ्यां दोषवृद्धिस्तीव्रतीव्रतररागद्वेषाध्यवसायवृद्धिस्तज्जनिताकर्मोपचयवृद्धिर्वा कल्प्यते, च्छिद्यते, ततो मासादि च्छेदादयो जलकुटनिर्गमनसमानाः । साम्प्रतमेगोत्तरिया घडच्छक्कएणंति व्याख्यानयति—

[भा.५०७] अप्पमलो होइ सुई, कोइ पडो जलकुडेण एक्केण ।
मलपरिवुड्ढीए भवे कुडपरिवुड्ढी उ जा छन्नू ।।

वृ- कोऽपि पटोऽल्पमलः सन् एकेन जलकुटेन शुचिर्भवति शुद्धयति । एष प्रथम भङ्ग उक्तः, मलपरिवृद्धौ कुटपरिवृद्धिर्भवति । सा च तावत् यावत् षट् । तुशब्दोऽतिविशेषणार्थः । स चैतद्विशिनष्टि, षट्केन यावत् पटस्य शुद्धिर्गृह एव क्रियते । इयमत्र भावना-बहुमलः पटो द्वाभ्यां जलकुटाभ्यां शुद्धयति। बहुमलतरस्त्रिभिर्जलकुटैरेवं मलपरिवृद्धया जलकुटपरिवृद्धिस्तावदवसेया यावत् बहुमलतमः षड्भिर्जलकुटैरेते च गृह एव प्रक्षाल्यन्ते, एवमपराधपदान्यपि मासिकादीनि साधूनां स्वपर्यायमंडल्यादिरूपगृहे एव स्थितानि मासिकादिभिः प्रायश्चित्तैः शोध्यन्ते, एतेन द्वितीयो भंग उपदर्शितः । छेयाई होंति निग्गमणमित्यस्य व्याख्यानमाह—

[भा.५०८] तेन परं सरियादी गंतुं सोहिंति बहुतरमलं तु ।
मलनाणत्तेन भवे, आयं च ण जत्तनाणत्तं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तस्मादनन्तरोदितात् पटात् परं बहुतरमलं पटं सरिदादि, सरिद्नदी, सरिद्नदी, आदिशब्दात् हृदकूपतडागादिपरिग्रहः, तत्रगत्वा शोधयन्ति । एवं साधूनामप्यपराधपदानि चछेदादिभिः पर्यायमण्डल्यादिरूपात् गृहान्निष्काशनेन जिनादयः शोधयन्ति । मलनाणत्तेनेत्यादि द्वितीयादिपदेषु यथा यथा मलनानात्वं तथा तथा आदंचनं । यत्ननानात्वमपि । आदञ्चनं नाम गोमूत्राजालिण्डिकोखादि यत्नआच्छोटनपिट्टनादिषु प्रयत्नः तन्नानात्वमपि । तथा हि-यथा यथा मलस्योपचयस्तथा तथा बहुतरगोमूत्रादिप्रक्षेपो बहुबहुतरआच्छोटनपिट्टनादिषु प्रयत्नस्ततो भवति । मलनानात्वे आदञ्चन यत्ननानात्वमिव साधूनामप्यपराधपदेषु रागद्वेषोपचयवृद्धौ मासादिवृद्धिस्तपः क्रियाधिशेषवृद्धिश्चेति चरमतृतीयभङ्गव्याख्यानार्थमाह-

[भा.५०९] बहुएहिं जलकुंडेहिं बहूनि वत्थाणि कानि वि विसुज्झे ।
अप्पमलाणि बहूणिवि कानि वसिज्झंति एक्केण ।।

वृ- कानिचित् वस्त्राणि तथाविधगाढमलानि बहूनि बहुभिर्जलकुटैर्विशुद्धयन्ति । एवमपराधपदान्यपि तथाविधानि बहूनि साधूनां बहुभिर्मासैः शुद्धिमासादयन्ति । एतेन चतुर्थभङ्गो व्याख्यातः । तथा कानिचित् अल्पमलानि बहूनि वस्त्राणि एकेन जलकुटेन शुद्धयन्ति । एवं मन्दानुभावकृतानि बहून्यपि साधूनामपराधपदानि एकेन मासेन शुद्धयन्ति । एष तृतीय भंग उपदर्शितः अत्र शिष्यः प्राह-रागद्वेषवृद्धिवशतः प्रायश्चित्तवृद्धिरुपलब्धा तथा किं रागद्वेषहानिवशतः प्रायश्चित्तहानिरप्युपलब्धा । आचार्य प्राह-उपलब्धा तथा चैतदेव पृच्छति-

[भा.५१०] जहमन्ने दसमं सेविऊण निग्गच्छए उदसमेणं ।
तहमन्ने दसमं सेविऊण नवमेण निग्गच्छे ।।

वृ- अहं एवं मन्ये, यथा दशमं प्रायश्चित्तं पाराञ्चित्तं प्रतिसेव्य दशमेन पाराञ्चितेन प्रायश्चित्तेन निर्गच्छति । तथा एतदपि मन्ये दशमं पाराञ्चितं सेवित्वा नवमेन अनवस्थाप्येन प्रायश्चित्तेन निर्गच्छति शुद्धयति । आचार्य आह-सत्यमेतत् । दशमं सेवित्वा दशमेन शुद्धयति कदाचिन्नवमेनापि अनया गाथया सर्वेऽधोमुखागमाः सूचिताः । ते चामी-दशमं सेवित्वा मूलेन निर्गच्छति, एवं षाण्मासिकेन पाञ्चमासिकेन चातुर्मासिकेन त्रैमासिकेन द्वैमासिकेन मासिकेन च वक्तव्यम् । दशमं सेवित्वा भिन्नमासेन निर्गच्छति। दशमं सेवित्वा विंशत्या रात्रिंदिवैर्निर्गच्छति दशमं सेवित्वा पंचदशभीरात्रिंदिवैर्निर्गच्छति दशमं सेवित्वा दशभीरात्रिंदिवैर्निर्गच्छति दशमं सेवित्वा पंचभीरात्रिंदिवैर्निर्गच्छति दशमं सेवित्वा दशमभक्तेन निर्गच्छति, दशमं सेवित्वा अष्टमेन निर्गच्छति, दशमं सेवित्वा षष्ठेन निर्गच्छति, दशमं सेवित्वा पूर्वार्द्धेन निर्गच्छति । दशमं सेवित्वानिर्विकृतिकेन निर्गच्छति । तथा अनवस्थाप्यं सेवित्वा अनवस्थाप्येन निर्गच्छति अनवस्थाप्यं सेवित्वा मूलेन निर्गच्छति । एवं यावन्निर्विकृतिकेन निर्गच्छति । एवं मूलेऽपि नेतव्यम् । यावन्मूलं सेवित्वा निर्विकृतिकेन निर्गच्छति । एवं चछेदे एवं षाण्मासिके, एवं पाञ्चमासिके, एवं चातुर्मासिके, एवं त्रैमासिके, एवं द्वैमासिके, एवं मासिके, एवं भिन्नमासे विंशति रात्रिंदिवे पञ्चदशरात्रिंदिवे दशरात्रिंदिवे पञ्चरात्रिंदिवे, दशमभक्ते अष्टमे षष्टे चतुर्थे-आचामाम्ले एकाशनके पूर्वार्द्धे निर्विकृतिके च गमा वक्तव्याः, । तथा एतेऽपि गमा द्रष्टव्याः । सूत्रस्य सूचकत्वात् निर्विकृतिकं सेवित्वा तेनैव निर्विकृतिकेन शुद्धयति । निर्विकृतिकं सेवित्वा पूर्वार्द्धेन निर्गच्छति । एवं यावच्चरमेण पाराञ्चितेन निर्गच्छति । तथा पूर्वार्धं सेवित्वा पूर्वार्धेन निर्गच्छति । पूर्वार्धं सेवित्वा एकाशनेन निर्गच्छति यावच्चरमेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकाशनं सेवित्वा एकाशनेन निर्गच्छति । एकाशनं सेवित्वा आयामाम्लेन निर्गच्छति । यावश्चरमेण एवमायाम्लादिष्वप्यूर्ध्वगमा वक्तव्याः । अत्र शिष्यः प्राह-

[भा.५११] जहमने बहुसो मासियाइं सेविय एगेन सोउ निग्गच्छे ।
तहमन्ने बहूसो मासियाइं सेविय बहूहिं निग्गच्छे ।।

वृ- अहमेवं मन्ये, यथा बहुशो बहून् वारान्मासिकानि परिहारस्थानानि सेवित्या एकेन मासेन सोऽपराधकारी निर्गच्छति । अपराधपदान्निर्याति, मन्दानुभावेन प्रतिसेवनायाः कृतत्वात् । तथा एतदपि मन्ये बहुशो बहून् वारान् मासिकानि सेवित्वा कदाचित् बहुभिर्मासैर्निर्गच्छति । यदि तीव्रानुभावेन प्रतिसेवना कृता स्यादिति भावः, अत्रार्थे आचार्यणाममिति वक्तव्यम् । रागद्वेषवृद्धिहानिवशत एकैकस्मिन्नापत्तिस्थाने सर्वप्रायश्चित्तानामारोपणाभावात् । तत्र यदुक्तं दशमं प्रायश्चित्तस्थानं सेवित्वा दशमेन शुद्धयति । दशमं सेवित्वा नवमेन शुद्धयति । तत्र कुट दृष्टान्तं प्रागुक्तमेव दर्शयति-

[भा.५१२] एगुत्तरिया घडच्छकएण च्छेयाइं होंति निग्गमनं ।
तेहिं तु दोसवुड्ढी, उप्पत्तीरागदोसेहिं ।।

वृ- एकोत्तरिका जलकुटस्य वृद्धिर्घटषट्केन जलभृतघटकषट्केन नियमयितव्याः । किमुक्तं भवति ? कोऽपि तथाविधाल्पमलः पट एकेन जलकुटेन गृहे प्रक्षाल्यते, कोऽपि बहुतरमलो द्वाभ्यां कुटाभ्यां ततोऽपि बहुतरमलस्त्रिभिः कुटैरेवं यावत् बहुतममलः षड्भिः कुटैः । एवं किमपि साधूनाम-पराधपदमतिप्रभूतरागद्वेषाध्यवसायोपचितं स्वपर्यायमण्डल्यादिरूपे गृह एवावस्थितानां षड्भिर्मासैः शुद्धयति किमपि स्तोकरागद्वेषाध्यवसायोपचितं पञ्चभिर्मासैस्ततोऽपि स्तोकरागद्वेषाध्यवसायोपचितं चतुर्भिर्मासैरेवमेकैकहानिस्तावद्वक्तव्या यावत्किमप्यल्पतररागद्वेषाध्यवसायोपचितमेकेन शुद्धयतीति च्छेयादी होंति निग्गमनं । यथा केऽपि पटा अतिप्रभूतकठिनमला गृहान्निर्गत्य बहिः सरित्तडागादि गत्वा बहुभिर्गोमूत्रादिभिर्बहुभिश्चाच्छोटनपिट्टनप्रकारैः शुद्धयन्ति । तथा निर्गमतुल्याश्छेदादयो भवन्ति । तथा हि-किञ्चिदतिप्रबलरागद्वेषाध्यवसायोपचितमपराधपदं साधूनां दशमेव पाराञ्चितामिधानेन शुद्धयति। किञ्चित्ततो हीनरागद्वेषाध्यवसायोपचितमनवस्थाप्येन, ततोऽपि हीनतररागद्वेषाध्यवसायोपचितं मूलेन, ततोऽपि हीनतमरागद्वेषाध्यवसायोपचितं च्छेदेन च्छेदादयश्च पर्यायादि गृहान्निःकाशनेन भवन्तिः । ततो निर्गमनतुल्याः-छेदादयः कस्मादेवं प्रायश्चित्तहानिरत आह-तेहि तु इत्यादि, तै रागद्वेषैस्तीव्रती-व्रतैर्दोषवृद्धे कर्मोपचयवृद्धे रुत्पत्तिरतो यथा यथा रागद्वेषाध्यवसायवृद्धिस्तथा तथा प्रायश्चित्तस्यापि वृद्धिः । यथा यथा च रागद्वेषहानिस्तथा तथा प्रायश्चित्तस्यापि हानिरिति एतदेवाह-

[भा.५१३] जिननिल्लेवणकुडए, मासे अपलिउंच माणे सुद्धाणं ।
मासेन विसुज्झिहिई तोदें ति गुरूवएसेणं ।।

वृ- जिनाः केवल्यवधिमनःपर्यायज्ञानिप्रभृतयः ते केवलादिबलतो यथावस्थिता रागद्वेषाध्य-वसायहानिवृद्धिरुपलभ्यमाना निर्लेपनकुटान् प्रागुक्तप्रकारेण दृष्टान्तीकृत्य यो यथा शुद्धयति तस्मै तथा प्रायश्चित्तं प्रयच्छन्ति । तथा हि-मासार्हैं रागद्वेषाध्यवसायैर्मासे मासे प्रतिसेविते तदनन्तरमालोच-नायामप्रतिकुञ्चति जिनाः केवलादिबलतः श्रुतव्यवहारिणो गुरूपदेशतः पाठान्तरे जिनोपदेशेन मासेनैव विशोत्स्यतीति विज्ञाय स्वस्थानं मासिकमेव प्रायश्चित्तं ददति प्रयच्छन्ति । यदि पुनर्द्वैमासिकं त्रैमासिकं यावत्पाराञ्चितं वा मासार्हैरेवं रागद्वेषाध्यवसायैस्ततो हीनतरैर्वा प्रतिसेवितं यदि पश्चात् हा दुष्ठु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतमित्यादिभिर्निन्दनैः प्रतनुकृतं तदा जिनाः केवलादिबलतः श्रुतव्यवहारिणो गुरूपदेशतस्तथा विज्ञाय तस्मै मासं भिन्नमासं यावदन्ते निर्विकृतिकमपि प्रयच्छन्ति, ततो न कश्चिद्दोषः । पुनरप्याह चोदकः-

[भा.५१४] पत्तेयं पत्तेयं, पए पए भासिऊण अवराहे ।
तो केन कारणेणं, हीनब्भहिया व पट्ठवणा ।।

वृ- पदेपदे सूत्रगते प्रत्येकं प्रत्येकमपराधान् भाषित्वा तदनन्तरमर्थतः केन कारणेन हीना अभ्यधिका वा प्रस्थापना भणिता ? । यथा स्तोके प्रायश्चित्तस्थाने बहु प्रयच्छथ, बहुके वा स्तोकं, यदि वा सर्वथा झोषं कुरुथेति आचार्य आह--

[भा.५१५] मनपरमोहिजिनं वा चउ दस दस पुव्वियं च नवपुव्विं ।
थेरं च समासज्जाऊ नब्भहिया च पट्ठवणा ।।

वृ- मनःपर्यायज्ञानिं परमावधिं प्रभूतावधिं जिनं वा केवलज्ञानिनं चतुर्दशपूर्विणं दशपूर्विणं नवपूर्विणं च स्थविरांश्च समासाद्याश्रित्य हीना अभ्यधिका वा प्रस्थापना भवति । इयमत्र भावना-मनःपरमावधि-जिनादयः प्रत्यक्षज्ञानिनस्ततस्ते प्रतिसेवकेषु रागद्वेषाध्यवसायस्थानानां हानिं वृद्धिं वा साक्षादवे-क्षमाणास्तुल्येऽप्यपराधपदे रागद्वेषानुरूपं हीनमधिकं वा प्रस्थापयन्ति ददतीत्यर्थः । अथ ये मनः परमावधिजिनादयः प्रत्यक्षज्ञानिस्तेषामेतत् युक्तं रागद्वेषाध्यवसायवृद्धिहान्या साक्षादवेक्षणात् । ये पुनः स्थविरास्ते खतं रागद्वेषाणां हानिं वा वृद्धिं वा जानीयुरुच्यते । बाह्यपश्चात्तापादिलिङ्गतस्तत्र हानि-परिज्ञानलिङ्गं पश्चात्तापादिकमाह-

[भा.५१६] हा दुट्ठ कयं हा दुट्ठु कारियं हा दुट्ठमनुमयंमेत्ति ।
अंतो अंतो डज्झइ, पच्छातावेण चेवंते ।।

वृ- प्राणातिपातादि कृत्वा कारयित्वा अनुमोद्य च तदुत्तरकालं हा इति विषादे दुष्टु अशोभनं मया कृतं हा दुष्ठु कारितं, हा दुष्ठु अनुमतं मे ममेत्येवंलक्षणेन पश्चात्तापेन पश्चात्तापवह्निना वेपमानः पश्चात्तापकरणतः एव कम्पमानो अनन्तरश्चित्तमध्ये दह्यते । ततो ज्ञायते स्थविरैरेतस्य रागद्वेषहानिरिति तदनुरूपं प्रायश्चित्तं प्रस्थाप्यते वृद्धिपरिज्ञानलिङ्गमाह-

[भा.५१७] जिनपन्नत्ते भावे, असद्दहंतस्स तस्स पच्छित्तं ।
हरिसमिव वेदयंतो, तहा तहा वड्ढए उवरिं ।।

वृ- तस्य प्रायश्चित्तप्रतिपत्तुर्जिनैः सर्वज्ञैः प्रकर्षेण ज्ञप्ताः भावा जीवादिकास्तान् जिनप्रज्ञप्तान् भावान् अश्रद्दधानस्य तथा प्राणातिपातादि कृत्वा आस्तां तदुत्तरकालं किंचा लोचनायामपि निधिलाभे हर्षमिव वेदयमानस्य यथा यथा हर्षगमनं तथा तथा प्रायश्चित्तमुपर्युपरि वर्धते । किमुक्तं भवति ? स्थविरा अपि जिनप्रज्ञप्तभावाश्रद्धानेन तथा तथा हर्षगमनेन च प्रतिसेवकस्य रागदेषवृद्धिमवगच्छत्यवगत्य च तदनुरूपमुपर्युपरि प्रायश्चित्तं प्रयच्छन्ति । *(सूत्र-१३ - व्याख्या)*

यो भिक्षुश्चातुर्मासिकं वा सातिरेगचातुर्मासिकं वा पाञ्चमासिकं वा सातिरेकपाञ्चमासिकं वा एतेषां परिहारस्थानानामन्यतरत् परिहारस्थानमालोचयेत् तस्याप्रतिकुञ्च्यालोचयतः चातुर्मासिकं वा सातिरेकचातुर्मासिकं वा पाञ्चमासिकं वा सातिरेकपाञ्चमासिकं वा दद्यात्सातिरेक इति शेषः यत्प्रतिसेवितं तद् दद्यादिति भावः तद्योगैरेवाध्यवसानैस्तस्य तस्य प्रतिसेवनादालोचनायां वा तत्प्रतिकुञ्चनात् प्रतिकुञ्च्यालोचयतश्चातुर्मासिकप्रतिसेवकस्य पाञ्चमासिकं सातिरेकचातुर्मासिकप्रतिसेवकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सातिरेकपाञ्चमासिकं मायानिषपन्नस्य गुरुमासस्याधिकस्य दानात् पाञ्चमासिकप्रतिसेवकस्य सातिरेकपाञ्चमासिकप्रतिसेवकस्य षएमासिकं षण्मासात् परस्य भगवद्वर्धमानस्वामितीर्थे तपोदानस्यासंभवात् । तेन परमित्यादि ततः पाञ्चमासिकात् स्थानात् परस्मिन् षाण्मासिके सातिरेके वा षाण्मासिके प्रतिसेविते आलोचनाकाले प्रतिसेविते प्रतिकुंचित अप्रतिकुञ्चिते वा त एव स्थिताः षण्मासाः प्रदातव्याः । परतस्तपोदानस्य निषेधनात्तदेवं त्रयोदशमसूत्रमुक्तम् ।

इदानीं चतुर्दशं सूत्रमाह-एवं बहुसो विनेयव्वं, एवममुना प्रकारेण बहुशोऽपि बहुशः शब्देन विशिष्टमपि सूत्रं चतुर्दशं वक्तव्यम् । तच्चैवम्-जे भिक्खू बहुसो चाउम्मासियं बहुसो सातिरेगचाउम्मासियं वा बहुसो पञ्चमासियं वा बहुसो सातिरेगपञ्चमासियं वा एएसि परिहारठाणाणं अन्नयरं परिहारठाणं पडिसेवित्ता आलोएज्जा । अपलिउंचिय आलोएमाणस्स चाउम्मासियं वा साइरेगचाउम्मासियं वा पञ्चमासियं वा साइरेगपञ्चमासियं वा पलिउंचियं आलोएमाणस्स पञ्चमासियं वा सातिरेगपञ्चमासियं छम्मासियं वा तेन परं पलिउंचिए वा अपलिउंचिए वा ते चेव छम्मासा इति अस्याक्षरगमनिका पञ्चमसूत्रानुसारतः कर्त्तव्या । नवरं बहुशोऽपि चातुर्मासिके प्रतिसेविते यद्येकं चातुर्मासिकं दत्तं तत् बहुशोपि प्रतिसेवनाया मन्दानुभावकृतत्वात् आलोचनावेलायामप्येककालं सर्वेषामालोचितत्वात् । एवं सातिरेकरूचातुर्मासादावपि भावनीयम् । सम्प्रति वक्तव्यविशेषमभिधित्सुराह- आलोचनायां दन्तपुरकथानकम् ।

[भा.५१८] एत्तो निकायणा मासियाण जह घोसणं पुहविपालो ।
दंतपुरे कासी या, आहरणं तत्थ कायव्वं ॥

वृ- इत इति तृतीयार्थे पञ्चमी । ततोऽयमर्थः । एतैरनन्तरोदितैः सर्वैरपि सूत्रैर्मासिकानां मासनिष्पन्नानां मासिकद्वैमासिकत्रैमासिक यावत् षण्मासिकानां निकाचनोक्ता । निकाचना नाम यत्मासिकादि प्रतिसेवितं तत् यावदद्याप्यालोचनार्हस्य पुरतो नालोच्यते तावदनिकाचितमवसेयमालोचितं तु निकाचित् तत आलोएज्ञा आलोचनार्हेण अपरिश्राविणा भवितव्यं, धनमित्रोदाहरणमत्र । इत्यादि पदैर्निकाचना भाविता द्रष्टव्या । तत्र आलोचनार्हे आहरणं ज्ञातं कर्तव्यं । किं तदित्याह-जह घोसणमित्यादि, यथेत्याहरणोल्लेखोपदर्शने दन्तपुरे पत्तने पृथिवीपालो राजा, दन्तवक्त्रनामा घोषणामकार्षीत्- 'दन्ता न केनापि क्रेतव्याः स्वगृहे चसन्तः समर्प्पणीयाः । इत्येवंरूपामित्यादि । तच्चेदं-

दन्तपुरं नयरं, दन्तवक्त्रो राया । तस्स सच्चवती देवी । तीसे दोहलो जातो-'जइ अहं सव्वदंतमए पासाए कीलिज्जामि' । रन्नो कहियं । रन्ना अमच्चो आणत्तो । सिग्घमेवं ते उवक्खेसि । तेन नगरे घोसावियं 'जो अन्नो दंतं किणेइ न देइ वा घरे संते तस्स सारीरो दंडो' । तत्थ नगरे घणमित्तो सत्थवाहो । तस्स दो भज्जाओ-धनसिरी । पउमसिरी य । अन्नया तासिं दुन्हवि कलहो जाओ । तत्थ धनसिरीए पउमसिरी भणिया- 'किमेवं गव्वमुव्वहसि, न किं ते सच्चवतीए विव दंतमओ पासाओ कतो' । ताहे पउमसिरीए असग्गाहो गहितो 'जइ मे दंतमओ पासादो न किज्जइ तो अलं मे जीविएणं न देइ धनमित्तस्स वि उल्लावं तस्स वयंसो दढमित्तो नाम तस्स कहियं । तेन भणियं अकालहीनं अहं ते इच्छं पूरेमि, उड्डाविया अस्सगाहं ताहेसो दढमित्तो वणयरदाणमणिसंगाहए करेइ तेहिं भणियं किं आणेमो किंवा पइच्छामो तेन भणियं दंतेमोदेह, तेहिं य ते दंता खडपूयमेहिं गोविया, सगडं भरियं, नगरदारे पवेसिज्जंताण एगो खड्डपूयगोत्ति गोणेणाकड्डितो दंतो पडिओ, चोरो त्ति यो रायपुरिसेहिं वणयरो गहितो । पुच्छितो कस्सेते दंता ? । सो न साहइ । एत्थंतरे दढमित्तेण भणियं-ममेते दंता । एस कम्मकरो । ततो वणयरो मुक्को । दढमित्तो गहितो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रन्ना पुच्छितो । कस्सेते दंता ? सो भणति-ममंति । एत्थंतरे दढमित्तं गहियं नाउं घनमित्तो आगतो । रन्नो पुरतो भणइ-ममेते दंता मम दंडं सारीरं वा निग्गहं करेह । दढमित्तो भणति-अहमेयं न जाणामि । ममं सन्तिया दंता । मम निग्गहं करेह । एवं ते अन्नोन्नावराहरक्खट्ठिया, रन्ना भणिया तो तुब्भे निरापराधी भूयत्थं कहेह, तेहिं सव्वं जहाभूयं कहियं । तुट्ठेण रन्ना मुक्का; उम्मुक्को जहा सो दढमित्तो निरवलावो अवियमरणमब्भुवगतो न य परावराहो सिट्ठो, तहा आलोयणारिहेण अपरिसाविणा भवियव्वं । जहा सो धनमित्तो भूयत्थं कहेइ, ममंसो अवराहोत्ति - एवं आलोयगेन मूलुत्तरावराहा अपलिउंचमानेन जहा ट्ठिया कहेयव्वा । निकाचना किल तत्त्वत आलोचना । सा च आलोचना आलोचनार्हालोचकाभ्यां विना न भवतीति त्रितयमपि सप्रपञ्चं विचक्षुरिदमाह—

[भा.५१९] आलोयणारिहोआलोयओ य आलोयणाए दोसविही ।
पनगातिरेग जा पन्नवीस पंचमसुत्ते अह विसेसो ।।

वृ- आलोचनार्हो यादृग् भवति, तादृग् वक्तव्यः । तथा आलोचकश्च यथावस्थितो यादृशो भवति तादृशोऽभिधातव्यः, आलोचनाया दोषविधयो दोषभेदा वक्तव्याः; । तथा अहत्ति एष सूत्रे पञ्चमसूत्रे विशेषो यदुत चातुर्मासिकस्य पांचमासिकस्य पञ्चकातिरेको रात्रिंदिवपञ्चकेनातिरेकोऽत्यर्गलता, एव पञ्चक वृद्धयातिरेकस्तावद्वाच्यो यावत्पञ्चविंशतिः । पञ्चविंशत्यातिरेक इत्यर्थः । इयमत्र भावना-सूत्रे चातुर्मासिकस्य च या सातिरेकता सा दिनानां पञ्चकेन दशकेन पञ्चदशकेन विंशत्या पञ्चविंशत्या वा द्रष्टव्येति । साम्प्रतमालोचनार्हो यादृग् भवति तादृशमुपदर्शयति-

[भा.५२०] आलोयणारिहो खलु निरावलावी उ जह उ दढमितो ।
अट्ठहिं चेव गुणेहिं, इमेहिं जुत्तो नायव्वो ।।

वृ- आलोचनार्हः खलु निरपलापी । अपलपति गूहतीत्येवं शीलोऽपलापी निश्चितमपलापी निरपलावी, नियमतोऽपरिश्रावीति भावार्थः । यथैव तुरेवकारार्थः । दृढमित्रोऽनन्तरकथानकोक्तः तथैव द्रष्टव्यः । स चाष्टभिर्गुणैरभिवक्ष्यमाणस्वरूपैर्युक्तो ज्ञातव्यः । तानेव गुणानाह—

[भा.५२१] आयार व आहारव ववहारो वीलए पकुव्वीया ।
निज्जव अवायदंसी, अप्परिसावीय बोधव्वो ।।

वृ- आचारो ज्ञानाचारादिरूपः पञ्च प्रकारः । सोऽस्यास्तीति आचारवान् । आ सामस्त्येन आलोचितापराधानां धारणमाधारः । सोऽस्यास्तीत्याधारवान् । आलोचकेनालोच्यमानो यः सर्वमवधारयति स आधारवानित्यर्थः । व्यवह्रियतेऽपराधजातं प्रायश्चित्तं प्रदानतो येन स व्यवहारः आगमादिरूपपञ्चप्रकारः । सोऽस्यास्तीति व्यवहारवान् । यः सम्यगागमादिव्यवहारं जानाति, ज्ञात्वा च सम्यक् प्रायश्चित्तदानतो व्यवहरति स व्यवहारवानिति भावः । तथा अपव्रीडयति लज्जां मोचयतीत्यपव्रीडकः । आलोचकं लज्जया अतीचारान् गोपयन्तं यो विचित्रमधुरवचनप्रयोगैस्तथा कथंचनापि वक्ति । यथा स लज्जामपहाय सम्यगालाचयेति सोऽपव्रीडक इत्यर्थः । पकुव्वीयत्ति कुर्व इत्यागमप्रासिद्धो धातुरस्ति यस्य विकुर्वणेति प्रयोगः । प्रकुर्वतीत्येवं शीलः प्रकुर्वी । किमुक्तं भवत्यालोचकेनालोचितेष्वपराधेषु यः सम्यक्प्रायश्चित्तप्रदानत आलोचकस्य विशुद्धिमुपजनयति स प्रकुर्वीति । निज्जवत्ति, निश्चितं यापयति प्रायश्चित्तविधिषु याप्यमालोचकं करोति निर्वाहयतीति यावदिति निर्यापः । अच् प्रत्ययः । अपराधकारी यथोक्तं प्रायश्चित्तं कर्तुमसमर्थो यथा निर्वहति तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायस्तदुचितप्रायश्चित्तप्रदानतः प्रायश्चित्तं कारयति स निर्यापक इति भावः । तथा इहलोकापायान् परलोकापायांश्च दर्शयतीत्येवं शीलोऽपायदर्शी । किमुक्तं भवति ? यः सम्यगुनालोचयति प्रतिकुञ्चितं वा आलोचयति दत्तं वा प्रायश्चित्तं सम्यग् न करोति तस्य यदि त्वं सम्यग् नालोचयिष्यसि प्रतिकुञ्चितं वा करिष्यसि दत्तं वा प्रायश्चित्तं न सम्यक् पूरयिष्यसि ततस्ते भूयान् मासिकादिको दण्डो भविष्यतीत्येवमिह लोकापायान् तथा संसारे जन्ममरणादिकं त्वया प्रभूतमनुभवितव्यम् । दुर्लभबोधिता च तवैवं भविष्यतीत्येवं परलोकापायांश्च दर्शयति सोऽपायदर्शीति भावः । तथा न परिश्रवतीत्येवं शीलोऽपरिश्रावी । आलोचितं गोप्यमगोप्यं वा योऽन्यस्मै न कथयति सोऽपरिश्रावीति भावः । साम्प्रतमालोचकमभिधित्सुराह--

[भा.५२२] आलोयंतो एत्तो दसहिं गुणेहिं तु होइ उववेओ ।
जाइकुलविनयनाणे दंसणचरणेहिं संपन्नो ॥

[भा.५२३] खंते दंते अमाईअ अपच्छतावी य होति बोधव्वे ।
आलोयणाए दोसे एत्तो वोच्छं समासेणं ॥

वृ- इत ऊर्ध्वमालोचयन्नालोचको वक्तव्यः । स च दशभिर्गुणैरुपेत एव युक्त एव भवति । तुरेवकारार्थो भिन्नक्रमत्वादत्र सम्बध्यते । तानेव गुणानुपदर्शयति जाति इत्यादि जातिसम्पन्नः, कुलसम्पन्नः, मातृपक्षो जातिः, पितृपक्षः कुलम् । विनयसम्पन्नः, ज्ञानसम्पन्नः, दर्शनसम्पन्नः, चरण-सम्पन्नः, क्षान्तः दान्तः अमायी अपश्चात्तापी च बोधव्यः । अथ कस्मादोलचकस्यैतावत् गुणसमूहोऽन्विष्यते उच्यते । जातिसम्पन्नः प्रायोऽकृत्यं न करोति । अथ कथमपि कृतं तर्हि सम्यगालोचयति, । कुसलम्पन्नः प्रतिपन्नप्रायश्चित्तनिर्वाहक उपजायते । विनयसम्पन्नो निषद्यादानादिकं विनयं सर्वं करोति, सम्यगालोचयति । ज्ञानसम्पन्नः श्रुतानुसारेण सम्यगालोचयति, । अमुकश्रुतेन मे तद्दत्तं प्रायश्चितमतः शुद्धोऽहमिति च जानीते, दर्शन संपन्नः प्रायश्चित्तात् शुद्धिं श्रद्धत्ते, चरणसंपन्नः पुनरतिचारं प्रायो न करोति, अनालोचिते चारित्रं मे न शुद्धयतीति सम्यगालोचयति; क्षान्तो नाम क्षमायुक्तः । स कस्मिंश्चित् प्रयोजने गुर्वादिभिः स्वरपरुषमपि भणितः सम्यक् प्रतिपद्यते । यदपि च प्रायश्चित्तमारोपितं तत्सम्यग् वहति । दान्तो नाम इन्द्रियनोइन्द्रियजयसम्पन्नः प्रायश्चित्ततपः सम्यक्करोति । माया अस्यास्तीति मायी, न मायी अमायी सोऽप्रतिकुञ्चितमालोचयति । अपश्चात्तापी नाम यः पश्चात्परितापं न करोति हा दुष्टु कृतं मया यत् आलोचितमिदानीं प्रायश्चित्ततपः कथं करिष्यामीति किन्त्वेवं मन्यते । कृतपुण्योऽहं यत्प्रायश्चित्तं प्रतिपन्नवानिति अत ऊर्ध्वमालोचनाया दोषान् समासेन संक्षेपेण वक्ष्ये प्रतिज्ञामेव निर्वाहयति--

[भा.५२४] आकंपयित्ता अनुमानयित्ता जं दिठं बायरं च सुहुमं वा ।
छण्हं सदा उलयं बहुजनअव्वत्त तस्सेवी ॥

वृ- आवर्जितः सन् आचार्यः स्तोकं मे प्रायश्चित्तं दास्यतीति बुद्धया वैयावृत्त्यकरणादिभि-रलोचनाचार्यमाकंप्य आराध्य यत् आलोचयत्येष आलोचनादोषः । तथा अनुमान्य अनुमानं कृत्वा लघुतरापराधनिवेदनादिना मृदु दण्डप्रदायकत्वादिस्वरूपमाचार्यश्याकलय्य आलोचयत्येषोऽप्या-लोचनादोषः । तथा यद्दृष्टमपराधजातं क्रियमाणमाचार्यादिना तदेवालोचयति नापरमिति तृतीय आलोचनादोषः । बायरत्ति बादरं दोषजातमालोचयति न सूक्ष्मं तत्रावज्ञापरत्वादेष चतुर्थ आलोचनादोषः। सुहुमं त्ति सूक्ष्मं वा दोषजातमालोचयति न बादरं यः किल सूक्ष्ममालोचयति स कथं बादरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नालोचयिष्यतीत्येवं रूपभाव सम्पादनार्थमाचार्यस्येत्येष पञ्चम आलोचनादोषः । तथा छन्नमिति प्रच्छन्नं आलोचयति किलमुक्तं भवति । लज्जालुतामुपदर्श्यापराधानल्पशब्देन तथालोचयति यथा केवलमात्मैव शृणोति न गुरुरित्येष षष्ट आलोचनादोषः । सद्दाउलत्ति शब्दाकुलं बृहच्छब्दं यथा भवत्येवमालोचयति इदम् उक्तं भवति । महता शब्देन तथा लोचयति यथान्येऽप्यगीतार्थादयः शृण्वन्तीत्येष सप्तम आलोचनादोषः । तथा बहुजनत्ति बहुजनमध्ये यद्वालोचनं तद्बहुजनं अथवा बहवो जना आलोचना गुरवे यत्र तत् बहुजनमालोचनं । किमुक्तं भवत्येकस्य पुरत आलोच्य तदेवापराधजातमन्यस्यान्यस्य पुरत आलोचयति एषोऽष्टम आलोचनादोषः । अव्वत्तत्ति अव्यक्तोऽगीतार्थः । तस्याव्यक्तस्य गुरोः पुरतो यदपराधालोचनं तदव्यक्तमेव नवम आलोचनादोषः ।। तस्सेवीति शिष्योऽयमपराधमालो-चयिष्यति तमेव सेवते यो गुरुरसौ तस्सेवी । तस्समीपे यदपराधालोचनमेष ममातिचारेण तुल्यस्ततो न किमपि मे प्रायश्चित्तं दास्यत्यल्पं वा दास्यति । न च मां खरण्टयिष्यति । यथा विरूपं कृतं त्वयेति बुद्धया तदालोचनं तत्सेवी एष दशम आलोचनादोषः ।।

तदेवमालोचनाविधिर्दोषा उक्ताः । सम्प्रति यथाभूतेषु द्रव्यादिष्वालोचनं तथाभूतद्रव्या-दिप्रतिपादयन्नाह-

[भा.५२५] आलोयणाविहाणं तं चेव दव्वखेत्तकाले य ।
भावे सुद्धमसुद्धे स सणिद्धे सातिरेगाई ।।

वृ- आलोचनाविधानं तदेवात्रापि सविस्तरमभिधातव्यम् । यदुक्तं प्रथमसूत्रे दव्वादि चउरभिग्रहेत्यादिना ग्रन्थेन ततः प्रागुक्तदोषवर्जिताः आलोचना प्रशस्ते द्रव्ये क्षेत्रे काले भावे य प्रागुक्तस्वरूपे दातव्या, नाप्रशस्ते । इह प्रतिसेवितं द्विधा भवति- शुद्धमशुद्धं च । तत्र यत् शुद्धेन भावेन प्रतिसेवितं यतनया च तत् शुद्धं । तच्च शुद्धत्वादेव न प्रायाश्चित्तविषयः । यत्त्वशुद्धेन भावेन प्रतिसेवितमयतनया च तदशुद्धं । तच्च प्रायश्चित्तविषयोऽशुद्धत्वात् । तस्मिंश्चाशुद्धे प्रायश्चित्तानि केवलानि मासिकादीनि सातिरेकाणि च तत्र सातिरेकाणि ससणिद्धे इति सस्निग्धे हस्ते मात्रके वा सति तेन भिक्षाग्रहणत उपलक्षणमेतत् । तेन बीजकायसंघट्टनादिनापि सातिरेकाणि द्रष्टव्यानि । तत्र सातिरेकातामेव भावयति-

[भा.५२६] पनगेणाहियो मासो, दसपक्खेणं च वीसभिन्नेणं ।
संजोगा कायव्वा, गुरुलहुमीसेहिं य अनेगा ।।

वृ- इह मूलत आरभ्यामूनि सर्वाण्यप्यालोचनासूत्राणि किल सर्वसंख्यया दश भवन्ति । तत्राद्यानि चत्वारि सूत्राणि साक्षात् सूत्रत एव परिपूर्णान्युक्तानि । शेषाणि तु षट् सूत्राण्याभ्यां द्वाभ्यां सूत्राभ्यामर्थतः सूचितानि तानि चामूनि सातिरेकसूत्रं १ बहुसातिरेकसूत्रं २ सातिरेकसंयोगसूत्रं ३ बहुसातिरेकसंयोगसूत्रं ४ नवमं सकलस्यसातिरेकस्य च संयोगसूत्रं ५ दशमं बहुशः शब्दविशिष्टस्य सकलस्य बहुशः शब्दविशिष्टस्य सातिरेकस्य च संयोगसूत्रं ६ । तत्र पञ्चमं सातिरेकसूत्रं पञ्चसूत्रात्मकं । तच्चैवमुच्चारणीयम्- 'जे भिक्खू सातिरेगमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलोएमाणस्स सातिरेगमासियं पलिउंचियआलोएमाणस्स सातिरेगदोमासियं' इदं पञ्चमसूत्रे प्रथमसूत्रम्, अत्र मासिकस्य सातिरेकतां पूर्वार्द्धेन व्याख्यानयति-पञ्चकेन रात्रिंदिवपञ्चकेन मासोऽधिकः । दशत्ति दशभिरहोरात्रैः पक्षेण, वीसत्ति विंशत्या रात्रिंदिवैर्भिन्नेन भिन्नमासेन पञ्चविंशत्यादिनेरित्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रपञ्चकातिरिक्तो मासो यथा केनापि शय्यातरपिण्डः सस्निग्धेन हस्तकेन मात्रकेण वा गृहीतः । तत्र मासः शय्यातरपिण्डग्रहणात् रात्रिंदिवपञ्चकं सस्निग्धेन मात्रकेण वा भिक्षाग्रहणात् रात्रिंदिवदशके-नाधिको मासो, यथा केनापि शय्यातरपिण्डः परित्तकायानन्तरनिक्षिप्तः सस्निग्धेन हस्तेन मात्रकेण वा गृहीतः । तत्र मासः शय्यातरपिण्डग्रहणात् रात्रिंदिवपञ्चकं परित्तकायान्तरनिक्षिप्तग्रहणात् द्वितीयं रात्रिंदिवपञ्चकं सस्निग्धेन हस्तकेन मात्रकेण वा भिक्षाग्रहणात् एवं पक्षाद्यतिरेकेऽपि भावना कार्या; । एवं द्वितीयतृतीयसूत्रादिष्वपि द्वैमासिकादीनां सातिरेकता पञ्चकादिभिर्भावनीया । सूत्रपाठस्त्वेवम्-'जेभिक्खू सातिरेगंदो मासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलोएमाणस्स सातिरेगं दोमासियं पलिउंचिउं आलोएमाणस्स साइरेगं ते मासियं ।

जे भिक्खू सातिरेगं तिमासियं परिहारट्ठाणमित्यादि । षष्ठमपि बहुशः शब्दविशिष्टं सातिरेकसूत्रं पञ्चसूत्रात्मकं तच्चैवमुच्चारणीयम्- 'जे भिक्खू बहुसो सातिरेगमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलोएमाणस्स सातिरेगमासियं पलिउंचियं आलोएमाणस्स सातिरेगदोमासियं जे भिक्खू बहुसो सातिरेगदोमासियं पडिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलोएमाणस्स सातिरेगं दोमासियं पलिउंचिय आलोएमाणस्स सातिरेगतेमासियमित्यादि । सप्तमं सातिरेकसंयोगसूत्रम् । अष्टमं बहुशः सातिरेकसंयोगसूत्रं । तत्र सातिरेकाणां मासिकादीनां संयोगाः सातिरेकसंयोगाः । तदात्मकं सूत्रं सातिरेकसंयोगसूत्रं । तदेव बहुशः शब्दविशिष्टं बहुशः सातिरेकसंयोगसूत्रं । तत्र सातिरेकाणि पञ्च पदानि, तद्यथा-सातिरेकं मासिकं १, सातिरेकं द्वैमासिकं २, सातिरेकं त्रैमासिकं ३ सातिरेकं चातुर्मासिकं ४, सातिरेकं पाञ्चमासिकं ५ । पञ्चानां च पदानां द्विकसंयोगे भंगा दश, त्रिकसंयोगेऽपि दश, चतुष्कसंयोगे पञ्च, पञ्चकसंयोगे एकः । एते च तृतीय चतुर्थसूत्रचिन्तायामिव भावनीयाः । सर्वसंख्यया भङ्गाः षड्विंशति, । एवमेव षड्विंशतिर्भङ्गा बहुशः सातिरेकं संयोगसूत्रेऽपि भावनीयाः । उभयमीलने भङ्गा द्वापञ्चाशत् । पञ्चसूत्राणि पञ्चमे सातिरेकसूत्रे पञ्चसूत्राणि षष्ठे बहुशः सातिरेकसूत्रे तान्यप्यत्र मीलितानि जातानि सर्वसंख्यया द्वाषष्टिसूत्राणि । एतानि च उद्घातानुद्घातविशेषरहितानि तत एतावन्त्येवोद्घातविशेषपरिकल्पितान्यन्यानि सूत्राणि द्रष्टव्यानि । एतावन्त्येव चानुद्घात-विशेषपरिकल्पितान्यपि । एवमेतास्तिस्रो द्वाषष्टयः सूत्राणां सर्वसंख्यया षडशीतीसूत्रशतं ।

अत ऊर्ध्वं तु उद्घातानुद्घातमिश्रकाभिधानतः संयोगसूत्राणि भवन्ति तत्सूचनार्थमिदमुत्तरार्द्धमाह-संयोगा कायव्वा इत्यादि । गुरवश्च लघवश्च गुरुलघवस्ते च ते मिश्राश्च गुरुलघुमिश्रास्तैरनेक संयोगा भवन्ति कर्तव्याः । ते चैवमुच्चारणीयाः-जे भिक्खू सातिरेगउग्घायमासियं वा सातिरेगअनुग्घायमासियं वा परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलाएमाणस्स सातिरेगमुग्घायमासियं वा सातिरेगअनुग्घायमासियं वा परिहारट्ठाणं पडिसेवित्ता आलोएज्जा अपलिउंचिय आलाएमाणस्स सातिरेगमुग्घायमासियं वा । जे भिक्खू सातिरेकमुग्घायमासियं वा सातिरेगमनुग्घाय दोमासियं वा परिहारट्ठाणंपडिसेवित्ता । इत्येवमुद्घातितपदममुञ्चता अनुद्घातद्वैमासिकादीन्यपि वक्तव्यानि । एवमेते भङ्गाः पञ्च ऐत उद्घातमासिके अनुद्घातमासिकद्वैमासिकाद्येकसंयोगेन लब्धाः । एवमुद्घातित्ते द्वैमासिकेऽपि पंच एवं त्रैमासिकेऽपि पञ्च चातुर्मासिकेऽपि पञ्च पाञ्चमासिकेऽपि पञ्चेत्युभयोरप्येककसंयोगेन सर्वसंख्यया भङ्गाः पञ्चविंशतिः, तथा उद्घातसातिरेकमासिक एवमनुदघातसातिरेकमासिकद्वैमासिकादिद्विकसंयोगे भङ्गा दश, एवमुद्घातितेऽपि सातिरेके द्वैमासिके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रैमासिके चातुर्मासिके पाञ्चमासिके च प्रत्येकं दश दशेति सर्वसंख्यया उद्घातितैककसंयोगे अनुद्घातितद्विकसंयोगेभङ्गाः पञ्चाशत् ।

एवं तृतीयसूत्रानुसारतो भङ्गा स्तावद्वाच्या यावत्सर्वसंख्यया भङ्गानां नवशतान्येकपष्ट्याधिकानि भवन्ति, एतावन्त एव च भङ्गका अष्टमेऽपि । बहुशः सातिरेक संयोगसूत्रे भवन्ति षडशीतं शतं सूत्राणां प्राक्तनमिति स'संख्यया पङ्चमषष्ठसप्तमाष्टमसूत्रेषु सूत्राणामेकविंशतिशतान्यष्टोत्तराणि भवन्ति । एतानि च मूलगुणापराधाभिधानेन च उत्तरगुणापराधाभिधानेन च प्रत्येकं वक्तव्यानीत्येष राशिर्द्वाभ्यां गुण्यते जातानि द्वाचत्वारिंशत्शतानि षोडशोत्तराणि । एतानि च दर्प्पतः कल्पतो वाप्ययतनया भवन्तीति द्वाभ्यां गुण्यन्ते जातानि अष्टौ सहस्राणि चत्वारि शतानि द्वात्रिंशदधिकानि । एतावन्त्येवचादिमेषु चतुर्षु अपि सूत्रेषु सूत्राणि भवन्ति इत्यष्टास्वपि सूत्रेषु सर्वसंख्यया सूत्राणां षोडशसहस्राण्यष्टौ शतानि चतुःषष्ट्यधिकानि भवन्ति । नवमं सूत्रं सकलस्य सातिरेकस्य च संयोगात्मकं ।

तत्र सकलसंयोगामासिकद्वैमासिकादिसंयोगाः सातिरेकसंयोगा लघुगुरुपञ्चकदशकादिसंयोगाः । तत्र प्रथमतो लघुगुरुरहितः पञ्चकादिसूत्राणि केवलान्युपदर्श्यन्ते - 'जे भिक्खू पनगातिरेगं मासियं परिहाणठाणं पडिसेवित्ता आलोएज्ञा' इत्यादि । जे भिक्खू दशगातिरेगं मासियं परिहारट्ठाणं पडिसेवित्ता इत्यादि । एवं पञ्चदशकेन विंशत्या पञ्चविं शत्या च सातिरेकसूत्राणि मासिकविषयाणि च वक्तव्यानि । एवमेव प्रत्येकं द्वैमासिकत्रैमासिकचातुर्मासिकपांचमासिकविषयाएयपि पञ्च पञ्च सातिरेकसूत्राणि वक्तव्यानि । सर्वसंख्यया पञ्चविंशतिसूत्राणि; । एवं लघुपञ्चकादिविषयाएयपि पञ्चविंशति सूत्राणि वाच्यानि, । एवमेव पञ्चविंशतिसूत्राणि गुरुपञ्चकादिविषयाण्यपि सर्वमीलने पञ्चसप्ततिसूत्राणि । एतानि गुरुलघुविशेषरहितमासिकादिविषयाणि । तदनन्तरमेतावन्त्येव लघुमासिकादिविषयाएयपि वक्तव्यानि । ततः पुनरप्येतावन्ति गुरुमासिकादिविषयाणि सर्वसंख्यया एककसंयोगे सूत्राणां द्वे शते पञ्चविंशति अधिके । तदनन्तरं जे भिक्खू पनगातिरेगं मासियं वा पनगातिरेगं दो मासियं वा परिहारट्ठाणं पडिसेवित्ता आलोएज्ञा इत्यादि; । तथा जे भिक्खू पनगातिरेगमासियं वा दसगात्तिरेग मासियं वा परिहारट्ठाणं पडिसेवित्ता आलोएज्ञा इत्यादि । एवं मासिकं पञ्चकं चामुंचता द्वैमासिके पञ्चक दशक पञ्चदशक विंशति पञ्चविंशतिभिः सह पञ्चसूत्राणि वक्तव्यानि । एवं त्रैमासिकेचातुर्मासिके पाञ्चमासिके च प्रत्येकं पञ्च पञ्चेतिमासिके पञ्चकेन विंशतिसूत्राणि लब्धानि । एवं दशकेन पञ्चदशकेन विंशत्या पञ्चविंशत्या च विंशतिविंशतिसूत्राणि लभ्यन्ते इति । पञ्चविंशतयः शतं; तदनन्तरं तु द्वैमासिके पञ्चकमुञ्चता त्रैमासिके पञ्चकदशकपञ्चदशकविंशतिभिन्नमासैः सह पञ्च सूत्राणि । एवं चातुर्मासिके पञ्च पञ्चमासिके दशचेतपिञ्चदशसूत्राणि वक्तव्यानि । एवं दशकं पञ्चदशकं विंशति पंचविंशति वाऽमुञ्चता पञ्चदश पञ्चदश सूत्राणि लभ्यन्ते । इति सर्वमीलने पञ्चसप्ततिः सूत्राणि, तथा त्रैमासिके पञ्चकममुञ्चता चातुर्मासिके पञ्चकादिभिः सह पञ्च सूत्राणि पञ्च पाञ्चमासिकपञ्चकादिभिः सहेति दश सूत्राणि । एवं दशकादीन्यप्यमुञ्चता प्रत्येकं प्रत्येकं दश दश लभ्यन्ते इति पञ्चाशत् सूत्राणि ।

तदनन्तरं चातुर्मासिके पञ्चकममुञ्चता यानि षड्मासिकपञ्चकादिभिः सह पञ्च सूत्राणि वाच्यानि एवं दशकादीन्यप्यमुञ्चता प्रत्येकं पञ्च पञ्चेति पञ्चविंशति सूत्राणि सर्वसंख्यया अर्धतृतीयानि शतानि सूत्राणां भवन्ति । एतावन्ति लघुपञ्चकादिभिरप्येतावन्त्येव गुरु पञ्चकादिभिरपीति सर्व संख्यया पञ्चाशदधिकानि सप्तशतानि सूत्राणामेतानि च मासिकद्वैमासिकादीनां गुरुलघुविशेषाभावे लब्धानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो मासिकादीनां लघुविशेषविवक्षायामप्येतावन्ति सूत्राणि लभ्यन्ते, । एतावन्त्येव च गुरुविशेषविवक्षायामपि, सर्वमीलने द्वाविंशति शतानि पञ्चाशदधिकानि । तदनन्तरं 'जे भिक्खू पनगातिरेगमासियं वा पनगातिरेगदोमासियं वा पणगातिरेग ते मासियं वा एएसिं परिहारट्ठाणाणं अनयरं परिहारट्ठाणं परिसेवित्ता इत्यादीनि सूत्राणि त्रिसंयोगविषयाणि । जे भिक्खू पणगातिरेगमासियं वा पणगातिरेग दो मासियं वा पणगातिरेग तिमासियं वा पणगातिरेग चाउम्मासियं वा एएसिं परिहारट्ठाणाणमित्यादीनि चतुः संयोगविषयाणि । जे भिक्खू पणगातिरेगमासियं वा पणगातिरेगदोमासियं वा पणगातिरेगतेमासियंवा पणगातिरेगचाउम्मासियं वा पणगातिरेगपञ्चमासियं वा । एएसिं परिहारट्ठाणाणमन्नयरं परिहारट्ठाणमित्यादीनि पञ्चसंयोगविषयाणि बहूनि सूत्राणि वक्तव्यानि । एतानि च गुरुलघुगतपरस्परसंयोगरहितान्युपदर्शितानि ।

सम्प्रति लघुगुरुगतपरस्परसंयोगविषयाण्युपदर्श्यन्ते- जे भिक्खू लहुगपनगगुरुगपनगातिरेगमासियं परिहारट्ठाणं पडिसेवित्ता आलोएज्जा इत्यादि । जे भिक्खू लहुपनगलहुदशगातिरेगमासियं परिहारट्ठाणमित्यादि । जे भिक्खू लहुगपणगगुरुदशगातिरेगमासियं परिहारठाणमित्यादि एवंमासिकं लघुपञ्चकं वा मुञ्चता तावद्वक्तव्यं यावद्गुरुभिन्नमासाः । ततो मासिकं गुरुपञ्चकं वा मुञ्चता तावद्वक्तव्यं यावद्गुरुभिन्नमासः । एवं मासिकममुञ्चता पञ्चकादीनां सर्वे द्विकसंयोगास्तदनन्तरं सर्वे त्रिकसंयोगास्ततः परं सर्वे चतुष्कसंयोगा यावत्सर्वे नवकसंयोगा वक्तव्यास्ततः परमेको दशकसंयोगो वाच्यः । ततो मासलघुममुञ्चता पञ्चकदशकपञ्चदशकविंशतिपञ्चविंशतीनां गुरुलघुभेदभिन्नानां द्विकादिसंयोगा-दशकैकसंयोगपर्यन्ताः सर्वे वक्तव्यास्ततः परमेवं मास गुरु पंचकंचा मुञ्चता वक्तव्याः । एवं द्वैमासिकादिस्थानेष्वपि प्रत्येकं संयोगतश्च पञ्चकादीनां सर्वे संयोगाः कर्तव्याः । एवमनेकसंयोगात्मकं सूत्रमेवं दशमसूत्रमपि बहुशः सकलबहुशः सातिरेकसंयोगरूपं वक्तव्यं । तत्र येषु स्थानेषु पञ्चकं भवति तानि स्थानान्युपदर्शयति ।

[भा.५२७] ससणिद्ध बीयघट्टे काएसु मीसाएसु परिट्ठविए ।
इत्तरसुहुमसरक्खे पनगा एमाइया होंति ।।

वृ- सस्निग्धे हस्ते मात्रके वा सति तेन भिक्षाग्रहणेन तथा बीजघट्टे बीजकायसंघट्टं कुर्वत्याः सकाशात् भिक्षादाने, तथा कायेषु परित्तकायेषु सचित्तेषु मिश्रेषु सचित्ताचित्तरूपेषु परीत्तकायेषु परिस्थापिते परंपरस्थापिते इतरस्मिन् वा अनन्तरस्थापिते गृह्यमाणे तथा सुहुमत्ति सूक्ष्मप्राभृतिकाग्रहणे सरक्खत्ति सरजस्केन हस्तेन मात्रकेन वा भिक्षाग्रहणे सर्वत्र पञ्चकं भवतीति वाक्यशेषः । किमेतेष्वेव स्थानेषु पञ्चकं भवति किं चान्येष्वपि इति चेत् उच्यते, अन्येष्वपि तथा चाह-पनगाएमाइया होंति पञ्चकान्येवमादीनि एवमाद्यपराधहेतुकानि भवन्ति । एवमादिष्वन्येष्वप्यपराधेषु पञ्चक-द्रष्टव्यमिति भावार्थः । साम्प्रतमालोचनार्हस्य यथा पञ्चकादि परिज्ञानं यथा च प्रायश्चित्तदानविधिः तथा प्रतिपादयति ।

[भा.५२८] ससणिद्धमादि अहियं, पारोक्खी सोच्च देंति अहियं तु ।
हीनाहिय तुल्लं वा नाउं भावं तु पच्चक्खी ।।

वृ- परोक्षेषु विषयेषु भवं पारोक्षं परोक्षविषयं ज्ञानं तदस्यास्तीति परोक्षी श्रुतव्यवहारी, शय्यातरपिण्डादेरधिकं सस्निग्धादि आलोचकमुखात् श्रुत्वा मासं पञ्चकादिभिरधिकमेव तुरेवकारार्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ददति प्रयच्छन्ति । आलोचकमुखात् श्रवणानुसारतः प्रायेण तस्य प्रायश्चित्तदानविधिप्रवृत्तेः; यः पुनः प्रत्यक्षी प्रत्यक्षज्ञानी केवल्यादिः स पञ्चकातिरिक्ते मासे आलोचिते भावमेव तुरेवकारार्थः । रागद्वेषपरिणामं लक्षणं ज्ञात्वा रागद्वेषपरिणामानुसारतः प्रतिसेवनातो हीनमधिकं वा, यदि वा प्रतिसेवनातुल्यं प्रायश्चित्तं प्रयच्छति; साम्प्रतमस्मिन्नर्थतो नवमे सूत्रतः पञ्चमसूत्रे संयोगविधि-प्रदर्शनार्थमाह-

[भा.५२९] एत्थ पडिसेवणातो एक्कगदुगतिग चउक्कपनगेहिं ।
छक्कग सत्तग अट्ठग नवदसगेहिं अनेगा उ ।।

वृ- इहार्थतो नवमे सूत्रतः पञ्चमे सूत्रे साक्षाद्दशकसंयोगस्यान्तिमानि चत्वारि पदान्युपात्तानि; तत एतैर्दशकसंयोगो दर्शितः । स चायम्-मासिकं १ सातिरेकमासिकं २ द्वैमासिकं ३ सातिरेकद्वैमासिकं ४ त्रैमासिकं ५ सातिरेकत्रैमासिकं ६ चातुर्मासिकं ७ सातिरेकचातुर्मासिकं ८ पाञ्चमासिकं ९ सातिरेकपाञ्चमासिकं १० । तेन च दशकसंयोगेन शेषा अप्येककादयः संयोगाः सूचितास्तानन्तरेण दशकसंयोगविकल्पस्यासंभवात्तथा चात्र पूर्वसूरयो वल्लीदृष्टान्तमुपन्यस्यन्ति । स च प्राग्वद् भावनीयस्तत आह-अत्राधिकृतेऽर्थतो नवमे सूत्रतः पञ्चमे सूत्रे प्रतिसेवना एककद्विकत्रिकचतुष्कपञ्चकैः षट्सप्तकाष्टनवकदशकैरनेकः प्रतिसेवना उपात्ताः प्रतिपत्तव्याः । किमुक्तं भवति ? दशानां पदानामेककद्विकादिसंयोगेषु यावन्तो भंगका भवन्ति, तावत्यः प्रतिसेवना अनेक सूत्रेण सूत्रिता द्रष्टव्याः तत्रैककादिसंयोगेषु भंगसंख्यानयनाय करणमाह-

[भा.५३०] करणं एत्थ उइणमो एक्कादेगुत्तरा दसठवेउं ।
हिठा पुन विवरीयं काउं रूवं गुणेयव्वं ।।

वृ- अत्र एषु एककादिसंयोगेषु भङ्गकसंख्यानयनाय करणमिदं-एककादीन् एकोत्तरान् दश स्थापयित्वा एककादीन् एकोत्तरानेकोत्तरवृद्धया प्रवर्धमानान् दशकपर्यन्तान् अङ्कान् स्थापयित्वेत्यर्थः । अधस्तात् पुन-र्विपरीतं राशिं कृत्वा, किमुक्तं भवति ये एककादय एकोत्तरदशक पर्यन्ता अङ्काः पूर्व्यानुपूर्व्या उपरि स्थापितास्तेषामधस्तात् पश्चानुपूर्व्या भूय एककादय एकोत्तरदशकपर्यन्ता अङ्काः स्थापनीयाः । अत्र उपरितना अङ्का गुणकारा अधस्तना भागहाराः । अत्रैककसंयोगसंख्यामिच्छन् अन्यदेकं सकलरूपं स्थापयेत् । स्थापयित्वा अन्तिमेनदशमेन गुणकारेण गुणयितव्यं, । तेन तस्य गुणने जाता दशैव, एकस्य गुणने तदेव भवतीति वचनात्;

[भा.५३१] दसहिं गुणेउं रूवं एक्केन हियंमि भागे जं लद्धं ।
तं पडिरासेऊणं पुनवि नवेहिं गुणेयव्वं ।।

वृ- दशभिर्गुणयित्वा रूपं एकेनाधस्तनेन भागहारेण भागो हरणीयः । भागे च हृते यल्लब्धं तत्प्रतिराशीक्रियते । तस्माल्लब्धाश्चात्र दश एकेन भागहारेण यदेवोपरि तदेव लभ्यते इति वचनात् लब्धा एककसंयोगे भङ्गा दश । ते एकान्ते स्थापनीयाः । तान् प्रतिराश्य स्थापयित्वा द्विकसंयोगे भङ्गसङ्ख्यामिच्छता तत्प्रतिराशीकृतं दशकलक्षणमङ्कस्थानं पुनरपि नवभिर्गुणयितव्यं जाता नवतिः ।

[भा.५३२] दोहिं हरिऊण भागं पडिरासेऊणं तंपि जं लद्धं ।
एएण कमेणं तु कायव्वं आनुपुव्वीए ।।

वृ- तस्या नवतेरधस्तनेन द्विकेन भागं ह्रियात् । भागे हृते लब्धा पञ्चचत्वारिंशत् । आगतं द्विकसंयोगे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चचत्वारिंशद् भंगा, । ते चैवं सूत्रत उच्चारणीयाः जे भिक्खू मासियं च सातिरेगमासियं च १, जे भिक्खू मासियं च दोमासियं च २, जे भिक्खू मासियं च सातिरेगदोमासियं च ३, जे भिक्खू मासियं च तेमासियं च ४, जे भिक्खू मासियं च सातिरेगतेमासियं च ५ इत्यादि । ततो यल्लब्धं पञ्चचत्वारिंशल्लक्षणं तत्त्रिकसंयोगभंगसंख्यामिच्छता प्रतिराशीकर्त्तव्यम् । प्रतिराश्योपरितनेनाष्टकेन गुणयेत् । एतेनान्तरोदितेन क्रमेण सर्वेष्वप्यङ्कस्थानेष्वानुपूर्व्या सर्वं कर्त्तव्यं । कैरित्याह-

[भा.५३३] उवरिमगुणकारेहिं हेट्ठिल्लेहिं भागहारेहिं ।
जा आइमं तु ट्ठाणं गुणिते इमे हुंति संजोगो ।।

वृ- उपरितनैर्गुणकारैस्तस्य तस्य प्रतिराशीकृतस्य क्रमेण गुणनं कर्त्तव्यम् । गुणने च कृतेऽधस्तनैर्भागहारैर्भागो हर्त्तव्यः, । भागे च हृते यल्लभ्यते तैर्विवक्षितस्य त्रिकसंयोगादेर्भंगा । एतच्च तावत्कर्तव्यं यावदादिमं स्थानमङ्कस्थानं तत्रैवमुपरितनैर्गुणकारैर्गुणिते उपलक्षणमेतत् । अधस्तनैर्भागहारैर्भागे हृते इमे वक्ष्यमाणसङ्ख्याकाः क्रमेण संयोगा एककद्विकादिसंयोगभङ्गा भवन्ति तानेवाह-

[भा.५३४] दस चेव य पणयाला वीसालसयं च दो दसहिया य ।
दोन्निसया बावन्ना दसुत्तरा दोन्नि उसयाउ ।।

[भा.५३५] वीसालसयं पणयालीसं दस चेव होंति एक्को य ।
तेवीसं च सहस्सं अदुव अनेगा उ नेयाउ ।।

वृ- एककसंयोगे दश भङ्गा, द्विकसंयोगे पञ्चचत्वारिंशत्, एते च प्रागेव भाविताः । त्रिकसंयोगे वीसालसयं चेति विंशत्युत्तरं शतं ।। तच्चैवम्-पञ्चचत्वारिंशत् अष्टकेन गुणिता जातानि त्रीणि शतानि षष्ट्यधिकानि, एतेषां त्रिकेनाधस्तनेन भागो ह्रियते । लब्धं विंशं शतं । चतुष्कसंयोगे भङ्गकानां द्वेशते दशादिके । तथाहि-त्रिकसंयोगे लब्धं विंशं शतं प्रति राशीक्रियते । प्रतिराश्योपरितनेन सप्तकेन गुण्यते, जातानि अष्टौ शतानि चत्वारिंशदधिकानि । तेषामधस्तनेन चतुष्केण भागो ह्रियते । लब्धे द्वे शते दशोत्तरे । एवं सर्वत्र भावना कार्या । पञ्चकसंयोगे भङ्गकानां द्वे शते द्विपञ्चाशदधिके, षट्कसंयोगे दशोत्तरे द्वे शते, सप्तकसंयोगे विंशत्युत्तरं शतं, अष्टकसंयोगे पञ्चचत्वारिंशत्, नवकसंयोगे दश, दशकसंयोगे एकः । सर्वसङ्ख्यया भङ्गानां त्रयोविंशं त्रयोविंशत्यधिकं सहस्त्रं । अदुव-अथवा अनेके इतोऽप्यतिप्रबूतसंख्याकाः प्रतिसेवना ज्ञातव्याः । कथमिति चेदुच्यते-एता हि अनन्तरोदिताः प्रतिसेवनाः सामान्यत उक्तास्तत एता एव भूय उद्घातविशेषणविशिष्टा ज्ञातव्याः । कथमिति चेदुच्यते-एता हि अनन्तरोदिताः प्रतिसेवनाः सामान्यत उक्तास्तत एता एव भूय उद्घातविशेषणविशिष्टा ज्ञातव्याः । एता एव चानुद्घातविशेषणविशिष्टास्तदनन्तरमनेका उद्घातानुद्घातसंयोगविकल्पत । ततः सर्वा अपि पिण्डीकृत्य मूलगुणोत्तरगुणापराधाभ्यां गुणयितव्यास्ततो दर्पकल्पाभ्यामेवमनेका भवन्ति । अथवा अनेकप्रतिसेवानयनार्थमियं त्रिंशत्पदात्मका रचना कर्त्तव्याः । मासिकं १ पञ्चदिनातिरेकमासिकं २ दशदिवातिरेकमासिक ३ पञ्चदशदिनातिरेकमासिकं ४ विंशतिदिनातिरेकमासिकं ५ भिन्नमासातिरेकमासिकं ६ । एवं द्वैमासिकत्रैमासिकचातुर्मासिकञ्चमासिकेषु प्रत्येकं षट् षट् स्थानानि वेदितव्यानि । एवं षट् कानि त्रिशदेतेषु च त्रिंशतिपदेषु करणमनन्तरोदितं प्रवर्तयितव्यम् । तत्र सर्वेषामागतफलानामेकत्र संपिण्डनेनेयं सूत्रसंख्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.५३६] कोडिसय सत्तहियं सत्ततीसं च होंति लक्खाइं ।
एयालीस सहस्सा अठसयाअहिय तेवीसा ।।

वृ- एता अपि सामान्यतः प्रतिसेवना उक्तास्तत एता एवोद्घातविशेषणविशिष्टा ज्ञातव्यास्तदनन्तरमेता एवानुद्घातविशेषणविशिष्टास्ततोऽनेका उद्घातानुद्घातसंयोगतः ततः सर्वाः संपिण्ड्य मूलोत्तरापराधाभ्यां गुणयितव्यास्तनन्तरं दर्पकल्पाभ्यामेवमनेकाः प्रतिसेवनाः ।

मू. (१५) *जे भिक्खू चाउम्मासियं वा सातिरेगचाउम्मासियं वा पंचमासियं वा सातिरेगपंचमासिय वा एतेसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणं पडिसेवित्ता आलोएज्ञा, अपलिउंचियं आलोएमाणस्स ठवणिज्ञं ठवणित्ता करणिज्ञं वेयावडियं० जाव पुव्वं पडिसेविय पच्छाआलोइयं० जाव पलिउंचिएमाणस्स सव्वमेयंसगयं साहणियं० जाव आरुहियव्वेसिया ।।*

मू. (१६) *जे भिक्खू बहुसो चाउम्मासियं वा० एवं तं चेवं आरुहियव्वेसिया ।।*

मू. (१७) *जे भिक्खू चाउम्मासियं वा साइरेग चाउम्मासियं वा पञ्चमासियं साइरेग पञ्चमासियं वा एएसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणं पडिसेविता आलोएज्जा पलिउंचियं आलोएमाणे जाव आरुहियव्वेसिया ।*

मू. (१८) *एवं बहुसो वि० .....*

वृ- जे भिक्खू इत्यादि । जे भिक्खू चाउभासियं वा सातिरेगचाउमासियं वा पञ्चमासियं वा सातिरेगपञ्चमासियं वा एएसिं परिहारट्ठाणाणं अन्नयरं परिहारट्ठाणाणं पडिसेवित्ता आलोएज्ञा । अपलिउंचियमाणोएमाणे इत्यस्य सूत्रावयवस्य व्याख्या प्राग्वत् । इदं सूत्रं परिहारप्रायश्चित्त-तपःप्रतिपादकमतः तद्विधिमाह-ठवणिज्ञं ठवइत्ता इत्यादि यः परहिरतपःप्रायश्चित्तस्थानमापन्नः तस्य परिहारतपोदानार्थं सकलसाधुसाध्वीजनपरिज्ञानाय सकलगच्छसमक्षं निरुपसर्गप्रत्ययं कायोत्सर्गः पूर्वं क्रियते । तत्करणानन्तरं गुरुर्ब्रूते-अहं ते कल्पस्थितोऽयं च साधुरनुपारिहारिकस्ततः स्थापनीयं स्थापयित्वेति यत्नेन सहाचरणीयं । तत् स्थाप्यते इति स्थापनीयं वक्ष्यमाणमालापनपरिवर्तनादि तत् सकलगच्छ समक्षं स्थापयित्वा कल्पस्थितेनानुपरिहारिकेण च यथायोगमनुशिष्टयुपालम्भोपग्रहरूपं वक्ष्यमाणवैयावृत्यं करणीयं । ताभ्यां क्रियमाणेऽपि वैयावृत्ते स्थापितेऽप्यालापनादौ कदाचित् किमपि प्रतिसेवित्वा गुरोः समीपमुपतिष्ठेत् । यथा भगवन् अहममुकं प्रायश्चित्तस्थानमापन्नस्ततः सेवित्ति तदपि कृत्स्नं परिहारतपसि उह्यमाने आरोहयितव्यं, आरोपणीयं स्यात् । स्यादित्यव्ययमत्रावधारणे आरोहयितव्यम् ।

केवलं तत्कृत्स्नमारोपयितव्यमनुग्रहकृत्स्नेन निरनुग्रहकृत्स्नेन तस्य प्रतिसेवितस्य गुरुसमक्ष-मालोचनायां चतुर्भङ्गी, तामेवाह-पुव्वं पडिसेवियमित्यादि । पूर्वमिति पदैकदेशे पदसमुदायोपचारात् पूर्वानुपूर्व्यीति द्रष्टव्यं । ततोऽयमर्थः-गुरुलघुपर्यालोचनया पूर्वानुपूर्व्या लघुपंचकादिक्रमेण प्रतिसेवितं पूर्वं पूर्वानुपूर्व्या प्रतिसेवनानुक्रमेणेतिभावः आलोचितं एष प्रथमो भंगः, तथा पूर्वं गुरुलघुपर्यार्यलोचनया पूर्वानुपूर्व्या मासलघुकादि प्रतिसेवितं तदनन्तरं च तथाविधाल्पप्रयोजनोत्पत्तौ गुरुलघुपर्यालोचनयैव लघुपञ्चकादि प्रतिसेवितं, आलोचनाकाले तु पश्चात् पश्चानुपूर्व्या आलोचितं पूर्वं लघुपञ्चकाद्यालोचितं पश्चात् लघुमासादीति भावः, । एष द्वितीयो भङ्गः । तथा पश्चात् अनुपूर्व्या प्रतिसेवितं गुरुलघुपर्यालोचनामन्तरेण पूर्वं गुरुमासादिकं प्रतिसेवितं पश्चात् लघुपञ्चकादीति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलोचनावेलायामनुपूर्व्या आलोचितं पूर्वं लघुपञ्चकाद्यालोचितं पश्चात् गुरुमासादीत्यर्थः । एषस्तृतीयो भङ्गः । तथा पश्चानुपूर्व्या प्रतिसेवितं गुरुलघुपर्यालोचनादिविरहितो यथा कथंचन प्रतिसेवितमिति भावः । पश्चात् पश्चादनुपूर्व्या आलोचितं प्रतिसेवनानुक्रमेणैवालोचितमथवा स्मृत्वा स्मृत्वा यथा कथञ्चनाप्यालोचितमित्यर्थः । एष चतुर्थो भङ्गः । इह प्रथमचरमभंगावप्रतिकुञ्चनायां द्वितीयतृतीयभङ्गौ प्रतिकुञ्चनायामिति, प्रतिकुञ्चनाऽप्रतिकुञ्चनाभ्यां चतुर्थभङ्गी कृता तामेवाह-अपलिउंचिए अपलिउंचियमित्यादि । यदा अपराधानापन्न आलोचनाभिमुखस्तदैवं कश्चित्संकल्पितवान्, यथा सर्वेप्यपराधा मया आलोचनीयाः ।

एवं पूर्वसंकल्पकालेऽप्रतिकुञ्चिते आलोचनवेलायामप्रतिकुञ्चितमालोचयति । एष प्रथमो भङ्गः। तथा पूर्वं संकल्पकालेऽप्रतिकुञ्चितमालोचनावेलायां तु प्रतिकुञ्चितमालोचयतीत्येष द्वितीयः । पूर्वं संकल्पकाले केनापि प्रतिकुञ्चितं यथा न मया सर्वेऽपराधा आलोचनीयाः । एवं पूर्वं संकल्पकाले प्रतिकुञ्चिते आलोचनावेलायां भावपरावृत्तेः सर्वमपि अप्रतिकुञ्चितमालोचयति । एष तृतीयो भङ्गः । तथा पूर्वं सङ्कल्पकाले केनापि प्रतिकुञ्चितं यथा न मया सर्वे अपराधा आलोचनीयाः । तत एवं संकल्पकाले प्रतिकुञ्चिते आलोचनावेलायामपि प्रतिकुञ्चितमेवालोचयति । एष चतुर्थो भङ्गः । तत्राप्रतिकुञ्चितमालोचयतो वीप्सा साकल्येन व्याप्या भवति । ततोऽयमर्थो निरवशेषमालोचयतः सर्वमेतद्यदापन्नमपराधजातं, यदि वा कथमपि प्रतिकुञ्चना कृता स्यात्ततः प्रतिकुञ्चनानिष्पन्नं, यच्च गुरुणा सहालोचनावेलायां समासनोच्चासननिष्पन्नं या चालोचनाकाले असमाचारी तन्निष्पन्नं च सकलमेतत् स्वयमात्मना अपराधकारिणा कृतं स्वकृतं साहणिया इति संहत्य एकत्र मीलयित्वा यदि संचयितं प्रायश्चित्तस्थानमापन्नस्ततः षाण्मासिकं प्रायश्चित्तं दद्यात् । यत्पुनः षाण्मासातिरिक्तं तत्सर्वं झोषयेत् । अथ मासादिकं प्रायश्चित्तमापन्नस्ततस्तदेव देयमिति, वाक्यशेषः, । जे एयाइ इत्यादि यः साधुरेतयानन्तरोदितया षाण्मासिक्या मासिक्यादिकया वा प्रस्थापनायाः प्राक्कृतस्यामपराधस्य विषये स्थापना प्रायश्चित्तदानप्रस्थापना तया प्रस्थापितः प्रायश्चित्तकरणे प्रवर्तितो निर्विशमानस्ततः प्रायश्चित्तमुपभुञ्जानः कुर्वाण इत्यर्थः । यत्प्रमादतो विषयकषायादिभिर्वा प्रतिसेवते ततस्तस्यां प्रतिसेवनायां यत्प्रायश्चित्तं सेवते तदपि कृत्स्नमनुग्रहकृत्स्नेन निरनुग्रहकृत्स्नेन वा तत्रैव पूर्वप्रस्थापिते प्रायश्चित्ते आरोहयितव्यं स्यात् चढापयितव्यमित्यर्थः । एव संक्षेपतः सूत्रार्थः व्यासार्थं तु भाष्यकारो वदन् जे भिक्खू इत्यादि सूत्रावयवस्य व्याख्यानमतिदेशत आह-

[भा.५३७] जे च्चिय सुत्तिविभासा हेट्ठिल्लसुयंमि वणिया एसा ।
स च्चिय इहंपि नेया नाणत्तं ठवणपरिहारे ।।

वृ- या चैषा सूत्रविभाषा जे भिक्खू इत्यादिसूत्रावयवव्याख्या एककद्विककादिसंयोगोपदर्शनरूपा अधस्तनसूत्रे अनन्तरोदितसूत्रे वर्णिता । सैव इहापि अस्मिन्नपि सूत्रे वर्णयितव्या यदि सैव वर्णयितव्यास्ततः को विशेषः ? तत आह-नानात्वं पूर्वसूत्राद्विशेषः स्थापनापरिहारे, । इयमत्र भावना-अधस्तनसूत्रे परिहारस्तपो नोक्तमिह तु परिहारतपो विभाव्यते इति; तत्र येन वक्तव्यक्रमेण परिहारतपो वक्तव्यं भवति । तद्वक्तव्यक्रमसंसूचिकां द्वारगाथामाह-

[भा.५३८] को भंते परियाओ सुत्तत्थाभिग्गहो तवो कम्मं ।
कक्खडमकक्खडे वा सुद्धतवे मंडवा दोन्नि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- प्रथमतः परिहारतपो योग्यता परिज्ञानाय को भदन्त त्वमसीति पृच्छा कर्तव्या । तदनन्तरं परिहारतपो योग्यस्य पर्यायो वाच्यः । ततः सूत्रार्थौ तदनन्तरमभिग्रहस्ततस्तपः कर्म तत्र यदि तपसा कर्कशो भवति । किमुक्तं भवति ? कर्कशे तपसि सदा कृताभ्यासतया न कर्कशेन तपसा परिभूयते । ततः परिहारतपस्तस्मै दीयते । इतरस्मिंस्त्वकर्कशे शुद्धं तपः । अत्रार्थे द्वौमण्डपावेरण्डशिलानिष्पन्नौ दृष्टान्तौ । एष द्वारगाथासंक्षेपार्थः । व्यासार्थं तु प्रतिद्वारं विवक्षुः प्रथमतः पृच्छाद्वारं विवृणोति ।।

[भा.५३९] सगणंमि नत्थि पुच्छा, अन्नगणा आगतं तु जं जाणे ।
अन्नायं पुन पुच्छे परिहारतवस्स जोगट्ठा ।।

वृ- स्वगणे स्वगणसम्बन्धिनि पृच्छा उक्तस्वरूपा वक्ष्यमाणा वा नास्ति । स्वगणवास्तव्यतया परिचितत्वात् । अन्यगणादपितु श ॆ पिशद्बार्थः । स च भिन्नक्रमत्वादत्र सम्बद्धयते । आगतं यं जानाति गीतादिरूपमाकारेङ्गितदिभिस्तस्मिन्नपि नास्ति पृच्छा । अज्ञातं पुनः परगणादागतं परिहारतपसो योग्यार्थं योग्योऽयं न वेति परिज्ञानार्थं पृच्छेत्कथमित्याह--

[भा.५४०] गीयमगीतो गीतो अंहति किं वत्थुकासवसि जोग्गो ।
अविगीएत्ति व भणिए थिरमथिरतवे य कयजोग्गो ।।

वृ- स प्रायश्चित्तस्थानप्राप्त आलोचयितुमुपस्थितः पृच्छयते किं त्वं गीतो गीतार्थः । मकारो लाक्षणिकः । अगीतोऽगीतार्थः । तत्र यदि ब्रूते अहं गीतो गीतार्थः ततः पुनरपि पृच्छ्यते-त्वं किंवस्त्विति । आचार्य उपाध्यायो वृषभादिभिर्वा ? तत्रान्यतरस्मिन् कथिते भूयः पृच्छयते-कासवसिजोग्गित्ति, कस्य वा तपसस्त्वमसि योग्यः । किमुक्तं भवति ? किं तपः कर्तुमुत्सहसे, कस्य वा तपसः समर्थ इति पृच्छनीय इति । अथ स ब्रूते-अहमविगीतो न विशिष्टो गीतोऽगीतार्थ इत्यर्थः । ततोऽविगीत इति भणितेन पुनः पृच्छति । थिरमथिरत्ति, किं त्वं स्थिरोऽस्थिरो वा ? तत्र स्थिरो नाम धृतिसंहननाभ्यां बलवान् । तद्विपरीतोऽस्थिरः । तत्र यदि बूयादहमस्थिरः ततः पुनरपि पृच्छा कार्या । तवे य कयजोगोत्ति, तपसि कृतयोगो नाम कर्कशतपोभिरनेकधा भावितात्मा इतरस्तु नेति । तत्र यदि तपसि कृतयोगस्ततस्तस्मै परिहारतपो दीयते इति, इतरस्मै शुद्धं तपः, गतं पृच्छाद्वारमधुना पर्यायद्वारमाह--

[भा.५४१] गिहि सामन्ने य तहा परियातो दुविह होइ नायव्वो ।
इगुतीसा वीसाया जहन्न उक्कोस देसूना ।।

वृ- पर्यायो भवति द्विधा ज्ञातव्यस्तद्यथा-गृहे गृहविषयः जन्मत आरभ्येत्यर्थः । तथा श्रामण्ये श्रामण्यविषयः श्रमणभावप्रतिपत्तेरारभ्येति भावः । इयमत्र भावना-द्विविधः पर्यायस्तद्यथा-जन्मपर्यायो दीक्षापर्यायश्च । इगुतीसा वीसा य जहन्नति यथासंख्येन योजना जन्मपर्यायो जघन्यत एकोनत्रिंशद्वर्षाणि विज्ञेयो दीक्षापर्यायो विंशतिवर्षाणि, उत्कर्षत उभयत्रापि देशोना पूर्वकोटी । उक्तं च-'परियातो दुविहो-जन्मपरियातो दिक्खपरियातो । जन्मपरियातो जहन्नेणं इगुणतीसं वासा । उक्कोसेणं देसूणा पुव्वकोडी दिक्खापरियातो जहन्नेणं वीसं वासो उक्कोसेणं देसूणा पुव्वकोडीति । । गतं पर्यायद्वारम् सम्प्रति सूत्रार्थमाह द्वारम्-

[भा.५४२] नवमस्स तईयवत्थू जहन्न उक्कोस ऊणगा दसओ ।
सुत्तत्थाणि अभिग्गह दव्वादि ततोरयणमादी ।।

वृ- जघन्यतः सूत्रमर्थश्च यावत् नवमस्य पूर्वस्य तृतीयमाचारनामकं वस्तु उत्कर्षतो यावदूनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिन्न्यूनानि दशपूर्वाणि, परिपूर्णदशपूर्वधरादीनां परिहारतपोदाना योगात् । तेषां हि वाचनादिपञ्चविधस्वाध्यायविधानमेव सर्वोत्तमं कर्मनिर्जरास्थानं । गतं सूत्रार्थद्वारमिदानीमभिग्रहद्वारमाह- अभिग्रह-द्रव्यादि अभिग्रहा-द्रव्यादिकास्तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र द्रव्याभिग्रहा अद्य मया कुल्माषा ग्राह्या यदि वा तक्रादिकमेकं द्रव्यमिति । क्षेत्रतोऽभिग्रहा देहलीमाक्रम्येत्यादिकाः । कालतोऽभिग्रहास्तृतीयस्यां पौरुष्यां । भावतोमभिग्रहा यदि हसन्ती रुदन्ती वा भिक्षां ददातीत्येवमादिकाः ।गतमभिग्रहद्वारमदुना तपोद्वारमाह तपो रयणमादी तपो रत्नादिकं, पदैकदेशे पदसमुदायोपचारात् रत्नावल्यादिकं आदिशब्दात्कनकालिमुक्तावलिसिंहविक्रीडितादि तपः परिग्रहः । एवं गीतार्थत्वयथोक्तपर्यायसूत्रार्थाभिग्रहकर्कशतपः कर्मलक्षणगुणसमूहयुक्तस्य परिहारतपो दीयते । एतद्गुणविहीनस्य पुनः शुद्धं तपो देयम् । अत्र शिष्य पृच्छति-

[भा.५४३] एयगुणसंजुयस्स उ किं कारणदिज्जए उ परिहारो ।
कम्हा पुन परिहारो न दिज्जए तव्विहूणस्स ।।

वृ- भगवन् किं कारणमेतैरनन्तरोदितैर्गीतार्थत्वादिभिर्गुणैर्युक्तस्य परिहारः परिहारतपो दीयते, । कस्मात्पुनस्तद्विहीनस्य गीतार्थत्वादिगुणविकल्पस्य परिहारो न दीयते ? अत्राचार्यो द्वौ मण्डपौ दृष्टान्तीकरोति-शैलमण्डपमेरण्डमण्डपं च । तथा चाह-

[भा.५४४] जं माइ ततं छुब्भइ सेलमंडवेन एरंडे ।
उभयबलियंमि एयं, परिहारो दुब्बले सुद्धो ।।

वृ- शैलमये पाषाणभये मण्डपे यत्किमपि माति तत्सर्वं छुभ्यते प्रक्षिप्यते । तस्य तावत्यपि प्रक्षिप्ते भङ्गासम्भवात् । एरण्डे एरण्डमये पुनर्मण्डपे यन्माति न तत्सर्वं प्रक्षिप्यते भङ्गसम्भवात्, किन्तु यावत्क्षमतं तावत् प्रक्षिप्यते । एवं उभयेन धृत्या शरीरसंहननेन च बलिके बलिष्टे गीतार्थत्वादिगुणयुक्ते परिहारः परिहारतपो दीयते । दुर्बले धृत्या संहननेन वा उभयेन वा बलिविहीने शुद्धतपो दीयते । एते च परिहारशुद्धतपसी तुल्यायामप्यापत्तौ पुरुषविशेषाश्रयणेन दीयते । तथा चाह-

[भा.५४५] अविसिठा आवत्ती सुद्धतवे चेव तहय परिहारे ।
वत्थुं पुन आसज्ज़ा दिज्जइ इयरो वइयरो वा ।।

वृ- शुद्धतपसि दातुमिष्टे परिहारे च अविशिष्टा तुल्या आपत्तिस्तथापि वस्तुधृतिसंहननसम्पन्नं पुरुषवस्तु आसाद्य अपेक्ष्य इतरत् परिहारतपो दीयते । धृतिसंहननविहीनं पुनः पुरुषवस्तु आसाद्य इतरत् शुद्धतपो दीयते । किमुक्तं भवति । यद्यपि द्वावपि जनौ तुल्यमापत्तिस्थानमापन्नौ तथापि यो धृतिसंहननसम्पन्नस्तस्मै परिहारतपो देयमितरस्मै तुल्यायामप्यापत्तौ शुद्धतपः । अत्र दृष्टान्तमाह-

[भा.५४६] वमणविरेयणमाई कक्खकिरिया जहाउरे बलिए ।
कीरइ न दुब्बलंमी, अह दिट्ठंतो भवे दुविहो ।।

वृ- यद्यपि द्वावपि पुरुषौ सदृशरोगाभिभूतौ तथापि तयोर्मध्ये य आतुरः शरीरेण बलवान् तस्मिन् बलिके यथा वमनविरेचनादिका कर्कशक्रिया क्रियते, न तु दुर्बले तस्मिन् यथा सहते तथा अकर्कशा क्रिया क्रियते । अहत्ति एष दृष्टान्तस्तपसि द्विविधे परिहारशुद्धतपोलक्षणे । इदमुक्तं भवति । अयमत्रोपसंहारो बलवत्यातुरे कर्कशक्रियेव धृतिसंहननसम्पन्ने परिहारतपो दीयते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बलहीनेत्वकर्कशक्रियेव धृतिसंहननविहीने शुद्धतप इति, । सम्प्रति येभ्यो नियमतः शुद्धतपः परिहारतपो वा शुद्धतपः परिहारतपो योग्यापत्तिस्थानापत्तौ तपो देयम् । तत्प्रतिपादनार्थमाह-

[भा.५४७] सुद्धतवो अज्जाणं अगयित्थे दुब्बले असंघयणे ।
धितिबलिए य समन्ना गएय सव्वेसिं परिहारो ।।

वृ- परिहारतपो योग्येऽप्यापत्तिस्थाने समापतिते आर्याणामार्यिकाणां शुद्धतपो देयमार्यिकाणां धृतिसंहननदुर्बलतया पूर्वोऽनाधिगमाच्च परिहारायोग्यत्वात् । तथा यो गीतार्थो यश्च धृत्या दुर्बलो रोगादिना वा अनुपचितदेहो दुर्बलो यश्चासंहननआदिमानां त्रयाणां संहनानामन्यतमेनापि संहननेन विकल एतेभ्योऽपि सर्वेभ्यो नियमतः शुद्धतपो दातव्यमगीतार्थत्वादिना परिहारायोग्यत्वात् यः पुनः धृत्या बलिको बलवान् वज्रकुड्यसमानो यश्च समन्वागत-आदिमानां त्रयाणां संहननानामन्यतमेन संहननेन गीतार्थत्वादिगुणैश्च युक्त एतेभ्यः सर्वेभ्योऽपि नियमतः परिहारतपो योग्यापत्तिस्थानप्राप्तौ परिहारः परिहार तपो देयं । तस्यायं विधिः । ठवइज्जं ठवइत्ता यत्तेन सह नाचरणीयं तत् स्थापनीयमुच्यते तत्सकलगच्छसमक्षं स्थापयित्वा कथं स्थापयित्वेत्यत आह-

[भा.५४८] विउस्सगो जाणणट्ठा, ठवणा तीएसु दोसु ठविएसु ।
अगडे नदीयरायादिट्ठंतो भीय आसत्थे ।।

वृ- परिहारतपोदानात् प्राक् आदावेव कायोत्सर्गः क्रियते । कथमिति चेदुच्यते गुरुः पूर्वदिगभिमुख उत्तरदिगभिमुखो वा चरन्तो दिगभिमुखो वा चैत्यानां चाभिमुख एवं परिहारतपस्थोपि नवरं गुरोर्वामपार्श्वे ईषत् पृष्ठतस्तौ द्वावपि भणतः परिहारतवपवज्जावणठा करेमि काउस्सग्गं निरवसग्गवत्तिआए सद्धाए मेहाए धिइए धारणाए जाव वोसिरामि । पणवीसुस्सासकालं सुभज्झवसायी चउवीसत्थयं वा चिंतेउं नमोक्कारेण पारेत्ता अक्खलियं चउवीसत्थयं उच्चरंति । अत्र शिष्यः प्राह-मिकर्थमेष कायोत्सर्गः क्रियते ? उच्यते जाणणट्ठा-साधूनां परिज्ञानार्थमथवा निरुपसर्गनिमित्तमेतच्चानन्तरगाथायां वक्ष्यति, । ठवणति-कल्प स्थितस्य अनुपारिहारिकस्य च स्थापना कर्त्तव्या, । ततो दोसु ठविएसुत्ति कल्पस्थिते अनुपारिहारिके च स्थापिते सति स पारिहारिकः कदाचिद्भीतो भवेत कथमहमालापनादिपरिवर्जितः सन्ः उग्रं तपः करिष्यामीति, तत एवं स भीतः सन्नाश्वासयितव्यः । तत्रावटः कूपो नदी सरित् राजा च दृष्टान्तस्तथाहि । यथा कोऽप्यवटे पतितः सन् भयमगमत् कथमुत्तरिष्यामि ततः स तटस्थैः आश्वास्यते । मा भैस्त्वं वयंत्वामुत्तारयिष्यामः । तथा च रज्जुरियमानीता वर्ततेइति, । एवमाश्वासितो निर्भयः सनस्थैर्यं बध्नाति । यदि पुनस्त्वं प्रत्येवमुच्यते 'मृत एष वराको न एतं कोऽप्युत्तारयिष्यति ततः स निराशः सन्नंगं निस्सहं मुक्त्वा म्रियते । ततः स यथा नियमत आश्वासनीयस्तथा पारिहारिकोऽप्याश्वासनीयः, यथा वा कोऽपि नद्या अनुश्रोतसोह्यमानो भयमायासीत् । ततः स तटस्थैराश्वास्यते । आश्वासितः सन् स्थाघां प्राप्नोति अनाश्वासितो निराशो भयेनैव म्रियते, यथा वा कस्यचित् राजा रुष्टः ततः स भीतो नूनमहं मारयिष्ये । ततः सोऽन्यैराश्वास्यते 'मा भैर्वयं राजानं विज्ञापयिष्यामो, न च राजाऽपन्यायं करोति' । एवं पारिहारिक आश्वासनीयः, आश्वासनादानेन च तस्मिन् भीते आ समंतात् स्वस्थे जाते अधिकृते तपसः प्रतिपत्तिः क्रियते । सम्प्रति कायोत्सर्गकरणाय कारणान्तरमाह-

[भा.५४९] निरुवसग्गं निमित्तं भयजननट्ठाए सेसगाणं च ।
तस्सप्पणो य गुरुणो य साहूए होइ पडिवत्ती ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कायोत्सर्गकरणमादौ निरुपसर्गनिमित्तं निरुपसर्गं परिहारतपः समाप्तिं यायादित्येवमर्थं, तथा शेषाणां साधूनां भयजननार्थं । यथामुकमापत्तिस्थानमेष प्राप्त इत्यस्मै महाघोरं परिहारतपो दास्यते, तस्मान्नैतदापत्तिस्थानं सेवनीयं, किन्तु यत्नतो रक्षणीयमिति । ततः कायोत्सर्गकरणानन्तरं तस्य परिहारतपः प्रतिपत्तुर्गुरोश्च साधकोऽनुकूले शुभे तिथिकरणमुहूर्तादिके शुभे तारावले शुभे च चन्द्रबले परिहारतपसः प्रतिपत्तिर्भवति । अन्यच्च कायोत्सर्गकरणानन्तरमादावेव तं पारिहारिकमिदं गुरुर्ब्रूते-

[भा.५५०] कप्पट्ठितो अहं ते, अनुपरिहारीय एस ते गीतो ।
पुव्वं कयपरिहारो, तस्सासितियरोवि दढदेहो ।।

वृ- यावत्तव कल्पपरिहारसमाप्तिस्तावदहं तव कल्पस्थितः वन्दनवाचनादिषु कल्पभावे स्थितो न तु परिहार्यः, शेषाः पुनः साधवः परिहार्याः । अन्यच्च एष साधुर्गीतो गीतार्थः पूर्वं कृतपरिहारः, कृतपरिहारत्वेन सकलसामाचारी ज्ञाता तवानुपरिहारी यत्र यत्र भिक्षादिनिमित्तं परिहारी गच्छति तत्र तत्र अनु पश्चात् पृष्टतो लग्नः सन् गच्छतीत्यनुगच्छतीत्यनुपरिहारी अथवा अनुपरिहारीत्यपि शब्दसंस्कारः । तत्रायमन्वर्थः-परिहारिणोऽणु स्तोकं प्रतिलेखनादिषु साहाय्यं करोतीत्यणुपरिहारी । तत्र यदि पूर्वं कृतपरिहारोऽनुपरिहारी न लभ्यते । ततस्तस्य असति अभावे इतरोऽपि अकृतपरिहारतया अपि दृढदेहो दृढसंहननो गीतार्थोऽनुपरिहारी स्थाप्यते, । एवं कल्पस्थितमनुपरिहारिणं च स्थापयित्वा स्थापना स्थापनीया । तां च स्थापनां स्थापयन्नाचार्यः शेषसाधूनिदं वक्ति ।

[भा.५५१] एस तवं पडिवज्जइ न किंचि आलवति मा य आलवह ।
अत्तट्ठचिंतगस्सा वा घातो भे न कायव्वो ।।

वृ- आचार्यः समस्तमपि सबालवृद्धं गच्छमामन्त्र्य ब्रूते-एष साधु परिहारतपः प्रतिपद्यते । ततः कल्पस्थितिरेषा न किञ्चित्साधुमितरं वा आलापयति, वर्तमानसमीपे वर्तमानवद्वेति वचनतो भविष्यति वर्तमाना ततोऽयमर्थः-न किञ्चिदालापयिष्यति, मा च यूयमपि एनमालापयथ, आलापयिष्यथ । तथा आत्मन एव केवलस्यार्थ भक्तादिलक्षणं चिन्तयति, । न बालादीनां तथा कल्पसामाचारादित्यात्मार्थ-चिन्तकः, । यदि वा आत्मार्थो नाम अतीचारमलीनस्यात्मनो यथोक्तेन प्रायश्चित्तविधिना निरति-चारकरणं विशोधनमित्यर्थः, । तं चिन्तयन्तीत्यात्मार्थचिन्तकः । तस्य भे-भवद्भिरेतैः पदैर्व्याघातो न कर्तव्यः । तान्येव पदान्याह-

[भा.५५२] आलावण पडिपुच्छण परियट्टुट्ठाण वंदनग मत्ते ।
पडिलेहण संघाडग भत्तदान संभुंजणा चेव ।।

वृ- एष न किञ्चिदप्यालापयिष्यति, युष्माभिरप्येष नालापयितव्यः । तथा सूत्रमर्थमन्यद्वा किञ्चिदेष न युष्मान् प्रक्ष्यति, युष्माभिरप्येष सूत्रार्थादौ न पृष्टव्यस्तथा युष्माभिः सह नैष सूत्रमर्थं वा परिवर्तयिष्यति । नापि युष्माभिरनेन सह सूत्रादि परिवर्तनीयं, । तथैव कालवेलादिषु युष्मान्नोत्था-पयिष्यति, युष्माभिरप्येष नोत्थापयितव्यस्तथा न वन्दनं युष्माकमेष करिष्यति, नापि युष्माभिरेतस्य कर्तव्यम् । तथा उच्चारप्रस्रवणखेलमात्रकाण्येष युष्मभ्यं न दास्यति, नापि युष्माभिरेतस्मै दातव्यम् । तथा न किञ्चिदुपकरणमेष युष्माकं प्रतिलेखयिष्यति । नापि युष्माभिरुपकरणमेतस्य प्रतिलेखनीयं । यथा नैव युष्माकं सङ्घाटकभावं यास्यति, न च युष्माभिरेतस्य संघाटकैर्भवितव्यम् । तथा न युष्मभ्यमेष भक्तं पानं वा आनीय दास्यति, न च युष्माभिरेतस्यानीय दातव्यम् । तथा नायं युष्माभिः सह भोक्ष्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नापि युष्माभिरेतेन सह भोक्तव्यम् । तथा कल्पे समाचारात्तस्मात् आलापने प्रतिप्रच्छन्ने परिवर्तने उत्थापने वन्दने वन्दनदापने मात्रे उच्चारप्रस्रवणखेलमात्रकानयने प्रतिलेखने सङ्घाटके संघाटककरणे भक्तदाने संभोजने च सह भोजनविषये व्याघातो न कर्तव्य इति सम्बन्धः । आलापनादिभिर्व्याघातो न कार्य इत्यर्थः । एवमेतैर्दशभिः पदैर्गच्छेन स परिहृतः सोऽपि गच्छमेतैः पदैः परिहरति, यदि पुनर्गच्छवासी एतानि पदान्यतिचरति तत इदं प्रायश्चित्तम् ।

[भा.५५३] संघाडगो उ जावय लहुओ मासो दसण्ह उ पयाण ।
लहुगा य भत्तपाणे, संभोजने होंत अनुग्घाया ।।

वृ- दशानां पदानां मध्ये आलापनापदादारभ्य यावदष्टमं पदं संघाटकरूपं तावदेकैकस्मिन् पदेऽतिचर्यमाणे लघुको मासः प्रायश्चित्तं, यदि पुनर्भक्तं पानं च गच्छवासिनः प्रयच्छन्ति । ततो भक्तदानं भक्तपानदानविषये लघुकाश्चत्वारो लघुमासाः प्रायश्चित्तं, संभोजने सह भोजने भवत्यनुद्घाताः चत्वारो गुरुमासा इत्यर्थः । साम्प्रतमेतेष्वेव पदेषु परिहारिणः प्रायश्चित्तमाह-

[भा.५५४] संघाडगो उ जाव य गुरुमासो दसण्ह उपयाणं ।
भत्तपानेय संभुंजणे य परिहारिगे गुरुगा ।।

वृ- दशानां यदानामालोचनपदादारभ्य यावत्संघाटकः संघाटकपदं तावदेतेषु पदेषु अतिचर्यमाणेषु प्रत्येकं प्रत्येकं परिहारिके गुरुको मासः । यदि पुनर्गच्छवासिभ्यो भक्तप्रदानं करोति तैः सह भुंक्ते वा तदा प्रत्येकं भक्तदाने संभोजने च प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः । यः पुनः कल्पस्थित स इदं करोति-

[भा.५५५] कितिकम्मं च पडिच्छइ परिण पडिपुच्छियं पि से देइ ।
सो चिअ गुरुमुवचिट्ठइ उदंतमवि पुच्छितो कहइए ।।

वृ- कृतिकर्म वन्दनकं तत् यदि परिहारिको ददाति तदा गुरुः प्रतीच्छति । उपलक्षणमेतत्, आलोचनमपि प्रतिच्छति परिण्यत्ति प्रत्यूषसि अपराह्ले च परिज्ञां प्रत्याख्यानं तस्मै ददाति । तथा सूत्रार्थे यदि वा पृच्छति ततः प्रतिपृच्छां च ददाति । सोऽपि च परिहारिको गुरुमाचार्यमागच्छन्तमभ्युत्थानादिना विनयेनोपतिष्ठते । उदन्तः शरीरस्य च वार्त्तमानिकी वार्त्ता तमपि गुरुणा पृष्टः सन् कथयति । एवं स्थापनायां स्थापितायां भीतस्य पूर्वोक्तप्रकारेणाश्वासनायां च कृतायां स परिहारिकतपो वोढुं प्रवर्तते । तपो वहंश्च क्लमं गतो वीर्याचारमनिगूहयन् यद्यन्ततरां क्रियां कर्तुमसमर्थो भवति, तदा अनुपारिहारिकः करोति तथा चाह-

[भा.५५६] उट्ठिज्ज निसीइज्ञा भिक्खं हिंडेज्ज भंडयं पेहे ।
कुवियपियबंधवस्स व करेइ इयरोवि तुसिणीओ ।।

वृ- यद्युत्थातुं न शक्नोति ततो ब्रूते उत्तिष्ठामि तदनन्तरमनुपारिहारिकः समागत्योत्थापयेत् तथा यदि निषीदनं कर्तुमसमर्थस्तदा निषीदामीति वचनानन्तरं सत्वरमागत्य निषीदयेत् । यद्य भिक्षां गतः सन् कर्तुं न शक्नोति तदपि भिक्षाग्रहणादिकं करोति । अथ ब्रूते भिक्षा एव हिण्डितुसमर्थः । यदा भिक्षामनुपारिहारिकः केवलो हिण्डेत एवं भण्डकप्रत्युपेक्षणेऽपि साहाय्यं करोति । समस्तं वा भाण्डकं प्रत्युपेक्षते । कथमेतत्सर्वं करोतीत्यत आह कुवितेत्यादि, यथाकोपि कुपित प्रिय बांधवस्य-यत्करणीयंतत्सर्वं तुष्णीकः करोति, एवमितरोप्यनुपरिहारिक स्तूष्णीकः सन् सर्वं करोति, अतः पर आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.५५७] अवसो व रायदंडो न ए य एवं तु होइ पच्छित्तं ।
संकरसरिसवसगडे भंडववत्थेण दिट्ठंतो ।।

वृ- अवसो इत्यत्र प्रथमा तृतीयर्थे आर्षत्वात्ततोऽयमर्थः-यथा राजदण्डोऽवश्यमवशेनापि वोढव्यः, किमेवमध्यवसायं कृत्वा प्रायश्चित्तं वोढव्यमुतान्यदालम्बनं कृत्वा ? । सूरिराह-नएवं राज्यदण्डन्यायेन वोढव्यं किं तु चरणविशुद्धिनिमित्तमेतत् प्रायश्चित्तमित्येवमध्यवसायेन भवति प्रायश्चित्तं वोढव्यम् । अथवा यथा राजदण्डोऽवश्यमवशेनाप्युह्यते यदि पुनर्नैतिनोह्यते ततः शरीरविनाशो भवति । एवशब्द एवं शब्दात्परतो द्रष्टव्यः । एवमेव राजदण्डन्यायेनैव प्रायश्चित्तमप्यवश्यं भवति वोढव्यं, । तद्वहनाभावे चारित्रशरीरविनाशापत्तेः, । पुनरप्याह-प्रभूतं प्रायश्चित्तस्थानमापन्नमुह्यतां किं स्तोकमापन्नमुह्यतेन खलु किमपि तावता प्रायश्चित्तस्थानेनापन्नेन भवति । अत्र आचार्यः प्राह-संकरेत्यादि, पश्चार्धं सङ्करस्तृणाद्यवकरस्तेन तथा सर्षपाः प्रतीताः सर्षपग्रहणं पाषाणोपलक्षणं ततोऽयमर्थः-शकटे पाषाणेन मण्डपे सर्षपेण चात्र दृष्टान्तस्तथा हि-यथा सारण्या क्षेत्रे पाय्यमाने सारणिस्रोतसि तृणशूकमेकं तिर्यग् लग्नं तैर्नापनीतं तन्निश्रया अन्यान्यपि तृणशूकानि लग्नानि तन्निश्रया प्रभूतः पंको लग्नः । तत एवं तस्मिन् स्रोतसि रुद्धे क्षेत्रं समस्तमपि शुष्कम् । एवं स्तोकेन स्तोकेनाशोध्यमाने चरणकुल्यानिरोधे चरणक्षेत्रविनाशो भवति, तत एवं ज्ञात्वा स्तोकमपि प्रायश्चित्तस्थानमापन्नं वोढव्यमिति, शकटदृष्टान्तः । तथा एकः पाषाणः शकटे प्रक्षिप्तः स नापनीतः, अन्यः प्रक्षिप्तः सोऽपि नापनीतः । एवं प्रक्षिप्यमाणेषु प्रक्षिप्यमाणेषु भविष्यति । स कोऽपि गरीयान् पाषाणो यस्मिन् प्रक्षिप्ते तच्छकटं भंक्ष्यति, । एवं स्तोकेन स्तोकेन समापन्नेन प्रायश्चित्तस्थानेनाशोध्यमानेन कालक्रमेण चारित्रशकटं भज्यते । अथवा अन्यथा शकटदृष्टान्तभावना शकटे-एकं दारुभग्नं तत्र संस्थापितमेवमन्यदन्यत् भग्नं तत्र संस्थापितमिति सर्वभग्नमेवं चारित्रशकटेऽप्युपसंहारो भावनीयः । तथा एरण्डमण्डपे एकः सर्षपः प्रक्षिप्तः स नापनीतः, अन्यः प्रक्षिप्तः सोऽपि नापनीतः । एवं प्रक्षिप्यमाणेषु प्रक्षिप्यमाणेषु सर्षपेषु भविष्यति सर्षपो येन प्रक्षिप्तेन सोऽल्पीयानेरण्डमण्डपो भज्यते । एवं स्तोकेनापन्नेनाशोध्यमानेन कालक्रमेण चारित्रमण्डपो भज्यते, । वस्त्रदृष्टान्ते भावना, यथा-शुद्धे वस्त्रे कर्दमबिन्दुः पतितः, स न प्रक्षालितः, अन्यः पतितः सोऽपि न प्रक्षालितः, । एवं पतत्सु कर्दमबिन्दुष्वप्रक्षाल्यमानेषु कालक्रमेण स' तद्वस्त्रं कर्दमवर्णं संजातम् एवं तु शुद्धचारित्रं स्तोकायां स्तोकायामापतितायामापत्तौ प्रायश्चित्तेनाशोध्यमानायां कालक्रमेणा चारित्रं सर्वथा भवति । एवं दृष्टान्तैः प्रायश्चत्तस्य दानकरणे च प्रसाधिते पर आह-

[भा.५५८] अनुकंपिया य चत्ता अहवा सोही न विज्जए तेसिं ।
कप्पट्ठगभंडीए दिट्ठंतो धम्मया सुद्धो ।।

वृ- तुल्यायामप्यापत्तौ यस्य शुद्धतपः प्रयच्छतः स युष्माभिरनुकम्पितस्तद्विषये च भवतामवश्यं रागोऽन्यथेत्थमनुकम्पाकरणानुपपत्तेः यस्य पुनः परिहारं प्रयच्छत स परित्यक्तः कर्कशतपोदानात् तथा च सति तस्मिन् व्यक्तं प्रद्वेषः । अथवा परलोकमपेक्ष्य परिहारतपस्वी अनुकम्पितः परिहारतपोदानेन तच्चरणशुद्धिकरणात् शुद्धतपस्वी च परित्यक्तः शुद्धतपसा तच्चारित्रस्य शुद्ध्यभावात् । एवं विवक्षातो द्वावप्यनुकम्पितौ यदि वा त्यक्ताविति, अहवा सोहीत्यादि अथवा तयोः शोधिः सर्वथा न विद्यते । तथा हि-यदि परिहारतपसा शुद्धिस्ततः शुद्धतपस्विनो न शुद्धिस्तस्य परिहारतपोऽभावात् । अथ शुद्धतपसा शुद्धिस्तर्हि पारिहारिकस्य यत् परिहारतपसः कर्कशस्य करणं-तत्सर्वं निरर्थकं । शुद्धतपसा शुद्ध्यभ्युपगतौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन शुद्धयभावात् । अत्राचार्य आह-कप्पट्ठगेत्यादि, कल्पस्थगा बालास्तेषां भंडी गंत्री तया दृष्टान्तस्तथा हि-कल्पस्थकग्रहणं महदुपलक्षणं, तेन महद्गंत्र्या दृष्टांत इत्यपि द्रष्टव्यम्, इयमत्रभावना अत्र बालकगंत्र्या बृहत् पुरुषगंत्र्या च दृष्टांतः तथा हि डिम्भा आत्मीयया गंत्र्या क्रीडन्ति स्वकार्यनिष्पत्तिं च साधयन्तिन पुनः शक्नुवन्ति बृहत्पुरुषगंत्र्या कार्यं कर्तुं, तथा बृहत्पुरुषाणामपि आत्मीयया बृहद्गन्त्र्या कार्यं कुर्वन्ति । न डिम्भकदृगं अथ डिम्भकगंत्र्या कुर्वन्ति ततो भूयान् पलिमन्थदोषो न चाभिलषितस्य कार्यस्य परिपूर्णा सिद्धिः । अत्र बृहद्गंत्र्या भारस्तस्यामारोप्यते तर्हि सा भज्यते मूलत एव कार्यं न शुद्धयति । एवं शुद्धतपस्विनां शुद्धतपसा शुद्धिर्भवति परिहारतपस्विनां च परिहारतपसा, यदि पुनः शुद्धतपस्विनां परिहारतप आरोप्यते ततस्तत्र तेषां शक्त्यभावात् मूलत एव भ्रंशः, । अथवा परिहारतपस्विनां शुद्धतपस आरोपस्तर्हि चरणशुद्धयभावस्तावता तेषां चरणशुद्धययोगात् । अथ कथं शुद्धतपस्वी परिहारतपस्वी च स्वस्वतपसा शुद्धयति नान्येन तत आह-धम्मया शुद्धो इह शुद्धतपस्वी परिहारतपस्वी वा शुद्धो भवति । धम्मया स्त्रीत्वं प्राकृतत्वात् । धर्मेण स्वशक्तिलक्षणेन स्वभावेन, । तत एवमेव शुद्धिर्नान्यथा । एतदेव स्पष्टतरं भावयति ।

[भा.५५९] जो जं काउं समत्थो, सो तेन विसुज्झए असढभावो ।
गूहियबलो न सुज्झइ, धम्मसहावोत्ति एगट्ठं ।।

वृ- यः साधुर्यत् शुद्धतपः परिहारतपो वा कर्तुं समर्थः स साधुरशठभावः स्ववीर्यं प्रतिमायामकुर्वाणः स्वधर्मव्यवस्थितत्वात्तेन तपसा शुद्धयति, । यः पुनर्गूहितबलः स्ववीर्यनिगूहति, स न शुद्धयति स्वधर्मगूहनात् । धर्मस्वभाव इति द्वयमप्येकार्थं । एतेन धर्मया शुद्धो इति धर्मशब्दस्य पर्यायेण व्याख्या कृता पादत्रयेण त्वादिमेन तत्वत इति । अथ शुद्धतपः परिहारतपसोः कतरत् कर्कशं तपः सूरिराह-

[भा.५६०] आलवणादी उ पया सुद्धतवे अत्थि कक्खडो न भवे ।
इयरंमि उ ते नत्थि कक्खडओ तेन सो होइ ।।

वृ- यस्मात् शुद्धतपसि दशाप्यालापनादीनि पदानि सन्ति तेन कारणेन तत्तपः कर्कशं न भवति, । इतरस्मिंस्तु परिहारतपसि यस्मात्तान्यालापनादीनि पदानि न सन्ति, तेषां पूर्वमेव सकलगच्छसमक्षं स्थापितत्वात्तेन सद्भवति कर्कशमिति । यः पुनस्तपः कालो यच्च तपः करणं तत् द्वयोरपि तुल्यम् ।

[भा.५६१] तम्हा ऊ कप्पट्ठियं अनुपरिहारिं च तो ठवेऊणं ।
कज्जं वेयावच्चं किच्चं तं वेज्जवच्चं तु ।।

वृ- यस्मादेवं परिहारतपःस्थितिः तस्मात्कल्पस्थितम् अनुपरिहारकं च स्थापयेत्, स्थापयित्वा च तौ तदनंतरं समापन्नं परिहितपो वोढव्यं, तच्चापन्नं परिहारतपः प्रपन्नस्य ताभ्यां कल्पस्थितानुपारिहारिकाभ्यां स्थापिताभ्यां करणिज्जं वेयावच्चमिति सूत्रपदमेतदेवानुवदति कार्यं वैयावृत्यं एतदेव व्याचष्टे, कृत्यं करणीयं, तत् स्वोचितंताभ्यां वैयावृत्यं । अथ किं तत् वैयावृत्यं यत्ताभ्यां कर्तव्यमित्यत आह-

[भा.५६२] वेयावच्चे तिविहे, अप्पाणंमि य परे तदुभए य ।
अनुसिट्ठि उवालंभे, उग्गहे चेव तिविहम्मि ।।

वृ- वैयावृत्यं त्रिविधं, तद्यथा-अनुशिष्टिरुपालम्भोऽनुग्रहश्च । त्रिविधेऽप्यस्मिन् वैयावृत्ये प्रत्येकं त्रयो भेदास्तद्यथा-अनुशिष्टिरात्मनि आत्मविषया, परस्मिन् परविषया, तदुभयस्मिन् उभयविषया । आत्मपरतदुभयविषया इत्यर्थः । एवमुपालम्भोपग्रहावपि प्रत्येकमात्मपरतदुभयविषयौ भावयितव्यौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र उपदेशप्रदानमनुशिष्टिः, स्तुतिकरणं वा अनुशिष्टिः । तत्र यत् आत्मानमात्मना अनुशास्ति सा आत्मानुशिष्टिः । यत्पुनः परस्य परेण चानुशासनं सा परानुशिष्टिः । तत्रोदाहरणम्-चम्पायां नगर्यां सुभद्रा सा हि सर्वैरपि नागरिकजनैरनुशिष्टा । यथा-धन्यासि त्वं, कृतपुण्यासि त्वमिति, । यत्पुनरात्मानं परं चानुशास्ति, सा उभयानुशिष्टिः । तथा अनाचारे कृते सति यत् सानुनयोपदेशदानमेष उपालम्भः । सोऽपि त्रिविधस्तद्यथा-आत्मनि परे तदुभये च । तत्र यदात्मानमात्मनैवोपालभते । यथा त्वयेदं कृतं तस्मात् सम्यक् सहस्वेति स आत्मोपालम्भः । परेणाचार्यादिना यदुपालम्भनं स परोपालम्भः । तत्रोदाहरणं-मृगावतिर्देवी सा हि आर्यचन्दनया अकालचारिणीति कृत्वा उपालब्धा । उभयोपालम्भनो नाम यत्पुनः प्रथमत आत्मानमात्मनोपालभते पश्चादाचार्यादिना परेणोपालभ्यते, । यदि वा गुरुणोपालभ्यमानस्तत् गुरुवचनं सम्यक् प्रतिपाद्यमानं प्रत्युच्चरति, । एषउभयोपालम्भः । तथा उपग्रहणमुपग्रहः उपष्टंभकरणमित्यर्थः । सोऽपि त्रिविधस्तद्यथा, आत्मोपग्रहः परोपग्रह उभयोपग्रहश्च । तत्र यदात्मन उपष्टम्भकरणं, स आत्मोपग्रहः । यत्पुनः परमुपगृह्णाति स परोपग्रहः । आत्मनः परस्य चोपष्टम्भकरणमुभयोपग्रहः । उपग्रहश्च स्वरूपतो द्विधा-द्रव्यतो भावतश्च । अत्र चतुर्भङ्गिका-द्रव्यतो नामैक उपग्रहो न भावतः, । भावत एको न द्रव्यतः । एको द्रव्यतो भावतोऽपि । एको न द्रव्यतो नापि भावतः । अत्र चतुर्थो भङ्गः शून्यः । तृतीयभङ्गे उदाहरणमाचार्यः तथा उक्तानेव दृष्टान्तानुपदर्शयति-

[भा.५६३] अनुसट्ठीए सुभद्दा उवालंभंमिय मिगावती देवी ।
आयरिओ दोसु उवग्गहो य सव्वत्थ वायरिओ ।।

वृ- अनुशिष्टौ परानुशिष्टावुदाहरणं सुभद्रा, उपालंभं परोपालंभे उदाहरणं मृगावतिर्देवी । एते च द्वेऽप्युदाहरणे प्रागेव भाविते । परस्यद्रव्यभावयोर्विषये उपग्रहे उदाहरणमाचार्यः । स हि द्रव्यमन्नपानादि दापयति, भावतः प्रतिपृच्छादिकं करोति । अथवा दोसु उवग्गहेयत्ति यद्द्वयोः पारिहारिकानु-पारिहारिकयोरुपग्रहे आचार्यो वर्तते तस्मात् परोपग्रहे आचार्य उदाहरणं । अथवा सर्वत्र अनुशिष्टौ उपालम्भे उपग्रहे च उदाहरणमाचार्यः । यतः स पारिहारिकस्यानुपारिहारिकस्य समस्तस्यापि गच्छस्यानुशिष्ट्यादीनि करोतीति । सम्प्रति त्रिविधामप्युनुशिष्टिं भावयति--

[भा.५६४] दंडसुलभंमि लोए, मा अमतिं कुणसु दंडितोमित्ति ।
एस दुलहो हु दंडो, भवदंडनिवारओ जीव ।।

[भा.५६५] अवि पहु विसोहिओ ते, अप्पानायार मइलिओ जीव ।
अप्प परे उभए अनुसट्ठी थुइति एगट्ठा ।।

वृ- दण्डः सुलभो यत्रासौ दण्डसुलभस्तस्मिन् लोके । ए जीव मा एवंरूपाममतिं कुमतिं कुर्याः यथाहमाचार्येण प्रायश्चित्तदानतो दण्डितोऽस्मीति यत एप प्रायश्चित्तदानरूपो दण्डो दुर्लभः । कस्मात् दुर्लभ इत्याह-भवदण्डनिवारकः निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायोदर्शनमिति न्यायात् । हेतौ प्रथमा । ततोऽयमर्थः-यत एष दण्डो भव एव संसार एव दुःसहः दुःखात्मकत्वात् । दण्डो भवदण्डस्तस्य निवारको भवदण्डनिवारकः तस्मात् दुर्लभः अपि च हु निश्चितं हे जीव ते आत्मा अनाचारमलिनः प्रायश्चित्तप्रतिपत्त्या विशोधितो भवति, । तस्मात् न दण्डितोऽस्मीति बुद्धिरात्मनि परिभावयितव्या । किन्तूपकृतोऽहमनुपकृतपरहितकारिभिराचार्यैरिति चिन्तनीयमिति । एवम मुनोल्लेखेन आत्मनि परस्मिन् उभयस्मिंश्चानुशिष्टिरनुगन्तव्या । आत्मनि साक्षादियमुक्ता एतदनुसारेण परस्मिन्नुभयस्मिन्नपि च सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्तव्येति भावः । अनुशिष्टिस्तुतिरित्येकोऽर्थोऽत्रापिशब्दः सामर्थ्याद्गम्यते । एतावपि द्वौ शब्दावेकार्थौ । किमुक्तं भवति ? अनुशिष्टिः स्तुतिरित्यपि द्रष्टव्यमिति । सम्प्रत्यात्मोपालं भोल्लेखं दर्शयति-

[भा.५६६] तुमए चेव कयमिणं न सुद्धगारिस्स दिज्जए दंडो ।
इह मुक्कोवि न मुच्चइ परत्थ इह होउवालंभो ।।

वृ- त्वयैव स्वयं कृतमिदं प्रायश्चित्तस्थानं तस्मान्न कस्याप्युपरि अन्यथाभावः कल्पनीयः न खलु शुद्धकारिणो लोकेऽपि दण्डो दीयते । किं च यदि इह भवे कथमप्याचार्येणैव मेवमुच्यते तथापि इह भवे मुक्तोऽपि परत्र परलोके न मुच्यते । तस्मात्प्रमादापन्नं प्रायश्चित्तमवश्यं गुणवृद्ध्या कर्त्तव्यं इति इह एष भवत्युपालम्भः । एष आत्मोपालम्भः । एतदनुसारेण परोपालम्भ उभयोपालम्भोऽपि भावनीयः । सम्प्रति परोपग्रहे यदुक्तं 'आयरितो दोसुवग्गहे य' इति तत् व्याख्यानयति-

[भा.५६७] दव्वेण य भावेण य उवग्गहो दव्व अनपानाइं ।
भावे पडिपुच्छाइं, करेति जं वा गिलाणस्स ।।

वृ- उपग्रहो द्विविधो-द्रव्येण भावेन च । तत्र दव्वे इति तृतीयार्थे सप्तमी । द्रव्येणोपग्रहः कल्पस्थितोऽनुपारिहारिको वाऽसमर्थस्य सतोऽन्नपानाद्यानीय ददाति । भावे भावेनोपग्रहो यत् सूत्रेऽर्थे वा प्रतिपृच्छादि करोति । अथवा यत् ग्लानस्य क्रियते समाधानोत्पादनमेष भावोपग्रहः अधुना दोसु उवग्गहे य इत्यस्य व्याख्यानान्तरमाह--

[भा.५६८] परिहारानुपरिहारी दुविहेण उवग्गहेण आयरिओ ।
उवगेण्हइ सव्वं वा, स बालवुड्ढाउलं गच्छं ।।

वृ- पारिहारिकमनुपारिहारिकं च एतौ द्वावपि द्विविधेन द्रव्यरूपेण भावरूपेण चोपग्रहेणाचार्य उपगृह्णाति, उपष्टभ्नाति । ततः परोपग्रहे आचार्य उदाहरणम् । 'सव्वत्थवायरिओ' इत्यस्य व्याख्यानमाह- सव्वं वा इत्यादि वाशब्दः पूर्वार्द्धोक्तपक्षापेक्षया पक्षान्तरसूचने सर्वं पारिहारिकमनुपारिहारिकं स बालवृद्धाकुलं च गच्छमाचार्यो द्रव्यतो भावतश्चोपगृह्णाति, । ततः सर्वत्रसमस्तेऽपि गच्छे आचार्य उपग्रहे वर्तते । तस्मात्परोपग्रहे स उदाहरणं अत्रैव व्याख्यानान्तरमाह-

[भा.५६९] अहवानुसट्ठु वा लंभुवग्गाहे कुणति तिन्नि वि गुरु से ।
सव्वस वि गच्छस्स अनुसट्ठाईणि सो कुणति ।।

वृ- अथवेति प्रकारान्तरे अनुशिष्टि उपालम्भ उपग्रहान् त्रीनपि गुरुराचार्यः से तस्य पारिहारिकस्य यथायोगं करोति । न केवलं पारिहारिकस्य यथायोगं करोति किन्तु सर्वस्यापि गच्छस्य अनुशिष्ट्यादीनि त्रीण्यपि स आचार्यः करोति । अत्र शिष्यः प्राह-

[भा.५७०] . आयरिओ केरिसओ, इह लोगे केरिसो व परलोए ।
इह लोए असारणिओ, परलोए फुडं भणंतो उ ।।

वृ- य एष उपगृह कृत आचार्यस्तमेव ज्ञातुमिच्छामि कीदृशः खल्वाचार्य इहलोके हितकारी कीदृशः परलोके इति सूरिराह- चतुर्विधः सामान्येनाचार्यः । तद्यथा-इहलोके हितो नामैको न परलोकहितः १, परलोकहितो नेहलोकहितः २ इहलोकहितोऽपि परलोकहितोऽपि ३, न इहलोकहितो नापि परलोकहितः ४ । तत्र प्रथमद्वितीयभंगव्याख्यानमाह- 'इहलोए' इत्यादि । तत्र यो वस्त्रपात्रभक्तपानादिकं समस्तमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधूनां पूरयति न पुनः संयमे सीदतः सारयति सोऽसारणिकः सारणारहितो इहलोकेहितो न परलोके । एषा प्रथमभंगभावना । यः पुनः संयमभोगेषु प्रमाद्यतां सारणां करोति न च वस्त्रपात्रभक्तपानादिकं प्रयच्छति, स केवलं स्फुटं भणन् ब्रुवाणः परलोके हितो न इहलोके इति सामर्थ्याद्गम्यते, । एषा द्वितीय-भङ्गभावा । तृतीयचतुर्थभङ्गभावना तु स्वयं भावनीया । सा चैवम्-यो वस्त्रपात्रभक्तपानादिकं समस्तमपि साधूनां पूरयति संयमयोगेषु च सीदतः सारयति स इहलोके हितः परलोके च हितः । चतुर्थ उभयरहितः । अत्र पर आह-'ननु यो भद्रस्वभावतया न सारयति वस्त्रपात्रभक्तादिकं तु समस्तमापूरयति स एव समीचीनो यः पुनः खरपरुषं ब्रुवाणश्चण्डरुद्राचार्य इव सारयति न समीचीनोऽसमाध्युत्पादकत्वात्तत्राह -

[भा.५७१] जीहाण विलिहंतो न भद्दतो जत्थ सारणा नत्थि ।
दंडेनवि ताडेंतो स भद्दतो सारणा जत्थ ।।

वृ- यत्र नाम संयमयोगेषु सीदतां सारणा नास्ति, स आचार्यो जीह्वया विलिहन् मधुरवचोभिरानन्दयन् उपलक्षणमेतत् वस्त्रपात्रादिकं च पूरयन् न भद्रको न समीचीनः, परलोकापायेषु पातनात् । यत्र पुनः सीदतां साधूनां सम्यक् सारणासंयमयोगेषु प्रवर्तना समस्ति स आचार्यो दण्डेनापि ताडयन् भद्रकः एकान्तसमीचीनः सकलसांसारिकापायेभ्यः परित्राणकरणात् । अथ सारणामकुर्वाणो जिह्वया विलिहन् कस्मान्न समीचीन इत्यत्राह-

[भा.५७२] जह सरणमुवगयाणं जीवियववरोवणं नरो कुणइ ।
एवं सारणियाणं आवरितो असारओ गच्छे ।।

वृ- यथा कोऽपि नर एकान्तेनाहितकारी शरणमुपगतानां जीवितव्यपरोपणं करोति एवं साधूनामपि सारणमुपगतानां सारणीयानां संयमयोगेषु प्रमादव्यावर्त्तनेना प्रवर्तनीयानामाचार्योऽसारको गच्छे भावनीयः । सोऽपि शरणोपगतशिरो निकर्त्तक इव एकान्तेनाहितकारीति भावः शरणमुपगतानां संसारापारपारावारे निरनुकम्पं प्रक्षेपणात् स च तादृश इह परलोकहितार्थिना परित्याज्यः । यस्तु खरपरुषभणनेनापि संयमयोगेषु सीदतः सारयति संसारनिस्तारकत्वादेकान्तेनाश्रयणीयः । ततस्तृतीयभङ्गवर्ती आचार्यः परिहारिकस्यानुशिष्टयादित्रिविधं करोति कारयति अनुमन्यते च ।

[भा.५७३] एवं च कीरमाणे अनुसट्ठाइं मि वेयवच्चे उ ।
कोवि य पडिसेविज्ञा से वियकसिणेऽरुहेयव्वे ।।

वृ- एवमपि यथागममनन्तरोदितेनापि प्रकारेण अनुशिष्टयादौ त्रिविधे वैयावृत्ये क्रियमाणे कोऽपि प्रतिसेवितप्रायश्चित्तस्थानमापद्यते इतिभावः । सेविय कसिणे रुहेयव्वे इति तदपि कृत्स्नमारोपयितव्यं । कृत्स्नं नाम निरवशेषम् । एतेन 'ठविए वि पडिसेवित्ता सेवि कसिणे तत्थेव आरुहियव्वे सिया इति सूत्रपदं व्याख्यातं । कृत्स्नमित्युक्तं तत्र कृत्स्नप्ररूपणार्थमाह-

[भा.५७४] पडिसेवणाय संचय आरुवण अनुग्गहे य बोधव्वे ।
अनुग्घाय निरवसेसं कसिणं पुन छव्विहं होइ ।।

[भा.५७५] पारंचियमासीयं छम्मासारूवण छड्डिणगएहिं ।
कालगुरुनिरंतरं वा, अनुनमहियं भवेच्छट्ठं ।।

वृ- अनयोर्गाथयोर्यथासङ्ख्येन पदयोजना । सा चैवं-कृत्स्नं पुनः शब्दो वाक्यभेदार्थः । स च वाक्यभेद एवं वैयावृत्ये क्रियमाणे प्रतिसेवेत ततस्तत् कृत्स्नमारोपयेत् । तत् पुनः कृत्स्नं षड्विधं षट्प्रकारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति । तद्यथा-प्रतिसेवनेति प्रतिसेवना कृत्स्नमेवं संचयकृत्स्नमारोपणाकृत्स्नं अनुग्रहकृत्स्नमनुद्घातं कृत्स्नं निरवशेषं कृत्स्नमिति । तत्र प्रतिसेवनाकृत्स्नं । ततः परस्यान्यस्य प्रतिसेवनास्थानस्यासम्भवात् । सञ्चयकृत्स्नमशीतं मासशतं । ततः परस्य संचयस्याभावात् आरोपणाकृत्स्नं षाण्मासिकं, । ततः परस्य भगवतोवर्धमानस्वामिनः तीर्थे आरोपणस्याभावात्, अनुग्रहकृत्स्नं यत् षण्णां मासानामारोपितं षट् दिवसा गतास्तदनन्तरमन्यत् षण्मासान् आपन्नस्ततो यत् अव्यूढं तत्समस्तंझोषितं पश्चात् यदन्यत् षाण्मासिकमापन्नं तद्वहति, तथा चाह- 'छद्दिणगहिएहिं' ति, अत्र तृतीया सप्तम्यर्थे पूर्वषण्माससम्बन्धिषु षट्सुदिनेषु गतेषु यदन्यत् षाण्मासिकमारोपितमुह्यते । अत्र यस्मात् पञ्चमासाश्चतुर्विंशतिदिवसाश्चा-रोपितास्तत एतदनुग्रहकृत्स्नमनुग्रहकृत्स्नग्रहणेन निरनुग्रहकृत्स्नमपि सूचितं द्रष्टव्यं । तच्चैवं भावनीयं-षण्मासे प्रतिस्थापिते पञ्चमासाश्चतुर्विंशतिदिवसाश्च व्यूढास्तदनन्तरमन्यत् षाण्मासिकमापन्नस्ततः तद्वहति । पूर्वषण्मासस्य षट् दिवसा झोषिताः अनुद्घातकृत्स्नं यत् कालगुरु यथा मासगुरुकादि अथवा निरन्तरं दानमनुद्घातकृत्स्नं । अत्र मासलघुकाद्यपि निरन्तरं दीयमानमनुद्घातमवसातव्यं । यदि वा अनुद्घातं त्रिविधं तद्यथा - कालगुरुतपोगुरु उभयगुरु च । तत्र कालगुरुनाम यत् ग्रीष्मादौ कर्कशे काले दीयते । तपोगुरु यदष्टमादि दीयते निरंतरं वा उभयगुरु यत् ग्रीष्मादौ काले निरन्तरं च दानं निरवशेषं कृत्स्नं नाम यदापन्नं तत्सर्वमन्यूनमनतिरिक्तं दीयते । अथात्र कतमेन कृत्स्नेनारोपयितव्यं । उच्यते –

[भा.५७६] एत्तो समारोहेज्जा अनुग्गहकसिणेण चिन्नसेसंमि ।
आलोयणं सुणेत्ता परिसज्जायं च विनाय ।।

वृ- एत्तो इति, प्राकृतशैलीवशात् षष्ट्यर्थे पञ्चमी । अमीषां षणां कृत्स्नानां मध्ये अनुग्रहकृत्स्नेन प्रागारोपितस्य चीर्णे शेषे चीर्णशेषेषु दिवसेषु आरोपयेत् । किं कृत्वा अनुग्रहकृत्स्नेनारपयेत् इत्यत आह-आलोचनां हा दुष्टु कृतमित्यादि निन्दन् पुरःसरं श्रुत्वा आकर्ण्य तथा पुरुषजातं धृतिसंहननाभ्यां दुर्बलं विज्ञाय । इयमत्र भावना - यदि षण्मासापन्नो धृतिसंहननाभ्यां च दुर्बलस्ततस्ते अनुग्रहकृत्स्नेन दीयन्ते । अथ तीव्राध्यवसायेन प्रतिसेवितं रागद्वेषाध्यवसायकलुषितेन वालोचितं धृतिसंहननाभ्यां च न दुर्बलस्ततस्ते निरनुग्रहकृत्स्नेनारोप्यन्ते षट्सु दिवसेषु शेषेषु तदन्यत् षाण्मासिकमारोप्यते इति भावः । सम्प्रति प्रतिसेवनालोचनाविषयाचतुर्भंगिकाखण्डसूत्रं पुव्वं पडिसेवियमित्यादि व्याख्यानयति-

[भा.५७७] पुव्वानुपुव्विं दुविहा, पडिसेवणाए तहेव आलोए ।
पडिसेवण आलोयणपुव्वं पच्छाव चउभंगो ।।

वृ- सूत्रे पूर्वमिति पदैकदेशे पदसमुदायोपचारात् पूर्वानुपूर्वीति प्रतिपत्तव्यम् । पूर्वानुपूर्वीति प्रतिपत्तव्यम् । पूर्वानुपूर्वी नाम अनुपरिपाटिः सा द्विधा । तद्यथा-प्रतिसेवने तथैव आलोचे आलोचनायां तत्र प्रतिसेवने आलोचनायां च पूर्वं पश्चादिति पदाभ्यां चतुर्भङ्गी । सा च यथा सूत्रे तथा उच्चारयितव्या परं सूत्रे पूर्वशब्दः पश्चाच्छब्दश्च साक्षादुपात्तः । पूर्वशब्दश्च पूर्वानुपूर्वीवाचकः । पश्चाच्छब्दश्च पश्चादनुपूर्व्याभिधायी । तत एवं भङ्गोच्चारणं द्रष्टव्यम् । पूर्वानुपूर्व्या प्रतिसेवितं पूर्वानुपूर्व्या आलोचितम् १, पूर्वानुपूर्व्या प्रतिसेवितं पश्चादनुपूर्व्या आलोचितम्, पश्चादानुपूर्व्या प्रतिसेवितं पूर्वानुपूर्व्या आलोचितं ३, पश्चादानुपूर्व्या प्रतिसेवितं पश्चादानुपूर्व्या आलोचितं ४ । चतुर्भङ्गी भावनार्थमेवाह-

[भा.५७८] पुव्वानुपुव्वि पढमो, विवरीए बिइय तइयए गुरुगो ।
आयरियकारणा वा पच्छा पच्छावसुणो उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- या पूर्वानुपूर्वी प्रतिसेवनायामालोचनायां च एष प्रथमो भङ्गः । अस्य त्वियं भावना । गीतार्थः कारणे समुत्पन्ने सति लघुगुरुपर्यालोचनापुरस्सरं लघुगुरुपञ्चकादि यतनया प्रतिसेवते एषा प्रतिसेवनानुपूर्वी । तदनन्तरं गुरुसकाशे यत् यथा प्रतिसेवितं तत्तथैवालोचयति - एषा आलोचनानुपूर्वी विवरीए बिइय तइयत्ति यथाक्रममनुत्तरपूर्वयोः पदयोर्विपरीतभावप्रधानोच्चऽयं निर्देशः वैपरीत्ये द्वितीयतृतीयभङ्गौ पूर्वानुपूर्व्या प्रतिसेवितं पश्चादानुपूर्व्या आलोचितमिति द्वितीयः । पश्चादानुपूर्व्या प्रतिसेवितं पूर्वानुपूर्व्या आलोचितमिति तृतीय इति भावः । तत्रेयं द्वितीयभङ्गभावना पूर्वं लघुगुरुपर्यालोचनेन लघुगुरुमासादिक्रमेण यतनया प्रतिसेवितं तदनन्तरं तथाविधकारणोत्पत्तौ लघुगुरुपञ्चकादि आलोचनावेलायां तु प्रथमतो लघुगुरुपञ्चकादि कथयति, पश्चात् मासादि । कस्मादेवं कथयतीति चेत् ? उच्यते-आशङ्कासम्भवात् । तथा यदि पूर्वमासादि कथयिष्यामि तस्मात् पञ्चकादि तत एवं गुरूणां चित्ते स्थास्यति । यथा एषोऽयतनया प्रतिसेवी कथमन्यथा यतस्ततो मासादि प्रथमतः प्रतिसेवितमान् । ततोऽयतनानिष्पन्नं च द्वे प्रायश्चित्ते मह्यं दद्युरिति पूर्वानुपूर्व्या प्रतिसेवते पश्चादानुपूर्व्या आलोचयति तृतीयभङ्गे त्वियं भावना पूर्वं गुरुलाघवचिन्ता विकलतया प्रथमतो गुरुमासादीनि प्रतिसेवितानि तदनन्तरं गुरुपञ्चकादीनि । आलोचनावेलायां तु पूर्वं लघुपञ्चकादीनि कथयति, तदनन्तरं गुरुमासिकादीनि मा मह्यमयतनया प्रतिसेवनाकारीति ज्ञात्वा अयतनानिष्पन्नं प्रतिसेवना निष्पन्नं चेति प्रायश्चित्तद्वयं दद्युरिति बुद्धया अथवा एवमालोचयन्तं श्रुत्वा गुरवो ज्ञास्यन्ति ।

यथा एष महानुभावो यतनया प्रतिसेवितवान् ततो न प्रायश्चित्तभागिति मह्यं प्रायश्चित्तं दास्यन्ति अल्पं वा दास्यन्ति । ततो द्वितीयभङ्गे च यथापन्नं तद्दीयते । मायां च कृतवानिति मायानिष्पन्नो गुरुक इति गुरुमासोऽधिको दीयते । अथवा पच्छा पडिसेवियं पुव्वं आलोइयमित्यत्र न पूर्वशब्दः पूर्वानुपूर्वाभिधायी । नापि पश्चाच्छब्दः पश्चादानुपूर्वीवाचकः, किन्तु प्रसिद्धार्थप्रतिपादको ज्ञेयः । ततोऽयमर्थः-पश्चात्प्रतिसेविते पूर्वं प्राक् आलोचयति । एष भङ्गः कथं संभवतीति चेत् ते आहुः- 'आयरियकारणा वा' इति । वा शब्दस्तृतीयभङ्गस्य प्रकारान्तरताव्याख्यापनार्थः । आचार्यकारणात् । उपलक्षणमेतत् । पश्चात् प्रतिसेवते पूर्व मालोचयति । इयमत्र भावना आचार्यादिकारणतोऽन्यग्रामं गन्तुमना यदि वा कारणान्तरे समुत्पन्ने सति विकृतिमाहारयितुकाम आचार्य विज्ञपयति ।-'इच्छामि भदन्त युष्माभिरनुज्ञातः सन् एतेन कारणेन अमुकां विकृतिमेतावन्तं कालमाहारयितुमिति । एवं पूर्वमालोचना पश्चात् प्रतिसेवनोपजायते । अथवायं तृतीयो भङ्गः शून्य एव द्रष्टव्यः । तथानुज्ञायामपि कृतायां प्रतिसेवनानन्तरं भूय आलोचनात् । तथा चाह-पच्छावसुन्नोत्ति, पश्चात् प्रतिसेवनापूर्व-मालोचनेति शून्य एव भङ्गस्तुरेवकारार्थः । तत्र यदुक्तं पुव्वाणुपुव्विं पढमो इत्यस्य व्याख्यानमाह-

[भा.५७९] पच्छित्तऽनुपुव्वीए जयणापडिसेवणाए अनुपुव्वी ।
एमेव विगडणाए बितियतइय माइणो गुरुगो ।।

वृ- गरुलघुपर्यालोचनया प्रायश्चित्तानुपूर्व्या प्रायश्चित्तानुपरिपाट्या गुरुलघुपञ्चकादिक्रमेणेत्यर्थः । यत् यतनया प्रतिसेवितमेषा प्रतिसेवनायामनुपूर्वी एवमेव यथैव प्रतिसेवितवान् तथैव यत् आलोचयति । एषा विकटनायामालचोनायामनुपूर्वी द्वितीयतृतीयभंगयोः । पुनर्यदापन्नं तावन्नियमतो दीयते, केवलं मायिनो मायाविन्सतो भङ्गविति द्वयोरपि भङ्गयोरधिको गुरुमासा दीयते । साम्प्रतमनयोरेव भङ्गयोर्भावनामाह –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.५८०] पुव्वं गुरूणि पडिसेविऊण पच्छा लहूणि सेवित्ता ।
लघुए पुव्वं कहयति मा मे दो दिज्ज पच्छित्ते ।।

वृ- अत्र द्वितीयभङ्गभावनायां गुरुशब्दो बृहदभिधायी, लघुशब्दोऽल्पवाचकः । ततोऽयमर्थः-पूर्वं गुरूणि मासलघुकादीनि प्रतिसेव्य पश्चात् लघूनि लघुपञ्चकादीनि प्रतिसेवते । प्रतिसेव्य च तदनन्तरमालोचनावेलायां पूर्वं लघुकानि लघुपञ्चकादीनि कथयति पश्चात् मासलघुकादीनि । कस्मादेवं कथयतीति चेदत आह- 'मा मे' इत्यादि । पूर्वमासलघुकादिकथने अयतनया प्रतिसेवित्वं मे गुरुणा विज्ञायेत । ततो द्वे प्रायश्चित्ते गुरुर्दद्यात् । अयतनानिष्पन्नं प्रतिसेवनानिष्पन्नं च । तस्मात् माभे द्वे प्रायश्चित्ते दद्यादिति पूर्वं लघुपञ्चकादि कथयति । तृतीयभङ्गभावनायां त्वियं भावना-गुरुलघु-पर्यालोचनामन्तरेण गुरूणि मासगुरुकादीनि प्रतिसेव्य पश्चात् लघूनि लघुपञ्चकादीनि प्रतिसेवते । प्रतिसेव्य च पूर्वं लघुकानि लघुपञ्चकादीनि कथयति । पश्चात् गुरुमासादेवं कथयतीति चेदत्र आह-मा मे इत्यादि पूर्ववत् । अथवेयं तृतीयभङ्गविशेषतो भावना-

[भा.५८१] अहवा जय पडिसेवित्ति नव दाहिंति मज्झ पच्छित्तं ।
इय दो मज्झिमभंगा चरमो पुन पढम सरिसोउ ।।

वृ- अथवेति प्रकारान्तरे यत् यतनया प्रतिसेवी प्रतिसेवनाकारीति ज्ञात्वा नैव मम दास्यंति प्रायश्चित्तं, उपलक्षणमेतत् । स्वल्पं वा दास्यन्ति प्रायश्चित्तमिति हेतोरुक्तेन प्रकारेण कथयति । तत इति एवममुना प्रकारेण द्वौ मध्यमभङ्गौ द्वितीयतृतीयभङ्गौ मायाविन इति शेषः । चरमः पुनर्भङ्गः पश्चादानुपूर्व्या प्रतिसेवितं पश्चादानुपूर्व्यालोचितमित्येवंरूपः प्रथमसदृशः । यथा प्रथमे भङ्गे यथैव प्रतिसेवना तथैवालोचनेत्यमायाविनः स भङ्गः । तथा चरमभङ्गेऽपि प्रतिसेवनाक्रमेणालोचना न मायावशतो-ऽन्यथेत्येषोप्यमायिन एवेति प्रथमसदृशश्चरमभङ्गः । तदेवं यतः प्रथमचरमभङ्गावमायाविनो द्वितीय-तृतीयभङ्गौ प्रतिकुञ्चनायामतः प्रतिकुञ्चनाऽप्रतिकुञ्चनाविषयचतुर्भङ्गी सूत्रखण्डं अपलिउञ्चियं इ-त्यादि । तद्व्याख्यानार्थमाह ।।

[भा.५८२] पलिउंचण चउभंगो वाहे गोणीय पढमतो सुद्धो ।
तं चेवयमच्छरिते सहसा पलिउंचमाणे उ ।।

वृ- प्रतिकुञ्चनमधिकृत्य प्रतिषेधाप्रतिषेधाभ्यां चतुर्भङ्गी । गाथायां पुंस्त्वनिर्देशः प्राकृत्वात् । सा च चतुर्भङ्गी यथा सूत्रेण तथोच्चारणीया । तद्यथा अप्रतिकुञ्चितेऽप्रतिकुञ्चितं १, अप्रतिकुञ्चिते प्रतिकुञ्चितं २, प्रतिकुञ्चिते अप्रतिकुञ्चितं ३, प्रतिकुञ्चिते प्रतिकुञ्चितं ४ । अस्यां चतुर्भङ्ग्यां व्याधो गोणी च शब्दात् भिक्षुकी च दृष्टान्तः । तत्र व्याधदृष्टान्तोऽयम्-जहा कोवि वाहो कस्सइ ईसरस्स कयवित्तीतो मंसं उवनेइ अन्नया सो वाहो मंसं सुंदरं घेत्तुं ईसरसमीवं संपट्ठितो चिंतेइ य इमस्स सव्वं मंसं दायव्वंति पत्तो ईसरसमीवं तेन आभट्ठो स्वागतं सुस्वागतं उवविसाहित्ति वाहेणं तुठेणं सव्वं मंसं दिन्नं । एवं कोवि सावराहो आलोइउकामो आयरियस्सगासं ट्ठितो चिंतेइ य सुहुमबायरा सव्वे अइयारा मए आलोइयव्वा इति पत्तो आयरियसमीवं । आयरिएणं सुट्ठु आढाइत्तो धनोसि तुमं, संपुन्नोसि तुमं, न दुक्करं जं पडिसेविज्जइ तं दुक्करं जं सम्मं आलोइज्जइ । तेन तुट्ठेण सव्वं जहा चिंतियमपलिउंचियमालोइयं । इह चिंतावेलायामप्यप्रतिकुञ्चितमालोचनावेलायामप्यप्रतिकुञ्चितमिति प्रथमो भङ्गः शुद्धः । तं चेवय मच्छरिए इत्यादि । यदेव प्रथम व्याधोदाहरणे व्याधस्यागमनं तदेव द्वितीय भङ्गेऽपि वक्तव्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथैवाप्रतिकुञ्चितबुद्धया व्याध आगत इति वक्तव्यमित्यर्थः । तद्यथा-वाहो सुंदरं मंसं घेत्तुं इसरराभिमुहं संपट्ठितो चिंतेइय सव्वं मंसं इमस्स दायव्वंति । पत्तो इसरस्समीवं । तेन च ईश्वरेण कारणे अकारणे व सहसा पूर्वापरमयपर्यालोच्य मत्सरितो मत्सरस्तस्योत्पादितो यथा किमिति त्वमुत्सूरे समागत इति ।

[भा.५८३] खरंटणभीतो रुट्ठो सक्कारं दिंति ततियए सेसं ।
भिक्खूणि वाह चउत्थो सहसा पलिउंचमानेउं ।।

वृ- स उक्तप्रकारेण मत्सरितः सन् खरण्टनभीतः खरण्टनमुक्तप्रकारेण निर्भर्त्सनं तेन भीतः खरण्टनभीतो रुष्टो रोषं गतवान् ततस्तेन रुष्टेन प्रतिकुञ्चितं न सर्वं मासं दिन्नं । ततस्तस्मिन् सहसा मत्सरिते खरण्टनभीते रुष्टे प्रतिकुञ्चिते द्वितीयभङ्गस्योपनयः कार्यः । स चेवं आलोयगो वि आगतो पुच्छितो केन कारणेन आगतोऽसि भणियमिवराहमालोएउं आयरिएणं खरण्टितो कीस तहा विहरियं जहा अवराहं पत्तो आलोएन्तो वा खरण्टितो ततो तेन न सम्ममालोइयं इति । गतो द्वितीयभङ्गस्तृतीयभङ्गभावनार्थमाह-सक्कारं देंति तइयए असेसं तृतीयभंगे स ईश्वरस्तस्य व्याधस्य सत्कारं कृतवान् । ततः स व्याधस्तस्मै अशेषं समस्तं मांसं ददाति । एषोऽक्षरार्थो भावार्थस्त्वयम्-तहेव वाहा संपट्ठितो मंसं घेत्तुं चिंतेइ य न सव्वं मंसं मए दायव्वं ति पत्तो ईसरसमीवं ईसरेण सुट्ठु आढाइतो तेन से सव्वं मंसं दिन्नं । एवमालोयगोवि संपट्ठितो, पाडिएहिय साहुं पुच्छति-अमुगस्स आयरियस्स मज्झेण आगतोऽसि । सो भणति आमं, केरिसो-सो आयरितो सुहाहिगमो नवत्ति तेन भणियं । दुरहिगमो तहेव तेन चिंतियं न सम्मं मए आलोइयव्वंति । आगतो गुरुसमीवं । तेन सम्ममाढातितो पुच्छितो य- किमागमनं । तेन भणियं-आलोइउं । ताहे आयरिएणं सुट्ठु उववूहितो धन्नोसतिममिच्चादि विभासा । तेन तुट्ठेण सव्वं सम्मं आलोइयं गतस्तृतीयो भङ्गः । चतुर्थभङ्गस्य त्वेषा भावना-सो वाहो मंसं घेत्तुं पट्ठितो चिंतेइ य न सव्वं मंसं मए दायव्वंत्ति । एवं पलिउंचिय आगतो ईसरेण खरण्टितो तेन य खरंटिएण पुव्वपलिउंचिय भावेण न सव्वं दिन्नं । एवमालोयगे वि उवनयो कायव्वो ।।

सम्प्रति चतुर्ष्वपि भङ्गेषु गोणीदृष्टान्तभावना । जहा-गोणी दोहिउकामा पन्हुया आगया सामिणा उवज्झिया गृहे प्रविशन्ती मधुरभणित्या नाम्ना उपाहुता आकारिता इत्यर्थः । ततो हट्ठेण पुट्ठा धूमाईहिय उवग्गहिया वलिमत्ताए य निउत्ता भक्खे नियोजिता इत्यर्थः । ततो सव्वं खीरं पएहुया एवमालोचकेऽपि प्रागुक्तानुसारेण स्वयमुपनयो भावनीयः । बिइया गोणी दोहिउकामा पन्हुया आगया न ढाइया पिट्टिया य वंसाईहिं । तीए न सव्वं खीरं दिन्नं । एवमालोचकेप्युपनयो भावनीयः । तइया गोणी अ दोहेउकामा आगया उज्झया पलिंमत्ताए निउत्ता सव्वं पन्हुया एवमालोयगेवि विभासा । चतुत्थी गोणी अ दोहिउकामा आगया सामिणा पिट्टिया । सव्वं खीरं न हु पन्हुया । अत्राप्यालोचके तथैवोपनयः ।। अधुना चतुर्ष्वपि भङ्गेषु भिक्षुकीदृष्टान्तो भाव्यते-काइ भिक्खुणी कस्सइ पुव्वपरिचियस्स घरं गया तीए पइरिक्के खोरियं दिट्ठं गहियं च । गया नियट्ठाणं पच्छा से भावो परिणतो अप्पेमि त्ति घरं गया तेहिं आढाइया तुट्ठाए दिन्नं खोरियं, एवमालोयगेवि विभासा । अना भिक्खुणी कस्सइ पुव्वपरिचियस्स घरं गया तीए पइरिक्के खोरयं गहियं चिंतियं च णाए दायव्वं ति घरं गया सा नाढाइया खरंटिया य तीए न दिन्नं, एवमालोयगे विभासा । तइयाए भिक्खुणीए खोरयं गहियं चिंतियं च न दायव्वं त्ति । घरं गया स्वागतं सुस्वागतं उवविसाहि त्ति आसणाईहिं आढाइया तीए दिन्नं । एवमालोयगे वि उवण तो ३ । चउत्थाए भिक्खुणीए गहियं खोरयं च चिंतियं च नाए न दायव्वंति, घरं गया नाढाइया खरंटिया य न दिन्नं । एवमालोयगेवि विभासा भिक्खुनिवाह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि । चतुर्ष्वपि भङ्गेषु भिक्षुकी व्याध उपलक्षणमेतत् गौश्च दृष्टान्तो भावनीयः । यथा च भिक्षुक्यादिषु त्रिष्वपि दृष्टान्तेषु स्वयं भिक्षुक्यादौ प्रतिकुञ्चति स्वामिना स्वार्थभ्रंशिना सहसा अनादरखरंटना वा कृता तथा आलोचकेऽपि चतुर्थभङ्गे स्वयं प्रतिकुञ्चत्याचार्येण सहसा कृतोऽनादरः खरण्टना वा योजनीयेति एतदेव विभावयिपुरिदमाह-

[भा.५८४] अपलिउंचिय उपलिउंचियंमि चउरो हवंति भंगाओ ।
वाहे य गोणी भिक्खुणि, चउसु विभंगेसु दिट्ठंतो ।।

वृ- अप्रतिकुञ्चितं च प्रतिकुञ्चितं च अप्रतिकुञ्चितप्रतिकुञ्चितं तस्मिन् । किमुक्तं भवति ? अप्रतिकुञ्चितप्रतिकुञ्चिताभ्यां चत्वारो भङ्गा भवन्ति । चतुर्ष्वपि भंगेषु प्रत्येकं व्याधो गोणी गौः भिक्षुकीदृष्टान्तः ।

[भा.५८५] पढमतइएसु पूया खिंसा इयरेसुवि सियपयखोरे ।
एमेव उवनतो खलु चउसु वि भंगेसु वियडंते ।।

वृ- पिशितं मांसं, पयः क्षीरं, खोरकं वृत्ताकारो भाजनविशेषः । एतेषां समाहारो द्वन्द्वः, तस्मिन् विषये यथाक्रमं ये व्याधगोभिक्षुकीदृष्टान्तास्तेषां यथा प्रथमे तृतीये च भङ्गे पूजा स्वाम्यादिना कृता । इतरयोस्तु द्वयोर्द्वितीय चरमयोर्भङ्गयोः खिंसा खरण्टना एवमेव अनेनैव प्रकारेण चतुर्ष्वपि भङ्गेषु विकटयत्यालोचयति खलूपनयः कर्तव्यः । तत्रादौ व्याधदृष्टान्तमधिकृत्योपनययोजनामाह-

[भा.५८६] इस्सरि सरिसो उ गुरू वाहो साहू पडिसेवणा मंसं ।
तूमणया-पलिउंचण सक्कारो वीलणा होइ ।।

वृ- ईश्वरसदृश ईश्वरस्थानीयो गुरुर्व्याधो व्याधस्थानीयः साधुः प्रतिसेवनास्थानीयमांसं तूमणयेति देशीपदमेतत् स्थागनमित्यर्थः । स्वगनस्थानीया प्रतिकुञ्चना, सत्कारः सत्कारस्थानीया व्रीडना स्थगनविषये लज्जापादनं भवतीति । सम्प्रति अपलिउंचिय आलोएमाणस्स सव्वमेयं सकयं साहनियजे इएयाए पठवणाए पठविए निव्विसमाणे पडिसेविति सेवकसिणे तत्थेव आरोहियव्वे सिया इति व्याख्यानयन्नाह-

[भा.५८७] आलोयणत्ति य पुनो जा एसा अकुंचिया उभयतो वि ।
सव्वेव होइ सोही तत्थय मेरा इमा होति ।।

वृ- आलोएमाणस्सेति किमुक्तं भवति ? आलोचयतः । सा पुनरेषा आलोचनाया उभयतः संकल्पकाले आलोचनाकाले च अप्रतिकुञ्चिता न विद्यते प्रतिकुञ्चितं प्रतिकुञ्चनं यत्र सा तथा प्रतिकुञ्चनरहिता इत्यर्थः । सैव भवति शुद्धिस्तात्त्विकी शुद्धिरुभयत्रापि प्रतिकुञ्चनाया अभावात् । इयमत्र भावना यो नाम संकल्पकालेऽप्यप्रतिकुञ्चितमालोचनाकालेऽप्यप्रतिकुञ्चितमालोचयति, यदि वा उभयत इति प्रतिसेवनानुलोमतः प्रायश्चित्तानुलोमतश्चाप्रतिकुञ्चितमालोचयति, । एष एव तत्त्ववृत्त्या शुद्धो मायालेशस्याप्यभावात् । सा चालोचना आचार्यशिष्यभावे भवति । तत्राचार्य शिष्याणामियं मर्यादा सामाचारी, तामेवाह-

[भा.५८८] आयरिए कह सोही सीहानुग वसभ कोट्ठगानूगे ।
अहवा वि सहावेणं निम्मंसुए भासिया तिनि ।।

वृ- आचार्ये आलोचनार्हाचार्यसमीपे यदा आलोचक आलोचनां प्रयुंक्ते तदा कथं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धिरुपलक्षणमेतत् कथमशुद्धिर्वा भवतीति ? उच्यते-आचार्यास्त्रिविधस्तद्यथा-सिंहानुगो वृषभानुगः क्रोष्टानुगश्च । क्रोष्टुकः शृगालः यत्र यो महत्यां निषद्यायां स्थितः सन् सूत्रमर्थं वाचयति तिष्ठति वा स सिंहानुगः, यः पुनरेकस्मिन् कल्पे स्थितः सन् वाचयति तिष्ठति वा स वृषभानुगः, यस्तु रजोहरणनिषद्यायामौपग्रहिकपादप्रोञ्छने वा स्थितो वाचयति तिष्ठति वा स क्रोष्टुकानुग इति । यदाचार्य आलोचनार्हो न प्राप्यते, तदा वृषभस्यापि पुरत आलोचना दातव्या । तदभावे गीतार्थस्य भिक्षोरपीति वृषभभिक्षू अपि आचार्यवत् सिंहवृषभक्रोष्टुकानुगतया प्रत्येकं त्रिविकल्पौ वाच्यौ, । आलोचका अपि त्रिविधास्तद्यथा-आचार्या वृषभा भिक्षवश्च । एकैके त्रिविकल्पाः-सिंहानुगाः, वृषभानुगाः, क्रोष्टुकानुगाश्च । नवरं क्रोष्टुकानुगे विशेषः । स यदा निषद्यायां पादप्रोञ्छने वा उत्कुटुको वा आलोचयति, तत्र यद्युत्कुटुकः स न्नालोचयति, ततः शुद्धि निषद्यापादप्रोच्छनयोस्तु भजना । किमुक्तं भवति ? यद्याचार्यो महान्वा वृषभो यदि वा भिक्षुरपि ग्लान आलोचयति आलोचनार्हेण च क्रियते अनुज्ञा तदा शुद्धिः, शेषकालमशुद्धिरिति । अहवावि सभावेणं निर्मंसुए इति । अथवा स आचार्यो वृषभो भिक्षुर्वा स्वभावेन स्व आत्मीयो भावः स्वभावः स्वशीलमित्यर्थः । तेन क्रोष्टानुगो भवेत् । यदि वा कोऽपि धर्मश्रद्धया निषद्यायामुपवेष्टुंनेच्छति तस्य किं निषद्या कर्त्तव्या ? किं वा न कर्त्तव्या ? उच्यते-भवतु यो वा स या नियमेन तस्य निषद्यां कृत्वा आलोचकेनालोचयितव्यं । यदि पुनर्न करोति ततः प्रायश्चित्तमाप्नोति, । अत्र दृष्टान्तो निःश्मश्रुको राजा । जहा-एगो राया निम्मंसुओ तस्स कयवित्तीकासवो सो परिभवेण न कयाइ उवट्ठाएति बाला नत्थित्ति काउं सो विणासित्तो । एवमिहापि यो निषद्यां न करोति स प्रायश्चित्तदण्डेन दण्डयत्ते । अणो कासवो कतो सो सत्तमे सत्तमे दिवसे उव्वट्ठाति सो रणा पूइतो । एवमिहापि यो निषद्यां करोति स विनीतोऽयमिति यशः प्राप्नोति । परलोके कर्मक्षपणतः सिद्धिमेति । तत् पुनः प्रायश्चित्तं त्रीणि मासिकानि । तानि च सदृशे सदृशानुगे सदृशस्य सदृशानुगस्य पुरत आलोचयति वेदितव्यानि । कथमिति चेदुच्यते-सिंहानुगस्याचार्यस्य सिंहानुग एवाचार्ये आलोचयत्येकं मासिकं वृषभस्य वृषभानुगस्य वृषभ एव वृषभानुगे आलोचयति द्वितीयं, भिक्षोः क्रोष्टुकानुगस्य भिक्षावेव क्रोष्टुकानुगे आलोचयति तृतीयमिति, । एतत्स्वस्थाने प्रायश्चित्तमुक्तमिदानीं स्वस्थानपरस्थानज्ञापनार्थं स्वस्थानपरस्थानेषु प्रायश्चित्तं वक्तु काम इदमाह-

[भा.५८९] सट्ठाणानुगकेई परठाणानुगय केइ गुरुमादी ।
स निसिज्जाए कप्पो, पुंच्छ निसिज्जा च उक्कुडुओ ।।

वृ- गुर्वादयो गुरुवृषभभिक्षवः केचित् स्वस्थानानुगाः केचित् परस्थानानुगाः । तत्र आचार्यस्य सती शोभना निषद्या तस्यां स्थितस्य प्रस्थापनानुगता वृषभस्य कल्पे स्थितस्य भिक्षोः पादप्रोञ्छनकनिषद्यायां रजोहरणनिषद्यायां यदि वा यदि उत्कुडुकोऽवतिष्ठते । एव भिक्षोः स्वस्थानानुगताः । इयमत्र भावना-आचार्यस्य महत्यां निषद्यायामुपविष्टस्य यत् सिंहानुगतत्वमेतत् स्वस्थानं वृषभानुगत्वं, क्रोष्टुकानुगत्वं च परस्थानं, वृषभस्य कल्पेऽवस्थितस्य यत् वृषभानुगत्वमिदं स्वस्थानं । यत्पुनर्महत्यां निषद्यायां पादप्रोञ्छनके निषद्यायां चोपवेशनतः सिंहानुगत्वं क्रोष्टुकागत्वं च तत् परस्थानम्, भिक्षोः पादप्रोञ्छनके रजोहरणनिषद्यायामुक्कुडुकत्वेनावस्थितस्य यत् क्रोष्टुकानुगतत्वं तत् स्वस्थानं, यत्तु संनिषद्यायां कल्पे चोपवेशनतः सिंहानुगत्वं वृषभानुगत्वं च तत्परस्थानं । तत्र सिंहानुगस्याचार्यस्य सिंहानुगः सन्नाचार्य आलोचयति एष प्रथमः ।। सिंहानुगस्याचार्यस्य वृषभानुगः सन्नाचार्य आलोचयति । एष द्वितीयः २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहानुगस्याचार्यस्य क्रोष्टुकानुगः सन्नाचार्य इति तृतीयः ३ । वृषभानुगस्याचार्यस्य सिंहानुगः सन्नाचार्य इति षष्ठः ६ । क्रोष्टुकानुगस्याचार्यस्य सिंहानुगः सन्नाचार्य आलोचयतीति सप्तमः ७ । क्रोष्टुकानुगस्याचार्यस्य वृषभानुगः सन्नाचार्य इत्यष्टमः ८ । क्रोष्टुकानुगस्याचार्यस्य क्रोष्टुकानुगः सन्नाचार्य आलोचयतीति नवमः ९ । एतेषां नवानामप्याचार्याणामालोचयतां यथासङ्ख्यमिति प्रायश्चित्तम् ।।

[भा.५९०] मासो दुन्निओ सुद्धो चउलहु लहु य अंतिमो सुद्धो ।
गुरुया लहुया लहुय भेया गणिणो नवगणिंमि ।।

वृ- गणिन्याचार्ये लोचनार्हेगणिनि गणिन आचार्यस्यालोचकस्य भेदा नव ते चानन्तरमेवोपदर्शिता एतेषां च यथाक्रमं प्रायश्चित्तमिदं मासो इत्यादि सिंहानुगस्याचार्यस्य पुरतः सिंहानुगतयालोचयत आचार्यस्य प्रायश्चित्तं मासलघु । वृषभानुगतया आलोचयन् शुद्धः क्रोष्टुकानुगतयालोचयन् शुद्धः वृषभानुगस्याचार्यस्य पुरतः सिंहानुगतया आलोचयत आचार्यस्य प्रायश्चित्तं चत्वारो लघवो लघुमासाः, वृषभानुगतया आलोचयतो लघुको मासः, क्रोष्टुकानुगतयालोचयन् शुद्धः क्रोष्टुकानुगतस्याचार्यस्य पुरतः सिंहानुगतयालोचयत आचार्यस्य चत्वारो गुरुका गुरुमासाः, वृषभानुगतयालोचयतश्चत्वारो लघुका लघुमासाः, । क्रोष्टुकानुगतयालोचयतो लघुक एको लघुमासः । पादप्रोञ्छने रजोहरणनिषद्यायां च क्रोष्टुकानुगालोचनार्हाचार्यसद्दशासने उपविष्टस्य वेदितव्यः । यदा पुनरुत्कुटुकः सन्नालोचयति तदा शुद्ध एव, एतानि प्रायश्चित्तानि तपसा कालेन च गुरुकाणि द्रष्टव्यानि । तथा सिंहानुगवृषभान-गक्रोष्टुकानुगरूपाणां त्रयाणां आचार्याणां वृषभा आलोचका नव, तेषामपि यथाक्रमं तान्येव प्रायश्चित्तानि नवरं तपसा गुरूणि कालतोलघूनि वेदितव्यानि, तथा त्रयाणां सिंहानुगवृषभानुगक्रोष्टुकानुगरू पाणामाचार्याणां भिक्षवोप्यालोचकानव तेषामपि यथाक्रमं तान्येव प्रायश्चित्तानि नवरं तपसा लघूनि कालतो गुरूणि । तथा चाह-

[भा.५९१] दोहिं वि गुरूणि एंत गुरुंभि नियमा तवेण कालेन ।
वसभंमि य तव गुरुगा कालगुरू होंति भिक्खुंमि ।।

वृ- गुरावाचार्ये आलोचके जाताकेवचनं गुरुलघुषु आचार्येषु आलोचकेषु नवसु नियमादेतानि यथाक्रममनन्तरोदितानि प्रायश्चित्तानि द्वाभ्यां गुरुकाणि द्रष्टव्यानि । तद्यथा-तपसा कालेन च वृषभेऽत्रापि जातावेकवचनं वृषभेषु तपसा गुरुकाणि कालतो लघूनीति सामर्थ्यादवसीयते, । भिक्षौ भिक्षुषु कालतो गुरूणि, सामर्थ्यात्तपसा लघूनि भवन्ति, तदेवमालोचनार्हमाचार्य प्रतीत्याचार्यवृषभभिक्षुष्वालोचकेषु सप्तविंशतिः प्रायश्चित्तस्थानानि प्रतिपादितान्यधुना सिंहवृषभक्रोष्टुकानुरूपतया त्रयाणामालोचनार्हाणां वृषभाणां ये पूर्वक्रमेणाचार्या आलोचका नव भवन्ति तेषां यथासङ्ख्यं प्रायश्चित्तमाह-

[भा.५९२] लहुया लहुओ सुद्धो गुरुया लहुओ य अंतिमो सुद्धो ।
छल्लहु चउलहु लहुओ वसभस्स उ नवसु ठाणेसु ।।

वृ- वृषभस्यालोचनार्हस्य सिंहानुगादिरूपतया त्रिविधस्य नवसु स्थानेषु नवस्वाचार्येषु आलोचकेषु यथाक्रममिदं प्रायश्चित्तम् । तद्यथा-वृषभस्य सिंहानुगस्य पुरतः सिंहानुगतया आलोचयति आचार्यस्य चत्वारो लघुमासा, वृषभानुगतया आलोचयतो लघुको लघुमासः क्रोष्टुकानुगतया आलोचयन् शुद्धः, वृषभस्य वृषभानुगस्य पुरतः सिंहानुगतया आलोचयन् शुद्धः वृषभस्य क्रोष्टुकानुगतस्य पुरतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहानुगतयालोचयत आचार्यस्य प्रायश्चित्तं षट्लघवो लघुमासाः भवन्ति वृषभानुगतयालोचयतश्चत्वारो लघुमासाः, क्रोष्टुकानुगतयालोचयतो लघुमासः ।

[भा.५९३] दोहिं वि गुरुगा एते गुरुंमि नियमा तवेन कालेणं ।
वसभंमि य तव गुरुगा कालगुरू होंति भिक्खुंमि ।।

वृ- गुरौ नवप्रकारे आलोचयति नियमादेतानि यथाक्रममनन्तरोदितानि प्रायश्चित्तानि द्वाभ्यां गुरुकाणि प्रतिपत्तव्यानि, । तद्यथा-तपसा कालेन च । वृषभस्यैव सिंहवृषभक्रोष्टुकानुगतया त्रिविधस्यालोचनार्हस्य पुरतो वृषभे नवप्रकारे आलोचयति यथाक्रममनन्तरोदितानि प्रायश्चित्तानि तपसा गुरूणि सामर्थ्यात् कालतो लघूनि वेदितव्यानि, । तथा वृषभस्यैव सिंहवृषभक्रोष्टुकानुगतया त्रिप्रकारस्य पुरतो नवप्रकारे भिक्षावालोचयति यथासङ्ख्यमुक्तानि प्रायश्चित्तानि कालतो गुरूणि सामर्थ्यात्तपसि लघूनि भवंति प्रतिपत्तव्यानि, । तदेवं वृषभमालोचनार्हं प्रतीत्य नवानामाचार्याणां नवानां वृषभाणां नवानां भिक्षूणामालोचयतां प्रायश्चित्तमुक्तम् ।। इदानीं सिंहवृषभक्रोष्टुकानुगतया त्रयाणामालोचनार्हाणां भिक्षूणां ये पूर्वक्रमेणाचार्या आलोचका नव तेषां प्रायश्चित्तस्थानमाह-

[भा.५९४] चउ गुरु चउ लहु सुद्धो छल्लहु चउ गुरुग अंतिमो सुद्धो ।
छग्गुरु चउ लहु लहुओ भिक्खुस्स उ नवसु ठाणेसु ।।

वृ- भिक्षोरालोचनार्हस्य सिंहवृषभक्रोष्टुकानुगतया त्रिविकल्पस्य नवसु स्थानेषु नवस्वालोचकेषु यथाक्रममिदं तद्यथा-भिक्षोः सिंहानुगस्य पुरतः सिंहानुगतया आलोचयत आचार्यस्य चत्वारो गुरुकाः, वृषभानुगतया आलोचयतश्चत्वारो लघुका लघुमासाः क्रोष्टुकानुगतयालोचयतो लघुमासः, । सोऽप्यालोचनार्ह सदृशासने प्रतिपत्तव्यः, । उत्कुटुकस्त्वालोचयन् शुद्धः, एतानि च प्रायश्चित्तानि तपसा कालेन च गुरुकानि द्रष्टव्यानि, । तथा सिंहानुगवृषभानुगक्रोष्टुकानुगरूपाणां त्रयाणामालोचनार्हाणां भिक्षूणां वृषभा अप्यालोचका नव तेषामपि यथाक्रममभून्येव प्रायश्चित्तानि, नवरं तपसा गुरूणि कालतो लघूनि । तथा त्रयाणां सिंहानुनादिरूपाणां भिक्षूणामालोचनार्हाणां भिक्षवोऽप्यालोचका नव तेषामपि यथाक्रममून्येव प्रायश्चित्तानि, नवरं तपसा लघूनि । कालतो गुरूणि । तथा चाह-

[भा.५९५] दोहिं वि गुरुया एते, गुरुंमि नियमा तवेण कालेणं ।
वसभंमि य तव गुरुणा कालगुरू होंति भिक्खुंमि ।।

वृ. गतार्था । सम्प्रति व्याप्त्या प्रायश्चित्तलक्षणप्रतिपादनार्थमाह-

[भा.५९६] सव्वत्थवि संठाणं अमुंचमाणस्स मासियं लहुयं ।
परट्ठाणंमि य सुद्धो जइ उच्चतरो भवे इयरो ।।

वृ- स्वस्थानं नाम स्वोचितमुपवेशनत आलोचयन्नपि यदि न मुञ्चति । ततस्तदमुञ्चतः सर्वत्रापि सर्वेष्वप्याचार्यत्वादिषु स्थानेषु प्रायश्चित्तं मासिकं लघु । इयमत्र भावना-यथालोचनार्हस्याचार्यस्य सिंहानुगस्य पुरतः सिंहानुग एव सन्नाचार्य आलोचयति, तथा वृषभस्य वृषभानुगस्य वृषभ एव वृषभानुग आलोचयति तथा भिक्षोः क्रोष्टुकानुगस्य भिक्षुरेव क्रोष्टुकानुग आलोचयति तत एतेषु त्रिष्वपि स्थानेषु प्रत्येकं प्रायश्चित्तं मासिकं लघु, । एतच्च मासिया तिन्निति प्रागेवोक्तं परस्थाने वर्त्तमानः सर्वत्र शुद्धो यदि नीचतरानुगः सन्नालोचयति । इतर आलोचनार्हः पुनरुच्चतरानुगो भवेत् । तदेवं विभागत एकाशीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विधप्रायश्चित्तमुक्तम् । इदानीमोघतो नवविधं प्रायश्चित्तमाह-

[भा.५९७]　　चउगुरुयं मासो वा मासो छल्लहुग चउ गुरुमासो ।
छग्गुरुयं छल्लहुयं चउगुरुयं वा बितिएणं ।।

वृ- सिंहानुगस्य पुरतः सिंहानुगो भूत्वा यद्यालोचयति, ततश्चतुर्गुरु प्रायश्चित्तं; सिंहानुगस्य वृषभानुगीभूयालोचयतो मासलघुः सिंहानुगस्य क्रोष्टुकानुगीभूय पादप्रोञ्छने रजोहरणनिषद्यायां वा स्थितस्यालोचयतो मासलघु, उत्कुटुकः सन् आलोचयन् शुद्धः । वृषभानुगस्य पुरतः सिंहानुगो भूत्वा यद्यालोचयति, ततः षट् लघु षट् मासा लघवः प्रायश्चित्तं, वृषभानुगस्य पुरतो वृषभानुगीभूयालोचयतश्चतुर्गुरु चत्वारो गुरुमासाः, वृषभानुगस्य क्रोष्टुकानुगीभूयालोचयतो मासो लघुमासः, । क्रोष्टुकानुगस्य पुरतो यदि सिंहानुगो भूत्वा आलोचयति ततः षट् गुरु षट् मासा गुरवः क्रोष्टुकानुगस्यैव पुरतो वृषभानुगीभूयालोचयतः षट् लघु षण्मासा लघवः, क्रोष्टुकीभूयालोचयतश्चतुर्गुरु एतच्च सद्दशासनपरिग्रहे प्रतिपत्तव्यं यदि पुनरुत्कुटुकः सन्नालोचयति तदा शुद्धः, । अत्रैव व्याप्त्या प्रायश्चित्तलक्षणमाह -

[भा.५९८]　　सव्वत्थवि समासणे आलोएंतस्स चउगुरू होंति ।
विसमासण निच्चतरे अकारणे अ विहिए मासो ।।

वृ- सर्वत्रापि सिंहानुगे वृषभानुगे क्रोष्टुकानुगे च समे आसने उपविष्टस्य सत आलोचयतः किमुक्तं भवति ? याद्दशे आसने निविष्ट आलोचनार्हः आलोचकोऽपि यदि ताद्दश एवासने उपविष्टः सन्नालोचयति, तदा तस्य प्रायश्चित्तं भवति चदुर्गुरु चत्वारो गुरुमासाः, अतएव प्राक् सिंहानुगस्य पुरतः सिंहानुगस्यैवालोचयतो वृषभानुगस्य पुरतो वृषभानुगस्यालोचयतः, क्रोष्टुकानुगस्य पुरतः क्रोष्टुकानुगस्य समानासनस्यालोचयतश्चतुर्गुरुकमुक्तम्, । अथ विषमे अधिके आसने स्थितः सन् आलोचयति ततः षट् लघु षट् गुरुर्वा, तत्र वृषभानुगस्य पुरतः सिंहानुगस्यालोचयतः षट् लघु, क्रोष्टुकानुगस्य पुरतः सिंहानुगस्यालोचयतः षट् गुरु, । एतच्चानुक्तमपि सामर्थ्यादवसितं, । तत्र विषमे आसने नीचतरे स्थितः सन्नालोचयति । ततः प्रायश्चित्तं मासो लघुमासः । एतच्चाकारणे निषीदतो वेदितव्यम् । कारणे निषीदन् शुद्ध एव । तथा आलोचनाकाले ये शेषा अप्रमार्जनादयो विधयस्तेष्वपि प्रत्येकं प्रायश्चित्तं मासलघु ।

सम्प्रति जे एयाए पट्ठवणाए पट्ठविए निव्विसमाणे पडिसेवितो स विकसिणे तत्थेव आरोहेयव्वे सिया इति तद्व्याख्यानार्थमाह-

[भा.५९९]　　मासादी पठविए जं अन्नं सेवए तयं सव्वं ।
साहनिऊणं मासा, छदिज्जं ते परे झोसो ।।

वृ- प्रागुक्तया प्रस्थापनया प्रायश्चित्तदानलक्षणया प्रस्थापिते प्रायश्चित्तकरणे प्रवर्तिते यदन्यत् मासादि सेवते प्रतिसेवते तत्सर्वं संहत्य एकत्र मीलयित्वा षण्मासा दीयन्ते । यत्पुनः षण्मासेभ्यः परं तस्य समस्तस्यापि गाथायां सप्तमी षष्ट्यर्थे झोषः परित्यागः । सूत्रे पट्ठवेत्युक्तं ततः प्रस्थापनाया भेदानाह-

[भा.६००]　　दुविहा पट्ठव या खलु एगमनेगा य हो अनेगाय ।
तव तिय परियत्त तिगं तेरस उ जानि य पयान्नि ।।

वृ- सा प्रायश्चित्तप्रस्थापना द्विविधा । तद्यथा-एका अनेका च । तत्र या संचयिता सा नियमात्

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

षाण्मासिकीत्येकविधा । सापि स्वभेदचिन्तायां द्विधा-उद्घाता अनुद्घाता च । अनेका पुनरियं भवति यमित्यादि तत्र पञ्चकादिषु भिन्नमासान्तेषु परिहारतपो न भवति, किन्तु मासादिषु । ततो मासिकमेकं तपः स्थानकं द्वैमासिकादि यावच्चातुर्मासिकमेतत् द्वितीयं तपः स्थानं, पञ्चमासिकं षाण्मासिकं च तृतीयंतपःस्थानं । एतान्यपि प्रत्येकं द्विविधानि । तद्यथा-उद्घातानुद्घातानि च । एतत् तपस्त्रिकं परियत्ततिगं ति प्रव्रज्यापर्यायस्य परावर्त्तः । तस्य त्रिकं परिवर्त्तत्रिकं तत्र च्छेदत्रिकं मूलत्रिकमनवस्थाप्य त्रिकं च । च्छेदो द्विधा-उद्घातोऽनुद्घातो वा पाराञ्चितमेकमेतानि तपस्त्रिकसहितानि यानि त्रयोदशपदानि एषा पाराञ्चितवर्जा अनेका प्रस्थापना ।

अथैतानि त्रयोदश पदानि प्रागेवाभिहितानि किमर्थमिह पुनरुच्चार्यन्ते ? । उच्यन्ते-स्मरणार्थं, । अथवा यदेतत् प्रस्थापितोऽपि प्रतिसेवते तत् कृत्स्नमनुग्रहकृत्स्नेन निरनुग्रहकृत्स्नेन वा आरोप्यते । प्राकृतत्वं त्वनुग्रहकृत्स्नेनैवारोपितमिति ज्ञापनार्थं । इह अपलिउंचिय पलिउंचिए इत्यादि सूत्रम् । अपलिउंचिए अपलिउंचियामिति प्रथमभङ्गानुगतमित्युक्तम् । एतच्चोपलक्षणं, तेन द्वितीयेन तृतीयभङ्गानुगतेऽपि सूत्रे वक्तव्ये । तच्चैवम्- 'जे भिक्खू चाउम्मासियं वा सातिरेगचाउम्मासियंवा' इत्यादि 'जाव 'अपलिउंचिए अपलिउंचियं, अपलिउंचिए पलिउंचियं, पलिउंचिए अपलिउंचियं, पलिउंचिए पलिउंचियमालोएमाणस्स सव्वमेयं साहणिय जाव आरोहेयव्वे सिया' तृतीयभङ्गानुगतमपि सूत्रमेवमुच्चारणीयम् । नवरं पलिउंचिए अपलिउंचियमालोएमाणस्सेति वक्तव्यं, शेषं तथैवा चतुर्भङ्गानुगतं तु सूत्रं साक्षादाह- 'जे भिक्खू चाउम्मासियं वा सातिरेगचाउम्मासियं वा' इत्यादि । अस्य व्याख्या निरवशेषा प्राग्वत् ज्ञातव्या नवरमेषोऽत्र विशेषः- 'पलिउंचिए पलिउंचियमालोएमाणस्स' इति, शेषं तथैव । एवममूनि चत्वारि सूत्राणि चतुर्भङ्गविकल्पेन उक्तानि, एवं मासिकद्वैमासिकादि सूत्राण्यप्युपयुज्य चतुर्भङ्गविकल्पनतः सविस्तरं भणनीयानि । एवं बहुशः शब्दविशिष्टान्यपि प्रथमतश्चतुर्भङ्गविकल्पेन चत्वारिसूत्राणि वक्तव्यानि । तत्र प्रथमभङ्गानुगतसूत्रं प्रागेवातिदेशनत उक्तम् द्वितीयतृतीयभङ्गानुगते सूत्रे प्राग्वद्वक्तव्ये, चतुर्थभङ्गानुगतं सूत्रं साक्षादतिदेशत आह- 'एवं बहुसो वि' इति । एवमनन्तरोदितसूत्रप्रकारेण बहुशोऽपि बहुशः शब्दविशिष्टमपि सूत्रं वक्तव्यम् । तद्यथा-जे भिक्खू बहुसो चउमासियं वा बहुसो सातिरेगचाउम्मासियं वा बहुसो पंचमासियं वा बहुसो सातिरेगपंचमासियं वा । एएसिं परिहारठाणाणं अनयरं परिहारठाणं पडिसेवित्ता आलोएज्ञा अपलिउंचिय आलोएमाणे ठ्ठवणिज्ञं ठवयित्ता करणिज्ञं वेयावडियं ठविए पडिसेवित्ता । सेवि कसिणे तत्थेव आरुहेयव्वे सिया, पुव्वं पडिसेवियं पुव्वं आलोइयं जाव पच्छा पडिसेवियं पच्छा आलोइयं अपलिउंचिय अपलिउंचियं जाव पलिउंचिए पलिउंचिय आलोएमाणस्स सव्वमेयं सकयं साहणियं जे एयाए पट्ठवणाए जाव तत्थ आरोहव्वे सिया इति तदनन्तरं मासिकद्वैमासिकादीन्यपि सूत्राणि सम्यगुपयुज्य विस्तरतोऽनेकानि वक्तव्यानि । आह-से वि तत्थेव आरोहेयव्वे सिया, पुव्वं पडिसेवियं पुव्वं आलोइयं जाव पच्छा आलोइयं अपलिउंचिय जाव पलिउंचिए पलिउंचिय आलोएमाणस्स सव्वमेयं सकयं साहणियं जे एयाए पट्ठवणाए जाव तत्थ आरोहव्वे सिया इति तदनन्तर मासिकद्वैमासिकादीन्यपि सूत्राणि सम्यगुपयुज्य विस्तरतोऽनेकानि वक्तव्यानि । आह-से वि तत्थेव आरोहेयव्वे सिया इत्युक्तं तत्र कति भेदा आरोपणाया ? उच्यते-पञ्च । तथा चाह-

[भा.६०१] पट्ठवितिया ठ्ठविया कसिणा कसिणा तहेव हाडहडा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोपण पंचविहा पायच्छित्तं पुरिसजाते ।।

वृ- आरोपणा पञ्चविधा पञ्चप्रकारा, तद्यथा-प्रस्थापनिका, स्थापिता, कृत्स्ना, अकृत्स्ना, हाडहडा च । एषा पञ्च प्रकाराप्यारोपणा प्रायश्चित्तस्य । तच्च प्रायश्चित्तं पुरुषजाते कृतकरणादौ यथायोग्यमवसेयमेव गाथासंक्षेपार्थः । इदानीमेनामेव गाथां व्याख्यानयन् प्रथमतः प्रस्थापनिकादि भेदचतुष्टयं व्याख्यानयति-

[भा.६०२] पट्ठवितियावहंते वेयावच्चठिया ठवितियाउ ।
कसिणा झोसविरहिया जहिं झोसो सा अकसिणाउ ।।

वृ- यदारोपितं प्रायश्चित्तं वहति एषा प्रस्थापितिकारोपणा, या वैयावृत्त्यकरणलब्धिसम्पन्न आचार्यप्रभृतीनां वैयावृत्यं कुर्वन् यत् प्रायश्चित्तमापन्नस्तस्यारोपितमपिस्थापितं क्रियते, यावत् वैयावृत्य परिसमाप्तिर्भवति । द्वौ योगावेककालं कर्तुसमर्थ इति कृत्वा सा आरोपणा स्थापनिका; कृत्स्ना नाम यत्र झोषो न क्रियते । अकृत्स्ना यत्र किञ्चित् झोष्यते । हाडहडा त्रिविधा, तद्यथा-सद्योरूपा स्थापिता प्रस्थापिता च । तत्रेयं सद्योरूपा-

[भा.६०३] उग्घायमण्डघायं मासादितवाओदिज्ञए सव्वं ।
मासादीनि क्खित्तं, जं सेसं तं अनुग्घायं ।।

वृ- उद्घातं लघु अनुद्घातं गुरु यत् मासादि मासिकमादिशब्दात् द्वैमासिकं त्रैमासिकं वा इत्यादि तप आपन्नस्तद्यदि सद्यस्तत्कालं दीयते । न कालक्षेपेण तदा सा हडाहडा आरोपणा सद्योरूपा । यदि पुनर्यन्मासादिकमापन्नस्तत् वैयावृत्यमाचार्यदीनां करोतीति स्थापितं क्रियते । तस्मिंश्च स्थापिते यदन्यत् शेषमुद्घातमनुद्घातं वा पद्यते तत्सर्वमपि प्रमादनिवारणार्थमनुद्घातं दीयते, सा हाडहडा आरोपणा स्थापिता । प्रस्थापितायाः स्वरूपमाह-

[भा.६०४] छम्मासादि वहंते अंतरे आवन्ने जा उ आरुवणा ।
सा होति अनुग्घाया तिन्नि विगप्पा उ चरिमाए ।।

वृ- षाण्मासिकं तपो वहन्, आदिग्रहणात्पाञ्चमासिकं चातुर्मासिकं त्रैमासिकं द्वैमासिकं वा वहन् अन्तरा यदन्यदापद्यते उद्घातमनुद्घातं तत्तस्यातिप्रमादनिवारणार्थमनुग्रहकृत्स्नेन चानुद्घातं यदारोप्यते एषा हाडहडा आरोपणा प्रस्थापिता । एते त्रयो विकल्पाश्चरमाया हाडाहडाया अथवा इमे त्रयो विकल्पाः-

[भा.६०५] सा पुन जहन्न उक्कोस मज्झिमा तिन्नि विगप्पा ।
मासो छम्मासा वा अजहन्नुक्कोसजेमज्झे ।।

वृ- सा हाडहडा आरोपणा त्रिविधा, तद्यथा-जघन्या मध्यमा उत्कृष्टा च । एते त्रयो विकल्पा हाडहडाया भवन्ति । तत्र गुरुको मासो जघन्या 'षण्मासा गुरव उत्कृष्टा । एतयोर्द्वयोर्मध्ये ये गुरुद्विमासादयो गुरुमासपञ्चकपर्यन्ता एषा जघन्योत्कृष्टा हाडहडा सा चतुर्विकल्पा, तद्यथा-द्वैमासिकं गुरुकं, त्रैमासिकं गुरुकं चातुर्मासिकं गुरुकं पाञ्चमासिकं गुरुकमिति । सम्प्रति यत्प्रागुक्तं प्रायश्चित्तं पुरुषजातेइति तद्व्याख्यातुकामः प्रस्तावनामाह-तालपलंबादि आमेतालमलंबेत्यादिना समस्तेन कल्प ग्रन्थेन । आदिशब्दस्यानेकाभिधायकत्वात् व्यवहाराध्ययनेनापि यः प्रायश्चित्तराशिरुक्तो वक्ष्यते च तस्य समस्तस्यापि यथायोगमिमे वक्ष्यमाणाः कृतकरणादयः पुरुषु वहल्का वहमानकाः । ते च यद्यपि प्रागुक्तास्तथापि प्रकरणानुरोधात् भूय आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.६०६] कयकरणा इयरे य सावेक्खा खलु तहेव निरवेक्खा ।
निरवेक्खा जिनमाई सावेक्खा आयरियमादी ।।

वृ- एतत्प्रभृतिका गाथा यद्यपि प्रागपि व्याख्याता तथापि मूलटीकाकारेणापि भूयो व्याख्याता इति तन्मार्गानुसारतः स्थानाशून्यार्थं वयमपि लेशेन व्याख्यामः-तत्र प्रायश्चित्तस्य वहमानकाः पुरुषा द्विविधास्तद्यथा-कृतकरणा अकृतकरणाश्च । तत्र ये षष्टाष्टमादितपो भाविताास्ते कृतकरणास्त द्विलक्षणा इतरे । तत्र ये कृतकरणास्ते द्विविधास्तद्यथा-सापेक्षाः तथैव खलु निरपेक्षाः । तत्र ये गच्छं शरीरं वापेक्षन्ते ते सापेक्षा, ये पुनर्गच्छं शरीरं वा नापेक्षन्ते ते निरपेक्षाः । तत्र निरपेक्षा जिनादयो जिनकल्पिका आदिशब्दात् शुद्धपारिहारिका यथालन्दिकाः प्रतिमाप्रतिपन्नाश्च, एते नियमतः कृतकरणाः । सापेक्षाः त्रिविधा आचार्यादयः, आचार्योपाध्याया भिक्षवश्चेत्यर्थः ।

[भा.६०७] अकयकरणा य दुविहा अनहिगहिया अहिगयाओ बोधव्वा ।
जं सेवेइ अहिगतो अनहिगए अत्थिरे इच्छा ।।

वृ- अकृतकरणा द्विविधा-अनधिगता अधिगताश्च । तत्र येऽग्रहीतसूत्रार्थास्ते अनधिगता गृहीतसूत्रार्थास्त्वधिगताः । तत्र योऽधिगत उपलक्षणमेतत् कृतकरणो धृतिसंहननयुक्तश्च यत्सेवते प्रायश्चित्तस्थानं तस्य तत्परिपूर्णं दीयते । यः पुनरनधिगतोऽस्थिरोऽधिकृतकरणो धृतिसंहननविहीनश्च तस्य यदापन्नं तद्वा परिपूर्णं दीयते । यदि वा ह्रस्वतरं यद्वा सर्वात्मनाझोषस्तथा चाहानधिगतेऽस्थिरे उपलक्षणमेतत् अकृतकरणे धृतिसंहननविहीने च गुरोः प्रायश्चित्तदानविधाविच्छा श्रुतोपदेशानुसारतः कदाचित् यदापन्नं तदेव कदाचित् हीनं कदाचित् स्तोकं कदाचित् सर्वथा झोष इति भावः । सम्प्रति पुरुषभेदमार्गणामेव प्रकारान्तरेणाह-

[भा.६०८] अहवा सावेक्खियरे निरवेक्खो नियम सा उ कयकरणा ।
इयरे कया कयावि य थिराथिरा होंति गीयत्था ।।

वृ- अथवा द्विविधाः प्रायश्चित्तस्यवहमानकाः पुरुषास्तद्यथा-सापेक्षा इतरे च निरपेक्षास्तत्र ये निरपेक्षास्ते नियमसा उ इति, नियमतः कृतकरणा उपलक्षणमेतत् ततः कृतकरणादिसमस्तगुणोपेता इत्यर्थः । इतरे सापेक्षास्ते त्रिविधा-आचार्योपाध्यायभिक्षुभेदात् । ते प्रत्येकं द्विधास्तद्यथा-कृतकरणा अकृतकरणाश्च । पुनः प्रत्येकं द्विधा-अधिगता अनधिगताश्च गीतार्था अगीतार्थाश्चेत्यर्थः । गाथायां गीतार्थग्रहणमुपलक्षणं तेनागीतार्था अप्युपात्ता द्रष्टव्याः । भूयः प्रत्येकं द्विविधास्तद्यथा-स्थिरा अस्थिराश्च तत्र ये चरकादिभिर्दर्शनतः परीषहोपसर्गैः चरणतोऽतिकर्कशप्रायश्चित्तदानतः स्वभावतो वा न चाल्यन्ते ते स्थिरास्तद्विपरीता अस्थिराः । साम्प्रतं कृतकरणस्वरूपमाह-

[भा.६०९] छट्ठट्ठमाइएहिं कयकरणा ते य उभय परियाए ।
अहिगयकयकरणत्तं जोगा य तवारिहा केई ।।

वृ- ये उभयपर्याये गृहस्थपर्याये श्रामण्यपर्याये च षष्टाष्टमादिभिः परिकर्मितशरीरास्ते कृतकरणा इतरेऽकृतकरणाः । केचिदाचार्या येऽधिगतास्तेषां नियमतः कृत करणत्वमिच्छन्ति । कस्मादिति चेदत आह-जोगा य तवारिहा इति, यतस्तैर्महाकल्पश्रुतादीनामायता दीर्घकाला योगा व्यूढाः ।

[भा.६१०] सव्वेसिं अविसिट्ठा आवत्ती तेन पढमया मूलं ।
सावेक्खे गुरुमूलं कयाकए होइ च्छेदो उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.६११] सावेक्खोत्ति च काउं गुरुस्स कयजोगिणो भवे च्छेदो ।
अकयकरणं मिच्छगुरु इइ अड्ढो कंतीए नेयं ।।

वृ- इह ये निरपेक्षास्ते यत् प्रायश्चित्तस्थानमापद्यन्ते तदेव तेभ्यो दीयते । गुरुलाघवचिन्तया अपवादपदेनान्यत् तेषां निरनुग्रहत्वात् । ततः सापेक्षाणामयं प्रायश्चित्तदानविधिः । तत्र महत्यप्यपराधे सापेक्षाणां मूलं नानवस्थाप्यं पाराश्चितं वा । तयोर्निरपेक्षाणामेव सतां दानभावात् । तेन प्रथमतया सर्वेषां मूलमविशिष्टमाधिकृत्य गुरुलाघवचिन्तायां प्रायश्चित्तदानविधिरुच्यते । तत्र सापेक्षे गुरौ आचार्ये गाथायामत्र विभक्तिलोपः प्राकृतत्वात् । कृते कृतकरणे मूलं, अकृतेऽकृतकरणे च्छेदः । सावेक्खोत्ति च काउमित्यादि अत्र गुरुशब्देनोपाध्याय उच्यते आचार्यस्योक्तत्वात् । गुरोरुपाध्यायस्य कृतयोगिनः कृतकरणस्य मूलं प्रायश्चित्तमापन्नस्यापि सापेक्ष इति कृत्वा प्रायश्चित्तं च्छेदो भवति । अकृतकरणे तु तस्मिन्नेवोपाध्याये मूलमापन्ने प्रायश्चित्तं षट् गुरुकाः गुरवः । षण्मासाः अकृतकरणतया च्छेदस्यानर्हत्वात् एवममुना प्रकारेण 'अड्ढोकंतीए' इति अधापक्रांत्या प्राग् व्याख्यानरूपया नेयं । तद्यथा भिक्षोरधिगतस्य कृतकरणस्य षट् गुरवः अकृतकरणस्य षट् लघवः अस्थिरस्य कृतकरणस्य षट् लघवः अकृतकरणस्य षट् लघवः अकृतकरणस्य तस्यैव चदुर्गुरवः अनधिगतस्य स्थिरस्य कृतकरणस्य चतुर्गुरवः । तस्यैवाकृतकरणस्य चतुर्लघवः । अस्थिरस्य कृतकरणस्य चतुर्लघवः । तस्यैवाकृतकरणस्य गुरुमासः एवं मूलापत्तौ मूलादारभ्य मासगुरुके समाप्तम् । छेदापत्तौ च्छेदादारभ्यम मासलघुके तिष्ठति, षट् गुरुकादारभ्य भिन्नमासे गुरुके षट् लघुगुरुकादारभ्य लघुके भिन्नभिन्नमासे चतुर्गुरुकादारभ्य गुरुविंशतिरात्रिंदिवेषु चतुर्लघुकादारभ्य लघुविंशतिरात्रिंदिवेषु मासगुरुकादारभ्य लघुके भिन्नभिन्नमासे चतुर्गुरुकादारभ्य गुरुविंशतिरात्रिंदिवेषु चतुर्लघुकादारभ्य लघुविंशतिरात्रिंदिवेषु मासगुरुकादारभ्य गुरुषु पञ्चदशरात्रिंदिवेषु मासलघुकादारभ्य लघुपञ्चदशरात्रिंदिवेषु भिन्नमासगुरुकादारभ्य गुरुषु दशरात्रिंदिवेषु भिन्न मासलघुकादारभ्य लघु दशरात्रिंदिवेषु गुरुविंशतिरात्रिंदिवेभ्य आरभ्य गुरुपञ्चरात्रिं दिवेषु लघुविंशतिरात्रिंदिवेभ्य लघुपंचरात्रिं दिवेषु, गुरुपंचदशरात्रिं दिवेभ्यो दशमे, लघुपंचदशरात्रिं दिवेभ्योऽष्टमे, गुरुदशरात्रिंदिवेभ्य आरभ्य षष्ठे लघुदशरात्रिंदिवेभ्य आरभ्य चतुर्थे, गुरुपंचरात्रिंदिवेभ्य आरभ्य आयामाम्ले लघुपञ्चरात्रिं दिवेभ्यः आरभ्य एकाशने दशमादारभ्य पूर्वार्धेऽष्टमादारभ्य निर्विकृतिके सम्प्रति 'जं सेवेइ अहिगतो' इत्यादि यत् गाथोत्तरार्धं प्रागुक्तं तद्व्याख्यानार्थमाह-

[भा.६१२] अकयकरणा उ गीया जे अगीया य अकय अथिरा य ।
ते सावत्ति अनंतर बहुयंतरियं च झोसोवि ।।

वृ- ये गीता गीतार्थाः अकृतकरणाः ये चागीता अगीतार्था अकयत्ति य कृतकरणाश्चब्दात् कृतकरणाश्च अस्थिराश्च कृतकरणाऽकृतकरणाश्च तेषां कदाचिदापत्ति प्रायश्चित्तं दीयते । कदाचित्तथाविधायामसमर्थतायां यदापन्नं प्रायश्चित्तं तस्य अर्वाक्तनमनन्तरं दीयते । कदाचित् प्रभूतायामसमर्थतायां बह्वन्तरितमत्यन्तमसमर्थतायां झोषो वा । अत्र शिष्यः प्राह-ये निरपेक्षास्ते एकविधा ये सापेक्षास्तेषां किं निमित्तस्त्रिविधो भेदस्तत आह-

[भा.६१३] कारणमकारणं वा जयणा अजयणा नवत्थगीयत्थे ।
एएण कारणेणं आयरियाई भवे तिविहा ।।

वृ- इदं प्रतिसेवनायाः कारणमिदमकारणं । किमुक्तं भवति ? यादृशे कारणे प्रतिसेवना क्रियते यादृशे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च न क्रियते इत्येतत् परिज्ञानं । तथा इयं यतना इयमयतना इत्येतदपि नास्ति अगीतार्थऽगीतार्थस्य, अर्थात् गीतार्थस्यास्तीति प्रतीयते तत्राचार्योपाध्यायौ गीतार्थावेव भिक्षुगीतार्थःअगीतार्थश्च गीतार्थस्यागीतार्थस्य च कारणे यतनया कारणे अयतनया अकारणे यतनया अकारणे अयतनया पृथक् अन्यत् प्रायश्चित्तं । तथा तुल्येऽपि प्रायश्चित्ते आपद्यमाने सहासहपुरुषाद्यपेक्षया पृथगन्योन्योदान-विधिरेतेन कारणेन त्रिविधा आचार्यादयो भवन्ति । किं चान्यत्-

[भा.६१४] तिविहे तेगिच्छंमि उ उज्जुय वाउलण साहणा चेव ।
पन्नवणमणिच्छंते दिठ्ठंतो भंडिपोएहिं ।।

वृ- त्रिविधे त्रिप्रकारे आचार्योपाध्यायभिक्षुलक्षणे विचिकित्से चिकित्स्यमाने गीतार्थ इति गम्यते। ऋजुकंस्फुटमेव प्रावृतसाधनाव्यापृतक्रियाकथनं ।इयमत्र भावना-आचार्यणामुपाध्यायानां गीतार्थानां च भिक्षूणां चिकित्स्यमानानां यदि शुद्धं प्रासुकमेषणीयं लभ्यते तदा न तत्र विचारः । अथप्रासुकमेषणीयं न लभ्यते, अथ चावश्यं चिकित्सा कर्तव्या तदा अशुद्धमप्यानीय दीयते, तथाभूतं चानीय दीयमानं स्फुटमेव कथनीयं इदमेवंभूतमिति । गीतार्थत्वेनापरिणामदोषस्यातिपरिणामदोषस्यासंभवात् अगीतार्थस्य पुनर्भिक्षोः शुद्धालाभे चिकित्सामशुद्धेन कुर्वतो मुनिवृषभा यतनया कुर्वन्ति । न चाशुद्धं कथयन्ति । यदि पुनः कथयन्ति अयतनया वा तदा सोऽपरिणामत्वादनिच्छन् अनागाढादिपरितापन-मनुभवति, तन्निमित्तं प्रायश्चित्तमापतति मुनिवृषभाणां, यद्वा अतिपरिणामकतया सोऽतिप्रसङ्गं कुर्यात् तस्मान्न कथनीयं नाप्ययतना कर्तव्या । अथ कथमपि तेनागीतार्थेन भिक्षुणा ज्ञातं भवति, यथा अकल्पिकमानीय मह्यं दीयते, तदा तस्मिन्ननिच्छति अगीतार्थे भिक्षौ प्रज्ञापनादि क्रियते । यथा ग्लानार्थं यदकल्पिकमपि यतनया सेव्यते तत्र शुद्धो ग्लानो यतनया प्रवृत्तेरल्पीयान् दोषोऽशुद्धग्रहणात् सोऽपि पश्चात् प्रायश्चित्तेन शोधयिष्यते, एवंरूपा च प्रज्ञापना क्रियते तरुणे दीर्घायुषि, यस्तु वृद्धस्तरुणो वाऽतिरोगग्रस्तोऽचिकित्सनीयः स भक्तप्रत्याख्यानं प्रति प्रोत्साह्यते । यदि पुनः प्रोत्साह्यमानोऽपि न प्रतिपद्यते तदा भण्डीपोताभ्यां दृष्टान्तः कर्तव्यः । सम्प्रति भण्डीपोतावेव दृष्टान्तावाह-

[भा.६१५] जो एगदेसे अदढाउ भंडी सीलप्पएसा उ करेइ कज्जं ।
जा दुब्बला संठवियाविसंती न तं तुसीलंति विसन्नदारुं ।।

[भा.६१६] जो एगदेसे अदढो उ पोतो सीलिज्जते सो उ करेइ कज्जं ।
जो दुब्बलो संठवितो वि संतो न तं तु सीलंति विसन्नदारुं ।। (कण्ठ्यम्)

[भा.६१७] एसे व गमो नियमा समणीणं दुगविवज्जितो होइ ।
आयरियादीण जहा पवित्तिणमादीण वि तहेव ।।

वृ- यो गमोऽनन्तरोदित मूलसूत्रादारभ्य श्रमणानामभिहित एष एव गमो नियमात् संयतीनामपि वक्तव्यः । किमविशेषेण ? नेत्याह-द्विकवर्जितः पाराञ्चितानवस्थाप्य लक्षणद्विकवर्जितो भवति वक्तव्यः । तदापन्नावपि तासां तयोर्दानाभावात् उपलक्षणमेतत् । परिहारतपोपितासां न भवति यथा च आचार्यादीनां त्रिविधो भेद उक्तस्तथा प्रवर्तिन्यादीनामपि त्रिविधो भेदोऽभिक्षुस्थानीया भिक्षुकी चेति,। तदेवं मूलसात्रादारभ्य यत् प्रकृतं तत् परिसमाप्तम् ।। तत्र परिहारिकापारिहारविषयं सूत्रमाह-

***मू. (१९)** बहवे परिहारियाऽपरिहारिया इच्छेजा-एगंतओ अभिनिसिज्जं वा अभिनीसिहं वा चेएतए, नो से णं कप्पति थेरे अनापुच्छिता एगंतओ अभिनिसेज्जं वा अभिनीसिहं वा चेइतए; कप्पइ ण्हं थेरे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आपुच्छित्ता ते एगंतओ अभिनिसेज्जं वा अभिनिसीहियं वा चेइतवाए, थेराय ण्हं से नो वियरिज्जा एवं ण्ह कप्पइ अभिनिसेज्जं वा अभिनिसीहियं वा चेतेतए । थेरा य ण्हं से नो वितरेज्जा - एवं ण्हं नो कप्पइ एगंतओ अभिनिसेज्जं वा अभिनिनिसीहियं वा चेतेतए । जो नो थेरे हिं अवितिण्हं अभिनिसिज्जं वा अभिनिसीहिय वा चेतेति - से संतरा छेदे वा परिहारे वा ।।

वृ. बहवे पारिहारिया इत्यादि । अथ कोऽस्य सूत्रस्य पूर्वसूत्रेण सह सम्बन्धः ? उच्यते - इहानन्तरसूत्रे परिहारतप उक्तं, परिहारश्च परिहर्तव्यापेक्षया प्रतिषेध्यानान्तरीयकत्वात् । ततः परिहारग्रहणेन परिहारोऽप्याक्षिप्तस्तत्र ये परिहारेण चरन्ति तेपरिहारिका इतरे वा पारिहारिकाः । पूर्वसूत्रं च पारिहारिकविषयमतस्तत्प्रकरणानुरोधत इदं पारिहारिकापारिहारिकविषयं सूत्रं पठन्ति । अथवा पूर्वसूत्रे पारिहारिकस्य सामाचारी उक्ता । सा च न निरवशेषा किन्तु शेषमवतिष्ठते । तच्चापारिहारिकाणामपि साधारणमतस्तत्प्रतिपादनार्थं पारिहारिकापारिहारिकविषयं सूत्रमुक्तवान् । तथा चाह-

[भा.६१८] पारिहारियाण उ विना हवंति इयरेहि वा अपरिहानी ।
मेरावसेसकहणं इइमिस्सगसुत्तसंबंधो ।।

वृ- पारिहारिका उक्तशब्दार्था न तु नैव इतरैरपारिहारिकैर्विना भवन्ति । परिहारिकस्य अपरिहारिणानान्तरीयकत्वात् । अपरिहारिणो वा इतरैः परिहारिकैर्विना न भवन्ति । अपरिहारस्यापि परिहारानान्तरीयकत्वात् । तत्पारिहारिकसूत्रानन्तरं पारिहारिकापारिहारिकविषयं सूत्रं तथा मेरा मर्यादा सामाचारीत्यर्थः । सा पूर्वसूत्रे पारिहारिकाणामुक्ता किञ्चिच्छेषमपारिहारिकसाधारणमवतिष्ठते । तस्य सामाचार्यविशेषस्य कथनमनेन सूत्रेणारभ्यते क्रियते इति, एष मिश्रकसूत्रस्य पारिहारिकापारि-हारिकसूत्रस्य पूर्वसूत्रेण सम्बन्धः । अनेन सम्बन्धेनायातस्येयं व्याख्या । बहवस्त्रिप्रभृतयोऽनेके पारि-हारिका उक्तशब्दार्थाः बहवोऽपारिहारिका इच्छेयुरेकान्त एकान्ते विविक्तप्रदेशान्तरे वसत्यंतरे वा अभिनिषद्यां अभिरात्रिमभिव्याप्य स्वाध्यायनिमित्तमागता निषीदन्त्यस्यामित्यभिनिषद्या तां वा तथा निषेधः । स्वाध्यायव्यतिरेकेण सकलव्यापारप्रतिषेधः तेन निवृत्ता नैषेधिकी अभि आभिमुख्येन संयतप्रायोग्यतया नैषेधिकी अभिनैषेधिकी तां वा । इयमत्र भावना । तत्र दिवा स्वाध्यायं कृत्वा रात्रौ वसतिमेव साधवः प्रतियन्ति सा अभिनैषेधिकी । अभिनैषेधिक्यामेव स्वाध्यायं कृत्वा रात्रिमुषित्वा प्रत्यूषे वसतिमुपगच्छन्ति सा अभिनिषद्येति तामभिनिषद्यामभिनैषेधिकी वाचेतितए इति गन्तुं तत्र नो नैवमेतेषां पारिहारिकाणामपारिहारिकाणां च कल्पते स्थविरानाचार्यादीन् अनापृच्छ्य एकान्त एकान्ते विवक्ते प्रदेशे वसत्यन्तरे वा भिनिषद्यामभिनैषेधिकी वा गन्तुं, उच्छ्वासनिःश्वासव्यतिरेकेण शेष साधुव्यापाराणां समस्तानामपि गुरुपृच्छाधीनत्वात् । तदेवं प्रतिषेधसूत्रमभिधाय सम्प्रति विधिसूत्रमाह- 'कप्पतिण्हं थेरे आपुच्छित्ता' इत्यादि सुगमं । इह पारिहारिका नाम आपन्नपरिहारतपसोऽभिधीयन्ते । तत्र चोदकः प्राह-

[भा.६१९] पुव्वंसि अप्पमत्तो, भिक्खू उववन्नितो भयंतेहिं ।
एक्को व दुवे होज्जा बहुया उ कहं समावन्ना ।।

वृ- पूर्वस्मिन्कल्पनाम्नि अध्ययने भिक्षुरप्रमत्तो भदन्तैः परमकल्याणयोगिभिरुपवर्णितः, ततः कथं परिहारतपः प्रायश्चित्तापत्तिर्यतः पारिहारिका भवेयुः । अपि च एको द्वौ वा पारिहारतप आपद्येयातामेकस्य एकाकिदोषाणां द्वयोरसमाप्तकल्पदोषाणां संभवात् । ये च बहवस्ते च समाप्तकल्पकल्पत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्पररक्षणपरायणाः कथं पारिहारिकत्वं समापन्ना इति, अत्राचार्य आह-

[भा.६२०] चोयग बहुउप्पत्ती जोहाव जहा तहा समणजोहा ।
दव्वच्छलणे जोहा, भावच्छलणे समणजोहा ।।

वृ- हे चोदक परीषहाणामसहनेन श्रोत्रेन्द्रियादिविषयेष्विष्टानिष्टेषु रागद्वेषाभिगमनतो वा परिहारतपः प्रायश्चित्तस्थानापत्त्या बहूनां पारिहारिकाणामुत्पत्तिर्न विरुद्धा । अथवा यथा योधाः सन्नद्धबद्धकवचा अपि रणप्रविष्टाः प्रति पन्थिपुरुषैस्तथाविधं कमप्यवसरमवाप्य देशतः सर्वतो वा च्छल्यन्ते तथा श्रमणयोधा अपि मूलगुणोत्तरगुणेष्वत्यन्तमप्रमत्ततया यतमाना अपि च्छलनामाप्नुवन्ति । सा च च्छलणा द्विधा-द्रव्यतो भावतश्च । द्रव्यतश्छलना खड्गादिभिर्भावतः परीषहोपसर्गाद्यैः । तत्र द्रव्यच्छलने द्रव्यतच्छलन विषया योधा रणे प्रविष्टा भटाः । भावच्छलने भावच्छलनविषया श्रमणयोधाः । सम्प्रति यदुक्तं यथा योधास्तथा श्रमणयोधा इति तत् व्याख्यानयति-

[भा.६२१] आवरिया वि रणमुहे जहा च्छलिज्जंति अप्पमत्ता वि ।
च्छलनावि होइ दुविहा जीयंतकरी य इयरी य ।।

वृ- यथा योधा आवृता अपिसन्नद्धसन्नाहा अपि अप्रमत्ता अपि च रणमुखे प्रविष्टाः प्रतिमटैश्छल्यन्तो सा च च्छलना द्विधा-जीवितान्तकरी इतरा च । तत्र यया जीवितात् व्यपरोप्यते सा जीवितान्तकरी । यया तु परितापनाद्यापद्यते नापद्रावणं सा इतरा-

[भा.६२२] मूलगुण उत्तरगुणे जयमाणा वि हु तहा छलिज्जंति ।
भावच्छलनाए जतिसा वि य देसे य सव्वे य ।।

वृ- तथा यतयो रागादिप्रतिपक्षभावनासन्नहन्या (सन्नाह) सन्नद्धा यथागमं मूलगुणेषूत्तरगुणेषु चात्यप्रमत्ततया यतमाना अपि हु निश्चित्तं भावच्छलनया परीषहोपसर्गादिभिः सन्मार्गच्यावनरूपया च्छल्यन्ते, । सापि च भावच्छलना द्विधा-देशतः सर्वतश्च । तत्र यया तपोऽर्हं प्रायश्चित्तमापद्यते, सा देशतो भावच्छलना, यया मूलमाप्नोति सा सर्वत एवं परिहारियाहरियहोज्ज बहुयतो ते एगतो निसीहीं अमिसिज्जं वा विवेएज्ञा यत्तो रणे प्रविष्टा योधा इव श्रमणयोधा अपि परीषहादिभिश्छल्यन्ते । तत एवमुक्ते न प्रकारेण बहवः पारिहारिका अपरिहारिकाश्च भवेयुस्तदेवं पारिहारिकापारिहारिकबहुत्व-मुपपाद्याधुना सूत्रावयवान् व्याचिख्यासुराह-ते एगं तो इत्यादि ते बहवः पारिहारिका अपरिहारिका वा एकान्तत एकान्ते विविक्ते प्रदेशे प्रत्यासन्ने दूरतरे वा नैषेधिकीममिशय्यां वापि अभिनिषद्यामपि चेतयेयुर्गच्छेयुः, गन्तुमिच्छेयुरित्यर्थः । तत्र का नैषेधिकी का वा । अभिशय्येति व्याख्यानयति-

[भा.६२३] ठाणं निसीहियत्ति य एगट्ठं जत्थ ठाणमेवेगं ।
चेतेंति निसिदिया वा सुत्तत्थ निसीहिया सा उ ।।

[भा.६२४] सज्झायं काऊणं निसीहियातो निसिं चिय उवेंति ।
अभिवसिउं जत्थ निसिं, उवेंति पात्तो तई सेज्ञा ।।

वृ- तिष्ठन्ति स्वाध्यायव्यापृता अस्मिन्निति स्थानं, निषेधेन स्वाध्यायव्यतिरिक्तशेषव्यापार-प्रतिषेधेन निर्वृता नैषेधिकी, । ततः स्थानमिति वा नैषेधिकीति वा एगट्ठमिति एकार्थं, द्वावप्येतौ तुल्यार्थाविति भावः, । व्युत्पत्त्यर्थस्य द्वयोरप्यविशिष्टत्वात् । तत्र यत्र स्थानमेव स्वाध्यायनिमित्तमेकं न तु ऊर्ध्वं स्थानं त्वग्वर्तनस्थानं वा चेतयन्ति निशि रात्रौ दिवा वा सा सूत्रार्थहेतुभूता नैषेधिकी, सूत्रार्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैषेधिकी एतेनास्मिन् या नैषेधिक्युक्ता सा सूत्रार्थप्रायोग्या नैषेधिकी प्रतिपत्तव्या । न तु कालकरणप्रायोग्या नैषेधिकी प्रतिपत्तव्या, । किमुक्तं भवति ? यस्यां नैषेधिक्यां दिवा स्वाध्यायं कृत्वा दिवैव यदि वा दिवा निशि च स्वाध्यायं कृत्वा निश्येव निशायाममश्यं नैषेधिकीतो वसतिमिपयन्ति सा अभिनैषेधिका यस्यां पुनर्नैषेधिक्यां दिवा निशायां वा स्वाध्यायं कृत्वा रात्रिमुषित्वा प्रातर्वसतिमुपयन्ति। तर्ई इति तका अभिशय्या अभिनिषद्येति भावः । अथ स्थविरा आपृष्टा अपि यदा समुत्कलन्ति तदा किं कल्पते न वेत्याशङ्कायामाह-थेरायण्हमित्यादि स्थविरा आचार्यादयः । चशब्दो वाक्यभेदे, ण्हमिति वाक्यालङ्कारे स तेषां पारिहारिकाणामपरिहारिकाणां वा वितरेयुजानीयुरभिनैषेधिकीमभिशय्यां वा गन्तुं एवममुना प्रकारेण ण्हमिति पूर्ववत्कल्पते । अभिशय्यायामभिनैषेधिक्यां वा चेतेत्तए इति गन्तुम् ।

थेराण्हमित्यादि स्थविरा ण्हमिति प्राग्वत् नो नैव तेषां वितरेयुरेवममुना प्रकारेण नो कल्पते एकान्ततो निषद्याम भिनिषद्यामभिनैषेधिकी वा गन्तुं । जेणत्यिदि यः पुनर्ण्हमिति वाक्यालंकृतौ स्थविरैरवितीर्णोऽननुज्ञातः सन् एकान्ततो अभिनिषद्यामभिनैषेधिकी वाचेतेति-गच्छति । ततः से तस्य स्वान्तरास्त्वकृतमन्तरं स्वान्तरं तस्माद्यावन्न मिलति यावद्वा स्वाध्यायभूमेर्नोत्तिष्टति तावत् यत् विचालं तदन्तरं तस्मात् स्वकृतादन्तरात् च्छेदो वा पञ्चरात्रिंदिवादिकः परिहारो वा परिहारतपो वा मासलघुकादिरेषसूत्रार्थः, अधुना निर्युक्तिविस्तरः -

[भा.६२५] निक्कारणंमि गुरुगा कज्जे लहुया अपुच्छणे लहुओ ।
पडसिहम्मि य लहुया गुरुगमणे होंति अनुग्घाया ।।

वृ- यदि निष्कारणे कारणाभावे अभिशय्यामभिनैषेधिकी वा गच्छन्ति ततस्तेषां प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः अथ कार्ये समुत्पन्ने गच्छन्ति, तत्र प्रायश्चित्तं लघुकाश्चवारो लघुमासाः, कार्यमुपरिष्टात् भाष्यकृद्वर्णयिष्यति । यदि पुनः कार्ये समुत्पन्ने अनापृच्छ्य गच्छन्ति, तदा अपृच्छने लघुको मासः आपृच्छायामपि कृतायां यदि स्थविरैः प्रतिषेधे गच्छन्ति । ततो लघुकाश्चत्वारो लघुमासाः। गुरु गमने इत्यादि गुरुराचार्यः स यदि गच्छत्यभिशय्यामभिनैषेधिकी वा ततस्तस्य भवत्यनुद्घाता गुरुकाश्चत्वारो गुरुमासाः । ये पुनर्वसतिपालाः समर्था भिक्षवस्त यदि गच्छन्ति । ततस्तेषामिमे दोषाः -

[भा.६२६] तेनादेसगिलाणे कामण इत्थी नपुंस मुच्छा वा ।
ऊणत्तणेण दोसा, हवंति एए उ वसहीए ।।

वृ- ये वसतपिलास्तैर्वसतेरूनत्वे हीनत्वे एते गाथा पूर्वार्धोक्ता दोषा भवन्ति । तद्यथा-स्तेनाश्चौरास्ते गताः साधवो वसतेरिति ज्ञात्वा बसतावापतेयुः आदेशाः प्राघूर्णकास्ते वा समागच्छेयुस्तेषां च समागतानामविश्रामणादिप्रसक्तिः समर्थसाध्वभावात् । गिलाणत्ति ग्लानो वा तेषामभावे व्याधिपीडितोऽसमाधिमाप्नुयात् । कामणत्ति दाहो वा प्रदीपनकेन वसतेर्भूयात् । तथा स्तोकाः साधवो वसतौ तिष्ठन्तीति स्त्रियो नपुंसका वा कामविह्वलाः समागच्छेयुः । तत्रात्मपरोभयसमुत्था दोषास्तथा मूर्च्छा कस्यापि पित्तादिवशतो भूयात् । तदेवं यतो वसतिपालानामिमे विनिर्गमे दोषास्तस्मात्तैरमिशय्यादिषु न गन्तव्यमित्येष द्वारगाथासंक्षेपार्थः । व्यासार्थं तु भाष्यकृदाह-

[भा.६२७] दुविहाविहारसोही य एसणघातो य जा य परिहानी ।
आएसय विस्सामण परितावणया य एक्कतरे ।।

वृ- स्तेनैरपहारो द्विविधस्तद्यथा-साध्वपहार उपध्यपहारश्च । तस्मिन् द्विविधेऽप्यपहारे शोधिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायश्चित्तं, तद्यथा यद्येकं साधुमपहरन्ति स्तेनास्तदा वसतिपालानां प्रायश्चित्तं मूलं, अथ द्वावपहरन्ति । ततोऽनवस्थाप्यं त्रिप्रभृतीनामपहरणेपाराश्चितं, ।तथा जघन्योपध्यपहारेपञ्चरात्रिंदिवं, मध्यमोपध्यपहारे मासलघु, उत्कृष्टोपध्यपहारे चतुर्गुरुकं, ।तथा एषणाया घातः प्रेरणमेषणाघातः, स च स्यात् । तथाहि भवत्युपधिं पात्रादिकमन्तरेण एषणाघातस्तत एषणा प्रेरणे यत्प्रायश्चित्तं तदापद्यते तेषां वसतिपालानामिति । तथा जायपरिहाणेत्ति या च परिहानि रुपधिमन्तरेण शीतादिबाधितस्य तद्गवेषणप्रयतमानस्य वा सूत्रार्थस्य च भ्रंशस्तन्निमित्तकमपि समापद्यते प्रायश्चित्तं, तत्र सूत्रपौरुष्या अकरणे मासलघु, अर्थपौरुष्या अकरणे मासगुरु अथोपधिगवेषणलग्नदीर्घकालतः सूत्रं नाशयन्ति । ततश्चतुर्लघु अर्थनाशेन चतुर्गुरु, तथा तेषु वसतिपालेषु साधुष्वभिशय्यादिषु गतेषु आदेशानां प्राघूर्णकानां समागतानामध्वपरिश्रान्तानामविश्रामणे या अनागाढा आगाढा वा परितापनोपजायते, तन्निषन्नमपि तेषामापद्यते प्रायश्चित्तं, ।एक्कतरेत्ति तेषु वसतिपालेष्वभिशय्यादिगतेषु यो मुक्त एकतरो वसतिपालः स एको द्वौ वा बहवो वा यद्यागच्छन्ति प्राघूर्णकास्ते सर्वेऽपि नियमतो विश्रमयितव्या इति जिनप्रवचनमनुस्मरन् बहून् प्राघूर्णकान् आगतान् विश्रामयन् यदनागाढमागाढं वा परितापनामाप्नोति तन्निमित्तकमपि समापतति तेषां प्रायश्चित्तं, साम्प्रतमस्या एव गाथायाः पश्चार्द्धं व्याख्यानयति ।

[भा.६२८] आदेसमविस्सामण परितावण ते सऽवच्छलत्तं च ।
गुरुकरणे वि य दोसा, हवंति परितावणादीया ।।

वृ- आदेशानां प्राघूर्णकानामविश्रामणे गाथायांमकारोऽलाक्षणिकः एवमन्यत्रापि द्रष्टव्यम् । दीर्घाध्वपरिश्रमतो यदनागाढमागाढं वा परितापनं तथा तेष्वादेशेषु समागतेषु अवच्छलत्वमवात्सल्य-करणं तन्निष्पन्नं तेषां प्रायश्चित्तं अन्यच्च वसतिपालेष्वभि शय्यादिगतेषु प्राघूर्णकानां समागतानामन्याभावे गुरुः स्वयं वात्सल्यं करोति । गुरुकरणेऽपि च दोषा भवन्ति परितापनादयस्तथाहि-गुरोः स्वयंकरणे सुकुमारतया अनागाढमागाढं वा परितापनं स्यात् । परितापनाद् रोगसमागमे च बहूनां स्वगच्छपरगच्छीयानां सूत्रार्थहानिः श्रावकादीनां धर्मदेशनाश्रवणव्याघातः लोके चावर्णवादो यथा दुर्विनीता एते शिष्या इति गतमादेश द्वारमधुना ग्लानद्वारमाह--

[भा.६२९] सयकरणमकरणे वा गिलाणपरितावणा य दुहतो वि ।
बालोवहीणदाहो तदट्ठमन्नोव आलित्ते ।।

वृ- वसतपिलेष्वभिशय्यादिगतेषु द्विधा तोपि द्वाभ्यामपि प्रकाराभ्यां ग्लानस्य परितापना । तद्यथा-स्वयं करणे अकरणे वा । तथा हि ग्लानो यदि स्वयमुद्वर्तनादिकं करोति तदापि तस्यानागाढादिपरिताप-संभवः । अथ न करोति तथापि परितापनासम्भवस्ततस्तं निमित्तं आपद्यते तेषां प्रायश्चित्तं, अन्यच्च यः पश्चान्मुक्तो वसतिपालः स यदा प्रभूतं ग्लानस्य ग्लानानां वा कर्तव्यं करोति तदा सोऽपि परितापनमनागाढमागाढं वा पद्यते । ततस्तद्धेतुकमपि तेषां प्रायश्चित्तम् । गतं ग्लानद्वारमधुनाज्झा-मणद्वारमाह-बालोवहीण इत्यादि तेषु सर्वेषु वसतिपालेषु बालं वसतिपालं मुक्त्वा अभिशय्यामभि-नैषेधिकी वा गतेषु अग्निकायेन प्रदीप्ते उपाश्रये बालानामुपधीनां च दाहो भवेत् । तत्र यद्येकोऽपि साधुर्म्रियते तदा चरमं पाराश्चितं प्रायश्चित्तम् । अथ न म्रियते किंतु दाहे आगाढमनागाढं वा परितापन-माप्नोति तदा तन्निष्पन्नं प्रायश्चित्तं, अथोपधिर्जघन्यो मध्यम उत्कृष्टो वा दह्यते ततस्त न्निष्पन्नं प्रायश्चित्तदट्ठमन्नोवत्ति तदर्थं बालनिस्तारणार्थं उपधिनिस्तरणार्थं वा अन्यः प्रविशेत् ।तदा कदाचित्सोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालो दह्येत् । अन्यश्च प्रविशन् ततस्तदुभयनिमित्तमापद्यते प्रायश्चित्तं, लोके च महानवर्णवादः गतमग्निदाहद्वारमधुना स्त्रीनपुंसकद्वारमाह-

[भा.६३०]　　　इच्छी नपुंसगावि य उमत्तणतो तिहा भवे दोसा ।
　　　　　　　अभिधाय पित्ततो वा मुच्छा अंतो व बाहिं व ।।

वृ- स्त्रियो नपुंसका वा अवमत्वेन हीनत्वेन स्तोकाः साधवो वसतौ तिष्ठन्ति परिणतव्रताश्चान्यत्र गता वर्तन्ते इति ज्ञात्वा समागच्छेयुस्तदागमने च त्रिधा आत्मपरोभयसमुत्थत्वेन दोषाः स्युः । तथा हि-यत्स्त्र्यादिकमुपलभ्य स्वयं क्षोभमुपयन्ति साधवः, एष आत्मसमुत्थो दोषः । यत्पुनः स्वयमक्षुभ्यतः साधून् बलात् स्त्र्यादिकं क्षोभयति, एष परसमुत्थः । यदा तु स्वयमपि क्षुभ्यन्ति स्त्र्यादिकमपि च क्षोभयति, तदा उभयसमुत्थ इति, मूर्च्छाद्वारमाह-अभिघातेत्यादि वसतेरन्तस्थितस्य वसतिपालस्य कथमपि जराजीर्णत्वादिना पतत्यां वसतौ काष्ठादिभिः शरीरस्योपरि निपतद्भिः बहिर्वा वसतेः स्थितस्य कथमपि वातादिना पात्यमानेन तरुणा तरुशाखाया वा अभिघातेन मूर्च्छा भवेत् । उपलक्षणमेतत् । अनागाढा आगाढा वा परितापना स्यात् । यदि चावसतेरन्तर्बहिर्वा व्यवस्थितस्यपित्ततः पित्तप्रकोपतो मूर्च्छा भवेत् । तत एकाकिनः सतस्तस्य को मूर्च्छामुपशमयेत् । ततस्तन्निष्पन्नप्रायश्चित्तसंभवः प्रभूतश्च जनापवादः, तदेवं पश्चान्मुक्तानां वसतिपालानां दोषा अभिहिताः; सम्प्रति ये अभिशय्यादिगतास्तेषां दोषानभिधित्सुरिदमाह-

[भा.६३१]　　　जत्थ वि य ते वयंती अभिसेज्जं वा निसीहियं वा वि ।
　　　　　　　तत्थ विय इमे दोसा होंति गयाणं मुणेयव्वा ।।

वृ- यत्रापि च विविक्ते प्रदेशे ते निष्कारणगामिनो मिशय्यामभिनैषेधिकी वा व्रजन्ति । तत्रापि तेषां गतानामिमे वक्ष्यमाणा दोषा भवन्ति ज्ञातव्याः । तानेवाभिधित्सुर्द्वारगाथामाह-

[भा.६३२]　　　वीयार तेन आरक्खि तिरिक्खा इत्थीओ नपुंसा य ।
　　　　　　　सविसेसतरा दोषा दप्पगयाणं हवंते ते ।।

वृ- कथमप्यकालगमने विचारे विचारभूमावप्रत्युपेक्षितायां तथा स्तेनाशङ्कायामारक्खित्ति आरक्षकशङ्कायां तथा तिरश्चां चतुष्पदादीनां संभवे तथा स्त्रियो वा दत्तसङ्केतास्तत्र तिष्ठन्ति । नपुंसका वा दत्तसङ्केतास्तत्र तिष्ठन्ति इत्याद्याशङ्कायां एते वक्ष्यमाणाः सविशेषतरा दोषा दर्पगतानां निःकारणगतानां भवन्ति । तदेव सविशेषतरत्वं दोषाणां प्रतिद्वारमभिधित्सुः प्रथमतो विचारद्वारमधिकृत्याह-

[भा.६३३]　　　अप्पडिलेहियदोसा अविदिन्ने वा हवंति उभयंपि ।
　　　　　　　वसही वाघाएण वि य एत्तमनंते य दोसा उ ।।

वृ- यदि नाम ते दर्पगताः कथमप्यचक्षुर्विषयवेलायां गता भवेयुः । ततः संस्तारकोच्चारप्रश्रवणादिषु भूमिष्वप्रत्युपेक्षितासु ये दोषा ओघनिर्युक्तौ सविस्तरमाख्यातास्ते सर्वेऽप्यत्रापि वक्तव्याः, तथा विकालवेलायां गमने यदि कथमपि शय्यातर उच्चारप्रश्रवणयोग्यमवकाशं न वितरेत् ततोऽवितीर्णेऽननुज्ञाते अवकाशे उभयस्मिन् उच्चारप्रश्रवणलक्षणे भवन्ति दोषाः । तथा हि-यदि अननुज्ञातेऽवकाशे उच्चारं प्रश्रवणं वा कुर्वन्ति तदा कदाचित् शय्यातरस्तेषामेव वसत्यादिव्यवच्छेदं कुर्यात् । यदि वा सामान्येन दर्शनस्योपरि विद्वेषतः सर्वेषामपि साधूनामिति अथवा कथमप्यलाक्षणिकतया वसतेरभिशय्यारूपाया व्याघातो भवेत् । ततो रात्रौ मूलवसतिमागच्छतां तेन श्वापदादिभिरात्मविराधना

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अथ नायान्ति वसतिं तदा अभिशय्यायाः समीपे अप्रत्युपेक्षितस्थानाश्रयणतः संयमविराधना ।। गतं विचारद्वारम् अधुना स्तेनद्वारमारक्षकद्वारं च युगपदभिधित्सुराह—

[भा.६३४] सुणाइं गेहाइ उवेंति तेना, आरक्खिया तानि य संचरंति ।
तेनोत्ति एसो पुररक्खितो वा, अन्नोन्नसंका इति वायएज्जा ।।

वृ- शून्यानि गृहाणि स्तेना विवक्षितगृहे प्रवेशनाय वेलां प्रतीक्षमाणा आरक्षकादिभयतो वा उपयन्ति तानि च शून्यानि गृहाणि आरक्षकाः पुररक्षका मा कश्चिदत्र प्रविष्टश्चोरो भूयादिति संचरन्ति प्रविशन्ति; एवमुभयेषां प्रवेशसंभवे अन्योन्याऽऽशङ्कया आरक्षका अभिशय्यायामग्रे प्रविष्टं साधुम्पलभ्य स्तेन एष व्यवतिष्ठते इति, स्तेना अग्रे प्रविष्टास्तत्र प्रविशन्तं साधुं दृष्ट्वा पुररक्षक एष प्रविशतीत्येवंरूपया स्तेना आरक्षका वा अतिपातयेयुः व्यापादयेयुः; । गते स्तेना रक्षकद्वारे । सम्प्रति तिर्यग् द्वारमाह-

[भा.६३५] दुगंच्छिया वा अदुगंच्छिया वा दित्ता अदित्ता तहिं व तिरिक्खा ।
चउप्पया वालसिरीसवा वा, एगो व दोतिणि व तत्थ दोसा ।।

वृ- तत्र अभिशय्यायामभिनैषेधिक्यां वा चतुष्पदास्तिर्यञ्चो द्विधा भवेयु स्तद्यथा-जुगुप्सिता नाम निन्दितास्ते च गर्दभीप्रभृतयः, तद्विपरीता अजुगुप्सिता गोमहिष्यादयः । एकैके द्विविधास्तद्यथा-दृप्ता अदृप्ताश्च । दृप्ता दर्पध्मातास्तद्विपरीता अदृप्तान केवलमित्थं भूताश्चतुष्पदा भवेयुः, किन्तु व्याला भुजङ्गादयः सरीसृपा वा गृहगोधिकादयः । इत्थंभूतेषु च तिर्यक्षु चतुष्पदेषु व्यालसरीसृपेषु एको द्वौ त्रयो वा दोषा भवेयुः । तत्र एक आत्मविराधनादीनां अन्यतमः द्वौ साधुभेदेनात्मविराधना संयमविराधने; त्रय कस्याप्यात्मविराधना, कस्यापि संयमविराधना, कस्याप्युभयविराधनेति; । अत्र चतुर्भङ्गी कस्याप्यात्मविराधना न संयमविराधना १, कस्यापि संयमविराधना नात्मविराधना २ कस्याप्यात्म-विराधनापि संयमविराधनापि ३, कस्यापि नोभयमपि ४ । उपलक्षणमेतत् । जुगुप्सित-तिर्यक्त्व-चतुष्पदसंभवे विरूपाशङ्कासंभवतः प्रवचनोड्डाहोऽपि स्यादिति । गतं तिर्यग्द्वारमधुना स्त्रीनपुंसकद्वारे युगपदभिधित्सुराह-

[भा.६३६] संगारदिन्ना व उवेंति तत्थ ओहा पडिच्छंति विलच्छमाणा ।
इत्थी नपुंसा च करेज्ज दोसे, तस्सेवणठाइ उवेंति जे उ ।।

वृ- सङ्गारः सङ्केतः स दत्तो यैस्ते सङ्गारदत्ताः । निष्ठांतस्य परनिपातः प्राकृतत्वात् । सुखादिदर्शनाद्वा दत्तसङ्केता इत्यर्थः । इत्थंभूताः सन्तस्तत्राभिशय्यादिषु उपयन्ति-गच्छन्ति, । एवं लोकानामाशङ्का भवेत् अथवा तत्र गतेषु जनानामेवमाशङ्का समुपजायेत । यथा स्त्रियो नपुंसका वा ओघा इति तन्मुखनिरीक्ष्यमाणाः प्रतीक्ष्यन्ते ततोऽमी गताः । यदि वा तासां स्त्रीणां नपुंसकानां वा सेवनार्थं ये तत्रोपयन्ति पुरुषास्ते अस्मत्स्त्र्यादिसेवनार्थमेते संयता समागता इति दोषात् अभिघाताऽवर्ण वादादीन् कुर्युः । तदेवं यस्मादकारणे निर्गतानामिमे दोषास्तस्मान्न निष्कारणे गन्तव्यम् । कारणे पुनर्गन्तव्यं तथा चाह—

[भा.६३७] कप्पई उ कारणेहिं अभिसेज्जं गंतुमभिनिसीहिं वा ।
लहुगाओ अ गमनम्मि तानि य कज्जाणिमाइं तु ।।

वृ- कल्पते पुनः कारणैरस्वाध्यायादिलक्षणैर्वक्ष्यमाणैरभिशय्यामभिनैषेधिकी वा प्रागुक्तशब्दार्था गन्तुं यदि पुनर्न गच्छन्ति ततो लघुकाश्चत्वारो लघुमासाः प्रायश्चित्तं तानि पुनः कानि कारणानि इमानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यमाणानि । तान्येव आह—

[भा.६३८] असज्झाइय पाहुणए संसत्ते वुट्ठिकायसुयरहस्से ।
पढन चरमे दुगंतू सेसेसु य होइ अभिसेज्रा ।।

वृ- वसतावस्वाध्यायः प्राघूर्णिका बहवः समागता वसतिश्च सङ्कटा, ततोऽस्वाध्याये प्राघूणकि प्राघूर्णकसमागमे तथा संसक्ते प्रणाजातिभिरुपाश्रये तथा वृष्टिकाये निपतति गत्रत्यां वसतौ तथा श्रुतरहस्ये छेदश्रुतादौ व्याख्यातुमुपक्रान्ते अभिशय्या नैषेधिकी वा गन्तव्या । तत्र पढमे चरमे दुगं तू इति प्रथमे सूत्रक्रमप्रामाण्यादस्वाध्याये चरमे श्रुतरहस्ये द्विकमभिशय्याभिनैषेधिकीलक्षणं यथायोगं गन्तव्यं । शेषेषु च प्राघूर्णकसंसक्तवृष्टिकायरूपेषु कारणेषु भवत्यभिशय्या गन्तव्या । तत्रास्त्यनानुपूर्व्यपि व्याख्याया इति न्यायख्यापनार्थं प्रथमतः श्रुतरहस्यमिति चरमद्वारं विवरीषुरिदमाह—

[भा.६३९] छेयसुयविज्ञमंता पाहुडिअविगीयमहिस दिठंतो ।
इइ दोसा चरमपए पढमपए पोरिसीभंगो ।।

वृ- छेद श्रूतानि प्रकल्पव्यवहारादीनि तानि वसतौ अपरिणामको अतिपरिणामको वा श्रृणुयात् । तथा विद्यामन्त्रांश्च वसतौ कस्यापि दीयमाना अविगीतो निर्द्धर्मा श्रृणुयात्, प्राभृतं वा योनिप्राभृतादिरूपं वसतौ व्याख्यायमानंअविगीतकथमपि श्रृणुयात् । तत् श्रवणे च महान् दोषस्तथा चात्र महिषदृष्टान्तः ''कयाइ जोणिपाहुडे वक्खाणिज्ञमाणे एगेण आयरिआइणा अदिस्समाणेण निद्धमेण सुयं जहा- 'अमुगअमुगदव्वसंजोगे महिसो संमुच्छइ तं सोउं सो उप्पव्वइतो गतो अन्नंमि ठाणे । तत्थ महिसे दव्यसंजोगेण संमुच्छावित्ता सागारियहत्थेसु विकिणइ । तं आयरिया कहमवि जाणित्ता तत्थ आगया उदंतो से पुच्छितो तेन सब्भावो कहितो, । आयरिया भणंति अणं सुंदरसुवणरयणजुत्तादिगेएह, तेन अब्भुवगयं, ततो आयरिएहिं भणियं-अमुगाणि दव्वाणियतिरिक्खसंजोएज्ञासि ततो पभूयाणि सुवणरयणाणि भविस्संति । तेन तहा कयं, समुच्छितो दिठीविसो सप्पो तेन दठो मतो इतिदोसा इत्यादि''। इत्येवमुक्तेन प्रकारेण चरमपदे श्रुतरहस्ये वसतौ व्याख्यायमाने दोषास्तस्मात् श्रुतरहस्य व्याख्यानाय नियमतो अभिशय्या अभिनैषेधिकी वा गन्तव्या । तथा प्रथमपदमस्वाध्यायलक्षणं तत्र दोषः पौरुषीभङ्गः । इयमत्र भावना-अस्वाध्याये वसतावुपजाते स्वाध्यायकरणार्थमवश्यमभिशय्यायामभिनैषेधिक्यां वा गन्तव्यम् । अन्यथा सूत्रपौरुष्या अर्थपौरुष्याश्च भङ्गः, तद्भङ्गे च तन्निष्पन्नप्रायश्चित्तापत्तिः । गतं चरमद्वारमस्वाध्यायद्वारं च । सम्प्रति प्राघूर्णकादिद्वारत्रितयमाह—

[भा.६४०] अभिसंघट्टे हत्थादि घट्टणं जग्गणे अजीन्नादी ।
दोसु य संजमदोसा जग्गण उल्लो वहीया वा ।।

वृ- कदाचिदन्ये तथाविधवसत्यलाभे साधवः सङ्कटायां वसतौ स्थिता भवेयुः प्राघूर्णकाश्च साधवो भूयांसः समागतास्तत्र दिवसे यथा तथा च तिष्ठन्ति । रात्रौ भूमिषु अपूर्यमाणासु यद्यभिशय्यां न व्रजन्ति, तदा तस्मिन्नुपाश्रयेऽतिशयेन संघट्टः परस्परं संघर्षः साधूनां यत्रातिसङ्कटतया सोऽतिसंघट्टः । तस्मिन्नेव स्थितानां परस्परं हस्तादीनां घट्टनं भवेत् । तद्भावे च कलहासमाध्यादिदोषसंभवः । अथैतद्दोषभयादुपविष्टा एव तिष्ठन्ति । ततो जागरणे रात्रौ जाग्रतामजीर्णादिदोषसंभवः, । अजीर्णमाहारस्याजरणं तद्भावे च रोगोत्पत्तिः, । रोगे च चिकित्साया अकरणे असमाधिः, क्रियमाणायां च चिकित्सायां षट्कायव्या-पत्तिरितिगतं प्राघूर्णकद्वारम् । अधुना संसक्तद्वारं वृष्टिकायद्वारं चाह-'दोसु य संजमे' त्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयोः संसक्ते उपाश्रये वृष्टिकाये च निपतति असंयमदोषौ संयविराधनारूपौ दोषौ । तथा हि-संसक्तत्वे दुष्प्रत्येक्षणीया वसतिरिति तत्रावस्थाने स्फुटा संयमविराधना, । तथा वृष्टिकायेऽपि निपतति केषुचित् प्रदेशेषु वसतिर्गलतीति तत्रापि संयमविराधना अप्कायसंयमविराधनासंभवात् । अन्यच्च वृष्टिकाये निपतति उपधिरप्कायेन स्तीम्पते स्तीभितेन चोपधिना शरीरलग्नेन रात्रौ निद्रा नायाति निद्राया अभावे च अजीर्णदोषः । तस्मात् संसक्तायां वसतौ वृष्टिकाये च निपतति नियमतोभि गन्तव्या अभिशय्येति तदेवमुक्तं गन्तव्यकारणं । तथा चाह-

[भा.६४१] दिट्ठं कारणगमनं जइ य गुरुवच्चए तओ गुरुगा ।
ओराल इत्थपेल्लण संका पच्चत्थिया दोसा ।।

वृ- दृष्टं उपलब्धं भगवदुपदेशतः पूर्वसूरिभिः कारणे अस्वाध्यायादिलक्षणे अभिशय्यायां गमनं । तत्र यद्येवं दृष्टे कारणगमने गुरुरभिशय्यामभिनैषेधिकी वा व्रजेत् । ततस्तस्य प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः, । को दोषो गुरुगमने इति चेदत आह-उरालेत्यादि आचार्यः प्राय उदारशरीरो भवेत् । सहाया अपि च कथमपि तस्य स्तोका अभवन् । ततः काश्चन स्त्रियः सहायादीनस्थापयित्वा हृदयादिना प्रेरयेयुः प्रेरणेनाचार्यमुपसर्गयेयुः । अन्यच्च शय्यातरादीनां शङ्का समुपजायते । तथा किं वसतावाचार्यो नोषितः नूनमगारीं प्रतिसेवितुं गत इति यदि वा प्रत्यर्थिकः प्रत्यनीकाः प्रतिवाद्यादयोऽल्पसहायमुपलभ्य विनाशयेयुस्तत एवमाचार्यगमने दोषास्तस्मात्तेन न गन्तव्यमिति, न केवलमाचार्येण न गन्तव्यं । किन्त्वेतैरपि न गन्तव्यम् । के ते एते इत्याह-

[भा.६४२] गुरुकरणे पडियारी, भएणं बलवं करेज्ज जे रक्खं ।
कंदप्पविग्गही वा अचियत्तो ठाणदुट्ठो वा ।।

वृ- गुरोराचायदिः करणे करणविषये ये प्रतिचारिणः प्रतिचारकाः कायिकीमात्रकादिसमर्पका विश्रामकाश्च तैर्न गन्तव्यम् । तेषां गमने गुरोः सीदनात् तथा भयेन पश्चात् वसतावपान्तरालेऽभिशय्यायां वा तस्करादिसमुत्थेन भयेन सर्वैरपि साधुभिर्नगन्तव्यमात्मसंयमविराधनादोषप्रसङ्गात् । तथा यो बलवान् गुर्वादीनां तस्करादिभ्यो रक्षां करोति तेनापि न गन्तव्यम् । तद्गमने गुर्वादीनामपायसम्भवात् । तथा यः कन्दर्पः कन्दर्पशीलो यश्च विग्रही यथा तथा वा राटिकरणशीलः यो वा यत्र गम्यते तत्र शय्यातरादीनां कैश्चिदपि कारणैः पूर्ववैरादिभिरवियत्तोत्ति अप्रीतो यश्चस्थानदुष्टः पुरादिदुष्टः एतैरपि सर्वैर्न गन्तव्यं, प्रवचनोड्डाहात्मविराधनादिदोषप्रसङ्गात् । यदि कथमपि ते गच्छन्ति ततो बलादाचार्यादिभिर्वारयितव्याः इति । अथ कारणे समुत्पन्ने तेषां गच्छतां को नायकः प्रवर्तयितव्यः ? उच्यते—

[भा.६४३] गंतव्वगणावच्छेदपवत्ति थेरे य गीयभिक्खू य ।
एएसिं असतीए अग्गीए मेरकहणं तु ।।

वृ- कारणेऽस्वाध्यायादिलक्षणे समुत्पन्ने सति शेषसाधुभिर्गन्तव्यमभिगन्तव्यमभिशय्यादि तेषां च गच्छतां नायकः प्रवर्त्तिनीयो गणावच्छेदको वक्ष्यमाणस्वरूपः तदभावे प्रवर्त्ती, सोऽपि वक्ष्यमाणस्वरूपः तदभावे स्थविरस्तस्याप्यभावे गीतभिक्षुर्गीतार्थः सामान्यव्रती । एतेषामसति अभावेऽगीतार्थोऽपि माध्यस्थ्यादिगुणयुक्तः प्रवर्तनीयः । केवलं तस्मिन्न गीते अगीतार्थे 'मेरकहणं तु' इति मर्यादया समाचार्याः कथनं यथा साधूनामावश्यके आलोचनायां प्रायश्चित्तं दीयते । नमस्कारपौरुष्यादिकं च प्रत्याख्यानं यत् यस्मै दातव्यमित्येवमादि सर्वं कथ्यते इति भावः । अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंस्वरूपः सोऽगीतार्थो नायकस्थापनीय इत्यत आह-

[भा.६४४] मज्झत्थोऽकंदप्पी जो दोसे लिहइ लेहओ चेव ।
के सु य ते सीएज्ञा दोसेसु ते इमे सुणसु ।।

वृ- मध्यस्थो रागद्वेषरहितः अकन्दर्पी कंदर्प्पोद्दीनपनभाषितादिविकलः । एवंभूतो नायकः स्थापनीयः, । तेन च साधवोऽसमाचारीं समाचरन्तः शिक्षणीयाः । शिष्यमाणाश्च यदि कथमपि ब्रुवतो यथा यदि वयमेवं कुर्मस्ततस्तव किं कस्त्वमित्यादि तदा स लेहओ चेवत्ति लेखक इव सयुक्त लेखक वत्तेषां सर्वेषां साधूनां दोषान् अविस्मरणनिमित्तं मनसि लिखति सम्यग् अवधारयतीत्यर्थः । अथ केषु दोषेषु ते साधवः सीदेयुर्यान् स स्वचेतसि धारयति सूरिराह-तान् दोषानिमान् वक्ष्यमाणान् श्रृणुत । तत्र यदुक्तं 'एएसिं असतीए' इत्यादि तद्वयाख्यानार्थमाह—

[भा.६४५] थेरपवत्ती गीयासतीए मेरं कहंत अगीयत्थे ।
भयगोरवं च जस्स उ करेंति सयमुज्जतो जो य ।।

वृ- स्थविरस्य प्रवर्तिन उपलक्षणमेतत् । गणावच्छेदस्य च तथा गीतस्य गीतार्थस्य भिक्षोरसति अभावे अगीतार्थोऽपि प्रेषणीयः । तस्मिंश्चागीतार्थे प्रेक्ष्यमाणे मेरत्ति मर्यादां सामाचारीं यथोक्तस्वरूपां कथयन्ति । किंविशिष्टः सोऽगीतार्थः प्रेष्य आह-भयगौरवमित्यादि यस्य भयं साधवः कुर्वन्ति यस्य चानुवर्तनागुणतोभयतो गौरवं यथोचितं कुर्वन्ति । यश्च स्वयमात्मना समुद्युक्तोऽप्रमादी सोऽगीतार्थो नायकः प्रवर्तनीयः । किं कारणमिति चेत् ? उच्यते-असमाचारीरूपदोषप्रतिषेधनार्थं । अथ के ते असमाचारीरूपा दोषाः अत आह-

[भा.६४६] पडिलेहणऽसज्झाए आवस्सगदण्डविनयरा इत्थी ।
तेरीच्छ वाणमंतर पेहा नहवीणि कंदप्पे ।।

वृ- प्रतिलेखनायामस्वाध्याये आवश्यके दण्डे, उपलक्षणमेतत्, दण्डकादौ विषये । तथा विनये वंदनकादौ तथा राज्ञि स्त्रियां तिर्यक्षु हस्त्यादिषु वानमन्तरे वानमन्तरप्रतिमायां विपणिषु रथेन गच्छन्त्यां प्रेक्षायां कालग्रहणादौ नहवीणत्ति नखवीणिकायां कन्दर्पे वा समाचारीरूपा दोषाः । एतद्वारगाथासंक्षेपार्थः एतेन यदुक्तं प्रागुक्तानिमान् दोषान् शृणुतेति तद्वयाख्यानमुपक्रान्तमिति द्रष्टव्यं । तत्र प्रतिलेखनद्वारमस्वाध्यायद्वारं च विवरीषुराह-

[भा.६४७] पडिलेहण सज्झाए न करेंति हीनाहियं च विवरीयं ।
सेज्जोवहिसंथारे दंडग उच्चारमादीसु ।।

वृ- प्रतिलेखना स्वाध्यायं वा मूलत एव न कुर्वन्ति, यदि वा हीनमधिकं विपरीतं वा विपर्यस्तक्रमं कुर्वन्ति । तत्र येषु स्थानेषु प्रतिलेखना संभवति तानि स्थानान्युपदर्शयति । शय्योपधिसंस्तारकदंडकोच्चारादिषु । इयमत्र भावना शय्या वसतिस्तस्याः प्रत्युपेक्षणं मूलत एव न कुर्वन्ति । यदिवा हीनमधिकं वा कुर्वन्ति । अथवा यः शय्यायाः प्रत्युपेक्षणाकालस्तस्मिन्न कुर्वन्ति, किन्तु कालातिक्रमेण, एवमुपधेः संस्तारकस्य दण्डकादेश्च भावनीयं । तथा उच्चारादिभूमीं न प्रत्युपेक्षन्ते हीनमधिकं वा यदि वा कालातिक्रमेण प्रत्युपेक्षन्त इति, स्वाध्यायमपि मूलत एव न कुर्वन्ति यदि वा अप्रस्थापिते कुर्वन्ति, अथवा हीनमधिकं वा कालिकं कालतः कुर्वन्ति यदि वा कालिकवेलायामुत्कालिकमुत्कालिकवेलायां कालिकमिति । संप्रत्यावश्यकादिद्वारत्रितयमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.६४८] न करेंती आवस्सं हीनाहियनिविट्ठपाउयनिसन्ना ।
दंडगहणादिविणयं राइणियादीण न करेंति ।।

वृ- आवश्यकं मूलत एव न कुर्वन्ति, यदि वा हीनं अधिकं वा कायोत्सर्गाणां हीनहीनकरणतोऽधिकं वाऽनुप्रेक्षार्थं कायोत्सर्गाणामेव चिरकालकरणतः कुर्वन्ति । यदि वा निषणा उपविष्टाः प्रावृताः शीतादिभयतः कल्पादिप्रावरणप्रावृता निषन्नास्त्वग्वर्तनेन निपतिताः प्रकुर्वन्ति । गतमावश्यकद्वारम् दण्डगहणादित्ति दण्डग्रहादौ दण्डग्रहणं भाण्डमात्रकादीनामुपलक्षणं दण्डकादीनां ग्रहादौ ग्रहणे निक्षेपे च न प्रत्युपेक्षणं, नापि प्रमार्जनं दुःप्रत्युपेक्षितादि वा कुर्वन्ति । गतं दण्डद्वारम् । विनयद्वारमाह-विनयं रत्नाधिकादीनामाचार्यादीनां यथा रत्नाधिकं न कुर्वन्ति गतं विनयद्वारम् । राजादिद्वारकदम्बकमाह-

[भा.६४९] रायं इत्थिं तह अस्समादि वंतरहेय पेहेंति ।
तह नक्खवीणियादी कंदप्पादी व कुव्वंति ।।

वृ- राजानं निर्गच्छन्तं वा स्त्रियं सुरूपामिति विशिष्टाभरणालङ्कृतामागच्छन्तीं वा तथा तिरिक्ख इत्यस्य व्याख्यानम् अश्वादिकम् अश्वं वा हस्तिनं वा राजवाहनमतिप्रभूतगुणाकीर्णं, व्यंतर रथान्वा विभूत्याविपणिमार्गेषु गच्छतः प्रत्यागच्छतो वा प्रेक्षंते, । एतेन राजस्त्रीतिर्यग्वानमन्तरद्वाराणि व्याख्यातानि । तथेत्यनुक्तसमुच्चयार्थः । स चेदमुक्तं समुच्चिनोति कालप्रत्युपेक्षणं न कुर्वन्ति; न वा कालं प्रतिजागरति । गतं प्रेक्षाद्वारं । तथा नखवीणिकादिकं नखैर्वीणावादनं आदिशब्दात् नखानां परस्परं घर्षणमित्यादिपरिग्रहः । तथा कन्दर्पादिकं, कन्दर्पकौकुच्यकौतुकादि कुर्वन्ति ।।

[भा.६५०] एएसु वट्टमाणे अट्ठिय पडिसेहिए इमा मेरा ।
हियए करेइ दोसे गुरूएकहणं स देइ ते सोहिं ।।

वृ- एतेष्वनन्तरोदितेषु दोषेषु वर्तमानान् वारयतीति क्रियाध्याहारः कृतेऽपि वारणे यदि तेन तिष्ठन्ति प्रतिषेधन्ति, यदि वयमेवं कुर्मस्तत किं तव को वा त्वमित्यादि । ततोऽस्थिते प्रतिषेधिते वा नायके इयमनन्तरमुच्यमाना मेरत्ति मर्यादा समाचारी तामेवाह; हृदये तान् दोषान् करोति, कृत्वा च गुरवे कथयति स च गुरुर्ददाति तेषां शोधिं प्रायश्चित्तमिति । संप्रति वक्ष्यमाणार्थसंग्रहाय द्वारगाथामाह-

[भा.६५१] अतिबहुयं पच्छित्तं, अदिने वाहेय रायकन्ना य ।
ठाणासति पाहुणए न उगमनं मासोक्ककरणे ।।

वृ- चोदकवचनं अतिबहुकं प्रायश्चित्तं गुरुमासादि न दातव्यं, तद्दाने व्रतपरिणामस्यापि हानिप्रसक्तेः, । अत्र गुरुवचनं "जो जत्तिएण सुज्झइ" इत्यादि वक्ष्यमाणं, यः पुनरालोचनाप्रदाने प्रायश्चित्तं शल्यं नोद्धरति, तस्मिन्नदत्ते अदत्तालोचने व्याधो दृष्टान्तः । यः पुनराचार्यः शिष्यस्य प्रायश्चित्तस्थानापत्तिं जानन्नपि न शोधिं ददाति, तस्मिन्नदत्ते अदत्तप्रायश्चित्ते गुरौ दृष्टान्तो राजकन्यापदैकदेशे राज-कन्यान्तःपुरपालकः । तथा ठाणा सति इत्यादि सङ्कटायां वसतौ प्राघूर्णकि समागते सति स्थानस्य योग्यभूमिप्रदेशस्य असति भावप्रधानोऽयं निर्देशो अविद्यमानत्वे उत्सर्गतो न तु नैव गमनं, किन्तु यतना वक्ष्यमाणा कार्या, तस्यां च यतनायां कर्तुमशक्यमाणायामभिशय्यादिषु प्रेक्ष्यमाणा यदि केचन कर्करायन्ते यथाऽस्मद्वधाय प्राघूर्णकाः समागता यत् गन्तव्यमस्मिभिराभिशय्यादिषु कर्त्तव्यं वा रात्रौ जागरणमिति, । तदा तेषां कर्करणे प्रायश्चित्तं मासलघुदेयमिति द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाथां विवरीषुः प्रथमतोऽतिबहुकं प्रायश्चित्तमिति व्याख्यानयति-

[भा.६५२] अतिबहुयं वेढिज्जइ भंते माहु दुरुव्वुढतो भवेज्जाहि ।
पच्छित्तेहिं अयंडे, निद्दयदिन्नेहिं भज्जेज्जा ।।

वृ- भदन्त परमकल्याणयोगिन् गुरो यदि प्रभूतं गुरुमासादि प्रायश्चित्तं पदे पदे दीयते, ततः स प्रायश्चित्तैः समन्ततोऽतिशयेन वेष्टयतेऽतिवेष्टितः सन् मा निषेधे हु निश्चितं दुरुद्वेष्टको भूयात् । दुःखेन तस्य प्रायश्चित्तेभ्यः उद्वेष्टनं स्यात् । अतिप्रभूतेषु हि गुरुषु प्रायश्चित्तेषु पदे पदे दीयमानेषु स कदात्मानमुद्वेष्टयिष्यतीति भावः । अपि च अकाण्डे यत्र तत्र वा पदे पदे निर्दयैः सद्भिर्युष्माभिर्दत्तैः प्रायश्चित्तैः स भज्येत भग्नपरिणामो भूयात् । तथा च सति महती हानिस्तस्मात् ।

[भा.६५३] तं दिज्जउ पच्छित्तं, जं तरती सा य कीरउ मेरा ।
जा तीरइ परिहरिउं मोसादि अपच्चउ इहरा ।।

वृ- तत् प्रायश्चित्तं दीयतां यत्तरति शक्नोति कर्तुं सा च क्रियतां च मेरा मर्यादा या परिहर्तुं शक्यते पाठान्तरं वा परिवहिउमिति तत्र या परिवोढुं शक्यते इत्ति व्याख्येयम् । उभयत्राप्ययं भावार्थः । या परिपालयितुं शक्यते इति मोसादि अपच्चउ इहरा इति इतरथा प्रभूते प्रायश्चित्ते दत्ते मृषा दोष उभयोरपि समुपजायते । तत्र गुरोर्मात्राधिकप्रायश्चित्तदानात् । इतरस्य तु भग्नपरिणामतया तथा परिपालनायोगात्। अन्यच्चातिमात्रे प्रायश्चित्ते दत्ते युष्माभिरपि पूर्वमाशातनादोष उद्भावितः । अप्रत्ययश्च शिष्यस्योपजायते यथातिप्रभूतमाचार्याः प्रायश्चित्तं ददति । न चैवं रूपं प्रायश्चित्तं जिनाः प्ररूपितवन्तः, सकलजगज्जन्तुहितैषितया तेषां अतिकर्कशप्रायश्चित्तोपदेशदानायोगात् तस्मात्सर्वमिदं स्वमतिपरिकल्पितमसदिति । एवं चोदकेनोक्ते गुरुराह-

[भा.६५४] जो जत्तिएण सुज्झइ अवराहो तस्स तत्तियं देइ ।
पुव्वमियं परिकहियं घडपडगाइएहिं नाएहिं ।।

वृ- चोदक त्वया सर्वमिदमयुक्तमुच्यते यतो देशकालसंहननाद्यपेक्षया योऽपराधो यावन्मात्रेण प्रायश्चित्तेन शुद्ध्यति तस्यापराधस्य शोधनाय तावन्मात्रमेव सूरिः प्रायश्चित्तं ददाति, नाधिकं नापि हीनं। एतच्च पूर्वमेव घटपटादिभिर्ज्ञातैरुदाहरणैर्जलनिल्लेवण कुडए इत्यादिना ग्रन्थेन परिकथितं । तस्मान्नदोषः। साम्प्रतमदत्तालोचने यो व्याधदृष्टान्त उपन्यस्तस्तं भावयति-

[भा.६५५] कंटकमादिपविट्ठे नोद्धरइ सयं न भोइए कहइ ।
कमढी भूयवणगए आगलणं खोभिया मरणं ।।

वृ- इह किल व्याधा वने संचरन्त उपानहौ पादेषु नोपनह्यन्ति । मा हस्तिन उपानहोः शब्दान् श्रोषुरिति। तत्रैकस्य व्याधस्यान्यदा वने उपानहौ विना परिभ्रमतो द्वयोरपि पादयोः कण्टकादयः प्रविष्टा आदिशब्दात् श्लक्ष्णकिलिञ्चादिपरिग्रहः । तान् प्रविष्टान् कण्टकादीन् स्वयं नोद्धरति । नापि भोजिकायै-निजभार्यायै व्याधः कथयति । ततः स तैः पादतलप्रविष्टैः कण्टकादिभिः पीडितः सन् वनगतो हस्तिना पृष्टतो धावता प्रेर्यमाणो धावन् कमठीभूतः स्थले कमठ इव मन्दगतिरभूत् । ततः प्राप्तो हस्ती प्रत्यासन्नं देशमिति जानन् क्षुब्धः क्षमं गत्वा आगलणमिति वैकल्यं प्राप्तः । ततो मरणमेष गाथार्थः । भावार्थस्त्वयम्-एगो वाहो उवाहंतो विना वनं गतो । तस्स पायतला कंटगाईणं भरिया । ते य कंटगादीयानो सयमुद्धरिया नो विय वाहीए उद्धराविया । अन्नया वने संचरंतो हत्थिणा दिठो । तो तस्स धावंतस्स कण्टगाइया दूरतरमंसे

पविट्ठा ताहे अति दुक्खेण अद्दितो महापायवो इव छिन्नमूलो हत्थिमएण अचेयणभूतो पडितो हत्थिना विनासितो ।।

[भा.६५६] बितिए सयमुद्धरती अनुड्डिए भोइयाए नीहरइ ।
परिमद्दणदंतमलादि पूरणं वनगयपलातो ।।

वृ- अन्यो द्वितीयो व्याध उपानहौ विना वने गतस्तस्य वने संचरन्तः कण्टकादयः पादतले प्रविष्टास्तान् स्वयमुद्धरति ये च स्वयमुद्धर्तुं न शक्तास्तान् अनुद्धृतान् भोजिकया निजभार्यया व्याध्या नीहारयति निष्काशयति । तदनन्तरं तेषां कण्टकादि वेधस्थानानामङ्गुष्ठादिना परिमर्दनं । तदनन्तरं दन्तमलादिना आदिशब्दात्कर्णमलादिपरिग्रहः पूरणं कण्टकादिवेधानां ततोऽन्यदा वनगतः सन् हस्तिना दृष्टोऽपि पलायितो जातो जीवितव्यसुखानामाभागी । एष दृष्टान्तः ।। साम्प्रतं दार्ष्टान्तिकयोजनामाह-

[भा.६५७] वाहत्थाणी साहू वाहिगुरू कंटकादिअवराहा ।
सोही य ओसहाइं पसत्था नाएण वणतो उ ।।

वृ- व्याधस्थानीयाः साधवः । व्याधीस्थानीयो गुरुः । कण्टकादिस्थानीया अपराधा औषधानि दन्तमलादीनि तत् स्थानीया शोधिः । अत्र द्वौ व्याधदृष्टान्तौ । प्रशस्तोऽप्रशस्तश्च । आद्योऽप्रशस्तो द्वितीयः प्रशस्तः । तत्र प्रशस्तेन ज्ञातेन दृष्टान्तेनोपनयः कर्तव्यः । आचार्योऽपि यदि तानुपेक्षते ततः कण्टकादीनामुपेक्षको व्याध इव सोऽपि दुस्तरमापदमाप्नोति । तथा चाह-

[भा.६५८] पडिसेवंत उवेक्खइ नयणं ओवीलए अकुव्वंतो ।
संसारहत्थिहत्थं पावति विवरीयमियरो वि ।।

वृ- इतरोऽपि आचार्योऽपि । तुशब्दोऽपिशब्दार्थः । यः प्रतिसेवमानान् उपेक्षते न तु निषेधति, न वा कुर्वतोऽकुर्वाणान् प्रायश्चित्तमुत्पीडयति, न भूयः प्रायश्चित्तदाने दण्डेन ताडयन् कारयति, स विपरीतमाचार्यपदस्य हि यथोक्तनीत्या परिपालनफलमचिरात्मोक्षगमनं तद्विपरीतं संसार एव हस्तिहस्तं प्राप्नोति । दुस्तरं संसारमापततीति भावः । उपसंहारमाह-

[भा.६५९] आलोयमनालोयण गुणा य दोसायवन्निया एए ।
अयमन्नो दिठंतो सोहिमदिंते य दिंते य ।।

वृ- एते अनन्तरोदिता आलोचनानायां गुणा अनालोचनायां दोषा वर्णिताः । सम्प्रति यः प्रायश्चित्तं ददाति तस्मिन् शोधिमददाने अनाददाने च अयं वक्ष्यमो राजकन्यान्तःपुरपालकरूपोऽन्यो दृष्टान्तस्तमेवाह-

[भा.६६०] निज्जूहादिपलोयणअवरेण पसंग अग्गदारादि ।
धुत्तपलायण निवकहण दंडणं अन्नठवणं च ।।

वृ- एगो कन्नंतेउरपालगो सो गोक्खलएण कंनाओ पलोएंतीओ न वारेइ । ततो ताओ अग्गदारेण निप्पिडिउमाढत्ता । ततो वि न वारेइ । ता ताहे ततो अनिवारिज्ज मानीतो कयाइ धुत्तेहिं समं पलायातो । एवं सव्वमवारणादि केणइ रन्नो कहियं, । ततो रन्ना तस्स सव्वस्स हरणं कयं विणासितो य, अन्नो कन्नं ते उरपालो ठवितो, । अक्षरगमनिका निर्यूहो गवाक्षः । गोखलक इत्यर्थः । आदिशब्दात्तदन्यतथाविधप्रदेश परिग्रहः तेन निर्य्यूहादिना प्रलोकने अवारणं न वारणं कृतवान् । ततोऽग्रद्वारादिष्वपि प्रसङ्गः । अग्रद्वारेऽन्यत्र वा यथास्वेच्छं तासां कन्यानां प्रसङ्गः । ततोऽन्यदा धूर्तैः सह पलायनं, एतस्यापि वृतान्तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृपस्य पुरतः कथनं । ततो राजा तस्य कन्यान्तः पुरपालकस्य दण्डनं, अन्यस्य कन्यान्तः पुरपालकस्य स्थापनं चाकार्षीत् ।

[भा.६६१] निज्जूहगयं दट्टुं बितिओ अन्नो उ वा हरित्ताणं ।
विनयं करेइ तीसे सेसभयं पूयणा रन्ना ।।

वृ- अन्यो द्वितीयः कन्यान्तःपुरपालको निर्यूहगतां गवाक्षगतामेकां कन्यां दृष्ट्वा बाहरित्ताणंति व्याहृत्य आकार्य विनयं शिक्षां तस्याः करोति । ततः शेषाणां कन्यानामुदपादिभयं तेनैकाप्यग्रद्वारादिषु नावतिष्टते । न च धूर्तैरपहरणं । ततः सम्यक् कन्यान्तः पुरपालनं कृतवानिति राज्ञा पूजा कृता । एष दृष्टान्तोऽयमर्थोपनयः ।

[भा.६६२] रया इव तित्थयरा महत्तरगुरू उ साहु कन्नातो ।
आलोयण अवराहा अपसत्थपसत्थगो वणतो ।।

वृ- राजा इव राजस्थानीया तीर्थकरा महत्तरः कन्यान्तःपुरपालकस्तत्स्थानीया गुरवः, साधवः कन्यास्थानीयाः, अवलोकनस्थानीया अपराधाः । अत्राप्रशस्तेन कन्यान्तःपुरपालकेन, प्रशस्तेन चोपनयः कर्तव्यः । तद्यथा-य आचार्यः प्रमादिनः शिष्यान् न वारयति, न च प्रायश्चित्तं ददाति स विनश्यति, । यथा प्रथमः कन्यान्तःपुरपालकः; यस्तु प्रमाद्यतः शिष्यान् वारयति प्रायश्चित्तं च यथापराधं प्रयच्छति । स इह लोके प्रशंसादिपूजां प्राप्नोति, परलोके च सम्यक् शिष्य निस्तरणतो निर्वाणिमचरिदाप्नुयादिति । सम्प्रति यदुक्तं प्राघूर्णकसमागमे संसक्ते उपाश्रये वृष्टिकाये च निपतति अभिशय्यां गन्तव्येति तद्विषयमपवादं क्रमेणाभिदित्सुराह-

[भा.६६३] असज्झाइए असंते ठाणासति पाहुणागमे चेव ।
अन्नत्थ न गंतव्वं गमने गुरुगा उ पुव्वुत्ता ।।

वृ- अस्वाध्यायिके असति अविद्यमाने प्राघूर्णकानामागमे ठाणासत्ति स्थानस्य संस्तारकयोग्यभूमिलक्षणस्य असति अपि शब्दोऽत्र सामर्थ्यादवगम्यते । असत्यपि भावप्रधानोऽयं निर्देश इत्यभावेऽपि अन्यत्राभिशय्यादौ न गन्तव्यं । किन्तु यतना कर्तव्या । यदि पुनर्यतनाकरण-प्रमादितया अन्यत्र गमनं कुर्वन्ति । ततो गमने पूर्वोक्ता गुरुकाश्चत्वारो गुरुमासाः प्रायश्चित्तं ।।

का पुनर्यतनेति यतनामाह-

[भा.६६४] वत्थव्वा वारंवार एण जग्गं तु माय वद्यं तु ।
एमेव य पाहुणए जग्गणगाढं अनुव्वाए ।।

वृ- वास्तव्या वारंवार केन वारेण जाग्रतु इयमत्र भावना-वास्तव्यानां मध्ये यो यावन्मात्रमर्धयामादि जागरितुं शक्नोति स तावन्मात्रं जागर्ति । तदनन्तरं जागरितुमशक्नुवत् अन्यं साधुमुत्थापयति । सोऽपि स्वजागरणवेलातिक्रमेऽन्यमेवं वारेण वारेण जाग्रतु । यदि पुनर्वास्तव्याः समस्तामपि रात्रिं वारेण वारेण जागरितुं न शक्नुवन्ति । ततो यदि गाढं न परिश्रान्ता प्राघूर्णकास्ततः प्राघूर्णके गाढमनुव्वाए इति अपरिश्रान्ते एवमेव वारेण वारेण जागरणं समर्पणीयं मा पुनश्चशब्दः पुनः शब्दार्थे व्रजन्त्वभिशय्यां, यदि पुनर्वास्तव्याः प्राघूर्णकाश्च न वारेण वारेण जागरितुं शक्नुवन्ति तदा शय्या गन्तव्येति ।

[भा.६६५] एमेव संसत्ते देसे अगलंतए य संसव्वत्थ ।
अम्हवहा पाहुणगा उवेति रित्ताउकक्करणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवमेव अनेनैव प्रकारेण संसक्ते उपाश्रये यो देशः प्रदेशोऽसंसक्तः । तस्मिन् संसक्ते देशे तथा वृष्टिकाये निपतति यः प्रदेशो न गलति तस्मिन् प्रदेशे यतना कर्त्तव्या । तद्यथा-संसक्तायां वसतौ येष्ववकाशेषु संसक्तिस्तान् परिहृत्य शेषेष्ववकाशेषु संसक्तिरहितेपु पूर्वप्रकारेण जागरणयतना कर्त्तव्या, । तथा वृष्टिकायेऽपि निपतति येष्ववकाशेषु वसतिर्निलगति तानवकाशान् परिहृत्य शेषेष्व-गलत्स्ववकाशेषु यतना पूर्ववत्कर्त्तव्येति । सव्वत्थत्ति यदि पुनः सर्वत्र संसक्ता सर्वत्र वा गलति तदाभिशय्याया गन्तव्येति । यदुक्तं -मासोउकक्करणे इति तत्र कक्करणं व्याख्यानयति । एते रिक्ताः प्राघूर्णका अस्मद्वधाय उपयन्ति समागच्छन्ति । एवमादिभाषणं कक्करणेत्ति । संप्रति यदवादीत् आचार्येण न गन्तव्यमनापृच्छया वा (साधुभिः) गन्तव्यमिति तद्विषयमपवादमाह—

[भा.६६६] बितिय पयं आयरिए निद्दो से दुरगमनाना पुच्छा ।
पडिसेहे गमनंमि तो तं वसभा बलं नेंति ।।

वृ- द्वितीयपदमपवादमाचार्यविषये क्व सतीत्यत आह-निर्दोषे स्त्र्यादिदोषाणामभावे । यदि वा निर्गता दोषा यस्मात्तत् निर्दोषं क्षेत्रं, तस्मिन् तथा दूरे अभिशय्या ततस्तत्र दूरगमने अनापृच्छा तथा प्रतिषेधितस्य गमने द्वितीयपदमिदं तोत्ति तस्मादेव संज्ञादिस्थानात् परतो यदि वृषभा बलान्नयन्ति तदा सप्रतिषेधितः प्रतिपृच्छामन्तरेणापि गच्छतीति । एष गाथासंक्षेपार्थः । साम्प्रतमेनामेव गाथां विवरीषुः प्रथमत 'आयरिए निद्दोसेइ' इति व्याख्यानयति-

[भा.६६७] जत्थ गणी निव नज्जइ, भद्देसु य जत्थ नत्थि ते दोसा ।
तत्थ वयंतो सुद्धो इयरेवि वयंति जयणाए ।।

वृ- यत्र गणी आचार्यो न ज्ञायते, अपि शब्दात्र च तथाविधोदारशरीरो नापि केनचिदपि सह वादोऽभवत् । यत्र स्वभावत एव भद्रेष्वनुत्कटरागद्वेषेषु लोकेषु प्रागुक्ताः स्त्र्यादिसमुत्था दोषा न सन्ति तत्राभिशय्यामपगिच्छन्नाचार्यः शुद्धः । इतरेऽपि ये अनापृच्छया गच्छन्ति । य एव प्रतिषेधितास्तेऽपि यतनया गच्छन्ति । का यतनेति चेदत आह-

[भा.६६८] वसहीए असज्झाए सन्नादिगतो य पाहुणे दट्ठुं ।
सोउं च असज्झाइं वसहि उवेंते भणइ अणे ।।

वृ- वसतावस्वाध्यायी जातो गुरुवश्च संज्ञाभूम्यादिषु गतास्ततोऽस्वाध्याये यथा स्वयं संज्ञादिगतः संज्ञाभूमिमादिशब्दादन्यद्वा स्थानं प्रयोजनेन गतः सन् प्राघूर्णकान् समागच्छतो दृष्ट्वा नूनमस्माकं वसतिः सङ्कटा प्राघूर्णकाश्च बहवः समागतास्ततो न सर्वेषां संस्तारकयोग्या भूमिरवाप्स्यते इति विचिन्त्य तथा पूर्वं वसतावस्वाध्यायो नाभूत् । संज्ञादिगतेन च तेन श्रुतं यथा जातो वसतावस्वाध्यायस्ततोऽस्वाध्यायं वा श्रुत्वा यावद्गुरूणां प्रष्टुं वसतावागच्छति, तावत् रात्रिः समापतति । दूरे च अभिशय्या रात्रौ च गच्छतामारक्षकादिभयं ततोऽनापृच्छयैव ततः स्थानादभिशय्यां गच्छति । केवलं येऽन्ये साधवो वसतिमुपयन्ति तान् भणति प्रतिपादयति संदिशतीत्यर्थः । किं तदित्याह—

[भा.६६९] दीवेह गुरूण इमं दूरे वसही इमो वियालो य ।
संथारकालकाइय भूमीपेहट्ठ एमेव ।।

वृ- दीपयत प्रकाशयत कथयतेति यावत् गुरूणां यथा दूरे वसतिरभिशय्या अयं च प्रत्यक्षत उपलभ्यमानो विकालः समापतितः । तत एवमेवानापृच्छयैव युष्मान् संस्तारकभूमेः कालभूमीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायिकी संज्ञा । उपलक्षणमेतत् । प्रश्रवणभूमीनां च प्रेक्षार्थमभिशय्यां गत इति । एवमनापृच्छायामपवाद उक्तः । सम्प्रति प्रतिषिद्धेऽपवादमाह-

[भा. ६७०]　　एमेव य पडिसिद्धे सन्नादिगयस्स कंचि पडिपुच्छे ।
तंपिय होढा असमिक्खिऊण पडिसेहितो जम्हा ।।

वृ- कस्यापिसाधो रभिशय्यादिगमने गुरुणा प्रतिषिद्धे संज्ञादिगतस्य कायिक्यादिभूमिगतस्य सत एवमेव अनन्तरोक्तेन प्रकारेण गुरून् प्रति सन्देशकथनं ज्ञातव्यम् । कथमित्याह-कं चि पडिपुच्छेति, कमपि वृषभं प्रतिपृच्छेत् यथा-'न मे किमपि गमनप्रतिषेधकारणमभूत्, केवलमेवमेव गुरुणा प्रतिषिद्धोऽथ च मया स्वाध्यायः कर्तव्यो वसतौ चा स्वाध्यायादिकमुपजातमतः किं करोमि यामि वसतिं, प्रतिपृच्छामि गुरुम्' इति । एवमुक्ते ते वृषभादयोऽभिशय्यां गन्तुकामाः कालस्य स्तोकत्वात् यावत् वसतौ गत्वा गुरून् प्रतिपृच्छय समागच्छन्ति तावत् रात्रिः पततीति तं प्रत्येवमुदीरयंति । तं पि येत्यादि तदपि गुरूणां प्रतिपृच्छनं । 'होढा' इति देशीपदमेतत् दत्तमेव कृतमेवेत्यर्थः । यस्मादसीक्ष्यापर्यालोच्यानाभोगत एवमेवेत्यर्थः । त्वं प्रतिषेधितस्ततो यदत्र किमपि गुरवो वक्ष्यन्ते, तत्र वयं प्रत्यापिष्यामो यथैव न किमपि गमनप्रतिषेधकारणंकृतवान् प्रतिपृच्छार्थं वा गच्छन् अस्माभिर्वारितस्तावत् कालस्याप्राप्यमाणत्वात् । एवमुक्त्वा बलादपि तं वृषभा नयन्ति । सोऽपि च बलान्नीयमानश्चिन्तयति यथा 'नास्ति मम कश्चिद्दोषः किं न गच्छामीति स च तत्र गच्छन् वृषभाश्च येऽन्ये साधवो वसतिमुपयन्ति तेषां सन्देशं प्रयच्छन्ति । अथासमीक्ष्य स प्रतिषिद्ध इति वृषभाः कथं जानन्तीत्यत आह–

[भा. ६७१]　　जाणंति व तं वसभा अहवा वसभाण तेन सब्भावो ।
कहितो न मेत्थि दोसो तोणं वसभा बला नेंति ।।

वृ- जानन्ति स्वयमेव तं वृषभा यथा निर्दोष एषोऽकारणे गुरुणा प्रतिषिद्धः, अस्मत्समक्षमेवास्य प्रायोऽवस्थानात् । अथवा तेन वृषभाणां सद्भावः कथितो यथा न मे कश्चन दोष इति । तत् एतत् ज्ञात्वा गुरुमनापृच्छ्यैव यथोक्तप्रकारेण वृषभा बलान्नयन्ति । योऽपि आचार्यस्य प्रतिचारीपूर्वं प्रतिषिद्धः सोऽपि तत्कर्तव्यं । यदि वृषभैः सम्पादितं भवति, ततो गच्छत्यभिशय्यामिति न कश्चिद्दोषः । सम्प्रत्यभिशय्याया नैषेधिक्याश्च भेदानाह–

[भा. ६७२]　　अभिसेज्ज अभिनिसीहि य एक्केक्का दुविह होइ नायव्वा ।
एगवडाए अंतो, बहिया सम्बद्धऽसम्बद्धा ।।

वृ- या गन्तव्या अभिशय्या अभिनैषेधिकी वा सा एकैका द्विविधा भवति । तद्यथा-साधु वसतेः एगवडाए इति एकवृत्तिपरक्षेपायां अन्तर्बहिश्च । इयमत्र भावना-द्विविधाभिशय्या-एकवसतेरेकवृत्तिपरिक्षेपाया अन्तरपरा बहिरेवं नैषेधिक्यपि द्विविधा भावनीया । भूय एकैकाभिशय्या द्विविधा । तद्यथा-सम्बद्धा असम्बद्धा च । तत्र तस्या अभिशय्याया वसतेश्च एक एव पृष्टवंशः सा सम्बद्धा । यस्याः पुनः पृथक् पृष्टवंशः सा असम्बद्धाः । अथैकवृत्तिपरिक्षेपस्यान्तराभिशय्या द्विविधा अपि यथोक्तप्रकारा घटते । यात्वेकवृत्तिपरिक्षेपस्य बहिः सा नूनमसम्बद्धा स्यात्, तस्याः सुप्रतीतत्वात् । या पुनः सम्बद्धा सा पुनः कथमुपपद्यते ? उच्यते-यस्या अभिशय्याया वृत्तिपरिक्षेपस्य बहिर्भूता या वसतेश्च तल्लग्नाया एकः पृष्टवंशोऽपान्तराले वसतिः सा बहिर्भूतापि सम्बद्धा इति; । नैषेधिकी पुनरन्तर्बहिर्वा नियमात्सम्बद्धैव हस्तशतस्याभ्यन्तरतोऽस्वाध्यायिके समुत्पन्ने स्वाध्यायासंभवात् । तथा चाह-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

[भा.६७३] जा साउ अभिनिसीहि य सा नियमा होइ उ असंबद्धा ।
संबद्धमसंबद्धा अभिसेज्ञा होति नायव्वा ।।

वृ- अत्र येत्येव गतिः सेति यदुक्तं तद्दोषाभावोपक्रमप्रदर्शनार्थमित्यदुष्टं या सा अभिनैषेधिकी । सा नियमाद्भवत्यसम्बद्धा कारणमनन्तरमेवोक्तं या त्वभिशय्या सा सम्बद्धा असम्बद्धा च भवति ज्ञातव्या। अथ कस्यां वेलायां तत्र गन्तव्यं तत्र आह-

[भा.६७४] धरमाणच्चिय सूरे संथारुच्चारकालभूमीतो ।
पडिलेहियणुन्नव्विए वसहेहिं वयंतिमं वेलं ।।

वृ- योऽसावभिशय्यायाः शय्यातरस्तं वृषभा अनुज्ञापयन्ति, यथा स्वाध्यायनिमित्तं वयमत्र वत्स्याम इति । तत एवं वृषभैरनुज्ञापिते शय्यातरे धरमाण एव अनस्तमिते एव सूर्ये तस्याभिशय्यायां संस्तारकोच्चारकालभूमीः प्रत्युपेक्ष्य भूयो वसतावागत्य इमां वेलामिति कालाध्वनोर्व्याप्ताविति सप्तम्यर्थे द्वितीया । अस्यामनन्तरं वक्ष्यमाणायां वेलायां व्रजन्ति । कस्यां वेलायामित्यत आह-

[भा.६७५] आवस्सयं तु काउं निव्वाघाए होति गंतव्वं ।
वाघाएण उ भयणा देसं सव्वं अकाऊणं ।।

वृ- व्याघातस्य स्तेनादिप्रतिबन्धस्याभावो निर्व्याघातं तेन निर्व्याघातेन भवति गन्तव्यं । वसत्तेराचार्यैः सममावश्यकं कृत्वा व्याघातेन पुनर्हेतुभूतेन भजना विकल्पना का भजनेत्यत आह-देशं वा आवश्यकस्याकृत्वा सर्वं वावश्यकमकृत्वा । सम्प्रति यैः कारणैः प्रतिबन्धस्तान्युपदर्शयति-

[भा.६७६] तेना सावय वाला गुम्मिय आरक्खि ठवण पडिनीए ।
इत्थि नपुंसगसंसत्त वासचिक्खल्ल कंटेय ।।

वृ- स्तेनाश्चौरास्ते सन्ध्यासमयेऽन्धकारकलुषिते संचरन्ति । स्वापदानि वा दुष्टानि भूयांसि तदा च दृप्तानि हिण्डन्ते । व्याला वा भुजङ्गमादयो वातादिपानाय भूयांसः संचरन्ति । तथा गुल्मेन समुदायेन संचरन्तीति गौल्मिका आरक्षकाणामप्युपरि स्थायिनो हिण्डिकाः आरक्षकाः पुररक्षकास्ते अकाले हिण्डमानान् गृह्णन्ति । तथा ठवणत्ति, क्वचिद्देशे एवंरूपा स्थापना क्रियते यथा- 'अस्तमिते सूर्ये रथ्यादिषु सर्वथा न संचरणीयम्' इति प्रत्यनीको वा कोऽप्यन्तरायातं विघातकरणार्थं तिष्ठन् वर्तते, स्त्रियो नपुंसका वा कामविह्वलास्तदा उपसर्गयेयुः । संसक्तो वा प्राणिजातिभिरपान्तराले मार्गः । ततोऽन्धकारेणैर्या-पथिकी न शुद्धयति वर्षं वा पतत् संभाव्यते, वा चिक्खल्लोत्ति कर्दमो वा पथि भूयानस्ति । ततो रात्रौ पादलग्नः कर्दमः कथं क्रियते कंटत्ति कण्टका वा मार्गेऽतिबहवस्ते रात्रौ परिहर्तुं न शक्यंते । एतैर्व्याघात-कारणैः समुपस्थितैर्देशतः सर्वतो वावश्यकमकृत्वा गच्छन्ति । तत्र देशतः कथमकृत्वेत्यत आह—

[भा.६७७] थुइमंगलकित्तिकम्मे उस्सग्गे य तिविहकितिकम्मे ।
तत्तो य पडिक्कमणे आलोयणए किर्तिकंमे ।।

वृ- स्तुतिमङ्गलमकृत्वा स्तुतिमङ्गलाकरणे चायं विधिः । आवश्यके समाप्ते द्विस्तुतीउच्चार्य तृतीयां स्तुतिमकृत्वा आभिशय्यां गच्छन्ति । तत्र च गत्वा ऐर्यापथिकी प्रतिक्रम्य तृतीयां स्तुतिं ददाति । अथवा आवश्यके समाप्ते एकां स्तुतिं कृत्वा द्वे स्तुती अभिशय्यां गत्वा पूर्वविधिनोच्चरन्ति । अथवा समाप्ते आवश्यके अभिशय्यां गत्वा तत्रतिस्रस्तुतीर्ददति । अथवा स्तुतिभ्यो यदर्वाक्तन, तत् कृतिकर्म तस्मिन्नकृतेऽभिशय्यां गत्वा तत्रैर्यापथिकीं प्रतिक्रम्य मुखवस्त्रिकां च प्रत्युपेक्ष्य कृतिकर्म कृत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तुतीर्ददति, । काउस्सग्गे य तिविह' त्ति त्रिविधे कायोत्सर्गे क्रमेणाकृते तद्यथा - चरमं कायोत्सर्गमकृत्वा अभिशय्यां गत्वा चरमकायोत्सर्गादिकं कुर्वन्ति, । अथवा द्वौ कायोत्सर्गौ चरमावकृत्वा यदि वा त्रीनपि कायोत्सर्गान् अकृत्वा । अथवा कायोत्सर्गेभ्योऽर्वाक्तनं यत् कृतिकर्म तस्मिन्नकृते । उपलक्षणेतत् । ततोऽप्यर्वाक्तने क्षामणेयदि वा ततोप्यऽर्वाक्तने कृतिकर्म्मणि अकृते, अथवा ततोप्यर्वाक्तने प्रतिक्रमणे अकृते यदि वा ततोप्यर्वाक्तने आलोचने अकृते अथवा ततोऽप्यारात्तने कृतिकर्मणि अकृते अभिशय्यामुपगम्य तत्र तदाद्यावश्यकं कर्तव्यमिति ।।

एवमावश्यकस्य देशतोऽकरणमुक्तमिदानीं सर्वस्याकरणमाह-

[भा.६७८] काउस्सग्गंअकाउं कितिकम्मालोयणं जहन्नेणं ।
गमनम्मी एस विही आगमनम्मी विहिं वोच्छं ।।

वृ- यो दैवसिकातिचारानुपेक्षार्थं प्रथमकायोत्सर्गसमस्तमप्यकृत्वा किमुक्तं भवति ? सर्वमावश्यकमकृत्वाभिशय्यां गच्छन्ति किमेवमेव गच्छन्ति उतास्ति कश्चन विधिरुच्यते । अस्तीति ब्रूमः । तथा चाह- कितिकम्मालोयणं जहनेणंति जघन्येन जघन्यपदे सर्वमावश्यकमकृत्वा सर्वे गुरुभ्यो वन्दनं कृत्वा यश्च सर्वोत्तमो ज्येष्ठः स आलोच्य तदनन्तरमभिशय्यां गत्वा सर्वमावश्यकमहीनं कुर्वन्ति । एषोऽभिशय्यायां गमने विधिरागमने अभिशय्यातः प्रत्यागमने पुनर्योविधिस्तमिदानीं वक्ष्ये ।। प्रतिज्ञातमेव निर्वाहयति-

[भा.६७९] आवस्सगं अकाउं निव्वाघाएण होंति आगमनं ।
वाघायम्मि उ भयणा, देसं सव्वं च काऊणं ।।

वृ- यदि कश्चनापि व्याघातो न भवति, ततो निर्व्याघातेन व्याघाताभावे नावश्यकमकृत्वा अभिशय्यातो वसतावागमनं भवति । आगत्य च गुरुभिः सहावश्यकं कुर्वन्ति, व्याघाते तु भजना का पुनर्भजनेत्यत आह । देशमावश्यकस्य कृत्वा सर्वं वा आवश्यकं कृत्वा, तत्र देशत आवश्यकस्य करणमाह-

[भा.६८०] काउस्सग्गं काउं कितिकम्मालोयणं पडिक्कमणं ।
किइकम्मं तिविहं वा काउस्सग्गं परिणाय ।।

वृ- कायोत्सर्गमाद्यं कृत्वा वसतावागत्य च गुरुभिः सह कुर्वन्ति । अथवा द्वौ कायोत्सर्गौ कृत्वा यदि वा त्रीन् कायोत्सर्गान् कृत्वा अथवा कायोत्सर्गत्रयानन्तरं यत्कृतिकर्म्मतत्कृत्वा, अथवा तदनन्तरमालोचनामपि कृत्वा, यदि वा तत्परं यत्प्रतिक्रमणं तदपि कृत्वा अथवा तदनन्तरं यत्कृतिकर्म द्विभेदं क्षामणादर्वाक्तनं परं चेत्यर्थः । तदपि कृत्वा पाठान्तरं तिविहं वेति मूलकृतिकर्मापेक्षया त्रिविधं वा कृतिकर्मकृत्वा, अथवा कायोत्सर्गं चरमं षण्मासिकं कृत्वा परिज्ञा प्रत्याख्यानंतामपि वा कृत्वा । अत्रायं विधिः । सर्वे साधवश्चरमं कायोत्सर्गं वसतावागत्य गुरुसमीपे वन्दनकं कृत्वा सर्वोत्तमश्च ज्येष्ठ आलोच्य सर्वे प्रत्याख्यानं गृह्णन्ति । अथवा सर्वमावश्यकं कृत्वा एकां च स्तुतिं दत्त्वा शेषे द्वे स्तुती कृत्वा शेषं, गुरु सकाशे कुर्वन्ति ।। तदेवमुक्तं देशत आवश्यकस्य करणमधुना सर्वतः करणमाह-

[भा.६८१] थुतिमंगलं च काउं आगमनं होंति अभिनिसिज्जातो ।
बितियपदे भयणाऊ, गिलाणमादी सु कायव्वा ।।

वृ- अथवा प्रत्याख्यानं, तदनन्तरं स्तुतिं मङ्गलं च स्तुतित्रयाकर्षणरूपं तत्र गत्वा अभिशय्यात्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगमनं भवति । तत्रेयं सामाचारी गुरुसमीपे ज्येष्ट एक आलोचयति । आलोच्य प्रत्याख्यानं गृह्णाति। शेषैः ज्येष्ठस्य पुरतः आलोचनाप्रत्याख्यानं च कृतं वन्दनकं च सर्वे ददति । क्षामणं च; द्वितीयपदे अपवादपदे ग्लानादिषु प्रयोजनेषु भजना कर्तव्या । किमुक्तं भवति ? ग्लानादिकं प्रयोजनमुद्दिश्य वसतौ नागच्छेयुरपीति ग्लानादीन्येव प्रयोजनान्याह-

[भा.६८२] गेलणवास महिया पदुठ अंतेउरे निवे अगनी ।
अहिगरण हत्थि संभम गेलण निवेयणा नवरिं ।।

वृ- ग्लानत्वमेकस्य बहूनां साधूनां तत्राभवत् । ततः सर्वेऽपि माधव स्तत्रव्यापृतीभूता इति न वसतावागमनं । अथवा वर्षं पतितुमारब्धं, मिहिका वा पतितुं लग्रा, यद्वा पउठति प्रद्विष्टः कोऽप्यन्तरा विरूपकरणाय तिष्ठति अन्तःपुरं वा तदानीं निर्गन्तुमारब्धं । तत्र च राज्ञा उद्घोषितं यथा-'परुषेण न केनापि रथ्यासु संचरितव्यम्' । राजा वा तदा निर्गच्छति तत्र हयगजपुरुषादीनां संमर्दः । अग्निकायो वाऽपान्तराले महान् उत्थितः । अधिकरणं वा गृहस्थेन समं कथमपि जातं । बृहद् वृषभास्तदुपशमयितुं लग्राः, हस्तिसंभ्रमो वा जातः । किमुक्तं भवति ? हस्ती कमप्यालानस्तम्भं भङ्क्त्वा शून्यासनः स्वेच्छया तदा परिभ्रमति । एतेषु कारणेषु नागच्छेयुरपि वसतिं, नवरमेतेषु कारणेषु मध्ये ग्लानत्वे विशेषः । यदि ग्लानत्वमागाढमुपजातमेकस्य बहूनां वा तदा गुरूणां निवेदना कर्तव्या समाप्ता प्राक्तनस्यसूत्रस्य निरवशेषा व्याख्या । अथानन्तरमिदं सूत्रम्-

मू. (२०) *परिहार कप्पट्ठिते भिक्खू बहिया थेराणं वेयावडियाए गच्छेज्जा, थेराय से सरेज्ञा, कप्पइ से एगराइयाए पडिमाए, जं णं जं णं दिसिं अन्ने साहम्मिया विहरंति, तं णं तं णं देसं उवलातुं नो से कप्पइ, तत्थ विहारवत्तियं वत्थए, कप्पइ से तत्थ कारणवत्तियं वत्थए, तस्सिं च णं कारणंसि निट्ठियंसि परोवएज्ञा, वसाहि अज्ञो एगरायं वा दुरायं वा एवं से कप्पइ एगरायं वा दुरायं वा वत्थए, नो से कप्पइ एगरायं वा दुरायं वा परं वत्थए जं तत्थ एगरायाओ वा दुरायाओ वा परं वसइ, से संतराए छेदे वा परिहारे वा ।।*

वृ- परिहारकप्पठिते भिक्खू इत्यादि । अथास्य सूत्रस्य कः सम्बन्धः ? उच्यते-

[भा.६८३] परिहारो खलु एगत्तो अदिन्नगं वावि पावपरिहारं ।
सच्चित्तनिग्गमो वा भणिउ इमगंतुदूरेवि ।।

वृ- इह पूर्वपूर्वतरसूत्रेषु परिहार उक्तो न च क्वचिदप्यन्तराले परिहारप्रकरणं व्यवच्छिन्नं ततः प्रकृतः खलु परिहार इति तत्प्रकरणानुरोधादत्र परिहारयभिधीयते यदि वा अनन्तरसूत्रे इदमुक्तं स्थविरैननुज्ञातामभिशय्यामभिनैषेधिकी वा यदि गच्छति ततः प्राप्नोति परिहारमिति । अत्र तु स एव परिहारितमुपगतः प्रतिपाद्यते । अथवान्तरसूत्रे अभिशय्यादिगमनमुक्तं स प्रत्यासन् क्षेत्रनिर्गमः । इदं तु सूत्रं दूरे निगमनमभिधत्ते इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या परिहारस्य कल्पः सामाचारी परिहारकल्पस्तत्रस्थितः परिहारकल्पस्थितः प्रायश्चित्ततपः प्रकारे व्यवस्थित इत्यर्थः भिक्षुर्व्रती बहि- र्न्यत्र नगरादौ स्थविराणामाचार्यादीनां वैयावृत्याय वैयावृत्यकरणाय गच्छेत् स्थविराश्च येषां समीपे तिष्ठन्ति ते स्मरेयुर्यथैष परिहारकल्पस्थितो वर्तते, स्मरद्भिः स्थविरैः स वक्तव्यो यावत्प्रत्यागच्छसि तावन्निक्षिप परिहारतपः । तत्र यदि सामर्थ्यमस्ति ततः परिहारतपः प्रपन्नो गच्छति, । अथवा नास्ति ततो निक्षिपति, निक्षिप्य च स तस्य कल्पते एकरात्रिक्या प्रतिमयाऽत्र प्रतिमाशब्दोऽभिग्रहो वाची ।

एकरात्रिकेणाभिग्रहेण किमुक्तं भवति । यत्रापान्तराले वसामि तत्र गोकुलादौ प्रचुरगोरसादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लाभेऽपि प्रतिबन्धमकुर्वता कारणमन्तरेण मयैकरात्रमेव वस्तव्यं नाधिकमित्येवं रूपेणाभिग्रहेण, जनं जनं दिसिमित्यादि । अत्र द्वितीया सप्तम्यर्थे । यस्यां यस्यांदिशि । नंशब्दो वाक्यालङ्कारे । अन्ये साधर्मिकाः प्रवचनसाधर्मिका वा संविग्नसंभोगिकादयो वक्ष्यमाणास्तिष्ठन्ति । तणं तणं दिशमिति तां तां दिशं णं शब्दो प्राग्वत् । उपलातुं ग्रहीतुमाश्रयितुमित्यर्थः । ला आदाने इति वचनात् । नो से कप्पइ इत्यादिनोनैव से तस्य परिहारकल्पस्थितस्य निक्षिप्तपरिहारतपसो वा कल्पते । तत्रेति गच्छन् यत्र वसति भिक्षां वा करोति । तत्र सुन्दर आहारः, सुन्दर उपधिः, सुन्दर शय्येति, समीचीनो विहार इति विहारप्रत्ययं वस्तुं कप्पइ सेत्यादि कल्पते, से तस्यानन्तरोदितस्य यत्र भिक्षां कृतवान् उषितवान् वा । तत्र कारणप्रत्ययं वक्ष्यमाणसूत्रार्थप्रतिपृच्छादानादिकारणनिमित्तं वस्तुं, तस्सिंचणमित्यादि । येन कारणेनोषितस्तस्मिन् कारणे निष्ठिते परिसमाप्ते यदि ब्रूयात् । अहो आर्यवस एकरात्रं द्विरात्रं वा तत एवं तदुपरोधतः से तस्य कल्पते । एकरात्रं द्विरात्रं वा वस्तुं न पुनः से तस्य कल्पते एकरात्रात् द्विरात्रात् परं वस्तुं, यत्पुनस्तत्रैकरात्रात् द्विरात्राद्वा परं वसति निष्कारणं तस्मात्सान्तरात् स्वकृतादन्तरादपान्तराले निष्कारणवसनरूपात्से तस्य प्रायश्चित्तं च्छेदो वा परिहारतपो वेति एष सूत्रं संक्षेपार्थः । साम्प्रतमेतदेव सूत्रं विवरीषुः प्रथमतो भिक्षुशब्दविषये चालना प्रत्यवस्थाने आह-

[भा.६८४] परिहारिय गहणेणं भिक्खुगहणं तु होइ किं न गयं ।
किं च गिहिणवि भणित्ति गणि आयरियाणपडिसेहो ? ।।

वृ- अथवा पारिहारिकग्रहणेन परिहारकल्पस्थितग्रहणेन भिक्षुग्रहणं किं न भवतीति गतं गतार्थं भवत्येवेति भावः । परिहारकस्य भिक्षुत्वाव्यभिचारात् न खलु पारिहारिकत्वं गृहस्थस्यापि भवति । एतदेव का क्या आह-किं च गिहीणवित्ति किं वा गृहिणामपि गृहस्थानामपि भवति पारिहारिकत्वं येन तद्व्यवच्छेदकरणतो भिक्षुग्रहणं सफलतामश्नुवीत् । नैव भवतीति भावः, । ततो निरर्थकं भिक्षुग्रहणं । अत्राह भण्यते उत्तरं दीयते, गण्याचार्ययोर्गणी गच्छाधिपतिराचार्योऽनुयोगाचार्यस्तयोः । उपलक्षणमेतत्, उपाध्यायस्य च प्रतिषेधो भिक्षुग्रहणेन आचार्योपाध्यायप्रतिषेधार्थं भिक्षुग्रहणमिति भावः । पुनरप्याक्षेपपरिहारावाह-

[भा.६८५] वेयावच्चुज्जमणे गणि आयरियाण किं नु पडिसेहो ।
भिक्खुपरिहारिउ वि हु करेइ किमु आयरियमादी ।।

वृ- वैयावृत्योद्यमेन वैयावृत्यविषयोद्यमकरणे किं नु खलु गण्याचार्ययोर्गच्छाधिपत्यनुयोगाचार्योपाध्यायानां प्रतिषेधः नैवासौ युक्त इतिभावः । यतो भिक्षुरपि शब्दो भिन्नक्रमत्वादन्यत्रोपात्तोऽप्यत्र सम्बध्यते परिहारकः करोति । सङ्घ वैयावृत्यं किमुताचार्यादि न करोति सुतरां तेन कर्तव्यं गुणोत्तमतया विशेषस्तस्यैतत्करणादिकारत्वात् । अत्र सूरिराह-

[भा.६८६] जम्हा आयरियादी निक्खिविऊणं करेइ परिहारं ।
तम्हा आयरियादी वि भिक्खुणो होंति नियमेण ।।

वृ- यस्मादाचार्यादिकः परिहारं परिहारतपः करोति । आचार्यादिपदं निक्षिप्य मुक्त्वा तस्मादाचार्यादयोऽपि भवन्ति नियमेन भिक्षव इति भिक्षुग्रहणेन तेऽपि तदवस्थोपगता गृहीता इति । अथ स्थविराणां वैयावृत्याय गच्छतीत्युक्तं तत्र किं वैयावृत्यं येन हेतुभूतेन स गच्छति तत आह-

[भा.६८७] परिहारिओ उ गच्छे सुत्तत्थ विसारओ सलद्धीओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नेसिं गच्छाणं इमाइं कज्जाइं जायाइं ।।

वृ- यस्मात्स पारिहारिकः सूत्रार्थविशारदः सम्यक् सूत्रार्थ तदुभयकुशलः तथा स लब्धिकोऽनेकलब्धिसम्पन्नस्ततः सूत्रार्थ प्रतिपृच्छाप्रदाननिमित्तं तदान्येषां गच्छादीनां षष्ठी सप्तम्यर्थे प्राकृतत्वादन्येषु गच्छेषु इमानि वक्ष्यमाणानि कार्याणि जातानि । ततः साधनार्थं च गच्छेत् । इदं तु महत् प्रवचनस्य वैयावृत्यं यत्सूत्रार्थप्रदानादि करोति । अथकान्यन्येषु गच्छेषु जातानि कार्याणि यदर्थंस व्रजेत् अत आह-

[भा.६८८] अकिरियजीए पिट्टण संजमबंधेय भत्तमलभंते ।
भत्तपरिणगिलाणे संजमतीए य वादी य ।।

वृ- अक्रियावादी नास्तिकवादी स राजसमक्षं वादं याचते । जीए त्ति जीविते साधूनां प्राणेषु वा राजा केनापि कारणेन प्रद्विष्टः । 'पिट्टण' त्ति पट्टियति वा लकुटादिभिः साधून् । 'संजम' त्ति संयमाद्वाच्यावयति उत्प्रव्राजयतीति भावः । बंधत्ति बध्नाति वा साधून् बन्धे च कृते साधवो राज्ञः सकाशाद्भक्तपानं लभन्ते वा न वा किमुक्तं भवति । बन्धयित्वा स्वयं ददाति वा अथवा वारयति एतेभ्यो हिण्डमानेभ्यः कोऽपि मा भिक्षां दद्यादिति भावभतित्ति दुर्भिक्षे वा समापतिते भक्तमतीव दुर्लभं जातमिति गत्वा स संपादयति, परिणत्ति भक्तप्रत्याख्यानं वा केनापि साधुना कृतं स च परिहारिकः शोभनो निर्यामकः, । गिलाणत्ति ग्लानो वा कोऽप्याचार्यादिकः प्रवचनाधारभूतो जातः स च पारिहारिकः सम्यग् वैद्यकलाकुशलः, । संजमतीतेति संयमातीता उत्प्रव्रजितास्ते राज्ञा कृताः कृत्वा च धृता वर्तन्ते इति तन्मोचनार्थं गच्छति, वादीत्ति नास्तिकवादि व्यतिरिक्तो दर्शनान्तरस्थः कोऽपि वादं याचते । एतेषां कारणानामन्यतरस्मिन्नपि कारणे जाते अन्यगच्छवर्त्तिभिः सङ्घाटकः प्रेषितः । तेन च सङ्घाटकेन आचार्यस्य निवेदितम् । तत आचार्यस्तस्य परिहारिकस्य माहात्म्यमवगच्छन्निदमाह-

[भा.६८९] न वि य समत्थो अन्नो अहियं गच्छामि निक्खिविय भूमिं ।
सरमाणोहिं वि भणियं, आयरिया जाणिया तुज्झं ।।

वृ- परिहारिकं मुक्त्वा नैव अपिशब्दोऽवधारणार्थः अन्यः कोऽपि तं वादिनं निवारयितुं अन्यद्वा प्रयोजनं साधयितुं समर्थः । यदि वा स एव परिहारिको ब्रूते । प्रचण्ड स वादी ना मां मुक्त्वा अन्यः कोऽपि निवारयितुं समर्थः । न वा राजानां पिट्टनादि कारयंतं ततो यदि गुरवोऽनुजानते ततोऽहं गच्छामि एवं स्वयं तन्माहात्म्ये ज्ञातेऽन्येन वा कथिते तैराचार्यैरेष परिहारतपोवहतीतिस्मरद्भिस्तं प्रतिभणितं कर्त्तव्यं, एतत् ब्रूयात् तं प्रतीत्यर्थः । यथा-आर्य ! निक्षिप भूमिं आत्मीयां भूमिकां यावत्प्रत्यागममिह भवति तावत्मुच्यतां परिहारतप इति । एवमुक्ते यदि निक्षिपति ततो निक्षेपं कार्यते । अथ ब्रूते परिहारिको भगवन् शक्नोमि प्रायश्चित्तं वोढुं तदपि च प्रयोजनं कर्तुं तत आचार्यैर्वक्तव्यम् । आयरिणा जाणगा तुज्झमिति तव आचार्याज्ञकाः विमुक्तं भवति ? यत्र त्वं गच्छसि तत्र से आचार्यास्ते तत् ब्रुवते तत् कुर्या इति अत्र यदुक्तं । न त्थि य समत्थो अन्नो अहियं गच्छामित्ति तद्विभावयिषुरिदमाह-

[भा.६९०] जाणंता माहप्पं, कहेंति सो वा सयं परिकहेइ ।
तत्थ सवादी हु मए, वादेसु पराजितो बहुसो ।।

वृ- तस्य परिहारिकस्य माहात्म्यमद्भुतां शक्ति स्वयं जानाना इदं तस्मै कथयन्ति । यथा नान्यः कोऽपि समर्थस्त्वां मुक्त्वा अथवा स एव पारिहारिकः स्वयं गुरुभ्यः परिकथयति । यथा तत्र तस्मिन् गन्तव्ये स्थाने यो वादी वर्तते स मया हु निश्चितं बहुशो अनेकवारं वादेषु अक्रियावादादिषु पराजितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रचण्डश्च स न मां मुक्त्वा अन्येन निवारयितुं शक्यते । नापि राजा पिट्टनादि कारयन्, ततो यदि गुरूणा-मनुज्ञा भवति ततोऽहं गच्छामीति शेषं पूर्वगाथागतमुत्तानमिति न व्याख्यातम् । अत्र चोदक आह-

[भा.६९१] चोएइ कहं तुब्भे परिहारतवं गतं पवनं तु ।
निक्खिविउं पेसेहा चोयग सुण कारेणमिणं तुं ।।

वृ- चोदयति प्रश्नयति परो यथा-कथं यूयं तकं परिहारतपं प्रतिपन्नं परिहारतपो वहन्तं, नक्खिविउमिति परिहारतपो निक्षिप्य निक्षेपं परिहारतपसः कारयित्वा प्रेषयत स हि महातपस्वी दुष्करकारी ततो न युक्तमेतस्य तपो मोचयित्वा प्रेषणमिति । अत्राचार्य आह चोदक भृणु कारणमिदं येन कारणेन स तपो निक्षिप्य प्रक्षते तदेव कारणमाह-

[भा.६९२] तिक्खेसु तिक्खकज्जं सहमाणेसु य कमेण कायव्वं ।
न य नाम न कायव्वं वा उवादाय ।

वृ- तीक्ष्णं नाम यद्गुरुकमतिपाति च । तेषु तीक्ष्णेषु कार्येषु समुत्पन्नेषु य तीक्ष्णकार्यमित्रतरलोपो द्रष्टव्यः । तीक्ष्णतरं कार्यं तत्प्रथमं कर्तव्यं पश्चादितरत् । उक्तं च–

युगपत्समुपेतानां कार्याणां यदतिपाति तत्कार्यं, अतिपातिष्वपि फलं, फलदेष्वपि धर्मसंयुक्तं

'सहमानेसुय' त्ति सहमानं गुरुकमनतिपाति च तेषु सहमानेषु पुनः कार्येषु समुत्पन्नेषु । तद्यथा-देशकालाद्यौचित्येन युज्यते तत्तथाक्रमेण कर्तव्यं न य नाम न कायव्वंति । न च नाम तीक्ष्णतरं कार्यं कृत्वा पश्चात्सहमानकं न कर्तव्यं किन्तु कर्तव्यमेव कायव्वं वा उवादायेति यदि वा द्वयोरतिपातिनोः कार्ययोः समुत्पन्नयोर्गुरुलाधवचिन्तामुपादाय यत् गुरुकं प्रवचनोपकारिसकलसङ्घसाधारणं च तत्कर्तव्यमितरदतिपात्युपेक्षते । यत्र यदुक्तं तीक्ष्णतरं प्रथमतः कृत्वा पश्चात्सहमानकं कर्तव्यं । न च तत्रकर्तव्यमिति तत्र दृष्टान्तो व्रणक्रियाः । तामेवाह-

[भा.६९३] वण किरियाए जो होइ वावडा जरधनुग्गहादीया ।
काउमुवद्दवकिरियं समेंति तो तं वणं विज्जा ।।

वृ- व्रणक्रियायां प्रारब्धायामपान्तराले या भवति व्यापदुपद्रवः का प्यापदित्याह । ज्वरधनु-ग्रहादिका ज्वरो वा समुत्पन्नो धनुग्रहो वा वातविशेषः आदिशब्दात्तदन्येषां गुरुकव्याधि विशेषाणां जीवितान्तकारिणां परिग्रहः । तस्य व्यापन्नक्षणस्य उपद्रवस्य क्रियां कृत्वा ततः पश्चात्तं व्रणं वैद्याः शमयन्ति । एष दृष्टान्तोऽयमर्थोपनयः-

[भा.६९४] जह आरोग्गे पगयं एमेव इमंमि कम्मखवणेण ।
इहरा उ अवच्छल्लं ओहावण तित्थहानी य ।।

वृ- यथा वैद्यक्रियायामारोग्यप्रकृतं येनारोग्यं भवति, तत्प्रथमं क्रियते शेषं पश्चादित्यर्थः एवमेव अनेनैव प्रकारेण अस्मिन्नपि मोक्षानुष्ठाने कर्मक्षपणेन प्रकृतं येनानुष्ठाने कर्मक्षपणमचिराद्भवति, तत्प्रथमतः कर्तव्यमिति भावः । इयमत्र भावना-मोक्षार्थं क्रियमाणायां क्रियायामपान्तराले यदन्तरायमुपजायते, येनाक्रियमाणेन प्रायश्चित्तमुपजायते, तत् प्रथमतः कर्त्तव्यमितरत् पश्चात्तथा यात्रापि परिहारतपस्युह्यमाने अन्तरा सङ्घादिकार्यमुपस्थितम् । ततः परिहारतपो निक्षिप्य तत् क्रियते, अन्यथा प्रायश्चित्तापत्तितः कर्मक्षपणाऽसंभवस्तथा चाह-इतथरा अधिकृतसङ्घादिप्रयोजनाकरणे अवात्सल्यं सङ्घावात्सल्यप्रत्ययं, अपभ्राजनाप्रत्ययं, तीर्थहानिश्च तीर्थहानिप्रत्ययं च प्रायश्चित्तमापद्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति ।।

[भा.६९५] अप्परिहारी गच्छति तस्स असतीए जो उ परिहारी ।
उभयम्मि वि अविरुद्धे आयरहेउं तु तग्गहणं ।।

वृ- अत्रेयं सामाचारी यद्यपरिहारिकः सूत्रार्थसम्पन्नः सलब्धिकश्च तत्कार्यं साधयितुं समर्थः ततः स गच्छति । तस्य तथाभूतस्यापारिहारिकस्यासत्यविद्यमानत्वे यः परिहारी पारिहारिकः स गच्छति एवमुभयस्मिन्नपि अपारिहारिके पारिहारिके च गमने अविरुद्धे तत्सूत्रे तद्‌ग्रहणं तस्यैव पारिहारिकस्य ग्रहणंकृतं तदादरहेतोः सूत्रे द्वितीया पञ्चम्यर्थे आदरख्यापनार्थमित्यर्थः । किमुक्तंभवति ? यदि पारिहारिकोऽपि गच्छति ततः सुतरामपारिहारिकेण गन्तव्यमिति ख्यापनार्थं पारिहारिकग्रहणं न चोभयग्रहणमुपपत्तिमत् पारिहारिकग्रहणेनैवोक्तियुक्तिः उभयग्रहणस्य सिद्धत्वात् । यदि पुनरपारिहारिकग्रहणमेव केवलं स्यात्ततः पारिहारिको न यातीति प्रतिपत्तिः स्यान्न चै तत्समीचीनमतो यथा न्यासः श्रेयानिति सम्प्रति तस्य संस्थितस्य सहायचिन्तां करोति-

[भा.६९६] संविग्गमणुनजुओ, असती अमणुनमीसपंथेणं ।
समणुणेसुं भिक्खं काउं वसएऽमणुणेसु ।।

वृ- स पारिहारिक संविग्नमनोज्ञयुक्तो, असति मनोज्ञे संविग्नाऽमनोज्ञसहायो गच्छेत् । इयमत्र भावना-तस्य पारिहारिकस्य गन्तुं प्रस्थितस्य संविग्नो मनोज्ञश्च सहायो दातव्यः, मनोज्ञः सांभोगिकस्तदभावे संविग्नोऽसांभोगिकः । एवंभूतसहायस्य च यदि सामर्थ्यमस्ति । ततः उत्सर्गतः कल्पते निर्विशमानकस्य सतो गन्तुं, निर्विशमानको नाम परिहारकल्पस्थितः । अथ नास्ति सामर्थ्यं ततः परिहारतपो निक्षिप्य गोकुलादिषु प्रतिबन्धमकुर्वन् गच्छति, । तत्र यदुक्तं- 'जणं जणं दिसा साहम्मिया तणं तणं दिसं उवलित्तए' इति तद्व्याख्यानमाह-मीसपंथेण मिश्रेण साधर्मिका साधर्मिक युक्तेन पथा गन्तव्यम् । अस्यैव व्याख्यानमाह-समणुणेसु इत्यादि स परिहारिकः समनोज्ञेषु संभोगिकेषु भिक्षां कृत्वा मनोज्ञेषु संभोगिकेषु वसति । अत्र चत्वारो भङ्गास्तद्यथा मनोज्ञेषु भिक्षांकृत्वा मनोज्ञेषु वसति एष प्रथमो भङ्गः साक्षादुपात्तः । एतस्यासंभवे सांभोगिकेषु भिक्षां कृत्वा असांभोगिकेषु वसति २ । एतस्याप्यभावे तृतीयः असांभोगिकेषु भिक्षां कृत्वा सांभोगिकेषु वसति ३ । एतस्याप्यसंभवे चतुर्थः असांभोगिकेषु भिक्षां कृत्वा असांभोगिकेषु वसति । एवमेते संविज्ञ सांभोगिकेषु चत्वारो भङ्गा उक्ताः । एवं संविग्ना संविज्ञ सांभोगिकादिषु द्रष्टव्यास्तथा चाह-

[भा.६९७] एमेवय संविग्गे असंविग्गे चेव एत्थ संजोगा ।
पच्छाकड साभिग्गह सावगसंविग्ग पक्खीय ।।

वृ- यथा संविज्ञ सांभोगिकासांभोगिकेषु चतुर्भङ्ग्या भिक्षावसतय उक्ता, एवमेव अनेनैवप्रकारेण संविग्नेऽसंविग्ने वा सांभोगिके भिक्षावसतिविचारे संतोगा वक्तव्याः । एवमेव असंविग्नाः सांभोगिकाः पश्चात्कृतसमिग्रहनिरभिग्रह श्रावकेषु, तेषामप्यसंभवे । संविज्ञपाक्षिकासंविज्ञपाक्षिक श्रावकेषु प्रत्येकं चत्वारः संयोगाः कर्तव्याः । सर्वत्र च पूर्वपूर्वचतुर्भङ्गी चतुर्थभङ्ग उत्तरोत्तर चतुर्भङ्ग्यां प्रथमो भङ्गः । तद्यथा-संविग्नासंविभोगिकेषु भिक्षां कृत्वा संविज्ञासंभोगिकेषु वसति १ । एतस्य भङ्गस्याभावे संविग्नासंभोगिकेषु भिक्षां कृत्वा असंविज्ञासांभोगिकेषु वसति २ । असंविज्ञासांभोगिकेषु भिक्षां कृत्वा संविज्ञासांभोगिकेषु वसति ३ । अस्यासंभवे असंविज्ञासांभोगिकेषु भिक्षां कृत्वा असंविग्नासांभोगिकेषु

वसति ४ । तदेवं संविज्ञासांभोगिक चतुर्भङ्गी भाविता ।।

साम्प्रतमसंविग्रा सांभोगिकपश्चात्कृत साभिग्रहचतुर्भङ्गी भाव्यते, असंविज्ञा सांभोगिकेषु भिक्षां कृत्वा असंविज्ञा सांभोगिकेषु वसति । एष पूर्वचतुर्भङ्ग्याश्चतुर्थो भङ्गः । एतस्याभावे असंविग्रा सांभोगिकेषु भिक्षां कृत्वा पश्चात्कृतसाभिग्रहश्रावकेषु वसति २ । पश्चात् कृतव्रतपर्यायो यैस्ते पश्चात् कृता मुक्तव्रतपर्यायाः पुराणा इत्यर्थः । एतस्यापि भङ्गस्याभावे पश्चात्कृतसाभिग्रहश्रावकेषु भिक्षां कृत्वा असंविज्ञा सांभोगिकेषु वसति ३ । एतदभावे पश्चात्कृतसाभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतसाभिग्रहश्रावकेषु वसति ४ । इदानीं पश्चात्कृतसाभिग्रहनिरभिग्रहश्रावकचतुर्भङ्गी भाव्यते-पश्चात्कृतसाभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतसाभिग्रह श्रावकेषु वसति १ । एष पूर्वचतुर्भङ्ग्याश्चतुर्थो भङ्गः । एतस्याभावे पश्चात्कृतसाभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतनिरभिग्रहश्रावकेषु वसति २ । एतस्याभावे पश्चात्कृतनिरभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतसाभिग्रहश्रावकेषु वसति ३ । एतदभावे पश्चात्कृतनिरभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतनिरभिग्रहश्रावकेषु वसति ४ ।।

सम्प्रति पश्चात्कृतनिरभिग्रहसंविग्रपाक्षिकश्रावकेषु चतुर्भङ्गीभावना पश्चात्कृतनिरभिग्रहश्रावकेषु भिक्षां कृत्वा पश्चात्कृतनिरभिग्रहश्रावकेषु वसति । एष प्राक्तनचतुर्भङ्ग्या श्चतुर्थभङ्गः १ । एतस्याभावे पश्चात्कृतनिरभिग्रहश्रावकेषु भिक्षां कृत्वा संविज्ञपाक्षिकश्रावकेषु वसति २ । एतस्यासंभवे संविज्ञपाक्षिकेषु श्रावकेषु भिक्षां कृत्वा पश्चात्कृतनिरभिग्रहश्रावकेषु वसति ३ । एतस्याप्यसंभवे संविग्रपाक्षिकश्रावकेषु भिक्षां कृत्वा संविग्नपाक्षिकश्रावकेषु वसति ४ । इदानीं संविज्ञपाक्षिकासंविज्ञपाक्षिकश्रावक चतुर्भङ्गी भाव्यते - संविज्ञपाक्षिकश्रावकेषु भिक्षां कृत्वां संविज्ञपाक्षिकश्रावकेषु वसति १ । एष पूर्वचतुर्भङ्ग्याश्चतुर्थो भङ्गः । एतस्याभावे संविज्ञपाक्षिकेषु भिक्षां कृत्वा असंविज्ञपाक्षिकश्रावकेषु वसति २ । एतस्याभावे संविज्ञपाक्षिकश्रावकेषु भिक्षां कृत्वा संविज्ञपाक्षिकश्रावकेषु वसति ३ । अस्याप्यसंभवे संविज्ञपाक्षिकश्रावकेषु भिक्षां कृत्वा असंविज्ञपाक्षिकश्रावकेषु वसति ४ । सम्प्रति यदुक्तं 'नो से कप्पइ विहारवत्तियं वत्थए' इति तत्र विहारं व्याख्यानयन्नाह-

[भा.६९८] आहारोवहिज्झातो, सुंदर सेज्जा वि होइ हु विहारो ।
कारणातो उ वसेज्जा इमे उ ते कारणा होंति ।।

वृ- आहारः खल्वत्र शोभनो लभ्यते । यदि वा उपधिः स्वाध्यायो वा तत्र सुखेन निर्वहति । अथवा सुंदरा शोभना शय्या वसतिरित्येष आहारादि विहारहेतुत्वाद्भवति विहारः । तत्प्रत्ययं न कल्पते वस्तुं कारणतः पुनस्तुशब्दस्य पुनः शब्दार्थत्वात् वसेत् । एतेन कारणवित्तियं वत्थए इति व्याख्यानयति । तानि पुनः कारणानीमानि वक्ष्यमाणानि भवन्ति तान्येवाह-

[भा.६९९] उभतो गेलन्ने वा वास नदी सुत्त अत्थ पुच्छा वा ।
विज्जा निमित्तगहणं करेति आगाढ पन्नावा ।।

वृ- उभयतो द्वाभ्यां प्रकाराभ्यां ग्लान्यं ग्लानत्वं भवेत् । किमुक्तं भवति ? स एव पारिहारिको गच्छन् अपान्तराले ग्लानो जातः, । ततो वसेद्यदिवान्यः कोऽपि साधुरभवत् ग्लानस्तं दृष्ट्वा श्रुत्वा वा तत्परिचरणार्थं तिष्ठेत् । यदि या वर्षं पतति नदी वा पूरेण समागता, सुत्त अत्थ पुच्छा वा इति केचिदाचार्याः सूत्रमर्थं प्रतिपृच्छेयुः । ततः सूत्रार्थप्रतिपृच्छादाननिमित्तं वसेत्, विज्ञेति परवादिनो मुखबन्धकरणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्यापि पार्श्वे विद्या समस्ति, यदि वा मायूरी नकुली इत्यादिकाः कस्यापि विद्याः सन्ति निमित्तं वाऽतिशायि कस्यचित् सकाशेऽस्ति । ततो यावद्विद्याग्रहणं निमित्तग्रहणं वा करोति तावदास्ते । तथा 'आगाढं' ति आगाढयोगप्रविष्टाः केचन साधवः तेषामाचार्यो यदि वा यस्तान् निर्वाहयति वाचना पदानादिना स वा कालगतस्ततो यावत्तान् वाचयति, तावदवतिष्टते । पाणत्ति ईदृशं किमपि शास्त्रमपान्तराले तेन लब्धं यस्मिन्नधीते गाढप्रज्ञावान् भवति । ततः प्रज्ञोऽहं भूयासमिति वसेत् । स मूलादारभ्य कथं व्रजतीत्यत आह-

[भा.७००] वहमाण अवहमाणो संघाडगेण वा असति एगो ।
असती मूलसहाए अन्नेवि सहायए देंति ।।

वृ- परिहारतपो वहन् यदि वाऽवहन् निक्षिप्तपरिहारतपाः, 'संघाडगेनेत्ति' संघाटकेन संघाटसाधुनैकेन सहव्रजेत् । तथा आचार्येण ग्लानादि प्रयोजन व्यापृततया तस्य संघाटसाधुः सहायो न दत्तस्ततोऽसतिसंघाटकसाधावेकाकी व्रजेत् । एकाकिनश्च गच्छतः सतोऽसति मूलसहायेऽविद्यमाने मूलादारभ्य संघाटकसाधवेऽन्येऽपि येषामाचार्याणां मध्येन गच्छति तेऽपि तस्य सहायान् ददति ।

[भा.७०१] मोत्तूण भिक्खवेलं जाणिय कज्जाइं पुव्व भणियाइं ।
अप्पडिबद्धो वच्चइ कालं थामं च आसज्ज ।।

वृ- मुक्त्वा भिक्षावेलां यानि च कार्याणि पूर्वभणितानि उभयो गेलन्ने वा इत्यादि रूपाणि तानि च मुक्त्वा अप्रतिबद्धो गोकुलादिषु प्रचुरगोरससर्पिरादिलाभेऽपि प्रतिबन्धमकुर्वन् कालं विहारोचितं स्थामं च प्राणमात्मीयं गमनविषयमासाद्य विहारक्रमकालमौचित्येन स्वशक्त्योचित्येन चेत्यर्थो व्रजेत् ।।

[भा.७०२] गंतूण य सो तत्थ य, पुव्विं संगिण्हए ततो परिसं ।
संगिण्हित्ता परिसं करेइवादं समं तेनं ।।

वृ- यस्मिन् स्थाने प्रयोजनं तत्रसोऽधिकृतः परिहारकल्पस्थितो निक्षिप्तपरिहारतपो वा गत्वा पूर्वमेव संगृह्णाति आत्मीकरोति परिषदं, संगृह्य च परिषदं पटहेन घोषयति । यस्य वादं कर्तुं शक्तिरस्ति स तदभिकांक्षी सत्वरं समागच्छतु । एवं च घोषणायां कारितायां तेन समं वादं करोति कथमित्याह-

[भा.७०३] अबंभचारि एसो किंन्नाहिंति कोठ एस उवगरणं ।
वेसित्थीए पराजितो उन्निव्विसय परूवणासमए ।।

वृ- वादात्पूर्वमेव निमित्तमुपयुज्य तस्य स्वरूपमवगच्छति, । ततस्तस्मिन्ननागते इदं ब्रूते-एष वाद्यब्रह्मणोऽपि दोषान्न जानाति । अतएषोऽब्रह्मचारी अब्रह्मप्रतिसेवीपषुवदब्रह्मणोऽपिदोषान्नजानन् किंकथमन्यत् ज्ञास्यति, एवमुक्ते सभ्याः प्रेक्षका ब्रूयुः कथमवसितमेषोऽब्रह्मचारीति ? स प्राह-गच्छत प्रेक्षध्वं यूयं यत्रासाववस्थितः तस्मिन् कोष्टके आश्रयविशेषेऽधिकरणं खट्‌वादि अमुकप्रदेशे संगोपितमस्तीति । तथा अमुकाया वेश्यया स्त्रिया सममेष अमुकदिवसे द्यूतेन रममाणः पराजितः तत एतस्य वस्त्रंग्रहणकंगृहीतमेवमादिभिः । चिह्नैरवगच्छत । यथैषोऽब्रह्मचारीति ते गताः सर्वसंवदितं कथितं राज्ञः, निव्विसय परूवणा इत्यादि पश्चात् व्याख्यास्यते । तदेवं निमित्ताभोगबलवतो यत्कर्तव्यं तदुक्तम्। साम्प्रतमतिशयविशेषमधिकृत्याह-

[भा.७०४] जो पुना अतिशयनाणी सो भणती एस भिन्नचित्तोत्ति ।
कोणेण समं वादो दट्ठुंपि न जुज्जए एस ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यः पुनरतिशयज्ञानी अवधिज्ञानादिकलितः स च बहुतरं तस्य दुःशीलत्वमवगम्य सर्वमुच्चैर्निःशङ्कितं भणति । यथैष भिन्नव्रत इति ततः कोऽनेन सममस्कां वादो य एष द्रष्टुमपि न युज्यते इति । अथ केन समं युज्यते वादः ? उच्यते- आर्यत्वादिगुणोपेतेन तथा चोक्तम्-

अज्जेण भव्वेण वियाणएण धम्मपत्तिणेण अलीय भीरुणा ।
सीलकुलायारसमत्तिएण तेनं समं वाय समायरेज्जा ।।

आर्य आर्यकर्मकारी अजुगुप्सितकर्मकारीत्यर्थः तेन, भव्योऽनेकगुणसंभावनीयः । विज्ञो वादाभिज्ञः धर्मप्रतिज्ञो धर्मकरणाभ्युपगमपरः, अलीकभीरुः सत्यवादी । तथा शीलाचारसमन्वितः शीलदोषरहित इति भावः । कुलाचारसमन्वितः कुलदोषरहितः तेन समं वादं समाचरेत् । तत ईदृशेन समं वादस्तीर्थकरैरनुज्ञातो नान्यादृशेनेति । अथ स शून्यवादी भवेत् न दर्शनी, ततः स्वशक्तिबलेन यं यं हेतुमुच्चरति स स प्रत्युच्चार्यासिद्धत्वविरुद्धत्वानैकान्तिकत्वदोषैर्दूषयितव्यः । प्रतिज्ञादिकमपि दूषयितव्यम् । अथ कदाचित्तेनास्मदीय एव सिद्धान्तो जगृहे यथा द्वौ जीवाजीवलक्षणौ राशी जगतीतिममप्रतिज्ञेति अत्र पूर्वगाथा खंडस्यावकाशः पराजितोऽनिविसयं परूवणासमए इति तेन पारिहारिकेन त्रीन् राशीन् प्रस्थापयित्वा वादे पराजेतव्यः । एतच्च निदर्शनमात्रं, अन्यथापि सिद्धान्तोत्तीर्णमुच्चैर्भाषित्वा पराजेतव्यः । पराजितश्च स यदि भवेत् राज्ञा च निर्विषय आदिष्टस्ततः पश्चात् सकलपर्षत्समक्षं स्वसमये स्वसमयविषया प्ररूपणा कर्तव्या कथमित्याह-

[भा.७०५]　　परिभूयमतिं एयस्स एयदुत्तं न एसणे समतो ।
समएण विनिग्गहिए गज्जइ वसभोव्व परिसाए ।।

वृ- यदुक्तं मया त्रयो राशयो जीवोऽजीवो नोजीव इत्यादि न एषोऽस्माकं समयः; किन्त्वेतस्य वादिनो मतिं परिभवितुमेतदुक्तं यदि पुनः स्वसमयेन परो विनिगृहीतः स्यात्ततस्तस्मिन्विनि गृहीते वृषभ इव प्रतिवृषभं निर्जित्य पर्षदि पर्षन्मध्ये गर्जति, गर्जनविशेषतः स्वसमयप्ररूपणां कुरुते । तदेवमक्रिया-वादीति गतम् । सम्प्रति जीव इति द्वारव्याख्यानार्थमाह-

[भा.७०६]　　अनुमानेउं रायं सणयग गिण्हमाणविज्जादी ।
पच्छाकडे चरित्ते जहा तहानेव सुद्धो उ ।।

वृ- यदि राजा ब्रूते मया सहवादो दीयतामिति, तदा राजानमनुमानयेत् अनुकुलवचसा प्रतिबोधयेत् यथा राजा पृथिवीपतिस्त्वच्छत्रच्छायाश्रिताः प्रजाः सर्वे च दर्शनिनस्ततः कथं राज्ञा सह विवादः । अत्रार्थे चेदमुक्तं पठेत् किं तदित्याह-

[भा.७०७]　　अत्थवतिणा निवतिणा पक्खवता बलवया पयंडेणं ।
गुरुणा नीएण तवस्सिणा य सह वज्जए वादं ।।

वृ- अर्थपतिना धनपतिना नृपतिना राज्ञा पक्षवता नृपवर्गीयपक्षसमन्वितेन तथा बलवता विद्यामन्त्रचूर्णादिबलोपेतेन प्रचण्डेन तीव्ररोषेण तथा गुरुणा विद्यादायिना धर्मप्रदायिना च तथा नीचेन नीचजातीयेन तथा तपस्विना विकृष्टतपः कारिणा च सह वर्जयेत् वादमिति, । एवमनुमानितोऽपि यदा न तिष्ठति तदा ये राज्ञः सज्ञातिकाः समानज्ञातिकाः स्वजना इत्यर्थः तैरनुमानयेत् । तैरपि प्रतिबोध्यमानो यदि न तिष्ठति, तदा विद्यादिना गृह्यते विद्यादिनावश्यं कुर्यात् । आदिशब्दात् मन्त्रेण चूर्णयोगैर्वावश्यं कुर्यादिति परिग्रहः । विद्यादिनाप्यगृह्यमाणे चारित्रे चारित्रविषये पश्चात् कृतो भूयात् स्वलिङ्गं परित्यज्य

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

गृहलिङ्गं च गृहीत्वा तथा कर्तव्यं यथा नैव स राजा भवति । एतदपि स कुर्वाणः शुद्ध एव प्रवचनरक्षार्थं तस्य प्रवृत्तेः यथा च स राजा उत्पाटनीयस्तथा तद्विषयं मत्कोटकोच्छेदिचाणक्यप्रयुक्तनन्दसक्त-चौरसमूलघाति नलदामकुविन्ददृष्टान्तमुपदर्शयति ।

[भा.७०८] नंदे भोइय खन्ना आरक्खियघडण गेरु नलदामे ।
मुइंग गेह डहणा ठवणा भत्तेसुकत्तसिरा ।।

वृ- नन्दे चाणक्येनोत्पाटिते चन्द्रगुप्ते च राज्ये संस्थापिते नन्दसत्का ये भोजिकास्ते चाणक्येन 'खन्ना' इति देशीपदमेतत्, सर्वात्मना लूषितास्ततस्ते अजीवन्तश्चन्द्रगुप्तारक्षकैः सह घटनं कृतवन्तः । कृत्वा च क्षात्रखननादिना नगरमुपद्रवन्ति । येऽप्यन्ये आरक्षिकाः स्थाप्यन्ते तानपि ते सम्वलयित्वा तथैव नगरोपद्रवं कुरुते । ततश्चाणक्येन चिन्तयित्वा गेरुकवेषेण 'मुईग' त्ति देशीपदं मत्कोटकवाचकं मत्कोटकगेह दहने प्रवृत्तं नलदामनामानं कुविंदं दष्ट्वा तस्मिन्नारक्षकपदस्य स्थापना कृता तेन च नन्दसत्कभोजिकानां समस्तानामपि सपुत्राणां भक्ते-भक्त प्रदान वेलायां शिरांसि लूनानि । एष गाथा संक्षेपार्थो भावार्थः कथानकादवसेयं । तच्चेदम्- नंदे निच्छूढे रज्जे परिठ्ठविते चंद्रगुत्ते नंदस्स जे भोइया ते चाणक्केणं लूसिया । ताहे ते अजीवमाणा चंद्रगुत्तारक्खिएहिं समं संवलिता खत्त खननादीहिं नगरं उवद्दधंति, जेवि अन्ने आरक्खिया ठविज्जंति तेवि संवलंति ताहे चाणक्केण चिंतियं, को लभिज्जा चोरग्गहो जो न संवलिज्जा जो य स मूले चोरे उप्पाडेइ ताहे चाणक्को परिवायगवेसं काऊण नगरबाहिरियाए हिंडति। हिंडमाणेण दिट्ठो नलदामकुविन्दो तंतुवाय सालाट्ठितो तस्सि वेलाए नलदाम कोलियस्स पुत्तो रममाणो मक्कोड एण खइतो रोइंतो पिउस्सगसल्लीणो कहियं मक्कोडएण अहं खवितो, नलदामेन भणितो दंसेहिं जत्थोगासे खदितो सि, दंसितो सो उयासो ततो तेन नलदामेण जेबिलातो निग्गया दिट्ठा मक्कोडया ते मारिया । ततो बिलं खणित्ता जे विलस्संतो अंडयादिट्ठा तेसु तणाणि पक्खिवित्ता पलीवित्ता अंड्या वि दड्ढा चाणक्केण सो पुच्छितो 'किं कारणं खणेत्ता अंतो विलस्स पलीवियं ? नलदामो भणति-एए अंडया निप्फन्ना खाइस्संति । ततो चाणक्केण चिंतियं । एस चोरग्गाहो कतो संतोसमत्थो मुइंगपरिदाहव्वचोरा उच्छेदइउं । ततो सो चोरग्गाहो ठवितो ताहे केइ नंदपक्खिया चोरा नलदामं उवेंति सुबहुं चोरभागं दाहामो मा रक्खेह । नलदामेण भणियं-एवं होउति इमं च भणियं । अन्नेवि एवमुपलभेह ते सव्वे पत्तेज्जावेत्ता-ममसकासमाणेहिं तेहिं तहत्ति कयं सव्वे समाणिया नलदामेण अन्नया तेन नलदामेण तेसिं चोराणं विपुलं भत्तं सज्जियं । जाहे सव्वे, सपुत्ता आगया, । ताहे सव्वेसिं सपुत्ताणं सिराणि छिन्नाणि; । तदेवं यथा चाणिक्येन नन्द उत्पाटितो यथा नलदाम्ना मत्कोटकाश्चोराश्च समूला उच्छेदितास्तथा प्रवचनप्रद्विष्टं राजानं समूलमुत्पाटयेत् । तत्र उत्पाटयति, य च तस्य साहाय्यं कुर्वते, ये च तटस्थिता अनुमोदन्ते, ते सर्वे शुद्धाः प्रवचनोपघातरक्षणे प्रवृत्तत्वात् । न केवलं शुद्धमात्रं किन्त्वचिरान्मोक्षगमनं तथा चात्र दृष्टान्तः प्रवचनोपघातरक्षको विष्णुकुमार इति ।

[भा.७०९] समतीतंमिउ कज्जे परे वयं तंसि एगदुविहं वा ।
संवासो न निसिद्धो तेन परं च्छेयपरिहारो ।।

वृ- समतीते पुनः कार्ये यदि परो वदति, एकरात्रं द्विरात्रंवासंवासः क्रियतामिति एवं परे वदति एकरात्रं द्विरात्रं त्रिरात्रं वासंवासो ननिषिद्धः । तथा संवासेऽपि न किमपि प्रायश्चित्तमिति भावः । ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विरात्रात्रिरात्राद्वा परं यदि वसति, ततस्तस्य प्रायश्चित्तं च्छेदः परिहारो वा; यदि पुनः सूत्रार्थ प्रतिपृच्छादानादिलक्षणं कारणं भवेत्, तर्हि ततः परमपि वसेत् यावत्प्रयोजनपरिसमाप्तिस्तथा चाह-

[भा.७१०] सुत्तत्थ पाडिपुच्छं, करेंति साहूउ तस्समीवंमि ।
आगाढंभिव जोगे, तेसिं गुरुहोज्ज कालगतो ।।

वृ- सूत्रार्थप्रतिपृच्छां कुर्वन्ति तस्य समीपं साधवः यदि वा आगाढे योगे व्यवस्थितानां तेषां साधूनां गुरुरुपलक्षणमेतत्, यो वा वाचनाप्रदानेन तेषां निस्तारकोभवति सोऽपि कालगतः ततः स तान् सूत्रार्थप्रदानादिना निर्वाहयति । ततो यावत्सूत्रार्थ प्रतिपृच्छा यावच्च तेषामागाढ योगानां परिसमाप्तिस्तावदवतिष्ठते । ततः परं तु नेति । अथ सूत्रे सेसंतरा च्छेदे वा परिहारे वा इत्युक्तं तत्र परिहाराच्छेदो गरीयान् । प्रथमं च लघु वक्तव्यं, पश्चात् गुरु । ततः सेसंतरापरिहारे वा च्छेदे वा इति वक्तव्ये किमर्थं प्रथमत श्छेदग्रहणं अत आह—

[भा.७११] बंधानु लोमयाए उक्कमकरणं तु होति सुत्तस्स ।
आगाढंमिय कज्जे दप्पेणवि ते भवेच्छेदो ।।

वृ- एवं रूपो हि पाठो ललितपदविन्यासतस्तो बन्धानुलोमतया, तथा अगाढे प्रयोजने समुपस्थिते यदि कथमपि दर्पण स न गच्छति तस्मिन् दर्पेण स्थिते च्छेद एव प्रायश्चित्तं तस्य भवतिनपरिहारतप इति एतदर्थं च सूत्रस्याप्युत्क्रमकरणमिति ।तत्र यदि प्रद्विष्टं राजानं नसमूलमुत्पाटयितुमीशः तर्हि स लब्धिकः समस्तं सङ्घं निस्तारयेत् । अथ नसमस्तं सङ्घं निस्तारयितुमीष्टेत्, ततइमान् पञ्च निस्तारयेत् । तानेवाह-

[भा.७१२] आयरिए अभिसेए भिक्खु खुड्डे तहेव थेरे य ।
गहणं तेसिं इणमो संजोगगमं च वोच्छामि ।।

वृ- आचार्यो गच्छाधिपतिः, अभिषेकः सूत्रार्थतदुभयोपेतः आचार्यपदस्थापनार्हः, भिक्षुः प्रतीतः, क्षुल्लको बालः, स्थविरो वृद्धः । एतेषां पञ्चानामपि ग्रहणमिदं वक्ष्यमाणं संयोगगमन. संयोगतो गमः प्रकारो यस्य तत्तथा वक्ष्यामि, प्रतिज्ञातमेव निर्वाहयति-

[भा.७१३] तरुणो निप्फन्ने परिवारे लद्धिजुत्ते तहेव अब्भासे ।
अभिसेयंमि य चउरो सेसाणं पंच चेव गमा ।।

वृ- यदि शक्तिरस्ति ततः पञ्चापि आचार्यादीन् युगपन्निस्तारयेत् । अथ न शक्तिस्ततः स्थविरजर्वान् चतुरस्तत्राप्यशक्तौ क्षुल्लकस्थविरवर्जान्त्रीन् तत्राप्यसामर्थ्ये आचार्यमेकं । सोऽप्येकः स्थविरो यदि वर्तते अपरस्तरुणस्तर्हि तयोस्थविरतरुणयोर्मध्ये तरुणो निस्तारणीयः ।द्वयोस्तरुणयोरतरुणयोर्वा मध्ये निष्पन्नः सम्यक् सूत्रार्थकुशलः, द्वयोरनिष्पन्नयोर्वा सपरिवारः, द्वयोः सपरिवारयोरपरिवारयोर्वा मध्येलब्धियुक्तः द्वयोर्लब्धियुक्तयोर लब्धियुक्तयोर्वा अभ्यासे समीपे स्थितः । अत्र सम्प्रदायः । द्वयोरभ्यासे स्थितयोर्यो नंष्टुमशक्तः स निस्तारणीयः । एते पञ्चगमा आचार्ये भवन्ति, अभिषेकस्तु नियमान्निष्पन्न एव भवति । अन्यथा तत्वत आचार्यपदस्थापनायोग्यत्वानुपपत्तेः ततस्तस्मिन्नभिषेके निष्पन्ना निष्पन्नगमाभावात्, शेषास्तु चत्वारो गमास्तद्यथा-स्थविरतरुणगोर्मध्ये तरुणाः, द्वयोस्तरुणयोरतरुणयोर्वा सपरिवारः द्वयोः सपरिवारयोरपरिवारयोर्वा लब्धियुक्तः द्वयोर्लब्धियुक्त-योरलब्धियुक्तयोर्वाभ्यासे स्थितः; इति शेषाणां भिक्षुक्षुल्लकस्थविराणां पञ्चेव गमा भवन्ति । ते च यथानन्तरमाचार्ये भावितास्तथाभावनीयाः । तथा चैतदेव व्याचिख्यासुर्गाथाद्वयमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७१४] तरुणे बहुपरिवारे स लद्धिजुत्ते तहेव अब्भासे ।
एते व सहस्स गमा निप्फन्नो जेन सो नियमा ।।

[भा.७१५] तरुणे निप्फन्ने वा बहु परिवारे स लद्धि अब्भासे ।
भिक्खु खुड्डा थेराण होंति एए गमा पंच ।।

वृ- गाथाद्वयमपीदं व्याख्यातार्थं, नवरं वृषभोऽभिषेकः सपरिवारश्च वृषभादीनामाचार्यप्रदत्तः प्रव्रजितस्वजनवर्गो वा द्रष्टव्यः । तदेवं साधूनां निस्तारणविधिरुक्तः; । इदानीं साध्वीनां तमाह-

[भा.७१६] पवित्तिनिभिसेयपत्ता भिक्खुणि खुड्डा तहेव थेरी य ।
गहणं तासिं इणमो संजोगगमं तु वोच्छामि ।।

वृ- प्रवर्तिनीसमस्तसाध्वीनां नायिका आचार्यस्थानीया, अभिषेका प्रवर्तिनीपदयोग्या, भिक्षुकी क्षुल्लिका स्थविरा च प्रतीता । एतासां पञ्चानामपिग्रहणमिदं वक्ष्यमाणंसंयोगगमं । संयोगतोऽनेकप्रकारं वक्ष्यामि प्रतिज्ञातमेव निर्वाहयति-

[भा.७१७] तरुणी निप्फन्नपरिवारा सलद्धिया जा य होति अब्भासे ।
अभिसेयाणं चउरो सेसाणं पंच चेव गमा ।।

वृ- यदि शक्तिरस्ति ततः पञ्चापि प्रवर्तिन्यादयो युगपन्निस्तारणीया अशक्तौ चतस्रः तत्राप्यशक्तौ तिस्रस्तदभावे द्वे प्रवर्तिन्यभिषेके । तत्राप्यशक्तौ प्रवर्तिन्येका । तत्रापि यद्येका प्रवर्तिनी स्थविरा भवति अपरा च तरुणी । ततस्तरुणी स्थविरयोर्मध्ये तरुणी निस्तारणीया । द्वयोस्तरुण्योः स्थविरयोर्वा मध्ये निष्पन्ना, द्वयोर्निष्पन्नयोरनिष्पन्नयोर्वा मध्ये सपरिवारा द्वयोः सपरिवारयोर परिवारयोर्वा मध्ये लब्धियुक्ता द्वयोर्लब्धियुक्तयोरलब्धिकयोर्वा या भवत्यभ्यासे सा निस्तारणीया एते पंच गमाःप्रवर्त्तिन्यां, अभिषेकायां चत्वारो गमाः, तस्यानिष्पन्नतया निष्पन्नानिष्पन्नगमासंभवात् शेषाणां भिक्षुकी क्षुल्लिका स्थविराणां पंचगमा भवंति तेच पंचापि गमाः प्रवर्त्तिन्या इव भावनीयाः । तदेवं साधूनां साध्वीनां च प्रत्येकं निस्तारणविधिरुक्तः साम्प्रतमुभयेषां संयोगत आह-

[भा.७१८] आयरिय गणणि वसभे, कमसोग्गहणं तहेव अभिसेया ।
सेसाण पुव्वमित्थी मीसगकरणे कमो एस ।।

वृ- यद्यस्ति शक्तिस्ततो द्वावपि वर्गौ युगपन्निस्तारयेत् । अथासमर्थस्तत एवं यतना आचार्यप्रवर्तिन्योर्मध्ये प्रथमत आचार्यं निस्तारयेत् । ततः प्रवर्तिनीं । प्रवर्तिनीवृषभयोर्मध्ये प्रवर्तिनीं प्रश्चात् वृषभं । वृषभोऽभिषेकः । वृषभाभिषेकयोर्मध्ये पूर्वमभिषेकं पश्चादभिषेकां । सेसाणपुव्व-मित्थीति-शेषेषु षष्टी सप्तम्यर्थे प्राकृतत्वात् पूर्वं स्त्री निस्तारणीया अनुकम्प्यत्वात् पश्चात्पुरुषास्तद्यथा-भिक्षुभिक्षुक्योर्मध्ये भिक्षुकी पश्चाद्भिक्षुः । क्षुल्लिकाक्षुल्लिकयोर्मध्ये प्रथमतः क्षुल्लिका पश्चात्क्षुल्लकः । स्थविरास्थविरयोः पूर्वं स्थविरा पश्चात्स्थविरः । अत्रापि सुनिपुनेन भूत्वा अल्पबहुत्वचिन्ता कर्तव्या । कृत्वा च यद्बहुगुणं तत्समाचारणीयम् । उक्तं च-"बहुवित्थरमुस्सग्गं बहुतरमुववायवित्थरं नाउं । जह जह संजम वुड्ढी जह जयसू निज्जरा जयह ।।" एष मिश्रकरणे युगपत्साधुसाध्वीवर्गनिस्तारणकरणे एषोऽनन्तरोदितः क्रमः गतं जीयत्ति द्वारमधुना पिट्टनद्वारमाह-

[भा.७१९] भिक्खू खुड्डग थेरे अभिसेगे चेव तहय आयरिए ।
गहणं तेसिं इणमो संजोगगमं तु वोच्छामि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- भिक्षुः क्षुल्लकः स्थविरोऽभिषेकः आचार्यस्तेषामेव क्रमेण व्यवस्थितानां पञ्चानामपि ग्रहणमिदं वक्ष्यमाणं संयोगगमं संयोगतोऽनेकप्रकारं वक्ष्यामि । प्रतिज्ञामेव निर्वाहयति–

[भा.७२०] तरुणे निप्फन्नपरिवारे सलद्धिए जेय होंति अब्भासे ।
अभिसेयंमि चउरो सेसाणं पंच चेव गमा ।।

वृ- यदि शक्तिस्ततः पञ्चापि युगपन्निस्तारयेत् । तदशक्तावेकैकहान्या यावदेकं भिक्षुं सोऽपि यदेकस्तरुणोऽपरश्च स्थविरः तदा तरुणो निस्तारणीयः । द्वयोस्तरुणयोरतरुणयोर्वा निष्पन्नो द्वयोर्निष्पन्नयोरनिष्पन्नयोर्वासपरिवारः द्वयोः सपरिवारयोरपरिवारयोर्वासलब्धिकः द्वयोः सलब्धिकयोरलब्धिकयोर्वा यो भवत्यभ्यासे समीपे स निस्तारणीयः । एते पञ्च गमा भिक्षौ भवन्ति अभिषेकगमाश्चत्वारो निष्पन्नतया तस्य निष्पन्नानिष्पन्नगमाभावात् । शेषाणां तु क्षुल्लकस्थविराचार्याणां च भिक्षोरिव पञ्चैव गमाः । तत्र भिक्षुकादिक्रमकरणे कारणमाह-

[भा.७२१] असहंते पच्चा त्तरणंमि, माहोज्ज सव्वपत्थारो ।
खुड्डो भीरु नुकंपो असहो घायस्स थेरो य ।।

[भा.७२२] गणि आयरियाउ सहू देहविओएउ साहसविवज्जी ।
एमे व भंसणंमि वि उदिन्नवेदोत्ति नाणत्तं ।।

वृ- भिक्षवोऽहि यदि राज्ञा पिट्टयितुमारभ्यन्ते तदा ते किञ्चिदगीतार्थत्वेनासहमानाः प्रत्यास्तरयेयुः। प्रत्यास्तरणं नाम संमुखीभूय युद्धकरणं । ततोऽसहमाने जातावेकवचनं । षष्ठयर्थेच सप्तमी । असहमानानां प्रत्यास्तरणे प्रतिकूलमभिमुखीभूयस्तरत्वकरणे मा सर्वप्रस्तारः समस्तसङ्घोपद्रवो भूयात्। किमुक्तं भवति ? मा गाढतरं प्रद्विष्टः सन् राजा सर्वमपि सङ्घमुपद्रवेत् । अनेन कारणेन पिट्टनद्वारे भिक्षुः प्रथममुपात्तः, तदनन्तरं क्षुल्लकः स हि बालत्वाद्भीरुरनुकम्प्यश्च । ततः स द्वितीयस्थाने स्थापितः । तदनन्तरं स्थविरो यतः स्थविरत्वेनाङ्गप्रत्यङ्गानां श्लथीभूततया घातस्य पिट्टनस्यासहः गणि आयरियाउ सहू इत्यादि गणी गच्छाधिपतिराचार्य आचार्यपदार्ह एतौ द्वावपि सहौ समर्थौ घातस्येति सम्बध्यते । अपि च देहवियोगेऽपि देहभ्रंशे अपि तुशब्दोऽपिशब्दार्थे साध्वसविवर्जितौ अविमृश्य प्रवृत्तिः साध्वसं तद्विवर्जितौ संमुखीभूय युद्धप्रदानलक्षणसाध्वसरहिताविति भावः । ततः स्थविरानन्तरं तौ द्वावपि उपात्तौ तत्राप्यभिषेकादतिशयेन सहो गच्छाधिपतिरित्यभिषेकानन्तरं गणिन उपादानं एवमेवेत्यादि भ्रंशनसंयमच्यावनद्वारेऽप्येवमेव अनेनैवप्रकारेण भिक्षुकादिक्रमकरणे कारणमभिधानीयं, नवरं भिक्षुदीर्णवेदोऽपि संभवतीति नानात्वं । किमुक्तं भवति ? यदि भिक्षोस्तरुणतया प्रचुरमोहनीयोदयतया उत्प्रवाजनमनुकूलं भवेत् । ततः स क्षिप्रमुत्प्रव्रजेदिति प्रथमं भिक्षुग्रहणं, तदनन्तरं क्षुल्लकादिक्रमकरणे प्रयोजनं प्रागुक्तमवसातव्यम् एतच्च लाघवाय प्रस्तावादुक्तं संप्रत्यधिकृत एव पिट्टनद्वारे साध्वीनां निस्तारण विधिमाहः-भिक्खुणी खुड्डीथेरी, अभिसेगाय पवत्तिनीचेव; करणं तासिं इणमो, संजोगगमं तु वोच्छामि; ।। भिक्षुकी क्षुल्लिका स्थविरा अभिषेकाप्रवर्तिनी च एतासामेवं क्रमोपन्यासे कारणं साधुविषये पागुक्तमेवावसातव्यम् । तासां पञ्चानामपि करणं निस्तारणकरणमिदं वक्ष्यमाणं संयोगगमं वक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति-

[भा.७२३] तरुणी उनिप्फन्ना परिवार सलद्धिया य अब्भासे ।
अभिसेयाए चउरो सेसाणं पंच चेव गमा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अस्याः साधुगतगाथाया इव व्याख्या । सम्प्रति द्वयोरपि साधुसाध्वीवर्गयोः संयोगेन निस्तारणविधिमाह–

[भा.७२४] पंतावणमीसाणं दोण्हं वग्गाणं होइ करणं तु ।
पुव्वं तु संजईणं पच्छा पुन संजयाण भवे ।।

वृ- पंतावणं नाम पिट्टनं । तत्र मिश्रयोर्द्वयोरपि वर्गयोः साधुसाध्वीरूपयोः करणं निस्तारणकरणं भवति । पूर्वं संयतीनां पश्चात् पुनर्भवति संयतानां । तद्यथा-भिक्षुभिक्षुक्योः पूर्वं भिक्षुकी पश्चाद्भिक्षुः। एवं क्षुल्लकक्षुल्लिकयोः पूर्वं क्षुल्लिका स्थविरास्थविरयोः स्थविरा । अभिषेकाभिषेकयोरभिषेका । आचार्यप्रवर्तिन्योः प्रवर्तिनी पश्चादाचार्यः । गतं पिट्टनद्वारमधुना संयमच्यावनद्वारमाह-

[भा.७२५] भिक्खू खुड्डे थेरे अभिसेयायरिय संजमे पडुप्पन्ने ।
करणे तेसिं इणमो संजोगगमं तु वोच्छामि ।।

वृ- भिक्षु क्षुल्लकः स्थविरो अभिषेक आचार्यः । कथंभूत? एकैकइत्याह-संयमे प्रत्युत्पन्नो वर्तमानः तेषां भिक्षुप्रभृतीनां पञ्चानां निस्तारणकरणमिदं वक्ष्यमाणं संयोगगमं संयोगतोऽनेकप्रकारं वक्ष्यामि । यथा प्रतिज्ञातमेव करोति-

[भा.७२६] तरुणे निप्फपन्नरिवारे सलद्धिए जे य होति अब्भासे ।
अभिसेयंमि य चउरो संसाणं पंच चेव गमा ।।

वृ- अस्या व्याख्या प्राग्वत् । सम्प्रति यदुक्तं 'उदिन्नवेदो त्ति नाणत्तमिति' तद्व्याचिख्यासुराह-

[भा.७२७] अपरिणतो सो जम्हा अन्नभावं वएज्ज तो पुव्वं ।
अपरिणामो अहवा न निज्जइ किं चि काहीइ ।।

वृ- स भिक्षुर्यस्मादपरिणतो परिणामत्वाच्चान्यंभावमुत्प्रवाजनाभिप्रायं लक्षणं व्रजेत् । ततः स सत्वरमेवोत्प्रव्राजते । अन्यच्च अथवा न ज्ञायते सोऽपरिणामः सन् किंचीति किमपि संमुखीभूय युद्धं करिष्यति । येन सकलस्यापि सङ्घस्योपद्रवो भवेत् । तत एतद्दोषभयात् पूर्वं भिक्षुनिस्तारणीय इति पूर्वं तस्योपादानं, शेषाणां तु क्रमोपन्यासे प्रयोजनं पिट्टनद्वारवदवसेयमिति । अत्रैव साध्वीरधिकृत्य निस्तारणविधिमाह-

[भा.७२८] भिक्खुणि खुड्डी थेरी अभिसेगपवित्तिनि संजमे पडुप्पना ।
करणं तासिं इणमो संजोगगमं तु वोच्छामि ।।

[भा.७२९] तरुणी निप्फन्नपरिवारा सलद्धिया जा य होइ अब्भासे ।
अभिसेयाए चउरो सेसाणं पंच चेव गमा ।।

वृ- इदं गाथाद्वयमपि प्राग्वत् । सम्प्रति बद्धे लभंते इति द्वार व्याख्यानार्थमाह-

[भा.७३०] खुड्डे थेरे भिक्खु अभिसेयायरियभत्तपानं तु ।
करणं तेसिं इणमो संजोगगमं तु वोच्छामि ।।

वृ- क्षुल्लकः, स्थविरो, भिक्षुरभिषेक आचार्यस्तेषां पञ्चानामप्येवं क्रमव्यवस्थितानां राज्ञा निरुद्धं भक्तपानमधिकृत्य करणं निस्तारकरणं संयोगगमं संयोगतोऽनेकप्रकारं वक्ष्यामि । यथा प्रतिज्ञातमेव करोति-

[भा.७३१] तरुणे निप्फन्नपरिवारे सलद्धीए जे य होइ अब्भासे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिसेयंमि य चउरो सेसाणं पंच चेव गमा ।।

वृ- शक्तौ सत्यां पञ्चापियुगपन्निस्तारयेत् । शक्त्यभावे एकैकहान्या यावत् पूर्वं क्षुल्लकं निस्तारयेत्, सोऽपि यदैकस्तरुणोऽपरोऽतरुणः । तरुणो नाम प्रथमकुमारत्वे वर्तमान इतरोऽतरुणस्तयो स्तरुणोनिस्तारणीयः तरुणयोरतरुणयोर्वानिष्पन्नः, बालस्य सूत्रार्थ निष्पन्नता वज्रस्वामिन इव भावनीया । द्वयोर्निष्पन्नयोर्वासपरिवारः द्वयोः सपरिवारयोरपरिवारयोर्वा सलब्धिकः । द्वयोः सलब्धिकयोरलब्धिकयोर्वा यो भवत्यभ्यासे स निस्तार्यः । एते पञ्च गमाः क्षुल्लकस्य । अभिषेके चत्वारः निष्पन्नतया तस्य निष्पन्नानिष्पन्नगमाभावात् शेषाणां स्थविरभिक्ष्वाचार्याणां पञ्च गमाः ।। सम्प्रति साध्वीरधिकृत्य निस्तारणमाह-

[भा.७३२] खुड्डिया थेरी भिक्षुणी अभिसेयपविति भत्तपानं तु ।
करणं तासिं इणमो संजोगगमं तु वोच्छामि ।।

[भा.७३३] तरुणी निष्पन्नपरिवारा लद्धिया जा य होइ अब्भासे ।
अभिसेयाए चउरो सेसाणं पंच चेव गमा ।।

वृ- इदं गाथाद्वयंसाधुगतगाथाद्वयमिव व्याख्यातव्यम् ।। अधुना क्षुल्लकादिक्रमकरणे प्रयोजनमाह-

[भा.७३४] अनुकंपा जनगरिहा तिक्खखुहो होइ खुड्डतो पढमं ।
इइ भत्तपानरोहे दुल्लभभत्तेवि एमेव ।।

वृ- क्षुल्लकस्य यदा प्रथमतो भक्तपानविषये निस्तारणं क्रियते तदा तस्यानुकम्पा कृता भवति, । यदि पुनस्तस्य प्रथमं निस्तारो न क्रियते । किन्त्वाचार्यादीनां तदा जनगर्हा यथाधिगतान् मुण्डान् यद्बालं बुभुक्षाक्रान्तं मुक्त्वा आत्मानं चिंतितवन्त इति । अपि च बालत्वादेव स तीक्ष्णक्षुत्त्वाच्च स्तोककालेनापि भक्तपाननिरोधेन क्लममुपयाति, तेन कारणेन क्षुल्लकः प्रथमं निस्तार्यते तदन्तरं स्थविरः । सोऽपिहि बालतव् स्तोककालेनापि भक्तपाननिरोधेन क्लाम्यति । केवलं क्षुल्लकापेक्षया मनाक् सह इति तदनन्तरं तस्योपादानं स्थविरादपि भिक्षुश्चिरकाल सह इति तदनन्तरं तस्योपादानं । ततोऽप्यभिषेकः समर्थस्तस्मादाचार्य इति तदनन्तरं तस्योपादानं स्थविरादपि भिक्षुणोपात्ताविति इति प्रथम भक्तपाननिरोधक्षुल्लकादिक्रमकरणे प्रयोजनं गतं बंधलभंतमलभंत इति द्वारम् ।। अधुना दुर्लभभक्तद्वारमाह- दुल्लभभत्ते वि एमेव एवमेव अनेनैव प्रकारेण दुर्भिक्षत्वेन दुर्लभभक्ते निस्तारणविधिर्वक्तव्यः । तद्यथा-

[भा.७३५] खुड्डे थेरे भिक्खू अभिसेयायरिय दुल्लभं भत्तं ।
करणं तेसिं इणमो संजोगगमं तु वोच्छामि ।।

[भा.७३६] तरुणे निप्फन्न परिवारे सलद्धिए जे य होइ अब्भासे ।
अभिसेयंमि य चउरो सेसाणं पंच चेव गमा ।।

[भा.७३७] खुड्डिय थेरी भिक्खुणि, अभिसेयपविति दुल्लभं भत्तं ।
करणं तासिं इणमो संजोगगमं तु वोच्छामि ।।

[भा.७३८] तरुणी निप्फन्नपरिवारा, सलद्धिया जा य होइ अब्भासे ।
अभिसेयाए चउरो सेसाणं पंच चेव गमा ।।

वृ- क्षुल्लकादिक्रमकरणप्रयोजनमपि तथैव वक्तव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतं दुर्लभभक्तद्वारं भक्त परिज्ञाद्वारं ग्लानद्वारं च युगपदाह-

[भा.७३९]	परिणाय गिलाणस्स य दोण्हवि कयरस्स होंति कायव्वं ।
अससीए गिलाणस्स य दोण्ह वि संते परिणाए ।।

वृ- परिज्ञातेति पदैकदेशे पदसमुदायोपचारात् भक्तपरिज्ञाशब्दः प्रत्याख्यानवाचीत्वात्तस्य च परनिपातः प्राकृतत्वात् सुखादिदर्शनाद्वा प्रत्याख्यातभक्तस्य ग्लानस्य च संभवे द्वयोर्मध्ये कतरस्य भवति कर्तव्यम् ? । उच्यते-शक्तौ सत्यां द्वयोरपि कर्त्तव्यम् । अथ न शक्तो द्वयोरपि कर्तुं ततो ग्लानस्य कर्तव्यम्, तस्य जीवितसापेक्षत्वात् । शक्तौ सत्यां द्वयोरपि वैयावृत्ये क्रियमाणे सति परिज्ञाते भक्ते प्रत्याख्यातभक्तस्येत्यर्थः । विशेषतरं कर्तव्यमिति वाक्यशेषः अथ शक्तावसत्यां ग्लानस्य कर्तव्यमित्युक्तम् किं कारणमत आह-

[भा.७४०]	सावेक्खो उ गिलाणो निरवेक्खो जीवियंमि उपरिणी ।
इइ दोण्हवि कायव्वे उक्कमकरणे करेअसहू ।।

वृ- ग्लानो जीविते जीवने सापेक्षः, परिज्ञी भक्तपरिज्ञानवान् जीविते निरपेक्षस्ततोऽवश्यं ग्लानो जीवयितव्य इति, द्वयोरपि कर्तव्येऽसहोऽसत्यां उत् क्रमेण भक्तपरिज्ञावन्तमुल्लंध्य ग्लानस्य करणं करणीयं वैयावृत्यं कुर्यात् । यदुक्तं शक्तौ सत्यां द्वयोरपि कर्तव्ये प्रत्याख्यातभक्तस्य विशेषतः कर्तव्यमिति । तत्र कारणमाह-

[भा.७४१]	वसहे जोहे य तहा निज्जामगविरहिए जहा पोए ।
पावति विमासमेवं भत्तपरिणाए संमूढो ।।

वृ- यथा वृषभो बलीवर्दः सुसारथिरहितः, यथा वा योधाः सुस्वामिविरहितास्तथा निर्यामकविरहितः पोतः प्राप्नोति विनाशमेवं भक्तपरिज्ञायां सम्यक् निर्यामकाभावतः संमूढः सन् समाधिलक्षण-प्राणविनाशमाप्नोति । तत्र प्रथमं वृषभदृष्टान्तं भावयति-

[भा.७४२]	नामेण वि गोएण वि पलायंतो वि साविंतो संतो ।
अवि भीरू वि नियत्तइ वसहो अप्फालिओ पहुणा ।।

वृ- यथा वृषभः प्रथमं सारथिरहितः सन् प्रतिवृषभेण युद्धे पराजितो विपलायते न युद्धाभिमुखी भवति । विपलायमानश्च कथमपि प्रभुणा सारथिना दृष्टः सन् नाम्ना गोत्रेण च शापितः शब्दित आकारित इत्यर्थः । तथा प्रसादपुरस्सरमास्फालितश्च स्कन्धादिप्रदेशेषु हस्तेन तत एवं प्रोत्साहितसत्वः सन्, अपिसंभावने । भीरुरपि विपलायमानोऽपि पुनरपि प्रति वृषभेण सह युद्धदानाय प्रतिनिवर्तते । एवं कृत प्रत्याख्यानोऽपि सम्यग् निर्यामकाभावतो जातमन्दपरिणामोऽपि निर्यामकेन प्रोत्साहितः सन् प्रतिनिवर्तते । स परीषहचमूमभिभवितुमिति भावितो वृषभदृष्टान्तः । सम्प्रति योधदृष्टान्तभावनामाह-

[भा.७४३]	अप्फालिया जह रणे जोहा भंजंति परबलाणीयं ।
गीयजुतोउ परिणी तह जिणइ परीसहानीयं ।।

वृ- प्रभुणा नाम्ना गोत्रेण गुणप्रशंसने च आस्फालिता आ समन्तात् स्फारं प्रापिता यथा योधाः सुभटा रणे संग्रामे परबलानीकं परेषां वैरिणां बलं तच्च तत् अनीकं च परबलानीकं भञ्जन्ति । तथा परिज्ञी भक्तपरिज्ञावान् गीतयुतसम्यग् निर्यामकोपेतो जयति अभिभवति परिषहानीकमिति । उक्ता योधदृष्टान्तभावना । सम्प्रति पोतदृष्टान्तभावनाप्राह-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

[भा.७४४] सुणिऊणनिज्झामगविरहियस्स पोयस्स जह भवे नासो ।
गीयत्थविरहियस्स उ तहेव नासो परिणिस्स ।।

वृ- सुनिपुणः सम्यग् जलमार्गकुशलः तेन निर्यामकेन विरहितस्य पोतस्य यथा भवति विनाशस्तथैव गीतार्थविरहितस्य परिज्ञिनः कृतभक्तप्रत्याख्यानस्य भवति विनाशः प्रत्याख्यानफलस्य सुगति-लाभस्याभावात् ।

[भा.७४५] निउणमतिनिज्झामगपोतो जह इच्छियं वए भूमिं ।
गीयत्थेनुवेतो तहय परिनी लहइ सिद्धिं ।।

वृ- यथा पोतः प्रवहणं निपुनमतिनिर्यामकः कर्णधारो यस्य स तता ईप्सितां भूमिं व्रजति । एवं गीतार्थेनोपेतो युक्तः सन् परिज्ञी लभते सिद्धिं मोक्षमिति उक्ता पोतदृष्टान्तभावना । अथ किं तस्य विशेषतरं करणीयमित्यत आह-

[भा.७४६] उव्वत्तणा य पानग धीरवणा चेव धम्मकहणा य ।
अंतो बहि नीहरणं तम्मि य काले नमोक्कारो ।।

वृ- तस्य कृतभक्तप्रत्मयाख्यानस्य स्वयमुद्वर्तनं कर्तुमशक्नुवत उद्वर्तना कर्तव्या । तस्यां च क्रियमाणायां महान् आश्वासो भवति समाधिं च परमां लभते, ततः साधयति परममुत्तमार्थं, तथा तृषापीडितस्य सतः पानकं पानं समर्पणीयं । धीरवणाचेवत्ति दुःखेन परिताप्यमानस्य धीरापना कर्तव्या । यथा धीरोभव धीरो भव अहं तवैतत् दुःखं विश्रामणादिना अपनेष्यामि अपि च पुण्यभागिन् ! सहस्वैवत् दुःखं सम्यगत एव तत्सहनानन्तरमचिरात्सर्वदुःखप्रहीणो भविष्यसि इत्यादि । तथा धर्मकथानापूर्व-पूर्वपरमदुःखकारिमुनिचरितरूपा कथयितव्या । तथा मध्ये धर्ममसहमानस्य बहिर्निर्हरणं बहिर्नयनं बहिर्वातादिकमसहमानस्य अन्तर्निर्हरणं तथा तस्मिन् काले मरणसमये नमस्कारो दातव्यः ।

गतं परिज्ञाद्वारं ग्लानद्वारं च । सम्प्रति संयमातीतद्वारं वादिद्वारं चाह-

[भा.७४७] जोच्चिय भंसिज्जंते गमतोसोचेव भंसियाणंपि ।
हेठा अकरियवादी भणितो इणमो किरियवादी ।।

वृ- य एव चारित्राद्भ्रश्यमाने संयमप्रत्युत्पन्नद्वारे गमक उक्तः स एव भ्रंशितानामुत्प्रव्रजितानामपि ध्रियमाणानां वेदितव्यः न पुनः किञ्चिदपि नानात्वं, । गतं संयमातीतद्वारमधुना वादिद्वारमाह-अकिरियवादी इत्यादि य एव प्राक्परवादिनि गम उक्तः स एवात्रापि द्रष्टव्यः । केवलं सोऽक्रियावादी भणितो । अयं तु क्रियावादीति विशेषः । यत्रस्थाने वादो दातव्यः तत्र गतस्य यत्कर्तव्यं तथा चाह-

[भा.७४८] वादे जेन समाही विज्जागहणं च वादिपडिवक्खो ।
सूत्तं न सरइ विक्खेवेणं निव्विसमाणो तहिं गच्छे ।।

वृ- वादे वादविषये येन तस्य समाधिरुपजायते तत्सर्वं क्रियते, तद्यथा-यदि भणति वाक्पाटवकारि ब्राह्म्याद्यौषधं दीयतामिति तद्दीयते शरीरजाड्यापहारि तदुपदिष्टं वैद्योपदिष्टं वा किञ्चिद्वस्तु यदि वा दुग्धादिविकृति प्रणीतभक्तं अथवा देशस्नानं सर्वस्नानं वस्त्रादिविभूषा वा विद्याग्रहणं च । 'वादिपडिवक्खो' त्ति विद्याग्रहणं वा वादिप्रतिपक्षः वादिविद्या-प्रतिपक्षभूतं कार्यते । किमुक्तं भवति ? याः प्रतिवादी विद्या जानाति तासां प्रतिपन्थिन्यो या अन्या विद्या यथा- 'मोरीनउलिविराली' इत्यादि तासां ग्रहणं कार्यते । कस्मादेतत्सर्वं क्रियते इति चेदुच्यते गुणदर्शनात्तथाहि ब्राह्मया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्यौषधोपयोगतो वाक्पाटवं, शरीरजाड्यापहार्यौषधाभ्यवहारतः शरीरलघुता, दुग्धप्रणीताहाराऽभ्यवहारतो मेधाविशिष्टं च धारणाबलं, सर्प्पिः सन्मिश्रभोजन भुक्तित उर्ज्या घृतेन पाटवमिति वचनात् देशतः सर्वतो वा स्नानेन वस्त्रादिभूषायां च तेजस्विता प्रतिपक्षविद्याग्रहणतो महान्मानसिकोऽवष्टम्भः । एतत्सर्वं वादवेलायामुपयोगि । तथा चाह-

[भा.७४९]   वायापुग्गललहुया मेहाउज्झाय धारणाबलं च ।
                तेजस्सिया सत्तं, वायाय इयंमि संगामे ।।

वृ- वाग् व्यक्ताक्षरा, पुद्गललघुता शरीरपुद्गलानां जाड्यापगमः, मेधा अपूर्वापूर्वऊहणोहात्मको ज्ञानविशेषः । ऊर्जा बलं प्रभूततरभाषणेऽपि प्रवर्धमानस्वबलः आन्तरं उत्साहविशेष इत्यर्थः, । धारणाबलं प्रतिवादिनः शब्दतदर्थावधारणं बलं, तेजस्विता प्रतिवादिक्षोभापादिका शरीरस्य स्फूर्तिमती दीप्यमानता, सत्वं प्राणव्यपरोपणसमर्थविद्याप्रयोगेऽप्यचलितस्तन्मानोपमर्दहेतुरवष्टम्भः । एतत्सर्वं वाङ्मये संग्रामे उपयुज्यते ।

मू. (२१) *परिहारकप्पठिते भिक्खू वहिया थेराणं वेयावडियागच्छेज्जा । थेराय से नो सरेज्जा कप्पइ से निव्विसमाणस्स एगराइयाए पडिमाए" ०*

वृ- अत्र नो सरेज्जा इति विशेषः, शेषं समस्तमपि पूर्ववत् । नो सरेज्जा इत्यस्यायमर्थः-एष परिहारतपो वहन् तष्ठितीति स्थविरा आचार्या न स्मरेयुः । कस्मान्न स्मरेयुरिति चेत् ? उच्यते-व्याक्षेपात् । तथा चाह-न सरइ इत्यादि पूर्वगाथाश्चार्थं विद्यानां निमित्तानां प्रत्युत्तराणां च कथनतो बहुविधसन्देशकथनतो वा आचार्यो न स्मरति । ततस्तस्मिन्न स्मरणे सति निर्विशमानक एव गच्छेत् । गत्वा च यत्र गन्तव्यं तत्र यत्करोति तदाह-

[भा.७५०]   तत्थ गतोविय संतो पुरिसं थामं च नाउतो ठवणं ।
                साहीणमसाहीणे गुरुम्मि ठवणा असहणे उ ।।

वृ- गतोऽपि च सन्पुरुषं प्रतिवादिलक्षणं प्रचण्डं वा स्थामप्राणमात्मनो ज्ञात्वा तदनन्तरं यदि समर्थमात्मानं संभाव्यादि तदा न निक्षिपति, अथाशक्तिः संभाव्यते ततः स्थापनानिक्षेपणं परिहारतपसः कर्त्तव्यम् । किमुक्तं भवति ? दुर्जयः खलु प्रतिवादी न यथाकथञ्चन जेतुं शक्यते अहं च क्षामतया बहुविधमुत्तरं दातुमशक्तो मतिमोहो वा तदानीं मम क्षामस्वा भवेत् इति यदि संभावयति, तर्हि निक्षिपति, । अथ कथं स निक्षिपतीत्यत आह-साहीणेत्यादि स्वाधीने सन्निह्वंते, अस्वाधिने असन्निहिते गुराव सहस्य स्थापना परिहारतपसो निक्षेपणं भवति । इयमत्र भावना-यद्याचार्यः सन्निह्वितो भवति ततः स एव तं निक्षेपयति । अथ नास्ति सन्निहितः ततो न शक्तः क्षामत्वेन परिवादिनं जेतुमित्यालम्बनतः स्वयं निक्षिपति । अत्र पर आह-"ननु यदि स्वयं निक्षिपति ततः स आत्मच्छंदसा निक्षिपन् यदि उद्घातितं वहति ततो अनुद्घातितं प्राप्नोति, । अथानुद्घातितं ततः परतरं स्थानमाप्नोति" इति । सूरिराह-

[भा.७५१]   काम अप्पच्छंदो निक्खियमाणो उ दोसवं होइ ।
                तं पुन जुज्जइ असढे तीरियकज्जे पुन वहेज्जा ।।

वृ- कामशब्दो मकरध्वजे अवधृतौ च । इहावधृते काममवधृते काममवधृतमेतत् आत्मच्छंदसा निक्षिपन् दोषवान् भवति परं निष्कारणे, यदि पुनरशठः सन् एवं चिन्तयति न शक्तः क्षामतया परवादिनं जेतुमिदानीं तीरितः कार्यः समाप्तकार्यः । पुनर्भूयो वहेयमिति ततस्तस्मिन् निक्षेपणं युज्यते एव अदुष्टमेव

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पुष्टालम्बनत्वात् ।।

मू. (२२) *परिहारकप्पठिए भिक्खुबहिया थेराणं वेयावडियाए गच्छेज्जा थेराय से सरिज्ञा वा नो सरिज्ञा वा नो कप्पइ त्ति ।। से निव्विसमाणस्स०*

वृ- एत्तदपि सूत्रं तथैव, नवरमेतावान् विशेषः । थेराय से सरिज्ञा वा नो सरिज्ञा नो कप्पइ से निव्विसमाणस्सेति । अस्यायमर्थः-स्थविरा से तस्य परिहारकल्पं स्मरेयुर्यदि वा व्याक्षेपान्न स्मरेयुः । वाशब्दादुभावपि न स्मरेयातां तथापि यदि निर्विशमानको गच्छति ततः से तस्य निर्विशमानकस्य एकरात्रिक्या प्रतिमया एकरात्रिकेण वा साभिग्रहेण कचिदपि प्रतिबन्धमन्तरेण गच्छत इत्यादि । तथा चाह-

[भा.७५२] सरमाणे जो उगमो अस्सरमाणेवि होइ एमेव ।
एमेव मीसगम्मि वि देसं सव्वं च आसज्ञा ।।

वृ- इह त्रीणि सूत्राणि, तद्यथा-प्रथमं स्मरणसूत्रं, द्वितीयमस्मरणसूत्रं, तृतीयं मिश्रकसूत्रं स्मरणास्मरणसूत्रमित्यर्थः । तत्र य एव गमः स्मरणे स्मरणसूत्रे उक्तः एमेव अनेनैव प्रकारेण प्रथमसूत्रप्रकारेणेत्यर्थः । अस्मरणे अस्मरणसूत्रे भवति गमः । एवमेव अनेनैव प्रकारेण मिश्रकसूत्रेऽपि तत्र सूत्रत्रयेऽपि वहनं निक्षेपणं झोषो वा देशं सर्वं वा आसाद्य प्रतीत्य द्रष्टव्यः । तत्र द्वयोरपि विस्मरणं सूचितं । तत्र कारणमाह-

[भा.७५३] विज्ञानिमित्त उत्तर कहणे अप्पाहणाय कहियाओ ।
अतिसंभम तुरिय विणिग्गयाण दोण्हंपि विस्सरियं ।।

वृ- विद्यानां प्रति विद्या प्रतिपक्षभूतानां निमित्तानामनेकप्रकाराणामुत्तराणां प्रतिवादिविषयाणां यथा यदि स वादी एवं ब्रूयात् ततो भवानित्थं वदेदित्येवमादिरूपाणां कथने तथा अप्पाहणाय संदेशकाः बहुका कथिताः । तत आचार्यस्यातिसंभ्रमेण इतरस्यापि चातिसंभ्रमादेव त्वरितविनिर्गतस्य द्वयोरपि विस्मृतं, यथा परिहारतपो निक्षेपणीयमिति । तत्र यदि आचार्याः स्मरेयुः स वा स्मारयति तदा निक्षिप्य गच्छति । अथ द्वयोरपि विस्मृतं परिहारतपो निक्षेपणीयमिति । अथ द्वयोरपि विस्मृतंतदा निर्विशमानक एव याति । यदा तु पूर्वं स स्मृतवान् न पश्चात्तदा का वार्त्तेत्यत आह-

[भा.७५४] पुव्वं सो सरिऊण संपत्थिए विज्ञमादि कज्ञेहिं ।
जस्स पुनो विस्सरियं निव्विसमाणे तहिंपि वए ।।

वृ- पूर्वं स परिहारिकः स्मृत्वा परिहारतपो निक्षिप्य मया गन्तव्यमिति विचिन्त्य संप्रस्थिते सम्प्रस्थानकाले विद्यादिकार्यैर्विद्याग्रहणादिकार्यैर्व्याकुलीभूततया यस्य पूनर्विस्मृतं यो विस्मृतं गतवान् तत्रापि पूर्वं स्मरणे पश्चाद स्मरणे निर्विशमानो व्रजेत् । सम्प्रति यदुक्तं देशं वा सर्वं वा आसाद्येति तद्वयाख्यानयति-

[भा.७५५] देसं वा वि वहेज्ञा देसं च ठवेज्ञ अहव झोसिज्ञा ।
सव्वं वा विवहेज्ञा सव्वं ठविज्ञ सव्वं व झोसिज्ञा ।।

वृ- त्रिष्वपि सूत्रेषु परस्परसमुच्चयार्थाः । तथा त्रिष्वपि सूत्रेषु देशं वा वाहयेदपि, देशं वा स्थापयेदपि, अथवा देशंझोषयेदपि,-सर्वं वाहयेदपि सर्वं वा स्थापयेदपि सर्वं वा झोषयेदपि । अत्र वाशब्दाद्देशं वेत्याद्यपेक्षया विकल्पार्थाः । अपि शब्दाः पूर्ववत् । अथ कथं देशस्य वहनादि ? उच्यते परिहारतपः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायः सर्वं व्यूढं स्तोकं तिष्ठति । अत्रान्तरे च गमनकार्यमधिकृतं समुत्पन्नं ततः आचार्यैरुक्तम्-

[भा.७५६] निक्खिव न निक्खिवामी पथिच्चिय देसमेव वोज्झामि ।
असहू पुन निक्खिवए झोसंति मेएज्ज तवसेसं ।।

वृ- निक्षिप मुञ्च अधिकृतं परिहारतपः । यत इदं गमनकार्यमिदानीं समुत्पन्नं, तत्र समर्थः सन् प्राह न निक्षिपामि मुञ्चामि यदेनं देशं पथ्येव मार्ग एव वोक्ष्यामि न पथि क्लमं गमिष्यामि शक्तत्वात्, असहोऽसमर्थः सन् पुनर्नूनमहं गमिष्यामीति विचिन्तयन् तं देशं निक्षिपति, । अथवा से तस्य यदवशेषं स्तोकमव्यूढमवतिष्ठति तत्तस्य संप्रस्थितस्य वाचार्याः प्रसादबुद्धया समस्तं झोषयंति मुञ्चन्ति । यथा महति प्रयोजने त्वं संप्रस्थितो वर्तसे इति मुक्तं प्रसादतस्तवैतत् तपः शेषमिति ! । तदेवं देशस्य वहननिक्षेपण झोषाभाविताः । सम्प्रति सर्वस्य तान् भावयति-

[भा.७५७] एमेव य सव्वंपि व दूरद्धाणंमि तं भवे नियमा ।
एमेव सव्वदेसे वाहणझोसा पडिनियत्ते ।।

वृ- एवमेव अनेनैव प्रकारेण सर्वमपि बाह्यं निक्षेपणीयं झोषणीयं च भावनीयं, नवरं तद्भवति बाह्यादिकं नियमात् दूराध्वनि । तथाहि-कस्यापिपरिहारतपो दत्तं वोढुं च स प्रवृत्तः । अत्रान्तरे च गमन प्रयोजनमुपजातं, तत आचार्या ब्रुवते- 'भद्र समुत्पन्नमिदं गमनप्रयोजनं तस्मान्निक्षिप परिहारतप' इति । समर्थः सन् प्राह- 'भगवन् गच्छन्नपि समर्थोऽहं वोढुं अध्वनो दूरत्वाच्च मार्गे एव समस्तं वोक्ष्यामि । तथा हि-सर्वजघन्यं परिहारतपो मासिकं, तदापन्नोऽसौ, गन्तव्यं चानन्दपुरात् मथुरायां । ततस्तत्तपो मार्ग एव समाप्तिमुपयातीति । असमर्थः पुनर्निक्षिपति यदि वा महत्प्रयोजनमुपस्थितं गरीयांश्चाध्वा एतस्य च प्रयोजनस्यायमेव गुणगरीयस्त्वात् कर्ता । ततः सम्यक् प्रवचनभक्तोऽयं परमदुष्करकारीति विचिंत्य सूरयः सर्वमपि तस्य प्रसादतो मुञ्चंति । एवं सर्वस्य वहननिक्षेपझोषा एमवेत्यादि, एवमेव अनेनैव प्रकारेण प्रतिनिवृत्तेः प्रत्यागतस्य देशस्य सर्वस्य वा वाहनाझोषौ वेदितव्यौ । तद्यथा-यदि गच्छता देशो निक्षिप्तस्ततः स देशः प्रत्यागतेनोह्यते । अथ समस्तं ततः सर्वमिति । यदि वा अहो दुष्करमिदं कार्यमनेन कृतमिति परितुष्टाः सूरयो निक्षिप्तं देशं सर्वं वा मुञ्चंति । एवं प्रत्यागतस्य देशसर्ववाहनझोषौ । अथ कथं देशस्य वा प्रसादतो झोषकरणं, न खलु प्रसादतः पापमुपयातीति तत आह-

[भा.७५८] वेयावच्चकरणं होति अनुग्घातिए वि उग्घायं ।
सेसाण अनुग्घाया अप्पच्छंदो ववेताणं ।।

वृ- यथा अनुद्घातिते परिहारतपसि प्राप्ते वैयावृत्यकराणां सङ्घादिवैयावृत्यप्रवृत्तानामुद्घाति-परिहारतपो भवति । दानयोग्यवैयावृत्यालम्बनेन तेषामवलम्बितत्वात् । एवं कदाचित् देशकालाद्यपेक्षया देशस्य सर्वस्य वा झोषोऽपि क्रियते । तथा तीर्थकरानुज्ञाप्रवृत्तेः; । तथा चोक्तम्- तित्थगरेहिं भणियं वेयावच्चकराणां झोसो भवति, अनुद्घातितं उग्घाइयं कज्जइ इति शेषाणां वैयावृत्यालम्बनरहिताना-मुद्घातिते प्राप्तेऽनुद्घातितमेव दीयते । तथाये वैयावृत्यालम्बनरहिता आत्मच्छंदसा निक्षिपन्तो यदि उद्घातितं वहन्त आसीरन् । तदानुद्घातितं दीयते अथ अनुद्घातितं निक्षिप्तवन्तस्तत उपरितनं तेषां प्रायश्चित्तमिति ।

***मू. (२३)** जे भिक्खू गणाओ अवकम्म एकल्लविहारपडिमं उवसंपज्जित्ताणं विहरित्तए पुनो आलोएज्जा पुनो पडिक्कमेज्जा पुनो छेयपरिहारस्स उवट्ठावेज्जा ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. *(२४) एवं गणावच्छेइए ।।*

मू. *(२५) एवं आयरिय उवज्झाए ।।*

वृ- सूत्रं 'भिक्खूयगणातो अवक्कम' इत्यादि । अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्धस्तत आह-

[भा.७५९] निग्गमनं तु अहिकयं, अमुवत्ततिवातवाधिकाराओ ।
तं पुनवि तिन्न गमनं, इमं तु सुत्तं उभयहा वि ।।

वृ- अनन्तरसूत्रे पारिहारिकनिर्गमनमधिकृतमुक्तमिहापि तदेव निर्गमनमुच्यते । अथवा अनन्तरसूत्रे तपसोऽधिकारोऽनुवर्तते । इहापि स एव तपोऽधिकारः । तत्पुनरनन्तरसूत्रं निर्गमनमभिहितं च वितीर्न्नमनुज्ञातमिदं तु सूत्रं निर्गमनमुभयथापि वितीर्णमवतीर्णं च भाषते । अनेन सम्बन्धेनायातस्यास्य सूत्रस्य व्याख्या-भिक्षुः प्रागुक्तशब्दार्थश्च पुनरर्थात् वाक्यभेदे स च वाक्यभेदः सुप्रतीतः, पूर्वसूत्रवाक्याद्वितीर्णगमनाभिधायिनोऽस्य सूत्रवाक्यस्य वितीर्णावितीर्णगमनाभिधायितया कथंचिदि्भन्नत्वात्, गणाद्रच्छादवक्रम्य विनिर्गत्यएकाकि विहारप्रतिमामेकाकिविहारयोग्यां मासिक्यादिकी प्रतिमामुपसम्पद्य विहरेत् । स च गणस्य स्मरति, संभाव्यते चैतत् । तथा हि यः सूत्रार्थतदुभयैरव्यक्तो यश्चाविधिना प्रतिमां च प्रतिपद्येत् स नियमाद्भङ्गमुपैति इति । ततः सगणं स्मरन् इच्छेत् द्वितीयमपि वारं, एकं वारं पूर्वमपि प्रव्रज्याप्रतिपत्तिकालमाश्रितवान् । इदानीं द्वितीयं वारमत उक्तं-द्वितीयमपि वारं, तमेवात्मीयपूर्वमुक्तगुणव्रतमुपसम्पद्य विहर्तुं, इमं च गणमुपसंपद्य पुनस्तमेकाकिविहारप्रतिमाभङ्गमालोचयेत् । गुरूसमीपे आलोच्य पुनः पुनरकारणतया तस्मात् स्थानात् प्रतिक्रमेत् प्रतिक्रम्य च यदापन्नः प्रायश्चित्तं च्छेदं परिहारं वा तस्य च्छेदस्य परिहारस्य वा करणाय पुनरुपतिष्ठेत् । इह प्रतिमाप्रतिपन्नेन यत्रैवाकृत्यं समासेवितं तत्रैवाह-दुष्टु कृतं मयेत्यादिचिन्तनत स्तदालोचितं प्रतिक्रान्तं च गुरुसमक्षं तु द्वितीयवारमिति पुनः शब्दोपपत्तिः ।

एष सूत्रसंक्षेपार्थः । विस्तरार्थं तु भाष्यकृदाह-

[भा.७६०] संथरमाणस्स विही, आयारदसासु वन्निते पुव्विं ।
सो चेव य होइ इहं तस्स विभासा इमा होति ।।

वृ- संस्तरन् नाम स उच्यते-यः सूत्रोक्तविधिना प्रतिमाप्रतिपत्तियोग्यतामुपागतः मासिक्यादीनां च प्रतिमानां मध्ये यां प्रतिमां प्रतिपन्नस्तां सम्यक् परिपालयितुं क्षमस्तस्य संस्तरतो विधिसमाचारी आचारप्रधाना दशा आचारदशास्तासु दशाश्रुतस्कन्धेष्वित्यर्थः । भिक्षुप्रतिमाध्ययने पूर्वं वर्णितः स एव इहापि अस्मिन्नप्यधिकृतसूत्रव्याख्याप्रस्तावे परिपूर्णो भवति ज्ञातव्यः, तस्य प्रस्तावायातत्वात् । तथा हि-एकाकिविहारिप्रतिमामुपसम्पद्य विहरेदित्युक्तं, ततः साक्षादुपात्ता एकाकिविहारिप्रतिमेति भवति, तद्विधिप्ररूपणावसरः । केवलं स सकलभिक्षुप्रतिमाध्ययनप्रतिपाद्य इति तत एवावधारणीयः । इह पुनस्तस्यैकाकिविहारिप्रतिमाविधिर्विभाषा कर्तव्या । यथा ईदृशस्य एकाकिविहारे प्रतिमाप्रतिपत्तिः कल्पते । अनेन च प्रकारेण प्रतिपद्यते । ईदृशश्च एकाकिविहारप्रतिमाया अयोग्य इति सा इयं वक्ष्यमाणा भवति । तामेवाभिधित्सुराह-

[भा.७६१] घर सउनिसीहपव्वइय सिक्खपरिकम्मकरण दो जोहा ।
थिरकरणे लगच्छखमदुग गच्छारामा ततो नीति ।।

वृ- परिकर्मकरणे द्वौ दृष्टान्तौ, तद्यथा-गृहेऽवस्थितः शकुनिर्गृहशकुनिस्तथा सिंहश्च वने व्यवस्थित

इति गम्यते । तथा 'पव्वइसिक्ख'त्ति प्रव्रजनं प्रव्रजितं प्रव्रज्या इत्यर्थः । शिक्षाग्रहणासेवनरूपं शिक्षाद्विकं । एते द्वे द्वारे वक्तव्ये, एतच्च शेषद्वाराणामर्थग्रहणादीनामुपलक्षणमतस्तान्यपि वक्तव्यानि । ततः परिकर्मकरणं वक्तव्यं, तदनन्तरं परिकिर्मितः परीक्षायां द्वौ योधौ दृष्टान्तत्वेनोपन्यसनीयौ । ततः स्थिरीकरणनिमित्तं तस्योपसर्गव्यावर्णनायां सूत्रार्थकरणव्यवस्थितेऽकाक्षरूपं क्षपकद्विकज्ञातं वक्तव्यम् । तत एवं कृतपरिकर्मा सन् गच्छारामात् सर्वर्तुकपुष्पफलोपगारामरूपात् गच्छाद्विनिर्गच्छति । एष द्वारगाथा संक्षेपार्थः । साम्प्रतमेनामेवविवरिषुः प्रथमतो गृहशकुनिदृष्टान्तं भावयति-

[भा.७६२] वासगगयं तु पोसति चंचूपूरेहिं सउणिया सावं ।
वारेइ तं उड्डंतं जाव समत्थं न जायं तु ।।

वृ- शकुनिका पक्षिणी आत्मीयं शावं, 'वासगगयं' ति प्राकृतत्वादाद्याकारस्य लोप आवासो नीडमावास एवावासकस्तद्गतं । तुरेवकारार्थः । आवासगगतमेवशावं चञ्चूपूरैश्चञ्चुभरणैः पुष्णाति पुष्टीकरोति । यदि कथमाप्यसञ्जातपक्षोप बालचापलेनावासाद्बहिर्जिगमिषुरुड्डीयते, ततस्तमुड्डीयमानं वारयति प्रतिषेधयति, । सा चैवं तावत्करोति यावत्समर्थो न जायते । गाथायां तु नपुंसकनिर्देशः प्राकृतत्वात् । समर्थस्तु जातः सन्न प्रतिषिध्यते । ततो निरुपद्रवं स्वेच्छया विहरति । भावितः शकुनि दृष्टान्तः । सम्प्रति सिंहदृष्टान्तं भावयति-

[भा.७६३] एमेव वणे सीही सा रक्खइ छावपोयगं गहने ।
खीरमिउ पिसिय चव्विय, जा खायइ अट्ठियाइं पि ।।

वृ- एवमेव शकुनिकागतेनैव प्रकारेण वने । किं विशिष्टे ? इत्याह-गहने अतिशयेन गुहिले स्थिता सती सिंही शावपोतकं शाव एवातिलघुत्वात् पोतः पोतकः शावपोतकस्तं रक्षयति व्याघ्रादिभ्यस्तथा क्षीरेण स्तन्येन मृदुचर्वितपिशितेन च तावदात्मीयं शावपोतकं पुष्णाति यावदस्थीन्यपि खादति ।

[भा.७६४] मारिय ममारिएहिं तं तीरावेति छावएहिं तु ।
वणमहिस हत्थिवग्घाण पच्चलो जाव सो जातो ।।

वृ- वनमहिषादीनां शावकैर्मारितैरमारितैर्वा तावत्तमात्मीयशावं तीरयति समर्थीकरोति यावत्तेषां वनमहिषहस्तिव्याघ्राणां स्वयमेव व्यापादने प्रत्यल समर्थो जातो भवति । कृता सिंहदृष्टान्तभावना ।। साम्प्रतमनयोरेव निदर्शनयोरुपनयनार्थमिदमाह-

[भा.७६५] अकयपरिकम्ममसहं दुविहा सिक्खा अकोवियमवत्तं ।
पडिवक्खेण उवमिमो सउणिग सीहादिछावेहिं ।।

वृ- न कृतानि परिकर्माणि वक्ष्यमाणानि येन स तथा तमकृतपरिकर्माणमकृतपरिकर्मत्वादेवासहमेकाकिविहारप्रतिमां प्रतिपत्तुमसमर्थं, तथा द्विविधायां शिक्षायां ग्रहणासेवनरूपायामपि कोविदमनभिज्ञं तथाश्रुतेन वयसा चा प्राप्तयोग्यताकं पडिवक्खेणंति ये प्राक् शकुनिपोतसिंहशावकानां संजातपक्षत्वादयो गुणा उक्तास्तेषां प्रतिपक्षेण प्रतिकूल्येनासंजातपक्षत्वादिना विशिष्टाः शकुनिसिंहादिशावका आदिशब्दात् व्याघ्रादिपरिग्रहस्तैरुपमयामस्तथाहि-यथा शकुनिपोतोऽसंजातपक्षो यद्यावासाद्विनिर्गत्य स्वच्छंदसा परिभ्रमति, ततः स काकढंकादिभिर्विनाशमाविशति, । सिंहपोतकोऽपि यदि क्षीराहारो गुहातो विनिर्गत्य वने स्वेच्छया विहरति ततः सोऽपि वनमहिषव्याघ्रादिभिरुपहन्यते । एवं साधुरप्यकृतपरिकर्मा द्विविधशिक्षायामकोविदः श्रुतेन वयसाचाऽप्राप्तयोग्यताको यदि गच्छादेकाकिविहारप्रतिमाप्रतिपत्तये

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

विनिर्गच्छति, ततः स नियमादात्मविराधनां संयमविराधनां च प्राप्नोति । तदेवं घरसउनिसीहत्ति व्याख्यातम् । सम्प्रति प्रव्रजितशिक्षादीनि द्वाराणि वक्तव्यानि तत्संग्राहिका चेयं गाथा-

[भा.७६६] पव्वज्जासिक्खावयमत्थग्गहणं च अनियतो वासो ।
निप्फत्तीय विहारो, सामायारी ठिती चेव ।।

वृ- अस्या व्याख्यानं कल्पे सविस्तरमुक्तमत्र तु लेशतोऽर्थमात्रमभिधीयते । प्रथमतस्तावत्प्रवज्या भवति, सा च द्विधा धर्मश्रवणतोऽभिसमागमतश्च । तत्र या आचार्यादिभ्यो धर्मदेशनामाकर्ण्य संसाराद्विरज्य प्रतिपद्यते सा धर्मश्रवणतः । या पुनर्जातिस्मरणादिना सा अभिसमागमतः, प्रव्रजितस्य शिक्षापदं भवति । शिक्षा च द्विधा-ग्रहणशिक्षा, आसेवनाशिक्षा च । तत्र ग्रहणशिक्षा सूत्रावगाहन-लक्षणा । आसेवनाशिक्षा सामाचार्यभ्यसनं । शिक्षापदमन्तरं चार्थग्रहणंभवति, अर्थग्रहणकरणानन्तरं चानियतो वासो नानादेशपरिभ्रमणं कर्तव्यम् । तदनन्तरेण नानादेशीयशब्दाकौशलेन नानादेशी-भाषात्मकस्य सूत्रस्य परिस्फुटरूपार्थनिर्णयकारित्वानुपपत्तेः, तदनन्तरं वाचनाप्रदानादिना गच्छस्य निष्पत्ति र्निष्पादनं कर्तव्यम् । तदनन्तरं विहारोऽभ्युद्यतो विहारो जिनकल्पादिप्रतिपत्तिलक्षणः करणीयः । तस्य च विहारस्य या सामाचारी सा वक्तव्या । तथा स्थितिर्जिनकल्पादीनां क्षेत्रकालादिनां क्षेत्रकालादिद्वारेषु चिन्तनीया तत्र प्रव्रज्या शिक्षापदमर्थगआहणमनियतो वासः निष्पत्तिविहारः । सामाचारीति सप्त द्वाराणि प्रतिमायामुपयोगीनि तत्रापि प्रव्रज्या शिक्षापदमर्थग्रहणं चेति त्रीणि द्वाराणि प्रतिपत्तुकामस्य नियमतो भवन्ति, शेषाणां भजना । तथा चाह-

[भा.७६७] पव्वज्जा सिक्खापयमत्थगहणं च सेसए भयणा ।
सामयारीविसेसो नवरं वुत्तो उ पडिमाए ।।

वृ- प्रव्रज्या प्रवर्जनं, शिक्षापदं ग्रहणं सेवनारूपं शिक्षाद्विकं अर्थग्रहणमर्थपरिज्ञानमित्येतत् त्रयं प्रतिमां प्रतिपित्सोर्नियमेन भवति । शेषके अनियतवासनिष्पत्तिलक्षणद्वारद्विके भजना विकल्पनाय आचार्यपदार्हस्तस्य नियमादिदं द्वारद्वयमस्ति, शेषस्य तु नास्तीत्यर्थः । विहारः पुनः प्रतिमाप्रतिपत्तिलक्षणोऽस्त्येव सामाचार्या अपि जिनकल्पिकसामाचारीतो विशेषोऽस्ति नवरं सामाचारीविशेषः प्रतिमायां प्रतिमागतो दशाश्रुतस्कन्धे भिक्षुप्रतिमा ध्ययने उक्त प्रतिपादितः इति न पुनरुच्यते ।। सम्प्रति परिकर्मकरणं वक्तव्यम् । तत्र पर आह-ननु तत्परिकर्म किं गच्छ एव स्थितः करोति उत गच्छाद्विनिर्गत्येति सूरिराह-

[भा.७६८] गणहरगुणेहिं जुत्तो, जति अन्नो गणहरो गणे अत्थि ।
नीति गणातो इहरा कुणति गणे चेव परिकम्मं ।।

वृ- यदि नाम गणे गच्छे अन्योन्यगणधरो गणधरसमानो गणधरपदार्ह इत्यर्थः । गणधरगुणैर्युक्तो विद्यते न च प्रयोजनेनान्यत्र गतस्तर्हितं गणेस्थापयित्वा गणाद्विनिर्गच्छतिविनिर्गत्य च परिकर्म करोति इतरथा तथाविधान्यगणधरगुणयुक्तगणधरत्वार्हाभावे गण एव स्थितः सन्परिकर्म करोति । अत्र पर आह-ननु तेन पूर्वं द्विविधांशिक्षां शिक्षमाणेनात्मा भावित एव तत किमिदानीं भारत्वाभावेगण एवस्थितःसन् भावनाभिः परिकर्मणयेत्यत आह-

[भा.७६९] जइ विहु दुविहा सिक्खा, आइल्ला होंति गच्छवासम्मि ।
तहवि य एगविहारे जा जोग्गा तीए भावेंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यद्यपि द्विविधा शिक्षा आद्यासूत्रग्रहणसामाचार्यासेवनलक्षणा भवति गच्छवासे तथापि गच्छवासे योग्या नु पुनरेकाकिविहारयोग्या तत एकाकिविहारे या योग्या शिक्षा तद्योग्यसामाचार्यभ्यासरूपतया स आत्मानं भावयति । तद्गतसामाचार्यभ्यासश्च पञ्चभिर्भावनाभिर्भवति, ततस्ताभिर्विशेषत आत्मानं परिकर्मयति ।

[भा.७७०] तवेण सत्तेण सुत्तेण एगत्तेण बलेण य ।
तुलणा पंचहा वुत्ता पडिमं पडिवज्जत्तो ॥

वृ- प्रतिमां प्रतिपद्यमानस्य प्रतिपत्तुकामस्य तुलना कर्मणा पञ्चधा पञ्च प्रकारा प्रोक्ता । तद्यथा-तपसा, सत्वेन, सूत्रेण, एकत्वेन बलेन च, तत्र तपोभावनाप्रतिपादनार्थमाह-

[भा.७७१] चउभत्तेणजतिउं छठेहिं अट्ठमेहिं दसमेहिं ।
बारसचउदसमेहिं य । धीरो धीइमं तुल्ले अप्पा ॥

वृ- प्रथमतश्चतुर्थेन यतते किमुक्तं भवति ? प्रथमतो नियमेन त्रीन् वारान् चतुर्थं करोति । तत्र यदि त्रिभिरपि कृते चतुर्थे क्लाम्यति । ततस्तावदभ्यस्यति चतुर्थं यावच्चतुर्थं कुर्वन् मनागपि न क्लममुपयाति । एवं चतुर्थेन यतित्वा त्रीन् वारान् षष्ठं करोति, तत्रापि यदि वारत्रयं कृते षष्ठे क्लममुपैति ततश्च चतुर्थवत् षष्ठेऽप्यभ्यासं तावत्करोति यावत्तस्यापि करणे ग्लानिर्नोपपद्यते । एवं षष्ठैरात्मानं भावयित्वा अष्टमै र्भावयति, तदनन्तरं दशमैः । ततो द्वादशैरुपलक्षणमेतत् । ततो अनेन प्रकारेण षोडशादिभिश्च धीरो धृतिमान् आत्मानं तुलयति । परिकर्मयति, स च तावत्तुलयति, यावत्षण्मासान् सोपसर्गोऽपि न क्षुधाहानिं उपगच्छति । उक्तं च-

[भा.७७२] जावणऽभत्थो पोरिसि माइ तवोउतंति गुणं ।
कुणइछुहा विजयठा गिरिनदीसिंहेण दिट्ठंतो ॥

[भा.७७३] एक्केक्कं ताव तवं करेति जहा तेन कीरमाणेण ।
हानी न होइ जइयावि होज्ज छम्मास उवसग्गो ॥

वृ- तत्र यदुक्तं चतुर्थादिषु तावदस्यासं करोति यावन्न क्लाम्यति । तत्र गिरिनदीसिंहदृष्टान्तस्तथाहि-यथा सिंहो गिरिनदीं तरन् परतटे चिह्नं करोति, यथा अमुकप्रदेशे वृक्षाद्युपलक्षिते मया गन्तव्यमिति संचरन् तीक्ष्णेनोदकवेगेनापह्रियते । ततः प्रत्यावृत्योत्तरति । एवं प्रमाणतस्तावत्करणं करोति यावदभग्नः सन् सकलामपि गिरिनदीं शीघ्रं तरति । एवं साधुरपि यदि चतुर्थं षष्ठमष्टमादि वा त्रीन् वारान् कृत्वा क्लामं याति । ततश्चतुर्थादिकं प्रत्येकं तावदभ्यस्यति यावन्न क्लाम्यतीति तथाचेमामेवसिंहदृष्टान्तयोजनामाह-

[भा.७७४] जह सीहो तह साहू गिरिनदी सीहो तवोधनो साहू ।
वेयावच्चकिलंतो अभिन्नरोमो य आवासे ॥

वृ- यथा सामान्येन गुहायां वर्त्तमानः सिंहस्तथा गच्छे वर्त्तमानः साधुः यथा च गिरिनदीमुत्तरन् अभ्यासकरणे प्रवृत्तः सिंहस्तथा तपोधनस्तपः करणाभ्यासप्रवृत्तः साधुः एवं च चतुर्थ षष्ठाष्टमादितपः कुर्वन् आत्मवैयावृत्यकरो ज्ञातव्यः । कस्मादिति चेदुच्यते-यस्मात्स तपसा पूर्वसंचितकर्ममलं शोधयन्नात्मन एवोपकारे वर्त्तते । ततः स आत्मवैयावृत्यकरः । एवमात्मनो वैयावृत्त्ये अक्लान्तः सन् आवासेत्ति अवश्यकरणीयेषु योगेषु भिन्नरोमा भवति । रोममात्रमपि न क्लमं याति । गतं तपो भावनाद्वारमधुना सत्व भावनाद्वारमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७७५] पढमाउवस्सयंमि बिइयाबाहिं तइया चउक्कंमि ।
सुन्नहरम्मि चउत्थी पंचमिया तह मसाणंमि ।।

वृ- प्रथमा सत्वभावना उपाश्रये । कथमिति चेत् ? उपाश्रयस्यान्तर्निशि प्रतिमायां प्रतिदिवसमवतिष्ठते । स च तथा च तिष्ठमानो मूषकमार्जारादिस्पर्शनदर्शनादि भयं तावज्जयति यावत्तत्स्पर्शनादि भावेपि रोमोद्भेदमात्रकमपि भयं नोपजायते । उक्तं च–

[भा.७७६] छक्कस्स वक्खइयस्स व मूसियमादीहिं वा निसिचरेहिं ।
जह नवि जायइ रोमुब्भेओ तहवायसोधीरो ।।

वृ- द्वितीया सत्वभावना उपाश्रयस्य बहिरुपरिच्छिन्ने । तत्र हि प्रतिमां प्रतिपन्नस्य बहुतरं मार्जारादि भयं संभवति । ततस्तज्जयार्थं द्वितीया सत्वभावना तृतीया सत्वभावना चतुष्के तत्रापि प्रभूततरं त्रिविधं तस्करारक्षकश्वापदादिभ्यो भयं । चतुर्थी शून्यगृहे, पञ्चमी श्मशाने । तत्र हि यथोत्तरं सविशेषा सविशेषतरा त्रिविधा बाधा । उक्तं च–

सविसेसतरा बाहिं तक्कर आरक्खि सावया दीया ।
सुन्नघरमसाणेसुय सविसेसतरा भवे तिविहा ।।

एताभिः पंचभिरपि च सत्वभावनाभिस्तावदात्मानं भावयति यावद्दिवारात्रौ वा देवैरपि भीमरूपैर्न चालयितुं शक्यते उक्तं च–

देवेहिं भेसिया अवि दिवाया रातो व भीमरूवेहिं ।
तो सत्तभावनाए वहति भरं निज्झतो सगलं ।।

गता सत्वभावना । सम्प्रति सूत्रभावनामाह-

[भा.७७७] उक्कत्तितो वत्तियातिं सुत्ताइं करेइ सोयव्वाइं ।
मुहुत्तद्धपोरिसीतो दिने य काले अहोरत्ते ।।

वृ- सोऽधिकृतो प्रतिमाप्रतिपत्तिनिमित्तं परिकर्मकारी साधुः सर्वाण्यपि सूत्राणि उत्कचिता-पत्कचितानि करोति । किमुक्तं भवति ? उपरितनादारभ्योत्करेणऽधोऽवतरति मूलाद्वा समारभ्य क्रमेणोपर्युपर्यवगाहते । एकान्तरिता लापकग्रहणेन सर्वं मूलादारभ्य तावत्परावर्तयति यावत्पर्यन्तः । तत उपरितनभागादारभ्य गुणितं मुञ्चन् सर्वमगुणितं तावत्पश्चादनुपूर्व्या गुणयति यावन्मूलमित्यादि । ननु पूर्वमपि तस्य स्वाभिधानमिव सर्वमपि श्रुतं पूर्वादिरूपमतिपरिचितमेव ततः कस्मादेवमिदानी-मभ्यस्याति ? उच्यते-कालपरिमाणावबोधनिमित्तं । तथा हि-स तथा सूत्रमाधारनामकनवम-पूर्वगततृतीयवस्तूक्तप्रकारेण परावर्तयति । यथा उछ्वासपरिमाणं यथोक्तरूपमवधारयति । तत उच्छ्वासपरिमाणावधारणात् उछ्वासनिश्वासपरिमाणावधारणं तस्मात्स्तोकस्य स्तोकान्मुहूर्तस्य मुहूर्तैरर्धपौरुष्याभ्यां पौरुष्याः पौरुषीभिर्दिनानामुपलक्षणमेतत् । रात्रिणां च दिनरात्रीणां च । वाऽहोरात्राणामेवं दिनरात्रिभ्यां मुहूर्तार्द्धात् पौरुषी दिनानि अहोरात्रांश्च काले कालविषये जानाति । उक्तं च–

[भा.७७८] जइवियसेवन्नादी सनाममिव परिचियं सुयं तस्स ।
कालपरिमाणहेउं तहावि खलु तज्जयं कुणति ।।

[भा.७७९] उस्सासातो पाणूततोयथोवो ततो वियमुहुत्तो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुहुत्तेहिं पोरिसी तो जाणंति निसा य दिवसा य ।।

वृ- उक्ता सूत्रभावना । साम्प्रतमेकत्वभावनामाह-

[भा.७८०] अन्नो देहातो अहं, नाणत्तं जस्स एवमुवलद्धं ।
सो किंचि आहिरिक्कं न कुणति देहस्स भंगेवि ।।

वृ- अहं देहादन्य इत्येवमेकत्वभावनया यस्य साधोः परिकर्मणां कुर्वतः शरीरादात्मनि नानात्वमुपलब्धः सदिव्यादिषु उपसर्गवेलायां देहस्य भङ्गेऽपि विनाशेऽपि न किञ्चिदपि अहिरिक्कमिति उत्रासं न करोति । गता एकत्वभावना । सम्प्रति बलभावनामाह-

[भा.७८१] एमेवय देहबलं अभिक्खमासेवणाइ तं होइ ।
लंक्खक मल्ले उवमा, आसकिसोरे य जोग्गविए ।।

वृ- एवमेव अनेनैव प्रकारेण बलभावनयापि देहस्तथा भावयितव्यो, यथा देहस्य करणीयेषु योगेषु बलं न हानिमुपगच्छति, ननु तपसा क्रियमाणेन नियमतोदेहबलमपगच्छति, ततः कथमुच्यते बलभावनया तथा देहोभावयितव्यो यथा देहबलं न हानिमुपयातीति सत्यमेतत् । किन्तु देहबलं धृतिबलसूचनार्थं ततोऽयं भावार्थो बलभावनया तथा यतेत यथा देहापचयेऽपि धृतिसमुत्साहवती समुत्साहवतितरा समुपजायते, । यथा प्रबलामपि परीषहचमूमतसोपसर्गामपि लीलया योधयति । तथा चोक्तम्—

कामं तु सरीरबलं हायति तव भावनाएत्तस्स ।
देहावचएवि सत्ती जहहोइ धिती तहा जयति ।।
कसिणा पीरसहचमू जइ उद्वेज्जाहि सोवसग्गावि ।
दुद्धरपहकरवेगा भयजननी अप्पसत्ताणं ।।
धितिधणियबद्धकच्छो जो होइ अनाइलो तमव्वहितो ।
बलभावनाए धीरो संपुन्नमणोरहो होइ ।।

अपिच सर्वा अपि भावना धृतिबलपुरस्सराः । ततो विशेषतो धृतिबलभावना भावयितव्या यथा प्रबलदिव्याद्युपसर्गोपनिपातेऽपि स्वकार्यं साधयति । न खलु धृतेः किंचिदसाध्यमस्ति । आह च-

[भा.७८२] धितिबलपुरस्सरातो हवंति सव्वावि भावनातोय ।
तं तु न विज्जइ सद्धं जं धिइमंतो न साहेइ ।।

वृ- तच्च तपोबलप्रभृतिकं तपः प्रभृतीनामाभीक्ष्णेसेवनया भवति । अत्रोपमा दृष्टान्तो लंखकोमल्लश्च न केवलं लंखकोमल्लकश्च दृष्टान्तः । किन्त्वश्वकिशोरश्च । किं विशिष्ट इत्याह-योज्ञापितः परिकर्मित इत्यर्थः । एषां च दृष्टान्तानामियं भावना-लङ्खकोऽभ्यासं कुर्वन्नभ्यासप्रकर्षवशतो रज्जावपि नृत्यं करोति । मल्लोऽपि करणानि पूर्वं दुःखेनाभ्यस्यन् कालेन कृताभ्यासः पश्चादयत्नेन प्रतिमल्लं जयति । अश्वकिशोरोऽपि हस्त्यादिभ्यो भयं गृह्णानः दुःखं तत्पार्श्वे प्रथमतः स्थाप्यमानोऽभ्यासप्रकर्षवशतो न मनागपि तद्भयं करोति । तथा च सति संग्रामे हस्त्यादिभिश्च भवने ऽपि न भङ्गमुपयाति । एषा दृष्टान्तभावना । दार्ष्टान्तिकयोजनात्वियम् । एवमभीक्ष्णासेवनया तपसा न क्लाम्यति । सत्त्वावष्टम्भतो देवादिभ्यो न बिभेति, सूत्रतः सूत्रार्थचिन्तनप्रमाणे कालं दिनरात्रिगतागतरूपं जानाति, । एकत्वभावनातो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथोक्तस्वरूपो निस्सङ्गो भवति । बलभावनातो धृत्यवष्टम्भः प्राणात्ययेऽपि नात्मानं मुञ्चति । तदेवं परिकर्मकरणं व्याख्यातम् । सम्प्रतिं दो जोहा इत्येतत् व्याख्यातव्यं । तत्रपरिकर्मणिकृते आचार्येण स परीक्षणीयः । किमसौ कृतसम्यक् परिकर्मा किं वानेति । तत्र द्वयोर्योध निदर्शने त एवाह-

[भा.७८३] पज्जोयमवंतीवइखंडकण्णसाहस्सि मल्ल पारिच्छा ।
महकाल च्छगलसुरघड तालपिसाए करे मंसं ।।

वृ- अवन्तीपतिः प्रद्योतः, खण्डकर्णो नामं मन्त्री । अन्यदा राज्ञः पार्श्वे साहस्त्रिकः साहस्त्रिकयोधी मल्लः समागतः, । तस्य खण्डकर्णेनामात्येन महाकालश्मशाने च्छागेन सुराकुटेन च मदिराघटेन परीक्षा कृता, । तत्र तालप्रमाणः पिशाचस्तालपिशाचस्तस्य करे हस्ते मांसं दत्तवान् । द्वितीयो मल्ल आगतः । सोऽपि तथैव परीक्षितः । केवलं स तालपिशाचादभयमगमत् । एष गाथासंक्षेपार्थः ।। भावार्थः- कथानकादवसेयस्तच्चेदम्, अवंतीजनवए पज्जोयस्स रन्नोमंती खंडकन्नो नाम । अन्नया सहस्संपि जो जुद्धे जिनति सो आगतो ओलग्गामिति रायाणं विन्नवेति । रन्ना भणियं-उलग्गाहि । ततो सो भणति- ममवित्ती जा सहस्सजोहाणं सा दायव्वा । ततो खंडकन्नो चिंतेति । परिक्खामि ताव एयस्स सत्तं जइसत्तमंतो होइ ततो सव्वं साहस्सजोही । ततो खंडकन्नेणं च्छगलओसुराघडतो य दातुं भणितो, । अज्ज कण्हचउद्दसीए रत्तिं महाकाले मसाणे भक्खेयव्वं । ततो सो महाकालं गंतुं च्छगलयं उद्दवित्ता पउलेउं मंसं खाइउं सुरं च पाउमाढत्तो । नवरं तालपिसाचो आगंतुं हत्थं पसारेति । ममवि देहित्ति । ततो सो सहस्सजोही अभीतो पिसायस्य वि देति । अप्पणा य खायति य, रन्नाय पच्चंतियपुरिसापडियारगा पेसिया ते जहावित्तं पसित्ता रन्नो खंडकन्नस्सयं कहेंति । सच्चं सहस्सजोही एसोत्ति वित्तीदिन्ना, । अन्नोवि आगंतुं विन्नवेत्ति । उलग्गामित्ति सोवि तहेव परिक्खिउमाढत्तो । तालपिसातो आगतो भीतो, नट्ठोपरिचारगेहिं खंडकन्नस्स य जहावित्तं कहियं । न दिन्ना सहस्स जोहवित्ती । एवमाचार्योऽपि किमयं कृतसम्यक् परिकर्मा किं वा नेति तपःप्रभृतिभिः तं परीक्षेत कथमिति चेदत आह-

[भा.७८४] न किलम्मति दीहेणवि तवेण न वि तासितो वि बीहेति ।
छन्ने वि ठितो वेलं साहति पुट्ठो अवितहं तु ।।

[भा.७८५] पुरपच्छ संथुएहिं न सज्जइ दिट्ठिरागमाईहिं ।
दिट्ठी सुहवण्णेहिय अब्भत्थबलं समूहंति ।।

वृ- आचार्यस्तपःकारापणादिना प्रकारेण तं सम्यक् परीक्षते । तद्यथा-दीर्घेणापि तपसा न क्लाम्यति तदा स तपः परिकर्मितो ज्ञातव्यः । यदा तु नवित्रासितो मार्जारप्रभृतिश्वापदादिभिर्न बिभेति । तदा सत्त्वपरिकर्मितः । यदा तु मेघच्छन्ने नभसि वसति मध्ये वा स्थितः कियद्गतं दिवसस्य कियद्वा गतं रात्रेः कियद्वा शेषमिति दिवसस्य रात्रेर्वा वेलां पृष्टः सन्नवितथं साधयति कथयति, तदा ज्ञातव्यः स सूत्रभावना परिकर्मितः, तथा पूर्व संस्तुता मातापित्रादयः पश्चात्संस्तुता भार्या श्वश्रू श्वशुरादयः तेषु पूर्वसंस्तुतपश्चात् संस्तुतेषु वन्दनार्थमुपगतेषु गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात् । दृष्टिरागादिभिर्न स्निग्धदृष्टयादिभिः । आदिशब्दात् मुखविकाशादिपरिग्रहः न सज्जते न सङ्गमुपजाति, तदा स एकत्वभावना परिकर्मितो वेदितव्यः, । एतदेव व्याचष्टे-दृष्टिमुखवर्णाभ्यां स्निग्धया दृष्ट्या अवलोकनेन स्फारिकृतकान्तिमुखवर्णकरणेन च । उपलक्षणमेतत् संभाषणादिना च तस्याध्यात्मबलमेकाकित्व भावनाबलं समूहंति परिभावयन्ति सूरयः । बलभावनामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७८६] उभयतो किसो किसदेहो दढोकिसोया वि दोहिवि दढो य ।
बीयचरमापसत्था धितिदेहं समप्पिया भंगा ।।

वृ- बलचिन्तायां चतुर्भङ्गी । तद्यथा-उभयतो धृति देहाभ्यां कृशः । किमुक्तं भवति ? शरीरेण कृशो धृत्या च दृढः एष द्वितीयः । दृढो किसोयावित्ति शरीरेण दृढो धृत्याकृशः, एष तृतीयः । द्वाभ्यामपि च शरीरेण धृत्या च दृढः । एष चतुर्थः । अत्र द्वितीयचतुर्थभङ्गौ धृतिदेहसमाश्रितौ । धृतिदेहविषयौ प्रशस्तावेकाकिविहारप्रतिमायोग्यौ । द्वितीयस्य दृढधृत्याश्रयत्वात् । चरमस्य दृढधृतिदेहाश्रयत्वात् । एते च एकाकि विहारप्रतिपत्तये कृतपरिकर्माणः स्वयमेवात्मानं तुलितमतुलितं वा प्रायो जानन्ति । ज्ञात्वा च प्रतिमाप्रतिपत्तये आचार्यान् विज्ञपयन्ति । तथा चाह-

[भा.७८७] सुत्तत्थझरियसारा सुतेनकालं तु सुट्ठु नाऊणं ।
परिचिय परिकम्मेण य सुट्ठु तुलेऊण अप्पाणं ।।

[भा.७८८] तो विनवेंति धीरा आयरिए एगविहरणमती उ ।
परियागसुयसरीरे कयकरणा तिव्वसद्धागा ।।

वृ- सूत्रार्थयोर्झरणेन क्षरणेन साराः शोभनाः सूत्रार्थझरणसारा सूत्रेण सूत्रपरिकर्मणातः कालं दिवसरात्रिगतमभ्रच्छन्नगगनादावपि सुष्ठुज्ञात्वा परिचितेन स्वभ्यस्तेन परिकर्मणा तपःप्रभृति परिकर्मणा सुष्ठु आत्मानं तुलयित्वा धीरा महासत्त्वा एकाकिविहरणमतिका एकाकिविहाराभिप्रायाः पर्याये गृहस्थपर्याये प्रव्रज्यापर्याये च श्रुते पूर्वगते शरीरे च कृतकरणाः कृताभ्यासास्तीव्रश्रद्धाकाः प्रवर्द्धमानश्रद्धाकाः ततस्तुलनानन्तरमाचार्यान् विज्ञपयन्ति, अत्रयोऽनाचार्यः स आचार्य विज्ञपयति । यथा-'भगवन् कृतपरिकर्माहमिच्छामि युष्माभिरनुज्ञात एकाकिविहारप्रतिमां प्रतिपत्तुमिति, यः पुनराचार्यः स स्वगच्छाय कथयति । यथा परिकर्मितोऽहमतः प्रतिपद्ये एकाकिविहारप्रतिमामिति यदुक्तं-परियाग सुय सरीरे इति तद्व्याख्यानार्थमाह-

[भा.७८९] एगूण तीस वीसा, कोडी आयारवत्थु दसमं च ।
संघयणं पुन आदिल्लगाण तिण्हं तु अन्नयरं ।।

वृ- द्विविधः पर्यायो-गृहि पर्यायो व्रतपर्यायश्च । तत्र यो जन्मत आरभ्य पर्यायः सः गृहिपर्यायः । स च जघन्यत एकोनत्रिंशद्वर्षाणि कथमिति चेदुच्यते-इदं गर्भाष्टमवर्षं प्रव्रजितो विंशतिवर्षपर्यायस्य च दृष्टिवाद उद्दिष्टः, एकेनवर्षेण योगः समाप्तः । सर्वमीलनेन जातान्येकोनत्रिंशद्वर्षाणि, व्रतपर्याय-प्रव्रज्याप्रतिपत्तेः आरभ्य स च जघन्यतो विंशतिवर्षाणि तावत् प्रमाणपर्यायस्यैव दृष्टिवादोद्देश-भावात् । उत्कर्षतो जन्मतो पर्यायो व्रतपर्यायो वा देशोनापूर्वकोटी एतच्च पूर्वकोट्यायुष्के वेदितव्यं नान्यस्य । उक्तं च-

[भा.७९०] पडिमा पडिवनस्स उ मिहिपरियातो जहनउगुणतीसा ।
जतिपरियातो वीसा दोण्हवि उक्कोसदेसूणा ।।

वृ- श्रुतं जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारनामकं वस्तु यावत्तत्र कालज्ञानस्याभिधानात्, उत्कर्षतो यावद्दशमं पूर्वं, च शब्दस्यानुक्तार्थ संसूचनाद्देशोनमिति द्रष्टव्यम् । तथा चोक्तम्-

आयारवत्थुतइयं जहन्नगं होइ नवमपुव्वस्स ।
तहियं कालन्नाणं दस उक्कोसाणि भिन्नाणि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संहननं पुनरादिमानां त्रयाणां संहननानां अन्यतमद्यदा तेनापृष्टं प्रतिपद्येऽहमिति तदा स स्थिरीकरणनिमित्तमिति वक्तव्यः ।

[भा.७९१] जइवि सि ती ओवेओ आयपरे दुक्करं खु वेरग्गं ।
आपुच्छणेणु सन्नणपडिवज्जण गच्छ समवायं ।।

वृ- यद्यप्यसि भवसि त्वं तया परिकर्मणया उपेतो युक्तः तथाप्यात्मपरे आत्मपरविषयेपु आत्मसमुत्थेपु परसमुत्त्थितेपु उभयसमुत्थेपु चेत्यर्थः । परीषहेष्विति गम्यते दुष्करं वैराग्यं रागनिग्रहण-मुपलक्षणमेतद्वेपनिग्रहणं चेति ततो भूय आपृच्छना क्रियते । किं त्वया कृता सम्यक् परिकर्मणा किं वा नेति एवमापृच्छनायां कृतायां यदि सम्यक् परिकृतकर्मा ज्ञातो भवति ततस्तस्य विसर्जनमनुज्ञा तस्य क्रियते । अनुज्ञातश्च गच्छसमवायकृत्वा प्रशस्तेषु द्रव्यक्षेत्रकालभावेपु प्रतिपादनं प्रतिमायाः प्रतिपत्ति करोति । एष गाथासंक्षेपार्थः । साम्प्रतमेनामेव विवरीपुः पूर्वार्धं तावद्वयाख्यानयति-

[भा.७९२] परिकम्मितो वि वुच्चइ किमुय अपरिकम्ममंदपरिकम्मा ।
आयपरोभयदोसेसु, होइदुक्खंखुवेरग्गं ।।

वृ- परिकर्मितोऽपि सुष्ठु कृतपरिकर्मापि उच्यते आपृच्छयते इति तात्पर्यार्थः यथा त्वया कृता सत्परिकर्मणा किं वा न कृतेति, किमुत अकृतपरिकर्मामन्दपरिकर्मा वा ते सुतरामाप्रच्छनीया इति भावः । कस्यादेवमाप्रच्छना क्रियते इति चेत् अत आह-यत आत्मपरोभयदोपेपु आत्मपरोभयसमुत्थेपु परीषहेषु समुत्थितेषु दुःखं खु भवति वैराग्यं रागोपशमलक्षणमुपलक्षणमेतत् द्वेषोपशमो वा ततो माभूत् प्रतिपत्तौ च कश्चिद्वयाघात इत्यापृच्छना क्रियते । अथ के ते आत्मपरोभयसमुत्थाः परीपहा इति तान् प्रतिपादयति-

[भा.७९३] पढमबियाद लाभे रोगे पणादिगाय आयाए ।
सी उणहादी उ परे निसीहियादी उ उभए वि ।।

वृ- प्रथमः परीषहः क्षुद्दितीयः पिपासा । आदि शब्दाद्रत्यरत्यादि परीपहपरिग्रहः । तथा लाभो लाभपरीपहः, रोगो रोगपरीपहः प्रज्ञादिकाः प्रज्ञादयः परीषहाः आदिशब्दादज्ञानादिपरिग्रहः । एते आत्मनि आत्मसमुत्थाः परीपहाः । तथा शीतोष्णादयः सीतोष्णदंशमशकादिपरीपहा परे परविषयाः परसमुत्था इत्यर्थः । नैषेधिक्यादयः नैषेधिकीचर्यादयः पुनः परीपहा उभयस्मिन् उभयसमुत्थाः ।

सम्प्रति झरणेलगच्छगतिव्याख्यानार्थमुपक्रमते-

[भा.७९४] एए समुप्पन्नेसु, दुक्खं वेरग्ग भावना काउं ।
पुव्वं अभावितो खलु स होइ एलगच्छोउ ।।

वृ- यः खलु पूर्वमभावितो यथोक्तपरिकर्मणया अपरिकर्मितो भवति । यथा शैक्ष एडकाक्षस्तस्य एतेषु आत्मपरोभयसमुत्थेपु परीपहेषु दुःखं महत्कष्टं वैराग्यभावनारागनिग्रहभावनाउपलक्षणमेतत् । द्वेषनिग्रहभावनाश्च कर्तुं न शक्यन्ते । एवं रागद्वेषनिग्रहभावना कर्तुमिति भावः । यस्तु सम्यक्कृतपरिकर्मा भवति । स करोत्ययत्नेन वैराग्यभावनां यथाक्षपकस्तथा चाह-

[भा.७९५] परिकम्मणाए खवगो सेह बलामोडिए वि तहटाति ।
पाभातिय उवसग्गे कयंमि पारेइ सो सेहो ।।

[भा.७९६] पारेहि तंपि भंते देव य अच्छी चवेड पाडणया ।
काउस्सग्गा कंपन एलगस्स पएसनिव्वत्ती ।।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वृ- परिकर्मणायामुदाहरमं क्षपकः । बला मोटिकायां श्रुतापर्याप्तत्वेन परिकर्मणायामेव प्रतिपत्तावाहरणं शैक्षकः । सोऽपि शैक्षकस्तथा क्षपक इव तिष्ठति । कायोत्सर्गेणावतिष्ठते, ततो देवतया प्राभातिके उपसर्गे कृते स शैक्षकः पारयति पारयित्वा च क्षपकं ब्रुते । तथा भदन्त ! त्वमपि पारय जातं प्रभातमिति । ततो देवतया चपेटाप्रदानेन तस्याऽक्ष्णोः पातनमकारि, तदनन्तरं शैक्षकानुकम्पया देवताराधनार्थं कायोत्सर्गः कृतस्तेन देवताया आकम्पनमावर्जनमभूत्ततः सद्यो मारितस्य एडकस्य स प्रदेशयोरक्षणोसस्तत्र निवृत्ति निष्पत्तिः कृताः । एष गाथाद्वयसंक्षेपार्थः भावनार्थः कथानकादवसेयस्तच्चेदम्- एगो खवगो एगल्लविहारपडिम्मए परिकम्मं करेइ, । सो पडिमंठितो सुत्तत्थाणि झरति । अन्नो खवगो अप्पसुतो आयरियं विन्नवेति, अहंपि परिकम्मं करेमि, । आयरिएणं भणियं, तुमं सुएणं अपज्जतो न पाउग्गोसि, वारिज्जमाणो असुणित्ता तस्स जमलतो तहेव पडिमं ठितो देवया चिंतेति एस आणाभंगे वट्टतिति, । अड्ढरत्ते पभायं दंसेति, । तं दट्ठुं इयरो तदणुकंपणट्ठा देवयाए आकंपननिमित्तं धणिउं काउस्सग्गेण ठितो, । ततो सा देवया आगता भणति । खमगा संदिसह किं करेमि, खमगेण भणियं,-कीस ते सेहो दुक्खावितो देहि से अच्छीणि ताहे तीए देवयाए भणियं-अच्छीणि अप्पदेसी भूयाणि, खवगो भणति-कहवि करेहि, ताहे सज्जोमारियस्स एलगस्स सप्पएसाणि सेहखमगस्स लाइयाणि । साम्प्रतमेतस्य निदर्शनोपनयमाह-

[भा.७९७] भावियमभावियाणं गुणागुणणाइयत्तितो थेरा ।
वितरंति भावियाणं, दव्वादिसुभेयपडिवत्ती ।।

वृ- भावितानां कृतकर्मणां गुणा यथा क्षपकस्य अभावितानामकृतपरिकर्मणानामगुणा यथा शैक्षकक्षपकस्य इति । एवं भावितानां गुणागुणज्ञाः स्थविरा आचार्यास्तत आपृच्छानन्तरं यान् भावितान् सम्यग्जानन्ति तेषां भावितानां प्रतिमाप्रतिपत्तिं वितरन्ति समनुजानन्ति, । एतेन आपुच्छणा विसज्जण इत्येतदव्याख्यातमधुना पडिवज्जण इत्येतद्व्याख्यानार्थमाह- दव्वादिसुभेयपडिवत्ति द्रव्यादौ द्रव्यक्षेत्रकालभावेषु शुभेषु प्रशस्तेषु प्रतिमायाः प्रतिपत्तिर्भवति । कथमित्याह-

[भा.७९८] निरवसग्गनिमित्तं उवसग्गं वंदिऊण आयरिए ।
आवस्सियं तु काउं निरवेक्खो वच्चए भयवं ।।

वृ- पूर्वसमस्तमपि स्वगच्छमागत्य यथार्हं क्षमयित्वा तदनन्तरमाचार्येण सकलस्वगच्छसमन्वितेन सकलसङ्घसमन्वितेन वा सह निरुपसर्गनिमित्तमुपसर्गाभावेन सकलमपि प्रतिमानुष्ठानं निर्वहत्वित्येतन्निमित्तं कायोत्सर्गं करोति । तद्यथा-निरुवसग्गवत्तिआए सद्धाए मेहाए इत्यादि कायोत्सर्गानन्तरं च सूत्रोक्तविधिना प्रतिमां प्रतिपद्य आचार्यान्वंदते, वन्दित्वा च आवश्यकी कृत्वा सभाण्डमात्रोपकरणः सिंहइवगुफातो निरपेक्षं पूर्वपिक्षावरिहितो भगवान् व्रजति । आचार्याश्च सकलसङ्घसमन्विताः पृष्टतोऽनुव्रजन्ति ते च तावद्गच्छन्ति यावद्ग्रामस्य नगरस्य वा आघाटस्ततो निरीक्षमाणास्तावदासते यावद् दृष्टिपथातीतो भवति ततः सर्वे विनिवर्तन्ते ।

सम्प्रति वक्ष्यमाणवक्तव्यता संसूचनाय द्वारगाथामाह-

[भा.७९९] परिचियकालामंतण खामण तव संजमे य संघयणा ।
भत्तोवहि निक्खेवे आवणो लाभगमने य ।।

वृ- परिचितश्रुतः सन् यावन्तं कालं परिकर्म करोति, तस्य तावत्कालो वक्तव्यः । तथा स्वगणामन्त्रणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तव्यम् । तथा क्षामण तपः संयमः संहननं तथा भक्तमलेपकृदादि उपधिर्यावत्संख्याको जघन्यत उत्कर्षतश्च तावत्संख्याको वक्तव्यः । तथा निक्षेपउपधेर्नकर्तव्योवसतेरन्यत्र गच्छतेति वाच्यम् । तथा मनसापि यत्प्रायश्चित्तमापन्नो भवति तत्रतत्तद्दातव्यम् । तथा सचित्ताचित्तलाभो यथाकर्तव्यस्तथा भणनीयः । तथागमनंविहारस्तद्यस्यां पौरुष्यां कर्तव्यं । तथा कथयितव्यम् । एष द्वारगाथासंक्षेपार्थः ।

साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतः परिचितकालद्वारमाह-

[भा.८००] परिचियसुओ उ मग्गसिरमादि जा जेठ कुणति परिकम्मं ।
एसो च्चिय सो कालो, पुनरेइ गणं उवग्गंमि ।।

वृ- परिचितमत्यन्तमभ्यस्तीकृतं श्रुतं येन स परिचितश्रुतः सन्मार्गशीर्षमासमादिं कृत्वा यावज्ज्येष्ठामासस्तावत्परिकर्म करोति । एष एव तावत्प्रमाणं एवं साधोः प्रतिमाप्रतिपित्सोर्जघन्यपदे उत्कर्षतः कालः परिकर्मणायाः । एतावत्प्रमाणोत्कृष्टपरिकर्मणा कालानन्तरं च यद्यप्यव्यवधानेन प्रतिमां प्रतिपित्सुस्तथापि अग्रस्यमुखस्य वर्षाकालसम्बन्धिनः समीपमुपाग्रमाषाढमास इत्यर्थः । तस्मिन् वर्षाकालयोग्यमुपधिं ग्रहीतुं पुनरत्यागच्छति स्वगणमिति एवं तावन्मुकुलितमुक्तमिदानीमेतदेव सविशेषतरं विवृणोति-

[भा.८०१] जो जति मासे काहिति पडिमं सो तत्तिए जहनेन ।
कुणति मुनी परिकम्मं, उक्कोसं भावितो जाव ।।

वृ- योमुनिर्यातिमासान् प्रतिमांकरिष्यति, स तति मासान् जघन्येन परिकर्म करोति, तद्यथा-मासिकी प्रतिमां प्रतिपित्सुरेकं मासं द्वैमासिकी द्वौमासौ त्रैमासिकी त्रीन्मासान् एवं यावत् सप्तमासिकी सप्तमासान् एवं च मार्गशीर्षादारभ्य सप्तमासिक्या परिकर्मज्येष्टमासे समाप्तिमुपयाति, एतावानेव च जघन्यपदे उत्कृष्टकालः ततः परं प्रतिमानां मासैः परिमाणां संभवात् उत्कर्षमधिकृत्य पुनः परिकर्मणाकालो यावता कालेन परिपूर्णमागमोक्तेन प्रकारेण भावितो भवति, तावान् वेदितव्यः । तत्र जघन्यपदपरिकर्मणा-कालमधिकृत्य कासांचित्प्रतिमानां तस्मिन्नेव वर्षे प्रतिपत्तिं कासांचिद्वर्षान्तरेऽभिधित्सुराह—

[भा.८०२] तव्वरिसे कासिंची पडिवत्ती अन्नहिं उवरिमाणं ।
आइणपइणस्सउ इच्छाए भावना सेसे ।।

वृ- कासांचिदाद्यानां प्रतिमानां तद्वर्षे एव यस्मिन् वर्षे परिकर्मसमारब्धवान् तस्मिन्नेव वर्षे प्रतिपत्तिरुपरितनीनामन्यस्मिन् वर्षे । इयमत्र भावना-मासिक्या द्वैमासिक्यास्त्रैमासिक्याश्चतुर्मासिक्या वा यस्मिन्नेव वर्षे परिकर्म तस्मिन्नेव वर्षे प्रतिपत्तिः । कस्मादिति चेत् ? परिकर्मणाकालस्य प्रतिमा-कालस्य च आषाढमासपर्यन्तादर्वाक् लभ्यमानत्वात् पाञ्चमासिकीपाएमासिकीसप्तमासिकी-नामन्यस्मिन् वर्षे परिकर्म अन्यस्मिन् वर्षे प्रतिपत्तिमार्गशीर्षमासादारभ्य परिकर्मकालस्य प्रतिमाकालस्य चाषाढमासपर्यन्तादर्वाग लभ्यमानत्वादिति । येन च या प्रतिमा पूर्वमाचीर्णा तस्याचीर्णप्रतिममस्य तां प्रतिमां प्रति परिकर्मणा इचछया यदीचछा भवति ततः करोति नोचेन्नेति । किमुक्तं भवति ? चिरकालकृततया यदि गताभ्यासो भवति ततः करोति परिकर्मणामन्यथा नेति शेषे येन या प्रतिमा पूर्व नाचीर्णा तस्य तां प्रति नियमाद्भावना परिकर्मणा भवति साम्प्रतमामन्त्रणक्षामणतपः संयमद्वाराण्याह—

[भा.८०३] आमंतेऊण गणं स बालवुड्ढाउलं खमावेत्ता ।
उग्गतवभावियप्पा संजमपढमे व बितिए वा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गणं गच्छं, सह बालाद्यैस्ते च ते वृद्धाश्च तैराकुलमामन्त्र्य समाहूय क्षमयति, यथा यदि कश्चित् प्रमादतो मया न सुष्ठु भवतां वर्तितं तदहं निःशल्यो निःकषायः क्षमयामीति, ये च पूर्वविरुद्धास्तानेवं स विशेषतः क्षमयति, । एवमुक्ते ये लघवस्ते आनन्दाश्रुप्रपातं कुर्वाणा भूमिगतशीर्षास्तं क्षमयन्ति । ये पुनः श्रुतपर्यायवृद्धाः तान् पादेषु पतित्वा स क्षमयति । उक्तं च--

जई किं चि पमाएणं न सुट्ठु भे वट्टियं मए पुव्विं ।
तं खामेमि अहं निस्सल्लो निक्कसाओय ।।

आनंदअंसुपायं कुणमाणा तेवि भूमीगयसीसा । तं खामेति जहरिहं, जहारिहं खामिया तेन ।।

एवं क्षमयतस्तस्य के गुणा इति चेत् ? उच्यते-निःशल्यता विनयप्रतिपतिर्मार्गस्य प्रकाशनं, अपहृतभारस्येव भारवाहस्य लघुता, एकाकित्वप्रतिपत्त्यभ्युपगमः । क्वचिदप्यप्रतिबद्धता एते प्रतिमासु प्रतिपद्यमानासु क्षमयतो गुणाः । उक्तं चः-

खामेतस्स गुणा खलु निसल्लयविनयदीवनामग्गे ।
लाघवियंएगत्तं अप्पडिबद्धो य पडिमासु ।।

गतमामंत्रणद्वारं । स एवं च क्षामयित्वा भावितात्मा तपोभावनाभावितान्तःउग्रतपः करोति, गतं तपोद्वारं । स च तथा प्रतिमां प्रतिपन्नः संयमे प्रथमे वा सामायिकलक्षणे वर्तते, द्वितीये वा च्छेदोपस्थापने । तत्र प्रथमे संयमे मध्यमतीर्थकरतीर्थेषु विदेहतीर्थकरतीर्थेषु च द्वितीये भरतादि प्रथमपश्चिम-तीर्थकरतीर्थेषु, । एतच्च प्रतिपद्यमानकानधिकृत्मयोक्तं वेदितव्यम् । पूर्वप्रतिपन्नाः पुनः पञ्चानां संयमा-नामन्यतमस्मिन् संयमे भवेयुः । उक्तं च--

पढमे वा बिइए वा पडिवज्जइ संजमम्मि पडिमातो ।
पुव्वपडिवन्नतो पुन, अन्नयरे संजमे होज्जा ।।

गतं संयमद्वारमधुना भक्तद्वारमुपधिद्वारं चाह-

[भा.८०४] पग्गहियमेवकडं भत्तजहन्नेण नवविहो उवही ।
पाउरणवज्जियस्स उ इयरस्स दसा वि जा बारा ।।

वृ- भक्तमुपलक्षणमेतत्, पानकं च अलेपकृत् कल्पते । तथाप्रगृहीतं इहालेपकृद्भिक्षाया उपरितनानां तिसृणां भिक्षाणां मध्यमा मध्यमग्रहणे चाद्यंतयोरपि ग्रहणं । ततोऽयमर्थः-सप्तसु पिण्डैषणासु मध्ये उपरितनीनां चतसृणामन्यतमस्याः पिएडैषणाया अभिग्रहः । आद्यानां तिसृणां पिएडैषणानां प्रतिषेधः । एतच्च चूर्णिकारोपदेशात् विवृतं । तथा चाह चूर्णिकृत्--

[भा.८०५] उपरिल्ला हिं चउहिं, पिंडेसणाहिं अन्नयरीए ।
अभिग्गहो सेसासु तिसु अग्गहो इति ।।

वृ- गतं भक्तद्वारमुपधिद्वारमाह-जघन्येनोपधिर्नवविधः पात्रपात्रबन्धपात्रस्थापना पात्रकेसरिका पटलरजस्त्राणगोच्छकमुखवस्त्रिकारजोहरणलक्षण एष च नवविधो जघन्यत उपधिर्यः प्रावरण-वर्जीकृतप्रावरणपरिहाराभिग्रहस्तस्य वेदितव्यः । इतरस्य कृतप्रावरणपरिग्रहस्य दशादिको विज्ञेयो यावत् द्वादशविधः । तत्रैकसौत्रिककल्पपरिग्रहे दशविधः सौत्रिककल्पद्वयपरिग्रहे एकादशविधः कल्पत्रयस्यापि परिग्रहे द्वादशविधः । गतमुपधिद्वारं सम्प्रति निक्षेपद्वारमाह-

[भा.८०६] वसहीए निग्गमनं हिंण्डतो सव्वभंडमादाय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयनिक्खिवइ जलाइसु जत्थ से सूरो वयति अत्थं ।।

वृ- वसतेः सकाशाद्यदि निगमनं भवति ततो नचनैवावधारणेनैव भाण्डमुपकरणमात्मीयवसतौ क्षिपति किन्तु सर्व भाण्डमादाय हिण्डते । हिण्डमानश्च यत्रैव जलादिषु जले स्थले ग्रामे नगरे कानने वने वा तस्य सूर्यो व्रजत्यस्तं तत्रैव कायोत्सर्गेण अन्यथा वावतिष्ठते । न पुनः पदमात्रमुत्क्षिपति । गतंनिक्षेपद्वारमधुना आपन्नलागभगमनद्वारण्याह-

[भा.८०७] मनसा वि अनुग्घाया सच्चित्ते चेव कुणति उवदेसं ।
अच्चित्तजोगगहणं भत्तं पंथो य तइयाए ।।

वृ- मनसा वि आस्तां वाचा कायेन चेत्यपि शब्दार्थः । यानि प्रायश्चित्तानि आपद्यते तानि सर्वाण्यपि तस्यानुद्घातानि गुरूणि भवन्ति । गतमापन्नद्वारम् । लाभद्वारमाह-सचित्ते चेत्यादि लाभो द्विविधः-सचित्तस्य अचत्तिस्य च तत्र सचित्तस्य प्रव्रजितुकामस्य मनुष्यस्य, अचित्तस्य भक्तपानादेः । तत्र यदा सचित्तस्य लाभ उपस्थितो ज्ञायते । यथा नूनमेष प्रव्रजिष्यति नतु स्थास्यति तदा तस्मिन् सचित्ते प्रव्रजितुमुपसम्पद्यमानतया संभाविते उपदेशमेव करोति । न तु तं प्रव्राजयति तस्य तामवस्थामुपगतस्य प्रव्रज्यादानानर्हत्वात् । एवकारो भिन्नक्रमः । स च यथास्थानं योजितः । अचित्तस्य पुनर्योग्यस्य भक्तस्य पानस्य वाग्रहणं करोति । गतं लाभद्वारं । गमनद्वारमाह-भक्तं भिक्षाचार्या पन्थाः पथि विहारक्रमकरणाय गमनं, तृतीयस्यां पौरुष्यां नान्यदा तथा कल्पत्वात् । तदेवं भिक्षौ प्रतिमाप्रतिपत्तिविधिरुक्तः ।

सम्प्रति गणावच्छेद्यादिषु तामेवाह-

[भा.८०८] एमेव गणायरिए गणनिक्खिवणम्मि नवरनाणत्तं ।
पुव्वोवहिस्स निक्खिवणमपुव्वगहणं तु ।।

वृ- एवमेव अनेनैव भिक्षुगतेन प्रकारेण गणित्ति गणावच्छेदिनि, । आयरिए इति आचार्योपाध्याये वक्तव्यम् । किमुक्तं भवति । यथा भिक्षौ प्रतिमाप्रतिपत्तुं प्रतिपन्ने विधिरुक्तस्तथा गणावच्छेदिनि आचार्योपाध्याये च प्रतिपत्तव्यः । तथा च सूत्रकारोऽपि तत्सूत्रे अतिदेशत आह-एव गणावच्छेए एवं आयरितो वज्झाए एवं भिक्षुगतेन सूत्रप्रकारेण गणावच्छेद एवमेव आचार्याश्च उपाध्यायाश्च आचार्योपाध्यायं तस्मिन् सूत्रं वक्तव्यं । तद्यथा-

गणावच्छेए य वा गणातो अवक्कमएगल्लविहारपडिमं उवसंपज्जित्ताणं विहरेज्जा । सेइच्छेज्जा दोच्चंपि तमेव ठाणं उवसंपज्जित्ताणं विहरित्तए पुनो आलोएज्जा पुनो पडिक्कमेज्जा पुनो च्छेदस्स परिहारस्स वा उवट्ठावेज्जा । ततो आयरियातो वज्झाए य गणातो अवकम्म एगल्लविहारपडिमं उवसंपज्जित्ताणं विहरेज्जा' इत्यादि । व्याख्याप्यस्य सूत्रद्वयस्य तथैव । अथ किमविशेषेण भिक्षाविव प्रतिमाप्रतिपत्ति-विधिरनुसरणीयो यदि वास्ति कश्चिद्विशेषस्तत आह-गणनिक्खेवणम्मीत्यादि नवरं नानात्वं भेदो गणनिक्षेपणे । इयमत्र भावना-गणावच्छेदी गणावच्छेदित्वं मुक्त्वा प्रतिमां प्रतिपद्यते, आचार्योऽन्यं गणधरं स्थापयित्वेति शेषः । अथवा इदं भिक्षुगतविधेर्गणावच्छेद्याचार्ययोर्विधिः नानात्वं गणावच्छेदी आचार्यो वा पूर्वगृहीतं उपधिं निक्षिप्य अन्यमुपधिं प्रायोग्यमुत्पाद्य प्रतिमां प्रतिपद्यते ।

इत्युक्तः प्रतिमाप्रतिपत्तिविधिः । इदानीं समाप्तिविधिमाह-

[भा.८०९] तीरिय उब्भामणियोग दरिसणं साहु सन्नि वप्पाहं ।
दंडीय भोईय असती सावगसंधो व सक्कारं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तीरितायां समाप्तायां प्रतिमायां उत्प्राबल्येन भ्रमन्त्युद्भ्रमाः भिक्षाचरास्तेषां नियोगो व्यापारो यत्र स उद्भ्रमकनियोगो ग्रामस्तत्र दर्शनमात्मनः प्रकटनं करोति । ततः साधुं संयतं संज्ञिनं वा सम्यग्दृष्टिं श्रावकं अप्पाहेत्ति संदेशयति । ततो दण्डिनो राज्ञो निवेदनं सत्कारं करोति, तदभावे भोजिकस्तस्याप्यभावे श्रावकवर्गस्तस्याप्यभावे सङ्घः साधुसाध्वीवर्गः । इयमत्र भावना-प्रतिमायां समाप्तायां यस्मिन् ग्रामे प्रत्यासन्ने बहवो भिक्षाचराः साधवश्च समागच्छन्ति । तत्रागत्यात्मानं दर्शयति । दर्शयंश्च स्वयं साधुं श्रावकं वा पश्यति, तस्य संदेशं कथयति यथा समापिता मया प्रतिमा, ततोऽहमागत इति तत्राचार्या राज्ञो निवेदयन्ति, यथा-अमुको महातपस्वी समाप्ततपः कर्माभूदिति स महता सत्कारेण गच्छे प्रवेशनीय इति । ततः स राजा तस्य सत्कारं कारयितव्यस्तदभावेऽधिकृतस्य ग्रामस्य नगरस्य वा नायकस्तदभावे समृद्धः श्रावकवर्ग स्तदभावे साधुसाध्वी प्रभृतिकः सङ्घो यथाशक्ति सत्कारं करोति, । सत्कारो मानस्तस्योपरि चन्द्रोदय धारणं नान्दी तूर्यास्फालनं सुगन्धवासप्रक्षेपणमित्यादि । एवं रूपेण सत्कारेण गच्छं प्रवेशयेत् । सत्कारेण प्रवेशनायामिमे गुणाः-

[भा.८१०] उद्भावनापवयणे, सद्धाजननं तहेव बहुमाना ।
उहावणा कुतित्थे जीयं तह तित्थवड्ढीय ।

वृ- प्रवेशसत्कारेण प्रवचनस्य उद्भ्राजना प्राबल्येन प्रकाशनं भवति, । तथा अन्येषा बहूनां साधूनां श्रद्धाजननं यथा वयमप्येवं कुर्मो येन महीती शासनस्य प्रभावना भवति, । तथा श्रावकश्राविकाणामन्येषां च बहुमानमुपजायते शासनस्योपरि यथा- अहो महाप्रतापि पारमेश्वरं शासनं, यत्रेद्दशा महातपस्विन इति; । तथा कुतीर्थे जातावेकवचनं । कुतीर्थानामपभ्राजना हीलना तत्र ईद्दशां महासत्वानां तपस्विनामभावात् । तथा जीतमेतत्कल्प एप समाप्तप्रतिमानुष्ठानः सत्करणीय इति, तथा तीर्थवृद्धिश्च । एवं हि प्रवचनस्यातिशयमुदीक्षमाणा बहवः संसाराद्विरज्यन्ते विरक्ताश्च परित्यक्तसङ्गाः प्रव्रज्यां प्रतिपद्यन्ते, । ततो भवति तीर्थप्रवृद्धिरिति; । तदेवं परिकर्मणाभिधानं प्रतिमाप्रतिपत्तिः प्रवेशसत्कारश्च भणितः । साम्प्रतमधिकृतसूत्रं यत्र योगमर्हति तद्विवक्षुरिदमाह-

[भा.८११] एएण सुत्त न गयं सुत्तनिवातो इमो उ अव्वत्ते ।
उच्चारिय सरिसं पुन, परूवीयं पुव्वभणियंपि ।।

वृ- यदेतदनन्तरं परिकर्मणादिकमुक्तं, नैतेन सूत्रगतं व्याख्यातं, जातावेकवचनस्य भावात् । नैतेन त्रीणि सूत्राणि व्याख्यातानि, सूत्राणामन्यविषयत्वात् । तथा चाह- 'सुत्तनिवातो इमो उ अव्वत्ते' तु शब्दः पुनरर्थे स च पुनरर्थं प्रकाशयन् हेत्वर्थमपि प्रकाशयति, यतोऽयमधिकृतः सूत्रनिपातोऽव्यक्तेऽव्यक्तशब्दविषयः, । अव्यक्तो नाम श्रुतेन वयसा चा प्राप्तोऽपरिकर्मितश्च पूर्वभणितं च समस्तं व्यक्तविषयमतोऽव्यक्तविषयत्वं च प्रागुक्तमिति नैतेन प्रागुक्तेन सूत्रत्रयं गतमिति, । अत्राह-यदेतत् प्राग्व्याख्यातं न तेन यदि सूत्रत्रयं गतं तर्हि तदेतत् कुत आगतं सूत्रात्तावन्न भवति । सूत्रस्यान्यविपयत्वात् । अन्यस्माच्चेत्तर्हि न वक्तव्यमसम्बद्धत्वादत आह-उच्चारिय सरिसमित्यादि परिकर्मणाभिधानं यच्च पूर्वमाचारदशासु भिक्षुप्रतिमागतमुक्तं । यथा घरसउणी सीह इत्यादि तथा परिचियकालामन्तणेत्यादि परिकर्मणाभिधानं यच्च पूर्वमाचारदशासु भिक्षुप्रतिमागतमुक्तं । यथा घरसउणी सीह इत्यादि तथा परिचियकालामन्तणेत्यादि च प्रागभणितमपि प्ररूपितमुच्चरितस्य सद्दशमनुगतमिति कृत्वा किमुक्तं भवति ? एगल्लविहारपडिमं उवसंपज्जित्ताणं विहरित्तए इत्युक्तमेतच्च सूत्रखंडं व्यक्ते अव्यक्ते च समानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो यद्यपि सकलसूत्रोपनिपातोऽव्यक्तविषयस्तदपि यदेतत्सूत्रखण्डं तत् व्यक्तेऽपि समानमिति व्यक्त विषयं परिकर्मणादिमुक्तमित्यदोषः,। यदुक्तमयमधिकृतसूत्रोपनिपातो अव्यक्तविषय इति । तत्राव्यक्ते यथा प्रतिमाप्रतिपत्तिसंभवस्तथोपपादयति-

[भा.८१२] आगमने सक्कारं, कोयं दठूण जायसंवेगो ।
आपुच्छणपडिसेहण देवी संगामतो नीति ।।

वृ- समाप्तिप्रतिमानुष्ठानस्य गच्छंप्रत्यागमने राजादिभिः क्रियमाणं सत्कारं कोऽपि भिक्षुर्गणावच्छेदी आचार्यो वा दृष्टा जातसंवेगः सन् स्वाचार्याणां पुरत आपृच्छनं करोति । यथा-भगवन्नहमप्येकाकि-विहारप्रतिमां प्रतिपद्ये इति ते ततस्ते आचार्या विशिष्टश्रुतविदो जानन्ति भूतं भाविनं चेति तस्या-योग्यतामुदीक्षमाणाः प्रतिषेधनंम कृतवन्तः । यथा-त्वमयोग्यः श्रुतेन वयसा वा प्राप्तत्वात् । न च परिकर्मणा तद्योग्या त्वयाकृतेति स एवं प्रतिषिध्यमानोऽपि यदा न तिष्ठति तदा सूरिभिर्वक्तव्यो यदि न स्थास्यति तर्हि विनंक्ष्यसि यथा सा देवी । का सा देवीति चेदत आह-देवी संगामतो ।

[भा.८१३] संगामे निव पडिमे देवी काऊण जुज्झति रणंमि ।
बितिय बलेण नरवति नाउं गहिया धरिसियाय ।।

वृ- सङ्ग्रामे देवी नृपप्रतिमां राज्ञ आकारं कृत्वा युध्यते । सा च तथा रणे सङ्ग्रामे युध्यमाना द्वितीयबले प्रतिपक्षबले यो नरपतिस्तेन कथमपि ज्ञात्वा अरे महेला युध्यते सन्नाहापेक्षं कृत्वा गृहीतचण्डालैर्धर्षापिता मारिता च । एषो अक्षरार्थः । भावार्थः कथानकादवसेयस्तच्चेदम्- एगेन रन्ना एगस्स रन्नो नगरं वेढियं । राया स अंतेउरो नगरब्भंतरे अग्गमहिसी भणति जुज्झामि वारिज्जंती वि रन्ना न ठाति । ततो सा संनहित्ता खंधावारेण समं निग्गंतुं परबलेन समं जुज्झइ महिलत्ति काउं गहिया चंडालेहिं धरिसावित्ता मारिया ।

[भा.८१४] दूरे ता पडिमातो गच्छ विहारे वि सो न निम्मात्तो ।
निग्गंतुं आसन्ना नियत्ते लहुतो गुरू दूरे ।।

वृ- दूरे तावत्प्रतिमाः । किमुक्तं भवति तद्विषयमिदं सूत्रत्रिकं तस्य प्रतिमाःप्रतिपत्तव्यास्तावत् दूरे विशिष्टश्रुतवयोभ्यामप्राप्ततयातत्समाचारीपरिज्ञानस्य परिकर्मणायाश्चाभावात् गच्छविहारे गच्छसमाचार्यामपि सोऽधिकृतसूत्रत्रयविषये निर्मातो न परिनिष्ठामुपगतः स आचार्येण वार्यते । स च वार्यमाणोऽपि यदा स्वगच्छान्निर्गत्य यदि कथमपि बुद्धिपरावर्त्तनेनासन्नाद्विनिवर्तते । ततस्तस्य प्रायश्चित्तं लघुको मासः दूरे दूराद्विनिवर्तति गुरुको मासः । अथ न निवर्तते तत आह-

[भा.८१५] सच्छंदो सो गच्छा निग्गंतूणं ठितो उ सुणघरं ।
सुतत्थ सुणहियओ संभरइ इमेसि मेगागी ।।

वृ- स्वमात्मीयंच्छन्दोऽभिप्रायो यस्य स स्वच्छन्दः सन् गच्छाद्विनिर्गत्य शून्यगृहे उपलक्षणमेतत् श्मशाने वा वृक्षमूले वा देवकुलसमीपे वा कायोत्सर्गेण स्थितः । स च सूत्रमर्थं वा न किमपि जानाति यच्चिन्तयति । ततः सूत्रार्थशून्यहृदय एकाकी सन् एषां वक्ष्यमाणानामाचार्यादीनां स्मरति तानेवाह-

[भा.८१६] आयरियवसभसंघाड-एय कंदप्पमासियं लहुयं ।
एगानियत्तसुणघरे अत्थमिए पत्थरे गुरुगा ।।

वृ- आचार्यो गच्छाधिपतिस्तं वा यदि स्मरति यदि वा वृषभमथवा संघाटिकं, कंदप्पत्ति अत्र विभक्तिलोपो मत्वर्थीपयोलपश्च प्राकृतत्वात् । यैर्वा साधुभिः समं गच्छे वसन् कन्दर्पं हासंचसूर्यादिरूपं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतवान् कन्दर्पिकान् स्मरति । तदा प्रायश्चित्तं मासिकं लघुकं तथा एगानियत्त एकाकी सन् शून्यगृहे उपलक्षणमेतत् श्मशानादौ वा दिवसे बिभेति तदा चत्वारो लघुमासाः, यदि पुनरस्तमिते सूर्ये भयं गृह्णन् प्रस्तरान् पाषाणान् च्छुहयति तदा चतुर्गुरुकाः ।

[भा.८१७] पत्थरच्छुहेण रत्ता गमने गुरुलहुगदिवसतो होंति ।
आयसमुत्थाएए देवयकरणं तु वोच्छामि ।।

वृ- यदि रात्रौ मार्जारादि श्वापदादिभ्यो बिभ्यन् प्रस्तारान् शून्यगृहस्यान्तः छुहइत्ति प्रवेशयति यदि वा स्तेनादिभयेन रात्रौ गच्छमागच्छति तदा प्रायश्चित्तं चत्वारो गुरुकाः, यदि पुनर्दिवसे एव शून्यगृहादाववतिष्ठमानो भयात् प्रस्तरान् प्रवेशयति । गच्छं वा भयमजीर्यन् समायाति तदा चत्वारो लघुमासाः, एते आत्मसमुत्था दोषा उक्ताः; । इदानीं यद्देवता करोति तद्देवताकरणं वक्ष्यामि । साम्प्रतमेगाणियसुणघरे इत्यादि यदुक्तं तत् भिक्षुगणावच्छेद्याचार्यभेदेषु प्रत्येकं सविशेषतरं भावयति-

[भा.८१८] पत्थरमनसंकप्पे, मग्गणदिट्ठेय गहिय खेत्तेय ।
पडिय परिताविय मए, पच्छित्तं होइ तिण्हंपि ।।

[भा.८१९] मासो लहुतो गुरुतो, चउरो लहुगा य चउगुरुगा य ।
छम्मासा लहुगुरुगा, च्छेओमूलं तह दुगं च ।।

वृ- प्रस्तराणां ग्रहणाय मनः सङ्कल्पे मार्गणे तथा ग्रहणबुद्धया प्रस्तरे दृष्टे तथा गृहीते तथा क्षिप्ते यस्योपरि प्रक्षिप्तः प्रस्तरः तस्योपरिपतनेन चरमपरितापिते अनागाढं परितापिते तथा मृते च त्रयाणामपि भिक्षुगणावच्छेद्याचार्याणां प्रायश्चित्तं वक्ष्यमाणं यथा अग्रिमं भवति तदेवाह-मासो इत्यादि . मासो लघुको गुरुकाश्चत्वारो लघुकाश्चत्वनारो गुरुकाः षण्मासा लघवः थषण्मासा गुरुकाः । च्छेदो मूलं तथा द्विकमनवस्थाप्य पाराञ्चितरूपमिति गाथा द्वयसंक्षेपार्थः । भावार्थस्त्वयम्- यदि भिक्षुर्भयवशात्प्रस्तर-विषयं मनः संकल्पं करोति गृह्णामि प्रस्तरमिति, तदा तस्य प्रायश्चित्तं लघुमासः प्रस्तरस्य मार्गणे गुरुमासः प्रस्तरोग्राह्योऽयमिति बुद्धयावलोकिते चत्वारो लघुमासा गृहीते प्रस्तरे चत्वारो गुरुकाः क्षिप्ते मार्जारादिश्वापदादीनामुपरि प्रस्तरे षण्मासा लघवः, यस्योपरि क्षिप्तस्योपरिपतिते तस्मिन्नपरितापिते षण्मासा गुरुवः, गाढं परितापिते च्छेदः, मृते मूलं, तदेवं भिक्षोर्लघुमासादारब्धं मूले निष्ठितं, गणाविच्छेदिनः प्रस्तरमनः संकल्पे प्रायश्चित्तं गुरुको मासः, प्रसतरमार्गणे चत्वारो लघुमासाः, प्रस्तरे ग्राह्यबुद्धया दृष्टे चत्वारो गुरुकाः, प्रस्तरे गृहीते षण्मासालघवः क्षिप्ते षण्मासा गुरवः, प्रस्तरे घातस्योपरिपतिते च्छेदः । धात्ये गाढं परितापिते मूलं, मृतेऽनवस्थाप्यं, तदेवं गणावच्छेदिनो गुरुमासादारभ्यमनवस्थाप्ये निष्ठीतं, आचार्यस्य प्रस्तर मनः संकल्पे चत्वारो लघुमासाः०, प्रस्तरमार्गणे चत्वारो गुरुकाः प्रस्तरे गाह्ययबुद्धयादृष्टे षण्मासा लघवः, प्रस्तरे गृहीते गुरवः षण्मासाः, क्षिप्ते छेदः । सम्प्रति यदुक्तं देवयं करणं तु वोच्छामि इति तत अन्यच्च विवक्षुर्दारगाथामाह-

[भा.८२०] बहुपुत्तपुरसिमेहे उदयग्गी जड्ड सप्पे चउ लहुगा ।
अच्छण अवलोगनियट्टकंटग गेण्हण दिट्ठे य भावे य ।।

वृ- देवताया बहुपुत्रविकुर्वाणानन्तरं चोदिते तथा पुरुषमेधे पुरुषयज्ञे तथा उदके उदकप्रवाहे अग्नौ प्रदीपनकरूपे जड्डु हस्तिनि सर्पे च समागच्छति पलायमानादौ चत्वारो लघुको मासाः, । तथा देवताया विकुर्वित संयती रुपायाः पृष्टतो लग्नायाः प्रतीक्षस्व यावत् कण्टकं पादलग्नमपनयामीत्येवं ब्रुवंत्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादोत्क्षेपणे च तथा दृष्टे सागारिके मृगपदीरूपे प्रतिसेवेइति परिणते भावे च शब्दात्प्रतिसेवाकरणे च यथायोगं प्रायश्चित्तमिति द्वारगाथासंक्षेपार्थः ।

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो बहुपुत्रद्वारं विवृणोति-

[भा.८२१] बहुपुत्तत्थी आगमदोसु बलेसुं तु थालिविज्झवणा ।
अन्नोन्नं पडिचोयण वञ्चगणं माच्छलेपंता ।।

वृ- बहुपुत्रा स्त्री देवतारूपं तस्या आगमो द्वयोरुपलयोरुपरितया स्थाली निवेशिता सा पतिता । जातमग्नेर्विध्यापनं ततः परस्परं प्रतिचोदना तदनन्तरं तया उक्तं च-व्रजगणं गच्छं मा प्रान्तदेवता त्वां च्छलयिष्यतीति । एष गाथाक्षरार्थो भावार्थ स्त्वयम्- सम्मद्दिट्ठी देवया इत्थीरूवं बहु य पुत्ते चेडरूवे विउव्विता पडिमागयस्स साहुस्स समीवमल्लीणा चेडरूवाणि रोवमाणाणि भणंति 'भत्तं देहि' त्ति । सा भणति- 'खिप्पं रंधेमि जाव ताव मा रोयह' । ताहे सा दोन्नि पाहणे जमले ठवेउं तेसिं मज्झे अग्गिं पज्ञलित्ता तेसिं उवरिप्पिहडं पाणियस्स भरित्ता मुक्कं, तं पिहडं तइय पत्थरेण विणा पडियं सो अग्गी विज्झवितो ततो पुनो वि अग्गिं पज्ञालिऊण पिहडं पाणिय भरियं मुक्कं तहे व पडितं अग्गी विज्झवितो । एवं तइयंपि वारं विज्झवितो । ततो पडिमागतो साहू भणति-एत्तीएणं विन्नाणेणं तुमं एत्तियाणि चेउरुवाणि निप्फाएसि ! एवं भणमाणस्स तस्स पच्छित्तं चउलहुयं, । सा भणति-तुमं कहमेत्तिएणसुएण अप्पायोग्गो पडिमं पडिवन्नो सिग्घं जाहि गच्छंमाते पंत देवया छलेहिति गतं बहुपुत्रद्वारम् ।। इदानीं पुरुपमेधद्वारमाह-

[भा.८२२] उवाइयं समिद्धं महापसुं देमो सज्जमज्झाए ।
एत्थेव ता निरिक्खह दिट्ठे वाडुं समणो वा ।।

वृ- स कदाचिदव्यक्त आर्यासमीपेकायोत्सर्गे स्थितस्तत्र च बहवो मनुष्या आर्यावन्दनार्थमागतास्ते च तस्य प्रतिमा स्थितस्य साधोत्समीपदेशे स्थिता ब्रुवते । यथा यदोपयाचितकमार्याया भट्टारिकायाः समीपे याचितं यथा यद्यमुकं प्रयोजनमस्माकं संत्स्यति । ततो महापशुं प्रयच्छाम इति तदिनानीं समृद्धं निष्पन्नमित्यर्थः ततः सद्य इदानीं पशुं दद्मः महापशुर्नामपुरुषः । ततो गवेषयत अत्रैव कञ्चित् मनुष्यं गता गवेषणाय मनुष्याः, दृष्टः स प्रतिमा प्रतिपन्नो दृष्ट्वा च कथितंमूलपुरुषाय यथैव श्रमणो दीयतामार्यायै इति एवमुक्ते यदि भयेन वाडुं करोति, देशीवचनमेतत् नशनं करोति नश्यतीत्यर्थः । यदि वा श्रमणोऽहमिति ब्रूते तदा प्रायश्चितं चतुर्लघु ।

[भा.८२३] उदगभएण पलायइ पवइ रुक्खं दुरुहए सहसा ।
एमेव सेसएसु वि भएसु पडिकारमो कुणति ।।

वृ- सोऽव्यक्तः प्रतिमा प्रतिपन्नः कायोत्सर्गेण स्थित उदकप्रवाहे नद्यादिगते समागच्छति यद्युदकभयेन पलायते, यदि वा प्लवते तरति, अथवा सहसा वृक्षमारोहति, तदा तस्य-प्रायश्चितं चतुर्लघु, । एवमेव अनेनैव प्रकारेण शेषेष्वप्यग्र्यादि समुत्थेषु भयेषु समुत्थितेषु यदि प्रतिकारं करोति, तदा चतुर्लघुः । इयमत्र भावना-अग्नौ प्रसर्पति सर्पे वा समागच्छति यदि पलायते अन्यं वा प्रतीकारं करोति, तदा प्रायश्चितं प्रत्येकं चतुर्लघु, । एतानि च पुरुषमेधोदकाग्निहस्तिसर्परूपाणि देवताकृतान्यपि संभाव्यन्ते स्वाभाविकानि चातत्र यदि देवताकृतानि स्वाभाविकानि सर्वेष्वप्येतेषु प्रत्येकं चतुर्नधुः । साम्प्रतमस्थण आलोयणोत्यादि व्याचिख्यासुराह-

[भा.८२४] जेइज्ज पडिच्छाहिए अहं तुब्भेहिं समंवच्चामि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति सकलुणमालत्तो मुज्झति सेहो अथिरभावे ।।

वृ- अथवा सा देवता संयतीवेषं कृत्वा कायोत्सर्गे समाप्ते विहारक्रमं प्रति प्रस्थितमव्यक्तं साधुप्रतिमां प्रतिपन्नं ब्रूयात्- 'अहो ज्येष्ठार्य अहमपि युष्माभिः समं व्रजामि, तत्प्रतीक्षस्व तावद्यावत् पादलग्नं कण्टकमपनयामि इति । एवं तया देवतया कृतसंयतीवेषया सकरुणामालप्तः स वराकः शैक्षः शैक्षत्वादेवास्थिरभावो मुह्यति मोहमुपगच्छति मुह्यं च यदि प्रतीक्षणादि करोति तथा प्रायश्चित्तं तदेवाह-

[भा.८२५] अच्छति अवलोएति य लहुगा पुन कंटउमेलगत्ति ।
गुरुगा नियत्तमाणे तह कंटगमग्गणे चेव ।।

वृ- तत्र यदि कण्टको मे लग्न इति वचः श्रुत्वा, अच्छतित्ति प्रतीक्षते तदा प्रायश्चित्तं लघुकाश्चत्वारो लघु मासाः । अथापि तत्संमुखमवलोकते तदापि चतुर्लघुः यदिपुनरासन्नान्निवर्त्तते तदाचतुर्लघु एतच्च आसन्नातो लहुतो इति वक्ष्यमाणग्रन्थादवसितम् । अथ दूरात्तदा तस्मिन् दूरान्निवर्तमाने चत्वारो गुरुका गुरुमासास्तथा कण्टकमार्गणे चेवेत्ति यदि कण्टकमपनेष्यामीति तत्पादलग्नं कण्टकं मृगयते, तदापि प्रायश्चित्तं चतुर्गुरु ।

[भा.८२६] कंटकपायग्गहणे छल्लहु छग्गुरुग चलणमुक्खेवे ।
दिट्ठे मिच्छग्गुरुगा परिणयकरणेय सत्तट्ठा ।।

वृ- कण्टकं पादगतं यदि गृह्णाति तदा प्रायश्चित्तं षट्लघवो लघुमासाः अथ तस्याः संयत्याः पादं गृह्णाति कण्टकोद्धरणाय तदापि षट् लघु, यदि पुनश्चरणं पादमुत्क्षिपति उत्पाटयति कण्टकोद्धरणाय तथा षट् गुरु, पादे उत्पाटिते सति यदि सागारिकं पश्यति तदा तस्मिन्नपि दृष्टे षट् गुरु, सागारिकदर्शनानन्तरं यदि भावः परिणतो भवति यदाहं प्रतिसेवे इति तदाच्छेदः करणे प्रति सेवाकरणे मूलं एतत्प्रायश्चित्तविधानं भिक्षोरुक्तम् । गणावच्छेद्याचार्ययोः पुनरिदमाह-सत्तठत्ति, अत्र पूरण प्रत्ययांतस्य लोपः प्राकृतत्वात् । ततोऽयमर्थः गणावच्छेदिनः प्रायश्चित्तविधानं द्वितीयाच्चतुर्लघुकादारब्धं सप्तममनवस्थाप्यं प्रायश्चित्तं यावदवसेयमाचार्यस्य प्रथमाच्चतुर्गुरुकादारब्धमष्टमं पाराञ्चितं प्रायश्चित यावदेतदेवाह-

[भा.८२७] लहुया य दोसु दोसु य गुरुगाच्छम्मास लहु गुरुच्छेदो ।
भिक्खु गणायरियाणं मूल अणवठपारंची ।।

वृ- भिक्षुगणावच्छेद्याचार्याणां यथाक्रमं प्रायश्चित्तविधानमूलमनवस्थाप्यं पाराञ्चितं च, यावद्यथा भिक्षोर्द्वयोः प्रतीक्षणेऽवलोकते च चत्वारो मासा लघवः द्वयोर्निवर्तने कण्टकमार्गणे चत्वारो गुरुकाः, छम्मासलहुगुरुत्ति अत्र दोसु इति प्रत्येकमभिसम्बध्यते । द्वयोः कण्टकग्रहणे पादग्रहणे च षण्मासा लघवः द्वयोः पादोत्क्षेपे सागारिकदर्शने च षट् गुरु, प्रतिसेवाभिप्राये च्छेदः प्रतिसेवाकरणे मूलं, गणावच्छेदिनो यथाऽनवस्थाप्यं पर्यन्ते भवति तथा वक्तव्यं तच्चैवं गणावच्छेदिनः प्रतीक्षणे चत्वारो लघुकाः अवलोकने चत्वारो गुरवः निवर्तने चत्वारो गुरवः, कण्टकमार्गणे षट् लघु, कण्टकग्रहणे षट् लघु, संयतीपादग्रहणे षट् गुरु, पादोत्पाटने च्छेदः, सागारिकदर्शने च्छेदः । प्रतिसेवाभिप्राये मूलं, प्रतिसेवाकरणेऽनवस्थाप्यं, आचार्यस्य यथा पाराञ्चितमन्ते भवति तथा वक्तव्यम् । तच्चैवमाचार्यस्य प्रतीक्षणे चतुर्गुरु अवलोकने चतुर्गुरुनिवर्तने कण्टकमार्गणे च षट् लघु, कण्टकग्रहणे पादग्रहणे च षट् गुरु, पादोत्पाटने च्छेदः, सागारिकदर्शने मूलं, प्रतिसेवाभिप्रायेऽनवस्थाप्यं, प्रतिसेवाकरणे पाराञ्चितमिति ।

सम्प्रति यदुक्तं 'गुरुगानिवत्तमाणे' इति तत्र विशेषमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८२८] आसन्नातो लहुयो दूरनियत्तस्स गुरुतरो दंडो ।
चोयगसंगामदुर्ग नियट्टखिसंत अनुग्धाया ।।

वृ- संयत्या आसन्नात्प्रदेशान्निवृत्ते लघुको दण्डः चत्वारो लघुमासा दण्ड इत्यर्थः । दूरान्निवृत्तस्य गुरुतरश्चत्वारो गुरुमासाः; एवमाचार्येण प्ररूपिते चोदकः प्रश्नयति । तत्र चोदकाचार्यनिदर्शनं सङ्ग्रामद्विकं निदर्शनं, तं च भग्नप्रतिज्ञं निवृत्तं प्रत्यागतं सन्तं ये खिंसंतित्ति हीलयन्ति तेषामुद्घाताश्चत्वारो गुरुका मासाः प्रायश्चित्तमित्युत्तरार्धं संक्षेपार्थः ।

इदानीमेतदेवोत्तरार्धं विवरीषुः प्रथम-तश्चोदकवचनं भावयति ।

[भा.८२९] दिट्ठं लोए आलोयभंगि वणिएय अवनियनियत्तो ।
अवराहे नाणत्तं न रोयए केन यं तुज्झे ।।

वृ- प्रागुक्ताचार्य प्ररूपणानन्तरं परः प्रश्नयति । ननु संयत्याः प्रत्यासन्नात्प्रदेशात्प्रतिनिवृत्तस्य गुरुतरेण दण्डेन भवितव्यम् । दूरात्प्रतिनिवृत्तस्य लघुतरेण, न चैतदनुपपन्नं यतो लोकेऽपि दृष्टं तथा ह्येकस्य राज्ञो नगरस्य परो राजा वेष्टयितुकामः समागच्छति । तं च समागच्छन्तं श्रुत्वा नगरस्वामी भटान् प्रेषयति । यथा यूयं तत्र गत्वा युध्यध्वमिति । तत्रैको भटः परबल मिति प्रभूतमालोक्य दर्शनमात्र एव भग्नः प्रत्यागतोऽन्यो युध्ध्वा चिरकालं सजातव्रणो भग्नः समागतः । अपरः परबलेन सहायुध्या सञ्जातव्रण एव भग्नः प्रतिनिवृत्तः । तत्रैषां भटानां मध्ये यः आलोकभङ्गी दर्शनमात्रतो भग्नः प्रतिनिवृतस्तस्य बहुतरोऽपराधः । यः पुनः सञ्जातव्रणो यश्चाव्रणित एतौ द्वावपि भग्नौ सन्तौ प्रतिनिवृत्तावित्यपराधिनौ केवलमालोकभङ्ग्यपेक्षयाऽल्पतरापराधौ, दूरात्प्रतिनिवृत्तत्वाद्देवं लोके दूरासन्नभेदेनापराधे 'नानात्वमिदमुपलब्धम्' । तत एव दृष्टान्तबलेन यन्मयोक्तं संयत्याः प्रत्यासन्नात्प्रदेशात्प्रतिनिवृत्तस्य भूयान् दण्डो दूरात् प्रतिनिवृत्तस्याल्पतर इति ततः केन कारणेन युष्मभ्यं न रोचते । सूरिराह-

[भा.८३०] अक्खयदेह नियत्तं बहुदुक्खभयेण जंसमाणेह ।
एयमहं न रोयति को ते विसेसो भवे एत्थ ।।

वृ- यद्वद्दु दुःखभयेन परबलेन सह युध्यमानस्य प्रभूतदुःखं मरणपर्यवसानं भविष्यतीति भयेनाक्षतदेहः सन् निवृत्तः प्रतिनिवृत्तोऽक्षतदेहनिवृत्तस्तं समानय एतन्मह्यं न रोचते विषमत्वात्तथाहि सर्वथा अत्राक्षतचारित्रः प्रतिनिवर्तते किन्तु क्षतचारित्रस्ततोऽप्यत्र स उपन्यसनीयो योऽधिकृतदार्ष्टांतिकेन सहसमानतामवलम्बते, न चासौ तथेति पर आह-यदेष दृष्टान्तस्तव न भासते ततः कोऽत्रास्मिन् विचारे तव विशेषो भवेत् विशिष्टो दृष्टान्तः स्यात्सूरिराह-

[भा.८३१] एसेव य दिठंतो पुरोहे जत्थ वारियं रन्ना ।
माणीह तत्थनियंते दूरासन्ने य नाणत्ता ।।

वृ- एष एव भवदुपन्यस्तो दृष्टान्तः पुररोधे सति द्रष्टव्यो यत्र पुररोधे राज्ञा वारितं तथा मा कोऽपि पुरान्निर्यासीदिति तत्रैवं निवारिते तत्र निर्गच्छति । दूरासन्नाच्च प्रतिनिवृत्ते यथा नानात्वमपराधविषयं तदिहापि योजनीयम् । तद्यथा-परबलेन नगररोधे कृते राज्ञा पटहेन घोषितं यथा यो नगरान्निर्यास्यति स मयानिग्राह्य इति । ततः कोऽपि निर्गत्य आसन्नात्प्रतिनिवृत्तोऽपरो दूरात्तत्र यथैतयोरासन्नात्प्रतिनिवृत्तस्याल्पतरो राज्ञा दण्डो दूरात्प्रतिनिवृत्तस्य बहुतर एवं यो दूरात्संयत्याः प्रतिनिवृत्तस्तस्य गरीयान् भावदोष इति चतुर्गुरुकमासन्नात्प्रतिनिवृत्तस्य त्वल्पीयान् भावदोष इति चतुर्लघु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति 'पुनो आलोएज्ञा' इत्यादिसूत्रं व्याख्यानयति-

[भा.८३२] सेसम्मि चरित्तस्या लोयणया पुनो पडिक्कमणं ।
चच्छेदं परिहारं वा जं आवन्नो तयं पावे ।।

वृ- यद्यपि प्रतिमाप्रतिपन्नस्य चारित्रविराधनासीत् तथापि न चारित्रं सर्वथापगतं किन्तु शेषोऽवतिष्ठते । व्यवहारनयमतेन देशभङ्गेन सर्वभङ्गाभावात् ततः शेषचारित्रस्य सति पुनरालोचना पुनः प्रतिक्रमणं नतु पुनः शब्दो द्वितीयवारापेक्षः । तथा च लोके वक्तारः कृतमिदमेकवारमिदानीं पुनः क्रियते इति । अत्र तु प्रथममेवालोचनं प्रथममेव च प्रतिक्रमणं ततः कथं पुनः शब्दोपपत्तिः ? उच्यते-यत्रैव स्थाने सोऽकृत्यं कृतवान् । तत्रैव स इत्थमचिन्तयत् आलोचयामि प्रतिक्रमामि च तावदहमेतस्या कृत्यस्य पश्चादुरुसमक्षं भूय आलोचयिष्यामि च एवं च चिन्तयित्वा तथैव आकार्षीत् ततो घटते पुनः शब्दोपादानमिति यदि वा यदेव तदानींहा दुष्ठुकृतं दुष्ठुकारितमित्यादि चिन्तनं तदेव च प्रतिक्रमणमिति भवति । तदपेक्षया पुनः शब्दोपपत्तिः यदपि च च्छेदं परिहारं वा प्रायश्चित्तमापन्नस्तत्प्राप्नोति प्रतिपद्यते । सम्प्रति यदुक्तं । नियट्टखिंसंतणुध्याया इति तद्व्याख्यानयति-

[भा.८३३] एवं सुभपरिणामं पुनोवि गच्छंति तं पडिनियत्तं ।
जे हीलइ खिंसइ वा पावति गुरुए चउम्मासे ।।

वृ- एवं पुनरालोचना प्रतिपत्यादिप्रकारेण शुभपरिणामं शोभनाध्यवसायं पुनरपि गच्छे प्रतिनिवृत्तं सन्तं यो हीलयति खिंसयति वा, तत्र यदसूयया निन्दनं तत् हीलनं यथा समाप्तिं नीताऽनेन प्रतिमासांप्रतमागतो वर्तते ततः क्रियतामस्य पूजेति यत्पुनः प्रकटं निन्दनं सा खिंसा यथाधिक् तव भ्रष्टप्रतिज्ञस्येत्यादि स प्राप्नोति प्रायश्चित्तं गुरुकान् अनुद्घातान् चतुरो मासान्० ।

मू. (२६) *भिक्खू वा गणाओ अवक्कम्म पासत्थविहारे विहरेज्ञा संयइच्छेज्ञा दोच्चंपि तमेवगणं उवसंपज्जित्ताणं विहरित्तए अत्थिया इत्थ से पूणो आलोएज्ञा, पुनो पडिक्कमेज्ञा, पुणोछेद परिहारस्स उवट्ठाइज्ञा।*

वृ- भिक्खूय गणातो अवक्कम्मेत्यादि भिक्षुरुक्तशब्दार्थः वा वाक्यभेदे गणादपक्रम्य निःसृत्य पार्श्वस्थविहारं पार्श्वस्थचर्यां प्रतिपद्येत स भूयोऽपि भावपरावृत्या इच्छेद्वितीयमपि वारं गणमुपसम्पद्य विहर्तुं अत्थिया इत्थेत्ति अस्ति चात्र कश्चित् यः शेषे चारित्रस्य सति पुनरालोचयेत्, पुनः प्रतिकामेत् पुनश्छेदं परिहारं वा यः प्रायश्चित्तमापन्नस्तस्य च्छेदस्य परिहारस्य वा प्रतिपत्तयेऽभ्युतिष्ठेत् । यः पुनः सर्वथापगते चारित्रं पुनरालोचयेत् पुनः प्रतिक्रामेत् स मूलमापन्न इति मूलस्य प्रतिपत्तयेऽभ्युतिष्ठेत् । इदं सूत्रं पार्श्वस्थविषय एवमुक्तमेवं यथाच्छंदसि कुशीले अवसन्ने संसक्ते च वक्तव्यम् । यद्यथा-

मू. (२७) *भिक्खू य गणातो अवक्कम्म अहाच्छंदविहारं विहरेज्ञा । सो इच्छेज्ञा दोच्चंपि पुनो पडिक्कमेज्ञा पुनो छेयपरिहारस्सु उवट्ठाइज्ञा तहेवगणं उवसंपज्जित्ताणं विहरित्तए अत्थिया इच्छसंसे पुनो आलोएज्ञा ।।*

मू. (२८) *एवं कुसील विहारं विहरेज्जा ।*

मू. (२९) *एवं आसन्न विहारंविहरेज्जा-*

मू. (३०) *एवं संसत्त विहारं विहरेज्जा-*

वृ- अथामीषां सूत्राणां पूर्वसूत्रत्रयेण सह कः सम्बन्ध इत्यत आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८३४] वृत्ता वितिणगमना इयाणिमवितिन्निमिग्गमे सुत्ता ।
पडिसिद्धिमवत्तस्स इमेसु सव्वेसु पडिसिद्धं ।।

वृ- पूर्वमुक्ता अभिशय्यादिषु वितीर्णगमनाः वितीर्णमनुज्ञातं गमनं येषां ते तथा इदानीं पुनः सूत्राणि अवितीर्णेऽननुज्ञाते निर्गमे यदिवा प्राक् एकाकिविहारप्रतिमाविषयेण सूत्रत्रयेणाव्यक्तस्य श्रुतेन वयसा परिकर्मणया वा प्राप्तस्य निर्गमणं प्रतिषिद्धमेतेषु पुनः पञ्चसु सूत्रेषु सर्वेषां व्यक्तानामव्यक्तानां च निर्गमनं प्रतिषिद्धमित्येष सम्बन्धः । अधुना अमूनि पञ्चापि सूत्राणि यद्विषयाणि तानि क्रमेण विशेष-प्रतिपादनार्थमुपन्यस्यति-

[भा.८३५] पासत्थ अहाच्छंदो कुसील उसन्नमेव संसत्तो ।
एएसिं नाणत्तं वोच्छामि अहानुपुव्वीए ।।

वृ- ज्ञानादीनां पार्श्वे तिष्ठतीति पार्श्वस्थः, पाशस्थ इति संस्कारस्तत्रेयं व्युत्पत्तिः मिथ्यात्वादयो बन्धहेतवः पाशास्तेपु तिष्ठतीति पाशस्थः । अहाच्छंदो इति यथाच्छन्दोऽभिप्राय इच्छा तथैवागमनिरपेक्षं यो वर्तते स यथाच्छन्दः । कुत्सितं शीलमस्येति कुशीलः समाचारासेवने, अवसीदति स्मेत्यवसन्नः । तथा संसक्त इव संसक्तः पार्श्वस्थादिकं तपस्विनं चासाद्य सन्निहितदोपगुण इत्यर्थः । इदं तु व्युत्पत्तिमात्रं स्थानाशून्यार्थमुक्तं । यावता भाष्यकृदेव स्वयमग्रे व्युत्पत्तिममीपां शब्दानां करिष्यति । एएसिमित्यादि एतेषां पार्श्वस्थादीनामनुष्ठानभेदतो यन्नानात्वं तदहं यथानुपूर्व्या यथोक्तक्रमेण वक्ष्यामि ।

अथ कथं पार्श्वस्थादयो जायन्ते तत आह-

[भा.८३६] गच्छंमि केइ पुरिसा, सउणी जह पंजरंतरनिरुद्धा ।
सारणपंजरचइया पासत्थगयादि विहरंति ।।

वृ- यथा शकुनिः शकुनिकापञ्जरान्तरनिरुद्धा महता कष्टेन वर्तते, तथा केचित् गुरुकर्माणः पुरुषा गच्छे स्मारणचोदनादि महत्कष्टमभिमन्यमानाः कष्टेन वर्तन्ते, । ततः स्मारणलक्षणपञ्जरत्याजिताः सन्तः पार्श्वस्थगतादयः आदिशब्दाद्यथाच्छन्दो गतादिपरिग्रहः विहरंत्यवतिष्ठन्ते विहृत्य च केचिद्भूयः स्वगुणमुपसम्पद्यते । तेपां चोपसम्पद्यमानानां प्रायश्चित्तदेयमतस्तद्विवक्षुरिदमाह-

[भा.८३७] तेसिं पायच्छित्तं वोच्छं ओहेय पयविभागे य ।
ठप्पं तु पयविभागे ओहेण इमं तु वोच्छामि ।।

वृ- तेषां पार्श्वस्थादीनां स्वगुणमुपसम्पद्यमानानां प्रायश्चित्तं वक्ष्ये कथमित्याह-ओघेन सामान्येन पदविभागेन च कालादिविशेषेण, गाथायां सप्तमीतृतीयार्थे । तत्र यत्पदविभागेन प्रायश्चित्तं वक्तव्यं तत् स्थाप्यं स्थापनीयं पश्चाद्वक्ष्यते इत्यर्थः । ओघेन सामान्येन कालादिविशेषरहितत्वेनेति भावः । पुनरिदमनन्तरं वक्ष्यमाणतया प्रत्यक्षीभूतमिव वक्ष्यामि प्रतिज्ञातमेव निर्वाहयति-

[भा.८३८] ऊसववज्जकयाई, लहुओ-लहुया अभिक्खगहणंमि ।
ऊसविकयाइ लहुआ गुरुगा य अभिक्खगहणंमि ।।

वृ- उत्सववर्जमुत्सवाभावे यदि कदाचित् शय्यातरपिण्डादिकं गृहीतवान् । ततस्तस्य प्रायश्चित्तं लघुको मासः, तथाभीक्ष्णं गृहीतवान् तथा चत्वारो लघुमासाः, । अथोत्सवे कदाचित् शय्यातर-पिण्डमग्रहीत् ततश्चत्वारो लघुका मासाः । अथाभीक्ष्णमुत्सवेषु गृहीतवान् ततश्चत्वारो गुरुका इहानुत्स-वादुत्सवे गुरुकशोधिप्रदानकरणमग्रे स्वयमेव वक्ष्यतीति नाभिधीयते ।। अत्र कालविशेषो न कोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्दिष्ट इतीदमोधेन प्रायश्चित्ताभिधानमिदानीं कालं सामान्यत आह-

[भा.८३९] चउछम्मासे वरिसे कयाइ लहुगुरुय तहय छग्गुरुगा ।
एएसु चेवभिक्खं चउ गुरु तह छग्गुरु च्छेदो ।।

वृ- चतुरो मासान् यावत् कदाचित् अपि गृहीतवान् यदि शय्यातरपिण्डं ततश्चत्वारो लघुकाः षण्मासान् कदाचिद्ग्रहणे चत्वारो गुरुकाः, वर्षं यावत् कदाचिदभिगृहीते षण्मासा गुरवः, एतेष्वेव चतुर्मासाः षण्मासवर्षेषु अभीक्ष्णग्रहणे यथाक्रमं चतुर्गुरु, षट् गुरुच्छेदश्च, किमुक्तं भवति । चतुरो मासान् यावदभीक्ष्णग्रहणेचत्वारो गुरुका मासाः, षण्मासानभीक्ष्याग्रहणेषण्मासाः गुरवः, वर्षं यावदभीक्ष्णग्रहणे च्छेदः, । अत्रोत्सवानुत्सवविशेषरहिततया सामान्येनाभिधानं तथा चाह-

[भा.८४०] एसे उ होतिओहे, एत्तो पयविभागतो पुनो वोच्छं, ।
चउत्थमासे वरिसे, ऊसववज्जं जइ कयाइ ।।

[भा.८४१] गेण्हइ लहुओलहुया गुरुया इत्तो अभिक्खगहणंमि ।
चउरो लहुया गुरुया छग्गुरुया ऊसवविवज्जा ।।

वृ- एषामनन्तरोक्तः प्रायश्चित्तविशेषः ओघेन सामान्येन भवति द्रष्टव्यः । अत ऊर्ध्वं पुनर्विभागतः पदविभागेन प्रायश्चित्तं वक्ष्ये । यथा प्रतिज्ञातं करोति, चतुरो मासान् यदि कदाचित् उत्सववर्जमगृहीतशय्यातरपिण्डं ततो मासलघु, षण्मासानुत्सववर्जमभिगृहीते चत्वारो लघुकाः, वर्षं यावदुत्सववर्जं कदाचिदभिग्रहणे चत्वारो गुरुकाः, । इतर ऊर्ध्वमेतेष्वेव चतुः षड्वर्षेऽभीक्ष्णग्रहणे वक्ष्ये चत्वारो लघुका गुरुकाः षट्गुरुका उत्सववर्जा यथाक्रमं ज्ञातव्याः, । किमुक्तं भवति ? चतुरो मासानुत्सववर्जंशय्यातर-पिण्डमभीक्ष्णमगृहीत् ततः प्रायश्चित्तं चत्वारो मासाः लघुकाः, षण्मासानुत्सववर्जमभीक्ष्णग्रहणे चत्वारो गुरुकाः, वर्षं यावदुत्सववर्जमभीक्ष्णग्रहणे षट् गुरुकाः, उत्सववर्जे गतमिदानीमुत्सवे प्रतिपादयति-

[भा.८४२] चउरो लहुया गुरुगा छम्मासा ऊसवंमि उ कयाई ।
एवं अभिक्खगहणे छगुरु चउछग्गुरुच्छेदो ।।

वृ- चतुरो मासान् यदि कदाचिदुत्सवे गृहीतवान् ततश्चत्वारो मासा लघवः, षण्मासान् कदाचिदुत्सवे ग्रहणे चत्वारो गुरुकाः, वर्षं यावत्कदाचिद्गृह्णतः षण्मासा गुरवः एतत्पुनर्वक्ष्यमाणमभीक्ष्णग्रहणे षट् गुरु इत्यादि; चतुरो मासानुत्सवेष्वभीक्ष्णग्रहणे षण्मासा गुरवः, षण्मासानुत्सवे ष्वभीक्ष्णग्रहणे चतुर्गुरुकश्छेदः वर्षं यावदभीक्ष्णमुत्सवेषु ग्रहणे षट्गुरुकच्छेदः अथ कस्मादुत्सवेषु कदाचिदभीक्ष्णं वा ग्रहणे अधिकतरप्रायश्चित्तदानमत आह-

[भा.८४३] उत्सववज्जे न गेण्हइ निब्बंधो ऊसवंमि गेण्हत्ति ।
अज्झायरगादीया इति अहिगाउसवे सोही ।।

वृ- एष साधुरुत्सववर्जे उत्सवरहिते शेषे काले भिक्षां न गृह्णाति । उत्सवे पुनर्विपुलं भक्तपानं प्रासुकमुपलभ्य कथमपि निर्बन्धात् गाढादरकरणाद्गृह्णाति । ततोऽस्मै पर्याप्तं दातव्यमिति किञ्चित् न अध्यवपूरकादयो दोषाः सम्भवन्ति । आदिशब्दात् मिश्रकादिदोषपरिग्रहः इति अस्माद्धेतोरुत्सवे अधिकाबहुतरा शोधिःप्रायश्चित्तमिति ।

[भा.८४४] एवं उवठियस्स पडितप्पिय साहूणो पदं हसति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोइए रागदोसे दिठंतो पन्नगतिलेहिं ।।

वृ- एवमुपदर्शितेन प्रकारेण शय्यातरपिण्डादि प्रतिसेव्य पुनरकारणतयो पस्थितस्य ग्लानादिप्रयोजनेषु प्रतर्पिता भक्तपानप्रदानादिना सोपष्टम्भीकृताः साधवो येन प्रसर्पितसाधुस्तस्य पदं प्रतिसेवालक्षणं हसति एवमेवमुच्यते । अयमत्र सम्प्रदायो यदि गच्छरात्रिंदिवं दशरात्रिंदिवं यावद्भिन्नमास इत्यापन्नो भवति, ततः स एवमेवमुच्यते, तस्य साधुप्रतर्पणेनैव शुद्धिभावात्, अथ मासादिषकमापन्न-स्तदन्तिमं एवं हसति यद्यथा यदि द्वौ मासावापन्नस्तत एको मासो मुच्यते, एको दीयते, अथ त्रीन् मासान् तर्हि एको मुच्यते द्वौ मासौ दीयते इत्यादि । अत्र परो रागद्वेषौ चोदयति, यथा यूयं रागद्वेषवन्तः । तथाहि येन साधूनां प्रतर्पितं तस्य पदमनुरागतोहासयथ, येन पुनर्न प्रतितर्पितं तस्य द्वेषतः सकलमपि प्रायश्चित्तं परिपूर्णं प्रयच्छथ । सूरिराह- दिठंतो पन्नगतिलेहिं न वयं रागद्वेषवन्तस्तथा चात्र दृष्टान्त उपमापन्नकतिलैः तथाहि पन्नकतिला नाम दुर्गन्धितिलाः ते स्थानद्वयेऽपि स्थापिताः । तत्रैके निम्बपुष्पैर्वासिताः, अपरे स्वाभाविका एव स्थितः । तत्र ये निम्बपुष्पैर्वासितास्तेषां दुरभिगन्धो बहुविधेनोपक्रमेणापनेतुं शक्यते । इतरेषां स्तोकेन एवमिहापि ये स्वरूपतः पार्श्वस्था अपरं च साधुसामाचारीप्रद्वेषतो ग्लानादिप्रयोजनेषु साधूनामप्रतर्पिणोऽवर्णभाषिणश्च ते महता प्रायश्चित्तेन शुद्धिमासादयन्ति । ये तु पार्श्वस्था अपि कर्मलघुतया साधुसमाचारनुगताः साधून् ग्लानादिप्रयोजनेषु प्रतर्पयन्ति श्लाघाकारिणश्च ते स्तोकापराधेन एवमेव शुद्ध्यन्ति, । महापराधिनोऽन्तिमपदहास्तः स्तोकेन प्रायश्चित्तेनेति पन्नकतिलाश्चोपलक्षणं तेन सर्वाश्यसर्वाशिरोगाभ्यां धौताधौतशारदपटाभ्यां पन्नकतिलेन चोपमा द्रष्टव्याः । तद्यथा सर्वमश्नातीत्येवं शीलः सर्वाशीबहुभक्षकोऽसर्वाशी अल्पभोजी, तत्र सर्वाशी रोगी कर्कशया क्रियया शुद्धिमासादयति । असर्वाशीस्तोकया क्रियया यथा वा द्वौ पटौ शारदौ तत्रैको वाते वाति प्रतिदिवसं तेन वातेन धून्यते अपरो न एवं तयोर्द्वयोरपि कालक्रमेण मलिनीभूतयोर्विधूतपटः स्तोकेनोपक्रमेण शुद्धिमासादयत्यविधूतपटो बहूनोपक्रमेण एवं यः पार्श्वस्थः साधूनामवर्णभाषी स महता प्रायश्चित्तेन शुद्धिं लभते । इति तस्मै परिपूर्णं प्रायश्चित्तं दीयते । इतरस्य तु साधूनां प्रतर्पणेन वर्णभाषणेन च शुद्धिः सम्भवत्येतदर्थं हास इति साम्प्रतमेतदेव विवरीषुः परः प्रश्नं भावयति-

[भा.८४५] जो तुज्झं पडितप्पइ तस्सेगं ठाणगं तु हासेहा ।
वड्डेह अप्पडितप्पे इइ रागद्दोसिया तुब्भे ।।

वृ- योऽस्माकं प्रतितर्पयति उपकारं करोति, तस्य एकं स्थानकमन्तिमलक्षणं प्रागुक्तस्वरूपं ह्रासयथ, यः पुनर्न प्रतितर्पयति तस्मिन्नप्रतितर्पे तदेकस्थानकमन्तिमलक्षणं वर्धयथ । पूर्णं परिपूर्णं तस्मै प्रायश्चित्तं दत्थ इत्यर्थः । इत्येवममुना प्रकारेण यूयं रागद्वेषिका रागद्वेषवन्तः । सम्प्रति यदुक्तं पन्नकतिलै-दृष्टान्त इति तद्भावयति-

[भा.८४६] इहरहवि तावचोयग कडुयं तेल्लं तु पन्नगतिलाणं ।
किं पुन निम्बतिलेहिं भावियाणं भवेखज्जं ।।

वृ- इतरथा पि निम्बकुसुमादि वासनामन्तरेणापि तावत् हे चोदकपन्नकतिलानां दुर्गंधितिलानां तैलं कटुकमेव । तुरेवकारार्थो भिन्नक्रमश्च । न खाद्यं भवतीति भावः । किं पुनस्तेषां पन्नकतिलानां निंबतिलैः तिला इव सूक्ष्मत्वात् निंबतिलाः कुसुमानि स्वस्यतिलानि स्वतिलास्तैर्निम्बकुसुमैरित्यर्थः भावितानां वासितानां तैलं खाद्यं भवेन् नैव भवेदित्यर्थः । एष दृष्टान्तोऽयमुपनयः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८४७] एवं सो पासत्थो श्रवणवादी पुनो य साहूणं ।
तस्स य महती सोही बहुदोसोसोत्थहो चेव ।।

वृ- एवं सोधिकृतः साधुरेकं तावत्पार्श्वस्थसमाचारकारी पुनः साधूनामवर्णवादी साधुसमाचार-प्रद्वेषात् । ततस्तस्य तथारूपस्य महती शुद्धिः प्रायश्चित्तं यत्सोऽत्र प्रायश्चित्तदानविधौ परिचिंत्यमानो बहुदोष एव भवति वर्तते । तदेवमप्रशस्ततिलैरुपनयः कृतः । सम्प्रति प्रशस्ततिलैस्तमभिधित्सुराह-

[भा.८४८] जह पुन ते चेव तिलाउसिणोदग धोयखीरउव्वक्का ।
तेसिं जं तेल्लं तत्तं घयमद्धं विसेसेइ ।।

वृ- यथा पुनस्त एव पन्नकतिला उष्णोदकेन पूर्वं धौतास्तदनन्तरेण क्षीरेण दुग्धेन उव्वक्का क्षीरमध्ये प्रक्षिप्य कियत्कालं धृत्वा ततो निष्काशिताः तेषांय तैलं घृतमाडमपि विशेषयति । ततोऽप्यधिकतरं भवतीति भावः । एष दृष्टान्तोऽयमुपनयः-

[भा.८४९] कारण संविग्गाणं आहारादीहिं तप्पितो जोउ ।
नीयावत्तणुतप्पी तप्पक्खिय वन्नवादी य ।।

वृ- यः कारणेष्वशिवावमौदर्यादिषु संविग्नानां सुसंयतानामाहारदिभक्तपानौषधादिभिस्त-पिरतःप्रतर्पणं कृतवान् । तथा यः संविग्नानां नीचैर्वृत्तिर्वर्तनं यस्य स तथा किमुक्तं भवति स तान् वन्दते न पुनर्वन्दापयति । तथा अकल्पं किमपि प्रतिसेव्य अनु पश्चात् हा दुष्ठुकृतं हा दुष्ठु कारितमित्यादि रूपेण तपति सन्तापमनुभवतीत्येवं शीलोऽनुतापी तथा तेषां संविज्ञानां पक्षस्तत्पक्षस्तत्र भवस्तत्पाक्षिकः संविग्नपाक्षिक इत्यर्थस्तथा वर्णवादी श्लाघाकारी सुविहितानां ततः किमित्याह-

[भा.८५०] पावस्स उवचियस्स वि पडिसाडणमोकरेति सो एवं ।
सव्वासि रोगि उवमा सरएय पडे अविधुयंमि ।।

वृ- एवममुना प्रकारेण संविग्नतर्पणादिनाद्यापि पार्श्वस्थेन सता उपचयं नीतं तथापि तस्योपचितस्यापि पापस्य परिशाटनभावं करोति । मो इति पादपूरणे तेन तस्यैकस्य पदस्य ह्रासः उक्तापन्नकतिल-दृष्टान्तभावना; एवमवर्णवादिनः पार्श्वस्थस्य परिपूर्णप्रायश्चित्तदाने सर्वाशिरोगिणोपमया च शारदिके पटे वाते धूते सा च दृष्टान्तभावना भावयितव्या सह्रासं प्रतिपन्नस्तद्दृष्टान्त भावनामाह-

[भा.८५१] पन्नो यच्छंतो किमिणोय अनुपावयं वच्छितो य ।
उल्लोय कणसेवा य पुत्तेणं बुभुलइयं मुणेऊणं ।।

वृ- तदेवमितरः पार्श्वस्थः साधूनामप्रतर्पयिता न च पापं कृत्वाऽनुतपति । यदपि च पापं कुरुते तदपि निर्दयः सन्, साधूनां वावर्णभाषी, ततः सोऽन्यथा न शुद्ध्यतीति तस्मै परिपूर्णं प्रायश्चित्तं दीयते । द्वितीयस्तु साधुप्रतर्पणादिना बहुपापं क्षपयितवान् न च निर्दयः सन्नकरोत्पापमिति तस्य पदह्रासेन भावयति-

[भा.८५२] थोवं भिन्नमासादिगाओयराइंदियाइ जा पंच ।
सेसेउपयं ह्रसती परितप्पियएयरे सयलं ।।

वृ- यदि नामस्तोकं भिन्नमासादिकादारभ्य यावत्पञ्चरात्रिं दिवानि एतानि समुदितान्येकतरं वा प्रायश्चित्तमापन्नस्तदा स एवमेव मुच्यते । तस्य साधुप्रतर्पणादिना शुद्धीभूतत्वात् यदि पुनर्भिन्नमासस्योपरि प्रायश्चित्तमापन्नस्ततस्तस्मिन् शेषे प्रायश्चित्ते समापतिते सति पदमन्तिमं प्रतर्पिते साधौ ह्रसति । तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चान्तिमपदह्रासस्य भावना प्रागेव कृता । इतरस्मिन् साधूनामप्रतर्पिण्यवर्णवादिनि च सकलं परिपूर्णं प्रायश्चित्तं तस्यान्यथा शुद्धयभावात् । ततो न वयं रागद्वेषवन्तः । सम्प्रति पार्श्वस्थान् व्याख्यानयति-

[भा.८५३] दुविहो खलु पासत्थो देसे सव्वे य होइ नायव्वो ।
सव्वे तिन्नि विकप्पा देसे सेज्जायर कुलादी ।।

वृ- द्विविधो द्विप्रकारः, खलु निश्चितं पार्श्वस्थः । तद्यथा-देशे देशतः, सर्वस्मिन् सर्वतः पार्श्वस्थः; शब्दः संस्कारमाश्रित्य त्रयो विकल्पास्त्रयः प्रकारास्तद्यथा-पार्श्वस्थः प्रास्वस्थः पाशस्थश्च । एते स्वयमेवाग्रे वक्ष्यन्ते । देशे देशतः पार्श्वस्थः, शय्यातरकुलादि प्रतिसेवमानः, । 'तिनि विगप्पा' इत्युक्तं तत्र प्रथमं प्रकारमाह-

[भा.८५४] दंसणनाणचरित्ते तवे य अत्ताहितोपवयणे य ।
तेसिं पासविहारी पासत्थं तं वियाणेहि ।।

वृ- दर्शनं सम्यक्त्वं, ज्ञानमाभिनिबोधिकादि, चारित्रमाश्रवनिरोधः, एतेषां समाहारो द्वन्द्वस्तस्मिन् । तथा तपसि बाह्याभ्यन्तररूपे द्वादशप्रकारे प्रवचने च द्वादशाङ्गलक्षणे यस्यात्मा हतोप्रयुक्तो न सम्यग् योगवानित्यर्थः । यदि वा अहितस्तेषां विराधकत्वात् । किन्तु तेषां ज्ञानादीनां पार्श्वे तटे विहरतीत्येवं शीलो विहारी । न तेषु ज्ञानादिष्वन्तर्गत इत्यर्थः । स पार्श्वस्थ इति विजानीहि, ज्ञानादीनां पार्श्वे तिष्ठतीति व्युत्पत्तेः । इह यद्यपि यो दुष्करमाश्रवं निरोधं करोति स परमार्थतस्तपोयुक्त एवेति वचनतश्चारित्रग्रहणेन तपो, ज्ञानग्रहणेन च प्रवचनं गतं, तथापि तयो रुपादानं मोक्षं प्रति प्रधानांगता ख्यापनार्थं; भवति च तपो मोक्षं प्रति प्रधानमङ्ग पूर्वसञ्चितकर्मक्षपणत्वात् प्रवचनं च विधेयाविधेयोपदेशदायित्वादिति उक्त एकः प्रकारः ।। सम्प्रति द्वितीयप्रकारमाह-

[भा.८५५] दंसणनाणचरित्ते सत्तो अच्छति तहिं न उज्जमति ।
एएणं पासत्थो, एसो अन्नो वि पज्जाओ ।।

वृ- ज्ञानदर्शनचारित्रे यथोक्तरूपे यः स्वस्थोऽवतिष्ठते न पुनस्तत्र ज्ञानादौ यथा उद्यच्छति उद्यमं करोति । एतेन कारणेनैष पार्श्वस्थ उच्यते । प्रकर्षेणासमन्तात्‌ज्ञानादिषु निरुद्यमतया स्वस्थः प्रार्श्वस्थ इति व्युत्पत्तेः । एष खलु अन्यो द्वितीयोऽपि पर्यायः । अपिशब्दः खल्वर्थे भिन्नक्रमश्च । स च यथास्थानं योजितः । उक्तो द्वितीयः प्रकारः ।। सम्प्रति तृतीयमाह-

[भा.८५६] पासोत्ति बंधणंति य एगट्ठं बंधहेयवो पासा ।
पासत्थिओ पासत्थो अन्नो वि य एस पज्जाओ ।।

वृ- पाश इति वा बन्धनमिति वा एकार्थम् । इह ये मिथ्यात्वादयो बन्धहेतवस्ते पाशाइव पाशास्तेषु स्थितः पाशस्थः । पाशेषु तिष्ठतीति पाशस्थ इति व्युत्पत्तेः । एषोऽन्यः खलु तृतीयः पर्यायः । उक्तास्त्रयोऽपि प्रकारास्तद्भणनाच्च भणितः सर्वतः पार्श्वस्थः ।। इदानीं देशतः पार्श्वस्थं व्याचिख्यासुना यदुक्तं 'सेज्ञायर कुलादी' इति तद्व्याख्यानयति-

[भा.८५७] सेज्जायर कुल निस्सिय ठवण कुल पलोयणा अभिहडे य ।
पुव्विं पच्छा संथव निइ अग्गपिंड भोइ पासत्थो ।।

वृ- यः शय्यातरपिण्डं भुङ्क्ते यानि च तस्य निश्रितान्याश्रितानि कुलानि तानि सततमुपजीवति । किमुक्तं भवति ? यानि कुलानि तस्याग्रे सम्यक्त्वं प्रतिपन्नानि येषु ग्रामेषु नगरेषु वा वसन्ति, तेषु गत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेभ्यः आहारादिकमुत्पादयति । 'ठवण' त्ति स्थापनाकुलानि निर्दिशति । अथवा यानि लोके गर्हितानि कुलानि तानि स्थापितान्युच्यन्ते । तेषामपरिभोग्यतया जनैः स्थापितत्वात् तेभ्यः आहारादिकमुत्पादयति । पलोयण त्ति सङ्गङ्ख्याः सततमाहारलोल्यतः प्रलोकना येन क्रियते शरीरस्य वा शुभवर्णादि निरीक्षणार्थं प्रलोकना । तथा अभ्याहृतानि आचीर्णाननाचीर्णांश्चाहारान् यो गृह्णाति । यस्तु पूर्वसंसक्तान् मातापित्रादीन् पश्चात्संस्तुतान् श्वश्रूप्रभृतीन् उपजीवति, यदि वा पूर्वपरिचितानप्याहारलोल्यतः पूर्वसंस्तुतान् पश्चात्संस्तुतान् वा करोति । तथा नित्यपिण्डमग्र पिण्डं च यो भुङ्क्ते स देशतः पार्श्वस्थः ।। साम्प्रतमभ्याहृतपिण्डं नियतपिण्डं च व्याख्यानयति-

[भा.८५८] आइणमनाइणं निसीह भिहडं च नो निसीहं च ।
साभावियं च नियय निकायण निमंतणे लहुओ ।।

वृ- अभ्याहृतं द्विविधमाचीर्णमनाचीर्णं च । तत्राचीर्णमुपयोगसंभवे गृहत्रयमध्ये, ततः परमनाचीर्णमुपयोगासम्भावात् । अनाचीर्णमपि द्विविधा- निशीथाभ्याहृतं नोनिसीथाभ्याहृतं च । तत्र यत्साधोरविदितमभ्याहृतं च तन्निशीथाभ्याहृतमितरत् साधोर्विदितमानीतं नो निशीथाभ्याहृतं । एतानि कारणे निष्कारणे वा कथंचित् यथाभिगृह्णानो देशतः पार्श्वस्थः, नियतं त्रिविधम् । तद्यथा- स्वाभाविकं, निकाचितं, निमन्त्रितं च । तत्र यन्नसंयतार्थमेव किन्तु य एव श्रमणोऽन्यो वा प्रथममागच्छति तस्मै यदग्रं पिएडादि दीयते, तत्स्वाभाविकम् । यत्पुनर्भूतिकर्मादिकरणतश्चतुर्मासादिकं कालं यावत् प्रतिदिवसं निकाचित् निबद्धीकृतं गृह्यते तन्निकाचितम् । यत्तु दायकेन निमन्त्रणापुरस्सरं प्रतिदिवसं नियतं दीयते तन्निमन्त्रितम् । एतान्यपि गृह्णानो देशतः पार्श्वस्थः, स्वाभाविकनियते निकाचने निमन्त्रणे च सर्वत्र प्रायश्चित्तं मासलघुः ।। अथ पार्श्वस्थो भूत्वा कथं संविग्नविहारमुपपद्यते येनोच्यते- 'स इच्छेज्ञा दोच्चं तमेव ठाणं उवसंपज्जित्ताणं विहरित्तए' इत्यादि, तत आह-

[भा.८५९] संविग्न जनो जड्डो जह सुहितो सारणाए चइओउ ।
वच्चइ संभरमाणो तं चेव गणं पुनो एति ।।

वृ- इह संविग्नो जनो जड्ड इव हस्तीव वेदितव्यः । तथाहि- यथा हस्ती वनादानीतो घृतगुडादिभिः पुष्टिं नीतः स्मृत्वा वनं जगाम । तच्च वनमनावृष्टिभावतोऽवरीभूतं । ततस्तत्र दुःखमनुभवत् घृतगुडादिकं स्मरति, स्मृत्वा च भूयो नगरमायाति । एवं सोऽप्यधिकृतः संविग्नो जनः संविग्नानां मध्ये भगवत्प्रसादत उत्कृष्टैराहारैः पोषमुपागतस्ततः सुखितः सन् स्मारणामसहमानस्तया त्याजितः पार्श्वस्थविहारमुपपद्यते । तत्र च स्थितः पार्श्वस्थ इति कृत्वा श्राद्धादिभिर्नाद्रियते केवलं लोकत आक्रोशमवाप्नोति । यथा यं धिक् शिथिलो जात इति । ततः संविग्नानां पूजां सत्कारं च संस्मरन् तमेवात्मीयं गणं पुनरेति समागच्छति । समागतश्च सन्नालोचनाद्यर्थमभ्युत्तिष्ठति । तत इदमाह-

[भा.८६०] अत्थिय सेसावसेसं, जइ नत्थी मूलमत्थि तवच्छेया; ।
थोवं जइ आवन्नो पडितप्पए साहुणा सुद्धो ।।

वृ- पूर्वमिदं परिभावनीयं से तस्य आलोचनाद्यर्थमभ्युद्यतस्य सावशेषं चारित्रमस्ति । चशब्दात् किं वा नास्ति । ततो मूलं दातव्यम् । मूलं नाम सर्वपर्यायोच्छेदः । अथास्ति चारित्रं ततस्तस्मै तपो वा दीयतां च्छेदो वा । तत्र यदि स्तोकमापन्नो भवति स्तोकं नाम रात्रिंदिवपञ्चकादारभ्य भिन्नमासं यावत्साधूनां च स प्रतितर्पितः । ततः स साधुतर्पणादेव शुद्ध इति प्रसादेन मुच्यते । मासाद्यापत्तौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वन्तिमपदह्रास इति गतं पार्श्वस्थसूत्रमिदानीं यथाच्छन्दसूत्रं वक्तव्यम् । तच्च प्रागेवोपदर्शितम् ।

इदानीं यथाच्छन्दस्वरूपं वर्णयति-

[भा.८६१] उस्सुत्तमायरंतो उस्सूत्तं चेव पन्नविमाणो ।
एसो उ अहाछंदो इच्छाच्छंदो य एगठा ।।

वृ- सूत्रादुर्ध्वं उत्तीर्णं परिभ्रष्टमित्यर्थः । उत्सूत्रं तदाचरन् प्रतिसेवमानस्तदेव यः परेभ्यः प्रज्ञापयन् वर्तते एष यथाच्छन्दोऽभिधीयते । सम्प्रति चछन्दः शब्दार्थं पर्यायेणव्याचष्टे । इच्छाच्छन्द इत्येकार्थः । किमुक्तं भवति ? च्छन्दो नाम इच्छेति व्युत्पत्तिश्च यथाच्छन्दशब्दस्य प्रागेवोपदर्शिता उत्सूत्रमित्युक्तमत उत्सूत्रं व्याख्यानयति-

[भा.८६२] उस्सुत्तमनुवदिठं सच्छंदविगप्पियं अननुवादी ।
परतत्तिय पवित्तेतिंतणे य एसो अहाच्छंदो ।।

वृ- उत्सूत्रं नाम यत्तीर्थङ्करादिभिरनुपदिष्टं तत्र या सूरिपरम्परागता समाचारी । यथा नागिला रजोहरणमूर्ध्वमुखं कृत्वा कायोत्सर्गं कुर्वन्ति । वारणानां वन्दनके कथमपीत्युच्यते इत्यादि साप्यङ्गेषूपाङ्गेषु नोपदिष्टेत्यनुपदिष्टं शङ्केत ततोऽनुपदिष्टमाह-सच्छन्देन स्वाभिप्रायेन विकल्पितं रचितं स्वेच्छाकल्पितमित्यर्थः । अत एवाननुपाति सिद्धान्तेन सहाघटमानकं न केवलमुत्सूत्रमाचरन् प्रज्ञापयंश्च यथाच्छन्दः किन्तु यः परतत्तिषु गृहस्थप्रयोजनेषु करणकरणानुमतिभिः प्रवृत्तः परतत्तिप्रवृत्तः । तथा तिंतिणो नाम यः स्वल्पेऽपि केनचित्साधुनापराद्धेऽनवरतं पुनः पुनस्तं रुषन्नास्तेऽयमेवं रूपो यथाच्छन्दः तथा-

[भा.८६३] सच्छंदमतिविगप्पिय किंची सुखसाय विगइ पडिबद्धो ।
तिहिं गारवेहिं मज्जति तं जाणाही अहाच्छंदं ।।

वृ- स्वचछन्दमतिविकल्पितं किञ्चित्कृत्वा तल्लोकाय प्रज्ञापयति । ततः प्रज्ञापनगुणेन लोकाद्विकृतीर्लभते । ताश्च विकृतीः परिभुञ्जानः स्वसुखमासादयति, तेन च सुखासादनेन तत्रैव रतिमातिष्ठति तथा चाह-सुखस्वादने सुखास्वादे विकृतौ च प्रतिबद्धः । तथा तेन स्वच्छन्दः मतिविकल्पितप्रज्ञापनेन लोकपूज्यो भवति । अभिष्टरसांश्चाहारान् प्रतिलभते वसत्यादिकं च विशिष्टमतः स आत्मानमन्येभ्यो बहुमन्यते । तथा चाह-त्रिभिर्गौरवैर्ऋद्धिरससालक्षणैर्माद्यति य एवंभूतस्तं यथाच्छन्दं संजानीहि । इह उत्सूत्रं प्ररूपयन् यथाच्छन्द उच्यते तत उत्सूत्रप्ररूपणामेव भेदतः प्ररूपयति-

[भा.८६४] अहच्छंदस्स परूवण उस्सुत्ता दुविह होइ नायव्वा ।
चरणेसु गईसु जा, तत्थ चरणे इमा होति ।।

वृ- यथाच्छन्दसः प्ररूपणा उत्सूत्रासूत्रादुत्तीर्णा द्विधा भवति ज्ञातव्या । तद्यथा-चरणेषु चरणविषया गतिषु गतिविषया, । तत्र या चरणे चरणविषया सा इयं वक्ष्यमाणा भवति तामेवाह-

[भा.८६५] पडिलेहण मुहपोत्ति य रयहरण निसेज्ज पाय मत्तए पट्टे ।
पडलाइं चोलउन्ना दसिया पडिलेहणा पोत्ते ।।

वृ- या मुखपोत्तिका मुखवस्त्रिका सैव प्रतिलेखनीया पात्रप्रत्युपेक्षया पात्रकेसरिकाः किं द्वयोः परिग्रहेण अतिरिक्तोपधिग्रहणेन संभवात् । तथा रयहरणनिसेज्जत्ति किं रजोहरणस्य द्वाभ्यां निषद्याभ्यां कर्तव्यमित्येका निषद्यास्तु, पायमत्तएत्ति यदेवपात्रं तदेवमात्रं क्रियताम् मात्रकं वा पात्रं किं द्वयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिग्रहेण, तथापट्टति य एव चोलपट्टकः । स एव रात्रौ संस्तारकस्योत्तरपट्टः कियतां किं पृथगुत्तरपट्टपरिग्रहेण । तथा पडलाइं चोलत्ति पटलानि किमिति पृथक् ध्रियंते चोलपट्ट एव भिक्षार्थं हिएडमानेन द्विगुणस्त्रिगुणो वा कृत्वा पटलकस्थाने निवेश्यताम् । उन्नादसियत्ति रजोहरणस्य दशा किमित्युर्णामय्यः क्रियन्ते क्षौमिकाः क्रियन्तां तहर्पूर्णामयीभ्यो मृदुतरा भवन्ति । तथा 'पडिलेहणा पोत्तो' त्ति प्रतिलेखनावेलायामेकं पोतं प्रस्तार्य तस्योपरि समस्तवस्तुप्रेक्षणां कृत्वा तदनन्तरमुपाश्रयाद्बहिः प्रत्युपेक्षणीयमेवं महती जीवदया कृता इति ।।

[भा.८६६] दन्तच्छन्नमलित्तं हरियठियमज्जणाय निंतस्स ।
अनुवादि अननुवादी परूवणाचरणमाईसुं ।।

वृ- हस्तगताः पादगता नखाः प्रवृद्धा दन्तैश्छेत्तव्या । न नखरदनने, नखरदनं हि ध्रियमाणमधिकरणं भवति तथा अलिप्तमिति पात्रमलिप्तं कर्तव्यम्, न पात्रं लेपनीयमिति भावः । पात्रलेपनेन बहुसंयमदोपसम्भवात् । 'हरिय ठिय' त्ति हरितप्रतिष्ठितं भक्तपानादिग्राह्यं तद्ग्रहणे हि तेषां हरितकायजीवानां भारापहारः कृतो भवति । 'पमज्जणा य निंतस्से' त्ति यदि च्छन्ने जीवदयानिमित्तं प्रमार्जना क्रियते ततो बहिरप्यच्छन्ने क्रियतां जीवदयापरिपालनरूपस्य निमित्तस्योभयत्रापि संभवात् । अक्षरघटना त्वेवम्- 'निंतस्स निर्गच्छतः प्रमार्जना भवतु यथा वसतेरन्तरिति । एवं यथाच्छन्देन चरणेषु च प्ररूपणानुपातिनी अनुसारिणी अननुपातिनी च क्रियते । अथ किंस्वरूपानुपातिनीत्यनुपातिन्यनुन-पातिन्योः स्वरूपमाह —

[भा.८६७] अनुवाइत्ती नज्जइ जुत्तीपडियं खुभासए एसो ।
जं पुन सुत्तावेयं तं होति अननुवातित्ति ।।

वृ- यद्भापमाणः स यथाच्छन्दो ज्ञायते यथा खलु निश्चितं युक्तिसङ्गमेप भाषते तदनुपाति प्ररूपणं यथा यैव मुखपोतिका सैव प्रतिलेखनिकास्त्वित्यादि यत्तु पुनर्भाष्यमाणं सूत्रापेतं सूत्रपरिभ्रष्टं प्रतिभासते तद्भवत्यननुपाति । यथा चोलपट्टः पटलानि क्रियतां षट्पदिकापतनसम्भवतो युक्त्यसङ्गततया प्रतिभासमानत्वात् तत्र चरणे प्ररूपणमनुपात्यननुपाति चोक्तमिदं चान्यत् द्रष्टव्यम् ।। तदेवाह-

[भा.८६८] सागारियादिपलियंक निसेज्जा सेवणा य गिहिमत्तो ।
निग्गंथ चिठणाई पडिसेहो मासकप्पस्स ।।

वृ- सागारिकः शय्यातरस्तद्विषये ब्रूते तथा शय्यातरपिण्डे गृह्यमाणेनास्ति दोपः प्रत्युतगुणो वसतिदानतो भक्तपानादि दानतश्च प्रभूततरनिर्जरासम्भवात् । आदिशब्दात्स्थापनाकुलेष्वपि प्रविशतो नास्ति दोषः । पलियंकत्ति पर्यङ्कादिषु परिभुज्यमानेषु न कोऽपि दोषः केवलं भूमावुपविशमाने लाघवादयो बहुतरदोषाः । 'निसेज्जासेवण' त्ति गृहिनिषद्यायामासेव्यमानायां गृहेषु निपद्याग्रहणे इत्यर्थः । को नाम दोषोऽपि त्वतिप्रभूतो गुणस्ते हि जन्तवो धर्मकथाश्रवणतः सम्बोधमाप्नुवन्ति 'गिहिमित्ते' त्ति गृहिमात्रके भोजनं कस्मान्न क्रियते । एवं प्रवचनोपघातः परिहृतो भवति । तथा 'निग्गंथिचिठणादि' त्ति निर्ग्रन्थीनामुपाश्रये अवस्थानादौ को दोषः संक्लिष्टमनो निरोधेन ह्यसंक्लिष्टं मनः सम्प्रधारणीयमिति भागवत उपदेशः तच्चासंक्लिष्टमनःसम्प्रधारणं यत्र तत्र वा स्थितेन क्रियतामिति न कश्चिद्दोषोऽन्यथा हिं अन्यत्रापि स्थितो यद्यशुभं मनः सम्प्रधारयति तत्र किं न लिप्यते इति । तथा मासकल्पस्य प्रतिषेधस्तेन क्रियते । यथा यदि मासकल्पात्परतो दोषो न विद्यते ततस्तत्रैव तिष्ठन्ति तिष्ठन्तु मा विहारक्रमं कार्षुरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८६९] चारे वेरज्जेया पढमसमोसरण तहय नितिएसु ।
सुणे अकप्पिएया अनाउच्छेयसंभोए ।।

वृ- चारश्चरणं गमनमित्येकार्थः । तद्विपये ब्रूते । तद्यथा-चतुर्पु मासेषु मध्ये यावद्वर्पं पतति तावन्माविहारक्रममकार्षीत् । यदा तु नपतति वर्षं तदा को दोषो हिण्डमानस्येति तथा वैराज्येऽपि ब्रूते यथा वैराज्येऽपि साधवो विहारक्रमं कुर्वन्तु परित्यक्तं हि साधुभिः परमार्थतः शरीरं तद्यदि ते गृहीष्यन्ति । किं क्षुन्नंसाधूनां, सोढव्याः खलुसाधुभिरुपसर्गाः । ततो यदुक्तं-नो कप्पइ निग्गंथाणं वेरज्ञविरुद्धरज्जंसि सज्जं गमणंसज्जमागमणंति, तदयुक्तमिति पढमसमोसरणंति प्रथमसमवसरणं नाम प्रथमवर्षाकालस्तत्र ब्रूते । यथा प्रथम समवसरणे उद्गमादिदोषपरिशुद्धं वस्त्रं पात्रं वा किं न कल्पते गृहीतुं द्वितीयसमवसरणेपि ह्युद्गमादिदोषपरिशुद्धमिति कृत्वा गृह्यते । सा च दोषशुद्धिरुभयत्राप्यविशिष्टेति तहय नीतिएसुत्ति तथा नित्येपु नित्यवासेपु प्ररूपयति । यथा नित्यवासेषु यद्युद्गमोत्पादनैषणा शुद्धं लभ्यते भक्तपानादि ततस्तत्र को दोषः प्रत्युतदीर्घकालमेकक्षेत्रे वसतां सूत्रार्थादयः प्रभूता भवन्ति, तथा 'सुन्नत्ति' यद्युपकरणं न केनापि ह्रियते ततः शून्यायां वसतौ क्रियमाणायां को दोषः । अथोत्सङ्कटनेनोपहन्यते तन्न चित्तस्योपधिः क उपघातः । अथाकप्पियत्ति अकल्पिको नामागीतार्थः तद्विपये ब्रूते । यथा अकल्पिकेन प्रथमशैक्षकरूपेण शुद्धमज्ञातोञ्छं वस्त्रपात्राद्यानीतं किं न भुज्यते । तस्याज्ञातोञ्छतया विशेषतः परिभोगार्हत्वात् । संभोए इति तथा संभोगे ब्रूते । यथा सर्वे पञ्चमहाव्रतधारिणः साधवः संभोगिका एव युक्ता ना संभोगिकाः इति ।। साम्प्रतमकल्पिकोवेति विवृणोति-

[भा.८७०] किंवा अकप्पिएणं गहियं फासुयं तु होइ उ अभोज्जं ।
अन्ना उच्छं को वा होइ गुणो कप्पिए गहिए ।।

वृ- किं वा केन वा कारणेन अकल्पिकेन अगीतार्थेन गृहीतं प्रासुकमज्ञातोञ्छमपि अभोज्यम-परिभोक्तव्यं भवति । को वा कल्पिकेन । अत्र गाथायां सप्तमी तृतीयार्थे गृहीतो गुणो भवति नैव कश्चित् उभयत्रापि शुद्धत्वाविशेषात् । अधुना संभोए इति व्याख्यानयति-

[भा.८७१] पञ्चमहव्वयधारी समणा सव्वेवि किं न भुंजंति ।
इयचरणवितहवादी, एत्तो वोच्छं गतीसुं तु ।।

वृ- पञ्चमहाव्रतधारिणः सर्वे श्रमणाः किं नैकत्र भुञ्जते किन्नाविशेषेण सर्वे संभोगिका भवन्ति येनैके सांभोगिकाः क्रियन्ते के इति । इत्येवमुक्तेन प्रकारेण यथा अहाच्छन्दो अनालोचितगुणदोषश्चरणे चरणविपये वितथवादी अतऊर्ध्वं तु गतिषु वितथवादिनं वक्ष्यामि ।। यथा प्रतिज्ञातमेव करोति-

[भा.८७२] खेत्तं गतो य अडविं एक्को संचिक्खए तहिं चेव ।
तित्थगरोत्ति य पियरो, खेत्तं पुन भावतो सिद्धी ।।

वृ- स यथाच्छन्दो गतिषु विषये एवं प्ररूपणां करोति- एगो गाहवती, तस्स तिन्नि पुत्ता, ते सव्वे खेत्तकम्मोवजीविणो । पियरेण खित्तकम्मे नियोजिता । तत्थेगो खेत्तंकम्मं जहानत्तं करेइ । एगो अडविं गतो देसं देसेणं हिंडइ इत्यर्थः । एगो जिमित्ता जिमित्ता देवकुलालादिसु अच्छति । कालांतरेण तेसिं पिया मतो । तेहिं दव्वंपितिसंतियं काउं सव्वं सम्मं विरिक्कं । एवं तेसिं जं एगेन उवज्जियं तं सव्वेसिं सामण्णं जायं । एवं अम्हं पिया तित्थयरो तस्सव्वयोवदेसेणं सव्वे समणा कायकिलेसं कुव्वंति । अम्हे न करेमो। जं तुब्भेहिं कयं तं सामन्नं जहा तुब्भे देवलोगं सुकुलपच्चायातिं वा सिद्धिं वा गच्छह तहा अम्हे विगच्छि-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

स्सामो। एष गाथा भावार्थः । अक्षरयोजनात्त्वियम्-एकपुत्रः क्षेत्रं गतः, एकोऽटवीं देशान्तरेषु परिभ्रम तीत्यर्थः । अपर एकस्तत्रैव संतिष्ठति पितरि च मृते धनं सर्वेषामपि समानं एवमत्रापि पितापितृस्थानी-यतीर्थकरः क्षेत्रं क्षेत्रफलंधनं पुनर्भावतः परमार्थतः सिद्धिस्तां यूयमिव युष्मदुपार्जनेन वयमपि गमिष्यामः उक्ता गतिष्वपि यथाच्छन्दस्य वितथप्ररूपणा । सम्प्रति तेषां यथाच्छन्दानामेवं वदतां दोषमुपदर्शयति-

[भा.८७३] जिनवयणसव्वसारं मूलं संसारदुक्खमोक्खस्स ।
संमत्तं मइलेत्ता ते दोग्गइ वड्ढगा होंति ।।

वृ- ते यथाच्छन्दाश्चरणेषु गतिषु चैवं ब्रुवाणाः सम्यक्त्वं सम्यग्दर्शनं कथं भूतमित्याह-जिनानां सर्वज्ञानां वचनं जिनवचनं द्वादशाङ्गं तस्य सारं प्रधानं प्रधानताचास्य तदन्तरेण श्रुतस्य पठितस्याप्य-श्रुतत्वात् । पुनः किंविशिष्टमित्याह मूलं प्रथमं कारणंसंसारदुःखमोक्षस्य समस्तसांसारिकदुःखविमोक्षस्य तदेवं भूतं सम्यक्त्वं मलिनयित्वा आत्मनो दुर्गतिवर्धका भवन्ति । दुर्गतिस्तेषामेव वदतां फलमिति भावः। इह पूर्वमुत्सवेऽनुत्सवे वा गृह्णाणस्य पार्श्वस्थस्य प्रायश्चित्तमुक्तं । तत्र उत्सवप्ररूपणार्थमाह-

[भा.८७४] सक्कमहादीया पुन पासत्थे ऊसवा मुणेयव्वा ।
अहछंदे ऊसव्वो पुन, जीए परिसाए कहेइ ।।

वृ- पार्श्वस्थे पार्श्वस्थस्य उत्सवा ज्ञातव्याः शक्रमहादयः इन्द्रमहादयः । आदिशब्दात् स्कन्दरुद्रमहादिपरिग्रहः यथाच्छन्दस्य पुनरुत्सवोयस्याः पर्षदःपुरतो यथाच्छन्दः स्वच्छन्दविकल्पितं प्ररूपयतिसा पर्षत् ज्ञातव्याः । तदपि च उत्सवभूतायां पर्षदि स्वकीयकुमतप्ररूपणं चतुर्मासषण्मासवर्षेषु कदाचिद्वा करोति । अभीक्ष्णं वा ततः एतेषु स्थानेषु वक्तव्यं तच्च पार्श्वस्थानमानुसारेण ज्ञेयमत आह-

[भा.८७५] "जउलहुउ तह लहुगा, चउगुरू तहिं ठाणे जेहिं; ।
ठाणे चउगुरुगा, छम्मासे तत्थउज्जाने ।।

[भा.८७६] जेहियं पुन छम्मासा, तहिं च्छेयं ठाणए मूलं ।
पासत्थे जह भणियं, अहच्छंदे विवड्ढियं जाणे ।।

वृ- यत्र पार्श्वस्थस्य मासलघु प्रायश्चित्तमुक्तं तत्र यथाच्छन्दसि चत्वारो लघुकाः यत्र स्थानेचत्वारो लघुकाः तत्रस्थाने चत्वारो गुरवः । यत्र चत्वारो गुरवः । यत्र चत्वारो गुरुकास्तत्र षण्मासान् गुरून् जानीहि। यत्र पुनः षण्मासाः तत्र ज्ञातव्यः च्छेदः, च्छेदस्थाने च मूलं, । तद्यथा-यद्युत्सवाभावे कदाचित् कथयतितश्चत्वारो लघुका मासा अथाभीक्ष्णं कथयति । ततश्चत्वारो गुरुकाः, अथोत्सवे कदाचित् ब्रूते ततश्चत्वारो गुरुकाः, । अभीक्ष्णकथने षण्मासा गुरवः, चतुरंमासान् यावत्कदाचित् कथने चत्वारोगुरुकाः षण्मासान् यावत्कदाचितकथने षण्मासा गुरवः वर्षयावत् कदाचित् कथनेच्छेद, चतुरोमासान् यावत् अभीक्ष्ण कथने षण्मासागुरवः षण्मासान् यावत् अभीक्ष्णकथने च्छेदः । वर्षं यावदभीक्ष्णकथने मूलं । अत्रोत्सवानुत्सवविशेषरहिततया सामान्यतोऽभिधानं उक्तमोघेन प्रायश्चित्तम्, अधुना विभागत उच्यते । चतुरो मासान् यावत्कदाचित् उत्सवाभावे प्ररुपणायां चत्वारो लघुमासाः, षण्मासान् यावत् चत्वारो गुरवः, वर्षं यावत् षण्मासा गुरवः । वर्षं यावदेवं प्ररूपणायां च्छेदः,। चतुरो मासान् यावदुत्सवेकदाचित्प्ररूपणायां चत्वारो मासा गुरवः । षण्मासान् यावदेवं प्ररूपणायां षण्मासा गुरवः, वर्ष यावत्तथा प्ररूपणायां च्छेदः । तथा चतुरो मासान् यावदुत्सवे अभीक्ष्णं प्ररूपणायां चतुर्गुरुकच्छेदः षण्मासान् यावदेवं प्ररूपणायां षट्गुरुकः । वर्षं यावदेवं प्ररूपणायां मूलमिति, एतदेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामान्यतः प्राह-पासत्थेत्यादि, पार्श्वस्थे यत्र स्थाने यद् भणितं प्रायश्चित्तं तस्मिन् स्थाने यथाच्छन्दे विवर्द्धितं विशेषेण वर्द्धितं जानीहि । तच्च तथैवानन्तरमुपदर्शितं, कस्माद्विवर्धितं जानीहीति चेत् उच्यते-प्रसिद्धसेवनात् कुप्ररूपणाया बहुदोषत्वादिहपार्श्वस्थत्वं त्रयाणामपि सम्भवति । तद्यथा भिक्षोर्गणावच्छेदिन आचार्यस्य च, यथाच्छन्दत्वं पुनर्भिक्षोरेव ततः पार्श्वस्थविषयं सूत्रं त्रिसूत्रात्मकं यथाच्छन्दविषयं त्वेकस्वरूपमिति ।। सम्प्रति कुशीलादीनां प्रायश्चित्तविधिमतिदेशत आह-

[भा.८७७] पासत्थे आरोवण ओहविभागेन वणिया पुव्वं ।
सा चेव निरवसेसा कुशीलमादीण नायव्वा ।।

वृ- यैव पूर्वं पार्श्वस्थे प्रायश्चित्तस्यौघेन विभागेन चारोपणाप्रदानमुपवर्णिता सैव निरवशेषा ओघेन विभागेन च ज्ञातव्या, यत्र तु विशेषः स तत्र वक्ष्यते, । गतं यथाच्छन्दः सूत्रमिदानीं कुशीलसूत्रं वक्तव्यं, तच्च प्राग्वद्भावनीयम् अधुना कुशील प्ररूपणामाह-

[भा.८७८] एत्तो तिविहकुसीलं तमहं वोच्छामि अहानुपुव्वीए ।
दंसणनाणचरित्ते तिविह कुसीलो मुनेयव्वो ।।

वृ- इतो यथाच्छन्दः प्ररूपणानन्तरं त्रिविधं कुशीलमहमानुपूर्व्या वक्ष्यामि । यथा प्रतिज्ञातमेव करोति, दंसणेत्यादि त्रिविधः कुशीलो ज्ञातव्यः । तद्यथा-दर्शने ज्ञाने चारित्रे च । एतदेव व्याचिख्यासुरिदमाह-

[भा.८७९] नाणे नाणायारं जोउ विराहेइ कालमादीयं ।
दंसणे दंसणायारं चरणकुसीलो इमो होइ ।।

वृ- यो ज्ञानाचारं कालादिकं कालेविनए इत्यादिरूपं विराधयति स ज्ञाने ज्ञानकुशील उच्यते । यस्तु दर्शनाचारं निःशङ्कितत्वादिकं विराधयति स दर्शने दर्शनकुशीलः । चरणकुशीलोऽयं वक्ष्यमाणस्वरूपो भवति तमेवाह-

[भा.८८०] कोउय भूतिकम्मे पसिणापसिणे निमित्तमाजीवी ।
कक्ककुरुयाय लक्खण मुवजीवति विज्जमंतादी ।।

वृ- कौतुकं नाम आश्चर्यं यथा मायाकारको मुखे गोलकान् प्रक्षिप्य कर्णेन निष्काशयति, । नाशिकया वा तथा मुखादग्निं निष्काशयतीत्यादि । अथवा परेषां सौभाग्यादिनिमित्तं यत् स्नपनादि क्रियते । एतत् कौतुकं । उक्तं च-'सोहग्गादिनिमित्तं परेसि ण्हवणादि कोउगं भणियमिति,' एवंभूतानि कौतुकानि तथा भूतिकर्मनाम यज्ज्वरितादीनामभिमन्त्रितेन क्षारेण रक्षाकरणं, 'जरियादिभूतिदाणं भूतीकम्म-विणिदिट्ठमिति' वचनात् प्रश्नाप्रश्नं नाम यत् स्वप्नविद्यादिभिः शिष्टस्यान्येभ्यः कथनम् । उक्तं च-

सुविणगविज्जा कहियं आयं खणि घंटियादि कहियं वा ।
जं सीसइ अनेसिं पसिणापसिणं हवइ एयं ।।

निमित्तमतीतादिभावकथनं । तथा आजीवो नाम आजीवि(व)कः । स च जात्यादिभेदतः सप्तप्रकाराः तान्, तथा कल्को नाम प्रसूत्यादिषु रोगेषु क्षारपातनमथवात्मनः शरीरस्य देशतः सर्वतो वा लोध्रादिभिरुद्वर्तनं, तथा कुरु(र)का देशतः सर्वतो वा शरीरस्य प्रक्षालनं, लक्षणं पुरुषलक्षणादि, तथा ससाधना विद्या असाधनो मन्त्रः । यदि वा यस्याधिष्ठात्री देवता सा विद्या यस्य पुरुषः समंत्रः आदिशब्दात् मूलकर्मचूर्णादिपरिग्रहः । तत्र मूल कर्म नाम पुरुषद्वेषिण्याः सत्या अपुरुषद्वेषिणी करणमपुरुष द्वेषिण्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्याः पुरुषद्वेषिणीकरणं, गर्भोत्पाटनं गर्भपातनमित्यादि चूर्णयोगादयश्च प्रतीताः । एतानि य उपजीवति स चरणकुशीलः । सम्प्रत्याजीवं व्याख्यानयति-

[भा.८८१] जाति कुले गणे या कम्मे सिप्पे तवे सुए चेव ।
सत्तविहं आजीवं उवजीवति जो कुसीलो उ ।।

वृ- जातिर्मातृकी, कुलं पैतृकं, गणो मल्लगणादिः । कर्म अनाचार्यकमाचार्योपदेशजं शिल्पं, तपः श्रुते प्रतीते । एवं सप्तविधमाजीवं य उपजीवति जीवनार्थमाश्रयति, तद्यथा-जातिं कुलं चात्मीयं लोकेभ्यः कथयति येन जातिपूज्यतया कुलपूज्यतया वा भक्तपानादिकं प्रभूतं लभेयमिति । अनयैव बुद्धयामल्लगणादिभ्यो गणेभ्यो वा गणविद्याकुशलत्वं कर्मशिल्पकुशलेभ्यः कर्मशिल्पकौशलं कथयति-तपसा उपजीवना तपः कृत्वा क्षपकोऽहमिति जनेभ्यः कथमति श्रुतोपजीवना, बहुश्रोतऽहमिति स कुशील इति । साम्प्रतमेतेषु कौतुकादिषु प्रायश्चित्तमाह-

[भा.८८२] भूतीकम्मे लहुओ लहु गुरुनिमित्तसेसए इमं तु ।
लहुगाय सयंकरणे परकरणे होत नुग्घाया ।।

वृ- भूतिकर्मकरणे प्रायश्चित्तं मासलघु अतीतनिमित्तकथन चत्वारो लघुमासाः । वर्तमान-निमित्तकथने चत्वारो गुरुमासाः, शेषकेकौतुकादौ इदं प्रायश्चित्तं-स्वयं कौतुकादिकरणे चत्वारो लघुकाः। परैः कारणे भवन्ति चत्वारोऽनुद्घाता गुरवोमासा, मूलकर्मकरणे मूलमिति गतं कुशीलसूत्रमिदानीमव-सन्नसूत्रं वक्तव्यं । तच्च प्राग्वद्भावनीयम् । सम्प्रत्यवसन्नप्ररूपणामाह-

[भा.८८३] दुविहो खलु ओसन्नो देसे सव्वे य होइ नायव्वो ।
देसोसन्नो तहियं आवासाई इमो होइ ।।

वृ- अवसन्नः खलु भवति द्विविधो ज्ञातव्यस्तद्यथा-देशदेशतः, सर्वस्मिन् सर्वतस्तत्र देशावसन्न आवश्यकाद्यधिकृत्यायं वक्ष्यमाणो भवति । तमेवाह-

[भा.८८४] आवस्सगसज्झाए पडिलेहणज्झाणभिक्खभत्तठे ।
आगमने निग्गमने ठाणे य निसीयण तुयट्टे ।।

वृ- आवश्यकादिष्ववसीदन् देशतोऽवसन्न इत्योद्यतो गाथाक्षरयोजना, भावार्थस्त्वयम्-'आवश्यकमनयितकालं करोति, यदि वा हीनं हीनकार्योत्सर्गादिकरणात् अतिरिक्तं वा अनुप्रेक्षार्थमधिकतरकायोत्सर्गकरणात् । अथवा यद्दैवसिके आवश्यके कर्तव्यं तत् रात्रिके करोति, रात्रिके कर्तव्यं दैवसिके । तथा स्वाध्यायं सूत्रपौरुषीलक्षणं अर्थपौरुषीलक्षणं वा कुरुध्वमिति गुरुणोक्ते गुरुसंमुखीभूय किञ्चिदनिष्ठं जल्पित्वा अविप्रियेण करोति न करोति वा, सर्वथा विपरीतं वा करोति, । कालिकमुत्कालिकवेलायामुत्कालिकं वा कालवेलायां, प्रतिलेखनामपि वस्त्रादीनामावर्तनादि-भिरूनामतिरिक्तां वा विपरीतां वा दोषैर्वा संसक्तां करोति । तथा ध्यानं धर्मध्यानं शुक्लध्यानं वा यथाकालं न ध्यायति तथा भिक्षां न हिण्डते, । गुरुणा वा भिक्षां नियुक्तो गुरुसम्मुखं किञ्चिदनिष्टं जल्पित्वा हिण्डते, तथा भक्तार्थं भक्तविषयं प्रयोजनं सम्यग् न करोति, किमुक्तं भवति न मण्डल्यां समुद्दिशति,। काकशृगालादिभक्षितं वा करोति, अन्ये तु व्याचक्षते, । अभत्तठत्ति अभक्तार्थग्रहणं सकलप्रत्या-ख्यानोपलक्षणं तत्रायमर्थः प्रत्याख्यानं न करोति । गुरुणा वा भणितो गुरुसम्मुखं किञ्चिदनिष्ट-मुक्त्वा करोति, । आगमनेनैषेधिकी न करोति निर्गमने आवश्यकी, स्थाने ऊर्ध्वस्थाने निषदने उपवेशने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वग्वर्त्तने शयने एतेषु क्रियमाणेषु न प्रत्युपेक्षणं करोति, नापि प्रमार्जनं करोति वा प्रत्युपेक्षणप्रमार्जने दोषदुष्टे वा करोति, साम्प्रतमावश्यकद्वारं व्याख्यानयति-

[भा.८८५] आवस्सयं अनियय करेइ हीनातिरित्तविवरीयं ।
गुरुवयणेणनियोगे, वलाइ ईणमो उ ओसन्नो ।।

वृ- आवश्यकमनियतम नियतकालं यदि वा हीनमथवातिरिक्तं विपरीतं वा करोति, गुरुराचार्यस्तस्य वचनं गुरुवचनं तेन नियोगो व्यापारणं तस्मिन् सति संमुखो वलति । किमुक्तं भवति ? गुरुणा भिक्षादिषु नियुक्तः सन् गुरुसम्मुखमेव किञ्चिदनिष्टं भाषमाणो वलते, न गुरुवचस्तथैवानुतिष्ठति । एष देशतोऽवपन्नः अत्र प्रायश्चित्तविधिः पार्श्वस्थस्येवानुसरणीयः ।

यदुक्तं 'गुरुसम्मुखो वलते' इति तत् सविशेषं विवृणोति ।

[भा.८८६] जह उ बइलो बलवं भंजति समिलं तु सोवि एमेव ।
गुरुवयणं अकरेंतो वलाइ कुणती च उस्सोढुं ।।

वृ- यथा बलवान् बलीवर्दः प्रेरितः सन् दुःशीलतया संमुखं व्यावर्तमानः समिलां भनक्ति । एवमेव अनेनैव प्रकारेण सोऽप्यवसन्नो गुरुवचनमकुर्वन् सम्मुखो वलते न पुनः करोति, ततः कार्यकरो वा उत्साह्य उत्शब्दोऽत्रनिषेधार्थे असोढा इत्यर्थः । किमुक्तं भवति ? गुरुसंमुखं किञ्चिदनिष्टमुक्त्वा रुषन् करोतीति उक्तो देशतोऽवसन्नः । सर्वतोऽवसन्नमाह-

[भा.८८७] उउबद्धपीढफलगं ओसन्नं संजयं वियाणाहि ।
ठवयिगरइयगभोइ एमेया पडिवत्तितो ।।

वृ- यः पक्षस्याभ्यन्तरे पीढफलकादीनां बन्धनानि मुक्त्वा प्रत्युपेक्षणां न करोति यो वा नित्यावस्तृत्संस्तारकः सोऽबद्धपीठफलकः तं संयतं सर्वतोऽवसन्नं विजानीहि । तथा यः स्थापितकभोजी स्थापनादोषदुष्टप्राभृतिका भोजी रचितकं नाम कांश्यपात्रादिषुपटादिषु वा यदशनादिदेयबुद्धया वैविक्त्येन स्थापितं तद्भुङ्कइत्येवं शीलो रचितकभोजी, तमपि सर्वतोऽवसन्नं जानीहि । एवममुना प्रकारेण एताः सर्वतोऽवसन्नविषये प्रतिपत्तयो वेदितव्याः ।। अधुना प्रायश्चित्तविधिमाह-

[भा.८८८] सामायारी वितहं ओसन्नो जं च पावए जत्थ ।
संसत्तो च अलंदो नडरूवी एलगो चेव ।।

वृ- सामाचारीं ज्ञानादि सामाचारीं 'काले विनए' इत्यादि रूपां यदि वा सूत्रमण्डल्यर्थ मण्डल्यादिगतां सामाचारीं वितथां कुर्वन् यथास्थाने यत् प्रायश्चित्तं प्राप्नोति, तत्र तस्य स्वस्थाननिष्पन्नं प्रायश्चित्तमिति गतमवसन्नसूत्रम् । सम्प्रति संसक्तसूत्रं वक्तव्यं, तच्च प्राग्वत्परिभावनीयम् । अधुना संसक्तपरूपणामाह- 'संसत्तोव' इत्यादि संसक्तोऽलिंद इव नट इव बहुरूपी नटरूपी एडक इव च ज्ञातव्य इति शेषः। एतदेव व्याचिख्यासुराह-

[भा.८८९] गोभत्ता लंदोविव वहुरूव नडोव्व एलगो चेव ।
संसत्तो सो दुविहो असंकिलिट्ठो व इयरो वा ।।

वृ- गोभक्तयुक्तोऽलिन्दो गोभक्तालिन्द इव । किमुक्तं भवति ? । यथा अलिन्दे गोभक्तं कुक्कुसाओदनभिस्सटा अवश्रावणमित्यादि पूर्वमेकत्वमिलितं भवतीति संसक्त उच्यते । एवं यः पार्श्वस्थादिषु मिलितः पार्श्वस्थसदृशो भवति संविग्नेषु मिलितः संविग्नसदृशः स संसक्त इति । यथा वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नटो रङ्गभूमौ प्रविष्टः कथानुसारतस्तत्तद्रूपं करोति एवं बहुरूपनट इव सोऽपि पार्श्वस्थादि मिलितः पार्श्वस्थादिरूपं भजते, संविग्नमिलितः संविग्नरूपमिति । यदि वा यथा एडको लाक्षारसे निमग्नः सन् लोहितवर्णो भवति, गुलिकाकुण्डे निमग्नः सन् नीलवर्ण इत्यादि एवं पार्श्वस्थादि संसर्गतः पार्श्वस्थादिः। स द्विधा, तद्यथा-असंक्लिष्ट इतरश्चसंक्लिष्टः । तत्रासंक्लिष्टमाह-

[भा.८९०] पासत्थ अहाच्छंदो कुसील उसन्नमेव संसत्तो ।
पियधम्मो पियधम्मे सु चेव इणमो उ संसत्तो ।।

वृ- पार्श्वस्थे मिलितः पार्श्वस्थः यथाच्छन्दे यथाच्छन्दः कुशीले कुशीलः अवसन्ने अवसन्नः संसक्ते संसक्तः । तथा प्रियधर्मसु मिलितः प्रियधर्मा एष संसक्तोऽसंक्लिष्टो ज्ञातव्यः, संक्लिष्टमाह-

[भा.८९१] पंचासवप्पवत्तो जो खलु तिहि गारवेहिं पडिबद्धो ।
इत्थि गिरिसंकिलिठो संसत्तो सो उ नायव्वो ।।

वृ- यः खलु पञ्चसु आश्रवेषु हिंसादिषु प्रवृत्तः । तथापि त्रिभिर्गौरवैर्ऋद्धिरससातलक्षणैः प्रतिबद्धः तथा स्त्रीषु गृहीषु च प्रतिबद्धः स संक्लिष्टः स संसक्तो ज्ञातव्यः । अस्य चासंक्लिष्टस्य प्रायश्चित्त-विधिर्देशतः पार्श्वस्थस्येव वेदितव्यः ।

मू. (३१) *भिक्खू य गणाओ अवक्कम्म पर पासंडपडिमं उवसंपज्जित्ताणं विहरिज्ञा, से य इच्छेज्जा दोच्चं पि तमेव उवसंपजित्ताणं विहरितए नत्थिणं तस्स तप्पइयं कइ छेदे वा परिहारे वा नन्नत्थ एगाए आलोयणाए" ।*

वृ- भिक्खूय गणातो अवक्कमेत्यादि अथास्य सूत्रस्य कः सम्बन्ध इत्यत आह-

[भा.८९२] देसेन अवक्कंता सव्वेणं चेव भावलिंगाओ ।
इति समुदिता उसुत्ता इणमन्नं दव्वतो विगते ।।

वृ- द्रव्यलिङ्गमधिकृत्य देशेनापक्रान्ताभावलिङ्गतो भावलिङ्गमधिकृत्य सर्वेण सर्वात्मनापक्रान्ताः पार्श्वस्थादय इति । एवमथान्यनन्तरसूत्राणि समुदितानि सम्यक्प्रतिपादितानि, इदानीमधिकृत्यमन्यत्सूत्रं द्रव्यतो द्रव्यलिङ्गेन विगते वियुक्ते द्रव्यलिङ्गवियुक्तविषयमिति भावः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-भिक्षुः प्रागुक्तशब्दार्थश्चशब्दोऽनुक्तसमुच्चयार्थः । स चैतत् समुच्चिनोति रागद्वेषादिना कारणेन गणादपक्रम्य निर्गत्य परपाखण्डप्रतिमां परपाषण्डलिङ्गमुपसम्पद्य विहरेत् । विहृत्य च कारणे समाप्ते द्वितीयमपि वारं तमेव गणमुपसम्पद्य विहर्तुमिच्छेत् । तस्य तथोपसम्पद्यमानस्य नास्ति कश्चित् च्छेदो वा परिहारो वा उपलक्षणमेतत् । अन्यदपि प्रायश्चित्तं न किमप्यस्ति कारणतः परलिङ्गप्रतिपत्तेः प्रतिपत्तावपि सम्यग् यतनाकरणात् । किं सर्वथा न किमपि नेत्याह-नान्यत्र एकाया आलोचनिकायाः अन्यत्रशब्दः परिवर्जनार्थो यथा भीमार्जुनाभ्यामन्यत्र सर्वे योद्धार इत्यादि ततोऽयमर्थः । एकामालोचनां मुक्त्वा आलोचना पुनर्भवत्येवेतिभावः; एष सूत्र संक्षेपार्थः । अधुना निर्युक्तिभाष्यविस्तरः-

[भा.८९३] कंदप्पे परलिंगे, मूलं गुरुगा य गरुलपक्खम्मि ।
सुत्तं तु भिच्छुगादी कालक्खेवो व गमनं वा ।।

वृ- यदि कंदर्पेकन्दर्पतः आहारगृद्ध्यादि करणता लक्षणतः परलिङ्गं करोति । ततस्तस्मिन्नपरलिङ्गे कृते तस्य प्रायश्चित्तं मूलं अथ गुरुडपाक्षिकं गरुडादिरूपं परलिङ्गं करोति, । तदाश्चत्वारो गुरुकाः । चशब्दसंयतीप्रावरणापि चत्वारो गुरुका इत्यादि संसूचनार्थः अत्र पर आह-ननु सूत्रनिर्युक्त्योरनुपपत्तिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा हि सूत्रेण परलिङ्गकरणमनुज्ञातं प्रायश्चित्तादानात् निर्युक्तिकृता तत् वारितं प्रायश्चित्तप्रदानात् । नैष दोषोऽभिप्राया परिज्ञानात् निर्युक्तिकृता हि कन्दर्पतः परलिङ्गकरणे प्रायश्चित्तमुक्तं, । सूत्रं पुनः कथमपि राज्ञि प्रद्विष्टे यावत्सार्थो लभ्यते, तावत्कालक्षेपः क्रियतामिति हेतोर्वा शब्दो न केवलं विकल्पार्थोऽनुक्तसमुच्चयार्थः स चैतत् समुच्चिनोति । न शक्यते सहसा विषयपरित्यागः कर्तुमिति यावत् प्रज्ञापना क्रियते गमणं वेति गमनं वाऽशिवादि कारणतो अनार्यदेशमध्येन समुपस्थितं तत एतैः कारणैर्यस्य राज्ञो ये पूज्या भिक्षुकादयः भिक्षुकाः । शौद्धोदनीयाः । आदिशब्दात्परिव्राजकपण्डरागादि-परिग्रहः । तल्लिङ्गं गृह्णीयादित्येतद्विपर्ययमतो न कश्चिद्दोषः । एनामेव गाथां भाष्यकृद् व्याख्यानयति-

[भा.८९४] खंधे दुवार संजइ गरुडद्धं सेय पट्टलिंगदुवे ।
लहुओलहुओलहुया तिसु चउगुरु दोसु मूलंतु ।।

वृ- इह पूर्वार्धोत्तरार्धपदानां यथासंख्येन योजना । सा चैवं-यदि कन्दर्पतो वस्त्रं गृहस्थ इव स्कन्धे करोति तदा तस्य प्रायश्चित्तं लघुको मासः दुवारेति गोपुच्छिकं करोति तदापि लघुको मासः, संयतीप्रावरणकरणे चत्वारो लघुमासाः । गरुडादिपरलिङ्गकरणे चत्वारो गुरुकाः, । अद्धंसेत्ति अर्धमंसे स्कन्धे दिगम्बर इव यदि वस्त्रस्य करोति तदापि चत्वारो गुरुकाः, । 'पट्टत्ति यदि गृहस्थ इव कटिपट्टकं बध्नाति तदापि चत्वारो गुरुकाः, । लिंगदुवे इति लिङ्गद्विकं गृहिलिङ्गं परपाषण्डलिङ्गं च तस्मिन् गृहि लिङ्गे पारपाखण्डलिङ्गे च कन्दर्पतः परिगृह्यमाणे प्रत्येकं प्रायश्चित्तं मूलम् । सम्प्रति कालक्खेवो गमनं वा इत्येतद्व्याख्यानार्थमाह-

[भा.८९५] असिवादिकारणेहिं रायदुट्ठेवि होज्ज परलिंगं ।
कालक्खेवनिमित्तं पणवणट्ठावगमणट्ठा ।।

वृ- अशिवं देवताकृत उपद्रवः, आदिशब्दादवमौदर्यादि परिग्रहस्तेषु अशिवादिषु कारणेषु गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात् तथा द्वेषणं द्विष्टं राज्ञिद्विष्टं राजद्विष्टं राज्ञः प्रद्वेष इत्यर्थः । तस्मिन् वा सति परलिङ्गं ग्राह्यं भवेत् । किमर्थमिति चेदत आह कालेत्यादि यावत्सार्थो लभ्यते तावत् खलु परलिङ्गग्रहणेन कालक्षेपः क्रियतामित्येवं कालक्षेपनिमित्तमथवा न शक्यः खलु सहसा विषयः परित्यक्तु मिति यावद्राज्ञः प्रज्ञापना क्रियते तावद्ग्राह्यं परलिङ्गमिति प्रज्ञापनार्थं यदि अशिवादिकारणेषु समुपस्थितेष्वनार्यदेशमध्ये गमनमुपजातं तच्चानार्यदेशमध्येन गमनं न परलिङ्गग्रहणमृते शक्यते कर्तुमिति गमनार्थं वा परलिङ्गग्रहणं। अथ कस्य परलिङ्गं ग्राह्यमित्याशङ्कय भिक्खुगादी इत्येतद्वयाख्यानयति ।

[भा.८९६] जंजस्स अच्चियं तस्स पूयणिज्जं तमास्सिया लिंगं ।
खीरादिलद्धिजुत्ता गमंति तं छन्नसामत्था ।।

वृ- यत् भिक्षुकादिगतं लिङ्गं यस्य राज्ञोऽर्चितं भावेक्तप्रत्ययो मान्य मित्यर्थः । तत्रार्चितमपि नावश्यं कस्याप्यनतिक्रमणीयं भवति ततोऽनतिक्रमणीयता प्रतिपादनार्थमाह-तस्य राज्ञो यत्पूजनीयं अनतिक्रमणीयं तल्लिङ्गमाश्रितास्तल्लिङ्गं प्रतिपन्नाः छन्नसामर्थ्याः परलिङ्गग्रहणेनाच्छादितस्वरूपाः तं राजानं गमयन्ति उपशमयंति । कीदृशा उपशमयन्तीत्यत आह-क्षीरादिलब्धियुक्ताः क्षीराश्रवलब्धि-सम्पन्नाः । आदिशब्दाद् विद्यामन्त्रयोगादि वशीकरणकुशला इति परिग्रहः ।।

[भा.८९७] कलासु सव्वासु सवित्थरासु आगाढ पणहेसु य संथवेसु ।
जो जत्थ सत्तोतमनुपविस्से, अव्वाहतो तस्स स एव पंथा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कलाद्वासप्ततिसंख्या लोकप्रसिद्धा तासु कलासु सर्वास्वपि सविस्तरासु आगाढप्रश्नेषु चात्यन्तदुर्भेदप्रश्नेषु परिचयेषुसत्सु योराजा यत्र कलादिविशेषेसक्त आसक्तो भवति। किमुक्तं भवति? यस्य राज्ञो यस्मिन् कलादिविशेषे अत्यन्तमभिष्ङ्गो भवति तमनुप्रवेशयेयुस्तं सम्यक् ज्ञात्वा राज्ञः पुरतः प्रवेदयेयुः प्रवेदयन्तश्चराजानमुपशमयन्ति । यत एष तस्य राज्ञ उपशमने अव्याहतः स्वपरा विरोधीपन्थामार्गउपायः । तत्र यदीत्थमुपशान्तो भवति तदा समीचीनमथ नोपशान्तस्तत एव कलादिविशेषे तावत्प्ररूपयन्ति यावत्सार्थो लभ्यते, सार्थे च लब्धे निर्गच्छन्ति । तथा चाह-

[भा.८९८] अनुवसमंते निग्गम लिंगविवेगेन होइ आगाढे ।
देसंतरसंकमणं भिक्खुगादी कुलिंगेणं ।।

वृ- अनुपशमयति उपशममकुर्वति राज्ञि निर्गमो भवति, । कथमित्याह-लिङ्गविवेकेन लिङ्गपरित्यागेन गृहस्थलिङ्गेनेत्यर्थः । अथ तथापि न मुञ्चति गाढकोपावेशात्, तत आह आगाढं अत्यन्तप्रकोपतो गाढममोक्षणे भिक्षुकादिलिङ्गेन देशान्तर संक्रमणं कर्तव्यम् । अशिवादौ वा कारणे समुपस्थिते देशान्तरगमनं किल कर्तव्यम् । तत्र तत्र येन पथा गन्तव्यं स कीदृगित्याह-

[भा.८९९] आयरियसंकमणे परिहरंति दिट्ठंमि जाव पडिवत्ति ।
असतीए पविसणं थूमियंमि गहियंमि जा जयणा ।।

वृ- आर्येन देशेन संक्रमणं तस्मिन् स्वलिङ्गेन गन्तव्यमिति वाक्यशेषः । आर्यसंक्रमणग्रहणतो भङ्गचतुष्टयं सूचितं, । तद्यथा आर्यदिश आर्यदिशमध्येन गमनमित्येको भंगः, आर्यदिशे अनार्यदिश मध्येनेति द्वितीयः, अनार्यदिशे आर्यदिशमध्येनेति तृतीयः, अनार्यदिशे अनार्यदिश मध्येनेति चतुर्थः, तत्र प्रथम भंगे अर्ध षड् विंशति जनपद मध्ये, द्वितीय भंगे आर्यदिशे मालव नामक म्लेच्छ देश मध्येन, तृतीय भंगे यथा-कुडुक्कविषये आर्वविषयमध्येन, चतुर्थभङ्गे पारसीकदेशे अनार्य देशमध्येन । इह प्रथमभङ्गेऽशिवादिकारणोपस्थितो स्वलिङ्गेन गन्तव्यम् । द्वितीय तृतीय चतुर्थभङ्गे तु परलिङ्गेन, तत्र राज्ञि प्रद्विष्टे अशिवादिकारणे वा भिक्षुकादिलिङ्गेन गच्छन् उद्गमादीन् दोषान् तेषां च लिङ्गिनामाश्रयस्थानानि परिहरति, । तथा गच्छन् यदि केनापि क्वापि ग्राम नगरादौ दृष्टो भवेत् तर्हि दृष्टे सति तेन या काचनाधिकृतलिङ्गानुशासनप्रतिपत्ति सामाचारी कर्त्तव्या । किमुक्तं भवति ? तत्सामाचार्यवर्तितव्यमिति । अथ तदाश्रयस्थानपरिहारेण समुदानं न लभ्यते ततो असति अविद्यमाने समुदाने प्रवेशनं तदाश्रयस्थानप्रवेशनं कर्तव्यम् । तत्र यदि तेषां प्रत्ययोत्पादनार्थं बुद्धप्रतिमा स्तूपानि वा वन्दनीयानि भवन्ति । तदा जिनप्रतिमां मनसि सम्प्रधार्य वन्दितव्यानि । भिक्षायां च स्वयं गन्तव्यम्। अथ भिक्षा न लभ्यते, ततो भिक्षुकैः सहभोक्तव्यम् । तत्र यदि पुद्गलं कन्दादिकं वा पतति तदा शरीरस्येद् ममामयकारकं वैद्येन निवारितमिति प्रतिषेधयेत् । अथ कथमपि अनाभोगतस्तद्दोषभयतो वा गृहीतं भवेत् तदा तस्मिन् गृहीते या यतना सा कर्त्तव्या । किमुक्तं भवति अल्पसागारिकं कथमप्यपसार्य विधिना परिष्ठापयेत् । एष गाथासंक्षेपार्थः । साम्प्रतमेनामेव गाथां विवृणोति-

[भा.९००] आयरिय देसा यरिय लिंगसंकमो एत्थ होइ चउभंगो ।
बितिय चरमेसु अन्नं असिवादि गतो करे अन्नं ।।

वृ- अशिवादिषु कारणेषु समुपस्थितेषु आर्यदिशे आर्यदिशमध्येन लिङ्गेन स्वलिंगेन संक्रमो भवति,। यन्मध्येन यत्र च गन्तव्यं तयोरुभयोरपि देशयोरार्यत्वात् अत्र च प्रागुक्तप्रकारेण चतुर्भङ्गी गाथायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंस्त्वनिर्देशः प्राकृतत्वात्तत्र द्वितीयतृतीयचरमेषु भङ्गेषु अशिवादिगतः सन् अन्यत् गृहस्थलिङ्गं यदि वा यस्य देशस्य मध्येन यत्र वा देशे गन्तव्यं तत्र येऽतिप्रसिद्धाभिक्षुकादयस्तल्लिङ्गं करोति सम्प्रति परिहरतीति यदुक्तं तद्व्याख्यानयति-

[भा.९०१] परिहरइ उग्गमादी विहारठाणाय तेसि लिंगीणं ।
अपुव्वेसा गमितो आवरियत्ते तरोइमंतु ।।

वृ- परिहरति उद्गमादीन् दोषान् । तथा तेषां लिङ्गिनां यानि विहारस्थानानि तानि च परिहरति । तत्र अपूर्वेषु स्थानेषु गतः सन् यदि यल्लिङ्गं गृहीतं तदागमेषु कुशलो भवति तदा मा केनापि लिङ्गविडम्बक इति ज्ञात्वा प्रग्रह्य इति आचार्यत्वमाचार्यकं तद्ग्रंथव्याख्यातृत्वं करोति, अथेतरस्तेषामागमेष्व कुशल स्ततः स इदं करोति, तदेवाह —

[भा.९०२] मोनेन जं च गहियं, तु कुक्कुडं उभयओ वि अविरुद्धं ।
पच्चयहेउपणामो, जिन पडिमाउ मणे कुणति ।।

वृ- मौनेन वाक्संयमलक्षणेन क्रियां करोति, मौनव्रतित्वमलम्बते इत्यर्थः । यच्च विशिष्टसम्प्रदायाद्गृहीतुं कुकुटंविद्यादिना दंभ प्रयोगलक्षणं उभयतोऽपि उभयेषामपि साधुचर्यायांस्तेषां च लिङ्गिनामविरुद्धं तत्करोति, । तथा समुदानासंभवे तेषामाश्रयेषु गतस्य सतस्तेषां प्रत्ययहेतोः प्रत्ययोत्पादनार्थं बुद्धप्रतिमानां स्तूपानां वा प्रमाणे करणीयतयोपस्थिते जिनप्रतिमा मनसि करोति । किमुक्तं भवति ? जिनप्रतिमा मनसि कृत्य तेषां प्रणामं करोति ।।

[भा.९०३] भावेति पिंडवातित्तनेन घेत्तुं च दव्वइ अपत्ते ।
कंदादि पुग्गलाण य आकारां एयपडिसेहो ।।

वृ- तथा आत्मानं जनेभ्यः पिण्डपातित्वेन भावयति, ततो भिक्षा परिभ्रमणेन जीवति अथावमौदर्यदोषतः परिपूर्णो न भवति, ततो दानशालायां भिक्षुकादिभिः सह पङ्क्त्या समुपाविशति । ततः परिपाट्या परिवेषणे जाते सति- अपत्ते इति अत्र प्राकृतत्वात् यकारलोपः । अयंपात्रे तद्गृहीत्वा अन्यत्र विविक्ते प्रदेशे समुद्दिशति । अथान्यत्र गत्वा समुद्देशकरणे तेषां काचित् शङ्का संभाव्यते । ततो भिक्षुकादिभिः एव सह पङ्क्त्योपविष्टः सन् समुद्दिशति । तत्र यदि सचित्तं कन्दादिपुद्गलं वा मांसापरपर्यायं परिवेषकः परिवेषयति । तदा ममेदमकारकं वैद्येन प्रतिषिद्धमिति वदता तेषां कन्दादीनां पुद्गलस्य च प्रतिषेधः कर्तव्यः । अत्रैव पुद्गल विषयेपवादमाह-

[भा.९०४] बितियपयं तु गिलाणो निक्खिव चंकमणादि कुणमाणो ।
लोयं वा कुणमाणो कितिकम्मं वा सरीरादी ।।

वृ- द्वितीयपदमपवादपदंयदि भाण्डमात्रोपकरणानां निक्षेपमुपलक्षणमेतत् । आदानं प्रत्युपेक्षणादिकं च कुर्वन् तथा चङ्क्रमणादि दिशब्दादुत्थानादि परिग्रहः कुर्वन् यदि वा लोचं कुर्वन् अथवा कृतिकर्मशरीरादेः कुर्वन् यदि ग्लानो भवति तदोपजीव्यं पुद्गलमिति । प्रस्तुतमनुसन्धानमाह-

[भा.९०५] अह पुन रूसेज्ञा ही तो घेतु विगिंचिए जहा विहिना ।
एवं तु तहिं जयणं कुज्ञाही कारणागाढो ।।

वृ- अथ पुनः प्रागुक्तप्रकारेण कन्दादिपुद्गलानां प्रतिषेधे क्रियमाणे रुष्येयुरिति संभाव्यते, तर्हिगृह्णीयात् गृहीत्वा च यथाविधिना यथोक्ते न विधिना विरिंच्यात् तत् दृष्टिवंचनेनापसार्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रोक्तविधिना परिष्ठापयेत् उपसंहारमाह-

[भा.९०६] इति कारणेसु गहिते, परलिंगे तीरिए तहिं कज्जे ।
जयकारी सुज्झइ वियडणाए इयरो समावज्जे ।।

वृ- इति एवमुक्ते न प्रकारेण कारणेष्व शिवादिषु समुपस्थितेषु परलिङ्गेषु तीरिते च समाप्तिं नीते च कार्ये तत्र यो जयकारी यतनाकारी यथोक्तरूपां यतनां कृतवान् सविकटनया आलोचनामात्रेण शुद्धयति,। यतनया सर्वदोषामपहृतत्वात् । इतरोनाम येन यतना न कृता स यत् अयत्तनाप्रत्ययं प्रायश्चित्तमापद्यते ततस्मै दीयते ।

मू. (३२) *भिक्खूय गणाओ अवकम्म ओहावेज्ञा से इच्छेज्ञा दोच्चंपि तमेवगणं उवसंपज्जित्ताणं विहरित्तए नत्थिणंतस्स तप्पइयं केइच्छेदेवा परिहारेवा ननत्थएगाए सेहोवट्ठावणाए; ।*

वृ- भिक्खूय गणाओ अवकम्मं ओहावेज्ञा से इच्छेज्ञा इत्यादि अथास्य सूत्रस्य कः सम्बन्ध उच्यते-

[भा.९०७] एगयरलिंग विजढे, इइसुत्तावणियाउ जे हेट्ठा ।
उभयजढे अपमत्तो आरंभो होइ सुत्तस्स ।।

वृ- यान्यधस्तनानि सूत्राणि पार्श्वस्थादिगतानि वर्णितानि तान्येकतरलिङ्ग विजढे एकतर-लिङ्गपरित्यागे तथाहि पार्श्वस्थादि सूत्राणि भावलिङ्गपरित्यागविषयाणि परपाषण्डप्रतिमासूत्रद्रव्य-लिङ्गपरित्यागविषयमितिशब्दो हेतौ यतोऽधस्तनानि सूत्राण्यपरलिङ्गविषयाणि ततोऽयमन्य आरंभःसूत्रस्य भवत्युभय जढे इति उभयलिङ्गपरित्यागविषयः प्रस्तावायातत्वात् । एवमनेन सम्बन्धेनायातस्यास्य व्याख्या - भिक्षुर्गणादपक्रम्य निर्गत्य अवधावेत व्रतपर्यायादवाङ्मुखी पराङ्मुखो भूत्वा गृहस्थपर्यायं प्रतिगच्छेत् ततो भावपरावृत्या सइच्छेत् द्वितीयमपि वारं तमेव गणमुपसम्पद्य विहर्तु नत्थिणमित्यादिनमिति खल्वर्थे निपातानामनेकार्थत्वात् नास्ति खलु तस्य कश्चिदपि च्छेदः परिहारो वा। किं सर्वथा न किमपि नेत्याह-नान्यत्र एकस्याः शैक्षिकोपस्थापनायाः । किमुक्तं भवत्येका शैक्षिको-पस्थापनिका भवति मूलं भवतीत्यर्थः । एष सूत्रसंक्षेपार्थः साम्प्रतमेतदेव सूत्रं व्याचिख्यासुरपक्रम्येत्य-वधावेदिति भेदपर्यायैर्व्याख्यानयति-

[भा.९०८] निग्गमनमवक्कमणं निस्सरणपलायणं च एगट्ठा ।
लुटण लोट्टण पलोट्टण उठाणं चेव एगट्ठा ।।

वृ- निर्गमनमपक्रमणं निस्सरणं पलायनमित्येकार्थाः ।लोटनं लुठनं प्रलोटनमवधावनमिति चैकार्थः। तत्रप्रलोटनमिति लुटविलोटने इत्यस्यैव प्रपूर्वस्य पर्यायशब्दैरप्यधिकृत शब्दार्थप्रतीतिरुपजायते । तत्वभेदपर्यायैर्व्याख्येति वचनमप्यस्ति ततस्तदुपन्यास इति अथ कैः कारणैरवधावनं कुर्यादित्यवधानकारणान्याह-

[भा.९०९] विसओदएणं अहिगरणतो वचइलोव दुक्खसेज्जाए ।
इह लिंगस्स विवेगं करेज्ज पच्चक्ख परोक्खं ।।

वृ- विषयोदयेन अत्र विषयविषयो मोहः परिगृह्यते । विषयेन विषयिणो लक्षणात् । ततोऽयमर्थः विषयविषयमोहोदयेन यदि वा केनापि सह अधिकरणभावतः कलहभावतः अथवा दुःखशय्यया चतुर्विधया त्याजित्त इति हेतोर्लिङ्गस्य प्रव्रज्याचिह्नस्यरजोहरणस्य विवेकं परित्यागं कुर्यात्कथमित्याह।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधूनां प्रत्यक्षं परोक्षं वा कुत्र कुर्यादित्याह-

[भा.११०] अंतो उवस्सए छड्डणा उ बहिगामपासे वा ।
बिइयं गिलाण लोए कियकम्मसरीरमादिसु ।।

वृ- उपाश्रयस्यान्तर्मध्ये लिंगस्स छड्डणा परित्यागः क्रियते यदि वा बहिरुपाश्रयात् । अथवा ग्राममध्ये यदि वा ग्रामस्य पार्श्वे आसन्नप्रदेशेऽथवा तत्रैवाचार्यस्य समीपे इदमवधावन-काले लिङ्गस्योज्झनं अपवादतो अवधावनाभावेऽपि भवति । तथा चाह- द्वितीयपदमपवादपदं लिङ्गस्योज्झने ग्लानलोके ग्लानजने शरीरादिषु आदिशब्दादुच्चारपरिष्ठापनापरिग्रहस्तेषु कृतकर्मणि व्यापारे तथा ग्लानस्य शरीर विश्रामणादिकमुच्चारादि परिष्ठापनादिकं कुर्वन् खरण्टनादिभयाल्लिङ्गस्य विविक्ते प्रदेशे मोचनं भवतीति सम्प्रत्यवधावनेन लिङ्गस्योज्झने विधिविशेषमाह-

[भा.१११] उवसामिए परेण, सयं व समुवठिए उवठवणा ।
तक्खणा चिरकालेण व, दिठंतो अक्खभंगेण ।।

वृ- उपाश्रयान्तः प्रभृतिषु येषु स्थानेषु रजोहरणंमुक्तं तेषु स्थानेषु तेभ्यः दशभिरन्यान्यस्मिन् स्थाने उपशामिते परेशोपशमं नीते स्वयं वा तथाविधानुकूलकर्मोदयतः उपशमं गते ततः पुनकरणतया तत्क्षणं लिङ्गोज्झनानन्तरं तत्कालं चिरेण वा दीर्घकालेन गुरुसमीपे समुत्थिते नियमत उपस्थापना कर्तव्या नान्यथा प्रवेशनीयः । आह, यदि तेन न किञ्चिदपि प्रतिसेवितं ततः कस्मादुपस्थाप्यते । अत्र सूरिराह- दृष्टान्तोऽत्राक्षभङ्गेन यथा शकटस्याक्षे भग्ने नियमादन्योऽक्षः क्रियत एवं साधोरपि भावाक्षे भग्ने पुनरुत्थापनारूपो भावाक्ष आधीयते अक्षोधूः पुनरपि परः प्राह-

[भा.११२] मूलगुण उत्तरगुणे असेवमाणस्स तस्स अतियारं ।
तक्खण उवट्ठियस्स उ किं कारण दिज्जए मूलं ।।

वृ- मूलगुण मूलगुणविषये उत्तरगुणविषये किञ्चिदप्पतीचारं तस्याप्रतिसेवमानस्य कथम-प्रतिसेवनेत्यत आह- तत् क्षणं लिङ्गोज्झनानन्तरं तत्कालम पुनः करणतया समुत्थितस्य न भावाक्षो भग्न इति । किं कारणं तस्मै मूलं दीयते । उपस्थापना क्रियते सूरिराह-

[भा.११३] सेवउ मा व वयाणं, अइयारं तहवि देंति से मूलं ।
विगडासवा जलम्मि उ, कहं तु नावा न वोडेज्जा ।।

वृ- व्रतानां प्राणातिपातविनिवृत्यादीनामतीचारं सेवतां वा मा वा तथापि से तस्या प्रवचनोपनिषद्वेदिनो मूलं ददति । भावतोऽसंवृताश्रवद्वारतया चारित्रभङ्गात् तत्रैव प्रतिवस्तूपमया भावनामाह । वियडासवेत्यादि विकटानि अतिप्रकटानि स्थूराणीत्यर्थः । आश्रवाणि जलप्रवेशस्थानानि यस्याः सा तथारूपा सती नौः कथं तु जले प्रक्षिप्ता न निमज्जेदिति भावः । आश्रवद्वाराणामतिप्रकटानां भावादेवं साधुरपि भावतोऽनिवारिताश्रवः सन्नशुभकर्मजले निमज्जतीति भवति तस्योपस्थापनार्हता । अत्रैव दृष्टान्तान्तरमाह-

[भा.११४] चोरिस्सामिति मतिं, जो खलु संधाइ फेडए मुद्दं ।
अहियंमि वि सो चोरो, एमेव इमं पि पासामो ।।

वृ- अहं चोरयिष्यामीति मतिं सन्धाय यः खलु मुद्रां स्फेटयति स यद्यपि तदानीमारक्षकैर्गृहीतत्वादिना कारणेन न किञ्चिदपहृतवान् तथापि तत्परिणामोपेतत्वादहृतेऽपि स चौरो भवति । एवमेव अनेनैव प्रकारेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इममपि पश्यामः अचारित्रपरिणामोपेतत्वेना चारित्रादुपस्थापनायोग्यं पश्याम इत्यर्थः ।।

मू. (३३) *भिक्खू य अन्नयरं अकिच्चट्ठाणं सेवित्ता इछेज्ञा आलोएत्तए जत्थेव अप्पणो आयरियउवज्झाए पासेज्ञा, तस्संतियं आलोएज्ञा पडिक्कमेज्ञा निन्देज्ञा गरहेज्ञा विउट्टेज्ञा विसोहेज्ञा अकरयाण अब्भुट्टेज्ञा अहारिहं तवोकम्मं पायच्छित्तं पडिवज्जेज्ञा ।*

मू. (३४) *नो चेव अप्पणो आयरियउवज्झाए पासेज्ञा, जत्थेव संभोइयं साहम्मियं पासेज्ञा बहुस्सुयं बब्भागमं तस्संतियं आलोएज्ञा जाव पडिवज्जेज्ञा । नो चेव संभोइयं साहम्मियं, जत्थेव अन्नसंभोइयं साहम्मियं पासेज्ञा बहुस्सुयं बब्भागमं, तस्संतियं आलोएज्ञा जाव पडिवज्जेज्ञा नो चेव अन्नसंभोइयं, जत्थेव सारूवियं पासेज्ञा बहुस्सुयं बब्भागमं तस्संतियं आलोएज्ञा जाव पडिवज्जेज्ञा । नो चेवणं सारूवियं, जत्थेव सम्मंभावियाइं चेइआइं पासेज्ञा, तेसंतिए आलोएज्ञा जाव पडिवज्जेज्ञा ।*

मू. (३५) *नो चेव सम्मं-भावियाइं, चेइआइं बहिया गामस्स वा नगरस्स वा निगमस्स वा रायहानीए वा खेडस्स वा कव्बडस्स वा मडंबस्स वा पट्टणस्स वा दोणमुहस्स वा आसमस्स वा संवाहस्स वा संनिवेसस्स वा पाईणाभिमुहे वा उदीणाभिमुहे वा करयल-परिग्गहियंसि सिरसावत्तं मत्थए अञ्जलिं कट्टु एवं वएज्ञाः- 'एवइया मे अवराहा, एवइ क्खुत्तो अहं अवरद्धो,' अरहंताणं सिद्धाणं अंतिए आलोएज्ञा जाव पडिवज्जेज्ञासि-त्ति बेमि ।*

वृ. जे भिक्खूय अन्नयरं अकिच्चट्ठाणं सेवित्ता इत्यादि । अथास्य सूत्रस्य कः सम्बन्ध उच्यते-

[भा.११५] अइयारे खलु नियमेण विगडणा एस सुत्तसंबंधो ।
किंचि न तेना चिन्नं दोन्न वि लिंगा जढा जेन ।।

वृ- इह अनन्तरसूत्रेऽतीचार उक्तः । कोऽसावतीचार इति चेदत आह- किंचेत्यादि किंवा न तेनाचीर्णं येन द्वेपि द्रव्य भावरूपे लिङ्गे परित्यक्ते सर्वत एव तस्यातीचार इति भावः । अतीचारे च सति खलु नियमेनविकटना आलोचना भवति तदा दातव्या । तत आलोचनाप्रतिपादनार्थमेव सूत्रारंभ इति सूत्रसम्बन्धः प्रकारान्तरेण सूत्र सम्बन्धमाह-

[भा.११६] अहवा हेट्ठाणंतरसुत्ते आलोयणा भवे नियमा ।
इहमवि जं निमित्तं उल्लट्टो तस्स कायव्वो ।।

वृ- अथवेति प्रकारान्तरे अधस्तनान्तरसूत्रे द्रव्यभावलिङ्गपरित्यागः कृतस्तन्निमित्ता नियमाद् भवत्यालोचना अन्यथा शैक्षिकोपस्थापनाया अयोगादिति प्रतिपादितं । इहापि यन्निमित्तमकृत्यं प्रतिसेवितं तस्यापवर्त्तः प्रत्यावर्त्तः कर्तव्यः । स चा लोचनामन्तरेण नेत्यालोचना प्रतिपाद्यते इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या । भिक्षुरन्यतरत अकृत्यस्थानं सेवित्वा प्रतिसेव्य इच्छेत् आलोचयितुं। स चा लोचयितुमिच्छुर्यत्रैवात्मन आचार्योपाध्यायान् पश्येत्तत्रैव गत्वा तेषामन्तिके समीपे आलोचयेदतीचारजातं वचसा प्रकटी कुयात् प्रतिक्रामेत् मिथ्यादुष्कृतं तद्विषये दद्याद्यावत्कारणात् "निन्दिज्ञा गरिहिज्ञा विउट्टेज्ञा विसोहिज्ञा अकरणयाए अब्भुट्टेज्ञा । अहारिहं तवो कम्मं पायच्छित्तं पडिवज्जेज्ञा' ।इति परिग्रहः । तत्र निंद्यादात्मसाक्षिकं । जुगुप्सेत् गर्हेत् गुरुसाक्षिकम् । इह निन्दनगर्हणमपि तात्विकं तदा भवति यदा तत्करणतः प्रतिनिवर्त्तते । तत आह- विउट्टेज्ञा इति तस्मादकृत्य प्रतिसेवनात् व्यावर्तेत निवृत्तेत, व्यावृतावपि कृतात्पापात्तदा मुच्यते, यथात्मनो विशोधिर्भवति, तत आहआत्मानं विशोधयेत्, पापमलस्फेटनतो निर्मली कुर्यात् । सा च विशुद्धिर्पुनः करणतायामुपसंपद्यते । ततस्तामेवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः करणतामाह । अकरणतया पुनरभ्युत्तिष्ठेत् । पुनरकरणतया अभ्युत्थानेऽपि विशोधिप्रायश्चित्त-प्रतिपत्या भवति । तत आह-यथार्हं यथायोग्यं तपःकर्म तपोग्रहणमुपलक्षणं च्छेदादिकं प्रायश्चित्तं प्रतिपद्यते । यदि पुनरात्मीयेष्वाचार्योपाध्यायेषु सत्सु अन्येषामन्तिके आलोचयति । ततः प्रायश्चित्तं तस्य चतुर्गुरु यदि पुनरात्मन आचार्योपाध्यायान्न पश्येत् । अभावाद्दूरव्यवधानतो वा ततो यत्रैव सांभोगिकं साधर्मिकं विशिष्टसामाचारीनिष्पन्नं बहु श्रुतं छेदग्रन्थादिकुशलं उद्भामकमुद्यतविहारिणं पाठान्तरं बह्वागममर्थतः प्रभूतागमं पश्येत्तस्यान्तिके आलोचयेदत्रापि यावत्करणात् पडिक्कमेज्जा इत्यादि पदकदम्बकपरिग्रहः । यदि पुनः तस्य भावे अन्यस्य सकासे आलोचयति तदा चतुर्लघु एवं सर्वत्रोत्क्रमकरणे वक्तव्यम् । सांभोगिकसाधर्मिकबहुश्रुताभावे असांभोगिक साधर्मिक बहुश्रुत संविग्नस्यान्तिके तस्याप्यभावे सारूपिकस्यबहुश्रुतस्यान्तिके समानं रूपं सरूपं तत्र भवः सारूपिको वक्ष्यमाणस्वरूपः । तस्याप्यभावे यत्रैव सम्यग् भावितानि जिनवचनवासितान्तः करणानि दैवतानि पश्यति । तत्र गत्वा तेषामन्तिके आलोचयेत् । तेषामप्य भावे बहिर्ग्रामस्य ग्रसति बुद्धयादीन गुणान् यदिवा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामस्तस्य यावत्करणात् । ''नगरस्य वा निगमस्स वा रायहानीए वा खेडस्स वा कप्पडस्यवा पट्टणस्स वा दोणमुहस्स वा आसमस्स वा संवाहस्स वा सन्निवेसस्स वा इति परिग्रहः'' ।। तत्र न विद्यते करो यस्मिन् तत् नकरं तस्य, निगमः प्रभूतर वणिग्वर्गावासकस्तस्यवा राजाधिष्ठानं नगरं राजधान तस्य वा पांशुप्राकार निबद्धं खेटं तस्य वा क्षुल्लकप्राकारवेष्टितं कर्बटं तस्य वा, अर्धतृतीयगव्यूतान्तर्ग्रामान्तररहितं मडम्बं तस्य वा, पत्तनं जलस्थलनिर्गमप्रवेशं यथा भृगुकच्छं । उक्तं च-

''पत्तनं शकटैर्गम्यं, घौटकैर्नौइबड़ए' च ।
नौभिरेवयद्गम्यं, पट्टनं तत्प्रचक्षते ।।''

तस्य वा द्रोणमुखं जलनिर्गमप्रवेशं । यथा- 'कोङ्कणदेशेस्थानकनामकं पुरं तस्य च, आकरो हिरण्याकरादिः आश्रमस्तापसावसथोपलक्षित आश्रयविशेषः तस्य वा संबाधो यात्रासमागतप्रभूत-जननिवेशस्तस्य वा, संनिवेशस्तथाविधप्राकृतलोकनिवासस्तस्य वा प्राचीनाभिमुखो वा उदीचीनाभिमुखो वा पूर्वदिगभिमुख उत्तरदिगभिमुखो वा इत्यर्थः, । इह चिरन्तनव्याकरणेषु दिश्यपिस्त्रियामभिधेयायामीनप्रत्ययः स्वार्थे भवति, तत एवं निर्देशः पूर्वोत्तरादिग्रहणमा-लोचनायामेतयोरेव दिशयोरर्हत्वात् करतलाभ्यां प्रकर्षेण गृहीतः करतलप्रगृहीतः तं तथा शिरस्यावर्तो यस्य स शिरस्यावर्त्तः कण्ठे कालवद लुक् समासः तं मस्तके अञ्जलिं कृत्वा एवं वक्ष्यमाणरीत्या वदेत्। तामेव रीतिं दर्शयति-एतावन्तो मे ममापराधा एतावत् कृत्वा एवावतो वारान् यावदहमपराद्ध एवमर्हतां तीर्थकृतां कथं भूतानामित्याह-सिद्धानामपगतमलकलङ्कानामन्ति के आलोचयेदित्यादि पूर्ववदेष सूत्रसंक्षेपार्थः । अधुना नियुक्तिभाष्यविस्तरः । तत्र यदुक्तमकृत्यं स्थानं सेवित्वेति तद्विषयमुपदर्शयति-

[भा.११७] अन्नयरं तु अकिच्चं मूलगुणे चेव उत्तरगुणे य ।
मूलं च सव्वदेसं एमेव य उत्तरगुणेसु ।।

वृ- अन्यतरदकृत्यं पुनः सूत्रोक्तं मूलगुणे मूलगुणविषयमुत्तरगुणे वा उत्तरगुणविषयं वा । तत्र मूलं मूलगुणविषयं सर्वं देशं वा । सर्वथा मूलगुणस्योच्छेदेन देशतो वा इत्यर्थः । एवमेवानेनैव प्रकारेण उत्तरगुणेष्वपि द्वैविध्यं भावनीयं । तद्यथा - उत्तरगुणस्यापि सर्वतो देशतो वा उच्छेदेनेति तत्रैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्यानान्तरमाह-

[भा.११८] अहवा पनगादीयं मासादीवावि जाव छम्मासा ।
एवं तवारिहं खलु च्छेदादि चउण्हवेगयरं ।।

वृ- अथवेति अकृत्यस्थानस्य प्रकारान्तरतोपदर्शने पञ्चकादिकं रात्रिंदिवपञ्चक प्रभृति प्रायश्चित्त स्थानमकृत्यं स्थानं, यदि वा मासादि तच्च तावत् यावत् षण्मासाः । एतत्खलु अकृत्यस्थानं तपोऽर्हं तपोरूपप्रायश्चित्तार्हं यदि वा च्छेदादीनां चतुर्णां प्रायश्चित्तस्थानमकृत्यस्थानं तदेवमकृत्यस्थानं व्याख्याय सम्प्रति यथा स्वकीयाचार्योपाध्यायादीनामदर्शनं संभवति तथा प्रतिपादयति-

[भा.११९] आउय वाघायं वा दुल्लहगीयं च पत्तकालं तु ।
अपरक्कममासज्ज व सुत्तमिणं तूदिसा जाव ।।

वृ- स्वकीयानामाचार्योपाध्यायानामायुषो व्याघातोऽभवत् जीवितस्य बहुघातसंकुलत्वात् । यदि वा तस्यैवालोचकस्यायुर्यावदाचार्योपाध्यायादि समीपं गच्छति तावत् न प्रभवति स्तोकावशेषत्वात्, तत आयुषो व्याघातं वा समाश्रित्य तथा भविष्यति स कालो यत्र दुर्लभो गीतार्थः आलोचनार्हस्तत एष्यन्तं कालमधिकृत्य दुर्लभं गीतार्थं गीतार्थं वाश्रित्य तथा जङ्घाबल-परिहान्यारोगातंकेण वा जातोऽपरक्रम आलोचकस्ततस्तं वा प्रतीत्य सूत्रमिदमधिकृतं प्रवृत्तं यावद्दिशादि सूत्रम् । अत्र पर आह-ननु पूर्वमेकाकिविहारप्रतिमासूत्राणि व्याख्यातानि यथा एकाकिविहारे दोषाः, तदनन्तरं पार्श्वस्थादि विहारोऽपि प्रतिषिद्धः । ततो नियमाद्गच्छे वस्तव्यमिति नियमितं । एवं च नियमिते कथमेकाकी जातो येनोच्यते नैवात्मनमाचार्योपाध्यायन् पश्येत्तत्रैव गत्वा तेषामन्तिके आलोचयेदित्यत्र सूरिराह-

[भा.१२०] सुत्तमिणं कारणियं आयरियादीण जत्थ गच्छंमि ।
पंचण्हं ही असती एगो च तहिं न वसियव्वं ।।

वृ- सूत्रमिदमधिकृतंकारणिकं, कारणेभवं कारणिकं कारणे सत्येकाकिविहारविषयमित्यर्थः । इयमत्र भावना-बहूनि खल्वशिवादीनि एकाकित्वकारणानि ततः कारणवशतो यो जात एकाकी तद्विषयमिदं सूत्रमिति न कश्चिद्दोषः अशिवादीनि तु कारणानि मुक्त्वा आचार्यादिविरहितस्य न वर्तते वस्तुं । तथा चाह-यत्र गच्छे पञ्चानामार्चोयापाध्यायगणावच्छेदि प्रवर्तिस्थविररूपाणामसदभावो यदि वा यत्र पञ्चानामन्यतमोऽप्येको न विद्यते तत्र न वस्तव्यमनेकदोषसम्भवात् । तानेव दोषानाह-

[भा.१२१] एवं असुभगिलाणे परिणकुलकज्जमादिवग्गो उ ।
अनस्सतिससल्लस्सा जीवियघाते चरणघातो ।।

वृ- एवमुक्तेन प्रकारेण एकादिहीने गच्छे एकोऽशुभकार्ये मृतकस्थापनादौ अपरो ग्लान-प्रयोजनेष्वन्यः परिज्ञायां कृतभक्तप्रत्याख्यानस्य देशनादौ, अपरः कुलकार्यादौ व्यग्र इति, अन्यस्य पञ्चमस्याप्यन्त्यावस्थाप्राप्तस्य आलोचनाया असंभवेन सशल्यस्य सतो जीवितघाते जीवितनाशे चरणव्याघातश्चरणगात्रभृंशश्चरणभृंशे च शुभगतिविनाशः अत्र पर आह-

[भा.१२२] एवं होइ विरोहो, आलोयण परिणतो य सुद्धो उ ।
एगंतेन पमाणं परिणामो वि न खलु अम्हं ।।

वृ- नन्वेवं सति परहस्परविरोधस्तथाहि भवद्भिरिदानीमेवमुच्यते सशल्यस्य सतो जीवितनाशे चरणभ्रंशः प्राक् चैव मुक्तमदत्तालोचनेऽप्यालोचनापरिणामपरिणतः शुद्धइति ततो भवति परस्पर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरोधः, अत्र सूरिराह-एगंतेनेत्यादि, न खल्वस्माकं स्वशक्ति निगूहनेन यथाशक्तिप्रवृत्तिविरहितः केवलपरिणामः एकान्तेन प्रमाणं तस्य परिणामाभासत्वात्, किन्तु सूत्रं प्रमाणी कुर्वतो यथाशक्ति प्रवृत्तिसमन्वितः न चैकाद्यभावे गच्छे वसन् सूत्रमनुवर्तते । ततस्तस्य तात्विकपरिणाम एव नेति स शल्यस्य जीवितनाशे चरणनाशः । पुनरपि वक्तव्यानन्तरं विवक्षुः प्रश्नमुत्थापयति-

[भा.१२३] चोयग किं वा कारण पंचण्ह सती तहिं न वसियव्वं ।
दिट्ठंतो वाणियए पिंडिय अत्थे वसिउ कामो ।।

वृ- चोदक आह-यत्र पञ्चानां परिपूर्णानामसदभावस्तत्र न वस्तव्यमित्यत्र किं वा कारणं को नाम दोषः ? सूरिराह-अत्र अधिकृतार्थे वणिजा पिण्डितार्थेन वस्तुकामेन दृष्टान्तः उपमा, गाथायां सप्तमी तृतीयार्थे । इयमत्र भावना-कोऽपि वणिक् तेन प्रभूतोऽर्थः पिण्डितः । ततः सोऽचिन्तयत् । कुत्र मया वस्तव्यं यत्रैनमर्थं परिभुञ्जेह [य] मिति ततस्तेन परिचिन्त्येदं निश्चिक्ये;-

[भा.१२४] तत्थ न कप्पइ वासो आहारा जत्थ नत्थि पंच इमे ।
राया वेज्जो धणिमं नेवइया रूवजक्खाय ।।

वृ- तत्र मम न कल्पते वासो यत्रेमे वक्ष्यमाणाः पञ्च नाधाराः । के ते इत्याह-राजा नृपतिर्वैद्यो भिषक्, अन्ये च धनवन्तो नैतिकका नीतिकारिणो रूपयक्षा धर्मपाठकाः । कस्मादिति चेदत आह-

[भा.१२५] दविणस्स जीवयस्स य वाधातो होज्ज जत्थ नत्थेत ।
वाधाए वेगतरस्स दव्वसंघाडणा अफला ।।

वृ- यत्र न सन्त्येते राजादयः परिपूर्णाः पञ्च तत्र नियमतो द्रविणस्य धनस्य जीवितस्य वा व्याघातो भवेत् । वैद्येन विना जीवितस्य, राजादिभिर्विना धनस्यव्याधाते चैकतरस्य धनस्य जीवितस्य वा द्रव्यसङ्घाटना द्रव्योपार्जना विफला परिभोगस्या सम्भवादथवा-

[भा.१२६] रण्णा जुवरणा वा महयरय अमच्च तह कुमारेहिं ।
एएहिं परिग्गहियं, वसेज्ज रज्जं गुणविसालं ।।

वृ- राजा युवराजेन महत्तरकेनामात्येन तथा कुमारैरेतैः पञ्चभिः परिगृहीतं राज्यं गुणविशालं भवति। गुणविशालत्वाच्च तद्वसेत् । तत्र कीद्दशो राजेति राजलक्षणमाह-

[भा.१२७] उभतो जोनीसुद्धो राया दसभागमेत्त संतुट्ठो ।
लोए वेदे समए कयागमो धम्मितो राया ।।

वृ- यो राजा उभययोनिशुद्धः मातृपितृपक्षपरिशुद्धः । तथा प्रजाभ्यो दश भागमात्रग्रहणसन्तुष्टः । तथा लोके लोकाचारे वेदे समस्तदर्शनिनां सिद्धान्ते समये नीतिशास्त्रे कृतागतः कृतपरिज्ञानो धार्मिको धर्मश्रद्धावान् स राजा, शेषस्तु राजाभासः, तथा-

[भा.१२८] पंचविहे कामगुणे साहीणे भुंजए निरुविग्गे ।
वावरविप्पमुक्को राया एयारिसो होइ ।।

वृ- पञ्चविधान् पञ्चप्रकारान् रुपरसगन्धस्पर्शशब्दलक्षणान् कामगुणान् स्वाधीनान् स्वभुजोपार्जितान् निरुद्विग्नः प्रत्यन्तराजकृतमनोदुःखासिकाया अभावात् व्यापारविप्रमुक्तो देशपरिपन्थनादिव्यापारविप्रमुक्तो युवराजादीनां तद्व्यापाराध्यारोपणा तो यः स एताद्दशो राजा भवति, युवराजस्य स्वरुपमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.९२९] आवस्याइं काउं, सो पुव्वाइं तु निरवसेसाइं ।
अत्थाणी मज्झगतो, पेच्छइ कज्जाइं जुवराया ।।

वृ- यो नाम प्रातरुत्थाय पूर्वाणि प्रथमानि आवश्यकानि शरीरचिन्ता देवतार्चनादीनि निरवशेषाणि कृत्वा आस्थानिकामध्यगतः सन् कार्याणि प्रेक्षते चिन्तयति स युवराजः, महत्तरकलक्षणमाह-

[भा.९३०] गंभीरो मद्दवितो, कुसलो जाइ विनयसंपन्नो ।
जुवरणाए सहितो पेच्छइ कज्जाइं महत्तरओ ।।

वृ- यो गम्भीरो लब्धबुद्धिमध्यभागो मार्दवितो मार्दवोपेतः सञ्जातं मार्दवमस्येति तारकादि दर्शनादितप्रत्ययः । कुशलः सकलनीतिशास्त्रदक्षो जातिविनयसम्पन्नो युवराजेन सहितः सन् प्रेक्षते कार्याणि राज्यकार्याणि समहत्तरक इति, अमात्यलक्षणमाह-

[भा.९३१] सजनवयं पुरवरं चिंततो अत्थइ नरवतिं च ।
ववहारनीतिकुशलो, अमच्चो एयारिसो अहवा ।।

वृ- यो व्यवहारकुशलो नीतिकुशलश्च सन् सजनपदं पुरवरं नरपतिं च चिन्तयन्नवतिष्ठते स एतादृशो भवति अमात्यः । अथवा यो राज्ञोऽपि शिक्षां प्रयच्छति स अमात्यस्तथा चैतदेव सविस्तरं भावयिपुराह-

[भा.९३२] राया पुरोहितो वा संघिल्लातो नगरंमि दोवि जना ।
अंतेउरे धरिसिज्जा, अमच्चेणं खिंसिया दोवि ।।

वृ- राजा पुरोहितश्च वाशब्दः समुच्चये । एतौ द्वावपि जनौ 'संघिल्लाउत्ति संघातवन्तौ परस्परं मद्दु कावित्यर्थः नगरे वर्तेते तौ च तथा वर्तमानावन्तःपुराभ्यां निजनिजकलत्रेण धर्षितौ अमात्येन च द्वावपि खिंसितौ, निन्दापुरस्सरं शिक्षितावित्यर्थः । एष गाथाक्षरार्थः ।। भावार्थः कथानकादवसेयस्तच्चेदम्-'एगो राया । तस्स पुरोहितो । तेसिं दोण्हवि भज्जातो परोप्परं भगिणीतो । अन्नया तेसिं समुल्लावो जातो । राय भज्जा भणइ- 'मम वस्सो राया' । पुरोहितभज्जा भणइ- 'मम वस्सो बंभणो' तो पेच्छामो कयराए वस्सो पती, । ततो पुरो हितभज्जाए भत्तं उवसाहित्ता रन्नो भज्जा भगिनी निमंतिया । रत्तिं पुरोहियभज्जाए पुरोहितो भणितो- 'मए उवाइयं कयं जइ मम वरो अमुगो समिज्झि हि, ततो भगिणीए समं तव सिरे भायणं काउं जेमिमि सो य मे वरो संपणो, संपयं तव मूलातो पसायं मग्गामि' पुरोहितो भणति 'अनुग्गहो मे' ततो रायभज्जाए राउ भणितो- 'अज्जरत्तिं तव पिठीए विलग्गिउं पुरोहियघरं वच्चामि, राया भणति 'अनुग्गहो मे' तहि सा रायं पलाणित्ता पिठीए विलग्गित्ता पुरोहियघरं गंतुं पठित्ता ऊरुहित्ता वाहणेत्ति काउं खंभे बद्धो । ततो दोवि जनीतो पुरोहियस्स उवरि मत्थए भायणं काउं पुरोहिएण धरेज्जमाणे भायणे भुंजंति । राया खंभे बद्धो हयहेसियं करेति, भोत्तुं गया रायभज्जा । ततो रन्ना पुरोहिएणं धरिसितोमित्ति तस्स सिरं मुंडावियं अमच्चेण तं सव्वं नायं पभाए राया पुरोहितो य खिंसितो अमुमेवार्थमाह-

[भा.९३३] छंदानुवत्तिं तुज्झं मज्झंवीमंसणानिवे खलिणं ।
निसिगमन मरुगथालं धरेति भुंजंति ता दोवि ।।

वृ- तव वा पतिर्मम वा पतिच्छन्दोनुवर्तीति न विमर्शव्यतिरेकेण ज्ञातुं शक्यते ततो मीमांसा परीक्षाकर्तुमारब्धा । तत्र राजभार्यया नृपे खलीनमारोपितं । तोत निशि रात्रौ पुरोहितगृहे गमनं, ततो मरुको ब्राह्मणः पुरोहितः शिरसास्थालं धरति । तत्र द्वावपि भुञ्जाते । एष गाथाक्षरयोजना । भावार्थोऽनन्तरमेव कथितः । अथ कथममात्यो द्वावपि तौ शिक्षितवान् तत आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.९३४] पडिवेसिय रायाणो सोऊमिणं परिभवेनहसिहिंति ।
थीनिज्जितो पमत्तो वाविरज्जंपि पेलेज्जा ।।

वृ- प्रातिवेशिका नाम सीमान्तरवर्तिनः प्रत्यर्थिनो राजान इदं श्रुत्वा परिभवेन परिभवोत्पादनबुद्धया हसिष्यन्ति । न केवलं हसिष्यन्ति किन्तु स्त्रीनिर्जितः प्रमत्त एष इति ज्ञात्वा राज्यमपि प्रेरयिष्यन्ति गृह्णीयुरित्यर्थः ।।

[भा.९३५] धित्तेसिं गामनगरान जेसिं इत्थी पनायगा ।
तेया वि धिक्कया पुरिसा जे इत्थीण वसंगया ।।

वृ- धिग् निन्दायां, तेषां ग्रामनगराणां येषां स्त्री प्रणायिका प्रकर्षेण स्वतन्त्रतया नायिका । अत्र धिग् योगे द्वितीया प्राप्तावपि षष्ठीप्राकृतत्वात् । तथा तेऽपि पुरुषा धिक्कृता धिक्कारं प्राप्तवन्तो ये स्त्रीणां वशमायत्ततां गताः । तथा-

[भा.९३६] 'इत्थीतो बलवंजत्थ गामेसु नगरेसु वा ।
सो गामं नगरं वापि, खिप्पमेव विनास्सइं ।।'

वृ- यत्र ग्रामेषुनगरेषु वा स्त्रियो बलवत्सः स ग्रामो नगरं वा क्षिप्रमेव विनश्यति । बहुवचनेनो-पक्रम्योपसंहारो जातौ बहुवचनमेकवचनं च भवतीति ज्ञापनार्थः । एवमुक्ते राजा पुरोधा वा एवं मनसि सम्प्रधारयेत् यथा 'नास्माकं ग्रामेषु नगरेषु वा स्त्रियो बलवत्य' इति । तत आह-

[भा.९३७] इत्थीतो बलवंतत्थ गामेसुय नगरेसुय,
अनस्सा जत्थहेसंति, अपव्वंमिय मुंडणं ।।

वृ- तत्र तेषु ग्रामेषु नगरेषु वा स्त्रियो वलवत्यो यत्र अनश्वा हेषंति, अपर्वणिच शिरोमुंडनं, एतेन राज्ञो हय हेषितं प्रकटीकृतं पुरोधसश्चशिरो मुंडनं, अथ कथमेतदमात्येन ज्ञातमित्यत आह –

[भा.९३८] सूयग तहानु सूयग पडिसूयग सव्वसूयगा चेव ।
पुरिसा कयवित्तीया वसंति सामंतरज्जेसु ।।

वृ- तस्यामात्यस्य पुरुषाः कृतवृत्तयः कृताजीविका श्चतसृषु दिक्षु चारज्ञानार्थं सामन्तराज्येषु प्रातिवेशकराज्येषु वसन्ति । तद्यथा-सूचका अनुसूचकाः प्रतिसूचकाः प्रतिसूचकाः सर्वसूचकाश्च । तत्र सूचकाः सामन्तराज्येषु गत्वा अन्तःपुरपालकैः सह मैत्रीं कृत्वा यत्तत्र रहस्यं तत्सर्वं जानन्ति । अनुसूचका नगराभ्यन्तरे चारमुपलभन्ते, प्रति सूचकानगरद्वारसमीपे अल्पव्यापारा अवतिष्ठंति, सर्वसूचकाःस्वनगरं पुनरागच्छन्ति पुनर्यान्ति तत्र ये सूचकास्तैः श्रुतं दृष्टं वा सर्वमनुसूचकेभ्यः कथयन्ति अनुसूचकाः सूचक कथितंस्वयमुपलब्धं च प्रतिसूचकेभ्यः प्रतिसूचकाः अनुसूचककथितंस्वयमुपलब्धं च सर्वसूचकेभ्यः । सर्वसूचका अमात्याय कथयन्ति । यथा तस्यामात्यस्य चतुर्विधाः पुरुषाः सामन्तराज्येषु वसन्ति तथा महेला अपि । तथा चाह-

[भा.९३९] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।
महिलाकयवित्तीया वसंति सामंतरज्जेसु ।।

वृ- अस्य व्याख्या प्राग्वत् । यथा च पुरुषाः स्त्रियश्च सामन्तराज्येषु समस्तेषु वसन्ति तथा सामन्तनगरेष्वपि राजधानीरुपेषु । तथा चाह-

[भा.९४०] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरिसा कयवित्तिया वसंति सामंतनगरेसु ।।

[भा.१४१] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।
महिला कय वित्तीया वसंति सामंतनगरेसु ।।

वृ- इदं गाथाद्वयमपि पूर्ववद्यथा च परराज्येषु परनगरेषु च पुरुषास्त्रयश्च वसन्ति तथा निजराज्ये निजनगरे अन्तःपुरे च ।।तथा चाह-

[भा.१४२] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।
पुरिसा कय वित्तीया वसंति नियमंमि रज्जंमि ।।

[भा.१४३] सूयग तहानुसूयग, पडिसूयग सव्वसूयगा चेव;
महिला कय वित्तिया, वसंति नियमंमि रज्जंमि

[भा.१४४] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।
पुरिसा कय वित्तीया वसंति नियमंमि नगरंमिम ।।

[भा.१४५] सूयग तहानुसूयग, पडिसूयग सव्वसूयगा चेव;
महिला कय वित्तीया, वसंति नियमंमि नगरंमि

[भा.१४६] सूयग तहानुसूयग पडिसूयग सव्वसूयगा चेव ।
पुरिसा कय वित्तीया वसंति अंतेउरे रन्नो ।।

[भा.१४७] सूयग तहानुसूयग सव्वसूयगा चेव ।
महिला कय वित्तीया वसंति अंतेउरे रन्नो ।।

वृ- गाथा षट्कस्यापि व्याख्या पूर्ववत् । तत एवं निजचारपुरुषमहिलाभ्यो राज्ञः पुरोधसश्च निशिवृत्तममात्यो ज्ञातवान् । तदेवं राज्ञोऽपि यः शिक्षाप्रदानेऽधिकारी सोऽमात्य इति उक्तममात्यस्य स्वरूपम् ।। अधुना कुमारस्याह-

[भा.१४८] पच्चंते खुब्भंते दुद्दंते सव्वतो दवेमाणो ।
संगामनीति कुसलो कुमार एयारिसो होइ ।।

वृ- प्रत्यन्तान् सीमासन्धिवर्तिनः क्षुभ्यतो अन्तर्भूतण्यर्थत्वात् समस्ता अपि सीमापर्यन्तवर्तिनीः प्रजाः क्षोभयतो दुर्दान्तान् दुःशिक्षितान् संग्रामनीति कुशलः सर्वतः सर्वासु दिक्षु यो दमयन् वर्तते ।। स एतादृशः कुमारो भवति । तदेवं राजयुवराजादि व्याख्यातं पञ्चकं सम्प्रति राजवैद्यादि पञ्चकं ।।

तत्र राजस्वरूपमुक्तमिदानीं वैद्यस्वरूपमाह-

[भा.१४९] अम्मापिई हि जाणियस्स आयंकपउरदोसेहिं ।
विज्जा देंति समोहिं, जहिं कया आगमा होंति ।।

वृ- मातापितृभ्यां जनितस्य तस्याधिकृतस्य वणिज आतङ्कात रोगात् ये समुत्थाः प्रचुरा दोषास्तैरुपेतस्येति गम्यते वैद्या ददति कुर्वन्ति समाधिं स्वास्थ्यं नीरोगतामित्यर्थः । यैः कृता अभ्यस्ता आगमा वैद्यकशास्त्रलक्षणा भवन्ति वर्तन्ते । उक्तं वैद्यस्वरूपम् ।। अधुना धनवतां स्वरूपमाह-

[भा.१५०] कोडिग्गसो हिरण्णं मणिमुत्तसिलप्पवालरयणाइं ।
अज्जयपिउपज्जागय एरिसया होंति धनावत्ता ।।

वृ- येषां आर्यः पितामहः, पिता प्रतीतः । प्रार्यः प्रपितामहः तेभ्य आगतं विद्यते कोट्यग्रशः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोटिसङ्ख्या हिरण्यं मणिमुक्ताशिलाप्रवालरत्नानि च मणयश्चंद्रकान्ताद्याः मुक्तामुक्तफलानि विद्रुमाणि रत्नानि कर्केतनादीनि ते ईद्दशा भवन्ति धनवन्तः ।।

उक्तं धनवतां स्वरूपमिदानीं नैयतिकस्वरूपमाह-

[भा.९५१] सणसत्तरसादीणं धन्नाणं कुंभकोडिकोडीणं ।
जेसिंता भावणठा एरिसिया होंति नियइझ्या ।।

वृ- सणः सप्तदशो येषां तानि सणसप्तदशानि तानि चामूनि तद्यथा-शालिः **१** यवः **२** कोद्रवाः **३** व्रीहि **४** रालकः **५** तिलाः **६** मुद्गाः **७** माषाः **८** चवलाः **९** चणकाः **१०** । तुवरी **११** मसुरकः **१२** कुलत्थाः **१३** गोधूमाः **१४** निष्पावाः **१५** अतसी **१६** सणश्च **१७** उक्तं च-

सालि जव कोद्दव वीहि रालगतिल मुग्ग मास चवल चणा ।
तुवरि मसूर कुलत्था गोहुमनिप्फाव अयसि सणा ।।

सणसप्तदशानि आदिर्येषां तानि सणसप्तदशानि, तेषां धान्यानां कुम्भकोटीकोट्यो येषां भोजनार्थं विश्राणनार्थं गृहेषु सन्ति ते एताद्दशा भवन्ति नैयतिकाः, नियतिर्व्यवस्था तत्र नियुक्तास्तथा वा चरन्तीति [नै] नियतिकाः । उक्तं नियतिकस्वरूपम् ।। अधुना रूपयक्षस्वरूपमाह-

[भा.९५२] भंभीय मासुरुक्खे माढरकोडिण दंडनीतिसु ।
अल्लंचपक्खगाही एरिसया रूवजक्खातो ।।

वृ- भम्भ्यावामासु[शुद ?]वृक्षे माढरे नीतिशास्त्रे कौण्डिन्यप्रणीतासु च दण्डनीतिषु ये कुशला इति गम्यते । तथा न कस्यापि लञ्चामुत्कोचं गृह्णन्ति । नाप्यात्मीयोऽयमिति कृत्वा पक्षं गृह्णन्ति ते एताद्दशोऽलंचापक्षग्राहिणो रूपयक्षारूपेण मूर्त्या यक्षा इव रूपयक्षाः मूर्तिमन्तो धर्मैकनिष्ठा देवा इत्यर्थः। उक्तो वणिग् द्दष्टान्तः ।। साम्प्रतमुपनयनमाह-

[भा. ९५३] तत्थ न कप्पइ वासो गुणागरा जत्थ नत्थिं पंच इमे ।
आयरिय उवज्झाए पवित्तथेरेय गीयत्थे ।।

वृ- वणिज इव राजाद्यभावे साधोरपि तत्र गच्छे वासो न कल्पते । यत्र इमे वक्ष्यमाणागुणानामाकराः स्थानानि गुणाकराः पञ्च न सन्ति के ते इत्याह- आचार्य उपाध्यायः प्रवृत्तिः स्थविरो गीतार्थश्च । तत्र कीद्दशः आचार्यस्तत्स्वरूपमाह-

[भा.९५४] सुत्तत्थ तदुभएहिं उवउत्ता नाणदंसणचरित्ते ।
गणतत्ति विप्पमुक्का एरिसया होंति आयरिया ।।

वृ- ये सूत्रार्थतदुभरुपेता इति गम्यते । तथा सततंज्ञानदर्शनचारित्रेसमाहारो द्वन्द्वः ज्ञानदर्शनचारित्रेषु उपयुक्ताः कृतोपयोगास्तथा गणस्य गच्छस्य या ततिः सारा तया विप्रमुक्ता गणावच्छेदप्रभृतीनां तत्तसेः समर्पितत्वात्, उपलक्षणमेतत्, शुभलक्षणोपेताश्चय एताद्दशा भवन्त्याचार्याः । तेचार्थमेव केवलं भाषन्ते न तु सूत्रमपि वाचयन्ति तथा चोक्तम्-

सुत्तत्थविऊ लक्खणजुत्तो गच्छस्स मेटि[ढि]भूतो य ।
गणतत्ति विप्पमुक्को अत्थं भासेइ आयरिओ ।।

अथ किं कारणमाचार्याः स्वयं सूत्रं न वाचयन्ति । तत आह-

[भा.९५५] एगग्गया य ज्झाणे वुड्ढी तित्थयर अनुगई गरुया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आणाधेज्जमितिगुरु, कयरिणमोक्खोन न वाएइ ।।

वृ- सूत्रवाचनाप्रदानपरिहारेणार्थमेव केवलं व्याख्यानाय आचार्यस्य एकाग्रता एकाग्रमनस्कता ध्यानेऽर्थचिन्तनात्मके भवति । यदि पुनः सूत्रमपि वाचयेत्तदा बहुव्यग्रत्वादर्थचिन्तायामेकाग्रता न स्यात्, एकाग्रतयापि को गुण इत्यत आह- वृद्धिः एकाग्रस्य हि सतोऽर्थं चिन्तयतः सूत्रार्थस्य । तत्र सूक्ष्मार्थोन्मीलनात् वृद्धिरुपजायते तथा तीर्थकरानुकृतिरेवं कृता भवति । तथा हि तीर्थकृतो भगवन्तः किलार्थमेव केवलं भाषन्ते, न तु सूत्रं नापि गणतप्तिं कुर्वन्ति । एवमाचार्या अपि तथा वर्तमानास्तीर्थकरानुकारिणो भवन्ति । सूत्रवाचनां तु प्रयच्छतामाचार्याणां लाघवमप्युपजायते तद्वाचनायास्ततोऽधस्तनपदवर्त्तिभिरप्युपाध्यायादिभिः क्रियमाणत्वादेवं तस्य तथा वर्तमानस्य लोके राज्ञ इव महती गुरुता प्रादुर्भवति तद्गुरुतायां च प्रवचनप्रभावना तथा आज्ञायां स्थैर्यमाज्ञास्थैर्यं कृतं भवति तीर्थकृतामेवमाज्ञा पालिता भवतीत्यर्थः । इयं हि तीर्थकृतामाज्ञा यथोक्तप्रकारेणममानुकारिणा आचार्येण भवितव्यमिति । इत्यस्मात् हेतुकलापात् गुरुराचार्यः कृतः ऋणमोक्षो येन स कृतऋणमोक्षस्तेन हि सामान्यावस्थायामनेके साधवः सूत्र मध्यापितास्तत ऋणमोक्षस्य कृतत्वात्सूत्रं न वाचयति

उक्तमाचार्यस्वरूपमिदानीमुपाध्यायस्वरूपमाह-

[भा.१५६] सुत्तत्थतदुभयविऊ उज्जुत्ता नाणदंसणचरित्ते ।
निप्फायगसिस्साणं एरिसिया होंति उवज्झाया ।।

वृ- ये सूत्रार्थ तदुभयविदो ज्ञानदर्शनचारित्रेषूद्युक्तास्तथा शिष्याणां सूत्रवाचनादिना निष्पादका एतादृशा भवन्ति उपाध्यायाः ।। उक्तं च-

संमत्तनाणसंजम, जुत्तोसुत्तत्थतदुभय विहिन्नू ।
आयरियठाणजोग्गो सुत्तं वाएइ उवज्झातो ।।

अथ कस्मात्सूत्रमुपाध्यायो वाचयति तदुच्यते-अनेकगुणसंभावत्तानेवाह-

[भा.१५७] सुत्तत्थेसु थिरत्तं, ऋणमोक्खो आयतीत पडिबंधो ।
पाडिच्छेमोहजओ, तम्हा वाए उवज्झातो ।।

वृ- उपाध्यायः शिष्येभ्यः सूत्रवाचनां प्रयच्छन् स्वयमर्थमपि परिभावयति सूत्रेऽर्थे च तस्य स्थिरत्वमुपजायते । तथान्यस्य सूत्रवाचनाप्रदानेन सूत्रलक्षणस्य ऋणस्य मोक्षःकृतो भवति । तथा आयत्यामागामिनि काले आचार्यपदाध्यासेऽप्रतिबन्धोऽत्यन्ताभ्यस्ततया यथावस्थतया स्वरूपस्य सूत्रस्यानुवर्तनं भवति । तथा पाडिच्छेति येऽन्यतो गच्छान्तरादागत्य साधवस्तत्रोपसम्पदं गृह्णते ते प्रतीच्छका उच्यन्ते । ते च सूत्रवाचनाप्रदानेनानुगृहीता भवन्तीति वाक्यशेषः । तथा मोहजयः कृतो भवति । सूत्रवाचनादानव्यग्रस्य सतः प्रायश्चित्तविश्रोतसिकाया अभावात् । यत एवं गुणास्तस्मा-दुपाध्यायः सूत्रं वाचयेत् । पाठान्तरं 'तम्हा उ गणीउ वाएत्ति' अत्रापि स एवार्थो नवरं गणी उपाध्यायः।

उक्तमुपाध्यायस्वरूपमधुना प्रवर्त्तिस्वरूपमाह-

[भा.१५८] तवनियमविनयगुणनिहि, पवत्तया नाण दंसणचरित्ते ।
संगहुवग्गहकुसला पवत्ति एयारिसा होंति ।।

वृ- तपो द्वादशप्रभेदं नियमा विचित्रा द्रव्याद्यभिग्रहाः । विनयो ज्ञानादिविनयः । तपोनियमविनया एव गुणास्तेषां निधय इव तपोनियमभिनयगुणनिधयस्तेषां प्रवर्त्तकाः । तथा ज्ञानदर्शनचारित्रेषु उद्युक्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सततोपयोगवन्त इति वाक्यशेषः । तथा संग्रहः शिष्याणां सङ्ग्रहणमुपग्रहस्तेषामेव ज्ञानादिषु सीदतामुपष्टम्भकरणं तयोः सङ्ग्रहोपग्रहयोः कुशला एतादृशा एवंरूपाः प्रवर्त्तिनो भवन्ति । यथोचितं प्रशस्तयोगेषु साधुन् प्रवर्त्तयंतीत्येव शीलाः प्रवर्त्तिनः इति व्युत्पत्तेस्तथाचाह-

[भा.९५९] संजम तव नियमेसुं जो जोगो तत्थतं पवत्तेति;
असहूय नियत्तंती, गणतत्तील्लो पवत्तीओ ।।

वृ- तप संयमनियम योगेषु मध्ये यो यत्र योग्यस्तं तत्र प्रवर्तयन्ति असहांश्चासमर्थांश्च निवर्तयन्ति । एवं गणततिप्रवृत्ताः प्रवर्तिनः उक्तं प्रवर्तिस्वरूपमधुना स्थविरस्वरूपमाह-

[भा.९६०] संविग्गो मद्दवितो पियधम्मो नाणदंसणचरित्ते ।
जे अट्ठेपरिहायति सारेंतो तो हवइ थेरो ।।

वृ- यः संविग्नो मोक्षाभिलाषी मार्दवितः संजातमार्दवः प्रियधर्मा एकान्तवल्लभः संयमानुष्ठाने यो ज्ञानदर्शनचारित्रेषु मध्ये यानर्थान् उपादेयान् अनुष्ठानविशेषान् परिहापयति हानिं नयति तान् संस्मारयन् भवति स्थिरः । सीदमानान् साधून् एहिकामुष्मिकापायप्रदर्शनतो मोक्षमार्गे स्थिरी करोतीति स्थविर इति व्युत्पत्तेस्तथा चाह-

[भा.९६१] थिरकरणा पुन थेरो, पवत्ति वायारिएसु अत्थेसु ।
जो जत्थ सीयइ जई, संतबलो तं पचोदेति ।।

वृ- प्रवर्तिव्यापारितेष्वर्थेपु यो यत्र यतिः सीदति सत् विद्यमानं बलं यस्य स सद्बलः तथाभूतः सन् प्रचोदयति प्रकर्षेण शिक्षयति, स स्थिरकरणात् स्थविर इति उक्तं स्थविरस्य स्वरूपम् ।

अधुना गीतार्थस्य स्वरूपमाह-

[भा.९६२] उद्धावणा पहावण खेत्तोवहिमग्गणासु अविसादी ।
सुत्तत्थ तदुभयविऊ गीयत्था एरिसा होंति ।।

वृ- उत्प्राबल्येन धावनमुद्धावनं प्राकृतत्वाच्च स्त्रीत्वनिर्देशः । किमुक्तं भवति ? तथाविधे गच्छे प्रयोजने समुत्पन्ने आचार्येण सन्दिष्टो असन्दिष्टो वा आचार्यान् विज्ञप्य यथैतत्कार्यमहं करिष्यामीति तस्य कार्यस्यात्मानुग्रहबुद्ध्याकरणं उद्धवनं शीघ्रं तस्य कार्यस्य निष्पादनं प्रधावनं क्षेत्रमार्गणा क्षेत्रप्रत्युपेक्षणा उपधि[धे]रुत्पादनं एतासु येऽविषादिनो विषादं न गच्छंति, तथा सूत्रार्थतदुभयविदः अन्यथा हेयोपादेयपरिज्ञानायोगात् ते एतादृशा एवंविधा गीतार्था गणावच्छेदिन इत्यर्थः । एवमाचार्यादिपञ्चकसमेते गच्छे वस्तव्यं यदि पुनः कथञ्चिदपराधप्राप्तो भवति गच्छश्च पञ्चकपरिहीनस्तदायं दृष्टान्तः-

[भा.९६३] जह पंचकपरिहीनं रज्जं डमरभयचोर उव्विग्गं ।
उग्गहिय सगडपिडगं परंपरं वच्चए सामिं ।।

वृ- यथा राज्यं राजादिपञ्चकं परिहीनं सन्तं डमरः स्वदेशोत्थो विप्लवः, भयं परचक्रेण समुत्थं, तस्कराश्चौरास्तैरुद्विग्नमुपगतं परित्यज्य आत्मीयं च शकटपिटकमुद्गृह्य परम्परं स्वामिनं द्राग् व्रजति यत्र स्वास्थ्यं लभते;-

[भा.९६४] इय पञ्चक परिहीने गच्छे आवन्नकारणे साहू ।
आलोयणमलहंतो परंपरं वच्चए सिद्धे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- इति एवमनेन दृष्टान्तप्रकारेण पञ्चकपरिहीने आचार्यादिपञ्चकविरहिते गच्छे तत् प्रायश्चित्तस्थानमापन्नः साधुः कारणेन प्रागुक्ते आयुर्व्याघातादिरूपेण निजाचार्यादीनामन्तिके आलोचनामलभमानः सूत्रोक्त्या नीत्या परम्परमन्यसांभोगिकादिकं तावद्व्रजति यावत्सिद्धान् गच्छति एतदेव सविशेषमाह-

[भा.१६५] आयरिए आलोयण, पंचण्हं असति गच्छे बहिया जो ।
वच्चे चउलहुगा, गीयत्थे होंति चउ गुरुगा ।।

वृ- आचार्ये आचार्यसमीपे आलोचना दातव्या, । गच्छे पञ्चानामाचार्यादीनामसतिगच्छा-द्बहिर्गन्तव्यम् । इयमत्र भावना प्रायश्चित्तस्थानमापन्नेन साधुना नियमतः स्वकीयानामाचार्याणां समीपे आलोचयितव्यम् । तेषामभावे उपाध्यायस्य, तस्याप्यभावे प्रवर्तिनस्तस्याप्यभावे स्थविरस्य, तस्याप्यभावे गणावच्छेदिनः । अथ स्वगच्छे पञ्चानामप्यभावस्ततो बहिरन्यस्मिन् सांभोगिके गन्तव्यम् तत्राप्याचार्यादिक्रमेण आलोचयितव्यम् । सांभोगिकानामाचार्यादीनामभावे संविग्नानामसांभोगिकानां समीपे गन्तव्यम् । तत्रा प्याचार्यादिक्रमेणालोचना प्रदातव्या । यदा पुनरुक्तक्रमोल्लङ्घनेनालोचनां प्रयच्छति । तदा प्रायश्चित्तं चतुर्लघु । तथा चाह-वच्चे चउ लहुगा इति व्यत्यये विपर्यासे उक्तक्रमोल्लङ्घने इत्यर्थः । चत्वारो लघुका लघुमासाः यदि पुनरुक्तक्रममुल्लङ्घयन् अगीतार्थसमीपे आलोचयति । तदा प्रायश्चित्तं चतुर्गुरु एतदेवाह-गीयत्थे होंति चउगुरुगा । तदेवं संविग्नानां सांभोगिकान् यावत् विधिरुक्तः सम्प्रति शेषान् प्रतिविधिमाह-

[भा.१६६] संविग्ने गीयत्थे सरूवी पच्छाकडे य गीयत्थे ।
पडिक्कंते अब्भुट्ठिय असती अन्नत्थ तत्थेव ।।

वृ- संविग्ने अन्यसांभोगिकलक्षणे असति अविद्यमाने पार्श्वस्थस्य गीतार्थस्य समीपे आलोचयितव्यम् । तस्मिन्नपि गीतार्थे पार्श्वस्थे असति सारूपिकस्य वक्ष्यमाण स्वरूपस्य गीतार्थस्य समीपे तस्मिन्नपि सारूपिके असति पश्चात्कृते पश्चात्कृतस्य गीतार्थस्य समीपे आलोचयितव्यम् । एतेषां च मध्ये यस्य पुरत आलोचना दातुमिष्यते । तमभ्युत्थाप्य तदनन्तरंतस्य पुरत आलोचयितव्यम् । अभ्युत्थापनं नाम वन्दनक प्रतीच्छनादिकं प्रत्यभ्युपगमकारापणा । तथा चाह-पडिक्कंते अब्भुट्ठियत्ति अभ्युत्थिते वन्दना प्रतीच्छनादिकं प्रतिकृताभ्युपगमे प्रतिक्रान्तो भूयात् नान्यथा । अथ ते पार्श्वस्थादय आत्मानं हीनगुणं पश्यन्तो नाभ्युत्तिष्ठन्ति । तत आह । असतित्ति असति अविद्यमाने अभ्युत्थाने पार्श्वस्थादीनां निषद्यामारचय्य प्रणाममात्रं कृत्वालोचनीयमितरस्य तु पश्चात्कृतस्य इत्वरसामायिकारोपणं लिङ्गप्रदानं च कृत्वा यथाविधि तदन्तिके आलोचनीयम् । अन्नत्थ तत्थेवत्ति यदि पार्श्वस्थादिकोऽभ्यु-त्तिष्ठिति तदा तेनान्यत्र गन्तव्यं येन प्रवचनलाघवं न भवति । तत्र च गत्वा तमापन्नप्रायश्चित्तं शुद्धतपो वाहयति । मासादिमुत्कर्षतः षण्मासपर्यवसानं यदि वा प्रागुक्त स्वरूपं परिहारतपः अथ स नाभ्युत्तिष्ठति शुद्धं च तपः तेन प्रायश्चित्तं दत्तं ततस्तत्रैव तपो वहति । एतदेव सति इत्यादिकं व्याख्यानयति ।

[भा.१६७] असतीए लिंगकरणं सामाइय इत्तरं किंतिकम्मं ।
तत्थेव य सुद्धतवो गवेसणा जाव सुह दुक्खे ।।

वृ- असति अविद्यमाने पश्चात्कृतस्याभ्युत्थाने गृहस्थत्वात् लिङ्गकरणं इत्वरकालं लिङ्गसमर्पणं तथा इत्वरमित्वरकालं सामायिकमारोपणीयं । ततस्तस्यापि निषद्यामारचय्य कृतिकर्मवन्दनं कृत्वा तत्पुरत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलोचगितव्यं । तदेवमसतीति व्याख्यातमधुना तत्थेवत्ति व्याख्या-यदि पार्श्वस्थादिको नाभ्युत्तिष्ठति शुद्धं च तपस्तेन प्रायश्चित्त तया दत्तं ततस्तत्रैव तत् शुद्धं तपो वहति यावत्तपो वहति तावत्तस्यालोचनाप्रदायिनः सुखदुःखं गवेषयति, सर्वमुदन्तं वहतीत्यर्थः पश्चात्कृतगतमेव विधिमाह-

[भा. ९६८] लिंगकरणं निसेज्जा कितिकम्ममनिच्छतो पणामो य ।
एमेव देवयाए नवरं सामाइयं मोत्तुं ।।

वृ- पश्चात्कृतस्येत्वरकालसामायिकारोपण पुरस्सरमित्वरकालं लिङ्गकरणं रजोहरणसमर्पणं तदनन्तरं निषद्याकरणं । ततः कृतिकर्म वन्दनकं दातव्यम् । अथ स वन्दनकं नेच्छति ततस्तस्य कृतिकर्मा निच्छतः प्रणामो वाचा कायेन च प्रणाममात्रं कर्तव्यं पार्श्वस्थादेरपि कृतिकर्मानिच्छायां प्रणामः कर्तव्यः । एवमेव अनेनैव प्रकारेण देवताया अपि सम्यक्त्व भाविताया: पुरतः आलोचयति । नवरं सामायिकारोपणं लिङ्गसमर्पणं च न कर्तव्यमविरतत्वेन तस्यास्तद्योग्यताया अभावात् ।

यदुक्तं 'गवेषणा जाव सुहदुक्खे' इति तद्व्याख्यानयति-

[भा. ९६९] आहार उवहि सेज्जा एसणामादीसु होइ जइयव्वं ।
अनुमोयण कारावण सिक्खत्ति पयम्मित्तो सुद्धो ।।

वृ- आहारः पिण्ड उपधिपात्रनिर्योगादिः शय्या वसतिरेषणाशब्दः प्रत्येकमभिसम्बध्यते । आहारैषणायामुपध्येषणायां शय्यैपणायामादिशब्दाद्विनयवैयावृत्यादिषु च भवति तेन यतितव्यम् । कथमित्याह-अनुमोदनेन कारापणेन च । किमुक्तं भवति ? यदि तस्यालोचनार्हस्य कश्चिदाहारादीन् उत्पादयति ततस्तस्यानुमोदनाकरणतः प्रोत्साहने यतते अथान्यः कश्चिन्नोत्पादयति ततः स्वयमालोचक आहारादीन् शुद्धानुत्पादयति । अथ शुद्धं नोत्पाद्यते ततः श्राद्धान् प्रोत्साह्याकल्पिकानप्याहारादीन् यतनया उत्पादयतीति । अथाकल्पिकानाहारादीनुत्पादयतः तस्य महती मलिनतोपजायते । अथ च स शुद्धिकरणार्थं तदन्तिकमागतस्ततः परस्पर विरोधः । अत्राह-सिक्खत्ति पयंमितो सुद्धो यद्यपि नाम तस्यालोचनार्हस्यार्थाया कल्पिकानप्याहारादीनुत्पादयति । तथाप्यासेवनाशिक्षा तस्यान्तिके क्रियते । वितियपदे अपवादपदे स तथा वर्त्तमानः शुद्ध एव तदेव भावयति-

[भा. ९७०] चोइय से परिवारं अकरेमाणे भणइ या सड्ढे ।
अव्वोच्छित्ति उ सुयभत्तीए कुणह्यूयं ।।

वृ- प्रथमतः से तस्यालोचनार्हस्य परिवारं वैयावृत्यादिकमकुर्वन्तं चोदयति शिक्षयति । तथा ग्रहणा सेवना शिक्षा निष्णात एष तत एतस्य विनयवैयावृत्यादिकं क्रियमाणं महानिर्जराहेतुरिति । एवमपि शिक्षमाणो यदि न करोति ततस्तस्मिन्नकुर्वाणे स्वयमाहारादीनुत्पादयति । अथ स्वयं शुद्धं प्रायोग्यमाहारादिकं न लभते ततः श्राद्धान् भणति प्रज्ञापयति । प्रज्ञाप्य च तेभ्योऽकल्पिकमपि यतनया सम्पादयति । न च वाच्यं तस्यैवं कुर्वतः कथं न दोषो यत आह-अव्वोच्छित्तीत्यादि । अव्यच्छित्तिकस्य पार्श्वस्थादेः श्रुतभक्तिहेतुभूतया अकल्पिकस्याप्याहारादेः संपादनेन श्रुतभक्त्या पूजां कुरुत यूयं न च तत्र दोष एवमत्रापि । इयमत्र भावना-यथा कारणे पार्श्वस्थादीनां समीपे सूत्रमर्थं च गृह्णानोऽकल्पिकमप्याहारादिकं यतनया तदर्थं प्रतिसेवमानः शुद्धो ग्रहणशिक्षाया क्रियमाणत्वा-देवमालोचनार्हस्यापि निमित्तं प्रतिसेवमानः शुद्ध एव आसेवना शिक्षायाः तत्समीपे क्रियमाणत्वादिति एतदेव स्पष्टतरं भावयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.९७१] दुविहा सती एतेसिं आहारादि करेइ सव्वेसिं ।
पणहानीए जयंतो अत्तट्ठाए वि एमेव ।।

वृ- इह परिवाराभावे तस्यालोचनार्हस्य कर्तव्यमिति ।समाचारी च तेषां पार्श्वस्थादीनां, दुविहा असती इति परिवाराभावो द्विविधः विद्यमानाभावोऽविद्यमानाभावश्च । विद्यमानः सन् अभावोऽसन् वैयावृत्यादेरकरणात् विद्यमानाभावः । अविद्यमानसन्नभावो विद्यमानाभावः । तत्र द्विविधेऽप्यभावे से तस्यालोचनार्हस्याहारादिकं सर्वं कल्पिकमकल्पिकं वा यतनया करोति उत्पादयति । यतनया कथमकल्पिकमुत्पादयति इति चेदत आह-पञ्चकहान्या यतमानः । किमुक्तं भवति ? अपरिपूर्णं मासिकप्रायश्चित्तस्थानप्रतिसेवनापत्तौ गुरुलाघवपर्यालोचनया पञ्चकादि पञ्चकहीनमासिक-प्रायश्चित्तस्थानप्रतिसेवनां करोति । तामपि यतनया पञ्चकग्रहणमुपलक्षणं तेन दशादिहान्यापि यतमान इति द्रष्टव्यम् । एवं सर्वत्र न केवलमालोचनार्हार्थमेवं यतते किन्तु कारणे समुत्पन्ने आत्मार्थमप्येवमेव पञ्चकहान्या यतत इति । यदुक्तं सम्यक्त्वभावितायाः पुरतः आलोचयितव्यमिति तदेतद्भावयति-

[भा.९७२] कोरंटगं जहा भावियङ्मं पुच्छिऊण वा अन्नं ।
असति अरिहंत सिद्धे जाणंतो सुद्धो जा चेव ।।

वृ- कोरण्टकं नाम भरुकच्छे उद्यानं, तत्र भगवान्मुनिसुव्रतस्वाम्यर्हन्नभीक्ष्णं समवसृतस्तत्र तीर्थकरेण गणधरैः च बहूनां बहूनि प्रायश्चितानि च दीयमानानि तत्रत्यता देवतया दृष्टानि ततः कोरण्टकं गत्वा तत्र च सम्यक्त्वभावितदेवताराधनार्थमष्टमं कृत्वा तत्र च सम्यकृकंपिताया देवतायाः पुरतो यथोचितप्रतिपत्तिपुरस्सरमालोचयति । सा च प्रयच्छति यथार्हं प्रायश्चित्तं, । अथ सा देवता कदाचित् च्युता भवेत् पश्चादन्या समुत्पन्ना तया च न दष्टस्तीर्थकरस्ततः साष्टमेनाकंपिता ब्रूतेमहाविदेहे तीर्थकरमापृच्छ्य समागच्छामि । ततः सा नेतानुज्ञाता महाविदेहे गत्वा तीर्थकरं पृच्छति पृष्ट्वा च समागत्यसाधवे प्रायश्चित्तं कथयति यथा च कोरण्टकमुद्यानमुक्तमेवं गुणशिलादिकमपि द्रष्टव्यम् । तत्राप्यभीक्ष्णं वर्धमानसाम्यादीनां समवसरणात् तासामपि देवतानामभावेऽर्हत्प्रतिमानां पुरतः स्वप्रायश्चित्तदानपरिज्ञानकुशल आलोचयति । ततः स्वयमेव प्रतिपद्यते । प्रायश्चित्तं तासामप्यभावे प्राचीनादिगभिमुखोऽर्हतः सिद्धानभिसमीक्ष्य जानन् प्रायश्चित्तदानविधिं विद्वान् आलोचयति । आलोच्य च स्वयमेव प्रतिपद्यते प्रायश्चित्तं । स च तथाप्रतिपद्यमानः शुद्ध एव सूत्रोक्तविधिना प्रवृत्तेः यदपि च विराधितं तत्रापि शुद्धः प्रायश्चित्तप्रतिपत्तेरिति । कोरण्टकं जहेत्यत्र यथाशब्दोपादानात् कोरण्टकसमुद्दिशतानान्यप्युद्यानानि सूचितानीति प्रकटयिपुराह-

[भा.९७३] सोहीकरणा दिट्ठा गुणसिलमादीसु जह य साहूणं ।
तो देंति विसोहीतो पच्चुप्पणाय पुच्छंति ।।

वृ- गुणसिलासूद्यानेषु याभिद्वताभिः साधूना तीर्थकरैर्गणधरैश्चानेकशो विधीयमानानि शोधिकरणानि दृष्टानि, ताः स्वयं ददति प्रयच्छन्ति विशोधीः प्रायश्चित्तानि याः पुनः प्रत्युत्पन्ना देवतास्तो महाविदेहेषु गत्वा तीर्थकरान् पृच्छन्ति पृष्ट्वा च साधुभ्यः कथयन्ति ।।

उद्देशकः -१- समाप्तः

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहार सूत्रे (भद्रबाहुस्वामिरचिता निर्युक्ति युक्तं) संघदास गणि विरचितं भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्देशक : २

वृ- साम्प्रतं द्वितीयआरभ्यते । तस्य चेदमादिसूत्रम्

मू. (३६) *'दो साहम्मिया एगओविहरंति एगंतत्थ अन्नतरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा ठवणिज्जंठवइत्ता करणिज्जं वेयावडियं ।*

वृ. अथास्य सूत्रस्य सम्बन्ध उच्यते-

[भा.१७४] अब्भुठियस्स पासंमि, वहंतो जइ कयाइ आवज्जे ।
अत्थेनेव उ जोगो पढमाओ होति बितियस्स ।।

वृ- योऽसौ पार्श्वस्थादिः प्रायश्चित्ततपो वहनार्थमभ्युत्थितस्य पार्श्वे प्रायश्चित्ततपो वहन् यदि कदाचिद्भूयोऽपि तपोऽर्हं प्रायश्चित्तमापद्यते तदपि नियमादालोचयितव्यमिति तदालोचनानेन प्रतिपाद्यते । एषोऽर्थेनार्थमाश्रित्य प्रथमादुद्देशकादनन्तरस्यास्य द्वितीयस्योद्देशकस्य योगः सम्बन्धः ।। अत्रैव प्रकारान्तरमाह-

[भा.१७५] अहवा एगस्स विहीउ त्तो नेगाण होइ अयमन्नो ।
आइण्णविगडिएवा पठवणा एस संबंधो ।।

वृ- अथवेति सम्बन्ध्य प्रकारान्तरतोपप्रदर्शने पूर्वमेकस्य प्रायश्चित्तदानविधिरुक्तः । साम्प्रतमयमनेकेषामन्यः प्रायश्चित्तदानविधिः । अथवा यदाचीर्णं प्रतिसेवितं तस्मिन् विकटिते आलोचिते प्रस्थापनाप्रायश्चित्तदानं भवति । ततः प्रायश्चित्तदानप्रस्तावादस्य सूत्रस्योपनिपात इत्येष सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-द्वौसाधर्मि कौ संविग्नसांभोगिकादिरूपावेकत एकस्मिन् स्थाने समुदितौ विहरतः । तत्रैकोऽन्यतरत् अकृत्यं स्थानं प्रतिसेव्य आलोचयेत् । तत्र यद्य गीतार्थः प्रतिसेवितवान् । ततस्तस्मै शुद्धतपो दातव्यमथ गीतार्थस्तर्हि यदि परिहारतपो योग्यमापन्नस्ततः परिहारतपो दद्यात् । तदनन्तरं स्थाप्यते विविक्तं कृत्वा प्ररूप्यते इति स्थापनीयं परिहारतपो-योग्यमनुष्ठानं, तत् स्थापयित्वा प्ररूप्य य आपन्नः स परिहारतपः प्रतिपद्यते । इतरः कल्पस्थितो भवति । स एव च तस्यानुपारिहारिकः ततस्तेन तस्य करणीयवैयावृत्यमित्येष सूत्रसंक्षेपार्थः । अधुना निर्युक्तिविस्तरः-

[भा.१७६] दो साहम्मिय छ बारसेव लिंगंमि होइ चउभंगो ।
चत्तारि विहारम्मि उ दुविहो भावम्मि भेदोउ ।।

वृ- द्विशब्दस्य साधर्मिक शब्दस्य च यथाक्रमं षट् द्वादश नामादयो निक्षेपाद्विशब्दस्य षट्कः साधर्मिकशब्दस्य द्वादशको निक्षेप इत्यर्थः लिङ्गे लिङ्गविषये चतुर्भङ्गी भवति । सूत्रे च पुंस्त्वनिर्देशः प्राकृतत्वात् । तथा विहारे चत्वारो नामादयो निक्षेपाः । तत्र भावे द्विविधो भेदः । एष द्वारगाथासंक्षेपार्थः । व्यासार्थं च प्रतिपदमभिधित्सुः प्रथमतो द्विशब्दस्य षट्क निक्षेपमाक्षिपन्नाह-

[भा.१७७] नामं ढवणा दविए खेत्ते काले य होइ बोधव्वो ।
भावेय दुगे एसो निक्खेवो छव्विहो होइ ।।

वृ- नामद्विकं स्थापनाद्विकं द्रव्ये द्रव्यविषयं द्विकं द्रव्यद्विकं, एवं क्षेत्रद्विकं कालद्विकं च भवति बोद्धव्यम् । तथा भावे च भावविषयं च द्विकमेव द्विके द्विशब्दस्य षट्को भवति निक्षेपः । तत्र नामद्विकं द्वे नामनी अथवा यस्य द्विकमिति नामतन् नामद्विकं । स्थापनाद्विकं द्वे स्थापने, द्विकस्य स्थापना वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापना द्विकम् । सम्प्रति द्रव्यक्षेत्रकालद्विकप्रतिपादनार्थमाह-

[भा.१७८] चित्तमचित्तं एक्केक्कयस्य जे जत्तियाउ दुभेया ।
खेत्ते दुपएसादी दुसमयादी उ कालंमि ।।

वृ- द्रव्यद्विकं द्विविधमागमतो नोआगमतश्च । तत्रागमतो द्विकशब्दार्थज्ञाता तत्र चानुपयुक्तः; नोआगमतस्त्रिविधं.-ज्ञशरीर भव्यशरीरतद्व्यतिरिक्तभेदात् । तत्र ज्ञशरीरभव्यशरीरे प्राग्वत् तद्व्यतिरिक्तं सचित्तमचित्तं च एकैकस्य ये यावन्तो द्विकभेदाः सम्भवन्ति ते सर्वे वक्तव्याः । ये चेमे सचित्तं द्रव्यद्विकं द्विधा संसारस्थं निर्वृत्तं च, संसारस्थं द्विधा एकेन्द्रियमनेकेन्द्रियं च । तत्रैकेन्द्रियं पञ्च प्रकारं-पृथिव्यप्तेजोवायुवनस्पति भेदात् । एकैकमपि द्विधा-पर्याप्तमपर्याप्तं च । अनेकेन्द्रियं द्विधा-संख्यातवर्षायुष्कमसंख्यातवर्षायुष्कं च । एकैकं द्विधापर्याप्तमपर्याप्तं च । निर्वृ[वृ]त्तमपि द्विधा-अनन्तरसिद्धं परम्परसिद्धंच । अथवा सचित्तं त्रिविधं । तद्यथा-द्विपदं चतुष्पदमपदं च । तत्र द्विपदं द्वौ पुरुषावित्यादि, चतुष्पदं द्वौ बलीवर्दावित्यादि, अपदं द्वौ वृक्षावित्यादि । अचित्तं द्वौ परमाणू द्वौ द्विप्रदेशिकौ त्रिप्रदेशिकौ यावत् द्वौ संख्यात्प्रदेशिकौ द्वावनन्तप्रदेशिकौ संख्यातस्य संख्याता भेदाः, असंख्यातस्य असंख्याता अनन्तस्य अनन्ताः । उक्तं द्रव्यद्विकमधुना क्षेत्रद्विकमाह-खेत्ते दुपदेसादी क्षेत्रे क्षेत्रविषयं द्विकं द्वौ प्रदेशादि द्वावाकाशप्रदेशावादिशब्दात् द्विप्रदेशावगाढं वा द्रव्यं क्षेत्रद्विकं क्षेत्रद्विके तस्यावस्थानात् । यदि वा द्वे भारते द्वे एरावते इत्यादि परिग्रहः । उक्तं क्षेत्रद्विकं, कालद्विकमाह द्विसमयादिकं द्वौ समयावादि शब्दात् द्वे आवलिके द्वौमुहूर्त्तावित्यादि परिग्रहः । अथवा द्विसमयस्थितिकं द्रव्यं कालद्विकेऽवस्थानात् कालद्विकमादिशब्दात् द्व्यावलिकास्थितिकादिपरिग्रहः ।

उक्तं कालद्विकमधुना भावद्विकमाह-

[भा.१७९] भावे पसत्थमियरं होइपसत्थं तु नाणिणोनाणे ।
केवलि छउमंनाणे नोनाणे दिठिचरणे य ।।

वृ- भावद्विकं द्विधा आगमतो नो आगमतश्च । तत्रागमतो द्विकशब्दार्थज्ञाता तत्र चोपयुक्तः, उपयोगो भावनिक्षेप इति वचनात्, नो आगमतो द्विधा तद्यथा प्रशस्तमितरश्च, इतरन्नामाऽप्रशस्तं । तच्चेदं रागो द्वेषश्च, प्रशस्तं द्विधा-ज्ञानं नोज्ञानं च । तत्र ज्ञाने ज्ञानविषयं द्विकमिदं तद्यथा कैवलिकं छाद्मस्थिकं च । नोज्ञाने नोज्ञानविषयं द्विकं दृष्टिश्चरणं च । दृष्टिः सम्यक्त्वं, चरणं चारित्रम् एतदेव सप्रभेदं प्ररूपयति-

[भा.१८०] एक्केक्कं पि य तिविहं, सठाणे नत्थि खइय अइयारो ।
उवसामिएसु दोसु, अइयारो होज्ज सेसेसु ।।

वृ- एकैकमपि दर्शनं चरणं च प्रत्येकमित्यर्थः । त्रिविधं त्रिप्रकारं । तद्यथा-क्षायिकं औपशमिकं क्षायोपशमिकं च । तत्र क्षायिकं सम्यक्त्वं क्षायिकसम्यग्दृष्टेः । औपशमिकमुपशमश्रेण्याम् । शेषकालं क्षायोपशमिकं, । चरणमपि क्षायिकं क्षपकनिर्ग्रन्थस्य, औपशमिकमुपशमश्रेण्यामन्यदा क्षायोपशमिकम् । तत्र क्षायिके ज्ञाने दर्शने चारित्रे च स्वस्थाने नास्त्यतीचारः, तथा हि केवलिनस्तिष्वपि ज्ञानदर्शनचारित्रेषु क्षायिकेषु वर्तमानस्य न तद्विषया काचिदपि विराधना, परस्थानेषु संभवेदपि, तथाहि श्रुतकेवल्यादेः क्षायिके दर्शने वर्तमानस्य दर्शने नास्ति विराधना ज्ञानचरणयोस्तु भजनेति । उवसामिए वि दोसुंति द्वयोर्दर्शनचरणयोरौपशमिके भावे वर्तमानयोः स्वस्थानेनास्त्यतीचारः । औपशमिकं हि दर्शनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रं च नियमादुपशमश्रे एयां भवति, तत्र कषायाणामुपशान्तत्वान्नास्ति कश्चिदतिचारसंभवः, ज्ञानविराधनात्[तु]सम्भवेदप्यनुपयोगतोऽन्यथा प्ररूपणाचिन्तनादिसम्भवात् । उपशमश्रेणितः पातेतुभवत्यतीचारः औदयिकभावे वर्तमानत्वात्, शेषेषु पुनः क्षायोपशमेषु ज्ञानदर्शनचारित्रेषु स्वस्थाने परस्थाने वातीचारो भवेत् क्षायोपशमिकत्वादेतदेवाह-

[भा.९८१] सठाण परठाणे खउवसमिएसु तीसु वि भयणा ।
दंसण उवसमखतिए परठाणे होइ भयणाउ ।।

वृ- क्षायोपशमिकेभावे वर्तमानेषु त्रिष्वपि ज्ञानादिषु स्वस्थाने वातीचारस्य भजना, कदाचिद्भवति कदाचिन्न भवतीत्यर्थः । दर्शने उपलक्षणमेतत्, चरणे च औपशमिके क्षायिके च स्वस्थानेऽतीचारो न भवति परस्थाने तु भजना । अत्र येन द्विकेनाधिकारस्तदभिधित्सुराह-

[भा.९८२] दव्वदुए दुपएणं सच्चित्तेणं च एत्थ अहियारो ।
मीसेनोदइएणं भावंमि वि होंति दोहिंपि ।।

वृ- अत्र द्रव्यद्विकेन भावद्विकेन चाधिकारः, । तत्र द्रव्यद्विकेन सचित्तेन तेनापि च द्विपदेन साधर्मिकद्वयस्य चिन्त्यमानत्वात् भावे मिश्रेण क्षायोपशमिकेन औदयिकेन चेति द्वाभ्यां भावाभ्यामधिकारः अनयोरेव द्वयोर्भावयोर्वर्तमानस्याती चारसंभवात् । उक्तो द्विकस्य पट्कोनिक्षेपः ।।

सम्प्रति साधर्मिकस्य द्वादशकं निक्षेपमाह-

[भा.९८३] नाम ठवणा दविए खेत्ते कालेय पवयणे लिंगे ।
दंसण नाणं चरित्ते आभिग्गहे भावनाएय ।।

वृ- नामसाधर्मिकः, स्थापनासाधर्मिकः, द्रव्यसाधर्मिकः, क्षेत्रसाधर्मिकः, कालसाधर्मिकः, प्रवचनसाधर्मिकः, लिङ्गसाधर्मिकः, दर्शनसाधर्मिकः, ज्ञानसाधर्मिकः, चारित्रसाधर्मिकः, अभिग्रहसाधर्मिकः, भावनासाधर्मिकः, तत्र नामस्थापनाद्रव्यसाधर्मिक प्रतिपादनार्थमाह-

[भा.९८४] नामंमि सरिसनामो ठवणाए कट्ठकम्ममादीसु ।
दुव्वंमि जोउभविओ साहम्मि सरीरगं चेव ।।

वृ- नाम्नि नामविषये साधर्मिको यत्सदृशनामा यथादेवदत्तो देवदत्तस्य, स्थापना साधर्मिकः काष्टकर्मादिषु स्थाप्यमानो यथा वारकर्षिरादिशब्दात् पुस्तकर्माक्षवराटकादिपरिग्रहः, द्रव्ये द्रव्यरूपतया साधर्मिको यो भव्योभावी । स च त्रिप्रकारः । तद्यथा-एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च । अमीषां च भावना द्रव्यभिक्षुवद्भावनीया । यच्च साधर्मिकशरीरं व्यपगतजीवितं सिद्धशिलातलादिगतं तत् द्रव्यसाधर्मिकः । द्रव्यताचास्य भूतभावत्वात् क्षेत्रकालप्रवचनलिङ्गसाधर्मिकानाह-

[भा.९८५] खेत्तेसमाणदेसी कालम्मिउ एक्ककालसंभूतो ।
पवयणसंघेगयरो लिंगे रयहरणमुहपत्ती ।।

वृ- क्षेत्रे क्षेत्रतः साधर्मिकः समानदेशीय यथा सौराष्ट्रः सौराष्ट्रस्य, काले कालतः साधर्मिकः एककालसम्भूतो यथा वर्षाजातो वर्षाजातस्य, प्रवचनमिति प्रवचनतः साधर्मिकः सङ्घमध्ये एकतरः श्रमणः श्रमणी श्रावकः श्राविका चेति, लिङ्गे लिङ्गतः साधर्मिकः रजोहरणमुहपोत्तित्ति रजोहरणमुखपोति[त्ति]कायुक्तः ।। सम्प्रति दर्शनादिसाधर्मिकानाह-

[भा.९८६] दंसणनाणेचरणे तिगपणतिविह होइ उवरिल्ले ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वादीओ अभिग्गह अह भावणमो अनिच्चाई ।।

वृ- दर्शनतः साधर्मिकः तिगत्ति त्रिविधस्तद्यथा-क्षायिकदर्शनी, औपशमिकदर्शनिनः औपशमिकदर्शनी, क्षायोपशमिकदर्शनिनः क्षायोपशमिकदर्शनी । अन्ये पुनराहुरेवं त्रिविधस्तद्यथा-सम्यग्दृष्टेः सम्यग्दृष्टिर्मिथ्यादृष्टेर्मिथ्यादृष्टिः मिश्रस्य मिश्रः, ज्ञानतः साधर्मिकः पञ्चविधः, तद्यथा-आभिनिबोधिकज्ञानी आभिनिबोधिकज्ञानिनः, एवं श्रुतावधिमनः पर्यायकेवलेष्वपि भावनीयम् । चरणतः साधर्मिकः पन्नत्ति पंच प्रकारः-सामायिकचारित्रिणः सामायिकचारित्री । एवं च्छेदोपस्थापन-परिहारविशुद्धिसम्परायथाख्यातेष्वपि वाच्यम् । तिविहो होइ चरित्ते इति त्रिविधस्त्रिप्रकारो भवति चारित्रे, चारित्रतः साधर्मिकस्तद्यथा-क्षायिकचारित्री क्षायिकचारित्रिण इत्यादि । दव्वादीओ अभिग्गहत्ति-अभिग्रहतः साधर्मिको द्रव्यादौ वेदितव्यस्तद्यथा-द्रव्याभिग्रही द्रव्याभिग्रहिणः । एवं क्षेत्रकालभावेष्वपि वाच्यम् । तुशब्दोऽनुक्तसमुच्चयार्थः । तेन षष्ठादिक्षपणाभिग्रही षष्ठादिक्षपणाभि-ग्राहिणः इत्याद्यपि द्रष्टव्यम्, । भावनातः साधर्मिकोऽनित्यत्वादौ यथा एकोऽप्यनित्यत्वभावनां भावयत्यपरोऽप्यनित्यत्वभावनामित्यनित्यत्वभावना साधर्मिकः । एवं शेषास्वपि भावनासु द्रव्यत्वम्। तदेवमुक्तः साधर्मिकस्य द्वादशको निक्षेपः ।।

सम्प्रति यदुक्तं लिङ्गे भवन्ति भङ्गाश्चत्वार इति तदेतद्व्याचिख्यासुराह-

[भा.९९७] साहम्मिएहिं कहिए लिंगाइ होइ चउभंगो ।
नामंठवणादविए भाव विहारेय चत्तारि ।।

वृ- साधर्मिकेषु कथितेषु सत्सु गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात् लिङ्गादौ प्रवचनादिभिः सह भवति प्रत्येकं चतुर्भङ्गी; गाथायां पुंस्त्वमार्षत्वात् । विहारे च ये चत्वारो भेदाः प्रागुक्तास्ते इमे तद्यथा-नामविहारः स्थापनाविहारो द्रव्यविहारो भावविहारश्च । तत्र लिङ्गादिषु प्रवचनादिभिः सह प्रत्येकं चतुर्भङ्गीमाविर्भावयिषुः प्रथमतो लिङ्गप्रवचनेन चतुर्भङ्गी सूचामाह-

[भा.९९८] लिंगेन उ साहम्मी नोपवयणतो य निण्हगा सव्वे ।
पवयणसाहम्मी पुन न लिंगे दस होंति ससिहागा ।।

वृ- लिङ्गेन रजोहरणादिना साधर्मिको नोनैव प्रवचनत इत्येको भङ्गः, । के ते इत्याह सर्वे निन्हवास्तेषां सङ्घबाह्यत्वात् रजोहरणादिलिङ्गोपेतत्वाच्च, तथा प्रवचनतः साधर्मिको न पुनः लिङ्गे लिङ्गतः एष द्वितीयः के ते एवं भूता इत्याह-दश भवन्ति । सशिखाकाः अमुण्डितशिरस्काः श्रावका इति गम्यते । श्रावका हि दर्शन व्रतादि प्रतिमा भेदेन एकादशविधा भवन्ति । तत्र दश सकेशाः एकादश प्रतिमाःप्रतिपन्नस्तु लुञ्चितशिराः श्रमणभूतो भवति । ततस्तद्व्यवच्छेदाय सशिखाकग्रहणं, एते हि दश शिखाकाः श्रावकाः प्रवचनतः साधर्मिका भवन्ति । तेषां सङ्घान्तर्भूतत्वात् न तु लिङ्गतो रजोहरणादिलिङ्गरहितत्वात् । तृतीयचतुर्थौ तु भङ्गौ सुप्रतीतत्वान्नोक्तौ तौ चेमौ प्रवचनतोऽपि साधर्मिको लिङ्गतोऽपि साधुः एष तृतीयः प्रवचनतो नापि लिङ्गत इति चतुर्थः । एष शून्यो भङ्गः । तदेवं लिङ्गस्य प्रवचनेन सह चतुर्भङ्गिकोक्ता । सम्प्रति दर्शनादिभिः सह चतुर्भङ्गिकाप्रतिपादनार्थमाह-

[भा.९९९] एमेव य लिंगेन उ दंसणमादी उ होंति भंगा उ ।
भइएसु उवरिमेसुं हेठेल्लपदं तु छड्डेज्जा ।।

वृ- एवमेव प्रवचनगतेन प्रकारेण लिङ्गेन सह दर्शनादिषु भङ्गा भवन्ति ज्ञातव्याः । उक्तेषु च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपरितनेषु सर्वेष्वपि भावनापर्यन्तेषु अधस्तनं लिङ्गलक्षणपदं त्यजेत्यक्त्वा च तदनन्तरं द्वितीयपदं गृह्णीयात् । अभिगृह्य च तेनापि सह चतुर्भङ्गिकाः क्रमेण योजयेत् तत्राप्युपरितनेषु सर्वेषु भङ्गेषु तदधस्तनं पदं त्यजेत्: अग्रेतनमनन्तरमाश्रयेत् । तत्राप्ययमेव क्रम एवं तावद्वाच्यं यावदन्तिमपदद्वयचतुर्भङ्गिका इह लिङ्गेन सह दर्शनादिषु भङ्गसूचाकृता । तत्र लिङ्गग्रहणमुपलक्षणं । ततः प्रवचनेनापि सह भङ्गा द्रष्यव्यास्ते चामी-प्रवचनसाधर्मिकोनदर्शनतः एष क्षायिके औपशमिके क्षायोपशमिके वा । उक्तं च-विसरिसदंसणजुत्ता पवयणसाहम्मिया न दंसणतो इति दर्शनतः साधर्मिकोन प्रवचनतस्तीर्थकरः प्रत्येकबुद्धश्च तेषां सङ्घानन्तर्वर्तित्वादाह च-तित्थयरापत्तेया नो पवयणदंसणसाहम्मी, प्रवचनतोऽपि साधर्मिको दर्शनतोऽपि समानदर्शनी सङ्घमध्यवर्तीति, न प्रवचनतो नापि दर्शनत इति चतुर्थः । एष शून्यः । उक्ता प्रवचनेन सह दर्शनस्य चतुर्भङ्गिकाः; । सम्प्रति ज्ञानस्योच्यते, न प्रवचनतः साधर्मिको न ज्ञानत एकोद्विज्ञानि एकस्त्रिज्ञानि चतुर्ज्ञानि केवलज्ञानी वा, ज्ञानतः साधर्मिको न प्रवचनतः तीर्थकरःप्रत्येकबुद्धो वा, प्रवचनतो ज्ञानतोऽपि तृतीयः, न प्रवचनतोऽपि नापि ज्ञानतः इति चतुर्थः। एष शून्यः ।तथा प्रवचनतः साधर्मिको न चारित्रतः श्रावकः, चारित्रतो न प्रवचनतः तीर्थकरप्रत्येकबुद्धो वा प्रवचनतोऽपि चारित्रतोऽपि साधुः, न प्रवचनतो नापि चारित्रतः, एष शून्यः तथा प्रवचनतो नाभिग्रहतः श्रावको यतिर्वा उभयोरप्यन्यान्याभिग्रहयुक्तत्वात्, । अभिग्रहतो न प्रवचनतो निह्नवस्तीर्थकरः प्रत्येकबुद्धो वा उक्तं च,-साहम्मभिग्गहेणं नो पवयणनिण्ह तित्थ पत्तेया इति प्रवचनोऽप्यभिग्रहतोऽपि श्रावको यतिर्वासमानाभिग्रहः न प्रवचनतो नाप्यभिग्रहत इति शून्यः ।तथा प्रवचनतः साधर्मिको न भावनातो भिन्नभावनाकः । श्रावकोर्यतिर्वा, भावनातः साधर्मिको न प्रवचनतः समानभावनाकस्तीर्थकरः प्रत्येकबुद्धो निह्नवो वा, प्रवचनतोऽपि भावनातोऽपि समानभावनाकः श्रावकोयतिर्वा, न प्रवचनतोऽपि न भावनातः । एष शून्यः, । उक्ता प्रवचनेन सह दर्शनादिषु भङ्गा ।

सम्प्रति लिङ्गेन सहोच्यन्ते । लिङ्गतः साधर्मिको न दर्शनतः निह्नवः, दर्शनतः साधर्मिको न लिङ्गतः प्रत्येकबुद्धस्तीर्थकरोवा लिङ्गतोऽपि दर्शनतोऽपि समानदर्शनी साधुः नापि लिङ्गतो नापि दर्शनतः, एष शून्यः । तथालिङ्गतः साधर्मिको न ज्ञानतः । निह्नवो विभिन्नज्ञानी वा साधुः, ज्ञानतो न लिङ्गतः समान-ज्ञानी श्रावकः, प्रत्येकबुद्धस्तीर्थकरो वा लिङ्गतोऽपि ज्ञानतोपि समानज्ञानी साधुः, नलिङ्गतोऽपि नापि ज्ञानतः । एष शून्यः ।; तथा लिङ्गतो न चारित्रतो निह्नवो विषमचारित्री वा साधुः, चारित्रतो न लिङ्गतः प्रत्येकबुद्धस्तीर्थकरो वा, चारित्रतोऽपि लिङ्गतोऽपि समानचारित्री साधुः, न लिङ्गतो नापि चारित्रतः । एष शून्यः । तथा लिङ्गतो नाभिग्रहतः विचित्राभिग्राही साधु निह्नवो वा, अभिग्रहतो न लिङ्गतः, एष शून्यः, । तथा लिङ्गतः साधर्मिको न भावनातः विषमभावनाकः साधुः, न लिङ्गतोऽपि न भावनातः एष शून्यः । तदेवमुक्ता लिङ्गेन सह दर्शनादिषु भङ्गाः सम्प्रति लिङ्गपदं त्यक्त्वा दर्शनपदं गृह्यते । तेन सहज्ञानादिषु उच्यन्ते-दर्शनतः साधर्मिको न ज्ञानतः क्षायिकदर्शनी एकः केवलज्ञानी एको द्विज्ञानीति, ज्ञानतः साधर्मिको न दर्शनतः समानज्ञानी विभिन्नदर्शनी, दशनतोऽपि ज्ञानतोऽपि समानदर्शनज्ञानी, नदर्शनतोनापिज्ञानतः शून्यो भङ्गः । तथा दर्शनतः समानज्ञानी विभिन्नदर्श, दशनतोऽपि ज्ञानतोऽपि समानदर्शनज्ञानी, नदर्शनतोनापिज्ञानतः शून्यो भङ्गः । तथा दर्शनतः साधर्मिको न चारित्रतः समानदर्शनी श्रावकः, चारित्रतो न दर्शनतः समानचारित्री विभिन्नदर्शनी साधुः, । चारित्रतोऽपि दर्शनतोऽपि समानदर्शनी चारित्री साधु, न चारित्रतोऽपि नापि दर्शनतः । एष शून्यः, । तथा दर्शनतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न अभिग्रहतः समानदर्शनी विचित्राभिग्रहः श्रावकः साधुर्वा, अभिग्रहतोनदर्शनतः समानाभिग्रही विचित्रदर्शनतः श्रावकादि, दर्शनतोऽपि अभिग्रहतोऽपि समानदर्शनाभिग्रही श्रावकादि; नदर्शनतो नाप्यभिग्रहतः एषः शून्यः । तथा दर्शनतो न भावनातः समानदर्शनो विचित्रभावनाकः श्रावकादिः, भावनातोनदर्शनतः समानभावनाविचित्रदर्शनः श्रावकादिः, दर्शनतोऽपि भावनातोऽपि समानदर्शनभावनाकः श्रावकादि, न दर्शनतो नापि भावनातः एष शून्यः ।।

तदेवमुक्ता दर्शनेनापि सह ज्ञानादिषु भङ्गाः । अधुना दर्शनपदमपहायज्ञानपदमभिगृह्यते तेन सह चारित्राद्दिषु प्रदर्श्यन्ते ज्ञानतः साधर्मिको न चारित्रतः समानज्ञानो विचित्रचारित्रसाधुः; यदिवा श्रावकः, चारित्रतः साधर्मिको न ज्ञानतः, समानचारित्री एकः केवली एकश्छद्मस्थः, ज्ञानतोऽपि चारित्रतोऽपि समानः ज्ञानचारित्री साधुः, न ज्ञानतोऽपि न चारित्रतोऽपि शून्यः, । तथा ज्ञानतो नाभिग्रहतः समानज्ञानो विचित्राभिग्रहः श्रावकादिः, अभिग्रहतो न ज्ञानतः समानाभिग्रहतः एष शून्यः तथा ज्ञानतो नाभिग्रहतः समानज्ञानो विचित्राभिग्रहः श्रावकादिः, अभिग्रहतो न ज्ञानतः समानाभिग्रहो विचित्रज्ञानी साधुस्तीर्थकरः प्रत्येकबुद्धो वा, ज्ञानतोऽप्यभिग्रहतोऽपि समानज्ञानाभिग्रही साध्वादिः, न ज्ञानतोऽप्यभिग्रहतः एष शून्यः तथा ज्ञानतो न भावनातः समानज्ञानो विचित्रभावनाकः श्रावकादिः, । भावनातो न ज्ञानतः समानभावनो विचित्रज्ञानी श्रावकादिः, ज्ञानतोपि भावनातोऽपि समानज्ञानभावनाकः श्रावकादिर्न ज्ञानतो नापि भावनातः एष शून्यः । उक्ता ज्ञानेन सह चारित्रादिषु भङ्गाः ।। सम्प्रति ज्ञानपदं विमुच्य चारित्रपदं गृहीत्वा तेन सहाभिग्रह भावनयोर्भङ्गा उच्यन्ते-चरणतः साधर्मिको नाभिग्रहतः समानचरणो विचित्राभिग्रहीसाधुः, अभिग्रहतः साधर्मिको न चरणतः श्रावकादिः,चरणतोऽपि अभिग्रहतोऽपि साधुः, न चरणतो नाप्यभिग्रहतः शून्यः । तथा चरणतो न भावनातः विचित्रभावनाकः साधुः, भावनातो न चरणतः श्रावकः समानभावनाकः साधुर्वा विसदृशचरणः, चरणतोऽपिभावनातोऽपि समानचरणभावनाकः साधुः न चरणतोनापिभावनातः शून्य एषः सम्प्रत्यभिग्रहेण सह भावनाया भङ्गाः-अभिगृहतः साधर्मिको न भावनातः, समानाभिग्रही विचित्र भावनाकः श्रावकादि, भावनातः साधर्मिको नाभिग्रहतः विचित्राभिग्रह श्रावकादिः, अभिग्रहतोऽपि भावनातोऽपि समानाभिग्रह भावनाकः श्रावकादिः, नाभिग्रहतो नापि भावनातः एष भङ्ग शून्यः । तदेवमुक्ता भङ्गाः ।। साम्प्रतममीषां भङ्गानां विषयविशेषप्रतिपादनार्थमाह-

[भा.९९०] पत्तेयबुद्धनिण्हग उवासए केवली य आसज्ज ।
खइयाइए य भावे पडुच्च भंगा उ जोएज्जा ।।

वृ- प्रत्येकबुद्धान् निह्नवान् उपासकान् केवलिनश्चाश्रित्य तथा क्षायिकादींश्च भावान् प्रतीत्य आश्रित्य भङ्गकान् अनन्तरोदितान् योजयेत् । तद्यथा-न प्रवचनतः साधर्मिको लिङ्गतः एष भङ्गः प्रत्येकबुद्धान् केवलिनश्च जिनानाश्रित्य योजनीयः । लिङ्गतो न प्रवचनत इत्ययं न्हिवान्, प्रवचनतो न लिङ्गत इत्येष श्रावकान् प्रवचनतो न दर्शनत इत्यादयस्तु क्षायोपशमिकदर्शनज्ञानचारित्रादीनाश्रित्य योजयितव्यास्ते च तथैव यथास्थानं योजिता एवेति सम्प्रति ये विहारे नामादयोऽपि भेदा उक्तास्तान् विपरीषुः पुनः कथयति-

[भा.९९१] नामं ठवणा दविए भावेय चउव्विहो विहारो होइ ।
विविह पगारेहिं रयं हरइ जम्हा विहारो उ ।।

वृ- नामविहारः स्थापनाविहारोद्रव्ये द्रव्यनिमित्तं द्रव्यभूतो विहारो द्रव्यविहारः भावे भावविहारः । एवमेष विहारश्चतुर्विधो भवति, इह च नो आगमतो भावविहारेन गीतार्थेनाधिकारो न शेषैस्तस्तानधिकृत्य व्युत्पत्तिमाह-यस्माद्विविधैरनेकैः प्रकारैः रजः कर्म हरति तस्माद्विहार इत्युच्यते । विविधं ह्रियते रजः कर्मानेनेति विहारोऽकर्तरीति घञिति व्युत्पत्तेः । सम्प्रति नामादिभेदा व्याख्येयास्तत्र यस्य विहार इति नाम स नामविहारः स्थापनाविहारश्चित्तकर्मण्यन्यत्र वा आलिख्यमानः स्थापनाविहारः । द्रव्यविहारो द्विधा आगमतो नोआगमतश्च । तत्रागमतो विहारशब्दार्थज्ञाता तत्र चानुपयुक्तः । नोआगमतस्त्रिधा-ज्ञशरीर भव्यशरीरतद्व्यतिरिक्तभेदात् । तत्र ज्ञशरीर भव्यशरीरे प्राग्वत् । तद्व्यतिरिक्तमाह-

[भा.११२] आहारादीणठा जो उ विहारो अगीय पासत्थे ।
जोयावि अनुवउत्तो, विहरति दव्वविहारो उ ।।

वृ- यो नाम आहारादीनामाहारोपधिप्रभृतीनामर्थायोत्पादनाय अगीतानामगीतार्थानां पार्श्वस्थानां च गाथायां समाहारो द्वन्द्वः । षष्ठीसप्तम्योरर्थं प्रत्यभेदाच्च सप्तम्या निर्देशः । तथा योऽप्यनुपयुक्तः सन् विहरति एष सर्वोऽपि द्रव्ये विहारः आद्यो द्रव्यनिमित्तत्वात् द्रव्यविहारः द्वितीयोऽनुपयुक्तत्वादिति उक्तो द्रव्यविहारः । भावविहारो द्विधा - आगमतो नोआगमतश्च । तत्रागमतो विहारशब्दार्थज्ञाता तत्र चोपयुक्तः नो आगमतो भावविहारो द्विधा - गीतार्थो निश्रितश्च । तथा चाह —

[भा.११३] गीयत्थो य विहारो बीय गीयत्थनिस्सितो होति ।
एत्तो तत्तिय विहारो नाणुन्नातो जिनवरेहिं ।।

वृ- विहारः प्रथमो भवति गीतार्थः गीतार्थसाध्यात्मको द्वितीयो गीतार्थनिश्रितः गीतार्थस्य निश्रा संश्रयणं गीतार्थनिश्रा सा सञ्जातायस्येति पाठान्तरं गीतार्थमिश्रित इति तत्र गीतार्थसंयुक्त इति व्याख्येयं इति । आभ्यां गीतार्थगीतार्थ निश्रिताभ्यामन्यस्तृतीयो विहारो नानुज्ञातो जिनवरेन्द्रैः ।। तत्र गीतार्थ गीतार्थनिश्रितं च विहारमाह-

[भा.११४] जिनकप्पितो उ गीयत्थो, परिहारविसुद्धितो विगीयत्थो ।
गीयत्थे इड्ढीदुगं सेसा गीयत्थनिस्साए ।।

वृ- गीतार्था द्विविधास्तद्यथा-गच्छगता गच्छनिर्गताश्च । तत्र गच्छनिर्गता इमे जिनकल्पिको गीतार्थः परिहार विशुद्धिकोऽपि गीतार्थः । अपि शब्दाद्यथालन्दकल्पिकप्रतिमापन्नोऽपि च गीतार्थः, अमीषां विहारो गीतार्थः, । गच्छवासे गीतार्थे गीतार्थविषये ऋद्धिद्विकं तद्यथा - आचार्य उपाध्यायश्च, । अथवा आचार्यः शेष चतुष्टयमुपाध्यायप्रवृत्तिस्थविरगणावच्छेदिरूपमेतच्च द्विकं स्थानानि निर्युक्तमिति । व्यवह्रियते स्वस्वव्यापारे तेषां निर्युक्तत्वात् शेषाः सर्वे अनियुक्ताः ते यदि गीतार्था यदि वा अगीतार्थाः । सर्वे गीतार्थनिश्रया विहर्तव्यम् । अत्र पर आह-

[भा.११५] चोएइ अगीयत्थे, किं कारण मो निसिज्झइ विहारो ।
सुणदिठंतं चोयग, सिद्धिकरं निह्नवे एसिं ।।

वृ- चोदयति प्रश्नं करोति अगीतार्थे अगीतार्थस्य किं कारणं किं निमित्तं मो इति पादपूरणे निषिध्यते विहारः सूरिराह - हे चोदक! त्रयाणामप्येतेषां गीतार्थागीतार्थनिश्रितागीतार्थानां सिद्धिकरं दृष्टान्तं शृणु । तमेवाह-

[भा.११६] तिविहे संगिल्लंमि जानंतो निस्सिए अजानंते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाणंधिच्छित्तकरणे अडवि जले सावए तेना ।।

वृ- संगिल्लो नाम गोसमुदायस्तस्मिन् रक्षणीये त्रिविधो रक्षके दृष्टान्तः । तद्यथा जानन् निश्रितोऽजानंश्च एषोऽक्षरार्थः । भावार्थस्त्वयम्-एगो रक्खगो नगरस्स गावीणं सो निजेहिं उगासेहिं गावीतो जंतीउ एतीउय खेत्ताईणं अवरोहं न करेंति तेसिं उगासेहिं नेइ आनेइ य जत्थ य तेनाइ भयं नत्थि तत्थ चारेइ, अन्नया दो पुरिसा गाविउ रक्खामित्ति उवठिया । अम्हे भइयाए गावो रक्कामोत्ति नागरगा चिंतंति सो एगो न तरइ सव्वनगरस्स गाविउ रक्खिउं, । तम्हा एएवि निजुञ्जंतु त्ति भणिया रक्खह । तत्थ एगो तस्स पुराणस्स संखेडिपालस्स निस्साए गावी तो नेइ आनेइय, अजानतोति काउं तस्स मएण चंकमइ, बितितो संखेडिपालतो चिंतेइ । अहमन्नस्स निस्साए न चारेमि सयमेव अहं रक्खिउं समत्थो सो वरातो अजानतो इमानि ठाणाणि न याणइ पाणंधीति देशीपदमेतत् वर्तिनी वाचकं ततोऽयमर्थः । क्षेत्र क्षेत्रेषु च शाल्यादय उप्तास्तिष्ठन्ति । गावश्च गच्छन्त्य आगच्छन्त्यश्च रक्षमाणा अपि शाल्यादि चरन्ति, । ततः क्षेत्रस्वामिभिर्गाधृत्वा क्षेत्रोपद्रवमूलं याच्यते । एवं कुरुणेऽपि दोषा वाच्याः । कुरुणं नाम राजकीयमन्यदीयं वावीतं तथा अडवित्ति सो वराकोऽजानन् मा अटवीमपि प्रवेशयति । तत्र पुलिन्दादिभिर्गावो मार्यन्ते, तथा जलत्ति सोऽजानन् नद्यादिषु तत्र प्रदेशे गाः पाययति यत्र ग्राहादिभिर्जलचरैर्गाव आकृष्यन्ते । सावएइति समूढो वराकस्तत्र प्रदेशे नयति । यत्र व्याघ्रादयो दुष्टश्चापदास्तैश्च गाव उपद्रयन्ते तिणंति तेपु च निकुञ्जादिषु नयति यत्र स्तेनानां प्रसरस्ततस्तेनास्ता अपहरन्ति । एवं सोऽजानन् गा विनाशयति इतरस्तु ज्ञाता एतानि सर्वाण्यापत्स्थानानि परिहरति, । योऽपि निश्रितस्तमपि परिहारयति । एष दृष्टान्तोऽपमर्थोपनयः-यो गीतार्थः सर्वानपि दोषान् स्वयं परिहरति । यस्तु निश्रितस्तं परिहारयति । यः पुनः स्वयमगीतार्थो यश्चागीतार्थनिश्रितस्तयोरात्मविराधना संयमविराधना च भवति । तोनवात्मविराधनादिदोषान् विवक्षुर्द्वार गाथामाह-

[भा.११७] मग्गे सेहविहारे, मिच्छत्ते एसणादि विसमे य ।
सोही गिलाणमादी, तेना दुविहावि तिविहा वा ।।

वृ- मार्गे मार्गविषये तथा शैषे शेक्षक कुल विषये एवं विहारे मिथ्यात्वे एषणादौ विपमे शोधौ ग्लानादौ दोषास्तथास्तेना द्विविधास्त्रिविधा वा ये भवन्ति तेभ्योऽपि दोषा भवेयुः । एष द्वारगाथासंक्षेपार्थः साम्प्रतमेनामेव द्वारगाथां विवरीषु प्रथमतो मार्गद्वारं शैक्षद्वारं चाह-

[भा.११८] मग्गं सद्दव रीयइ पाउसउ मग्ग अजयणा एव ।
सेहकुलेसु य विहरति, ननु यत्तति न गाहेति ।।

वृ- मार्गं पन्थानं सेवते सोऽजानन् अगीतार्थः सन् द्रवचारितया रीयते गच्छति, तत्र च संयम विराधना कीटादिसत्वोपमर्दनात्, आत्मविराधना पादादिविस्खलनात् । तथा अज्ञतया पाउसत्ति प्रावृष्यपि काले गच्छति तत्रापि संयमविराधना आत्मविराधना च, तथा मार्गोन्मार्गाभिज्ञतया उन्मार्गेऽपि गच्छति । तत्र स्थाणु कंटकादिभिरात्मविराधना सचित्तपृथिव्याद्युपमर्दनात् संयमबिराधना च, तथा ग्रहणशिक्षायामासेवनाशिक्षायां वाऽप्रवीणत्वात् । अयतनया वा गच्छेत् । अयतनया च संयमात्मविराधना । गतं मार्गद्वारं; शैक्षकद्वारमाह-सेहेत्यादि शैक्षकुलानि अभिनवप्रपन्नव्रतानि धर्माणि कुलानि तेष्वज्ञतया स विहरति । तेभ्योऽयतनया भक्तपानादिकमुत्पादयतीति भावः तथा न तानि अनुवर्तयति नुवर्त्तनागुणतः वर्धमानतरधर्मश्रद्धाकानि करोति । अनुवर्तनाया अपरिज्ञानात् । तथा न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्राहयति तानि ग्रहणशिक्षामासेवनाशिक्षां वा श्रावकधर्मोचितां उभयोरपि शिक्षयोस्तस्याकुशलत्वात्

गतं शैक्षद्वारमधुना विहारद्वारं मिथ्यात्वद्वारं चाह-

[भा.९९९] दसुदेसे पच्चंते, वइयादि विहारपामबहुले य ।
अप्पाणं च परं वा न मुणति मिच्छत्तसंकंतं ।।

वृ- सोऽज्ञतया दस्युदेशे चौरदेशोविहारं करोति यदि वा प्रत्यंतबहुले म्लेच्छाकुले अथवा लुब्धतया व्रजिकादौ आदिशब्दात् स्वजातिकादिकुलपरिग्रहः यदि वा प्राणबहुले जीवसंसक्ते देशे एतेषु यथायोगमात्मविराधना संयमविराधना च भूयसीति, गतं विहारद्वारम् अधुना मिथ्यात्वद्वारमाह-अप्पाणं चेत्यादि स वराको अजानन् आत्मानमपि कुप्ररुपणादिभि र्मिथ्यात्व शङ्कासंक्रान्तं न जानाति, नापि परं ततः आत्मनः परस्य च मिथ्यात्वं प्रवर्तयतीत्युभयेषामपि संसारप्रवर्धकः ।

गतं मिथ्यात्वद्वारमधुना एषणाद्वारमाह-

[भा.१०००] आहार उवहि सेज्ञा, नु मग्ग उप्पायणेसनकडिल्ले ।
लग्गइ अवियाणंतो, दोसे सेएसु सव्वेसु ।।

वृ- आहारो भक्तपानादिरूपः उपधिः कल्पादि लक्षणः शय्या वसतिः एतासांग्रहणे इति गम्यते । किं विशिष्टे इत्याह-उद्गमेन उद्गमदोषैः षोडशभिराधाकर्मप्रभृतिभिरुत्पादनया उत्पादनादोषैर्धात्र्यादिभिः षोडशभिरेषणायागवेषणादिदोषैः शङ्कितम्रक्षितप्रभृतिभिः संयोजनाप्रमाणाङ्गारधूमैः काकशृगालादि भक्षितैश्च । कडिल्ले इति महागहने सति सोऽविजानन् एतेष्वनन्तरोदितेषु दोषेषु सर्वेषु लगति द्वारगाथायामेषणादाविति य आदिशब्दः ससमस्तोद्भमादिदोषपरिग्रहार्थः । तथा विसमे इति विषमे च पर्वतजलादौ या यतना तां स न जानाति अजानंश्चात्मविराधनां संयमविराधनां चाप्नोति।

सम्प्रति शोधिद्वारमाह-

[भा.१००१] मूलगुणे उत्तरगुणे आवन्नस्स य न याणई सोहिं ।
पडिसिद्धेत्ति न कुणति, गिलाणमादीन तेगिच्छं ।।

वृ- मूलगुणविषये उत्तरगुणविषये च प्रायश्चित्तमापन्नस्य यस्य यादृशी यस्मिन्नपराधे दातव्या शोधिस्तस्य तादृशी तस्मिन्नपराधे न जानाति, । अजानानश्चाप्रायश्चित्तेऽपि अतिप्रभूतं प्रायश्चित्तं दद्यादिति महदाशातनाभाक्, गतंशोधिद्वारमधुना ग्लानादि द्वारमाह-पडिसिद्धेत्यादि प्रतिषिद्धा खलु चिकित्सा षट् जीवनिकायविराधनापत्तेरिति वचनमेकान्तेनाङ्गीकुर्वन् ग्लानादीनामादि शब्दः स्वगतानेकभेदसूचक आगाढाऽनागाढसहासहबालतरुणग्लानादीनां चिकित्सां न करोति, । न च तद्विषयां यतनां जानाति, ततश्चिकित्साया यतनायाश्च अकरणे भूयांसो दोषास्ते च प्रागेव प्रथमोद्देशकेऽभिहिताः । सम्प्रति तेना दुविहा वा इति व्याख्यानयति-

[भा.१००२] अप्पसुयत्ति य काउं वुग्गाहेउं हरंति खुड्डादी ।
ते नासपक्खइयरे, सलिंगि गिहि अन्नहा तिविहा ।।

वृ- स्तेना द्विविधाः सपक्षाः परपक्षाश्च, । ततः सपक्षाः द्विविधाः गीतार्थाः पार्श्वस्थादयश्च, तत्र गीतार्था इदं चिन्तयन्ति । अमी अल्पश्रुता अल्पश्रुतत्वाच्चागीतार्था न चागीतार्थानां क्षेत्रमस्ति । तत एवं चिन्तयित्वा तेषां सचित्तादिगीतार्था अपहरन्ति पार्श्वस्थादयः पुनः क्षुल्लकादीन् व्युद्ग्राहयन्ति यथा दुष्कराचर्यामीषां न च दुष्करचर्यायाः सम्प्रतिदेशकालौ तस्मादत्रागच्छतेति । एवं व्युद्ग्राह्य क्षुल्लकादीन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिशब्दात्तरुणादि परिग्रहः अपहरन्ति परपक्षामिथ्यादृष्ट यस्तेऽपि क्षुल्लकादीन् व्युद्ग्राह्य अपहरन्ति, अथवा त्रिविधास्तेनास्तद्यथा स्वलिंगाः पार्श्वस्थादयस्ते पूर्ववत्, गृहिणस्तस्करास्ते उपधि प्रभृतीन पहरंति, अन्येवा स्वलिंगगृहिभ्यो व्यतिरिक्तास्ते च भिक्षुकादयोऽवगंतव्यास्तेक्षुल्लकादीन् व्युद्ग्राह्यापहरंति,

[भा.१००३] एए चेव य ठाणे, गीयत्थो निस्सितो उवज्जेइ ।
भावविहारो एसो दुविहो उ समासतो भणिओ ।।

वृ- एतान्येवानन्तरोदितानि स्थानानि गीतार्थो गीतार्थनिश्रितश्च वर्जयति तत्र गीतार्थः स्वयं कुशलत्वात् गीतार्थनिश्रितस्तु गीतार्थोपदेशेन एष भावविहारो द्विविधो भणितः समासतः संक्षेपेण ।।

[भा.१००४] सोपुन होइ दुविहो, सम्मतकप्पो तहेव असमत्तो ।
तत्थसमत्तोइणमो, जहन्नमुक्कोसतो होइ ।।

वृ- स पुनर्भावविहारो द्विविधोऽपि भूयो द्विविधो भवति । तद्यथा-समात्तकल्पस्तथैवासमात्तोऽसमात्तकल्पः । तत्रायंसमात्तः समात्तकल्पो द्विविधो भवति । तद्यथा-जघन्य उत्कृष्टश्च अनयोरेव प्रमाणमाह-

[भा.१००५] गीयत्थाणं तिण्हं, समत्तकप्पो जहन्नतो होति ।
बत्तीससहस्साइं हवंति उक्कोसओएस ।।

वृ- गीतार्थानां त्रयाणां विहारः समात्तकल्पो जधन्यो भवति । उत्कृष्टस्त्वेष समात्तकल्पो द्वात्रिंशत्सहस्राणि भवन्ति ।

[भा.१००६] तिण्हसमत्तो कप्पो, जहनउ दोनिऊजयाविहरे ।
गीयत्थाणवि लहुओ, अगीएगुरुगा इमे दोसा ।।

वृ- त्रयाणां किल समात्तकल्पो जघन्यो भवति ततो यदा द्वौ विहरतस्तदा द्वयोगीतार्थयोर्विहरतोर्लघुका मासाः प्रायश्चित्तं, अगीतार्थयोश्चत्वारो गुरुका द्वयोश्च विहरतोरिमे वक्ष्यमाणा दोषास्तानेवाह-

[भा.१००७] दोण्हवि विहरंताण सलिंगगिहलिंग अन्नलिंगे य ।
होइ बहुदोस वसही गिलाणमरणे य सल्ले य ।।

वृ- द्वयोर्विहरतोः स्वलिङ्गान्यलिङ्गगृहलिङ्गानधिकृत्य भूयांसो दोषास्तद्यथा-एकोवसतिपाल एको भिक्षार्थं गतस्तत्र यो भिक्षार्थं गतस्तस्य खलिङ्गे संयत्या आलोपादिकं पृच्छन्त्याः आत्मपरोभयसमुत्था दोषाः; । परलिङ्गे चरकादिकाया गृहि लिङ्गे स्त्रियाः प्रोषितभर्तृकादिकायाः । होइ बहुदोसवसहित्ति हिण्डमानाद्वसतिर्बहुदोषा भवतीति किमुकक्तं भवति वसतिपालस्य हिण्डमानापेक्षया भूयांसो दोषाः। एकान्तमिति कृत्वा स्वलिङ्गिन्यादीनामुपपातसम्भवात् प्रदीपनके च लग्ने एकाकी स कथं करोति । अथैते दोषा मा भूवन्निति शून्यां वसतिं कृत्वा निर्गच्छतः । तदानीं वक्ष्यमाणा बहवो दोषास्तद्यथा-द्वयोर्विहरतोर्यद्येको ग्लानो भवति तदा तस्य ग्लानस्य एकाकिनो मोचने पिपासादिसम्भवतस्तथा मरणे मरणकाले शल्यं नोद्धृतमिति । शल्येन तथा च स्थितेसति गरीयांसो दोषाः तत्र द्वयोर्निर्गमने दोषानाह-

[भा.१००८] मिच्छत्तय बहुसुयचारण भडि य मरणं तिरिक्खमनुयाणं ।
आएस वालनिक्कियणे य सुणे भवे दोसा ।।

वृ- उत्सर्गतस्तावदियं समाचारी शून्या वसतिर्न कर्तव्या । यदि पुनस्तौ शून्यां वसतिं कुरुतस्ततस्तयोः प्रत्येकं प्रायश्चित्तं चतुर्लधुतपसा कालेन चउ गुरु उक्तं च-सुत्रं जति वसहि करेंति चउ लहुया दोहिवि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुगा इति, अन्ये च बहवो दोषास्तथा हि-तौ साधूसर्वमात्मीयं भाण्डमादाय शून्यां वसतिं कृत्वा गतौ शय्यातरेण च बहिरागतेन शून्यावसतिर्दृष्टा, ततः स पृच्छति क्व गतौ साधू इति गृहमानुषाणि भणन्ति । न जानीमो नूनं गतौ भविष्यतः, एतत् श्रुत्वा यदि स प्रत्यनीकं करोति यथा यदि गतौ, ततो गताविति तदा तयोः प्रायश्चित्तं चतुर्लघु, तथाऽप्रीतिं करोति यथा अकृतज्ञास्ते निस्त्रेहास्ततोऽनापृच्छ्यागताः, । अथवा निर्दाक्षिण्यास्ते एतमप्युपचारं न जानन्ति । यथा आपृच्छ्य गन्तव्यमिति तदा चतुर्गुरुकास्तथा सोऽप्रीतिकोत्पत्तिवशात्तयोरन्येषां वा साधूनां तद् द्रव्यान्यद्रव्यविच्छेदं कुर्यात्, । ततो भूतैर्भाजनैरागतयोस्तयोः शय्यातरो न स्थानं दद्यात् कोपावेशात् यदि दिवा । निष्काशयति ततश्चतुर्लघु, तैश्च भृतैर्भाजनैरन्यां वसति याचमानयोर्या आगाढादिपरितापनात् एतन्निष्पन्नं चतुर्लघु लोके च गर्होपजायते कुत्सितमाभ्यां किमप्याचरितमन्यथा कथमकाण्ड एवाकृतभोजनौ निष्काशितौ इति । एवं चान्यत्रापि तौ वसतिं न लभतः [लभेते] । ततो वसतिमलभमानौ तावदन्यत्र गच्छतः ततो मासकल्पभेदस्तथा च सति या तत्र विराधना तन्निष्पन्नमपि तयोः प्रायश्चित्तमपि चान्ये साधवो विहारादिनिर्गतास्तत्रागता अन्या च वसति स्तत्र न विद्यते । स च शय्यातरः तत्कृता प्रीतिवशतस्तेषामपि वसतिं न ददाति, ततो यत्ते स्वापदस्तेनादिभिः प्राप्नुवन्ति तं निष्पन्नमपि तयोः प्रायश्चित्तं, एते तावद्दोषा भिक्षामटित्वा तत्क्षणमागतयोरुक्ता, यदि पुनर्बहिर्भुक्त्वा रात्रावागतौ वसति न लभेते । तदा चतुर्लघु.

- वसति विशेषतराश्चगर्हादयो दोषाः, विनाशः स्वापदादिभ्यः, अथवा सम्यग् दृष्टिभूतः सन् पश्चादनापृच्छ्य तौ गतावित्यप्रीतिकोत्पत्तिवशतो मिथ्यात्वं यावत् बडुयत्ति शून्यां वसतिं दृष्ट्वा बटुकैः शय्यातरो याचितो यथा वयमत्र तिष्ठामः शय्यातरः प्राह-श्रमणो तिष्ठतस्तैरुक्तं गतौ तो श्रमणौ शय्यातरो ब्रूते तिष्ठत यदि गतौ श्रमणौ, ते स्थिताः श्रमणावागतौ प्रवेष्टुं प्रवृत्तौ बटुकैर्निरुद्धौ, । ततोऽसंखडमभवत् बटुका ब्रुवते वसतिरियमस्माकं स्वामिना दत्ता । इतरावपि ब्रुतो अस्माकमपि स्वामिना दत्ता । एवं कलहायमानौ साधू शय्यातरसमीपं गतौ स वदति यूयमनापृच्छया शून्यां वसतिं कृत्वा गता मया ज्ञातं यथा यूयं गता येन शून्या कृता वसतिर्दृश्यते । ततो मया बटुकानां प्रदत्ता तस्मात्परस्परं सांमत्येनैकत्र तिष्ठत, न पुनरहमात्मानमलीकं करोमि । तत्र यदि परस्परं सांमत्येन तिष्ठन्ति ततः पठतां प्रतिलेखनां च कुर्वतां संयतभाषाश्च श्रुत्वा ताभिरुपहासं कुर्वन्ति, [क्रियते] । ततः कलहभावतोऽधिकरणदोषः । अथवा शय्यातरः संयतानां भद्रक भद्रक इतितान् बटुकान्निष्काशयेत्ततः संयतप्रयोगवशतोऽनेन दुष्टेन वयं निष्काशिता इति शय्यातरस्य संयतानां च विषयस्तेन प्रयोगतोऽग्निप्रक्षेपादिना वा यमुपद्रवं कुर्वन्ति । तन्निष्पन्नप्रायश्चित्तं तो श्रमणौ प्राप्नुतः । चारणेति एवं चारणेऽपि दोषा वक्तव्याः । नवरमधिकतरा यतस्ते संयतान् प्रपञ्च्य याचित्वा वा यत्तद्गृह्णन्ति । ततस्तैः सह एकत्र सर्वथा न वस्तव्यमेते एव दोषा भटेऽपि यतस्तेपि बटुका इव प्रद्विष्टाः सन्तः शय्यातरस्य संयतानां वा स्तेनप्रयोगतोऽग्निप्रक्षेपादिनावाप्रभूतमुपद्रवं कुर्वन्ति, । । मरणंतिरिक्खमनुयाणमिति शून्यां वसतिमभिसमीक्ष्य गवादिस्तिर्यङ अनाथमनुष्यो वा प्रविश्य म्रियते तं यदि ग्रहस्थैरसंयतैः परिष्ठापयन्ति ततः षट् जीवनिकाय विराधना यदिस्वयं त्यजन्ति ततः प्रवचनस्योड्डाहः कोऽप्येवमाशङ्क्येत एतैरेवायं मारितो लोकेऽपि स्वयं तत्त्यजने महती गर्हा अशुचय एते इति । अथैतद्दोषभयान्न स्वयं त्यजन्ति नापि गृहस्थैस्त्याजयन्ति ततो रुधिरगन्धेन तयोः श्रमणयोर्नाशार्शास्युपजायन्ते, । अथास्वाध्यायिकमिति कृत्वा सूत्रपौरुषीं न कुरुतस्ततो मासलघु अर्थ पौरुषीं न कुरुतो मासगुरु, सूत्र पौरुषीमकुर्वतोः सूत्रं चेन्नश्यति । ततश्चतुर्लघु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पौरुषीमकुर्वतोरर्थनाशे चतुर्गुरु, अवर्णश्च लोके समुच्छलति । यथैते पिशाचमूर्तयः श्मशानेप्रियाः श्मशाने तिष्ठन्तीति, । अदिसत्ति आदेशा नाम प्राघूर्णकास्ते भिक्षागतयोः श्रमणयोः समागताः शय्यातरेण च शून्यां वसतिमुपलभ्य गतौ श्रमणाविति विचिन्त्य सा वसतिस्तेषां दत्ता । ततो यथा बटुकचारणभटेषु दोषा उक्ता स्तथात्रापि द्रष्टव्याः । वालत्तिव्यालो नाम सर्पः स शुन्यं दृष्ट्वा वसतौ प्रविशेत् ततो यद्यागतौ तो श्रमणौ निष्काशयतस्ततो हरितकायमध्येन तस्य गच्छतोऽधिकरणदोषः अन्यस्मिन् गृहे प्रविष्टस्तस्मान् मानुषाणि दशेत् स वा तैर्मार्येत । अथैतद्दोषाभयान्ननिष्काशयतस्ततस्तेन भक्ष्यते । आत्मविराधना निकायणेत्ति शुन्यां वसतिं दृष्ट्वा तिरश्ची अनाथमानुषी वा समागत्य प्रसूते । तत्र यदि तिरश्ची शुनी प्रसूतिका नवप्रसूता निष्काश्यते निष्काशनेन निराश्रया क्रियते तदा सद्यो जातपिल्लकमरणंशुनीभक्षणमात्मविराधना च । अथवा मानुषी प्रसूता तत इयमेतयोरेवेति प्रवचनोड्डाहो निष्काशनेऽधिकरणंलोको ब्रूयान्निरनुकम्पा अभी चेडरूपं वा म्रियते । अथवा सा प्रसूता चेडरूपं त्यक्त्वा व्रजेत्तत्र तस्योज्झने निरनुकम्पा इति गर्हानुष्टम्भे उड्डाह एते शून्यवसतिकरणे दोषाः ।।

सम्प्रति ग्लानस्य एकाकिनो मोचने मरणे च दोषानाह-

[भा.१००९] गेलन्न सुणकरणे खद्धाइयणे गिलाण अनुकंपा ।
साणातिनयन दुगंच्छा तस्सट्ठगुयंभि कालगए ।।

वृ- ग्लानार्थमात्मार्थं वा निर्गमे ग्लानः शून्यो भवेत् । तस्य च ग्लानस्य शून्यस्य क्रणे पिपासा तदनुबुभुक्षा वा यद्यति पिपासितो बुभुक्षितश्च महता शब्देन व्याहरेत् । व्याहारश्रवणाच्च गृहस्था आगच्छेयुस्ते च गृहस्थाः समागता यद्याचते ग्लानः पथ्यमपथ्यं वा तत्सर्वमनुकम्पया ददाति । तत्र पथ्यस्यापथ्यस्य वा खद्धस्य प्रचुरस्य अइयणे इति अदने भक्षणे वमनं भूयात्स च न किमपि कर्तुं समर्थो ग्लानत्वादिति वमनेन मुखहृदयादिकं सर्वं खरण्टयेत् । तं च तथा वमन्तंदृष्ट्वा श्वानः समागत्य तं वम्यमानं भक्षयंति । भक्षयन्तश्च मुखं हृदयादिकं च लिहन्ति । एवं शुनामतियणेत्ति अदने भक्षणे लोके निन्दा जुगुप्सा समुपजायते । यथा-धिगेतेषां धर्मरूपो वा यदित्थमिहलोकेऽपि फलमनुभवन्ति ते इति गतं ग्लानद्वारम् ।। सम्प्रतिमरणद्वारमाह-तस्सठेत्यादि तस्य ग्लानस्यार्थं यद्वैद्यौषधादि समानयनप्रयोजनाय ग्रामान्तरादौ गते यदि स ग्लानः कालगतो भवेत् तदा अमी दोषास्तानेवाह-

[भा.१०१०] गिहिगोणमल्लराउल निवेवणापान कड्ढणुड्डाहे
छक्कायाणविराधन ज्झामिय मुक्के यदा-वन्ने ।

वृ- यदि स ग्लानो मृतः सद् गृहस्थैर्निष्काश्येत यदि वा बलीवदैर्निष्काश्यते अथवा मल्लैः निष्काश्यते यदि वा केनापि राजकुले निवेदना क्रियते यथा एको व्रती अनाथो मृत इति ततो राज्ञा स निष्काश्येत । यदि वा केचित् पाणानां चाण्डालानां मूल्यं दत्वा तैर्निष्काशयेयुरित्थं तस्य ग्लानस्य कर्षणे निष्काशने प्रवचनस्य उड्डाहो मालिन्यं तथा गृहस्थादयोऽयतनया गच्छन्ति ततस्तै र्नीयमानेषन्नां जीवनिकायानां विराधना संघट्टन परितापन अपद्रावणरूपा तथा तथायत्रतस्याग्निसंस्कारः कर्तव्यः । तत्र स्थण्डिलमस्थण्डिलं वेति [न] परिभावयन्ति । ततस्तस्मिन्नस्थण्डिले ध्यामिते [दग्धे]ऽग्निना षट्जीवनीकायविराधना । अथ नाग्निसंस्कारं कुर्वन्ति किन्त्वेवमेव मुञ्चति तथाप्य स्थण्डिले मुक्ते षट्जीवनिकायविराधना । अन्यच्च यदि तस्य ग्लानस्य शरीरं क्वचित् प्रदेशेषु व्यापन्नं कुथितं भवेत् ततस्तस्मिन् व्यापन्ने अयतनया नीयमाने द्वीन्द्रियविराधना अत्रै व च प्रायश्चित्तविधिमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०११] गोणनिवेसणे सु य गुरुगा सेसेसु चउ लहुहुंति ।
उड्डाहुत्ति य काउं निव वज्जेसुं भवे लहुगा ।।

वृ- यदि गृहस्थावलीवर्दाभ्यां निष्काशितवन्तो यदिवा राजा निष्काशितवान् श्वानो वा ग्लानावस्थायां वमने मुखहृदयादिकं लिहन्ति तदा एतेषु स्थानेषु प्रायश्चित्तं प्रत्येकं चत्वारो गुरुका मासा । शेषेषु च सर्वेष्वपि स्थानेषु प्रत्येकं चत्वारो लघुमासा भवन्ति । अथवा राज्ञा निष्काशने चत्वारो गुरुकाः शेषेषु च सर्वेष्वपि स्थानेषु उड्डाहः संवृत्त इति चत्वारो लघुकाः यथाऽयतनया निष्काशने षन्नां जीवनिकायानां संघट्टनपरितापनाऽपद्रावणरूपां विराधनां यच्चास्थण्डिले मोचनं अग्निसंस्कारकरणं वा यावत्कुथिते नीयमाने द्वीन्द्रियविराधना तन्निमित्तं च प्रायश्चित्तमिति ।

[भा.१०१२] बिंतिय मिच्छादिठी कत्तो धम्मोतवोवएसिंतु ।
इहलोए फलमेयं परलोए मंगुलतरागं ।।

वृ- ब्रुवते मिथ्याद्दष्टयः कुतो धर्मस्तपो वा एतेषां नैव कुतश्चिदपीति भावः । तथाहि इहलोके तावत्फलमेतत् । यदित्थं निष्काशनं परलोके एतस्मादपि फलात् फलं मङ्गलतरमशुभतरमिति, तथा-

[भा.१०१३] जइ एरिसाणिपावेंति दिक्खिया किं खु अम्ह दिक्खाए ।
पव्वज्जाभिमुहाणं पुनरावत्ति भवे दुविहा ।।

वृ- यदि दीक्षिता अपि ईद्दशानि विडम्बनानि प्राप्नुवन्ति ततः किमस्माकं खु- निश्चितं दीक्षया नैव तया किञ्चित्प्रयोजनमिति भावः, । एवं प्रव्रज्याभिमुखानां पुनरावृत्तिः पुनः पश्चाद्वलनं द्विविधा द्रव्यतो भावतश्च भवेत् ।। गतं मरणद्वारमधुना शल्यद्वारमाह-

[भा.१०१४] बालेन वि पारद्धे सल्लो वाघातो मरणभीयस्स ।
एवं दुग्गति भीए वाघातो सल्लमोक्खट्ठा ।।

वृ- एगो पुरिसो नगरं पत्थितो अन्नेहिं वारितो । मागच्छं पंथे सप्पो चिठति, सो धाविऊणं खाति, । सो भणाति अहंनस्सीहामि न मे सो सप्पो अम्माहिती । ततो सो चलितो पंथे वच्चतो सप्पेण दिठो । ततो पहावितो सप्पो, सो सिग्घयरं नासेउं पवत्तो । तस्स तहा नस्संतस्य पाए कंटको लग्गो । तेन वाघाएण सप्पेण समेउं खतितो मतो य, ततो यथा तस्य व्यालेन दुष्टेन सर्पेण प्रारब्धजीवितविप्रयोगाय प्रकर्षेण खादितुमारब्धस्य मरणभीतत्वादेन शीघ्रपलायमानस्य शल्यं व्याघाततो व्याहन्यते गमनमनेनेति व्याघातो गमनव्याघातकरणमभवत् । एवं दुर्गतिभीते षष्टीसप्तम्योरर्थं प्रत्यभेदात् दुर्गतिभीतस्य मोक्षार्थं व्रजतः शल्यमपराधलक्षणं मोक्षगमनव्याघातकारि जातम् ततः किमित्याह-

[भा.१०१५] मरिउं ससल्लमरणं संसाराडवि महाकडिल्लंमि ।
सुचिरं भमंति जीवा अनोरपारंमि ओइन्ना ।।

वृ- उक्तप्रकारेण सशल्यं मरणं यथा भवति एवं मृत्वा संसाराटवी महागहने अनर्वाक्पारे अवतीर्णा जीवाः सुचिरमनन्तमपि कालं यावत् भ्रमन्ति अत्रोपसंहारमाह-

[भा.१०१६] जम्हा एते दोसा तम्हा दोण्हं न कप्पति विहारो ।
एवं सुत्तं विफलं इह सफलं निरत्थतो अत्थो ।।

वृ- यस्माद्वयोः विहारे एते अनन्तरोदिता दोषास्तस्मान्न कल्पते द्वयोर्विहारः । अत्र पर आह- नन्वेतत् सूत्रमफलं द्वयोर्विहार स्यैवासंभवात् । अथ सफलं तर्हि द्वयोर्विहारः सूत्रेणानुज्ञात इति योऽयमर्थतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिषिद्धो भवद्भिर्विहारः सोऽर्थो निरर्थकः । सूत्रेणाबाधितत्वात् । आचार्य आह-

[भा.१०१७] मा वय सुत्तनिरत्थं न निरत्थगवाइणो जतो थेरा ।
कारणियं पुन सुत्तं इमे य ते कारणा होंति ।।

वृ- मा वद मा ब्रूहि त्वं चोदक यत् सूत्रं निरर्थकं यतः स्थविरा भगवन्तो निरर्थक वादिनो न भवन्ति तेषां श्रुतकेवलित्वात् । यद्येवमर्थतः प्रतिबिद्धो द्वयोर्विहारोऽथ च सूत्रे प्रतिपादित इति कथमत आह - सूत्रं पुनः कारणेषु भवं कारणैर्निवृत्तं वा कारणिकं कारणान्यधिकृत्य प्रवृत्तमिति भावः ।

तानि च कारणान्यमूनि वक्ष्यमाणलक्षणानि तान्येवाह-

[भा.१०१८] असिवे ओमोयरिए राया संदेसणे जयंता वा ।
अज्जाणगुरुनियोगा पव्वज्जा नातिवग्गदुगे[वे] ।।

वृ- अशिवं क्षुद्रदेवता कृतउपद्रवः । तस्मिन् द्वयोर्विहारः, । तथा अवमौदर्यं दुर्भित्तं तस्मिन् अथवा राजा प्रद्विष्टो भवेत् ततो द्वयोर्विहारः, । संदेसणत्ति आचार्यप्रेषणेन द्वौ विहरेयातां जयंता वा इति यतमाना नाम ज्ञाननिमित्तं दर्शननिमित्तं वा प्रयत्नवन्तः । इयमत्र भावना - विषमशास्त्राणि सम्प्रतिकालगृहितानि च यदि नाभ्यस्तानि क्रियन्ते ततो । विस्मृतिमुपयान्ति । गच्छे च सबालवृद्धाकुले भिक्षाचर्यादिना व्याघातस्तत आचार्यानापृच्छ्य तैर्विसृष्टौ द्वावन्यत्र गच्छेयातां, । एवं दर्शनप्रभावकशास्त्रनिमित्तमपि द्वयोर्विहारो भावनीयः, । आचार्याणां वा एकस्मात्क्षेत्रादन्यस्मिन् क्षेत्रे नयने सङ्घाटस्य गुरुनियोगात् द्वयोर्विहारो भवेत् । यदि वा प्रव्रज्याभिमुखः कोऽपि सञ्जातस्ततस्तस्य स्थिरीकरणार्थं सङ्घाटकप्रेषणं यदि वा ज्ञातिवर्गः स्वजनवर्गः कस्यापि साधोर्वन्दापनीयो जातः ततस्तद्वन्दनार्थं च द्वौ विहरेयातमिति

तत्र यतनामाह-

[भा.१०१९] समयं भिक्खग्गहणं निक्खमणपवेसणं अनुन्नवणं ।
एक्को कहमावन्नो एको य कहं न आवणो ।।

वृ- यो नाम प्रागुक्तकारणवशात् विहृतौ तौ द्वावपि समकं युगवत् भिक्षाग्रहणं कुरुतः, समकं भिक्षानिमित्तं हिण्डते इत्यर्थः । एवं सभकमेव शेषप्रयोजननिमित्तमपि निष्क्रामतो व्रजतः समकमेव च प्रविशतः गत्वा प्रत्यागच्छतः तथा समकमेवानुज्ञापनं कुरुतः । किमुक्तं भवति ? समकमेव नैषेधिक्यादिकं शय्यातरादिकमनुज्ञापयतः तत एकाकिनः सतो ये प्रागुक्ता दोपास्ते प्रायो न सम्भवन्ति । पर आह-यद्येवं समकभिक्षाग्रहणादिकरणं कथमेकः प्रायश्चित्तस्थानमापन्न एको वा कथं नापन्न इति

सूरिराह-

[भा.१०२०] एगस्स खमणभाणस्स धोवणं व हिय इंदियत्थेर्हि ।
एएहिं कारणेहिं आवन्नो वा अणावन्ने ।।

वृ- एकस्य क्षपणमभक्तार्थोऽभवत्; एकेन तु क्षपणं न कृतम् । तत्र यदि क्षपणकारी शक्नोति ततो द्वावपि समकं भिक्षानिमित्तं हिण्डेते । अथ क्षपणकृत् न शक्नोति तत एको भिक्षार्थं गच्छति । एकस्तूपाश्रय एव तिष्ठति । एवं द्वयोरप्येकाकित्वसंभव तथा भाणस्स धोवणंति अथ धावनार्थमुपाश्रयात् बहिर्विनिर्गत एकस्तूपाश्रयस्यैवांतस्तिष्ठिति । एवमेकाकिनौ जातौ ततो यो भिक्षागतो यो वा भाजनप्रक्षालनार्थं बहिर्विनिर्गतो यो वा वसतावविष्ठते स इन्द्रियार्थे रूपरसादिभिरिष्टानिष्टैः समापतितं रागं द्वेषं वा प्रयाति रागद्वेषगमनाच्च प्रायश्चित्तस्थानमापद्यते । तत एवमनन्तरोदितैः कारणैरेकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायश्चित्तस्थानमापन्नो भवत्येकस्त्वनापन्न इति । अथवा यद्यपि नाम भिक्षाग्रहणादिनिमित्तं समकं हिण्डेते यथाप्येक आपद्यते प्रायश्चित्तस्थानमपरो नैव । तथा चाह-

[भा.१०२१] तुल्ले व इंदियत्थे एगो सज्जइ विरज्जई एगो ।
अज्झत्थं तु पमाणं न इंदियत्था जिना बेंति ।।

वृ- तुल्येऽपि समानेऽपि इन्द्रियविषये रूपादौ रागहेतावेको रज्यते रागमुपगच्छति, द्वितीयो विरज्यते विषयपरिणामस्य च दारुणतां भावयन् विरक्तो भवति, । तस्मात्प्रायश्चित्तापत्त्यनापत्तिविषये अध्यात्मनान्तरपरिणामः सप्रमाणं न इन्द्रियार्था इति जिना भगवन्तः सर्वज्ञा ब्रूवते । ततः समकहिण्डनेऽप्येको घटते प्रायश्चित्तमापन्नोऽपरोनेति इतश्च विषया न प्रमाणं यत आह-

[भा.१०२२] मनसा उवेति विसए मनसाविय सान्नियत्तिए तेसु ।
इय विहु अज्झत्थसमो बंधो विसया न उ पमाणं ।।

वृ- इह विषयोपलब्धिव्यतिरेकेणापि मनसा अन्तःकरणेन विषयान् रूपादीन् उपैति अध्यवसतीति भावः, । मनसैव च तेभ्यो विषयेभ्यः सन्निवर्तते विरज्यते इत्यर्थः । इत्यपि एवमपि हु निश्चित-मध्यात्मसमोऽध्यात्मानुरूपः परिणामानुसारी इत्यर्थः बन्धः कर्मबन्धः तस्मान्न विषयाः प्रमाणं तेषु सत्स्वपि केषाञ्चिद्रागद्वेषासंभवात् । तदभावेऽपि च केषांचिन्मनसा तत्संभवादिति ।

[भा.१०२३] एवं खलु आवन्ने तक्खण आलोयणा उ गीयंमि ।
ठवणिज्जं ठवतित्ता वेयावडियं करे बितिओ ।।

वृ- एवमुक्तेन प्रकारेण खलु निश्चितमेकस्मिन् प्रायश्चित्तस्थानमापन्ने तेन तत्क्षणमेव तत्कालमेव गीते गीतार्थस्य पुरत आलोचना दातव्या । तत्र यदि द्वावपि गीतार्थौ विहरतस्ततः स्थापनीयम् प्रागुक्तस्वरूपं स्थापयित्वा यः प्रायश्चित्तस्थानमापन्नः स परिहारतपः प्रतिपद्यते । द्वितीयः कल्पस्थितो भवति स एव चानुपारिहारिक इति तस्य वैयावृत्यंकरोति ।

मू. (३७) *दोसाहम्मियाएगतो विहरंति, दोवितें अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, एकं तत्थ कप्पागं ठावइता एगेणिव्विसेज्जा, अहपंच्छासेविनिविसेज्जा ।*

वृ- द्वौ साधर्मिकावेकत एकत्र स्थाने विहरतस्तौ च द्वावप्यन्यतरदकृत्यं स्थानं प्रतिसेव्य आलोचयेतातां तत्र यदि द्वावपि गीतार्थौ ततस्तत्र तयोर्द्वयोर्मध्ये एकं कल्पस्थितं स्थापयित्वा एको निर्विशेत् परिहारतपः प्रतिपद्यते यश्च कल्पस्थितः स एव चानुपरिहारिको भवत्यन्यस्याभावात्ततः स तस्य वैयावृत्यं करोति अथ परिहारतपः समाप्त्यनन्तर स कल्पस्थितः पश्चान्निर्विशेत् परिहारतपः प्रतिपद्येत इतरस्तु कृतपरिहारतपःकर्मा कल्पस्थितोऽनुपारिहारिकश्च भवति । एष सूत्रार्थः एनमेव सूत्रार्थं भाष्यकृत् सविशेषमाह-

[भा.१०२४] बितिए निव्विसएगो निव्विठेतेन निव्विसे इयरो,
एगंतरं मियगीते दोसुयसगनेयरे सोही ।

वृ- द्वितीये सूत्रे द्वयोरपि गीतार्थयोरन्यतरत् अकृत्यस्थानमापन्नयोरेको निर्विशति परिहारतपः प्रतिपद्यते, द्वितीयः कल्पस्थितोऽनुपारिहारिकश्च भवतीति वाक्यशेषस्ततस्तेन निर्विशिष्टे परिहारतपसि कृते इतरो द्वितीयो निर्विशति कृतपरिहारतपः कर्मानुतस्य कल्पस्थितो अनुपारिहारिकश्चोपजायते । यदि पुनरेकतरो अगीतोऽगीतार्थो भवति ततः शोधिं शुद्धतपः प्रायश्चित्तदानं, । अथ द्वयोरप्यगीतार्थयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सतोः प्रायश्चित्तस्थापनापत्तौ स्वगणे इतरस्मिन् परगणे वा गीतार्थानां मिलित्वा ताभ्यां शोधिं शुद्धतपः प्रतिपद्यते अगीतार्थत्वेन परिहारतपो योग्यताया अभावात् ।

मू. (३८) *बहवे साहम्मिया एगतो विहरंति एगे तत्थ अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, तत्थ ठवणिज्जं च ठवित्ता करणिज्जं वेयावडियं ।*

वृ- बहवः साधर्मिका एकतः एकत्र स्थाने विहरन्ति । तत्र तेषां मध्ये एको गीतार्थोऽन्यतरदकृत्यस्थानं प्रतिसेव्य आलोचयेत् । आलोचनानन्तरं परिहारतपोदाने स्थापनीयं प्रागुक्तस्वरूपं स्थापयित्वा अनुपारिहारिकेण तस्य करणीयं वैयावृत्यमित्येष सूत्रार्थः । एनमेव भाष्यकृत्सविशेषमाह-

[भा.१०२५] एमेव तइयसुत्ते जइ एगो बहुगमज्झे आवज्जे ।
आलोयणगीयत्थे सुद्धे परिहार जह पुव्विं ।।

वृ- एवमेव अनेनैव प्रागुक्तेन प्रकारेण यद्येको बहुषु मध्ये अवतिष्ठमानः प्रायश्चित्तस्थानमापद्ये । ततस्तेन तत्क्षणं गीतार्थे गीतार्थस्य पुरत आलोचना दातव्या । तत्र यदि सोऽगीतार्थो भवति तदा शुद्धं तपस्तस्मै दातव्यम् । अथ गीतार्थस्ततः परिहारतपस्तच्च यथा स्थापनीयं स्थापना पुरस्सरं पूर्वमुक्तं तथात्रापि वक्तव्यमियमत्र भावना-ते बहवे साधर्मिका गीतार्था वा भवेयुः । गीतार्थमिश्रा वा । तत्र गीतार्थमिश्रेषु जघन्येनैको गीतार्थो भवेत् उत्कर्षतो द्वित्रादिकास्तत्र यदि सर्वे गीतार्था यदि वा द्वित्रादिका गीतार्थाः प्राप्यन्ते तदा एकः कल्पस्थितः क्रियते । एकोऽनुपारिहारिकः । अथ सर्वे आचार्या-व्यतिरेकेणागीतार्थास्ततः शुद्धतपोदेयम् । अथाचार्य एव प्रायश्चित स्थानामापन्नस्ततः सोऽन्यत्र गच्छे गत्वा परिहारतपः प्रतिपद्यते । अथ समस्ता अप्याचार्य प्रभृतयोऽगीतार्थास्ततोऽन्यत्र गच्छान्तरे ते सर्वे गत्वा यः प्रायश्चित्तमापन्नः । स शुद्धं तपः प्रतिपद्यते ।

मू. (३९) *बहवे साहम्मिया एगओ विहरंति, सव्वेवि ते अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा एगं तत्थ कप्पगं ठवइत्ता अवसेसा णिव्विसिज्जा अहपच्छा सेवि निव्विसेज्जा ।*

वृ- अथास्य सूत्रस्य कः संबंधः ? उच्यते-

[भा.१०२६] सरिसम्मि असरिसेसु व अवराहपएसु जइगेलत्रे ।
बहुय कयम्मि वि दोसित्ति होइ सुत्तस्स संबंधो ।

वृ- सदृशमपराधपदं नाम यथा सर्वैरपि प्राणतिपातः कृत इति, असदृशान्यपराधपदानि मूलगुणानां प्राणातिपातनिवृत्यादीनां मध्ये किमपि केनाप्यपराद्धं तत्र यदि गणः सदृशेऽपराधे यदि वा असदृशेष्वपराधेषु लगेत् तथापि यथा लोके शतमदंड्यं सहस्त्रमवध्यं तथात्रापि प्रतिपत्तिर्माऽभूत् । किन्तु बहुकैरपि कृतेऽपराधे दोषः । किमुक्तं भवति बहवोऽप्यपराधकारिणो नियमतः प्रायश्चित्तमापद्यन्ते इत्यस्यार्थस्य ख्यापनार्थमिदं सूत्रमित्येष सूत्रस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या । बहवः साधर्मिका एकतो विहरन्ति ते च तथा विहरन्तः सर्वेऽप्यन्यतरत् अकृत्यस्थानं प्रतिसेव्या-लोचयेयुरालोच्य च एकं तत्र कल्पस्थितं कृत्वा अवशेषाः सर्वेऽपि निर्विशन्ति परिहारतपः प्रतिपद्यन्ते इत्यर्थः, ततस्तेषां परिहारतपः समाप्त्यनन्तरं पश्चात्सकल्पस्थितो निर्विशेत् स परिहारतपः प्रतिपद्येतेति भावः । तस्यैकोऽनुपारिहारिको दीयते, एष सूत्रसंक्षेपार्थः । व्यासार्थं तु भाष्यकृदाह-

[भा.१०२७] सव्वे वा गीयत्था मीसा व जहन्न एगो गीयत्थो ।
परिहारिय आलवणा इय भत्तं देन्ताय गेण्हंता ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०२८] लहु गुरुगा सुद्ध तवाणं च होई पन्नवणा ।
अह होंति अगीयत्था अन्नगणे सोहणं कुज्जा ।।

वृ- ते बहवः साधर्मिकाः कदाचित् सर्वेऽपि गीतार्था भवेयुः कदाचिद्गीतार्थमिश्राः तत्र यदि जघन्येनैको गीतार्थः । तत्राचार्यो गीतार्थः, शेषाः सर्वे अगीतार्था इति यः एको गीतार्थः प्रायश्चित्तस्थानमापन्नस्तस्य एवाचार्यः कल्पस्थितः स एव चानुपारिहरिकः यदि पुनर्बहवो गीतार्थाः प्राप्यन्ते, यदि वा सर्वे गीतार्थाः, तत एकं कल्पस्थितं कृत्वा बहवः पारिहारिका भवंति, तेषां च पारिहारिकाणामनुपारिहारिका भवंति, तेषां च पारिहारिकाणामनुपारिहारिकाः कर्त्तव्याः पारिहारिकैश्च परिहार तपसिव्यूढेनुपारिहारिकाः परिहारतपःप्रतिद्यन्ते कृतपरिहारतपः कर्माणस्तु तेषामनुपारिहारिका भवन्ति । कल्पस्थितोऽपि परिहारतपो वहति, तस्याप्यनुपारिहारिक एको दातव्यः, । यदि पुनराचार्यः परिहारतपो योग्यं प्रायश्चित्तस्थानमापन्नो भवति । शेषास्तु सर्वेऽप्यगीतार्थास्ततः सोऽन्यगणं गत्वा परिहारतपः प्रतिपद्यते, । परिहारिकस्य यदि शेषाः साधव आलापनादिकं कुर्वन्ति आदिशब्दात्सूत्रवाचनादिपरिग्रहः ततस्तेपां प्रायश्चित्तं लघवः; । अथ भक्तं ददति तदा चत्वारो गुरवः । तथा पारिहारिकाद्भक्तं गृह्णन्ति तदा चत्वारो लघवः; यदिपारिहारिक एवालापनादिकं करोति भक्तं वा ददाति गृह्णाति वा तदा सर्वत्र प्रत्येकं चत्वारो गुरवः । ये पुनरगीतार्थास्तेभ्यः शुद्धतपो दातव्यमगीतार्थतया तेषां परिहारतपो योग्यत्वाभावात् अथ कीदृशाः परिहारतपोऽर्हाः कीदृशाश्च शुद्धतपो योग्या इति शिष्यप्रश्नावकाशमाशङ्कय शुद्धतपोयोग्यानां च शब्दात् परिहारतपो योग्यानां च प्रज्ञापनाप्ररूपणा कर्त्तव्या । अत्रापि तत्प्ररूपणायाः स्थानत्वात् सा च प्रागेव कृतेति न भूयः क्रियते । अथ सर्वेऽप्यगीतार्था भवेयुस्ततस्ते अन्यस्मिन् गणे गत्वा शोधनं कुर्युरालोचनां दत्वा शुद्धतपः प्रतिपद्येरन्निति भावः

मू. (४०) *परिहारकप्पट्ठिते भिक्खूगिलायमाणे अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, सेय संथरेज्जा ठवणिज्जं ठवइत्ता करणिज्जं वेयावडियं । सेय नो संथरेज्जा अनुपारिहारित्रं करणिज्ज वेयावडियं, सेयसंतेबले अनुपारिहारिणं कीरमाणं वेयावडियं साइज्जेज्जा, सेयकसिणे तत्थेव आरुहेयव्वेसिया ।*

वृ- 'परिहारकप्पठिए भिक्खूगिलायमाणे' इत्यादि सूत्र परिहारकल्पस्थितो भिक्षुर्ग्लायन् ग्लानिमुपागच्छन् । अन्यतरदकृत्यस्थानं प्रतिसेव्य आलोचयेत् । स च तेनाकृत्य प्रतिसेवनेन संस्तरेत् परिहारतपोवहने समर्थो भवेत् ततः स्थापनीयं स्थापयित्वा अनुपारिहारिकस्तस्य स्थापयितव्यस्तेन तस्य करणीयं वैयावृत्त्यमिति 'सेय न संथरेज्ञा' इत्यादि सोऽधिकृतः पारिहारिको ग्लानयन्नकृत्यप्रतिसेवनेनापि संस्तारयेत् । न परिहारतपो योग्यमनुष्ठानं विद्यातुमलं स्ततः तस्यानुपारिहारिकेण वैयावृत्यकरणीयं च थाकरणीयं तथा भाष्यकृद्दर्शयिष्यति । यदि पुनः सत्यपि बलेऽनुपारिहारिकेण क्रियमाणं वैयावृत्यं साइज्जेज्जति स्वादयेत् अनुमन्येत, तदपि प्रायश्चित्तं कृत्स्नं अत्रैव उह्यमाने परिहारतपसि अनुग्रहकृत्स्नेनारोपयितव्यं स्यादिति सूत्रसंक्षेपार्थः । व्यासार्थं तु भाष्यकृत्प्रतिपादयति-

[भा.१०२९] परिहारयाहिगारं अनुवंत्तते अयंविसेसो उ ।
आवन्नदान संथरमसंथरे चेव नाणत्तं ।।

वृ- पारिहारिके प्रकृते ऽनुवर्तमाने अयं वक्ष्यमाणलक्षणो विशेषः पारिहारिकविधिगत आभ्यां सूत्राभ्यां अभिधीयते । को विशेषइत्यत आह-आवन्नदाणसंथरेत्ति परिहारतपः प्रायश्चित्तमापन्नस्य परिहारतपोदाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृते सति तद्वहतो ग्लानिमुपगतस्य अन्यतरदकृत्यस्थानं प्रतिसेव्यते न संस्तरतः प्रथमसूत्रेणविधि-रभिधीयते । द्वितीयसूत्रेण पुनस्तेनाप्यसंस्तरत इति सूत्रद्वयस्य परस्परं पूर्वानन्तरसूत्राच्च नानात्वं विशेष इति अत्र पर आह-

[भा.१०३०] उभयबले परियागं सुत्तत्थाभिग्गहे य वणेत्ता ।
न हु जुज्जइ वोत्तुं जे जं तदवत्थोवि आवज्जे ।।

वृ- ननु तस्य पारिहारिकस्य पूर्वमुभयं धृतिसंहननरूपं बलं वर्णितं पर्यायश्च गृहियतिपर्यायरूप उभयतो वर्णितः सूत्रार्थावपि तस्य यावत्प्रमाणौ भवतस्तावत् प्रमाणौ वर्णितावभिग्रहा अपि च तस्य क्षेत्रादिविषयाः पूर्वमभ्यस्ता व्यावर्णितास्ततउभयबलमुभयं पर्यायं सूत्रार्थावभिग्रहांश्च वर्णयित्वा न हु नैव युष्माकं युज्यते वक्तुं जे इति पादपूरणे यत्तदवस्थो पिपरिहारतपः प्रतिपन्नोऽप्यापद्यते प्रायश्चित्तस्थानमितिउभयबलयुक्तस्यभूयः प्रायश्चित्तस्थापनापत्तिसम्भवाभावादत्र सूरिराह-

[भा.१०३१] दोहि वि गिलायमाणे पडिसेवंते मएण दिठंतो ।
आलोयणा अफरिसे जोहे व सहे य दिठंते ।।

वृ- द्वाभ्यामाद्याभ्यां परीपहाभ्यां क्षुत्पिपासा लक्षणाभ्यां ग्लायन् ग्लानिमुपगच्छन् गुरुलाधवचिन्तया अनेषणादिकमपि प्रतिसेवेत तस्मिंश्च तथा प्रतिसेवमाने दृष्टान्तो मृगेण वेदितव्यः । स च तथा प्रतिसेव्यालोचयेत् । आलोचनायां च तेन दीयमानायां अपरुषं भाषणीयं । यदि पुनः पुरुषं भाषन्ते प्रायश्चित्तं चत्वारो गुरुका मासा आज्ञा अनवस्था मिथ्यात्वविराधनाश्च दोषाः । अत्रार्थे योधान् दृष्टान्ती कुर्याद्यदि वा वृषभेण दृष्टान्तः कर्त्तव्य इति । तत्र मृगदृष्टान्तोऽयम्- एगो मिगो गिम्हकाले संपत्ते तन्हाए अभिभूतो पाणियत्थाणं गतो पासति । कोदंडकं धरियहत्थं वाहं ततो मिगो इमं चिंतेइ । जइ न पियामि तो खिप्पं मरिहामि, पीतेसुहेण मरिहा[ज्ञा]मि अवि य पीए कयाइ वलियत्तणगुणेण पलाइज्ञांवि एवं चिंतिऊणं सो अन्नेण उगासेणं खिप्पं पानियं पाउं लग्गो । जाव सो वाहंतं उगासं पावति ताव कइवि पोटे [घोट्टे] करित्ता पलातो । एवं सो विपारिहारितो चिंतेइ 'जइ न पडिसेवामि तो मरामि; अवूढं च पायच्छित्ते अन्नमवि कम्मनिज्ञरणं न काहामि पडिसेविए पुन पच्छित्तं च अवूढं च वहिस्सामि अन्नं च कम्मंनिज्ञरणं चिरं जीवंतो करिस्सामि । लवसत्तमदेवदिठंतेनं कयाइ सिज्ञेहामि विज्जुतवेयंजतो भणियं-

[भा.१०३२] अप्पेण बहु मे सेज्जा एवं पंडियलक्खणं ।
सव्वासु पडिसेवासु एयं अठावयं विद् ।।

वृ- अत्रोत्तरार्धाक्षरगमनिका-सर्वासु प्रतिसेवनासु एतदनन्तरोदितमल्पेन बह्वेषणामर्थपदं सार्थकमपवादपं विदुर्जानन्ति पूर्वमहर्षयः एनमेव मृगदृष्टान्तं भावयति-

[भा.१०३३] गिम्हे समोक्खिएसु दट्ठुं वाहम्मतो जलोयारो ।
चिंतेइ जह न पाहं तोयं तोमे ध्रुवं मरणं ।।

[भा.१०३४] पाउं मरिउं पि सुहं कयाइ वि सचिठतो पलाएज्जा ।
इति चिंतेउं पाउं नोल्लेउं तो गतो वाहं ।।

वृ- ग्रीष्मे ग्रीष्मकाले स मृगोजलावतारे गतो व्याधं मोक्षितेषु मोक्षितो मोक्तुमिष्ट इषुर्बाणो येन स तथा तं दृष्ट्वा चिन्तयति । यदि न पास्यामि तोयं जलं ततो मे ध्रुवं मरणं, अपि च पानीयं पीत्वा मर्तुमपि मे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखं तथा कदाचित्पानीयपानेन सचेष्टाकः सन् पलाययमपि इति चिन्तयित्वा इति पानीय-मन्यस्मिन्नवकाशे पीत्वा वेगबलेन व्याधं नुदित्वा प्रेर्य गतो मृगः स्वस्थानमुक्तो मृगदृष्टान्तः ।

सम्प्रति दार्ष्टान्तिक योजनामाह-

[भा.१०३५] मिग सामाणो साहू दगपानसमा अकप्पपडिसेवा ।
वाहोवमो य बंधो सेविय पीतं पणोल्लेइ ।।

वृ- मृगसमानो मृगसदृशः साधुरुदकपानसमा उदकाभ्यवहारसमा अकल्पप्रतिसेवा, व्याधोपमो व्याधस्थानीयो बन्धः कर्मबन्धः । तं कर्मबन्धमकल्पं प्रतिसेव्य मृग इव पानीयं पीत्वा व्याधं प्रनुदति प्रेरयति ।। सम्प्रति आलोचनाया अपरुषभाषणे यो योधदृष्टान्त उपन्यस्तः स भाव्यते एगो राया, सो परबलेणं अभिभूतो, तेन जोह संदिट्ठा जुज्झह । ते जुज्झंता परबलेन पहारेहिं परिताविया भग्गा । ततो आगया अप्पनिज्ञगस्य रन्नो पायमूलं तेन वायासरेहिं तज्जिया तुब्भे ममवित्तिं खाइत्ता किं पहाराणां भीया पडिआ गता, ताहे ते जोहा परबलमभिभविउ मसमत्या इमं चिंतंति । जुज्झंताण आउहपहारेणं भग्गाणं पडिआ गयाणंवायासरपहारा बंधनमरणादीणि विसेसंति कीस अप्पा न परियत्तोत्ति चिंतेऊणं तेहिं जोधेहिं राया बंधिउं परबलरन्नो दिन्नो । एनमेवार्थमाह-

[भा.१०३६] परबलपहारचइया वायासरतो इया य ते पहुणा ।
परपच्चूहासत्ता तस्सेव हवंति घायाय ।।

वृ- योधाः परबलकृतैः प्रहारैस्त्याजिताः सङ्ग्रामाध्यवसायं मोचितास्तः प्रत्यागताः सन्तस्ते स्वकीयेन राज्ञा वाक्शरैस्तोदिताः अतिशयेन पीडिताः परप्रत्यूहाशक्ताः परबलप्रतिक्षेपं कर्तुमसमर्था स्तस्यैवात्मीयस्य राज्ञो व्याघाताय भवन्ति । अन्नो राया परबलेनाभिभूतो तहेव जोहे पेसेइ परबलपहारेहिं भग्गे पडिआगते प्रोत्साहयति कथमित्याह-

[भा.१०३७] नामेण य गोत्तेण य पसंसया चेव पुव्वकम्मेहिं ।
भग्गवन्निया वि जोहा जिणंति सत्तुं उदिन्नंपि ।।

वृ- ते योधाः प्रत्यागताः सन्तः तेन राज्ञा नाम्ना अभिधानेन गोत्रेणान्वयेन तथा पूर्वकर्मभिः पूर्वकृतिरनेकैः संविधानकैः प्रशंसिताः सम्यक्स्तुतास्ततस्यता प्रशंसया उत्कर्षं ग्राहिता सन्तो भग्नव्रणिताः सन्तो भग्नाभग्नव्रणिता राजदण्डादि दर्शनाद्भग्नशब्दस्य पूर्वं निपातः । तथा भूता अपि उदीर्णमपि प्रबलमपि शत्रुंजयन्ति । उक्तो योधदृष्टान्तः । सम्प्रति दार्ष्टान्तिकयोजनामाह-

[भा.१०३८] इय आउर पडिसेवंत चोदितो अहव तं निकायंतो ।
लिंगारोवनाघायं करेज्जघायं च कलहं वा ।।

वृ- इति एवं योधगतेन प्रकारेणतुरः प्रथम द्वितीयपरीसहेनाभिभूतत्वेनाकुलीभूतोऽनेषणादि प्रतिसेवमानः सन् चोदितोऽथवा प्रतिसेवितं निकाचयन् आलोचयन् चोदितो यथा हे निधर्मन् किमीदृशं त्वया कृतमित्यादि । स च तथा परुषभाषणेन रोषं ग्राहितः सन् तां प्रति चोदनामसहमानो लिङ्गस्य वा रजोहरणमुखवस्त्रिकारूपस्य आरोपणस्य वा प्रायश्चित्तस्य त्यागं कुर्यात् । यदि वा घातं चोदकस्य कुर्यात्, घातग्रहणमुपलक्षणं, पिट्टणं वा लकुटादिभिर्जीविताद्व्यपरोपणं वा कुर्यात् कलहं वा राटिरूपं विदध्यात् कोपावेशतः सर्वस्याप्यकृत्यसंभवात्; सम्प्रति वृषभदृष्टान्त उच्यते-केदारेसु सालीवाविता तेयकेयाराविती ए परिक्खित्ताकया तेसिं एक्कं बारं कयं । अन्नाया तेन बारेण वसभो पविट्ठो, केयारेसु

साली चरइ केयारसाभी आगतो । तं वसभं पविठं पासिऊणं तं बार ढिक्कयं । ततो सरमादीहिं तं वसभं परितावेति । ताहे तेनं परिताविएणं इमं कयं ।

[भा.१०३९] जंपि न चिन्नंतं तेन चमढियं पेल्लियं वसहराए ।
केयारेक्कदुवारे पोयालेणं निरुद्धेणं ।।

वृ- केदारसक्ते एकस्मिन् द्वारे सति तेन द्वारस्थगनतो निरुद्धेन पोयालेन सांढवृषभेन यदपरेषु केदारेषु न चीर्णं तदपि शरादिभिः परिताप्यमानेन इतस्ततः परिभ्रमता चमढियंति विनाशितं पेल्लियं चेति पातितं शीघ्रं । एष दृष्टान्तोऽपि थोंपनयः-

[भा.१०४०] तनुयंमिपि अवराहे कयंमि अनुवाय चोइएणं तं ।
सेसचरणं पि मिलियं अपसत्थपसत्थ बिइयंतु ।।

वृ- एवं वृषभदृष्टान्तगतेन प्रकारेण स्तोकेऽप्यपराधे कृते अनुपायेन उपायाभावेन यश्चोदितस्तेनानुपायश्चोदितेनाधिकृतप्रतिसेवनातः शेषं यच्चारित्रमवतिष्ठते तदपि लिङ्गत्यागादिना मलिनं क्रियते । इदमप्रशस्तमुदाहरणम्, द्वितीयंतूदाहरणं प्रशस्तं, तच्चेदम्-अन्नो केयारसामी, वसमं पासिऊणं दुवारस्स एगपासेठिच्चासद्दं करेति । ततो सो वसभो भीतो तेन दुवारेण निप्फडत्ति निप्फडंतो य लेढुमादीहिं आहतो । एवं तस्स खेत्तमलणादिया पुव्वुत्ता दोसा न जाया । एवं आयरिएण वि सो उववाएण चोएयव्वो जहा न रुसति । ततो पुव्वुत्तो एगो वि दोसो न संभवति । व्याख्यातं प्रथमं सूत्रमधुना द्वितीयं व्याचिख्यासुः प्रथमतः सूत्रेण सह सम्बन्धमाह-

[भा.१०४१] तेने व सेविएणं असंथरंतो वि संथरो जातो ।
बितितो पुन सेवंतो अकप्पियं नेव संथरंति ।।

वृ- अनन्तरसूत्राभिहितोऽसंस्तरन्नपि तेनैव प्रागुक्तेनाकल्पिकेन सेवितेन प्रतिसेवितेन संस्तरो विवक्षितानुष्ठानवहनसमर्थो जातः द्वितीयः पुनरधिकृतसूत्रोक्तो अकल्पिकमपि प्रतिसेवमानो नैवं संस्तरति । नैवाधिकृतानुष्ठानवहन समर्थ उपजायते । ततोऽसंस्तरतो विधि ख्यापनार्थमधिकृत सूत्रारम्भः।

[भा.१०४२] एमेव य बीयसुत्तेण नाणत्तं नवरं असंथरं तंमि ।
करणं अनुपरिहारी चोयगगोणीए दिठंतो ।।

वृ- यता प्रागुक्तसूत्रेऽभिहितमुभयबलं परियागमित्यादि एमेव अनेनैव प्रकारेणास्मिन्नप्यधिकृते द्वितीये सूत्रे वक्तव्यं । नवरमत्र नानात्वमिदमसंस्तरति अकल्पिकप्रतिसेवनेनापि संस्तरणमप्राप्नुवति करणमनुपरिहारिणः यन्न शक्नोति परिहारिकः कर्तुं तद्भणितः सन् करोत्यनुपरिहारिक इति भावः । चोयगगोणीए दिठंतो इति पश्चाद्व्याख्येयम् । सम्प्रति यदनुपरिहारिणा कर्तव्यं तदाह-

[भा.१०४३] पेहा भिक्खवग्गहणे उट्ठंतनिवेसणे य धुवणेय ।
जं जं न तरइ काउं, तं तं से करेइ बितिओउ ।।

वृ- प्रेक्षाया भिक्षाग्रहणे उत्तिष्ठति उत्थानं कर्तुमारभमाणो निवेशने चानुपरिहारिणः करणं भवतीति शेषः । इयमत्र भावना-यदि परिहारिको भाण्डं प्रत्युपेक्षितुं न शक्नोति ततोऽनुपारिहारिकं ब्रूते प्रत्युपेक्षस्वेदं भाण्डकमिति, । ततो अभिधत्ते भिक्षामट; ततो भिक्षामटित्वा ददाति, । एवमुत्थानं यदि कर्तुं न शक्तस्तत उत्थापयति । उपवेष्टुमशक्तमुपवेशयति लेपकृदादिना खरंटितं पात्रबन्धादि यदि प्रक्षालयितुमशक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तदातदपि प्रक्षालयति, । अत्र चोयगगोणीए दिट्ठंतो इत्यस्यावकाशः । चोदकः प्राह यदि नाम तस्यानु परिहारिणा कर्तव्यं ततः किमुक्तमेव करोति सर्वं कस्मान्न कुरुते तथाहि यथा भिक्षाहिण्डनार्थ-मुत्थातुमशक्नुवता परिहारिकेणोक्ते मामुत्थापयेति तमनुपारिहारिक उत्थापयति । तथा भिक्षामटित्वा कस्माद्भक्तमानेतुं न ददाति यथा वा भणितः सन् भिक्षामटित्वा भिक्षामानेतुं तस्मै प्रयच्छति, तथा भाण्डप्रत्युपेक्षणादिकमप्यभणित एव कस्मान्न करोति । सूरिराह-गोण्यात्र दृष्टान्तः । यथाकस्यापि गौर्वातादिना भग्नशरीरा मुपविष्टामुत्थातुमशक्नुवन्तीं पुच्छे गृहीत्वा गोनायक उत्थापयति । सा चोत्थिता सती स्वयमेव चारिं चरितुं याति । यदि पुनरसमर्था चारि चरणाय गंतु तदा चारिं पानीयं चानीय ददाति । एवं च तावत्करोति यावद्बलिष्टोपजायते । एवं च पारिहारिकोऽपि यत्कर्तुं न शक्नोति तत्तत् से तस्य द्वितीयोऽनुपारिहारिकः करोति । यत्पुनः कर्तुमलं तत्स्वयमेवानिगूहित बलवीर्यः करोति । एवं नाम तेनवीर्याचारोऽनुचीर्णो भवति ।

सम्प्रति यदुक्तमण्ड परिहारिणं कीरमाणं वेयावच्चं जं साएज्जति तत्र साइज्जणामाह-

[भा.१०४४] जंसे अनुपरिहारी करेइ तं जइ बलंमि संतंमि ।
ननिसेहइ सा साइज्जणा उ तहियं तु सठाणं ।।

वृ- यत् से तस्य परिहारिणोऽनुपरिहारी करोति तद्यदि तेन क्रियमाणं सत्यपि बलेऽपिशब्दोऽत्रानुक्तोऽपि सामर्थ्याद्लभ्यते । न निषेधते न निवारयति, सा नामसाइज्जणा स्वादना तत्र च तस्यां च स्वादनायां क्रियमाणायां प्रायश्चित्तं स्वस्थानम् किमुक्तं भवति ? प्रथमोद्देशके येषु स्थानेष्वालपनादिषु लघव उक्तास्तेषु स्थानेष्वस्य गुरुकादातव्याः, अनुमननाऽध्यवसायस्याति प्रमादहेतुत्वात् ।

मू. (४१) *परिहारकल्पट्ठियं भिक्खुंगिलायमाणं नो कप्पइ तस्स गणावच्छेइयस्स णिज्जूहितए, अगिलाए तस्स करणिज्जं वेयावडियं० जाव ततो रोगाओ विप्पमुक्को ततो पच्छा तस्स अहालहुस्सय नामं ववहारे पट्ठवेयव्वेसिया ।।*

वृ- अथास्य सूत्रस्य पूर्वसूत्रेण सह कः संबंधः ? उच्यते-

[भा.१०४५] तव सोसियस्स वाऊ, खुभेज्ज पित्तं व दोवि समगं वा ।
सन्नग्गि पारणंमी, गेलन्नमयं तु संबंधो ।।

वृ- तपः शोपितस्य धोरपरिहारतपसा शोषमुपागतस्य वातः क्षुभ्यते । यदि वा पित्तं अथवा द्वयमपिवातपित्ते समकं क्षुभ्येयातां, ततो वातेन पित्तेन वा सन्ने विध्याते अग्नौ पारणे कृते सति ग्लानत्वमुपजायते, । ततो ग्लानस्य सतो विधिख्यापनार्थमेतत्सूत्रमुपागतमित्येषे सूत्रस्य सम्बन्धः । अनेन सम्बन्धेन आयातस्यास्य व्याख्या-परिहारकल्पस्थितं भिक्षुं ग्लायन्तं यस्य सकाशमागतस्तस्य गणावच्छेदिनो न कल्पते निर्यूहितुमपाकर्तुं वैयावृत्त्या करणादिना किन्त्वग्लान्या तस्य करणीयं वैयावृत्यं तावद्यावत्स रोगातङ्काद्विप्रमुक्तो भवति, । ततः पश्चात्तस्य परिहारिणो लहुस्सगत्ति स्तोको नामव्यवहारः प्रायश्चित्तं प्रस्थापयितव्यो दातव्यः स्यादिति सूत्रं संक्षेपार्थः व्यासार्थं तु भाष्यकृद्विवक्षुर्यः कारणैः स ग्लायति तान्यभिधित्सुराह-

[भा.१०४६] पढमबिइएहिं न तरइ गेलन्नेणं तवो किलंतो वा ।
निज्जूहणा अकरणं ठाणं च न देइ वसहीए ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- प्रथमद्वितीयाभ्यां क्षुत्पिपासालक्षणाभ्यां परीषहाभ्यामभिभूतः सन् परिहारी ग्लायति । यदि वा ग्लानत्वेन अथवा तपसा क्लान्तः सन् एतावता गिलायमाणमिति पदं व्याख्यातमधुना 'निज्जूहित्तए' इति व्याचिख्यासुराह-निर्यूहना नाम वैयावृत्यस्याकरणं यदि वा वसतौ दोषाभावे यत्स्थानां न ददाति एषा निर्यूहना वैयावृत्याकरणादिना यत्तस्याऽपाकरणं सा निर्यूहनेति भावः । यदुक्तमगिलाए तस्स करणिज्जमिति । तत्र गिला प्रतिषेधनाऽगिला ज्ञायते इति गिलाव्याख्यानार्थमाह-

[भा.१०४७] निववेठिं च कुणंतो जो कुणइ एरिसा गिला होइ ।
पडिलेहुठवणाइ वेयावडियं तु पुव्वुत्तं ।।

वृ- यो नाम नृपवेष्टिं राजवेष्टिमिव कुर्वन् वैयावृत्यं करोति एतादृशी भवति गिला ग्लानिः गिलायाः प्रतिषेधोऽगिला तया करणीयं वैयावृत्त्यं किं तदित्याह-प्रतिलेखनोत्थापनादिकं भाण्डस्य प्रत्युपेक्षणमुपविष्टस्योत्थापनमादि शब्दात् भिक्षानयनादि परिग्रहः ।

एतत्पूर्वोक्तं वैयावृत्यं अत्र निर्युक्तिविस्तरः-

[भा.१०४८] परिहारिकारणंमि आगमे निज्जुहणंमि चउगुरुगा ।
आणाइया य दोसा जं सेवति तं च पावहिति ।।

वृ- परिहारिणः कारणे वक्ष्यमाणलक्षणे आगमे आगमने सति यदि निर्यूहना क्रियते तदा तस्य गणावच्छेदिनो निर्यूहितुः प्रायश्चित्तं चत्वारो गुरुका मासाः । तथा आज्ञादयश्च आज्ञा अनवस्था मिथ्यात्वविराधनारुपाश्च तस्य दोषाः । तथा यद्वैयावृत्या करणतः स्थानाऽलाभेन वा प्रतिसेवते परिहारि, तच्च निमित्तमपि च प्रायश्चित्तं सप्राप्नोतीति, संप्रति यैः कारणैः परिहारिण आगमनं भवति, तान्यभिधित्सुराह ।

[भा.१०४९] कालगतो से सहाओ, असिवे रायाव बोहिय भएवा ।
एएहिं कारणेहिं, एगागी होज्ज परिहारी ।।

वृ- से तस्य परिहारिणः सहाय एको अनेको वा कालगतः, यदि वा साधूनामशिवमुपस्थितम्, अथवा राजाप्रद्विष्टः, बोहियत्ति म्लेच्छाः तद्भयं वा समुपजातं ततः साधूनां वृन्दस्फोट उपजायते एतैः कारणैः स परिहारि एकाकी भवेत् । एकाकिनश्च सतः परिहारतपो न निर्वहति, विशेषतो ग्लायतस्तस्य आगमनमिति ।।

[भा.१०५०] तम्हा कायव्वं से कप्पट्ठियमनु परिहारियं ठवेऊण ।
बितियपद असिवादी, अगहियगहियंमि आदेसे ।।

वृ- यस्मादेवं कारणे समागतस्तस्मात्से तस्य परिहारिणः प्रायश्चित्तपरिज्ञाननिमित्तं सकलगच्छसमक्षं कल्पस्थितमनुपहारिणं च स्थापयित्वा कर्तव्यं, यत्करणं द्वितीयपदे अशिवादिलक्षणेऽपवादेन निर्यूहनापि परिहारिणं स गणावच्छेदी अशिवादिभिश्च गृहीताऽगृहीतविषये आदेशः प्रकारश्चतुर्भङ्ग्या[गा]त्मकः तमेवप्रकारमेवाह-

[भा.१०५१] गहियागहिए भंगा, चउरो न उ वसति पढमबितिएसु ।
इच्छाए तइय भंगे सुद्धो उ चतुत्थओ भंगो ।।

वृ- गृहीतागृहीते गृहीतागृहितविषये भङ्गाश्चत्वारस्तद्यथा-अशिवेन गच्छो गृहीतो न परिहारीति प्रथमो भङ्गः, परिहारीगृहितो न गच्छ इति द्वितीयः, परिहार्य पि गृहीतो गच्छोऽपीति तृतीयः, न गच्छो न परिहारीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थः । तत्र प्रथमे द्वितीये वा भङ्गे न प्रविशति, प्रथमभंगे परिहारिणो द्वितीयभंगे वास्तव्यानामनर्थ-संभवात् तृतीयभंगे पुनरिच्छया प्रवेशः, यदिसदृशेनाशिवेन गृहीताः परिहारीगच्छश्चततः प्रवेश्यते, अथ विसदृशेन, एकसोममुखीभिरपरः कालमुखीभीरक्तमुखीभिर्वातदा न प्रवेश्यते, अन्यतरस्यानर्थसंभवात्, यस्तु चतुर्थो भंगः सशुद्धः एव सम्प्रति प्रथमादिषु भङ्गेषु प्रतिषिद्धमपि प्रवेशनं कुर्वतः प्रायश्चित्तविधिमाह-

[भा.१०५२] अइगमने चउगुरुगा साहूसागारिगामबहि ठेंति ।
कप्पट्ठ सिद्ध सन्नी साहुगिहत्थं पवेसेति ।।

वृ- प्रथमादिषु प्रतिषेधमतिक्रम्य गमनं प्रवेशनमिति गमनं तस्मिन् प्रायश्चित्तं चतुर्गुरुका मासाः आज्ञाऽनवस्था मिथ्यात्वविराधनाश्च दोषास्तथा यदि प्रथमादिषु भङ्गेषु प्रतिषिद्धेऽपि प्रवेशने कृते साधुरेकोऽपि कालं करोति तदा चरमं पाराञ्चितं नाम प्रायश्चित्तं । अथ शैय्यातरस्य कालकरणं ततश्चत्वारो गुरुकाः । यत एवं प्रायश्चित्तमतः परिहारिकेण ग्रामस्य बहिः स्थित्वा यदि कल्पस्थकं पश्यति । यदि वा सिद्धत्ति सिद्धपुत्रं अथवा संज्ञितं श्रावकं साधुं वा विचारादिविनिर्गतं गृहस्थं वा, ततः सन्देशं कथयित्वा प्रेषयति यथा गत्वा साधूनामाचक्ष्य बहिः प्रव्रजितो युष्मान् द्रष्टुकामस्तिष्ठति । स तथा प्रेषितः साधुनामाख्याति ततः किमित्याह-

[भा.१०५३] गंतूण पुच्छिऊणं तस्य य वयणं करेंति न करेंति ।
एगा भोगणसव्वे बहिठाणं वारणं इयरे ।।

वृ- ग्रामाभ्यन्तरवर्तिनः साधवः परिहारिणः समीपं गत्वा पृच्छंति निराबाधं भवतो वर्तते । तत्र यदि ब्रूते ग्रहितोऽहमशिवेनेति । तदा तस्स य वयणं करिंति न करिंतित्ति तस्य परिहारकस्य वचनं प्रवेशलक्षणं ते कुर्वन्ति । यदि वा न कुर्वंति किमुक्तं भवति ? प्रथमे द्वितीये वा भङ्गे न कुर्वन्ति तृतीयभंगे चतुर्थे कुर्वन्ति, तृतीये यतनामाह-एगा भोगनेत्यादि, तृतीये भङ्गे यदि सदृशमशिवं तत एकस्मिन्नुपाश्रये तं कुर्वन्ति । अथ विसदृशः तर्हि नैकस्मिन्नुपाश्रये स्थापनीयोऽन्यतरस्यानर्थसंभवात् । किन्तु भिन्नेतस्मिन्नप्यसम्बन्धे अथ व्यवच्छिन्नं गृहं न किमपि लभ्यते, । ततः सम्बन्धेऽपि गृहे पृथग् द्वारे स्थापनीयः एगाभोगणसव्वेति । एकस्य साधोराभोगनं प्रतिजागरणं किमुक्तं भवति । एकः साधुस्तं ग्लायन्तं परिहारिणं प्रतिजागर्ति, शेषाः सर्वेऽपि साधवः तत्प्रायोग्यमौषधादिकं याचन्ते । बहिट्ठाणमिति यदि पुनः परिहारिणो वसतावानयने शय्यातरोऽप्रतिं करोति तदा ग्रामस्य बहिर्वसतेर्दूरे वा योऽन्यो वाटकादिस्तत्र परिहारिणः स्थानं क्रर्तव्यम् । वारणं इयरे इति, अथ सागारिको यस्तं प्रतिचरति यश्च तत्र गत्वा शरीरवार्त्तां पृच्छति तस्मिन् वारणं प्रतिषेधं करोति । यथा-यूयमशिवगृहीतस्य समीपं गच्छत आगच्छत एवं च तेन सह सम्पर्कं कुर्वाणा अस्माकमप्यशिवं संचारयिष्यतस्तस्मान्माकोऽपि युष्मन्मध्ये तत्र यासीत्, तदा यतना कर्तव्या सा चाग्रे स्वयमेव वक्ष्यते साम्प्रतमेगाभोय[ग]णे सव्वे इति व्याख्यानयन्नाह-

[भा.१०५४] वोच्छिन्न घरस्सासइपिहद्दुवारे वसंति संति संबद्धे ।
एगो तं पडिजग्गति, जोग्गं सव्वेवि झोसंति ।।

वृ- व्यवच्छिन्नग्रहस्य असम्बद्धस्योपाश्रयस्य असति अभावे सम्बद्धेऽप्युपाश्रये वसति । कथं भूते इत्याह-पृथग्द्वारे विभिन्नद्वारे तत एकोतमिति तं परिहारिणं प्रति जागर्ति प्रतिचरति, शेषाः सर्वेऽपि साधवो योग्यमौषधादिकं झोषयन्ति-मार्गयन्ति । आभोगनं मार्गणं झोषणमिति ह्येकार्थ उक्तं च-'आभोगणंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा मग्गणंति वा भक्तोसणंति वा एगठमिति' सम्प्रति बहि ठाणमिति व्याख्यानयति-

[भा.१०५५] सागारिय अचियत्ते वाहिं पडियरण तहवि नेच्छंति ।
अदिठे कुणइ एगो, न पुणो बेंति दिठंमि ।।

वृ- सागारिकः शय्यातरस्तस्य अचि[वि]यत्ते अप्रीतौ ग्रामस्य बहिर्वसतेर्दूरे वा योऽन्यउपाश्रयस्तं याचित्वा तं परिहारिणं विमुच्य एकः साधुः प्रतिचरति । वारणंइयरे इत्यस्य व्याख्यानमाह- 'तहवि नेच्छंते' इत्यादि तथापि एवमपि शय्यातरो नेच्छति यथा किमिति यूयं गमनागमन कारणेनास्माकमप्यशिवं सञ्चारतस्तस्मान्मा कोऽपि तत्र गच्छेदिति । तदा एकः साधुः यथा शय्यातरो न पश्यति न जानाति वा तथा प्रतिचरति । यदि पुनः कथमपि शय्यातरेण स्वयं दृष्टो भवेत् ज्ञातो वा ततो वदेत् यथा यूयं वारिता अपि न तिष्टथ तदा तद्दृष्टे उपलक्षणेतत् ज्ञातं वारिते चैवं वक्तव्यं न भूयो गमिष्यामि क्षमस्वैकवारमिति । अथ सागारिकस्य गाढमप्रीतिकरणं ततः सर्वेऽप्यन्यवसतिं याचित्वा च तिष्ठन्ति ।

[भा.१०५६] बहु पाउग्गमुवस्सय असती वसहा दुवेऽहवातिण्णी ।
कइयव कलहेणणहिं उप्पायण वाहिं संच्छोभो ।।

वृ- बहुप्रायोग्योपाश्रयस्या सति अभावे, किमुक्तं भवति ? यत्र सर्वे साधवो मान्ति स उपाश्रयोऽन्यो न लभ्यते । ततो द्वौ वृषभावथवा त्रयः कैतवेन कलहं कृत्वा अन्यत्र वसत्यन्तरे गच्छंति । तत्र स्थिताः परिहारिणः परिचेष्टां कुर्वन्ति । अन्यतरकै रपि औषधादीनामुत्पादनं कृत्वा औषधादीनि याचित्वा बहिः संक्षोभः क्रियते । बहिः परिहारिणः समीपे प्राप्यते । येऽपि च कैतवकलहं कृत्वा न विनिर्गतास्तेऽप्यन्यतरकैः सह विविक्ते प्रदेशे मिलित्वा पारिहारिकयोग्यं गृह्णन्ति सम्प्रति तद्व्रतप्रतिचरणविधिमाह-

[भा.१०५७] ते तस्ससोहियस्स य उव्वत्तणसंथरंवधोवेज्ञा ।
अच्छेक्कोवहिपेहे अच्चियलिंगेण जो पउणे ।।

वृ- तेऽभ्यन्तरकाः कलहव्याजेन विनिर्गतास्तस्य शोधितस्य प्रतिपन्नपरिहारतपः प्रायश्चित्तस्य उद्वर्तनमुपलक्षणमेतत् । परावर्तनमौषधादि प्रदानं च वस्त्रान्तरितेन हस्तेन कुर्वन्ति । वस्त्राणि च तस्य सत्कानि सान्तरमेकोनंतरितानि गृह्णन्ति सोऽन्यस्मै समर्पयति । सोऽन्यस्मायित्यन्तरितं धावयन्ति प्रक्षालयन्ति । उपधिमपि तस्य प्रत्युपेक्षन्ते । अच्छिक्का अस्पृष्टास्सन्तः बहुवचनप्रक्रमेऽप्येकवचनं गाथायां प्राकृतत्वात् वचनव्यत्ययोऽपि हि प्राकृते यथा लक्ष्यं भवतीति । एवं तावत् प्रतिजागरति यावत्स प्रगुणे भवति । राजप्रद्वेषे तु यत् यत्रार्चितं लिङ्गं तेन लिङ्गेन यावत् प्रगुणो भवति तावत्प्रतिजाग्रति । सम्प्रति तस्स अहालघुस्सगे नामं ववहारो पट्ठवेयव्वे सिया इति सूत्रं व्याख्यानयन् व्यवहारं यथा लघुकं प्रस्थापनं च पर्यायैर्व्याख्यानयति-

[भा.१०५८] ववहारो आलोयण सोही पच्छित्तमेव एगट्ठा ।
थोवो उ अहा लहुसो पट्ठवणा होइ दानंतु ।।

वृ- व्यवहार आलोचनाशोधिः प्रायश्चित्तमित्येकोऽर्थः । तथा यथा लघुको नाम स्तोकः तथा प्रस्थापयितव्यः इति प्रस्थापना दानं ततो दातव्यो यथा लहु मित्यर्थो वेदितव्यः । यथा लघुस्वको व्यवहारः प्रस्थापयितव्य इत्युक्तं ततो यथा लघुकादि व्यवहार प्ररुपणार्थमाह--

[भा.१०५९] गुरुओ गुरुतरागो अहा गुरुगो य होइ ववहारो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लहुओ लहुअतरागो अहा लहुगोय ववहारो ।।

[भा.१०६०] लहुसो लहुसतरागो अहा लहुसो य होइ ववहारो ।
एएसिं पच्छित्तं वोच्छामि अहानुपुव्वीए ।।

वृ- व्यवहारस्त्रिविधस्तद्यथा गुरुको लघुको लघुस्वकश्च तत्र यो गुरुकः स त्रिविधस्तद्यथा गुरुको गुरुतरको यथा गुरुस्वकश्च लघुकोपि त्रिविधस्तद्यथा लघुः लघुतरो यथा लघुस्वको, लघुस्वकोपि त्रिविधस्तद्यथा लघुस्वो लघुस्वतरको यथा लघुस्वकश्चः एतेषां व्यवहाराणां यथानुपूर्व्या यथोक्त परिपाट्या प्रायश्चित्तं वक्ष्यामिः । किमुक्तं भवत्येतेषु व्यवहारेषु समुपस्थितेषु यथा परिपाट्या प्रायश्चित्तपरिमाणं अभिधास्ये यथा प्रतिज्ञातमेव करोति ।

[भा.१०६१] गुरुगो य होइ मासो गुरुग तरागो भवे चउम्मासो ।
अह गुरुगो च्छम्मासो गुरुगयपक्खंमि पडिवत्ती ।।

वृ- गुरुको नाम व्यवहारो मासो मासपरिमाणः, गुरुके व्यवहारे समापतिते मास एकः प्रायश्चित्तं दातव्य इति भावः । एवं गुरुतरको भवति चतुर्मासि चतुर्मास परिमाणः यथा गुरुकः षण्मासः षण्मासपरिमाणः । एषा गुरुकपक्षे गुरुकव्यवाहारे त्रिविधे यथाक्रमंप्रायश्चित्तप्रतिपत्तिः सम्प्रति लघुक लघुस्वकव्यवहारविषयं प्रायश्चित्तप्रमाणमाह–

[भा.१०६२] तीसा य पणवीसा, वीसा पनरसेव य ।
दसपंचयदिवसाइं, लहु सगपक्खंभि पडिवत्ती ।।

वृ- लघुको व्यवहारस्त्रिंशद्दिवसपरिमाणः । एवं लघुतरक पञ्चविंशति दिनमानः, । यथा लघुस्वको विंशति विंशति दिनमानः । एषा लघुकव्यवहारे त्रिविधे यथाक्रमंप्रायश्चित्तप्रतिपत्तिः । तथा लघुस्वको व्यवहारः पञ्चदश पञ्चदशदिवस प्रायश्चित्तपरिमाणः । एवं लघुस्वतरको दशदिवसमानो यथा लघुस्वकः पञ्चदिवसानि पञ्च दिवस प्रायश्चित्तानि परिमाणः । एषा लघुस्वव्यवहारपक्षे प्रायश्चित्तपरिमाणप्रतिपत्तिः । अथ कं व्यवहारं केन तपसा पूरयतीति प्रतिपादनार्थमाह–

[भा.१०६३] गुरुगं च अट्ठमं खलु गुरुगतरागं च होइ दसमं तु ।
अह गुरुग दुवालसमं गुरुगपक्खंमि पडिवत्ती ।।

वृ- गुरुकं व्यवहारं मासपरिमाणं अष्टमं कुर्वन् पुरयति । किमुक्तं भवति ? गुरुकं व्यवहारं मासपरिमाणमष्टमेन वहति । तथा गुरुतरकं चतुर्मासिप्रमाणं व्यवहारं दशमं कुर्वन् पूरयति दशमेन वहतीत्यर्थः । यथा गुरुकं षण्मासप्रमाणं व्यवहारं द्वादशकं कुर्वन् द्वादशमेनेत्यर्थः पूरयति एषा गुरुकपक्षे गुरुकव्यवहारपूरणविषयं ततः प्रतिपत्तिः ।।

[भा.१०६४] छट्ठं च चउत्थं वा आयंबिल एगट्ठाण पुरिमड्ढं ।
निव्वीयं दायव्वं अहा लहुस्सम्मि सुद्धो वा ।।

वृ- लघुकंव्यवहारं त्रिंशद्दिनपरिमाणं षष्टं कुर्वन् पूरयति । लघुतरकं पञ्चविंशद्दिवसपरिमाणव्यवहारं चतुर्थं कुर्वन् यथा लघुकव्यवहारं विंशति दिवसमानमाचाम्लं कुर्वन् एषा लघुकत्रिविधव्यवहार पूरणे तपः प्रतिपत्तिः । तथा लघुकस्वभावव्यवहारं पञ्चदशदिवस परिमाणमेकस्थानकं कुर्वन् पूरयति । लघुतरस्वकव्यवहारं दशदिवस परिमाणं पूर्वार्धं कुर्वन् यथा लघुस्वकव्यवहारं पञ्चदिनपरिमाणं निर्विकृतिकं कुर्वन् पूरयति । तत एतेषु गुरुकगुरुतरकादिषु व्यवहारेष्वनेनैव क्रमेण तपो दातव्यं । यदि वा यथा लघुस्वके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारे प्रस्थापयितव्ये स प्रतिपन्नव्यवहारतपः प्रायश्चित्त एवमेवालोचनाप्रदानमात्रतः शुद्धः क्रियते कारणे यतनया प्रतिसेवनात् ।

मू. (४२) *अनवट्ठप्पं भिक्खुं गिलायमाणं नोकप्पइ तस्स गणावच्छेइयस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं जाव तओ रोगायंकाओ विप्पमुक्को तओ पच्छा तस्स अहालहुसए नामं व्यवहारे पट्ठवियव्वेसिया ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध उच्यते-

[भा. १०६५] पच्छित्तं खलु पगयं निज्जूहण ठाणुवत्तए जोगो ।
होति तवो च्छेदो वा गिलाण तुल्लाहिगारो वा

वृ- योगः सम्बन्धः पूर्वसूत्रेण सहास्य सूत्रस्यायं भवति-प्रायश्चित्तं खलु प्रकृतमधिकृतं, ततः पायश्चित्तप्रस्तावादधिकृतस्याप्यनवस्थाप्यसूत्रस्यावकाशः । अथवा प्राक्तनसूत्रेषु पारिहारिक उक्तः। पारिहारिकस्य गच्छसामाचार्या निर्यूहणं ततोऽनुवर्तते निर्यूहणमिति निर्यूहणं प्रस्तावादनवस्थाप्यस्यापि निर्यूहस्य विधिप्ररुपणा यदि वा तवोच्छेदो वेति प्राक्तपोर्हं प्रायश्चित्तं प्रतिपन्नस्य सूत्रमुक्तमिदानीं च्छेदार्हं. प्रतिपन्नस्य वक्तव्यम् । छेदश्च द्विधा-पर्याय व्यवच्छेदो मण्डलीव्यवच्छेदश्च । ततो मण्डल्याव्यवच्छिन्नमनवस्थाप्यमपेक्ष्याधिकृतसूत्रस्योपनिपातः । अथवा पूर्वसूत्रे ग्लायतो विधिरुक्तोऽनेनापि ग्लायतो विधिरुच्यते इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या-अनवस्थाप्यं नवमप्रायश्चित्तप्रतिपन्नभिक्षुं ग्लायन्तं न कल्पते । यस्य समीपगतस्य गणायच्छेदिनो निर्यूहितुं निराकर्तुं किन्तु तस्य अगिलया राजवेष्टिमिवाननु मन्यमानेन सर्वज्ञादेश इति बुद्ध्या कर्मनिर्जरणनिमित्तं तस्य करणीयम् वैयावृत्यं तावत् यावत् रोगातङ्कात् विप्रमुक्तो भवति, । ततः पश्चात्तस्य प्रगुणी भूतस्य सतो यथा लघुस्वको यथोदितस्वरुपो व्यवहारः प्रायश्चित्तं प्रस्थापयितव्यो दातव्यः स्यात् ।।

मू. (४३) *पारंचियंति भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदितस्स निज्जूहित्तए अगिलाए तस्स करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के ततो पच्छा । तस्स आहालहुस्सगो ववहारो पठवियव्वे सिया ।।*

वृ- अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्ध उच्यते-

[भा. १०६६] सगणे गिलायमाणं कारणपरगच्छमागयं वावि ।
माहु नकुज्जा निज्जुहणोत्तिइइ सुत्त संबंधो ।।

वृ- यथा अनवस्थाप्यस्य कर्तव्यं तथा प्रतिपन्नपारांचितप्रायश्चित्तस्यापि न पुनरेष निर्युहितो निष्काशित इति कृत्वा स्वगणे ग्लायन्तं रोगातङ्क वशतो ग्लानिमुपगच्छन्तं यदि वा प्रागुक्तोरशिवादिभिः कारणैः परगच्छमागतं मा हु निश्चित्तं वृत्यावृत्यविषयं न कुर्यात् न कार्षीत् । किन्तु तस्यापि वैयावृत्यस्यावश्यमगिलया कर्तव्यं । तथा प्रतिपन्नपाराञ्चितप्रायश्चित्तस्यापि तत्र स्वगणे क्षेत्रबहिः स्थितस्याचार्यः स्वयमुदन्तं वहति । परगणेऽपि कारणवशादायातस्य तदीय आचार्यः करोति । यथा सूत्रं वैयावृत्यामित्येष पूर्वसूत्रेण सहास्य सूत्रस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या कर्तव्या । सा च प्राग्वत् साम्प्रतमनवस्थाप्य पाराञ्चितयोः स्वरुपमतिदेशत आह-

[भा. १०६७] अनवट्ठप्पो पारांची, पुव्वं भणितो इमं तु नाणत्तं ।
कायव्व गिलाणस्स उ अकरणे गुरुगा य आणादी ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अनवस्थोऽनवस्थाप्यः पाराञ्ची पाराञ्चितः । पूर्वं कल्पाध्ययने भणितः । इदं तु वक्ष्यमाणं नानात्वं तत्र ग्लानस्य सतश्चिन्ता न कृता, अत्र तु क्रियते । कथमित्याह-ग्लानस्य सतो गणावच्छेदिना आचार्येण च यथासूत्रं वैयावृत्यं कर्त्तव्यं यदि पुनर्न कुरुते ततोऽकरणे चत्वारो गुरुकाः गुरुमासाः प्रायश्चित्तं तथा आज्ञादय आज्ञाऽनवस्था मिथ्यात्वविराधनादोषाः सम्प्रति पाराञ्चितं प्रत्याचार्यस्य वैयावृत्यकरणे शिक्षामाह-

[भा.१०६८] उलोयणं गवेसण आयरिओ कुणति सव्वकालंपि,
उप्पन्न कारणम्मी सव्वपयत्तेण कायव्वं ।

वृ- अवलोकनं निरीक्षणं क्षेत्रबहिः स्थितस्य पाराञ्चितस्य गवेषणं च तद्योग्यस्य भक्तपानादेराचार्यः सर्वकालमपि यावत्पाराञ्चितावस्थायाः कालस्तावत्तं सकलमपि यावत्करोति । उत्पन्ने कारणे ग्लानत्वादि लक्षणे पुनः सर्वप्रयत्नेन कर्तव्यमाचार्येण ।

[भा.१०६९] जोउ उवेहं कुज्जा आयरितो केणई पमादेणं ।
आरोवणाउ तस्सा कायव्वा पुव्वनिदिट्ठा ।।

वृ- यः पुनराचार्यः किमपि जनव्याक्षेपादिना प्रमादेन उपेक्षा कुरुते, तस्यारोपणा प्रायश्चित्तारोपणा पूर्वनिर्दिष्टा कर्तव्या चत्वारो गुरुकास्तस्मै प्रायश्चित्तं दातव्यमिति भावः ।

मू. (४४) *खित्तचित्ते भिक्खू गिलायमाणं नो कप्पइ तस्स गणाऽवच्छेइयस्स निज्जूहितए अगिलाए तस्सकरणिज्जं वेयावडियं जावरोगायंकाओ विप्पमुक्क तओपच्छा तस्य अहालहुयस्सए नामं ववहारे पट्ठवेसिया ।*

वृ- खित्तचित्तं गिलायमाणमित्यादिसूत्रं । अथास्य सूत्रस्य कः सम्बन्ध उच्यते-

[भा.१०७०] घोरम्मि तवे दिन्ने, भएण सहसा भवेज्ज खित्तोउ ।
गेलन्नं वा पगयं अगिलाए करणं च संबंधो ।।

वृ- घोरे रौद्रे पारिहारिकादिरूपे तपसि दत्ते भयेन सहसा भवेत् क्षिप्तः क्षिप्तचित्तः अपहृतचित्त इत्यर्थः । अथवा ग्लान्यं प्रकृतं क्षिप्तचित्तोऽपि च ग्लानकल्पस्ततस्तस्यापि अगिलया यथोक्तस्वरूपया कर्तव्यमिति तत्प्रतिपादनार्थमेप सूत्रोपनिपात इत्ययं पूर्वसूत्रेण सहास्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या सा च प्राग्वत् ।। सम्प्रति क्षिप्तचित्तप्ररूपणार्थमाह-

[भा.१०७१] लोइय लोउत्तरिओ, दुविहो खित्तो समासतो होइ ।
कह पुन हवेज्ज खित्तो, इमेहिं सुण कारणे हिंतु ।।

वृ- समासतः सङ्क्षेपतो द्विविधो द्वि प्रकारः क्षिप्तो भवति । तद्यथा-लौकिको लोकोत्तरिकश्च । तत्र लोके भवो लौकिकः, अध्यात्मादित्वादिकण एवं लोकोत्तरे भवो लोकोत्तरिकः अथ कथं केन प्रकारेण पुनः क्षिप्तः क्षिप्तचित्तो भवेत् । सूरिराह-शृणु एभिर्वक्ष्यमाणैर्भवति तान्येव कारणान्याह –

[भा.१०७२] रागेण वा भयेण व अहवा अवमानितो नरिंदेण ।
एएहिं खित्तचित्तो वणियादि परूवणा लोए ।।

वृ- रागेण वा यदि वा भयेन अथवा नरेन्द्रेण प्रजापतिना उपलक्षणमेतत् । सामान्येन वा प्रभुणा अपमानितोऽपमानं ग्राहितः एतैः खलु कारणैः क्षिप्तचित्तो भवति । ते च लोके उदाहरणत्वेन प्ररूपिता वणिगादयः । तत्र रागेण क्षिप्तचित्तो यथा वणिग्भार्या । तथा हि- काचिद्वणिग् भार्या भर्तारं मृतं श्रुत्वा

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

क्षिप्तचित्ता जाता, भयेनापमानेन च क्षिप्तचित्तत्वे उदाहरणान्याह-

[भा.१०७३] भयतो सोमिलबडुतो, सहसोत्थरितो व संजुधादीसु ।
धन हरणेन पहूण व विमाणतो लोइया खित्तो ।।

वृ- भयतो भयेन क्षिप्तचित्तो यथा गजसुकुमालमारको जनार्दनभयेन सोमिलनामा बटुको ब्राह्मणः । अथवा संयुगं[सं]ग्रामस्तत्र आदिशब्दात् परबलधाटीसमापतनादि परिग्रहस्तैर्गाथायां सप्तमीतृतीयार्थे सहसा अतर्कितः समन्ततः परिग्रहीतो भयेन क्षिप्तचित्तो भवति । स च प्रतीत एव भयेनोदाहरणमुक्तम् । संप्रत्यपमानत आह-प्रभुणा वा नरेन्द्रेण धनहरणेन समस्तद्रव्यापहरणो विमानितोऽपमानितः क्षिप्तो भवति । एवमादिकानि लौकिकान्युदाहरणानि क्षिप्तचित्तविषयाणि ।।

सम्प्रति लोकोत्तरि-कान्यभिधित्सुराह-

[भा.१०७४] रागम्मि रायखुड्डो जड्डादितिरिक्खचरयवायम्मि ।
रागेण जहा खित्तो तमहं वोच्छं समासेण ।।

वृ- रागे सप्तमी तृतीयार्थे । रागेण क्षिप्तचित्तो यथा राजक्षुल्लकः राजपुत्रः क्षुल्लकोराजक्षुल्लकः शाकपार्थिवादिदर्शनादिमध्यपदलोपीसमासः । भयेन यथा जड्डादीन् हस्तिप्रभृतीन् तिरश्चो दृष्ट्वा । अपमानतो यथा चरकेण सह वादे पराजितः तत्र । रागेण यथा-राजक्षुल्लको यः क्षिप्तचित्तोऽभवत्तमहं तथा समासेन वक्ष्ये ।। यथा प्रतिज्ञातं करोति-

[भा.१०७५] जियसत्तुनरवइस्सा पव्वज्जा सिक्खणा वि देसंमि ।
काऊण पोयणम्मी तंव्वाइ निव्वुतो भयवं ।।

[भा.१०७६] एक्को य तस्स भाया रज्जसिरि पयहिऊण पव्वइतो ।
भाउग अनुरागेणं खित्तो जातो इमो उ विही ।।

वृ- जितशत्रुर्नामनरपतिस्तस्य प्रव्रज्या अभूत् । धर्मं तथाविधानां स्थविराणामन्तिके श्रुत्वा प्रव्रज्यां स प्रतिपन्नवानित्यर्थः । प्रव्रज्यानन्तरं च तस्य शिक्षणाग्रहणशिक्षा आसेवनाशिक्षा च प्रवृत्ता, कालान्तरे च पोतनपुरे विदेशरूपे परतीर्थिभिः सह वाद उपस्थितः । ततस्तैः सह शोभनो वादः सद्वादस्तं दत्वा महतीं जिनशासनप्रभावनां कृत्वा स भगवान् निवृत्तो मुक्तिपदवीमधिरूढः । एक्को य इत्यादि, एकश्च तस्य भ्राता जितशत्रो राज्ञः प्रव्रजितस्यानुरागेण राज्यश्रियं प्रहाय परित्यज्य जितशत्रुप्रव्रज्या प्रतिपत्त्यनन्तरं कियता कालेन प्रव्रजितः प्रव्रज्यां प्रतिपन्नः । स च तं ज्येष्ठभ्रातरं विदेशे पोतनपुरे कालगतं श्रुत्वा भ्रात्रनुरागेणक्षिप्तोऽपहृतचित्तो जातस्तत्र चायं वक्ष्यमाणस्तत्प्रगुणीकरणाय विधिस्तमेवाह-

[भा.१०७७] तेलोक्कदेव महिया तित्थयरा नीरया गया सिद्धिं ।
थेरा वि गया केई चरणगुण पहावगा धीरा ।।

वृ- तस्य भ्रातादिमरणं श्रुत्वा क्षिप्तचित्ती भूतस्याश्वासनार्थमियं देशना कर्त्तव्या यथा मरणपर्यवसानो जीवलोकस्तथा हि ये तीर्थकरा भगवन्तस्त्रैलोक्यदेवैस्त्रिभुवननिवासिभिर्भवनपत्यादिभिर्देवै-र्महितास्तेऽपि नीरजसो विगतसमस्तकर्मपरमाणवः सन्तो गताः सिद्धिं, तथा तथा स्थविरा अपि केचिन्महीयांसो गौतमस्वामिप्रभृतयश्चरणगुणप्रभावका धीरा महासत्वा देवदानवैरप्यक्षोभ्याः सिद्धिंगताः तद्यदि भगवतामपि तीर्थकृतां महतामपि महर्षीणामीदृशा गतिस्तत्र का कथा शेषजन्तूनां तस्मादेतादृशीं संसारस्थितिमनुविचिन्त्य न शोकः कर्त्तव्य इति । अन्यच्च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०७८] न हु होइ सोइयव्वो जो कालगतो दढो चरित्तंमि ।
सो होइ सोतियव्वो जो संजम दुब्बलो विहरे ।।

वृ- न हु निश्चितं स शोचयितव्यो भवति यश्चारित्रे दृढः सन् कालगतः, स खलु भवति शोचयितव्यो यः संयमे दुर्बलः सन् विहृतवान् । स कस्मात् शोचयितव्य इत्यत आह-

[भा.१०७९] जो जहव तहव लद्धं भंजइ आहार उवहिमाईयं ।
समनुगुण मुक्कजोगी संसारपवड्ढगो भणितो ।।

वृ- यो नाम यथा वा तथा वा दोषदुष्टतया न निर्दोषतया इत्यर्थः । लब्धं आहारोपध्यादिकं भुङ्क्ते उपभोगपरिभोग विषयी करोति । स श्रमणानां गुणा मूलगुणोत्तरगुणरूपाः श्रमणगुणास्तैर्मुक्ताः परित्यक्तास्तद्रहिता ये योगा मनोवाक्कायव्यापारास्ते श्रमणगुणमुक्तयोगास्ते यस्य सन्ति श्रमणगुणमुक्तयोगी संसारप्रवर्धको भणितस्तीर्थकर गणधरैस्ततोयः संयमदुर्बलो विहृतवान् स शोच्य एव भवदीयस्तु भ्राता यदि कालगतो दृढचारित्रे ततः स परलोकेऽपि सुगतिभागिति न करणीयः शोकः सम्प्रति जड्डाइतिरिक्ख इत्यस्य व्याख्यानार्थमाह-

[भा.१०८०] जड्डाइतेग्च्छि सत्थं अगनीयमेहविज्जूय ।
उमे पडिभेसणाया चरगं पुव्वं परूवेउं ।।

वृ- जड्डो हस्ती आदिशब्दात् सिंहादि परिग्रहः तान् तिरश्चो दृष्ट्वा विमुक्तं भवति । गजं वा मदोन्मत्तं सिंह वा गुञ्जन्तं व्याघ्रं वा तीक्ष्णखरनखरविकरालमुखं दृष्ट्वा कोऽपि भयतः क्षिप्तचित्तो भवति । कोऽपि पुनः शस्त्राणि खड्गादीन्यायुधानि दृष्ट्वा इयमत्र भावना-केनापि परिहासेनोद्गीर्णं खड्गं वा कुन्तं वा क्षुरिकादिकं वा दृष्ट्वा कोऽपि हा मारयति मामेष इति सहसाक्षिप्तचित्त उपजायते । तथा अग्नौप्रदीपनकेच लग्ने कोऽपि भयतः क्षिप्तो भवति । कोऽपि स्तनितं मेघगर्जितमाकर्ण्य कोऽपि विद्युत् [तं] दृष्ट्वा एवं क्षिप्तचित्तस्य जातस्य ओमे पडिभीसणया इति अवमो लघुतरस्तेन प्रतिभीषणंहस्त्यादेः कर्तव्यं । येन क्षिप्तचित्ततापगच्छति यदि पुनश्चरकेण वादे पराजितः इति क्षिप्तचित्तो भवेत् । ततश्चरकं पूर्वं प्ररूप्य प्रज्ञाप्य तदनन्तरं तेन स्वमुखोच्चारितेन वचसा तस्य क्षिप्तचित्ततोच्चारयितव्या । सम्प्रत्यपमानतः क्षिप्तचित्ततां भावयति-

[भा.१०८१] अवहीरितोवगणिणा अहवण सगणेण कम्हिएइ पमाए ।
वायंमि विचरगाई पराइतो तत्थिमा जयणा ।।

वृ- गणिना आचार्येण सोऽवधीरितः स्यादथवा णमिति वाक्यालङ्कारे स्वगणेन स्वगच्छेन गणावच्छेद्यादिना कस्मिंश्चित्प्रमादे वर्त्तमानः सन् गाढं शिक्षितो भवेत्, । ततोऽपमानेन क्षिप्तचित्तो जायते, यदि वा चरकादिना परतीर्थिकेन वादे पराजित इत्यपमानतः क्षिप्तचित्तः स्यात् । तत्र तस्मिन् क्षिप्तचित्ते इयं वक्ष्यमाणा यतना तत्र प्रथमतो भयेन क्षिप्तचित्ते यतनामाह-

[भा.१०८२] कन्नंमि एस सीहो गहितो अहिधाडितो य सो हत्थी ।
खुड्डल तरोन तु मे ते विय गमिया पुरा पाला ।।

वृ- इह पदैकदेशे पदसमुदायोपचारात् पाला इत्युक्ते हस्तिपालाः सिंहपाला द्रष्टव्याः । तेऽपि पुरा पूर्वं गमिताः प्रतिबोधिताः कर्त्तव्याः । यथास्माकमेकः क्षुल्लको युष्मदीयं सिंहं हस्तिनं वा दृष्ट्वा क्षोभमुपागतः ततः स यथा क्षोभं मुञ्चति तथा कर्तव्यम् । एवं तेषु प्रतिबोधितेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सक्षिप्तचित्तीभूतस्तेषामन्तिके नीयते । नीत्वा च तेषां मध्ये यः क्षुल्लकादपि लघुतरः तेन सिंहः कर्णे धार्यते । हस्ती वा तेन धाड्यते ततः स क्षिप्तचित्तः प्रोद्यते त्वत्तोऽपि यः क्षुल्लतरो अतिशयेन लघुस्तेन एष सिंहः कर्णे गृहीतः । अथवा सहस्ती अनेन धाटितस्त्वं तु बिभेषि किंत्वमेतस्मादपि भीरुर्जातो धार्ष्टर्यमवलम्ब्यमिति-

[भा.१०८३] सत्थऽग्गिं थंभेउ पन्नोल्लणं तस्स एव सो हत्थी ।
थेरा चम्म विकड्ढण, अलाय चक्कं दोसुं च ॥

वृ- यदि शस्त्रं यदि वाग्निं दृष्ट्वा क्षिप्तोऽभवत् । ततः शस्त्रमग्निं च विद्ययास्तम्भित्वा तस्य पादाभ्यां प्रणोदनं कर्तव्यं भणितव्यं च तं प्रति एषोऽस्माभिरग्निः शस्त्रं च पादाभ्यां प्रणोद्यते । त्वं पुनरेताभ्यां बिभेषीति यदि वा पानीये नार्द्रीकृत्य हस्तादिभिः सोऽग्निः स्पृश्यते भण्यते च । एतस्मादपि तव किं भयं तथा यतो हस्तिनः तस्य भयमभूत् । स हस्ती स्वयं पराङ्मुखो गच्छन् दर्श्यते । यथा यतस्त्वं बिभेषि सहस्ती नश्यति नश्यद्वर्तते ततः कथं त्वमेवं भीरोरपि भीरुर्जातः । तथा यो गर्जितं श्रुत्वा भयमग्रहीत् । तं प्रत्युच्यते स्थविरा नभसि शुष्कं चर्म विकर्षति आकर्षति । एवं चोक्त्वा शुष्क चर्मण आकर्षणे शब्दःव्यते ततो भयं जरयति । तथा यद्यग्नेः स्तम्भनं न ज्ञायते, तदा द्वयोः अग्नौ च विद्युति च भयं प्रतिपन्नः सन् अलातचक्रं पुनरकस्मात्तस्य दर्श्यते, यावदुभयोरपि भयं जीर्णं भवति ।

सम्प्रति वादे पराजयादपमानतः क्षिप्तचित्ती भूतस्य यतनामाह–

[भा.१०८४] एएण जितोमि अहं तं पुन सहसा न लक्खियं नेन ।
धिक्कय कइयवं लज्जावितोय पउणे ततो खुड्डो ॥

वृ- इहैकेन चरकेण वादे पराजितः स च ज्ञाप्यते यथोक्तं प्राक् ततः स आगत्य वदति । एतेनाहं वादे जितोऽस्मि तत्पुनः स्वयं जयनमनेन सहसा न लक्षितं ततो मेलोकतो जयप्रवादोऽभवत् । एवमुक्ते सचरकोधिक्कृतेनाधिकारेण लज्ञाप्यते लज्ञां ग्राह्यते । लज्ञां च ग्राहितः सन् सोपसार्यते ततः स क्षिप्रो भण्यते । किमिति त्वमपंथानं गृहीतवान् वादे नहि ननु त्वया पराजितः । तदा च त्वत्समक्षभेवैष धिक्कारं ग्राहित इति । एवं यतनायां क्रियमाणायां यदि स क्षुल्लकः प्रगुणी भवति ततः सुन्दरम् ॥

[भा.१०८५] तहवि य अठायमाणे संरक्खमरक्खणे य चउगुरुगा ।
आणाइणो य दोसा, जं सेवति जं च पाविहिती ॥

वृ- तथापि च एवं यतनायामपि च क्रियमाणायामपि तिष्ठति अनिवर्तमाने क्षिप्तचित्तत्वे संरक्षणं वक्ष्यमाणयतनया कर्तव्यं अरक्षणे प्रायश्चित्तं चत्वारो गुरुका गुरुमासाः । तथा आज्ञादय आज्ञाऽनवस्था मिथ्यात्वविराधनादोषाः । तथा असंरक्षमाणो यत्सेवते षट्जीवनिकायविराधनादिकं, यं च प्राप्स्यत्यनर्थं तन्निमित्तं च प्रायश्चित्तं । अथ किं सेवते किं वा प्राप्स्यतीति तन्निरूपणार्थमाह-

[भा.१०८६] छक्कायाण विराधनज्झामणतेनाति वायणं चेव ।
अग[व]डेविसमे य पडिए, तम्हा रक्खंति जयणाए ॥

वृ- षण्णां कायानां पृथिवीकायिकादीनां विराधना क्रियेत । ध्यापनं प्रदीपनकं तद्वा कुर्यात् । यदि वा स्तैन्यमथवातिपातनमात्मनः परस्य वा विधीयेत । अवटे कूपेऽथवाऽन्यत्रविषमे पतितो भवेत् तदेवमसंरक्षणे य त इमे दोषास्तस्मात् रक्षन्ति यतनया वक्ष्यमाणाया साम्प्रतमेनामेव गाथां व्याचिख्यासुराह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०८७] सस्सगिहादीन डहे तेने अवसो सयं वा ही रेज्जा ।
मारणपिट्टणमुभये तद्दोसा जं च सेसाणं ।।

वृ- सस्यं धान्यं तद्गृहं सस्यगृहं तदादीनि आदिशब्दात् शेषगृहापणादिपरिग्रहः दहेत क्षिप्तचित्ततया अग्निप्रदानेन भस्मसात् कुर्यात् । एतेन ध्मापन [ध्यामन] मिति व्याख्यातम् । यदि वा स्तेनयेत [चोरयेत्] अथवा स स्वयं किमपि भिद्येत [केनापि ह्रियेत] अनेन स्तैन्यं व्याख्यातम् । मारणं पिट्टनमुभयस्मिन् स्यात् किमुक्तं भवति । स क्षिप्तचित्तत्वेन परवश इव स्वयमात्मानं मारयेत् पिट्टयेत्, वा परं मारयन् पिट्टयित्वा सपरेण मार्येत, पिट्येत वा इति तद्दोसा जं च सेसाणमिति तस्य क्षिप्तचित्तस्य दोषात् यच्च शेषाणां साधूनां मारणं पिट्टनं वा । तथा हि-स क्षिप्तचित्तः परान् यदा व्यापादयति पिट्टयति वा, तदापरे स्वरूपमजानानाः शेषसाधूनामपि घातप्रहारादिकं कुर्युस्तन्निमित्तमपि प्रायश्चित्तमरक्षणे द्रष्टव्यम् । शेषाणि तु स्थानानि सुगमानीति न व्याख्यानयति । यदुक्तं तस्माद्रक्षयन्ति यतनयेति । तत्र यतनामाह-

[भा.१०८८] महिड्ढीएउठनिवेसणा य आहारविगिंचणा वि उस्सग्गो ।
रक्खंताणय फिडिए अगवेसणे होंति चउगुरुगा ।।

वृ- महर्द्धिको नाम ग्रामस्य नगरस्य वा रक्षाकारी तस्य कथनीयम् । तथा उठनिवेसणा इति मृदुबन्धैस्तथा संयमनीयो यथा स्वयमुत्थानं निवेशनं च कर्तुमीशो भवति । तथा यदि वातादिना धातुक्षोभोऽस्याभूदिति ज्ञायते तदाऽपथ्याहारपरिहारेण स्निग्धमधुरमधुरादिरूप आहारः प्रदातव्यः । विगिंचणत्ति उच्चारादेस्तस्य परिष्ठापनं कर्तव्यं । यदिपुनर्देवताकृत एष उपद्रव इति ज्ञायते तदा प्रासुकैषणीयेन क्रिया कार्या तथा विउस्सग्गो इति किमयं वातादिना क्षोभ उत देवताकृत उपद्रव इति परिज्ञानाय देवताराधनार्थं कायोत्सर्गः करणीयः । ततस्तस्या आकंपितया कथिते सति तदनुरूपोयत्नो यथोक्तः स्वरूपः करणीयः । एवं रक्षतामपि यदि स कथञ्चित् स्फिटितः स्यात् । ततस्तस्य गवेषणं कर्तव्यं, अन्यथाऽगवेषणे प्रायश्चित्तं चत्वारो गुरुकाः । एष द्वारगाथासंक्षेपार्थः साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो महर्धिकद्वारं विवृणोति-

[भा.१०८९] अम्हं एत्थ पिसातो रक्खंताणंपि फिट्टइ कयाई ।
सहु परिरक्खेयव्वो महड्ढिए रक्खिए कहणा ।।

वृ- रक्षा अस्यास्तीति रक्षको रक्षायां नियुक्तो राक्षिको वा तस्मिन् रक्षके राक्षिके ग्रामस्य नगरस्य वा रक्षके कारणिके महर्द्धिके कथना कर्तव्या । तस्मै कथयितव्यमिति भावः । यथा अत्र तस्मिन्नुपाश्रये अस्माकं रक्षतामपि एष पिशाचो ग्रथिलः कदाचित् स्फिटति अपगच्छति स हु निश्चितं परिरक्षितव्यः प्रतिपन्नवत्सलत्वादिति व्याख्यातं महर्द्धिकद्वारमधुना 'उठनिवेसनाय' इति व्याख्यानयति-

[भा.१०९०] मिउ बंधेहि तहाणं जमेंति जह सो सयं तु उठेति ।
उव्वरगसत्थरहिते वाहि कुदंडे असुन्नं च ।।

वृ- मृदुबन्धैः कोमल बंधैस्तथा णमिति तं क्षिप्तचित्तं यमयन्ति बध्नन्ति यथा स्वयमुत्तिष्ठति । तु शब्दस्यानुक्तसमुच्चयार्थत्वान्निविशते च तथा स तस्मिन्नपवरके स्थाप्यते । यत्र न किमपि शस्त्रं भवति । अन्यथा स क्षिप्तचित्ततया युक्तमयुक्तं चाऽजानानः शस्त्रं दृष्ट्वा तेनात्मानं व्यापादयेत् । तस्य चापवरकस्य द्वारं बहिः कुदण्डेन वंशटोकरादिना बध्यते न येन निर्गत्यापगच्छति तथा अशून्यं यथा भवति । एवं स वारेण प्रति वारेण जाग्रियते । अन्यथा शून्यमात्मानमुपलभ्य बहुतरं क्षिप्तचित्तीभूयात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०९१] उव्वरयस्स य असती पुव्वखया सती य खंमए अगडे ।
तस्सोवरिं च चक्कं न फिड्डइ जइ उ प्फिडंतोवि ।।

वृ- अपवरकस्य असति अभावे पूर्वखनि [खा] तकूपे निर्जले स प्रक्षिप्यते तस्याप्यभावे अवटो नवः खन्यते, खनित्वा तत्र स प्रक्षिप्यते । प्रक्षिप्य च तस्याऽवटकस्योपरि चक्रं स्थाङ्गं स्थगनाय दीयते, यथा स उस्फिटन्नपि उत्प्लवमानोऽपि नस्फिटति न बहिर्गच्छति ।।

साम्प्रतमाहारविगिञ्चणेत्यादि व्याख्यानयति-

[भा.१०९२] निद्धमहुरं च भत्तं करीस सेज्जा नो जहा वाऊ ।
दव्वियधातुक्खोभे नाउं उस्सग्गतो किरिया ।।

वृ- यदि वातादिना धातुक्षोभोऽस्य सञ्जात इति ज्ञायते तदा भक्तमपथ्यपरिहारेण स्निग्धं मधुरं च तस्मै दातव्यम् । शय्या च करीषमयी कर्त्तव्या, साहि सोष्णा भवति । उष्णे च वातश्लेष्मापहारः । तथा किमयं दैविको देवेन भूतादिना कृत उपद्रव उत धातु क्षोभज इति ज्ञातुं देवताराधनाय उत्सर्गः क्रियते । तस्मिंश्च क्रियमाणे यदा कंपितया देवतया कथितं तदनुसारेण ततः क्रिया कर्त्तव्या । यदि दैविक इति; सम्प्रति 'रक्खंताण य फिटिए' इत्यादि व्याख्यानयति-

[भा.१०९३] अगडे पलायमग्गण अन्नगणावावि जेन सा रक्खो ।
गुरुगाय जं च जत्तो तेसिं च निवेयणा करणं ।।

वृ- अगडे इति सप्तमी पञ्चम्यर्थे । ततोऽयमर्थः, अवटात् कूपात् उपलक्षणमेतत् अपवरकाद्वा यदि पलायते, कथमपि ततस्तस्य मार्गणमन्वेषणं कर्तव्यम् । तथा ये तत्रान्यत्र वा आसन्ने दूरे वा अन्यगणा विद्यन्ते तेषां च निवेदनाकरणं तेषामपि निवेदनं कर्तव्यमिति भावः । यथास्मदीय एषः साधुः क्षिप्तचित्तो नष्टो वर्तते ततस्तैरपि गवेषणीयः दृष्टे च संग्रहणीयः । यदि पुनर्न गवेषयन्ति स्वगणवर्तिनोऽन्यगणवर्तिनो वा तदा तेषां प्रायश्चित्तं चत्वारो गुरु मासाः, यच्च करिष्यति षट्जीवनिकायविराधनादिकं तन्निमित्तं तेषां प्रायश्चित्तमिति ।

[भा.१०९४] छम्मासे पडियरिउं अनिच्छमाणेसु भुंज्जंतरगोवि ।
कुलगणसंघसमाए पुव्वगमेणं निवेएज्जा ।।

वृ- पूर्वोक्तेन प्रकारेण तावत्स प्रति चरणीयो यावत् षण्मासा भवन्ति, ततो यदि प्रगुणो जायते तर्हि सुन्दरमथ न प्रगुणीभूतस्ततो भूयस्तरकमपि तस्य प्रतिचरणं विधेयं । अथ तेसाधवः परिश्रान्ता भूयस्तरकं प्रतिचरणं नेच्छंति, । ततस्तेष्वनिच्छत्सु कुलगणसङ्घसमवायं कृत्वा पूर्वगमेन कल्पोक्तप्रकारेण तस्मै निवेदनीयं । निवेद्य च तदाज्ञया वर्तितव्यमिति अथ स साधुः कदाचिद्राजादीनां स्वजनः स्यात् तत इयं यतना विधेया-

[भा.१०९५] रन्नोनिवेइयंमि तेसिं वयणे गवेसणा होंति ।
ओसह वेज्जासंबंधुवस्सए तीसुवी जयणा ।।

वृ- यदि राज्ञोऽन्येषां वा स पुत्रादिको भवेत् ततो राज्ञ उपलक्षणमेतत् । अन्येषां वा स्वजनानां निवेदनं क्रियते, तथा युष्मदीय एष पुत्रादिकः क्षिप्तचित्तो जात इति एवं निवेदिते यदि ब्रुवते राजादयो मम पुत्रादिनां क्रिया स्वयमेव क्रियमाणा वर्तते । तत इहैव तमप्यानयतेति ततः स तेषां वचनेन तत्र नीयते । नीतस्य च तस्य तत्र गवेषणा भवति । अयमत्र भावार्थः । साधवोऽपि तत्र गत्वा औषध भेषजानि प्रयच्छन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिदिवसं च शरीरस्योदन्तं वहन्ति । यदि पुनः सम्बन्धिनः स्वजना वदेयुर्वयमौषधानि वैद्यं वासं वा संप्रयच्छामः । परमस्माकमासन्ने प्रवेशे स्थित्वा यूयं प्रतिचरथ तत्र यदि शोभनो भावस्तदेवं क्रियते । अथ गृहस्थीकरणाय तेषां भावः । तदा न तत्र नयनं किन्तु स्वोपाश्रय एव ध्रियते तत्र च त्रिष्वपि आहारोपधिशय्यासु यतना कर्तव्या । एष द्वारगाथासंक्षेपार्थः साम्प्रतमेनामेव विवरीषुः प्रथमतो रन्नो निवेइयंमीत्येतद्व्याख्यानयति-

[भा.१०९६] पुत्तादीनं किरियं सयमेव घरंमि कोइ कारेज्जा ।
अनुजाणंते य तहिं इमे च गंतुं पडियरंति ।।

वृ- यदि कोऽपि राजा अन्यो वा तस्य क्षिप्तचित्तस्य साधोः स्वजनो गृहे स्वयमेव साधुनिवेदनात् प्राक् आत्मनैव पुत्रादिनां क्रियां चिकित्सां कारयति तदा तस्मै निवेदिते युष्मदीयः क्षिप्तचित्तो जात इति कथिते यदि ते अनुजानते यथा तमत्रसमान यतेति ततः स तत्र नीयते नीतं च सन्तमिमेऽपि गच्छवासिनः साधवो गत्वा प्रतिचरन्ति ।।

[भा.१०९७] ओसह वेज्जे देमो पडिजग्गहणं तहिं ठियं चेव ।
तेसिं विरूव भावं न देंति मानं गिही कुज्जा ।।

वृ- कदाचित्स्वजनाः ब्रूयुः यथा औषधानि वैद्यं च वयं दद्मः । केवलमिह अस्मिन्नस्माकमासन्ने प्रदेशे स्थितं णमित्येन प्रतिजाग्रत तत्र यदि तेषां भावो विरूपो गृहस्थी करणात्मकस्ततः तेषां तथारूपं भावमिङ्गिताकारकुशला ज्ञात्वा न ददति न प्रयच्छति न तेपामासन्ने प्रदेशे नयन्तीति भावः । कुत इत्याह--मा एतं गृहस्थी कुर्युरितिहेतोः सम्प्रतितीसुवि जयणेत्येतद्व्याख्यानयति-

[भा.१०९८] आहार उवहि सेज्जा उग्गम उप्पायणा दिसु जयंता ।
वायादि खोभंमि विजयंति पत्तेयमिस्सा वा ।।

वृ- आहारे उपधौ शय्यायां च विषये उद्गमोत्पादनादिषु आदिशब्दादेषणादि दोषपरिग्रहः यतन्ते प्रयत्नपरा भवन्ति । उद्गमोत्पादनादिदोषविशुद्धाहाराद्युत्पादनेन प्रतिचारका अन्येपि च यतमानास्तं प्रतिचरन्तीति भावः । एषा यतना दैविके क्षिप्तचित्तत्वे द्रष्टव्या एवं वातादिना धातुक्षोभेऽपि प्रत्येकं प्रत्येकं सांभोगिका मिश्रा वा असांभोगिकैः संमिश्रा वा पूर्वोक्तप्रकारेण यतन्ते ।।

[भा.१०९९] पुव्वुद्दिठो उविही इह वि करेंताण होंति तह चेव ।
तेगिच्छंमि कयम्मी आदेसा तिन्निसुद्धो वा ।।

वृ- यः पूर्वं कल्पाध्ययने ग्लानसूत्र उद्दिष्टः प्रतिपादितो विधिः स एव इहापि क्षिप्तचित्तसूत्रेऽपि वैयावृत्यं कुर्वता तथैव भवति । चैकित्स्येच चिकित्सासाः कर्मणि च कृते प्रगुणीभूते च तस्मिन् त्रय आदेशा एके ब्रुवते । गुरुको व्यवहारः प्रस्थापयितव्योऽपरे ब्रुवते लघुकोऽन्ये आचक्षते लघुस्वकः । तत्र तृतीय आदेशः प्रमाणं सूत्रोपदिष्टत्वात् । अथवा स शुद्धो न प्रायश्चित्तभाक् परवशतया रागद्वेषाभावेन प्रतिसेवनादेतदेव विभावयिषरिदमाह-

[भा.११००] चउरो य हुंति भंगा तेसिं वयणंमि होंति पनवणा ।
परिसाए मज्झंमि पट्ठवणा होइ पच्छित्ते ।।

वृ- इह चारित्रविषये वृद्धिहान्यादिगताश्चत्वारो भवन्ति भङ्गास्ते चाग्रे च वक्ष्यन्ते । तेषां च भङ्गानां वचनेन गाथायां सप्तमी तृतीयार्थे भवति । पर्षदो मध्ये प्रज्ञापना प्ररूपणा तदनन्तरं यदि भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धिमात्रनिमित्तं प्रायश्चित्तं दातव्यं ततस्तस्य प्रायश्चित्तस्य लघुकस्वरूपस्य गाथायां सप्तमी षष्ठ्यर्थे भवति । प्रस्थापनादानमिति सम्प्रति चतुरो भङ्गान् कथयन् प्रायश्चित्तदाना भावं भावयति-

[भा.११०१] वड्ढति हायति उभयं, अवट्ठियं च चरणं भवे चउहा ।
खइयं तहो वसमियं मीस अहक्खायखित्तं च ।।

वृ- कस्यापि चारित्रं वर्धते, कस्यापि हीयते कस्यापि वर्धते हीयते च, कस्याप्यवस्थितं वर्तते । एते चत्वारो भङ्गाश्चारित्रस्य । साम्प्रतममीषामेव चतुर्णां भङ्गानां यथासंख्येन विषयान् प्रदर्शयति । खइयमित्यादि क्षपकश्रेणिं प्रतिपन्ने क्षायिकं चरणं वर्तते, उपशमश्रेणीतः प्रतिपतने औपशमिकं चरणहानिमुपगच्छति । क्षायोपशमिकं तद्रागद्वेषोत्कर्षापकर्षवशतः क्षीयते परिवर्धते च, । यथाख्यातं क्षिप्तं च पदैकदेशे पदसमुदायोपचारात् क्षिप्तचित्तं चारित्रं चावस्थितं यथाख्यातचारित्रे सर्वथा रागद्वेषोदयाभावात् क्षिप्तचित्तचारित्रे परवशतया प्रवृत्तेस्ततो रागद्वेषाभावात्तदेवं । यतः क्षिप्तचित्ते चारित्रमवस्थितमतो नासौ प्रायश्चित्तभागिति, पर आह ननु स क्षिप्तचित्त आश्रवद्वारेषु चिरकालं प्रवर्तितः बहुविधं वाऽसमंजसं तेन प्रलपितं लौकिकलोकोत्तरविरुद्धं च समाचरितं । ततः कथमयमप्रायश्चित्तभाक्, अत्र सूरिराह-

[भा.११०२] कामं आसवदारेसु वट्टितो पलवियं बहुविहं च ।
लोगविरुद्धाय एया लोगोत्तरियाय आइणा ।।

वृ- काममित्यनुमतौ अनुमतमेतत् यथा स आश्रवद्वारेषु प्रवर्तितो बहुविधं च तेन प्रलपितं लोकविरुद्धानि लोकोत्तरिकानि च पदानि आचीर्णानि प्रतिसेवितानि-

[भा.११०३] नय बंधहेउ विगलित्तणेण कम्मस्स उवचओ होइ ।
लोकोवि एत्थ सक्खी जह एस परव्वसो कासी ।।

वृ- तथापि न च नैव तस्य च क्षिप्तचित्तस्य बन्धहेतुविकलत्वेन बन्धहेतवो रागद्वेषास्तद्विकलत्वेन तद्रहितत्वेन कर्मण उपचयो भवति-कर्मोपचयस्य रागद्वेषाधीनत्वात् तस्य च रागद्वेषविकलत्वात् न च तद्रागद्वेष विकलत्वं वचनमात्र सिद्धं, यतो लोकोऽप्यत्रास्मिन् विषये साक्षी यथा एष सर्वं परवशोऽकार्षीदिति । ततो रागद्वेषाभावान्नकर्मोपचयस्तस्य तदनुगत्वात् । तथा चाह-

[भा.११०४] रागद्दोसानुगया जीवा कम्मस्स बंधगा होंति ।
रागादि विसेसेणय वि बंध विसेसो वि अविगीतो ।

वृ- रागद्वेषाभ्यामनुगताः सन्तो जीवाः कर्मणो बन्धका भवन्ति । ततो रागद्वेषतारतम्येन बन्धविशेषो बन्धतरतम भावोऽविगीतो विप्रतिपन्नः । ततः क्षिप्तचित्तस्य रागद्वेषाभावतः कर्मोपचयाभावः । अमुमेवार्थं दृष्टान्तेन दृढयति-

[भा.११०५] कुणमाणी वि य चिट्ठा परतंताण ट्ठिया बहुविहाओ ।
किरियाफलेण जुज्जइ, न जहा एमेव एवं पि ।।

वृ- यथा नर्तकी यन्त्रकाष्टमयी परतन्त्रा परायत्ता परप्रयोगत इत्यर्थः । बहुविधा बहुप्रकारा अपि, तुशब्दोऽपि शब्दार्थः । चेष्टा कुर्वाणा क्रियाफलेन कर्मणा न युज्यते । एवमेव अनेनैव प्रकारेण एवमपि क्षिप्तचित्तमनेका अपि विरुद्धाः क्रियाः कुर्वाणः न कर्मोपचयं पश्यति, अत्र परस्य मतमाशङ्कमानः आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११०६] जइ इच्छसि सा सेरी अचेयणा तेन से चओ नत्थि ।
जीव परिग्गहिया पुन बोंदी असमंजसं समया ।।

वृ- यदि त्वमेतदिच्छसि अनुमन्यते यथा सासेरीति देशीवचनमेतत् यन्त्रमयी नर्मकी अचेतना तेन कारणेन से तस्याश्च कर्मोपचयो नास्ति बोंदिस्तनुः पुनर्जीव परिगृहीता जीवेनाधिष्ठिता जीवपरिग्रहीतत्वाच्चावश्यं तद्विरुद्धचेष्टातः कर्मोपचय सम्भवस्ततो या सेरी दृष्टान्तेन समता आपदिता साऽसमञ्जसमयुज्यमानाऽचेतनाचेतनत्वे च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । अत्राचार्य आह-

[भा.११०७] चेयणमचेयणं वा परतत्तंतेन दोवि तुल्लाइं ।
न तयावि सेसयं एत्थ किंच भणती सुणविसेसं ।।

वृ- चेतनं वा स्यादचेतनं वा चेतनत्वाचेतनत्वविशेषस्यात्राप्रयोजकत्वात् । कथमप्रयोजकत्वमत आह- परतन्त्रत्वेन पराय्त्ततया । यतो द्वे अपि तुल्ये ततो न किञ्चिद्वैषम्यं । पर आह-न त्वया अत्र कर्मोपचयचिन्तायां कश्चिदपिमनागपि विशेषितं येन जीवपरिगृहीतत्वेऽप्येकत्र कर्मोपचयो भवत्येकत्र नेति प्रतिपाद्यमाह अत्राचार्यो भणति ब्रुते, शृणु भण्यमानं विशेषं । तमेवाह-

[भा.११०८] ननु सो चेव विसेसो जं एगमचेयणं स विन्नेयं ।
जह चेयणाविसेसो तह भणसु इमं निसामेह ।।

वृ- ननु स एवं यन्त्र नर्तकी स्वाभाविक नर्तकी दृष्टान्तसूचितो विशेष एवं शरीरं जीवपरिगृहीतमपि परायत्ततया चेष्टामानमचेतनमेवं स्वायत्ततया प्रवृत्तेः सचित्तंसचेतनमिति । परआह-यथैष चेतने विशेषो निस्संदिग्ध प्रतिपत्तिविषयो भवति । तथा भणत प्रतिपादयत आचार्यः प्राह-तत इदं वक्ष्यमाणं निशमय आकर्णय । तमेवाह-

[भा.११०९] जो पेल्लितो परेणं हेऊवसणस्स होइ कायाणं ।
तथ्य न दोसं दूच्छसि लोगेन समं तहा तं च ।।

वृ- यः परेण प्रेरितः स च कायादीनां पृथिव्यादीनां व्यसनस्य संघट्टनपरितापनादिरूपस्य हेतुः कारणं भवति । तत्र तस्मिन् परेण प्रेरित तया काय व्यसनहेतौ न त्वं दोषमिच्छसि अनात्मवशतया प्रवृत्तेः । कथं पुनर्दोषं नेच्छसीत्यत आह-लोकेन समं लोकेन सह लोके तथा दर्शनतः इत्यर्थः । तथा हि लोको यो यत्रानात्मवशतया प्रवर्तते तं तत्र निर्दोषमभिमन्यते ततो लोके तथा दर्शनतस्तमपि कायव्यसने हेतुं निर्दोषमभिमन्यताम् । यथा च तं निर्दोषमिच्छसि तथा तमपि च क्षिप्तचित्तं निर्दोषं पश्य, तस्यापि परायत्ततया तथारूपासु चेष्टासु प्रवृत्तेः । एतदेव सविशेषं भावयति-

[भा.१११०] पासंतो वि य काये अपच्चलो अप्पगं वि धारेउं ।
जह पेल्लितो अदोसो एमे वमिमंपि पासामो ।।

वृ- यथा परेण प्रेरित आत्मानं विधारयितुं संस्थापयितुमप्रत्यलोऽसमर्थः सन् पश्यन्नपि कायान् पृथिवीकायिकादीन् विराधयन् अन्निकापुत्राचार्य इवादोषो निर्दोषः । एवमेव अनेनैव प्रकारेणापरायत्ततया प्रवृत्तिलक्षणेन इममपि क्षिप्तचित्तमदोषं पश्यामः । इह पूर्वं प्रगुणीभूतस्य प्रायश्चित्तदानविषये त्रय आदेशा गुरुकादय उक्तास्ततस्तानेव गुरुकादीन् प्ररूपयति-

[भा.११११] गुरुगो गुरुतरागो अहागुरुगो य होई ववहारो ।
लहुओ लहुयतरागो अहालहुगो य ववहारो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१११२] लहुसो लहुसतरागो अहा लहुसो य होइ ववहारो ।
एएसिं पच्छित्तं वोच्छामि अहानुपुव्वीए ।।

[भा.१११३] गुरुगो य होइ मासो गुरुय तरागो य होइ चउमासो ।
अह गुरुगोच्छम्मासो गुरुगपक्खंमि पडिवत्ती ।।

[भा.१११४] तीसा य पन्नवीसा वीसा पन्नरस सेवय ।
दस पंच य दिवसाइं लहु सगपक्खंमि पडिवत्ती ।।

[भा.१११५] गुरुगं च अठमं खलु गुरुगतरागं च होइ दसमं तु ।
आहा गुरुग दुवालसमं गुरुगपक्खंमि पडिवत्ती ।।

[भा.१११६] छठं च चउत्थं वा आयंबिल एगठाण पुरिमड्ढा ।
निव्विइगं दायव्वं अह लहुसगंमि सुद्धो वा ।।

वृ- [आसां षन्नामपि गाथानां व्याख्या पूर्ववत्]

मू. (४५) *'दित्तचित्तं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए अगिलाए तस्स करणिज्जं वेयावडियं जाव ततो रोगातंकातो विप्पमुक्को । ततो पच्छा तस्स अहा लहुस्सगे नामं ववहारे पट्ठवियव्वे सिया'* ।

वृ- अस्य व्याख्या संक्षेपतः प्राग्वत् । सम्प्रति भाष्यकारो विस्तरमभिधित्सुराह-

[भा.१११७] एसेव गमो नियमा, दित्तादीनं पि होति नायव्वो ।
जो होइ दित्तचित्तो सो पवलति अनिच्छियव्वाइं ।।

वृ- एष एवानन्तरं क्षिप्तचित्तसूत्रगत एव गमः प्रकारो लौकिकलोकोत्तरिकभेदादिरूपो दीप्तानामपि दीप्तचित्तप्रभृतीनामपि नियमाद्वेदितव्यः । यदि पुनर्नानात्वं तदभिधातव्यं । तदेवाधिकृतसूत्रेऽभिधित्सुराह- 'जो होइ' इत्यादि यो भवति दीप्तचित्तः सोऽनीप्सितव्यानि बहूनी प्रलपति बहवनीप्सित प्रलपनं तस्य लक्षणं क्षिप्तचित्तस्त्वपहत चित्ततया मौनेनाप्यवतिष्ठते इति परस्परं सूत्रयोर्विशेषं इति भावः । अथ कथमेष दीप्तचित्तो भवतीति तत्कारण प्रतिपादनार्थमाह-

[भा.१११८] इति एस असंमानाखित्तो संमानतो हवति दित्तो ।
अग्गीव इंधनेहिं दिप्पइ चित्तं इमेहिं तु ।।

वृ- इति प्रागुक्तेन प्रकारेण एष क्षिप्तः क्षिप्तचित्तोऽसम्मानतो अपमानतो भवति । दीप्तो दीप्तचित्तः पुनः सम्मानतो विशिष्ट सन्माना वाप्तितो भवति । दीप्तचित्तो नाम यस्य दीप्तचित्तं तच्च चित्तं दीप्यते अग्निरिवेन्धनैरेभिर्वक्ष्यमाणैर्लाभमदादिभिस्तानेवाह-

[भा.१११९] लाभमदेनव मत्तो अहवा जेऊण दुज्जए सत्तू ।
दित्तंभि सातवाहणो तमहं वोच्छं समासेणं ।।

वृ- लाभमदेन वा मत्तः सद् दिप्तचित्तो भवति । अथवा दुर्जयान् शत्रून् जित्वा उभयस्मिन्नपि दीप्ते दीप्तचित्ते लौकिको दृष्टान्तः शातवाहनो राजा, । तमहं सातवाहनदृष्टान्तं समासेन वक्ष्ये । यथा प्रतिज्ञातमेव करोति-

[भा.११२०] महुरा दंडेनत्ती निग्गय सहस्सा अपुच्छियं कयरं ।
तस्स य तिक्खा आणा दुहागया दोवि पाडेउं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गोयावरीए नईए तडे पइठाणं नयरं । तत्थ साल(त)वाहणो राया । तत्थ सालवाहणो राया तस्स खरगओ अमच्चो । अन्नया सो सालवाहणो राया दंडनायगे आनवेइ । महुरं घेत्तूण सिग्धमागच्छ, सो य सहसा अपुच्छिऊण दंडेहिं सह निग्गतो । ततो चिंता जाया का महुरा घेतव्या । दक्खिणमहुरा उत्तरमहुरा वा । तस्स आणातिक्खा पुणो पुच्छिउं न तीरति । ततो दंडा दुहा काऊण दोसुवि पेसिया गहिया तो दोवि महुराओ ततो वद्धावगो पेसिओ । तेन गंतूण राया वद्धाविता-देव दोवि महुराती गहियातो । अन्नो आगतो देव ! पट्टदेवीए पुत्तो जातो, अन्नो आगतो देव ! अमुगत्थपदेसे विपुलो निहीपायडो जाओ । ततो उवरुवरि कल्लाणनिवेयणे जे हरिस वस विसप्पमाणहृयहियतो परवसो जातो । तओ हरिसं धरिउमवायंतो सयणिज्जं कुट्टइ खंभे आहणइ, कुड्डे विद्दवइ बहूणि य असमंजसाणि पलवति, । ततो खरगेणाम च्चेणं तमुवाएणा पडिबोहिऊ कामेण खंभा कुड्डा बहुविद्दविया रन्ना पुच्छियं केन विद्दवियं सो भणइ तुब्भेहिं । ततो मम संमुहमलीयमेवं भणतित्ति रुट्ठेण रन्ना खरगो पाएणा ताडितो, । ततो संकेइय पुरिसेहिं उप्पाडितो, अन्नत्थ संगोविओ य । ततो कम्हि पओयणे समावडिए रणा पुच्छिओ कत्थमं अमच्चो चिट्ठति । संकेतिय पुरिसेहिं कहियं देव तुम्हं अविनय कारित्ति सो मारितो । राया विसूरिउं पवत्तो, दुठु कयं मए । तयाणिं न किंपि वेइयंति, ततो सभावत्थो जातो । ताहे संकेइय पुरिसेहिं विणवितो-देव गवेसामिं जइवि कयाइं चंडालेहिं रक्खितो होज्जा । ततो गवेसिऊण आनीतो राया संतुट्ठो अमच्चेण सब्भावो कहितो । तुट्ठेणविउला भोगा दिना । साम्प्रतमक्षरार्थो विक्रियते-सातवाहनेन राज्ञा मथुराग्रहणाय दण्डस्य दलस्याज्ञप्तिः कृता ते दण्डाः सहसा कां मथुरां गृह्णीम इत्यपृष्ट्वा निर्गताः । तस्य च राज्ञ आज्ञा तीक्ष्णा । ततो भूयः प्रष्टुं न शक्नुवन्ति, । ततस्ते दण्डा द्विविधा गताः द्विधा विभज्य एकं दक्षिण मथुरायामपरे उत्तरमथुरायां गता इत्यर्थः । द्वे अपि च मथुरे पातयित्वा ते समागताः ।

[भा.११२१]　सुयजम्ममहुरपाडण निहिलंभ निवेयणा जुगवदित्तो ।
　　　सयणिज्ज खंभकुड्डे कुट्टेइ इमाइं पलवंतो ॥

वृ- सुतस्य जन्म मथुरयोः पातनं निधेर्लाभस्य च युगपन्निवेदनायां स हर्षवशात् दित्तोदित्तचित्तोऽभवत् । दीप्तचित्ततया इमानि वक्ष्यमाणानि प्रलपन्शयनीयस्तम्भकुड्यानि कुट्टयति तत्र यानि प्रलपति तान्याह-

[भा.११२२]　सच्चं भणगोयावरि पुव्वसमुद्देण साहिया संती ।
　　　सालाहण कुल सरिसं जतित्ते कूले कुलं अत्थि ॥

वृ- हे गोदावरि पूर्वसमुद्रेण साधिकृता कृतमर्यादा सती सत्यं भण-ब्रूहि यदि तव कूले सातवाहनसदृशं कुलमस्ति ॥

[भा.११२३]　उत्तरतो हिमवंतो, दाहिणतो सालवाहणो राया ।
　　　समभारभरक्कंता तेन न पलत्थए पुढवी ॥

वृ- उत्तरत उत्तरस्यां दिशि हिमवान् गिरिर्दक्षिणतः सातवाहनो राजा तेन समभारभाराक्रान्ता सती पृथिवी न पर्यस्यति । अन्यथा यद्यहं दक्षिणतो न स्यां ततो हिमवद्गिरिभाराक्रान्ता नियमतः पर्यस्येत् ॥

[भा.११२४]　एयाणि य अन्नाणि य पलवितो सो अभाणियव्वाइं ।
　　　कुसलेण अमच्चेणं, खरगेणं सो उवाएणं ॥

वृ- एतान्यवन्तरोदितानि अन्यानि च सोऽभणितव्यानि बहूनि प्रलपितवान् । ततः कुशलेन

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

खरकनाम्ना अमात्येनोपायेन प्रतिबोधयितुकामेन किमित्याह-

[भा.११२५] विद्दवियं केणंति य तुज्झेहिं पायतालणाखरए ।
कत्थत्ति मारितो सो दुठित्ति य दंसणे भोगा ।।

वृ- विद्रवितं विनाशितं समस्तं स्तम्भकुड्यादि राज्ञापृष्टं केनेदं विनाशितं । अमात्यः सम्मुखभूय सदोषं निण्ठुरं च वक्ति युष्माभिस्ततो राज्ञा कुपितेन तस्य पादेन ताडना कृता तदन्तरं संङ्केतितपुरुषैः स उत्पाटितः संगोपितश्च । ततः समागते कस्मिंश्चित् प्रयोजने राज्ञापृष्टं 'कुत्रामात्यो वर्त्तति' ? संकेतितपुरुषैरुक्तं- ' देव पुष्मत्पादानामविनयकारी मारितः ततो दुष्टं कृतं मयेति प्रभूतं विस्म(स्त)रितवान् स्वस्थीभूतेऽस्मिन् जाते संकेतितपुरुषैरमात्यस्य दर्शनं कारितं । सद्भावकथनानन्तरं राज्ञा तस्मै विपुला भोगाः प्रदत्ता इति उक्तो लौकिको दीप्तचित्तो लोकान्तरिकमाह-

[भा.११२६] महज्झयणभत्तखीरे कंबलगपडिग्गहे फलगा सड्ढे ।
पासाए कप्पट्ठे वायं काऊण वादित्तो ।।

वृ- महाध्ययनं पौण्डरीकादिकं दिवसेन पौरुष्यावासमागतम् । अथवा भक्तमुत्कृष्टं लब्ध्वा नास्मिन् क्षेत्रे भक्तमीदृशं केनापि लब्धपूर्वं, यदि वा क्षीरं चातुर्जातकसम्मिश्रमवाप्य नैतादृशमुत्कृष्टं क्षीरं केनापि लभ्यते । यदि वा कम्वलरत्नमती वोत्कृष्टमथवा विशिष्टवर्णादिगुणोपेतं अपलक्षणहीनं पतद्ग्रहं फलगत्ति यद्वा फलकं चम्पकपट्टादिकमथवा श्राद्धमीश्वरमतिदातारमुपासकत्वेन प्रतिपन्नं लब्ध्वा यदि वा प्रासादे सर्वोत्कृष्टे उपाश्रयत्वेन लब्धे, कप्पट्ठे वा इति ईश्वरपुत्रे रूपवति प्रज्ञानिधाने लब्धे प्रमोदते, प्रमोदनवशाच्च दीप्तभित्तो भवति । एतेन लाभमदेन वा मत्त इति लोकोत्तरे योजितमधुना दुर्जयान् शत्रून् जित्वेत्येतद्योजयति, वायं काउणवत्ति वादं वा परप्रवादिना दुर्जयेन् सह कृत्वा तं पराजित्यातिहर्षवशतो दीप्तो दीप्तचित्तो भवति साम्प्रतमेनामेव गाथां विनेयजनानुग्रहाय विवरिपुराह-

[भा.११२७] पुंडरियमाइयं खलु अज्झयणं कड्ढिऊण दिवसेन ।
हरिसेनदित्तवित्तो एवं होज्जा हि कोइउ ।।

वृ- कश्चित्पौण्डरीकादिकमध्ययनं खलु दिवसेन उपलक्षणमेतत् पौरुष्यादिना वा कर्षित्वा पठित्वा हर्षेण दीप्तचित्तो भवेत् । एवमध्ययनलाभेन दीप्तचित्तता ।।

[भा.११२८] दुल्लहदव्वे देसे पडिसेविय तं अलद्धपुव्वं वा ।
आहारोवहि वसही अहुणविवाहो व कप्पठो ।

वृ- दुर्लभद्रव्ये देशे तत् दुर्लभद्रव्यं केनाप्यलब्धपूर्वं । वाशब्दः समुच्चये प्रतिसेव्य लब्ध्वा दीप्तचित्तो भवति । एवमाहारे भक्तक्षीरादिके उपधौ कम्बलरत्नादिके वसतौ प्रासादादिरूपायां लब्धायां यदि वा कप्पट्ठेत्ति । ईश्वरपुत्रोऽधुना कृत्वीवाहः प्रज्ञानिधानं शिष्यत्वेन लब्ध इति हर्षेण दीप्तचित्तो भूयात् । तत्रैतेषु दीप्तचित्तेषु यतनामाह-

[भा.११२९] दिवसेन पोरिसीए व तुमए ठवियं इमेण सअट्ठेणं ।
एवस्स नत्थिगव्वो, दुम्मेहतरस्स को तुज्झ ।।

वृ- दिवसेन पौरुष्या वा त्वया पौण्डरीकादिकमध्ययनं स्थापितं पठितं तदनेन दिवसस्य पौरुष्या वा अर्धेन तथाप्येतस्य नास्ति गर्वः । तव पुनर्दुर्मेधस्तरस्यको गर्वो नैव युक्त इति भावः । एतस्मादिति अपि तव हीनप्रज्ञत्वात् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११३०] तद्दव्वस्स दुगंच्छेण दिठंतो भावणो असरिसेणं ।
पगयंमि पनवेत्ता, विज्जादि विसोहि जा कम्मं ।।

वृ- यतो दुर्लभद्रव्यं भक्तक्षीरादि तेन लब्धं तस्य द्रव्यस्य जुगुप्सनं क्रियते यथा नेदमतिशोभनममुको वाऽस्य दोष इत्यादि । यदि वा दृष्टान्तोऽन्येनापीदृशमानीतमिति प्रदर्शनं क्रियते । तस्य दृष्टान्तस्य भावना असदृशेन तस्मात् शतमानेन सहस्त्रभागेन वा यो हीनस्तेन कर्तव्या । तथा पगयंमीत्यादि प्रकृते अवमतस्स्य विशिष्टे प्रासादादिके सम्पाद्ये तथाविधं श्रावकमितरं वा प्राप्य तदभावे कस्यापि महर्द्धिकस्य विद्यादि । आदिशब्दात् मन्त्रचूर्णादिपरिग्रहः यावत् कर्मापि कार्मणमपि प्रयुज्य ततोऽवमतरस्य विशिष्टप्रासादादिसम्पादनेनेतरस्यापभ्राजना सम्पादनीया येन प्रगुणो भवति । ततः पश्चाद्वि-द्यादिप्रयोगजनितपापविशुद्धये विशोधिः प्रायश्चितं प्रतिपत्तव्येति साम्प्रतमेतदेव विवरीषुराह-

[भा.११३१] उक्कोसबहुविहीयं आहारोवगरणफलगमादीयं ।
खुड्डेणोमतरेणं आनीतो भामि(यि)तो पडणो ।।

वृ- उत्कृष्टं बहुविधिकं बहुभेदमाहारं भक्तक्षीरादिकमुपकरणं कम्बलरत्नप्रभृति, फलकं चम्पकपट्ट तिनिसपट्टादिकमादिशब्दः स्वगतानेकभेदसूचकः तथाविधश्राद्धप्रज्ञापनेन विद्यादिप्रयोगेन वा सम्पाद्य क्षुद्रेण क्षुल्लकेन गुणतोऽवमतरेण शतभागसहस्त्रभागादिना हीनेन आनीतमुपदर्श्य आनीतमुपदर्श्य सोऽपभ्राजितः क्रियते । ततः प्रगुणो भवति प्रासादादि विषये यतनामाह-

[भा.११३२] आदिठ्ठसड्ढकहणं आउट्टा अभिनवो य पासाओ ।
कयमेत्तेय विवाहे सिद्धादि सुया कइयवेणं ।।

वृ- यस्तेन श्राद्धो न दृष्टोऽदृष्टपूर्वस्तस्यादृष्टस्य श्राद्धस्य कथनं प्रज्ञापना उपलक्षणमेतत् । महर्द्धिकस्य विद्यादिप्रयोगतोऽभिमुखीकरणं वा ततस्ते आवृत्ताः सन्तस्तस्य लब्ध्यभिमानिनः समीपमागत्य ब्रुवते वयमेते क्षुल्लकेन प्रज्ञापितास्ततोऽभिनव एवकृतमात्र एव वायधारणेप्रासादो दत्तः तथा कैतवने कपटेन सिद्धादिसुतः सिद्धपुत्रादिसुताः कृतमात्रएवविवाहे उत्पादनीयाः इयमत्र भावना-सिद्धपुत्रादिकेषु प्रज्ञापनमितरस्य प्रज्ञापनं विद्यादि प्रयोगं वा कृत्वा तत्सुताः कृतमात्रवीवाहा एव व्रतार्थं तत्समक्षमुपस्थापनीया येन तस्यापभ्राजनोपजायते । तत पश्चात् शकुनादिवैगुण्यमुद्भाव्य ते मुच्यंते यदि न स्यात् तात्त्विकी व्रतश्रद्धेति वायं काऊण वेत्यत्र यतनामाह-

[भा.११३३] चरगादिपन्नवेउं पुव्वं तस्स पुरतो जिनवेंति ।
उमतरागेण ततो पगुणत्तिओ भामितो एवं ।।

वृ- चरकादिकं प्रचण्डं परवादिनमधःकृतसाधोर्वादिनासाध्यं पूर्वं प्रज्ञाप्य प्ररूपितस्याधिकृतस्य वादाभिमानिनः साधोः पुरतो अवमतरेण चरकादिकं जापयन्ति । वरवृषभास्ततः स एवमपभ्राजितः सन् प्रगुणायते प्रगुणी भवति ।

मू. (४६) *जक्खाविटं भिक्खुं गिलायमाणं नो कप्पइ, तस्सगणावच्छेदियस्स निज्जूहित्तए जाव रोगातंकातो विप्पमुक्को ततो पच्छा तस्स अहालहुस्सगं नामं ववहारेते पट्ठवियव्वे सियाइति ।*

वृ- अथास्य सूत्रस्य पूर्वसूत्रेण सम्बन्ध उच्यते-

[भा.११३४] पोग्गलअसुभसमुदतो एसणागंतुको दुवेण्हंपि ।
जक्खावेसेणं पुन नियमा आगंतुगो होइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- द्वयोः क्षिप्तचित्तदीप्तचित्तयोरेष पीडाहेतुत्वेनानन्तरमुद्दिष्टोऽशुभपुद्गलसमुदायोऽनागन्तुकः स्वशरीरसंभवी प्रतिपादितः यक्षावेशेन पुनः ग्लायति पीडा हेतुरशुभपुद्गलसमुदायो नियमादागन्तुको भवति । ततोऽनागन्तुका शुभपुद्गलसमुदयप्रतिपादनार्थमिपसूत्रारंभः प्रकारान्तरेण संबंधमाह-

[भा.११३५] अहवाभयसोगजुओ चिंतद्दितो अइहरसितोवा;
आवस्सतिजक्खेहिं, अइमत्तो होइ संबंधो ।

वृ- अथवेति प्रकारांतरोपप्रदर्शने भयशोकयुक्तो वा चिन्तार्दितो वा एतेन क्षिप्तचित्त उक्तः । अतिहर्षितो वानेन दीप्तचित्तोऽभिहितः यक्षैः परवशहृदयतया आविश्यते आलिह्यतेततः क्षिप्तदीप्तसूत्रानन्तरं यक्षाविष्टसूत्रमित्ययमन्यो भवति सम्बन्धः । अनेनैव सम्बन्धेनायातस्यास्य व्याख्या पूर्ववत् । सम्प्रति यतो यक्षाविष्टो भवति तत्प्रतिपादनार्थमाह —

[भा.११३६] पुव्वभवियवेरेणं अहवा रागेण रंगितो संतो ।
एएहि उक्खविट्ठो सेठी सप्भिलगवेसादी ।।

वृ- पौर्वभविकेन पूर्वभवभाविना वैरेण अथवा रागेण रञ्जितः सन् यक्षैराविश्यते । एताभ्यां रागद्वेषाभ्यां यक्षाविष्टो भवति यथा श्रेष्ठी द्वेष्यभार्यया भूतिकयासझिणत्ति लघुभ्राताज्येष्टभातृभार्यया द्वेष्ट्यादिभिरित्यत्रादि शब्दात् भृतिका ज्येष्ट भार्यया परिग्रहः तत्र श्रेष्ठ्याद्युदाहरणमाह- -

[भा.११३७] सेट्ठिस्स दोन्नि महिला पियाय वेस्साय वंतरीजाया ।
सामन्नंमि पयत्तं च्छलेति तं पुव्ववेरेणं ।।

वृ- एगो सेट्ठी, तस्स दो महिला । एगा पिया एगा वेस्सा । तउ जा वेसा सा अकामनिज्जाराए मरिऊणं वंतरी जाया, सिट्ठीवि तहारूवाणं थेराणमंतिए धम्मं सोच्चा पव्वइतो । सा य वंतरी पुव्ववेरेण छिद्दाणि मग्गत्ति । अन्नयामपत्तं दट्ठूण च्छलियाइतो । अक्षरार्थस्त्वयं श्रेष्ठिनो द्वे महिले । तद्यथा-एका प्रिया अपरा द्वेष्या । तत्रैकामृत्वा व्यन्तरी जाता । सा श्रामण्ये स्थितं श्रेष्ठिनं प्रमत्तं दृष्ट्वा पूर्वभववैरेण छलितवती गाथायामतीतकालेऽपि वर्तमानता प्राकृतत्वात् सम्प्रति लघुभ्रातृदृष्टान्तमाह- -

[भा.११३८] जेट्ठगभाउमहिला अज्झोवन्नाओ होइ खुड्डलिए ।
धरमाणयारियंमी पडिसेहे वंतरी जाया ।।

वृ- एगंमि गामे दो भायरो । तस्य जेट्ठस्य भारिया खुड्डलगे अज्झोववणा सा तं पत्थेइ खुड्डलगो निच्छइ भणइ-तुमं मम जेट्ठभाउयं धरमाणं न पाससि । तीए चिंतियं जीवइ ताव मे नत्थि एसो देवरोत्ति तओच्छिद्दं लहिऊण विससंचारेण मारितो नियभत्ता । ततो भणियं जस्स भयं कासी सो मओ । इयाणिं पूरेहि मे मनोरहं । तेन चिंतियं नूनमेताए मारितो जेट्ठभाउगो धिरत्थुकामभोगानमिति संवेगगतो पव्वइतो । इयरो वि दुह संतत्ता अकामनिज्जाराए मरिऊण वंतरी जाया । ओहिणा पुव्वभयं पासति दिट्ठो देवरो सामन्ने द्वितो । ततो नाहमनेन इच्छियत्ति पुव्वभववेरमनुसरंतीए । पमत्तो च्छलितो, अक्षरयोजना त्वियम्-ज्येष्ठभ्रातृमहिला क्षुल्लके लघुभ्रातरि अध्युपपन्ना जातानुरागा सा च तेन ज्येष्ठो भ्राता धरन्तं जीवन्तं न पश्यतीति प्रतिषिद्धा, मारिते प्रव्रज्याप्रतिपत्तितः प्रतिषिद्धेति व्यन्तरी जाता । अत्र पूर्वरागः पश्चाद्वेषः, भृतिका दृष्टान्तमाह —

[भा.११३९] भतिया कुडुंबिएण, पडिसिद्धा वाणमंतरी जाया ।
पवत्तं सामणम्मि पमत्तं, छलेतितं पुव्ववेरेण ।।

वृ- एगो कुटुम्बितो उरालसरीरो एगाए भइगाए उरालसरीराए पत्थितो, सा तेन नेच्छिया ततो सा गाढमज्झुववन्ना । तेन सहसंपउगमलभमाणी दुक्खसागरमोगाढा अकामनिज्जराए मरिऊणं वंतरी जाया, । सो य कुटुम्बितो तहा रूवाणं थेराणं अंतिते पव्वइतो, सो तीए आभोगितो अन्नया पमत्तं दट्ठूण च्छलियाइतो ।। अक्षरार्थस्त्वयम्-भृतिकाकर्मकारी कौटुम्बिकेनप्रतिपिद्धा व्यन्तरी जाता । ततस्तं कौटुम्बिनं श्रामण्याश्रितं प्रमत्तं सन्तं पूर्ववैरेण च्छलितेति छलितवती ।। सम्प्रत्येवं छलितस्य यतनामाह-

[भा.११४०] तस्स उ भूयविगिच्छा भूयरवावेसणं सयं वावि ।
नीउत्तमंतु भावं, नाउं किरिया जहा पुव्विं ।।

वृ- तस्य रागेण द्वेषेण वा व्यन्तरादिना छलितस्य पुनः क्रिया कर्तव्येति योगः कथमित्याह-तस्य भूतस्य नीचमुत्तमं तु भावं ज्ञात्वा । कथं ज्ञात्वेत्यतआह-यथाभिहितं पूर्वं किमुक्तं भवति कायोत्सर्गेण देवतामाकम्प्य तद्वचनतः का क्रिया कर्तव्येत्यत आह-भूतचिकित्सा भूतोच्चाटिनी चिकित्सा भूतचिकित्सा; यक्षाविष्टः किलोन्मादं प्राप्नोति ततो यक्षाविष्टसूत्रानन्तरमुन्मादप्राप्तसूत्रमाह-

मू. (४७) *उम्मायपत्तं भिक्खुं गिलायमाणं नो कप्पए तस्स गणावच्छेयस्स निज्जूहित्तए अगिलाए करणियं वेयावडियं जाव तातो रोगायंताको विप्पमुक्को ततो पच्छा लहुस्सगे नामं ववहारे पट्ठवियव्वे-सिया' इति ।।*

वृ- अस्य व्याख्या पूर्ववत् । साम्प्रतमुन्मादप्ररूपणार्थं भाष्यकारः प्राह-

[भा.११४१] उम्मातो खलु दुविहो जक्खावेसो य मोहनिज्जो य ।
जक्खावेसो उत्तो मोहेन इमो उ वोच्छामि ।।

वृ- उन्मादः खलु निश्चितं द्विविधो द्विप्रकारस्तद्यथा-यक्षावेशहेतुको यक्षावेशः कार्ये कारणोपचारात् । एवं मोहनीयकर्मोदयहेतुको मोहनीयः । च शब्दौ परस्परसमुच्चयार्थौ स्वगतानेकभेदसंसूचको वा तत्र यो यक्षावेशो यक्षावेशहेतुकः सोऽनन्तरसूत्रे उक्तो यश्च मोहेन मोहनीयोदयेन मोहनीयं स नाम येनात्मा मुह्यति । तच्च ज्ञानावरणंमोहनीयं यथा द्रष्टव्यं द्वाभ्यामप्यात्मनो विपर्यासोपादानात् तेनोत्तरत्रोच्यमानमाह च पित्तमुच्छाए इत्याद्युच्यमानं न विरोधभाक् । इमोत्ति अयमनन्तर वक्ष्यमाणतया प्रत्यक्षीभूत इव । तमेवेदानीं वक्ष्यामि ।। प्रतिज्ञातमेव निर्वाहयति-

[भा.११४२] रूवंगि दट्ठूण उम्मदो अहव पित्तमुच्छाए ।
कह रूवं दट्ठूणं हवेज्ज उम्मायपत्तो य ।।

वृ- रूपेणातिशायिना युक्तमङ्गं शरीरं यस्याः सा रूपाङ्गी । तां दृष्ट्वा कस्याप्युन्मादो भवेत् । कोप्युन्मादभाग् भूयादिति भावः । अथवा पित्तमूर्च्छाया पित्तोद्रेकेण उपलक्षणमेतत् । वातोद्रेकवशतो वा स्याद् उन्मादः, । पर आह-कथं रूपं दृष्ट्वा भवेदुन्मादप्राप्तः । सूरिराह-

[भा.११४३] दट्ठूण नडिं कोइ उत्तरवेउव्वियं मयणमत्तो ।
तेनेव य रूवेण उ उड्डंमि कयंमि निव्विणो ।।

वृ- कश्चिदल्पसत्वो नटीं दृष्ट्वा । किं विशिष्टामित्याह-उत्तरवैकुर्विकां उत्तरमुत्तरकालभाविनः स्वाभाविकमित्यर्थः । वैकुर्विकं विकुर्वणं विकुर्वस्तेन निवृत्तं वैकुर्विकं विशिष्टवस्त्रविशिष्टाभरण सुश्लिष्टतत्परिधानसमीचीनकुंकुमाद्युपलेपनजनितमतिमनोहारि रामणीयकं यस्याः सा तथा तां दृष्ट्वा मदनमत्त उन्माद प्राप्तो भवेत्तत्रेयं यतना उत्तरवैकुर्विकरूपापसारणेन तेनैव स्वाभाविकेन रूपेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यामुद्धायां कृतायां, गाथायां पुंस्त्वं प्राकृतत्वात् मानस्वरूपप्रदर्शनेन कश्चिदल्पकर्मा निर्विण्णो भवति, तद्विषयं विरागमुपपद्यते । तत एतत्कर्तव्यम्--

[भा.११४४] पणवियाओ विरूवा उम्मंडिज्जंती एतस्स पुरतो उ ।
रूववतीए उ भत्तं दिज्जइ जेणं तुं छेड्डइ ।।

वृ- अन्यच्च च यदि सा नटीस्वरूपतो विरूपा भवति ततः सा पूर्वं प्रज्ञाप्यते प्रज्ञापिता च सती तस्याधिकृतस्य तां दृष्ट्वा उन्मादप्राप्तस्य पुरत उन्मद्यते । यत्तस्या मण्डनं तत्सर्वमपनीयते । ततो विरूपरूपदर्शनतस्तस्य विरागो भवति । अथ सास्वभावतोऽपि रूपवती अतिशायिनोद्भटेन रूपेण युक्ता ततस्तस्यास्तद्भक्तं मदनफलमिश्रादिदीयते । येन तस्य पुरतश्छर्दयति उद्वमनं च कुर्वती सा किल जुगुप्सनीया भवति ततः सतां दृष्ट्वा विरज्यते इति ।।

[भा.११४५] गुज्झंगनमि य वियडं पज्जावेऊण खदियमाईणं ।
तद्दायणा विरायो होज्ज जहासाढभूतिस्स ।।

वृ- यदि पुनः कस्यापि गुह्याङ्गविषयउन्मादो भवति, । न रूपलावण्याद्यपेक्षितस्ततः क्षरकादिनां विकटं मद्यं पाययित्वा प्रसुप्तीकृतां तां प्रभूत मद्योद्गालिखरण्टितसर्वशरीरा(वयवा)नामत एव मक्षिकाभिर्भिणिभिणायमानानां तद्दायणत्ति तस्य गुह्याङ्गस्य मद्योद्गालनादिना बीभत्सीभूतस्य दर्शना क्रियते । ततो भवति दर्शनान्तरं कस्यापि महात्मनो विरागः । यथा आषाढभूतेः क्षुल्लकस्य, वातेनपित्तेन चोन्मादयतनामाह-

[भा.११४६] वाते अब्भंगसिनेह पज्जणादी तहा निवाए य ।
सक्करखीरादि हियपित्त गिच्छा उ कायव्वा ।।

वृ- वाते वातनिमित्ते उन्मादे तैलादिना शरीरस्याभ्यङ्गः क्रियते, स्नेहपायनं घृतपायनमा-दिशब्दात्तथाविधान्यचिकित्सा परिग्रहः तत्कार्यते । तथा निवाते स्थाप्यते, पित्तवशादुन्मत्तीभूतस्य शर्कराक्षीरादिभिस्तस्य चिकित्सा कर्तव्या-

***मू. (४८)** उवसग्गपत्तं भिक्खुं गीलायमाणं नो कप्पइ तस्स गणावच्छेदितस्य निज्जूहित्तए अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के । ततो पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्धः ?

[भा.११४७] मोहेन पित्ततो वा आया संचेयतो समक्खातो ।
एसो उ उवस्सग्गो इमो उअनो परसमुत्थो ।।

वृ- मोहेन मोहनीयोदयेन वेदोदयेनेत्यर्थः पित्ततो वा पित्तोदयेनेत्यर्थः । उन्मत्तः स आत्मा संचेतकः आत्मनैवात्मनो दुःखोत्पादकः समाख्यातः यच्चात्मनैवात्मनो दुःखोत्पादनमेष आत्मसंचेतनीय उपसर्गः ततः पूर्वमात्मसंचेतनीय उपसर्ग उत्कृष्टत उपसर्गाधिकारादयमन्यः परसमुत्थ उपसर्गोऽनेन प्रतिपाद्यते इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या सा च प्राग्वत् । तत्रोपसर्गप्रतिपादनार्थमाह-

[भा.११४८] तिविहो य उवस्सग्गो दिव्वो मानुस्सितो तिरिच्छो य ।
दिव्वो उ पुव्वभणितो मानुसतिरिए अतो वोच्छं ।।

वृ- त्रिविधः खलु परसमुत्थ उपसर्ग । तद्यथा-दैवो मानुषिकस्तैरश्चश्च । तत्र दैवो देवकृतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वमनन्तरसूत्रस्याधस्ताद्भणितः । अतो मानुषं तैरश्चं च वक्ष्ये । प्रतिज्ञातमेव निर्वाहयति-

[भा.११४९] विज्जाए मंतेन व चुण्णेण व जोइतो अणप्पवसो ।
अनुसासना लिहावण खमए महुरा तिरिक्खादी ।।

वृ- विद्यया वा मन्त्रेण वा चूर्णेन वा योजितः सम्बन्धितः सन् कश्चिदनात्मवशो भूयात् । तत्रानुशासनेति यथारूपो लुब्धया विद्यादिप्रयोजितं तस्यानुशासना क्रियते । यथा तपस्वी एष न वर्तते तव तं प्रतीदृशं कर्तुं एवं करणे हि प्रभूतपापोपचयसंभव इत्यादि । अथैवमनुशासितापि न निवर्तते तर्हि तस्यास्तं प्रति प्रतिविद्यया विद्वेषणमुत्पाद्यते अथ सा नास्ति तादृशी प्रतिविद्या, तर्हि लिहावणत्ति शुन्याः सागारिकं विद्याप्रयोगतस्तस्य पुरत आलेखाप्यते येन स तत् दृष्ट्वा सागरिकमिदमति बीभत्समिति जानानो विरागमुपपद्यते । एषा मानुषिक उपसर्गः; । खमगे महुरा इति मधु(थु)रायां श्रमणीप्रभृतीनां मानुष उपसर्गोऽभूत् । तं क्षपको निवारितवान् । एषोपि मानुष उपसर्गः । तैरश्चमाह-तिरिक्खो य इति तिर्यञ्चो ग्रामेयका आरण्यका वा श्रमणादीनामुपसर्गान् कुर्वन्तिते यथाशक्ति निराकर्तव्याः ।

साम्प्रतमेनामेव गाथां विवरीषुराह—

[भा.११५०] विज्जामंते चुण्णे अभिजोइ बोहियादिगहिए वा ।
अनुसासना लिहावण महुराखमकादिव बलेन ।।

वृ- विद्यामन्त्रेण चूर्णे वा अभियोजितो बोधिकास्तेना, आदिशब्दात् म्लेच्छादिपरिग्रहस्तैर्वा गृहीते यया विद्यया योजितं तस्याः प्रागुक्तप्रकारेणानुशासना क्रियते । तथा प्रतिछंत्यां प्रतिविद्या प्रयोगतस्तं प्रति विद्वषेणमुत्पाद्यते तस्याभावे पूर्वप्रकारेण लेखापनं कार्यते, बोधिकादि गृहीते पुनः मथुराक्षपकादिनेव बलेन यथाशक्ति बोधिकादेर्निवारणं कर्तव्यं विद्याद्यभियोगमेव भेदतः संप्रति प्रतिपादयति—

[भा.११५१] विद्यादभियोगो पुन दुविहो मानुस्सितो य दिव्वो य ।
तं पुन जाणंति कहं जइ नामं गिण्हए तेसिं ।।

वृ- विद्यादिभिरभियोगोऽभियुज्यमानता पुनर्द्विविधो द्विप्रकारस्तद्यथा-मानुषिको दैवश्च । तत्र मनुष्येण कृतो मानुषिको देवस्यायं तेन कृतत्वाद्दैवः । तत्र देवकृतो विद्यादिभिरभियोगः । एष एव यत्तस्मिन् दूरस्थितेऽपि तत्प्रभावात् स तथारूप उन्मत्तो जायते । अथ तं विद्याद्यभियोगं दैवं मानुषिकं वा कथं जानन्ति । सूरिराह तयोर्देवमनुष्ययोर्मध्ये यस्य नाम गृह्णाति तत्कृतः स विद्याद्यभियोगो ज्ञेयः साम्प्रतमनुसासना लिहावणेत्येतद्व्याख्यानयति—

[भा.११५२] अनुसासियंमि अट्ठिए, विद्देसं देंति तहविय अट्ठिंते ।
जक्खीए कोवीणं तस्स उ पुरओ लिहावंति ।।

वृ- येन सामान्यतः स्त्रिया पुरुषेण वा विद्याद्यभियोजितं तस्यानुशासना क्रियते । अनुशासितेप्य तिष्ठति विद्याप्रयोगतस्तं विवक्षितं साधुं प्रति तस्य विद्याद्यभियोक्तुं विद्वेषं ददत्युत्पादयन्ति वरवृषभाः तथापि च तस्मिन्नतिष्ठति यक्ष्याः शुन्याः कौपीनं तस्य पुरतो विद्याप्रयोगतो लिखापयन्ति । येन स तत् दृष्ट्वा तस्या इदं सागारिकमिति जानानो विरज्यते । सम्प्रति विद्याप्रयोगे दृढादरताख्यापनार्थमाह—

[भा.११५३] विसस्स विसमेवेह उसहं अग्गिमग्गिणो ।
मंतस्स पडिमंतो उ दुज्जनस्स विवज्जणा ।।

वृ- विषस्यौषधं विषमेव, अन्यथा विषानिवृत्तेः । एवमग्रे र्भूतादियुक्तस्यौषधमग्निः, मन्त्रस्य प्रति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्रो दुर्जनस्यौषधं विवर्जना तद्ग्रामनगरपरित्यागेन परित्यागः । ततो विद्याद्यभियोगेसाधुसाध्वीरक्षणार्थं प्रति विद्यादिप्रयोक्तव्यमिति ।

[भा.११५४] जति पुन होज्जगिलाणो निरुज्झमाणो ततो से तिगिच्छं ।
संवरियमसंवरिया उवालभंते निसिं वसभा ।

वृ- यदि पुनर्विद्याद्यभियोजितस्तदभिमुखं गच्छन् निरुध्यमानो ग्लानो भवति ततः स तस्य साधोः चिकित्सां संवृत्तां केनाप्य लक्ष्यमाणां कुर्वन्ति तथा असंवृत्ता यया विद्याद्यभियोजितं तस्या प्रत्यक्षीभूय निशि रात्रौ तामुपालभन्ते, भेषयन्ति पिट्टयंति च तावत् यावत् सा मुञ्चतीति; खमए महुरत्ति ।

अस्य व्याख्यानमाह–

[भा.११५५] थूभमहेसड्ढि समणी बोहियहरणं य निवसुय तावे ।
मज्झेण य अक्कंदे कयम्भि जुद्धेण मोएत्ति ।।

वृ- महुरानयरीए थूभो देवनिमित्तो । तस्स महिमा निमित्तं सड्ढीतो समणीहिं समं निग्गयातो रायपुत्तो य । तत्थ अदूरे आयावंतो चिट्ठेइ । ततो सड्ढी समणीतो बोहिएहिं गहियातो । तेनं आनीयातो बाहिं तं साहुं दट्ठुं अक्कंदो कतो । ततो रायपुत्तेण साहुणा जुद्धं दाऊण मोइयातो । अक्षरगमनिका त्वियम् स्तूपस्यमहे महोत्सवे श्राद्धिकाः अमणीभिः सह निर्गतास्तासां बोधिकैश्चौरैर्हरणम् । नृपसुतश्च तत्रादूरे आतापयति बोधिकैश्च तास्तस्य मध्येन नीयन्ते । ताभिश्च तं दृष्ट्वा आक्रन्दे कृते स युद्धेन स्तेनेभ्यश्चस्ता मोचयति ।

उक्तो मानुषिक उपसर्गः । सम्प्रति तैरश्चमाह–

[भा.११५६] गामेणारन्नेवा अभिभूयं संजयं तु तिरिएणं ।
थद्धं पकंपिया वा रक्खेअरक्खणे गरुगा ।।

वृ- गामेनारण्येन वा तिरश्चा अभिभूतमापादिताभिभवं संयतं च यदि वा स्तब्धं तद्भयात् स्तंभीभूतं प्रकम्पितं वा तद्भयतः प्रकम्पमानशरीरं रक्षेत् । यदि पुनर्नरक्षति सत्यपि बले ततोऽरक्षणे प्रायश्चित्तं गुरुकाश्चत्वारो गुरुका मासाः ।

मू. (४१) *साहिगरणं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेयस्स निज्जूहित्तए अगिलाए करणिज्जं वेयावडियं । जाव रोगायंकातो विप्पमुक्के ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध इति सम्बन्धप्रतिपादनार्थमाह-

[भा.११५७] अभिभवमाणो समणो परिग्गहो वासे चारितो कलहो ।
उवसामेयव्वो उ ततो अह कुज्जा दुविहभेयं तु ।

वृ- श्रमणं साधुमभिभवन् गृहस्थो यदि वा से तस्य गृहस्थस्य परिग्रहः परिजनश्चा वारितः सन् कलहं कुर्यात् ततः स कलह उपशमयितव्यः । एतत्प्रदर्शनार्थमधिकृतसूत्रारम्भः अस्य व्याख्या प्राग्वत् । अथ सोऽनुपशान्तः सन् कुर्यात्तद्विविधं द्विप्रकारं संयमभेदं जीवितभेदं चेत्यर्थ तत आह–

[भा.११५८] संयमजीवियभेदे सारक्खण साहुणो य कायव्वं ।
पडिवक्खनिराकरणं तस्स ससत्तीए कायव्वं ।।

वृ- संयमभेदे जीवितभेदे वा तेन क्रियमाणे संरक्षणं साधोः कर्तव्यम् । तथा तस्य साधोर्यः प्रतिपक्षस्तस्य निराकरणं स्व शक्त्या कत्तरव्यं कथं कर्त्तव्यमित्यत आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११५९] अनुसासनभेसण या जा लद्धी तस्स तं न हावेज्जा ।
किं वा सति सत्तीए होइ सपक्खे उवेक्खाए ।।

वृ- तस्य प्रथमतः कोमलवचनैरनुशासनं कर्तव्यं तथाप्यतिष्ठति भीषणमुत्पादनीयं । तथाप्यतिष्ठति या यस्य लब्धिः स तां न हापयेत् प्रयुंजीतेत्यर्थः । एतदेव विपक्षे फलभावोपदर्शनि द्रढयति किं वा सत्यां शक्तौ भवति स्वपक्षे स्वपक्षस्य उपेक्षा, उपेक्षया नैव किञ्चिदिति भावः केवलं स्वशक्तितः वैकल्यमुपेक्षानिमित्तं प्रायश्चित्तापतिश्च भवति । तस्मादवश्यं स्वशक्तिः परिस्फोरणीयेति ।।

मू. (५०) *सपायच्छित्तं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए अगिलाए करणिज्जं वेयावडियं जाव रोगातङ्कातो विप्पमुक्के ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्धः ? उच्यते—

[भा.११६०] अहिगरणंमि कयंमि खामिय समुवट्ठियस्स पच्छित्तं ।
तप्पढमयाभएणव, होज्जा किलंतोच वहमाणो ।।

वृ- अधिकरणे कृते क्षामिते च तस्मिन् समुपस्थितस्य प्रायश्चित्तं दीयते । ततः साधिकरणसूत्रानन्तरं सप्रायश्चित्तं सूत्रमुक्तमस्य व्याख्या प्रागवत् । सप्रायश्चित्तं भिक्खुं गिलायमाणमित्युक्तं । तत्र यथा ग्लानिर्भवति तथा प्रतिपादयति । तप्पढमयाए इत्यादि तस्याधिकृतस्य साधोः तत्प्रथमतायां प्रायश्चित्त प्रथमतायां भवेत्कथमहमेतत् प्रायश्चित्तं वोक्ष्यामीत्येवं रूपेण यदि वा वहन् तपसा क्लान्तः सन् ग्लानो भवति । तत्रेयं यतना—

[भा.११६१] पायच्छित्ते दिन्ने भीयस्स, विसज्जणा किलंतस्स,
अनुसट्ठि यं वहं तस्स, उभयेनखित्तस्स तेगिच्छं ।।

वृ- प्रायश्चित्ते दत्ते भीतः सन् यदि ग्लायति ततस्तस्यसतः क्लान्तस्य विसर्जना क्रियते प्रायश्चित्तं मुत्कलं क्रियते इति भावः । अथ वहन् क्लाम्यति ततस्तस्य वहतोऽनुशिष्टिर्दीयते, यथा मा भैषीः बहुगतं स्तोकं तिष्ठति यदि वा वयं साहाय्यं करिष्याम इत्यादि अथैवमनुशिष्यमाणोऽपि भयेन क्षिप्तचित्तो भूयात् ततस्तस्य भयेन क्षिप्तस्य सतश्चैकितस्यं चिकित्साकर्म कारयितव्यमिति ।।

मू. (५१) *भत्तपानपडियाइखिप्पं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेयगस्स निज्जूहित्तए अगिलाए करणिज्जं वियावडियं जाव रोगातंकातो विप्पमुक्के ततो पच्छा अहा लहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्धः ? उच्यते —

[भा.११६२] पच्छित्तं इत्तरितो होइ तवो वणितो उजो एस ।
आवकहियं पुन तवो होइ परिणा अनसनं तु ।।

वृ- प्रायश्चित्तं प्रायश्चित्तरूपं यदेतत्तपोऽनन्तरसूत्रे वर्णितं तत्तप इत्वरं भवति यत्पुनः परिज्ञारूपं तपोऽनशनं तत् यावत् कथिकं (तं) तत इत्वर तपः प्रतिपादनानन्तरं यावत्कथिकतपः प्रतिपादनार्थ-मधिकृतं सूत्रम् । अथवायं सम्बन्धः—

[भा.११६३] अट्ठं वा हेउं वा समणस्स उ विरहिए कहेमाणो ।
मुच्छाए विवडियस्स उ कप्पइ गहणं परिणाए ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अर्थं वा भाविप्रयोजनं हेतुं वा कस्यापि प्रयोजनस्य कारणं श्रमणस्याचार्यादिः शेषजनविरहिते प्रदेशे कथयन् मूर्च्छया विपतितस्यात्मनः प्रगुणं भवन्तमनुमन्यमानस्य कल्पते ग्रहणं परिज्ञायानशनप्रत्याख्यानस्य तत एतदर्थ प्रतिपादनार्थं सप्रायश्चित्तसूत्रानन्तरमिदं भक्तपान-प्रत्याख्यानसूत्रमनेन सम्बन्धेनायात्तस्यास्य व्याख्या । भक्तं च पानं च भक्तपाने ते प्रत्याख्याते येन स तथा क्लान्तस्य परनिपातः सुखादिदर्शनादिति भिक्षुं ग्लायन्तमित्यादि प्रागवत् । अत्र वैयावृत्यमाह–

[भा.११६४] गीयत्थाण असती सव्वसती एव कारणपरिणा ।
पानगभत्तसमाही कहणा आलोगधीरवणा ।।

वृ- गीतार्थानामसति अभावे यदि वा सर्वस्यापि साधोरशिवादिकारणत एकस्यापि साधोरभावे कारणपरिणत्ति कारणवशत एकाकिना जातेन परिज्ञाप्रत्याख्यानं भक्तपानस्य कृतं ततस्तस्य कृतभक्तप्रत्याख्यानस्य गीतार्थानामभावे यदि वा कारणत एकस्यापि साधोरभावे सीदतो योग्यपानकप्रदानेन चरमेप्सितभक्तप्रदानेन च समाधिरुत्पादनीया । कथना धर्मकथना यथाशक्ति स्वशरीरानाबाधया कर्तव्या । तथा आलोकं आलोचनं सदापयितव्यः । यदि कथमपि चिरजीवनेन भयमुत्पद्यते यथा नाद्यापि म्रियते किमपि भविष्यतीति न जानीम इति तस्स धीरापनाकर्तव्या ।

[भा.११६५] जइ वा न निव्वहेज्जा असमाही वासे तम्मि गच्छम्मि ।
करणिज्ज तत्थगते ववहारो एत्थ सुद्धो वा ।।

वृ- यदि वा प्रबलबुभुक्षावेदनीयोदयतया कृतभक्तप्रत्याख्यानतया न निर्वहेत् । न यावत्कथिकमनशनं प्रतिपालयितुं क्षम इति । यावदसमाधिर्वा तस्मिन् गच्छे तस्य वर्तते ततोऽन्यत्र गते तस्मिन् यत्कर्त्तव्यं तत्करणीयं अन्यत्र नीत्वा यद्यदुचितं तत्तस्य करणीयमित्यर्थः । पश्चादन-शनप्रत्याख्यानभङ्गविषयस्तस्य व्यवहारः प्रायश्चित्तं दातव्यम् । अथ स्वगच्छसमाधिमात्रेणान्यत्र गतस्ततः समिथ्यादुष्कृतप्रदानमात्रेण शुद्ध इति ।।

मू. (५२) *अट्ठ भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के । ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्धः ? उच्यते--

[भा.११६६] वृत्तं हि उत्तमट्ठे पडियरणट्ठा व दुक्खरे दिक्खा ।
एत्तो य तस्समीवं जइ हीरइ अट्ठजायमंतो ।।

वृ- उक्तं हि यस्मात्पूर्वं कल्पाध्ययने उत्तमार्थे उत्तमार्थं प्रतिपत्तुकामस्य द्व्यक्षरे द्व्यक्षरस्य दासस्य दीक्षा दीयते । यदि वा प्रतिचरणाय एष दीक्षितो मां ग्लानं सन्तं प्रति चरिष्यतीति निमित्तं । एतो य इत्यादि इतश्च दीक्षादानानन्तरं तस्समीपाद्यस्य समीपे दीक्षा गृहीता तस्य सकाशात् । गाथायां द्वितीया पञ्चम्यर्थे । यदि हृदये अतो अर्थजातं भवति । प्रयोजनजातमुत्पद्यते ततः सम्प्रत्यर्थे जातस्तत्रावकाशः । अनेन सम्बन्धेनायातस्यास्य व्याख्या । सा च प्राग्वत् । साम्प्रतमर्थजातं भिक्षुं ग्लायन्तमित्यत्र योऽर्थजातशब्दस्तद्व्युत्पत्तिप्रतिपादनार्थमाह–

[भा.११६७] अत्थेन जस्स कज्जं संजायं एस अट्ठजातो य ।
सो पुन संजमभावा चालिज्जंतो परिगिलाइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अर्थेन अर्थितया जातं कार्यं यस्य सम्बन्धः विवक्षायामत्र षष्ठी येनेत्यर्थः । सोऽर्थजातः गमकत्वादेवमपि समासः । उपलक्षणमेतत् । तेनैवमपि व्युत्पत्तिरवसातव्या अर्थःप्रयोजनं जातोऽस्येत्यर्थजातः; पक्षद्वयेऽपि पक्षद्वयेऽपि जातस्य परनिपातः सुखादिदर्शनात् स पुनः कथं ग्लायतीति चेदत आहः-स पुनः प्रथमतः प्रथमव्युत्पत्तिसूचितः संयमभावात् चाल्यमानः कंप्यमानः परिग्लायति । द्वितीयव्युत्पत्तिपक्षे प्रयोजनानिष्पयाग्लायति, तस्योभयस्यापि अगिलया प्रागुक्त-स्वरूपया वक्ष्यमाणं वैयावृत्यं करणीयं यावत् रोगातङ्कात् संयमभावचलनात् प्रयोजनानिष्पादनाच्च विप्रमुक्तं स्यात् । ततः पश्चात्यत्किमप्याचरितं भीषणादि तद्विषये यथा लघुस्वको व्यवहारः प्रस्थापितः स्यादिति सम्प्रति निर्युक्तिकृत् येषु स्थानेषु संयमस्थितस्याप्यर्थजातमुत्पाद्यते तान्यभिधित्सुराह—

[भा.११६८]　सेवगपुरिसे ओमे आवन्न अणत्तबोहिणे तेने ।
एएहिं अट्ठजातं उप्पज्जइ संयमट्ठियस्स ।।

वृ- सेवकपुरुषे सेवकपुरुषविषये एवमेव ओमेदुर्भिक्षे तथा आपन्ने दासत्वं समापन्ने तथा विदेशान्तरगमने उत्तमर्णेनात्ते तथा बोधिकैरपहरणे स्तेनैरपहरणे च बोधिका अनार्यम्लेच्छाः स्तेना आर्यजनपदजाता अपि शरीरापहारिणः एतैः कारणैरर्थजातं प्रयोजनजातमुत्पद्यते । संयमस्थितस्यापीति एव निर्युक्तिगाथासंक्षेपार्थः । साम्प्रतमेतामेव विवरीतु कामः प्रथमतः सेवकपुरुषद्वारमाह—

[भा.११६९]　अपरिग्गहगणियाए सेवगपुरिसो उ कोइ आलत्तो ।
सो तं अतिरागेणं पणयए अट्ठजायाय ।।

[भा.११७०]　सा रूविणित्ति काउं, रणाणीया उ खंधवारेण ।
इयरो तीए विउत्तो, दुक्खत्तो तेय निक्खंतो ।।

[भा.११७१]　पच्चागय तं सोउं, निक्खंतं बेइगंतूणं तहियं ।
बहुयंमे उवउत्तं, जइदिज्जइ तो विसज्जामि ।।

वृ- न विद्यतेपरिग्रहः कस्यापि यस्याः सा अपरिग्रहाः सा चासौ गणिका च अपरिग्रहगणिका तया कोऽपि राजादीनां सेवकः पुरुषः आलप्तः संभाषितः आलप्य च स्वगृहमानीतः, । ततः सा अर्थजाता सती तं पुरुषमतिरागेणातिरागवशात् प्रणयते प्रसादयति, अन्यदा सा गणिकारूपिणी अतिशयेन रूपवतीति कृत्वा राज्ञा स्कन्धावारेण कटकेन गच्छता आत्मना सहानीता, इतरोऽपि च सेवकपुरुषस्तया गणिकया वियुक्तो दुखार्तः प्रियाविप्रयोगपीडितो निष्क्रान्तस्तथा रूपाणांस्थविराणामन्तिकेप्रव्रज्यां प्रतिपन्नः, । सा च वेश्या राज्ञासह प्रत्यागता तं पुरुषं न पश्यति गवेषयितुमारब्धा । ततः कस्यापि पार्श्वे तं निष्क्रान्तं श्रुत्वा यत्र तत्र स तिष्ठति । तस्या वसतौ गत्वा तान् स्थविरान् ब्रूते । बहुकं प्रभूतं मम तु द्रव्यमनेनोपयुक्तमात्मोपयोगं नीतं भुक्तमित्यर्थः । तद्यदि दीयते ततो विसृजामि । एवमुक्ते यत्कर्तव्यं स्थविरै स्तदाह—

[भा.११७२]　सरभेदवणभेयं अंतद्धाणं विरेयणं वावि ।
वरधनुमयवेस पुस्सभूती कुसलो सहुमेय झाणंमि ।।

वृ- गुटिकाप्रयोगतस्तस्य स्वरभेदं वर्णविदं वा स्थविराः कुर्वन्ति । यथा सा तं न प्रत्यभिजानाति यदि वा ग्रामान्तरादि प्रेषणेन अन्तर्धानं व्यवधानं क्रियते, । अथवा तथा विधौषधप्रयोगतो विरेचनं कार्यते तेन स ग्लान इव लक्ष्यते, कृच्छ्रेणैष जीवतीति ज्ञात्वा सा तं मुञ्चति । अथवा शक्तौ सत्यां यथा

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ब्रह्मदत्तहिण्ड्यां धनुःपुत्रेण वरधनुना मृतकवेषकः कृतस्तथा निश्चलो निरुच्छ्वासः सूक्ष्ममुच्छ्वसत् तिष्ठति येन मृत इति ज्ञात्वा तया विसृज्यते, यदि वा यथा पुष्पभूतिराचार्यः सूक्ष्मे ध्याने कुशलः सन् ध्यानवशात् निश्चलो निरुच्छ्वासोऽतिष्ठन्, तथा तेनापि सूक्ष्मध्यानकुशलेन तथा स्थातव्यं येन सा मृत इत्यवगम्य विमुञ्चति एषां प्रयोगाणामभावे—

[भा.११७३] अनुसट्ठिं उच्चरंती गमंति णं मित्तनायगादीहिं ।
एवंपि अट्ठायं ते कारंति सुत्तं मि जं वृत्तं ।।

वृ- तस्या गणिकाया यानि मित्राणि ये च ज्ञातय आदिशब्दात्तदन्यस्तथाविधपरिग्रहः तैः स्थविरास्तां गमयन्ति बोधयन्ति । येनानुशिष्टिमुच्चरतिमुत्कलनं करोतीति भावः एवमपि अतिष्ठत्यां तस्यां यदुक्तं सूत्रे तत्कुर्वन्ति । विमुक्तं भवतीति स मोक्तव्य इति सूत्रे मोचनस्याभिधानात् । तथा चोक्तं-ताहे सो मोक्खेयव्वो एवं सुत्ते भणियमिति गतं सेवकपुरुषद्वारमधुना अवमद्वारमाह—

[भा.११७४] सकुटुंबो निक्खंतो अज्ज तं दारगं तु निक्खिविउं ।
मित्तस्स घरो सोच्चिय कालगतो तोवमं जायं ।

[भा.११७५] तत्थ अनोदिज्जंतो तस्स उपत्तेहिं सो ततो चेडो ।
धोलंतो आवण्णो दासत्तं तस्स आगमनं ।।

वृ- मथुरायां किल नगर्यां कोऽपि वणिक् अव्यक्तं बालं दारकं पुत्रं मित्रस्य गृहे निक्षिप्य सकुटुम्बो निष्क्रान्तः ।सोऽपि च मित्रभूतः पुरुषः कालगतः, ततो तस्मात्तस्य कालगमनानन्तरमवमं दुर्भिक्षं तस्य मित्रस्य पुत्रैः स चेडो नाद्रियमाणोऽन्यत्रान्यत्र धोलति परिभ्रमति । स च तथा परिभ्रमन् कस्यापि गृहे दासत्वमापन्नस्तस्य च पितुर्यथा विहारक्रमं विहरतस्तस्यामेव मथुरायामागमनं जातम् । तेन च सर्वं तत् ज्ञातम् । सम्प्रति तन्मोचने विधिमभिधित्सुराह—

[भा.११७६] अनुसासकहणठवियं भीसणववहारलिंग जं जत्थ ।
दूराभोगगवेसण पंथो जयणा जया जत्थ ।।

वृ- पूर्वमनुशासनं तस्य कर्तव्यं, ततो धर्मकथाप्रसङ्गेन कथनं स्थापत्या पुत्रादेः करणीयम् । एवमप्यतिष्ठति यन्निष्क्रामता स्थापितद्रव्यं तत् गृहीत्वा समर्पणीयं, तस्याभावे निजकानां तस्य वा भीषणमुत्पादनीयं यदि वा राजकुले गत्वा व्यवहारः कार्यः । एवमप्यतिष्ठति यत् यत्रलिङ्गं पूज्यं तत्तत्र परिगृह्य स मोचनीयः ।एतस्यापि प्रयोगस्याभावे दूरेणोच्छन्नस्वामिकतया दूरदेशे व्यवधानेन वा यन्निधानं तस्याभोगः कर्तव्यः । तदनन्तरं तस्य गवेषणा साक्षान्निरीक्षणं करणीयम् गवेषणया च गमने पथि मार्गे यतना यथौघनिर्युक्तावुक्ता तथा कर्तव्या । या च यत्र यतना सापि तत्र विधेया यथा सूत्रमिति द्वारगाथा संक्षेपार्थः ।साम्प्रतमेनामेव विवरीषुः प्रथमतोऽनुशासनकथनद्वारमाह—

[भा.११७७] निच्छिन्नो तुज्झ घरे रिसिपुत्तो मुंच होहिइ धम्मो ।
धम्मकह पसंगेणं कहणं थावच्च पुत्तस्स ।।

वृ- एष ऋषिपुत्रस्तव गृहेऽवमादिकं समस्तमपि निस्तीर्णोऽधुना व्रतग्रहणार्थमुद्यत इत्यमुं मुञ्च तव प्रभूतो धर्मो भविष्यति । एतावता गतमनुशासनं द्वारं । तदनन्तरं धर्मकथामारभते । धर्मकथाप्रसङ्गेन च कथनं स्थापत्या पुत्रस्य करणीयं यथा स स्थापत्या पुत्रो व्रतं जिघृक्षुर्वासुदेवेन महता निष्क्रामणमहिम्ना निष्काश्य पार्श्वस्थितेन व्रतग्रहणं कारित इति । एवं युष्माभिरपि कर्तव्यम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११७८] तहवि अइंते ठवियं विभीसणा ववहारनिक्खमं तेनं ।
तं घेतूणं निज्जइ तस्स सइए इमं कुज्जा ।।

वृ- तथापि च एवमपि वानुशासने कथने च कृते इत्यर्थः अतिष्ठति स्थापितं च देयं भीषणं वा करणीयं व्यवहारे वा समाकर्षणीयः । तत्र स्थापितं भावयति । तेन पित्रा निष्क्रामयता किमपि स्थापितं द्रव्यमस्ति तत् गृहीत्वा तस्मै दातव्यम् उपलक्षणमेतत्, तेनेदं द्रष्टव्यमभिनवः कोऽपि शैक्षक उपस्थितः । तस्य यत् किमप्यर्थजातं स्थापितमस्ति । यदि वा गच्छान्तरे यः कोऽपि शैक्षिक उपस्थितस्तस्य हस्ते यत् द्रव्यमवतिष्ठते तद्गृहीत्वा तस्मै दीयते । तस्य द्रव्यस्यासति अभावे इदं वक्ष्यमाणं कुर्यात् । तदेवाह–

[भा.११७९] नियल्लगाण तस्य व भीसणं राउले सयं वावि ।
अवरिक्कामो अम्हे कहं व लज्जा न तुज्झति ।।

[भा.११८०] ववहारेण अहयं भागं पिच्छामि बहुतरागं स ।
अच्चिय लिंगं व करे पन्नवणा दावणट्ठाए ।।

वृ- निजकानामात्मीयानां स्वजनानां भीषणं कर्तव्यं । यथा वयमविरिक्ता अविभक्तरिक्ता वर्तामहे । ततो मोचयत मदीयं पुत्रं, कथं वा कारणेन युष्माकं न लज्जा अभूत्ततो यदेवं मदीयपुत्रो दासत्वमापन्नोऽद्यापीह धृतो वर्तते, । अथैवमप्युक्ते ते द्रव्यं न प्रयच्छन्ति, । तत इदमपि वक्तव्यं राजकुलं गत्वा व्यवहारेणाप्यहं भागं बहुतरकं प्रभूततरकं ग्रहीष्यामि भवतां पार्श्वे तद्वरमिदानीं स्तोकं प्रयच्छथ, । एवं तेषां भीषणं कर्तव्यम् । यदि वा येन गृहितो वर्तते तस्य भीषणं विधेयं यदि मोचनीयं मर्हि मोचय । अन्यथा भवतस्तं शापं दास्यामि येन न त्वं नेदं वा तव कुटुम्बकमिति । एवं भीषणेऽपि कृते यदि न मुञ्चति यदि वा ते स्वजनाः किमपि न प्रयच्छन्ति तदा स्वयं राजकुले गत्वा निजकैः सह व्यवहारः करणीयः । व्यवहारं च कृत्वा भाग आत्मीयो गृहीत्वा तस्मै दातव्यः । यदि वा स एव राजकुले व्यवहारेणाकृष्यते तत्र च गत्वा वक्तव्यं यथाऽयमृषिपुत्रो व्रतं जिघृक्षुः । केनापि कपटेन धृतो वर्तते यूयं च धर्मव्यापारनिष्पन्नाः ततो यथार्थं धर्ममाचरति यथा वामीषामृषीणां समाधिरुपजायते तथा यतध्वमिति । अस्यापि प्रकारस्याभावे यत् यत्र लिङ्गमर्चितं तत्परिगृह्णाति । परिगृह्य दापनार्थं, विवक्षित बालक मोचनार्थमित्यर्थः । तल्लिङ्गधारिणां मध्ये ये महान्तस्तेषां प्रज्ञापना कर्तव्या । येन ते मोचयन्ति सम्प्रति दूराभोगेत्यादि व्याख्यानार्थमाह–

[भा.११८१] पुट्ठा वा अपुट्ठा वा चुयसामिनिहिं कहि ति तो दाही ।
घेत्तूण जाव दट्ठा पुनरवि सा रक्खणा जयणा ।।

वृ- यदि वा अवध्यादयो अवधिज्ञानेन आदिशब्दात् विशिष्ट श्रुत ज्ञानिपरिग्रहः पृष्टा वा अपृष्टा तथाविधं तस्य प्रयोजनं ज्ञात्वा च्युतस्वामिकं निधिमुत्स(च्छ)न्नस्वामिकं निधिं कथयन्ति । तदानीं यस्य तेषां तत्कथनकस्योपचितत्वात् ततो यावदर्थः यावता प्रयोजनं तद्गृहीत्वा पुनरपि तस्य निधेः संरक्षणं कर्तव्यं, प्रत्यागच्छता च यतना विधेया । सा चाग्रे स्वयमेव वक्ष्यते–

[भा.११८२] सोऊण अट्ठजायं अट्ठं पडिजग्गए आयरिओ ।
संघाडगं च देंति पडिजग्गइ णं गिलाणंपि ।।

वृ- निधिग्रहणाय मार्गे गच्छन्तमर्थजातं साधुं श्रुत्वा सांभोगिकोऽसांभोगिको वाचार्योऽर्थं प्रतिजागर्ति उत्पादयति । यदि पुनस्तस्य द्वितीयः संघाटको न विद्यते ततः सङ्घाटकमपि ददाति । अथ कथमपि स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्लानो जायते ततो ग्लानमपि संतं प्रति जागर्ति न तूपेक्षते, जिनाज्ञाविराधनप्रसक्तेः, यदुक्तमनन्तरं यतना प्रत्यागच्छता कर्तव्या तामाह--

[भा.११८३] काउं निसीहियं अट्ठजाय भावेयणं गुरुहत्थे ।
दाउण पडिक्कमणं मापेहंता मिगा एस्सा ।।

वृ- यत्रान्यगणे स प्राघूर्णक आयाति, तत्रनैषेधिक कृत्वा नमः क्षमाश्रमणेभ्य इत्युदित्वा च मध्ये प्रविशति प्रविश्य च यदर्थजातं तद्गुरुभ्य आवेदयति कथयति । आवेद्य च तदर्थजातं गुरुहस्ते दत्वा प्रतिक्रामति कस्मात् गुरुहस्ते दत्वा प्रतिक्रामति । निस्वपार्श्व एव स्थिते इति चेद्यत आह-माप्रेक्षमाणा मृगा इव मृगा अगीतार्था क्षुल्लकादयः पश्येयुर्गुरुहस्ते च स्थितं निरीक्षन्ते । अस्मद्गुरूणां समर्पितमिति विरूपसंकल्पेऽप्रवृत्तेः सम्प्रति जयणा य जाजत्थेति तद्व्याख्यानार्थमाह—

[भा.११८४] सन्नीव सावको वा वारिए देज्ज अट्ठजातस्स ।
पच्चुप्पन्ननिहाणे कारणजाए गहणसोही ।।

वृ- यत्र संज्ञी सिद्धपुत्रः श्रावको वा वर्त्तते तत्रगत्वा तस्मै स्वरूपं निवेदनीयं प्रज्ञापना च कर्तव्या । ततो यत्तत्र तेन प्रत्युत्पन्नं नवं निधानं गृहीतं वर्तते । तस्यार्थजातस्य मध्यात्कतिपयान् भागान् दद्यात् स्वयं तदानीं प्रज्ञापितो वा गीतार्थ त्वात् अस्यप्रकारस्याभावे यन्निधानं दूरमवगाढं ततस्तेन उत्खन्य दीयमानमधिकृते कारणजाते गृह्णनोपि शुद्धः भगवदाज्ञया वर्त्तते, वर्तमानात् ।

गतमवमद्वारमिदानीमापन्नद्वारमाह—

[भा.११८५] थोवंपि धरेमाणो कत्थइ दासत्तमेअ दलंते ।
परदेसंमि वि लब्भति वाणियधम्मो मगेसत्ति ।।

वृ- स्तोकमपि ऋणं शेषं धारयन् क्वचिद्देशे कोऽपि पुरुषस्ततः अदलंतेत्ति अददानः कालक्रमेण प्रवृद्धया दासत्वमेवं प्रतिपद्यते, तस्यैवं दासत्वमापन्नस्य स्वदेशे दीक्षा न दातव्या, । अथ कदाचित्परदेशे गतः सन्नविदितस्वरूपोअशिवादिकारणतो वा दीक्षितो वा भवेत् । तत्र वणिजा परदेशे वाणिज्यार्थं गतेन दृष्टो भवेत् तत्रायं किल न्यायः परदेशमपि गता वणिज आत्मीयं लभन्ते । तत एव वणिग्धर्मे व्यवस्थिते स एवं ब्रूयात् मम एष दास इति न मुञ्चिष्ये (मुंचामि) अमुमिति तत्र आत्मीयं लभन्ते । तत एवं वणिग्धर्मे व्यवस्थितेस एवं ब्रूयात् मम एष दास इति न मुञ्चिष्ये (मुंचामि) अमुमिति तत्र यत्कर्तव्यं तत्प्रतिपादनार्थं द्वारगाथामाह—

[भा.११८६] नाहं विदेस आहरणमाइ विज्जायमंतजोगाय ।
नेमित्तरायधम्मो पासंडगणे धने चेव ।।

वृ- यस्तावद्दासत्वमापन्नो वर्तते, न सोऽहं किं त्वहमन्यस्मिन् विदेशे जातस्त्वं तु सादृक्ष्यतया विप्रलब्धोऽसि । अथ स प्रभूतजनविदितो वर्तते तत एवं न वक्तव्यं किन्तु स्थापत्या पुत्राद्युदाहरणं कथनीयं । यद्यपि कदाचित्तत् श्रवणतः प्रतिबुद्धो मुत्कलयति, । आदिशब्दात् गुटिकाप्रयोगतः स्वरभेदादिकर्तव्यमिति परिग्रहः, । एतेषां प्रयोगणामभावे विद्यामन्त्रो योगा वा ते प्रयोक्तव्या यैः परिगृहीतः सन् मुत्कलयति, तेषामप्यभावे निमित्तेनातीतानागतविषयेण राजा उपलक्षणमेतदन्यो वा नगरप्रधान आवर्जनीयो येन तत्प्रभावत् स प्रेर्यते धर्मो वा कथनीयो राजादीनां येन ते आवृत्ताः सन्तस्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रेरयन्ति । एतस्यापि प्रयोगस्याभावे पाषाण्डान् सहायान् कुर्याद्यद्वा यो गण सारस्वतादिको बलीयान् तं सहायं कुर्यात् । तदभावे दूराभोगादिना प्रकारेण धनमुत्पाद्य तेन मोचयेत् । एष द्वारगाथासंक्षेपार्थः ।

साम्प्रतमेनामेव गाथां विवरीषुराह--

[भा.११८७] सारक्खएण जंपसि जातो अन्नत्थ ते वि आमंति ।
बहुजनविएणाय्यंमि उ थावच्चसुयादि आहरणं ।।

वृ- यदि प्रभूत जन विदितो न भवति यथायं तद्देशजात इति ततः एवं ब्रूयात् । अहमन्यत्र विदेशे जातस्त्वं तु साद्दक्ष्येण विप्रलब्ध एवमसमञ्जसं जल्पसि, । एवमुक्ते तेऽपि तत्रत्या आममेवमेतत् । यथायंवदतीति साक्षिणो जायन्ते, । अथ तद्देशजाततया प्रभूतजनविदितो वर्तते । ततस्तस्मिन् बहुजनविज्ञाते पूर्वोक्तं न वक्तव्यं किन्तु प्रबोधनाय स्थापत्यापुत्राद्याहरणं कथनीयम् ।

[भा.११८८] विज्जामंता जोगा अंतद्धाणं विरेयणं वावि ।
वरधनु य पुस्सभूती मुलिया सुहुमे य ज्झाणंमि ।।

वृ- विद्यादयो विद्यामन्त्रयोगाः प्रयोक्तव्या येन तैरभियोजितः सन् मुत्कलयति आहरणमादीत्यत्रादि शब्दव्याख्यानार्थमाह-गुटिकाप्रयोगतः स्वरभेदेन । उपलक्षणमेतत् । वर्णभेदं वा कारयेद्यदि वा अन्तर्धानं ग्रामान्तरप्रेषणेन व्यावधानं, विरेचनं वा ग्लानतोपदर्शनाय कारयितव्यो येन कृच्छ्रेणैष जीवतीति ज्ञात्वा । विसृज्यति यदि वा वरधनुरिव गुटिकाप्रयोगतः, पुष्पभूतिराचार्य इव सूक्ष्मध्यानवशतो निश्चलो निरुच्छ्वासस्तथा स्यात् येन मृत इति ज्ञात्वा परित्यज्यते ।

[भा.११८९] असतीए विनवेंती रायाणं सोव होज्ज अहाभिन्नो ।
तो से कहिज्जइ धम्मो अनिच्छमाणे इमं कुज्जा ।।

वृ- एतेषां प्रयोगाणाम सति-अभावे राजानं विज्ञापयन्ति यथा तपस्विनमिह परलोकनिस्पृहमेनं व्रताद्य च्यावयतीति । अथ सोऽपि राजा तेन भिन्नो व्युद्ग्राहितो वर्तते ततः से तस्य राज्ञः प्रतिबोधनाय धर्मः कथ्यते । अथ सधर्म नेच्छति ततस्तस्मिन् धर्ममनिच्छति उपलक्षणमेतत् । निमित्तेन वातीतानागतरूपेण अनावार्य(व्रिय)माणे इदं वक्ष्यमाणं कुर्यात्तदेवाह—

[भा.११९०] पासंडे व सहाए गेण्हइ तुज्झंपि एरिसं होज्जा ।
होहामोहसहाया तुब्भवि जो वा गणो बलिओ ।।

वृ- पाषण्डान्वासहायान् गृह्णाति अथ ते सहाया न भवन्ति तत इदं तान् प्रतिवक्तव्यम् । युष्माकमपीद्दशं प्रयोजनं भवेत् भविष्यति तदायुष्माकमपि वयं सहाया भविष्यामः, एवं तान् सहायान् कृत्वा तद्बलतः स प्रेरणीयो यदि वा यो गणो बलीयान् तं सहायं परिगृह्णीयात् ।।

[भा.११९१] एएसिं असतीए संतावि जया न होंति उ सहाया ।
ठवणा दूराभोगन लिंगेनवएसि उंदेंति ।।

वृ- एतेषां पाषण्डानां गणानां वा असति अभावे ये सन्तः शिष्टास्ते सहायाः कर्तव्याः । यदा तु सन्तो वा सहाया न भवन्ति, तदा ठवणत्ति निष्क्रामता या द्रव्यस्य स्थापना कृता तद्दानतः स मोचयितव्यो यदि वा दूराभोगणेन प्रागुक्तप्रकारेणाथवा यद्यत्र लिङ्गमचिरतं तेन धनमेषित्वा उत्पाद्य ददति । तस्मै वरवृषभागतमापन्नद्वारमिदानीमृणार्त्त (अनात्त) द्वारमाह—

[भा.११९२] एमेव अनेंतस्स वि तवतुलणा नवरि एत्थ नाणत्तं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं जस्स होइ भंडं सो देति ममंतिगे धम्मो ।।

वृ- एवमेव अनेनैव दासत्वापन्नगतेन द्वारेण प्रकारेण ऋणार्त्तस्यापि प्रागुक्त शब्दार्थस्यामोक्षणे यतना द्रष्टव्या । नवरमत्र धनदानचिन्तायां नानात्वं किं तदित्याह-तपस्तुलना कर्तव्या सा चैवं । स भण्यते साधवस्तपोधना अहिरण्य सुवर्णालोकेऽपियद्यस्य भाण्डंभवति सतत्तस्मै उत्तमवर्णाय ददाति, । अस्माकं च पार्श्वे धर्मस्तस्मात्त्वमपि धर्मं गृहाण एवमुक्ते स प्राह—

[भा.११९३] जोणेणकतो धम्मो तं देउ न एत्तियसमं तुलति ।
हानी जावेतहिं तावइयं विजर्थं भणय ।।

वृ- योऽनेन कृतो धर्मः सर्वं मह्यं ददातु । एवमुक्ते साधुभिर्वक्तव्यं नैतावत् दद्मो यतो नैतावत्समं-तुलति स प्राह, एकेनसंवत्सरेण हीनं प्रयच्छत, तदपिप्रतिषेधनीयंद्वाभ्यां संवत्सराभ्यां दत्त इति एवतावत् वैभाषा कर्तव्या । यावदेकेन दिवसेन कृतो योऽनेन धर्मस्तं प्रयच्छत ततो वक्तव्यं नाभ्यधिकं दत्तः दद्यः । किन्तु यावत्तद्गृहीतं मुहूर्तादि कृतेन धर्मेण तोल्यमानं समं तुलति तावत्प्रयच्छामः । एवमुक्ते यदितोलनाय ढोकते तदा विद्यादिभिस्तुला स्तंभनीया येन क्षणमात्रकृतेनापि धर्मेण सह न समं तोलयतीति धर्मतोलनं च धर्माधिकरणिकनीतिशास्त्रप्रसिद्धिमिति ततोऽवसातव्यम् ।

[भा.११९४] जइ पुन निच्छेज्ज तवं वाणियधम्मेण ताहे सुद्धोउ ।
को पुन वाणियधम्मो सामुद्दे संभवे इणमे ।।

[भा.११९५] वत्थाणाभरणाणि य सव्वं छड्डित्तु एगविदेणं ।
पोयंमि विवण्णंमि वाणियधम्मे हवेइ सुद्धो ।।

[भा.११९६] एवं इमो वि साहू तुज्जं नियगं च सारमोत्तूणं ।
निक्खंतो तुज्झ घरे । करेउ इणहं तु वाणिज्जं ।।

वृ- यदि पुनरुक्तप्रकारेण क्षणमात्रकृतस्यापि धर्मस्यालाभेन नेच्छे त्तपो गृहीतुं ततो वक्तव्यमेव वाणिग्धर्मेण वणिग् न्यायेन शुद्धः स प्राह-कः पुनर्वणिग् धर्मो येनैष शुद्धः क्रियते । साधवो वदन्ति-समुद्रे संभ्रमे गमनेऽयं वक्ष्यमाणः । तमेवाह -वत्थाणाभरणेत्यादि । यथा वणिक् ऋणं कृत्वा प्रवहणेन समुद्रसमागाढस्तत्रपोते प्रवहणे विपन्ने आत्मीयानि परकीयानि च प्रभूतानि वस्त्रान्याभरणानि च शब्दाच्छेषमपि च नानाविधं क्रियाणकं सर्वं छर्दयित्वा परित्यज्य एकवृन्देन भावप्रधानं एकशब्दः एकत्वैव वृन्दं तेन एकाकी उत्तीर्णो वणिग् धर्मे वणिग्न्याये शुद्धो भवति । न ऋणं दाप्यते । एवमयमपि साधुस्तव सक्तमात्मीयं च सारं सर्वं तव गृहे मुक्त्वा निष्क्रान्तः संसारसमुद्रादुत्तीर्ण इति शुद्धो न धनिका ऋणमात्मीयं याचितुं लभन्ते, । तस्मान्न किञ्चिदत्रतवाभाव्यमस्तीति करोत्विदानीमेष स्वेच्छया पोतवाणिज्यं पोतवणिगिव निर्ऋणो वाणिज्यमिति गतमनासद्वारम् । अधुना वोधिकस्तेन द्वारप्रतिपादनार्थमाह--

[भा.११९७] बोहिय तेनेहिं हि एवि न मग्गणा साहुणो नियमसो य ।
अनुसासनमादीतो एसेव कमो निरवसेसो ।।

वृ- बोधिकाः स्तेनाश्च प्रागुक्त स्वरूपास्तैर्हृते साधौ नियमशो नियमेन साधोर्विमार्गणं कर्तव्यम् । तस्मिंश्च विमार्गणे कर्तव्ये अनुशासनादिको अनुशिष्टिप्रदानादिको धनप्रदानपर्यन्त एष एवानन्तरोदितक्रमो निरवशेषो वेदितव्यः । सम्प्रत्युपसंहार व्याजेन शिक्षामपवादं चाह—

[भा.११९८] तम्हा अपारयत्ते दिक्खज्जाणारिए य वज्जेज्जा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्धाण अनाभोगा विदेस असिवादितुं दोवि ।।

वृ- यस्मात्परायत्तदीक्षणे अनार्यदेशगमे चैते दोषा तस्मादपरायत्तान् दीक्षयेत् । अनार्यांश्च देशान् वर्जयेत् । अत्रैवापवादमाह-अद्धाणेति अध्वानं प्रतिपन्नस्य ममोपग्रहमेते करिष्यन्तीति हेतोः परायत्तानपि दीक्षयेत् । यदिवानाभोगतः प्रव्राजयेत् विदेशस्था वा स्वरूपम जानाना दीक्षयेयुरशिवादिषु पुनः कारणेषु दोवितित्ति द्वे अपि परायत्तदीक्षणानार्यदेशगमने अपि कुर्यात् । किमुक्तं भवति । अशिवादिषु कारणेषु समुपस्थितेषु परायत्तानपि गच्छोपग्रहनिमित्तं दीक्षयेत् अनार्यानपि देशान् विहरेदिति ।

मू. (५३) *अणवट्टप्पं भिक्खुं अगिहिभूयं नो कप्पइ तस्स गणावच्छेयस्स उवट्ठावेत्तए ।*

मू. (५४) *अणवट्टप्पं भिक्खूं गिहिभूयं तस्स गणावच्छेदियस्स उवट्ठावित्तए इति ।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध उच्यते—

[भा.११९९] अट्ठस्स कारणेणं साहम्मियतेणमादिज्जइ कुज्जा ।
इइ अणवट्ठे जोगो । नियमातोयावि दसमस्सा ।।

वृ- साधर्मिकैःकारणेन प्रागुक्तेनोत्पादितो योऽर्थस्तस्य स्तैन्यमादिशब्दादन्यधार्मिकस्तैन्यादि परिग्रहः यदि कुर्यात्ततः सोऽनवस्थाप्यो भवति । एतदर्थख्यापनार्थमर्थजातसूत्रानन्तरमनवस्थाप्यसूत्रं । इति एषोऽनवस्थाप्यसूत्रस्य योगसम्बन्ध : । पाराञ्चितसूत्रस्यापि सम्बन्धमाह-नवमात्प्रायश्चित्ता-दनवस्थाप्यादनन्तरं किल दशमं पाराञ्चितनामकं प्रायश्चित्तं भवति । ततो नवमान्नवम प्रायश्चित्त-सूत्रस्यारंभः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-अनवस्थाप्यं भिक्षुमगृहीभूतमगृहस्थीकृतं नो कल्पते यस्य समीपेऽवतिष्ठते तस्य गणावच्छेदिनो गणस्वामिन उपस्थापयितुं । तथाऽनवस्थाप्यं भिक्षुंगृहीभूतं कल्पते तस्यगणावच्छेदिन उपस्थापयितुं, सम्प्रति पाराञ्चितसूत्रमाह—

मू. (५५) *पारांचियंपि भिक्खुं अगिहिभूयं नो कप्पते तस्स गणावच्छेदियस्स उवट्ठावेत्तए ।*

मू. (५६) *पारांचियं भिक्खुं गिहिभूयं कप्पइ । तस्स गणावच्छेदियस्स उवट्ठावित्तए ।।*

वृ- अस्य सूत्र द्वयस्याक्षरगमनिका प्राग्वत् । सम्प्रति भाष्यविस्तरः—

[भा.१२००] अनवट्ठो पारंचिय पुव्वं भणिया इमं तु णाणत्तं ।
गिहिभूयस्स य करणं, अकरणे गुरुगा य आणादी ।

वृ- अनवस्थाप्यः पाराञ्चित एतौ द्वावपि पूर्वं भणितौ । इदं त्वत्र नानात्वं गृहिभूतस्य गृहस्थरूपसदृशस्य करणं यदि पुनर्गृहिभूतम कृत्वा तमुपस्थापयति । तदा गृहिभूतस्याकरणे प्रायश्चित्तं गुरुकाश्चत्वारो गुरुमासाः । तथा आज्ञादय आज्ञानवस्था मिथ्यात्वविराधनादोषाः । अन्यच्च प्रमत्तं सन्तं देवताच्छलयेत् गृहिभूतस्य तु च्छलना न भवति । यस्माद्गृहीभूतं कृत्वा तमुपस्थापयेत् । गृहस्थरूपताकरणमेव भावयति--

[भा.१२०१] वसेवत्थं एगे ण्हाणादि विवज्जमवरे जुगलमेत्तं ।
परिसामज्झे धम्मं, सुणेज्जतो कहणदिक्खा ।।

वृ- एके आचार्या एवं ब्रुवते—स्नानविवर्जं वरं नेपथ्यं तस्य क्रियते, । अपरे दाक्षिणात्याः पुनरेवमाहुर्वस्त्रयुगलमात्रं परिधाप्यते, । तत्पर्षन्मध्ये आचार्यसमीपमुपगम्य ब्रुवते । भगवन् धर्मं श्रोतुमिच्छामि । ततः कहणत्ति आचार्यः धर्मं कथयति कथिते च सति सकलजनसमक्षं ब्रूते श्रद्धधामि सम्यग् धर्ममेनमिति मां प्रव्राजयत । एवमुक्ते तस्य दीक्षालिङ्ग समर्पणानन्तरं च तत्क्षणमेवोपस्थाप्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र शिष्यःप्राह-कस्मादेष गृहस्थावस्थां प्राप्यते । सूरिराह—

[भा.१२०२] उहावितो न कुव्वइ पुणो वि सो तारिसं अतीचारं ।
होइ भयं सेसाणं गिहिरूवे धम्मिया चेव ।

[भा.१२०३] किं वा तस्स न दिज्जति गिहिलिंग जेन भावतो लिंगं ।
अजढे वि दव्वलिंगे सलिंगपडिसेवणावि जढं ।

वृ- अपभ्राजितो म्लानिमापादितः सन् पुनरपि स ताद्दशमतीचारं न करोति । शेषाणामपि च साधूनां भयमुत्पादितं भवति येन तेऽप्येवं न कुर्वते तस्माद्गृहिरूपे गृहस्थतारूपस्य धर्मताधर्मादनपेता त्याज्या तस्यापाद्यमाना गृहस्थरूपतेति भावः । किंचेत्यादि किं वा केन वा केन वा कारणेन तस्य न दीयते गृहिलिङ्गं दातव्यमेव तस्य गृहिलिङ्गमित्यर्थः । येन कारणोनापरित्यक्तेऽपि द्रव्यलिङ्गे स्वलिङ्गे प्रतिसेवनात् । भावतो लिङ्ग विजढं परित्यक्तमिति सम्प्रति सूत्रकृदेवापवादमाह—

मू. (५७) *अणवट्ठप्पं भिक्खुं अगिहिभूयं वा गिहिभूयं वा कप्पइ तस्स गणावच्छेदितस्स उवट्ठावेत्तए जह । तस्स गणस्स पतियंसिवा ।*

मू. (५८) *(एवं) पारंचिय भिक्खू अगिहिभूयं वा जाव पतियंसिवा ।*

वृ- अनवस्थाप्यं भिक्षुं पारांचितं वा भिक्षुं गृहीभूतमगृहीभूतं वा कल्पते तस्स गणावच्छेदिन उपस्थापयितुं कथमित्याह-यथा तस्य गणस्य प्रीतीकं प्रीतिकरमुपस्थापनं स्यात् । तथा कल्पतेनान्यथा, इह यो गृहस्थीभूतः सन् । तावदुपस्थाप्यते । एवम स्यापवादविषयता यस्त्वगृहीभूतः सोऽपवादविषयस्तस्योत्सर्गतः प्रतिषिद्धत्वात् । तत्र यैः कारणैरगृहीभूतोऽप्युपस्थाप्यते तान्यभिधित्सुराह—

[भा.१२०४] अगिहिभूते कारइ रायनुवत्तिए पदुट्ठसमणो वा ।
पर मोयावण इच्छा दोण्ह गणाणं विवादो वा ।।

वृ- अगृहीभूतोऽगृहस्थीभूतः सन् उपस्थाप्यः क्रियते राजानुवृत्या यदि वा प्रदिष्टः स्वगणोऽथवा परैर्बलात्कारणे मोचापनं परमोचापनं यद्वा इच्छा पूर्यतेद्वयोर्गणयोर्विवाद एतैः कारणैरगृहीभूतोऽप्युपस्थाप्यते तत्र यथाराजानुवृत्त्या सोऽगृहस्थीभूतोऽप्युपस्थाप्यो भवति । तथा भाव्यते-इहानवस्थाप्यं पाराञ्चितं वा कोऽपि प्रतिपन्नस्तस्य चायं कल्पो यावदनवस्थाप्यं पाराञ्चितं वा वहति तावद्बहिः क्षेत्रादवतिष्ठते । स च बहिर्यावत्तिष्ठति तावन्नगृहस्थः क्रियते किं त्वागतः करिष्यति । बहिश्चावतिष्ठमानः स जिनकल्पिक इव भिक्षाचर्यामलेपकृद्भक्तादिग्रहणात्मिकां करोति । तस्य च तथा बहिस्तिष्ठतो यदाचार्यः करोति तथा प्रतिपादयति—

[भा.१२०५] उलोयणं गवेसण आयरिओ कुणति सव्वकालंपि ।
उप्पन्ने कारणंमि सव्वपयत्तेण कायव्वं ।।

वृ- यस्याचार्यस्य समीपेऽनवस्थाप्यं पाराञ्चितं वा प्रतिपन्नः स आचार्यः सर्वकालमपि यावन्तं कालं तत्प्रायश्चित्तं वहति तावन्तं सकलमपि कालं यावत्प्रतिदिवसमवलोकनं करोति । तत्समीपं गत्वा तद्दर्शनं करोतीत्यर्थः तदनन्तरं गवेषणं गतोऽल्पक्लाम(क्लान्त) तया तव दिवसो रात्रिर्वेति पृच्छां करोति उत्पन्ने पुनः कारणे ग्लानत्वलक्षणो सर्वप्रयत्नेन स्वयमाचार्येण कर्तव्यं भक्तपानाहरणादि ।

[भा.१२०६] जो उ उवेहं कुज्जा, आयरिओ केणई पमाएण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोवणाउ तस्स कायव्वा पुव्व निद्दिट्ठा ।।

वृ- यः पुनराचार्यः केनापि प्रमादेन जनव्याक्षेपादिना उपेक्षां कुरुते न तत्समीपं गत्वा तच्छरीरस्योदन्तं वहति । तस्य आरोपणा प्रायश्चित्तप्रदानं पूर्वनिर्दिष्टा कर्तव्या । चत्वारो गुरुकास्तस्य प्रायश्चित्तमारोपयितव्यमिति भावः । यदुक्तमुत्पन्ने कारणे सर्वप्रयत्नेन कर्तव्यं तद्भावयति—

[भा.१२०७] आहरति भत्तपानं उवत्तणमादियंति से कुणति ।
सयमेव गणाहिवती अगिलाणो सयं कुणति ।।

वृ- अथ सोऽनवस्थाप्यः पाराञ्चितो वा ग्लानोऽभवत् ततस्तस्य गणाधिपतिराचार्यः स्वयमेव भक्तं पानं वा हरति आनयति उद्वर्तनादिकमप्यादिशब्दात् परावर्तनोद्धरणोपदेशनादिपरिग्रहः स तस्य करोति । अथ जातो ग्लानो नीरोगस्ततः स आचार्य न किमपि कारयति किंतु सर्वं स्वयमेव कुरुते ।

अधुना यदुक्तमुलोयणं गवेसणत्ति तद्वयाख्यानार्थमाह-

[भा.१२०८] उभयंपि दाऊण स पडिपुच्छं वोढुं सरीरस्स य वट्टमाणिं ।
आसासइत्ताण तवो किलंतं तमेव खेत्तं समुवेंति थेरा ।

वृ- स्थविराः आचार्याः शिष्याणां प्रतीच्छकानां च उभयमपि सूत्रमर्थं चेत्यर्थः । किं विशिष्टमित्याह-सप्रतिपृच्छं पृच्छा प्रश्नः तस्याः प्रतिवचनं प्रतिवचनं प्रतिपृच्छा प्रत्युक्तौ प्रतिशब्दः सह प्रतिपृच्छा यस्य तत् सप्रतिपृच्छं सूत्रविषयेवा यद्येन पृष्टं तत्र प्रतिवचनं चेत्यर्थः दत्वा तत्सकाशमुपगम्य तस्य शरीरस्य वर्तमानमुदन्तं वहति । अल्पक्लामतां पृच्छतीति भावः । सोऽपि चाचार्यं समागतं मस्तकेन वन्दे इति फेटावन्दनकेन वन्दते । शरीरस्य चोदन्त मूर्द्धा (ध्र्धर्व) यदि तपसा क्लाम्यति तत आश्वासयति । आश्वास्य च तदेव क्षेत्रं यत्र गच्छोऽवतिष्ठते तत्रसमुपगच्छन्ति कदाचिन्नगच्छेयुरपि तत्रेमानि कारणानि ।

[भा.१२०९] गेलन्ने वि पुट्ठो अभिनव मुक्को ततो वरोगातो ।
कालम्मि दुब्बले वा कप्पे अने व वाघातो ।।

वृ- इहैकस्यापि कदाचिदेकवचनं सर्वस्यापि वस्तुन एकानेकरुपताख्यापनार्थमित्यदुष्टं आचार्यो ग्लान्येन वा स्पृष्टः स्यात् ग्लानो भवेदिति भावः । अथवा तस्मात् रोगात् अभिनवमुक्तस्तत्कालमुक्तः स्यात् ततो न गच्छेत् यदि वा काले दुर्बले न विद्यते बलं गमनाय यस्मिन् गाढातपः संभवादिना दुर्बलो ऽयेष्ठाषाडादिको दुरुशब्दोऽभाववाची तस्मिन् न गच्छेत् शरीर क्लेशसंभवात् । कज्जेअणे व वाघातो इति अत्र सप्तमी तृतीयार्थे प्राकृतत्वात्ततोऽयमर्थः । अन्येन वा कार्येण राज्ञा प्रद्वेषतो निर्विषयत्वाज्ञापनादिना व्याघातो भवेत् । ततो न गच्छेदिति अगमने चोपाध्यायः प्रेषणीयोऽन्योवा तथा चाह—

[भा.१२१०] पेसेइ उवज्झायं अन्नं गीयं च जो तहिं जोग्गो ।
पुट्ठो व अपुट्ठो वा तहाविदीवेति तं कज्जं ।।

वृ- पूर्वोक्तकारणवशतः स्वयमाचार्यस्स गमनाभावे उपाध्यायं तदभावेऽन्यो वा गीतार्थस्तत्रयोग्यस्तं प्रेषयति । स च तत्र गतः सन् तेन पाराञ्चितेन किमिति अद्य क्षमाश्रमणो नायात इति पृष्टो वा अथवा न पृष्टस्तथापि तत्कारणं कार्यं कारणं दीपयेत् तथा अमुकेन कारणेन नायात इति ।।

[भा.१२११] जाणंतामाहप्पं सयमेव भणंति एत्थ तं जोग्गो ।
अत्थि मम एव विसयो अजाणते सोव ते बेति ।।

वृ- इह यदि ग्लानीभवनादिना कारणेन क्षमाश्रमणानाभनागमनं पृष्टेनापृष्टेन वा दीपितं तदा न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमप्यन्यत्तेन वा पाराञ्चितादिना वक्तव्यम् । किं तु गुर्वादेश एवोभाभ्यां यथोदितः सम्पादनीयः । अथ राज्ञा प्रद्वेषतो निर्विषयत्वाज्ञापनादिना व्याघातो दीपितस्तत्र यदि ते उपाध्याया अन्ये वा गीतार्थास्तस्य शक्तिं स्वयमेवबुध्यन्ते । ततो जानन्तः स्वमेव तस्य माहात्म्यं तं ब्रुवते, यथा अस्मिन् प्रयोजने त्वं योग्य इति क्रियतामुद्यमः । अथ न जानते तस्य शक्तिं ततः स एव तान् अजानान् ब्रूते यथा अस्ति ममात्र विषय इति एतच्च स्वयमुपाध्यायादिभिर्वा भणितो वक्ति—

[भा.१२१२] अत्थ उ महानुभागो जहा सुहं गुणसयागरो संधो ।
गुरुगं पि इमं कज्जं मं पप्प भविस्सए लहुयं ।।

वृ- तिष्ठतु यथासुखं महान् अनुभागोऽधिकृतप्रयोजनानुकूला अचिन्त्या शक्तिर्यस्य स तथा गुणशतानामनेकेषां गुणानामाकरो निधानं गुणशताकरः सङ्घः यत इदं गुरुकमपि कार्यं मां प्राप्य लघुकं भविष्यति, समर्थोऽहमस्य प्रयोजनस्य लीलयापि साधने इति भावः । एवमुक्ते (क्तः) सोऽनुज्ञातः सन् यत्करोति तदेवाह-

[भा.१२१३] अभिहानहेतुकुसलो बहूसु नीराजितो विउ सभासु ।
गंतूण रायभवेण भणति तं राय दारट्ठं ।।

वृ- अभिधानहेतुकुशल इति अभिधानेषु शब्देषु हेतुषु साध्यगमकेषु कुशलो दक्षोऽभिधान-हेतुकुशलः शब्दमार्गे तर्कमार्गे वातीव क्षुन्न इत्यर्थः अत एव बहुषु विद्वत्सभासु नीराजितो निर्वटितः इत्थं भूतः सन् राजभवनं गत्वा तं राजद्वारस्थं प्रतीहारं भणति किं भणतीत्यत आह-

[भा.१२१४] पडिहाररुवी भण रायरूविं, तमिच्छए संजयरुविदट्ठं ।
निवेदयित्ता य स पत्थिवस्स, जहिं निवो तस्स तयं पवेसे ।।

वृ- हे प्रतीहाररुपिन् मध्ये गत्वा राजरुपिणं राजानुकारिणं भण बूहि, यथा त्वां संयतरुपी द्रष्टुमिच्छति एवमुक्तः सन् प्रतीहारस्तथैवास्य निवेदयति । निवेद्य च राजानुमत्या यत्र नृपोऽवतिष्ठते तत्र तं साधुं प्रवेशयति-

[भा.१२१५] तं पूयइत्ताण सुहासणत्थं, पुव्विंसु रायागयकोउहल्लो ।
पण्हे उराले असुए कयाई, सव्वावि आइक्खइ पत्थिवस्स ।।

वृ- तं साधु प्रविष्टं सन्तं राजा पूजयित्वा शुभासनस्थं शुभे आसने निषणभागतकुतूहलः समुत्पन्नकुतूहलोऽप्राक्षीत् । कानित्याह-प्रश्नान् उदारान् गंभीरार्थान् कदाचिदप्यश्रुतान् प्रतिहाररुपिन् इत्येवमादिकान् सचापिसाधुरेवंपृष्टः पार्थिवस्याचष्टे, किमाचष्टे इत्याह-

[भा.१२१६] जारिसयाय आरक्खा सक्कादीणां न तारिसा,
तह रायदारपालो तं पि चक्कीणपडिरुवी ।।

वृ- यादृशकाःखलु शक्रादीनामादिशब्दाच्चा सुरादि परिग्रहः आत्मरक्षा न तादृशः एष तव राजन् । द्वारपालस्तत उक्तं हे प्रतिहाररुपिन् तथा त्वमपि यादृशश्चक्री चक्रवर्त्तिः तादृशो न भवसि श्लाघ्यम-भावादत्रान्तरे चक्रवर्तिसमृद्धिराख्यातव्या । किन्तु प्रतापशौर्यन्यायानुपालनादिना तत् प्रतिरुपोऽसि तत उक्तं राजरुपिणं ब्रूहिचक्रवर्तिप्रतिरुपमित्यर्थः । एवमुक्ते राजा प्राह-त्वं कथं श्रमणानां प्रतिरुपी तत आह—

[भा.१२१७] समणाणं पडिरुवी जं पुच्छसि राय तं कहमहंति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरतियारा य समणा न तदाहं तेन पडिरूवं ।।

वृ- यत्त्वं राजन् पृच्छसि अथ कथं त्वं श्रमणानां प्रतिरुपी तदहं कथयामि । यथा श्रमणा भगवन्तो निरतिचारा न तथाहं ते श्रमणानां प्रतिरुपी न तु साक्षात् श्रमण इति प्रतिरुपित्वमेव भावयति ।।

[भा.१२१८] निव्वूढोमि नरेसर खेत्तेविजईण अत्थिउं न लभे ।
अतियारस्स विसोही पकरेमि पमायमूलस्स ।।

वृ- हे नरेश्वर पृथिवीपते! प्रमादमूलस्यातिचारस्य सम्प्रति विशोधिं करोमि, तां च कुर्वन् निर्यूढोऽस्मि निष्कासितोऽस्मि । सत आस्तामन्यत् क्षेत्रेऽपि यतीनामहं स्थातुं न लभे, ततः श्रमण प्रतिरुप्यमिति राजाप्राह-कस्त्वया कृतोतीचारः का वा तस्य विशोधिरेवं पृष्टे यत्कर्तव्यं तदाह–

[भा.१२१९] कहणा उट्टणा आगमन पुच्छणं दीवणाय कज्जस्स ।
वीसज्जियंति य मया हासुस्सितो भणति राया ।।

वृ- कथनं राज्ञा पृष्टस्य सर्वस्याप्यर्थस्य प्रसङ्गतोऽन्यस्यापि यथा प्रवचनप्रभावना भवति । तत आवर्तनमाकम्पनं राज्ञो भक्ती भवनमिति भावः । तदनन्तरमागमनप्रच्छन्नमागमनकारणस्य प्रश्नः । केन प्रयोजनेन यूयमत्रागताःस्थ, अत्रान्तरे येन कार्येण समागतस्तस्य दीपना प्रकाशना, ततो राजा हासोस्सितो त्ति हासेन उत्सृता हृष्टोद्भासो स्मितो हसितमुखप्रहृष्टश्च सन्नित्यर्थः । भणति यथा मया विसर्जितं मुत्कलितमिति । अथ किं तत्कार्यं यस्य राज्ञो मुत्कलनं कृमित्यत आह–

[भा.१२२०] वायपरायणकुवितो चेइयतद्दव्वसंजत्ती गहणो ।
पुव्वत्ताण चउण्हण्हवि कज्जाण हविज्ज अन्नयरं ।।

वृ- वादे पराजयेन कुपितः स्यात् अथवा चैत्यं जिनायतनं किमपि तेनावष्टब्धं स्यात् ततस्तन्मोचा क्रुद्धोभवेत्, । यदि वा तत्द्रव्यस्य ग्रहणेऽथवा संयत्याग्रहणे ततः पूर्वोक्तानां कल्पाध्ययनोक्तानां चतुर्णा निर्विषयित्वा ज्ञापनादीनां कार्याणामन्यतरत् कार्यं भवेत् ।।

[भा.१२२१] संघो न लहति कज्जं लद्धं कज्जं महानुभागेनं ।
तुज्झं तु विसज्जमी, सोविय संघोत्ति पूएइ ।।

वृ- निर्विषयित्वाऽज्ञापनमुत्कलनादिलक्षणंकार्यं सङ्घो न लभते । किन्तु तेनानवस्थाप्येन पाराञ्चितेन वा महानुभागेन लब्धं, न च स एवं कार्यलाभेऽपि गर्वमुद्वहति यत आह-तुज्झं तु इत्यादि राजा प्राह-युष्माकं तु निश्चितं प्रभावेनाहं पूर्वग्राहं विसृजाभि नान्यथा सोऽपि ब्रूते-राजन् कोऽहं कियान्मात्रो वा गरीयान् सङ्घो भट्टारकस्तत्प्रभावादहं किञ्चिदज्ञ स्तस्मात्सङ्घमाहूय क्षमयित्वा च यूयमेवं ब्रूथ-मुत्कलितं मया युष्माकमिति सङ्घं पूजयति । ततः किमित्याह–

[भा.१२२२] अब्भत्थितो व रणा, सयं व संघो विसज्जयति तुट्ठो ।
आदिमज्झवसाने सव्वाविदोसो धुओ होति ।।

वृ- अभ्यर्थितो वा राज्ञा सङ्घो यदि वा स्वयमपि सन्तुष्टः सङ्घो विसर्जयति किमुक्तं भवति । यद्दषूढं शेषं सर्वं प्रसादेन मुक्त्वा सोऽगृहस्थीभूत एवोपस्थाप्यते इति एतदेवाह-सव्वापि दोषो धुतः प्रकम्पितः प्रसादेन स्फटित इत्यर्थः । आदौ मध्ये अवसाने वा भवति राजानुवृत्तिद्वारं गतम् ।

इदानीं प्रद्विष्ट स्वगणद्वारमाह–

[भा.१२२३] स गणो य पदुट्ठो से आवणो तं च कारणं नत्थि ।

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

एएहिं कारणेहिं य गिहिब्भूते उवट्ठवणा ।।

वृ- स तस्याचार्यस्य स्वगणः प्रसिद्धः सन् ब्रूते । यथा मुकेन कारणेनैष पाराञ्चितप्रतिपत्त्या गृहिभूतत्वमापन्न इति तच्च कारणं तस्याचार्यस्य नास्ति । एताभ्यां कारणाभ्यां स्वगणप्रद्वेष कारणाभाव-लक्षणाभ्यामगृहीभूते अगृहस्तीभूतस्य उपस्थापना क्रियते । एष गाथाक्षरार्थमाह । भावार्थस्त्वयम्-एगा तरुणी बहुसयणं घेतुं पव्वइया, अन्नया ताए संजतीए आयरितो उभासिओ आयरिएण नेच्छिया, ताहे सा पदोसमावन्ना आयरियस्स तेसिं सयणाणं पव्वइयाणं कहेइ मं एस आयरितो उवसग्गेइ, ताहे ते संजतीए नियल्लग पव्वइया आयरियस्स पउड्डा भणंति एस आयरितो पारंचिए गिहिभूतो आ भवति, ततो आयरितो अन्नं गणं गंतुं सव्वं जहट्ठियं परिकहेइ, सोय जंगणं गतो, ते तं कज्जं परमत्थं जाणे त्ता तेसिं गमनं रोहेहित्ति, खेत्तस्सबाहिं काऊण तेवि खेत्तस्स बहि ट्ठिया, मा तेसिं अब्भक्खाणइ, त्तान मिच्छारुपा इच्छा सफला होइत्ति, अगिहिभूयं केयवेण उवट्ठावेंति, तदेवाह—

[भा.१२२४] उहा सणं पडिसिद्धा बहु सयणा देज्ज त्थो भगवत्तिनी ।
तं चावणमन्नत्थ कुणह गिहियंति तेबेंति ।।

[भा.१२२५] ते नाऊण पउट्ठे माहोहिति ते मिगस्स तरउत्ति ।
मिच्छिच्छा मासफला होहित्ति, तोसितो अगिहिभूतो ।।

वृ- काचिद्व्रतिनी बहुस्वजनाऽवभासते याचते, प्रतिसिद्धा सतीच्छोभगमिति अभ्याख्यानं दद्यात् । कालत्रयेऽपि सप्तमीति दत्तवती तथाभ्याख्यानसम्पादितं प्रायश्चित्तमन्यत्र गणे स आचार्यो वहति, तेच संयती स्वजनाः प्रद्विष्टा ब्रुवते कुरुतैनमाचार्यं गृहिकं गृहस्थीभूतमिति, । ते च गणान्तरस्थविरास्तान् प्रद्विष्टान् ज्ञात्वा मा तेषां गम्यतरः पश्चादभूर्दिति तेऽपि कैतवेन क्षेत्राद्बहिस्तत्समीपेस्थिताः तथा मा तेषां मिथ्या रुपा इच्छा सफला भवेदिति । सोऽगृहीभूत एवोपस्थाप्यते, ।।

गतं स्वगणप्रद्विष्टद्वारमधुना परमोचापन द्वारमाह-

[भा.१२२६] सोउं गिहिलिंगकरणं अनुरागेणं भणंति गीयत्था ।
मागीयं कुणह गुरुं अह कुणह इमं निसामेह ।।

[भा.१२२७] विद्धंसामो अम्हे एवं ओहावणे जइ गुरुणं ।
एएहिं कारणेहिं अगिहिभूते उवट्ठवणा ।।

वृ- एगो बहुसिस्सो आयरितो पडिसेवणाए गिहिभुतत्तमावण्णो सो अन्नं गणं गंतु अलोएइ । तेहिं गिहिभूतो कट्ठिमाढत्तो ततो तस्स सीस्सा भणंति-मा अम्हं गुरुंगिहिभूयं कुणइ, जइ पुन अम्हं गुरुणमेवं उहावणा कीरइति तो अम्हे सव्वे उ निक्खमिस्सामो । ततो तेसिं अपत्तियं माहोहित्ति अगिहिभूतो चेव सोउवट्ठाविज्जत्ति ।। अक्षरगमनिका-आचार्यस्य गृहलिङ्ग करणं श्रुत्वा तस्य शिष्या अगीतार्था अनुरागेण भणन्ति । मा गृहिकमस्मदीयं गुरुं कुरुत, अथ करिष्यथ तत इदं निशमयत आकर्णयत । एवमपभ्राजना यदि गुरुणां ततो वयं विध्वंसामोत्ति उन्निष्क्रमिष्यामः । एतेन खल्वनन्तरोदितेन कारणेन अगृहीभूतस्य तस्योपस्थापना गतं परमोचापनद्वारमिदानीमिच्छागणद्वयविवादे इति द्वारमाह—

[भा.१२२८] अनोनेसु गणेसुं वहंति तेसि गुरवो अगीयाणं ।
ते बिंति अनमनं किह काहिह अम्ह थेरत्ति ।।

वृ- द्वौ गणौ तयोश्च द्वयोरपि गणयोः साधवोऽगीतार्थास्तेषां चतुरुपस्थापनार्हं प्रायश्चित्तस्थानमापन्नौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरमेकोऽगृहिभूतोपस्थापनार्हमपरोगृही भूतोपस्थापनार्हतौ च परस्परं गणयोः प्रतिपद्येते तद्यथा-एकोऽपरस्मिन् गणे अपरोपि तस्मिन् एवमन्योन्यस्य गणयोस्तेषामगीतार्थानां गुरु प्रायश्चितं वहतस्ते गणाः परस्परं ब्रुवते-कथमस्माकं स्थविरान् करिष्यथ । किं-गृहीभूतान् अगृहीभूतान्वातत्र यो गृहिभूतो-पस्थापनार्हं प्राप्त स्तद्गणं प्रतीतरे ब्रुवते गृहीभूतं करिष्यामः ।

[भा.१२२९] गिहिभूतेत्तिय उत्ते अम्हेवि करेमो तुज्झगिहीभूतं ।
अगिहिं दोन्निवि मए भणंति थेरा इमं दोवि ।।

[भा.१२३०] नविसुज्झेमो अम्हे अगिहिभूया तहाविनिच्छेसु ।
इच्छा संपूरिज्जइ गणपीतिकारगेहिं तु ।।

वृ- गृहीभूतं करिष्याम इत्युक्ते इतरे वदन्ति वयमए तवाचार्यं गृहिभूतं करिष्यामः । तत्रैवं परस्परं विवादे तान् द्वयानपि मृगान् अगीतार्थान् भणन्ति । द्वावप्यगृहिभूतौ वयमुपस्थापयिष्यामः, । इतरौ च द्वावप्याचार्याविदं ब्रूतः न वयमगृहिभूताः शुद्ध्यामः तस्माद्गृहीभूता क्रियामहे इति । एवं यद्यप्य गृहीभूतोपस्थापनं तेनेच्छन्ति तथापि तेषु तथा अनिच्छत्स्वपि गणप्रीतिकारकैर्महद्भिः स्थविरैः सं ति तेषां द्वयानामपि गणसाधूनामिच्छा पूर्यते द्वावप्यप्रीति परिहारार्थमगृहस्थीभूतावुपस्थाप्यते इत्यर्थः ।।

मू. (५९) *दोसाहम्मिया एगतो विहरंति, तेहिं एगे तत्थ अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोइज्जा अहणं भंते ! अमुएणं साहुणा सद्धिं इमियम्मिकारणम्मि मेहुण पडिसेवी. पच्चयहेउं च सयं पडिसेविय भणति, तत्थपुच्छियव्वे किं पडिसेवी ? अपडिसेवी ? सेय वएज्जा पडिसेवी परिहारपत्ते; सेय वएज्जाणो पडिसेवी नो परिहारपत्ते जंसेपमाणं वदति सेच पमाणा उ घेतव्वे, सिया से किमाहु भंते ! सच्चपइणा ववहारा ।*

वृ- अथास्य सूत्रस्य पूर्वं सूत्रेण सहकः सम्बन्ध स्तत आह–

[भा.१२३१] पुव्वं वतेसु ठविए रायनियत्तं अविसहं कोइ ।
उभो भविस्सत्ति इमो उ च्छोभग सुत्तसंबंधो ।।

वृ- अनन्तरे अनवस्थाप्यसूत्रे द्वयोर्मद्ये कोऽपिपूर्वव्रते, स्थापितः स्यात् उपस्थापितः स्यात् इत्यर्थः । अपरं पश्चात् तत्र योऽसौ पूर्वमुपस्थापितः पश्चादुपस्थापितस्य रत्नाधिको भवति; स च पश्चादुपस्थापितः कोऽपि पूर्वं व्रतेषु स्थापितस्य रत्नाधिकत्वमविषहमानश्चच्छिद्राणि प्रेक्षते, प्रेक्षमाणश्च कदाचिच्छिद्र-मुपलभ्यायमवमो लघुर्मम भविष्यतीति बुद्ध्या च्छोभकमयाख्यानं ददाति, तत एतदर्थप्रतिपादनार्थ-मवस्थाप्यपाराञ्चितसूत्रानन्तरमधिकृतमभ्याख्यानसूत्रं प्रवृत्तमित्येष स्थोभकः सूत्रसम्बन्धः, अथवान्यसंबंधः ।

[भा.१२३२] पीतिय पडिवक्खो वा अचियत्तणेण च्छोभगं देज्जा ।
पच्चयहेउं च परे सयं च पडिसेवियं भणइ ।।

वृ- अधस्तनानन्तर सूत्रेऽभिहितमिदं यथा तस्य गणस्य प्रीतिकं भवति, । तथोपस्थापनीयःतस्य च प्रीतिकस्य प्रतिपक्षो वा शब्दः सम्बन्धस्य प्रकारान्तरोपदर्शने अचियत्तमप्रीतिकमचियत्तंति वा अपियत्तन्ति वा एगट्ठमिति वचनात् । तेन प्रीतिकेन च्छोभकमभ्याख्यानं दद्यादिति पूर्वं सूत्रानन्तर-मस्याभ्याख्यानसूत्रस्योपनिपातः । अनेन सम्बन्धेनायातस्यास्य व्याख्या द्वौ साधर्मिकौ सांभोगिका-वेकत एकेन संघाटकेन विहरतः । तत्र तयोर्द्वयोर्मध्ये एक इतरस्याभ्याख्यानप्रदाननिमित्तमन्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरदकृत्यस्थानं मैथुनादिकं प्रतिसेव्य प्रतिसेवितमभ्युपगतस्य गुरुणामन्तिके आलोचयेत् आलोचनाप्रकारमाह-अहणमिति वाक्यालङ्कारे भदन्त! अमुकेन साधुना सार्धमस्मिन् कारणे मैथुनादिके प्रतिसेवी। किमुक्तं भवति। तेनानेन मैथुनादिना कारणेन चारित्रप्रतिकूलक्रियासेवनाभाग् जात इति। अथ स कस्मादात्मानं प्रति सेवितवंतमभ्युपगच्छति न परस्यैव केवलस्याभ्याख्यानं ददाति तत आह-पच्चवहेउं चेत्यादि। परेषामाचार्याणामन्येषां च साधूनामेष सत्यं वदत्यन्यथा को नामात्मानं प्रतिसेवितमभिमन्यत इति प्रत्ययो विश्वासः स्यादिति हेतोः स्वयमपि च प्रतिसेवितमिति भणति,। एव मुक्तेयस्याभ्याख्यानमदायि स प्रष्टव्यः। किं भवान् प्रतिसेवी न वा, तत्र यदि स वदेत् प्रतिसेवी ततः स परिहारप्राप्तः स्यात् परिहारतपोभाक् क्रियते,। उपलक्षणमेतत् च्छेदादिप्रायश्चित्तभागपि क्रियते इति द्रष्टव्यः। अथ स वदेत् नाहं प्रतिसेवी तर्हि न परिहारप्राप्तः स्यात्, न परिहारतपः प्रभृति प्रायश्चित्तभाक् क्रियते इति भावः। स च प्रतिसेवी वा यदभ्याख्यानदाता से तस्य प्रतिसेवनाया प्रमाणं चरिकादि वक्ति,। तस्मात्प्रमाणात् गृहीतव्यो निश्चेतव्यः स अथ किं कस्मात्कारणादेवमाहुर्भवन्तो हे भदन्त सूरिराह-सत्यप्रतिज्ञाव्यवहारास्तीर्थकरैः दर्शिताः। ततो यथा कथंचित्प्रतिसेवी अप्रतिसेवी वा क्रियते। एष सूत्राक्षरार्थः। अधुना निर्युक्ति भाष्यविस्तरः। तत्र भिक्षाचर्या विचारभूमिगमनविहारादिषु यो रत्नाधिकतरः कुतश्चिद्दोषादवमो जातः स तमवरमरत्नाधिकं यैः कैरभ्याख्यानेन दूषयति।

तानि प्रतिपादयिषुराह--

[भा.१२३३] रायनियवायएणं खलियमिलितपेल्लणाए उदएणं।
देउलमेहुणंमि य अब्भक्खाणं कुडंगंमि॥

वृ- रत्नाधिकवातेन रत्नाधिकोऽहमिति गर्वेण अवमरत्नाधिकं दशविधचक्रवालसामाचार्या-मस्खलितमपि कषायोदयेन तर्जयति। यथा हे दुष्ट शैक्षक! स्खलितोऽसीति तथा एर्यापथिकी प्रतिक्रम्य प्रथममेव परावर्तयन्तं-यदि वा अग्रिमतपरदं पदेन विच्छिन्नं सूत्रं उच्चारयंतं हा दुठु शैक्षकमिलि-तमुच्चारयसीति। तथा पेल्लणत्ति अन्यैः साधुभिर्वार्यमाणोऽपि कषायोदयतस्तं हस्तेन प्रेरयति तर्जयति। ततः सोवमरत्नाधिकः कषायितः सन् चिन्तयति एष रत्नाधिक वातेनेत्थं बहुजनसमक्षं तर्जयति। अथ चैषा सामाचारी रत्नाधिकस्य सर्वं क्षंतव्यमिति ततस्तथा करोसि। यथैष ममलघुको भवति। एवं चिन्तयित्वा तौ द्वावपि भिक्षाचर्यायै गतौ च तृषितौ बुभुक्षितौ वेत्येवं चिन्तयन्तौ चिन्तितवन्तौ अस्मिन्नायदिवकुले वृक्षविषमे वा प्रथमालिकां कृत्वा पानीयं पास्याम इति। एवं चिन्तयित्वा तौ तदभिमुखं प्रस्थितौ। अत्रान्तरे अवमरत्नाधिकः परिव्राजिकामेकां तदभिमुखं गच्छन्तीं दृष्ट्वा स्थितोपलब्ध एष इदानीमिति चिन्तयित्वा रत्नाधिकं वदति-अहो अज्ज ज्येष्टार्य कुरु त्वं प्रथमालिकां पानीयं वा पिब, अहं पुनः संज्ञां व्युत्सृक्ष्यामि। एवमुक्त्वा त्वरितं वसतावागत्य मैथुने अभ्याख्यानं ददत् आलोचयति तथा चाह-देउले इत्यादि देवकुले आयदिवगृहादौ कुडङ्गे वा वृक्षविषमे प्रदेशे मैथुने अभ्याख्यानं दातुं वसतावागत्य आलोचयति, यथा आलोचयति, तथा दर्शयति-

[भा.१२३४] जेट्ठज्जेण अकज्जं सज्जं अज्जा घरे कयं अज्जं।
उवजीवितोत्थ भंते मए वि संसट्ठकप्पो व॥

वृ- ज्येष्ठार्येणाद्य सद्य इदानीमार्यागृहे कृतमकार्य मैथुनासेवालक्षणं ततो भदन्त तत्संसर्गतो मयापि संसृष्टकल्पो मैथुनप्रतिसेवा अत्रास्मिन् प्रस्तावे उपजीवितः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१२३५] अहवा उच्चारगतो कुडंगमादी कडिल्लदेसम्मि ।
वेत्ती कयं अकज्जं जेट्ठज्जेणं सह मएवि ।।

वृ- अथवेत्यभ्याख्यानस्य प्रकारान्तरप्रदर्शनि कुडङ्गादौ कडिल्लदेशे गहन प्रदेशे उच्चाराय गतस्तत्र ज्येष्टार्येण सह मयापि कृतमकार्यमिति । तस्माद्व्रतानि मम साम्प्रतमारोपयत । एवमुक्ते सूरिभिः स एवं वक्तव्यः ।

[भा.१२३६] तम्मागते वयाइं दाहामो देंति वा तुरंतस्स ।
भूयत्थे पुन नाए अलियनिमित्तं न मूलंतु ।।

वृ- योऽसौ त्वया अभ्याख्यातः स यदा आगतो भविष्यति तदा तस्मिन्नागते व्रतानि ते दास्यामः । अथ स त्वरमाणो ब्रूते । भगवन् कुशाग्रस्थितवाताहतजलबिन्दुरिवातिचञ्चलं जीवितमिति न शक्यते । क्षणमाणमप्यव्रतेन स्थातु मित्यधुनैव मह्यं दीयतां व्रतादीनीति तस्यैव त्वरमाणस्य ददति व्रतानि वा शब्दो विकल्पार्थः । अत्र पुनर्भूतार्थो गवेषणीयः किमयं सत्यं ब्रूते उतालिकं तत्र यथा भूतार्थो गवेषणीयस्तथानन्तरमेव वक्ष्यते । भूतार्थे च गते ज्ञाते यदि सत्यं सदा द्वयोरपि मूलं दीयते, । अथालीकं ततो योऽभ्याख्यातः स शद्धः इतरत्वस्य त्वभ्याख्यातुर्मूलं न दीयते किन्त्वलीकनिमित्तं मृषावादप्रत्ययं चतुर्गुरुकं प्रायश्चित्तमिति सम्प्रति यथा भूतार्थो ज्ञायते तथा प्रतिपिपादयिषु र्द्वारगाथामाह-

[भा.१२३७] चरियपुच्छणपेसण कावालियतवो संघो जं भणति ।
चउभंगो हि निरिक्खी देवयाव तहियं विही एसो ।।

वृ- तत्र भूतार्थे ज्ञातव्ये एष विधिश्चरिका परिव्राजिका तस्याः प्रच्छनाय वृषभारणां प्रेषणं साचेत् सत्यवादिनी न मन्यते । ततस्तौ द्वावपि पृथगुपाश्रये प्रेष्य तत्र वृषभास्तत्स्वपगवेषणाय कापालिकरुपेण प्रेष्यन्ते । कापालिकग्रहणमुपलक्षणं तेन स रजस्कादिरुपेणापीत्यपि द्रष्यव्यम् । एवमपि भूतार्थानिर्णये तवोत्ति तपस्वी कार्योत्सर्गेण देवतामाकम्प्य पृच्छति । एतस्यापि प्रकारस्याभावे संघो मेलयित्वा प्रच्छनीयस्तेन च निरीक्षणो निरीक्षकानधिकृत्य चतुर्भङ्गी केचित् तथाभूतं तथाभावेन पश्यन्तीत्यादिरुपा वक्ष्यमाणा प्ररुप्यते । गायानां पुंस्त्वं प्राकृतत्वात् । सा च चतुर्भङ्गी भद्रप्रान्तदेवता आश्रित्य संभवति । एष द्वारगाथासंक्षेपार्थः साम्प्रपमेनामेव गाथां विवरीषुराह--

[भा.१२३८] आलोइयंमि निउणं कज्जं स सीसए तयं तव्वं ।
पडिसिद्धिंमि य इयरो भणति बियं पिते नत्थि ।।

वृ- अभ्याख्यातः साधुरागतः सन् आलोचयति प्रथमालिकां यावन्न जानामि द्वितीयः सङ्घाटक क्वापि गत इति । केवलोऽहमागतोऽस्मि तत् आचार्या ब्रुवते । सम्यगालोचय ततः स स्मृत्वा आलोचयति यावत्तस्मिन्नपि तृतीये वारे तदालोचितं ततस्त्रिगुणे त्रिःकृत्वा आलोचिते यदि न प्रतिसेवितमित्यालोचयति । ततो येन कारणेन त्रीन् वारानालोचापितस्तत्कार्य करणं सर्वं से तस्य कथ्यते, । शिष्यते यथा स एष तव सङ्घाटकस्त्वया सह किञ्चिन्मात्रं हिण्डित्वा समागतो ब्रूते-ज्येष्ठार्येण आर्यागृहे वृक्षविषमे वा क्वचित्प्रदेशे कृतमकार्यं तत्संसर्गतो मयापि संसृष्टकल्प उपजीवित इति ततोऽभ्याख्यातः साधुर्वदति न मया प्रतिसेवितमेवं तेन प्रतिषिद्धे प्रतिसेविते इतरोऽभ्याख्यानप्रदाता भणति-अहो ज्येष्ठार्य तव द्वितीयमपि व्रतं नास्ति । आस्तां चतुर्थमित्यपि शब्दार्थः ।।

[भा.१२३९] दोण्हंपि अनुमएणं चरियावसहे पुच्छियपमाणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नत्थवसहतुब्भे जा कुणिमो देव उस्सग्गं ।।

वृ- एवं तयोर्द्वयोरपि विदतो रेवमुच्यते-चरिका पृच्छ्यतां यत्सावक्ष्यति तत्प्रमाणयिष्यते । एवमुक्ते यदि तौ द्वावप्यनुमन्येते-ततो द्वयोरनुमतेन सम्मत्या इत्यर्थः । वृषभाश्चरिकां प्रष्टुं प्रेक्षन्ते ते च तत्र गताः प्रथमतश्चचिरिकां प्रज्ञापयन्ति । प्रज्ञाप्य पृच्छन्ति । किमत्र सत्यमलीकं वा एवं वृषभैश्चरिका पृष्टा सती यत् ब्रूते तत्प्रमाणं कर्तव्यम् । तत्र चरिकयोक्तं भगवन् अभ्याख्यानं तेन द्वितीयेन तस्मै दत्तमिति । एतच्चोक्तं वृषभा वसतावागत्य गुरवे निवेदयन्ति । तैर्यथावस्थिते निवेदिते यद्यन्यतरो वदति गूह्यति चरिका न सम्यक्कथयति । तदा गुरवो द्वावपि ब्रूते यूयमन्यत्र वसतिं याचयि(चि) त्वा तत्र वसथ यावदद्य रात्रौ देवताराधनार्थं कायोत्सर्गं कुर्मः ! किमुक्तं भवति कायोत्सर्गेण देवतामाकम्प्य पृच्छामः कोऽत्र सत्यवादी को वालीकवादी इति एवमुक्ते द्वावपि वसत्यन्तरे गतौ अत्रान्तरे कापालिकद्वारोपनिपात इति तदभिधित्सुराह—

[भा.१२४०] अट्ठिगमादी वसभा पुव्विं पच्छाव जंति निसिसुणणा ।
आवस्सग आउट्टण् सब्भावे वा असब्भावे ।।

वृ- अस्थिकाः कापालिकाः आदिशब्दात् सरजस्कादि परिग्रहस्तद्र पाः सन्तः किमुक्तं भवति । कापालिकवेषं वा सरजस्कवेषं वा यदि वा मायास्तनवीयं वेषं कृत्वायस्यां वसतौ द्वावपिजनौ तिष्ठतस्तत्र पूर्वं वृषभा गच्छन्ति यदि वा तयोर्गतयोः पश्चात्तत्र गत्वा रात्रौ मातृकस्थानेन सुप्ता इव तिष्ठन्तो द्वयोरपितयोः परस्परमुल्लापं शृण्वन्ति । तयोश्चावश्यकं कर्तुकामयोर्योऽसाववमरत्नाधिको-ऽभ्याख्यानदाता स इतरं प्रति मिथ्यादुष्कृतेनोपस्थितः एतद्वदति त्वं मया असत्याभ्याख्याने नाभ्याख्यातो मिथ्यादुष्कृतमिति ततो रत्नाधिको ब्रूते । किं नाम तवापकृतं मया येनासदाभ्याख्यानं मे दत्तमिति अवमरत्नाधिको भाषते त्वं नित्यमेव यत्र तत्र वा कार्ये सम्यक् प्रवर्त्तमानमपि हे दुष्ट शैक्षक ! इति तर्जयसि तेन मया त्वमसदभ्याख्यानेनाभ्याख्यात एवमावश्यके आवश्यकवेलायामावर्त्तने भावप्रत्यावर्त्तने अलीकाभ्याख्याने सद्भावो ज्ञायते । अथ न परस्परासंभाषणतः सद्भावो ज्ञायते, तदासद्भावपरिज्ञानाभावे तपस्वी प्रष्टव्य इति शेषः । तथा चाह—

[भा.१२४१] सेहोत्ति मं भाससि निच्चमेव बहूणमज्झ्क्तं किं कहेमि ।
अभासमाणाण परोप्परं वा दिव्वाणमुस्सग्गतवस्सी कुज्जा ।.

वृ- नित्यमेव सर्वकालमेव पदे पदे हा दुष्टशैक्षक इति मां भाषते तेनत्वमसताभ्याख्यानेनाभ्याख्यातः । अथ स रत्नाधिकस्तमवमरत्नाधिकं ब्रूयात् । यदि मया कयापि युवत्या सह कृतमकार्यं ततः किं त्वया बहूनां मध्ये अहमेवमाख्यातोऽनेन कृता प्रतिसेवनेति । किन्त्वहमेवैकान्ते वक्तव्यो भवामि यथा दुष्कृतमालोचय गुरुणामन्तिके इति मम रोषेण त्वयात्मीयमपि विगोपितम् । एवं सद्भावो ज्ञायते । एतावता आवस्सं आउट्टणसभावे वा इति व्याख्यातमिदानीमसद्भावे इति व्याख्यानयति । अभासमाणाण परोप्परं वा इति । अथ कदाचित्तौ रोषतः परस्परं न संलपतः तदा तयोः परस्परमभाषमाणयोर्भूतार्थ-परिज्ञानाभावे तपस्वी क्षपको देवताराधनार्थं कायोत्सर्गं कुर्यात् । कायोत्सर्गेण च देवतामाकम्प्य पृच्छति को तयोर्द्वयोर्मध्ये सम्यग्वादी को वा मिथ्यावादीति तत्र यद्देवता ब्रूते तत्प्रमाणमेतेन तप इति द्वारं व्याख्यातम् । अधुना सङ्घद्वारं व्याचिख्यासुरिदमाह—

[भा.१२४२] किंचि तहा तह दीसइ चउभंगे पंतदेवया भद्दा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नीकाइ मूलं इयरे सच्च प्पतिणाउ ।।

वृ - सर्वप्रकारेणा ज्ञायमाने भूतार्थे सङ्घसमवायं कृत्वा तस्मै आवेद्यते । रत्नाधिको वदति नाहं कृतवान् प्रतिसेवनामितरो ब्रूते द्वावपि प्रतिसेवितवन्ताविति, तत्र किं कर्त्तव्यमिति एवमावेदने कृते ये सङ्घमध्ये गीतार्थास्ते वदन्ति किञ्चित्तथाभावं तथा भावेनदृश्यते । किञ्चित्तथाभावमन्यथाभावेन दृश्यते, किंचिदन्यथाभावं तथा भावेन, किञ्चिदन्यथा भावमन्यथा भावेन एषा चतुर्भङ्गी । अस्यां चतुर्भङ्ग्यां प्रथमो भङ्गः प्रतीतः । द्वितीयभङ्गभावना त्वेवम्-कोऽपिक्वापि वनप्रदेशे परस्त्रियासहवर्त्तते, तस्मिंश्चप्रदेशे केचिदारक्षका अपन्यायादक्षमा असि व्यग्रहस्ता वल्गन्ति । ततः काचिद्देवताभद्रिका मा विनश्यत्वेष पुरुष इति तौ दुरान्तरितौ दर्शयति । तृतीयभङ्गे भगवतो वर्द्धमानस्वामिनः सागारिकमकषायितं सङ्गमकः कषायितं दर्शयति । चतुर्भङ्गः कस्यांचिद्विपदिदासं राज्ञा कारितराजनेपथ्यं विनश्यंतं दृष्ट्वा काचिद्भ-द्रवेवता तदनुकम्पयास्त्रियं दर्शयति, । एवं प्रान्ता च भद्रा देवता अन्यथाभूतं सद्वस्तु अन्यथाकरोति । अन्यथाभूतं दर्शयति । ततो दृष्टमपि यावदप्रमाणमत्र न ज्ञायते किमपि दृष्टमवमरत्नाधिकेन । अथ च सत्यप्रतिज्ञा व्यवहारास्तीर्थकृद्भिरुपदिष्टास्तस्मात् यत् रत्नाधिको ब्रूते-न मया प्रतिसेवितमिति तत्प्रमाणतः शुद्धः एष न प्रायश्चित्त भागिति, यदिपचावमरत्नाधिको वक्तिमयाप्रतिसेवितमिति-तदपिप्रमाणमतस्तस्य मूलं प्रायश्चित्तमिति ।

मू. (६०) *भिक्खूय गणाओवक्कम्म ओहाणु पेहीवज्जेज्जा-से अहच्च अनोहाइतो सेय इच्छेज्जा दोच्चंपितमेवगणं उवसंपज्जित्ताणं विहरित्तए तत्थणं थेराणं इमेयारुवे विवाए समुपज्जित्ताइमं अज्जो जाणह किं पडिसेवी अपडिसेवी सेयपुच्छियव्वे किंपडिसेवी अपडिसेवि सेयवएज्जा पडिसेवी परिहार पत्ते सेयवएज्जा नोपडिसेवी नोपडिहारपत्ते जं से पमाणं वयति से पमाणे घेतव्य से किं एव माहु भंते । सच्च पइणाववहारा ।।*

वृ - अथास्य सूत्रस्य कः सम्बन्धस्तत आह-

[भा.१२४३] त्थोभगदिनो दाउं, व त्थोभगसेवियं च तदकिच्चं ।
सच्चाओव असच्चं ओहावणसुत्तसंबंधो ।।

वृ - स्थोभकमभ्याख्यानं दत्तं यस्मिन् स च्छोभकदत्तः क्लान्तस्य परनिपातः प्राकृतत्वात् सुखादिदर्शनाद्वासोवधावनप्रेक्षीभवेत् । इयमत्र भावना-यस्याभ्याख्यानमदायि स कथमहमेव-मसताभ्याख्यानेनाभ्याख्यातः कथं वा साम्प्रतमेवमलीककलंकाङ्कितो जनानां पुरत एवमात्मानं दर्शयामीत्यवधावनप्रेक्षी गच्छेत् । अथवा येनाभ्याख्यानं दत्तं स चिन्तयति । यथा असदभ्याख्यान-मेतस्मै दत्तमेवतच्च बहुभिर्जनैर्ज्ञातं यथानेनासदभ्याख्यानमस्मै दत्तमिति । ततः कथमहं तेषां पुरतः तिष्ठामीत्येवं च्छो स्थोभकमभ्याख्यानं दत्वा लज्जया अवधावनप्रेक्षी गच्छेत् । यदि वा तदकृत्यं मैथुनरुपं मोहोदयेन सेवित्वा ज्ञातोऽहं सर्वजनैरपीति लज्जया कोऽप्यवधावनप्रेक्षी यायात् । एतदर्थप्रतिपादनार्थं च्छोभकं सूत्रानन्तरमस्य सूत्रस्योपन्यासः । अथवा यं सम्बन्धः सच्चाओवअसच्चमिति सत्यसंयमः स पूर्वसूत्रेष्वभिहितः । सत्याच्चान्यदसत्यमसंयमोऽवधावमप्रेक्षी वाऽसंयमं याति । ततोऽसंयम-प्रतिपादनार्थमवधावनप्रेक्षी सूत्रमनेन सम्बन्धेनायातस्यास्य व्याख्या भिक्षुश्च गणात् गच्छादपक्रम्य अवधावनमसंयमगमनंतदनुप्रेक्षी व्रजेत । स चानवधावित एव असंयममगत एव सन् इच्छेत् द्वितीयमपि वारं तमेव गणमुपस्मपद्य विहर्तुं तत्र स्थविराणामयं वक्ष्यमाण एतद्रुपानन्तरमेवोच्यमानस्वरूपो विवादः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुत्पद्येत, इदंभो आर्या जानीत । किमयं प्रतिसेवी किं वा नेति तत्र स प्रष्टव्यः । किंप्रतिसेवी अप्रतिसेवी वा ? कृतप्रतिसेवनाकः तत्र यदि स वदेत् प्रतिसेवी ततः परिहारप्राप्तः प्रायश्चित्तप्राप्तः स्यादथ वदेत् न प्रतिसेवी तर्हिनो परिहारप्राप्तो भवति, । यत् स प्रमाणं वदति तस्मात् प्रमाणात् गृहीतव्यमिति सत्योऽसत्यो वा, अथ कस्मादेवमाहुः भदन्त ! सूरिराह-सत्यप्रतिज्ञाव्यवहारास्तीर्थकृद्भिर्देशिता इति कृत्वा एषा सूत्राक्षरगमनिका । सम्प्रति निर्युक्ति भाष्यविस्तरः–

[भा. १२४४] सो पुन लिंगेण समं ओहावेमो तु लिंगमहवावि ।
किं पुन लिंगेन समं, ओहावइ इमेहिं कज्जेहिं ।।

वृ- स पुनरवधावनानुप्रेक्षी कोऽपि लिङ्गेन सममवधावेत् । अथवा कोऽपि मुक्त्वा लिङ्गं तत्र शिष्यः प्राह-किं केन कारणेन पुनर्लिङ्गेन सममवधावति । सूरिराह-एतै र्वक्ष्यमाणैः कार्यैः कारणैः कज्जंति वा कारणंति वा एगट्ठमिति वचनात्तान्येव कारणान्यभिधित्सुराह–

[भा. १२४५] जति जीवेहिंति भज्जाइ जइवाविधणं धरइ जइ वोच्छंति ।
लिंगंमोच्छंसंका पविठे तत्थेव उवहम्मे ।।

वृ- यदि भार्यादयो मे जीविष्यन्ति जीवतो द्रक्ष्यमीति भावः । यदि वा तन्मे पितृपितामहोपार्जितं स्वभुजोपार्जितं वा धनं धरति विद्यमानमवतिष्ठति, यदि वा वक्ष्यन्ति मुञ्च व्रतं भुक्ष्य विपुलान् भोगानिति । तदा लिङ्गं मोक्ष्यामि नान्यथा, एव मा शङ्कया व्रजतस्तस्य सङ्घाटको दातव्यः । किं कारणमिति चेदुच्यते कदाचित्तेन संघाटकेनान्येन चानुशिष्यमाणः प्रतिनिवर्तेतापीति हेतोः तथा संघाटके प्रतिनिर्वृत्ते सति किमुत् प्रव्रजामि । किंवानेति शङ्का प्रविष्टो रात्रौ व्युषितो यदि भवेत् तदेव कारणमभिधित्सुराह–

[भा. १२४६] गछंमि केइ पुरिसा, सीयंते विसयमोहियमईया ।
ओहावंताण गणा चउव्विहा तेसिमा सोही ।।

वृ- गच्छे केचित्पुरुषा विषयमोहितमतिका रूपादिकविषयविपर्यासितमतयो गणात् गच्छादवधावन्ति । तेषां तथा गणादवधावतां केनापि समनुशिष्टानामथवा न सुन्दरं वयं कुर्म इति स्वयमेव परिभाव्य विनिवृत्तानामियं वक्ष्यमाण चतुर्विधा चतुः प्रकारा शोधिः प्रायश्चित्तं भवति तामेवाह–

[भा. १२४७] दव्वे खेत्ते काले भावे सोही उ तत्थिमा दव्वे ।
रायाजुवेयमच्चे पुरोहियकुमार कुलपुत्ते ।।

वृ- द्रव्ये द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र तासु चतसृषु शोधिषु मध्ये द्रव्ये द्रव्यविषया इयं वक्ष्यमाणा अन्ये पुनरिदं वदन्ति-द्विविधाः द्रव्यतः शोधिः सचित्तविषया अचित्तविषया च । तत्र सचित्तविषया छक्कायचउसुलहुगा इत्यादिका पूर्ववर्णिता, अचित्तविषया उद्गमोपादनादि दोषनिष्पन्ना यच्चाकल्पिकं यच्च कल्पनीयमपि सूत्रेण प्रतिषिद्धं तं तद्विषया सर्वापि शोधिर्द्रव्यत इति, भाष्यकारः स्वप्रतिज्ञातां शोधिमाह राया इत्यादि राजा प्रतीतः, तस्मिन् युवराज्ये अमात्ये पुरोहिते कुमारे कुलपुत्रे द्रव्यशोधिरिति वाक्यशेषः कथमेतद्विविषया द्रव्य शोधिरत आह–

[भा. १२४८] एएसिं रिद्धिंतो दठुं लोभाओ अन्नियत्तंतो ।
पणगादीया सोही बोधव्वा मास लहुअंता ।।

वृ- एतेषां राजादीनां ऋद्धीर्दृष्ट्वा अहो धर्मस्य फलं साक्षादुपलभ्यते । तस्मादहमपि करोमि धर्ममिति लोभात् भोगाभिष्वङ्ग रूपात् सन्निवर्तमाने षष्टीसप्तम्योरर्थं प्रत्यभेदात् सम्यग् निवर्त्तमानस्य बोधव्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोधिः ।पञ्चकादिका मासलघुपर्यन्ता, । तद्यथा - ग जानं स्फीतिमन्तमुपलभ्याहो धर्मप्रभावतः कथमेष स्फीतिमान् तस्मान्नत्यजामि धर्ममिति प्रतिनिधिवर्तमानस्य पञ्चरात्रिं दिवानि शोधिः, युवराजं द्रष्ट्वा निवर्तमानस्य दश रात्रिं दिवानि, अमात्यं दृष्ट्वा पञ्चदश, पुरोहितं विंशतिः, कुमारं पञ्चविंशतिः, कुलपुत्रं मासलघुकमिति ।

[भा.१२४९] चोएती कुलपुत्ते, गुरुगतरं रायाणोय लहुगतरं ।
पच्छित्तं किं कारण भणियं सुण चोयग इमं तु ।।

वृ- चोदयति परः किं कारणं केन कारणेन कुलपुत्रेऽल्पर्द्धिके दृष्टे निर्वर्तमानस्य गुरुकतरं प्रायश्चित्तं भणितं, । राज्ञो महर्द्धिकस्य दर्शनात् प्रतिनिवर्तमानस्य लघुकतरमत्र सूरिराह- चोदक येन कारणेनेत्थं प्रायश्चित्तं नानात्वं तत्कारणमिदं वक्ष्यमाणं शृणु । तदेवाह—

[भा.१२५०] दीसइ धम्मस्स फलं, पच्चक्खं तत्थ उज्जमं कुणिमो ।
इड्ढीसु पयणुवीसु विसज्जते होति नाणत्तं ।।

वृ- दृश्यते खलु धर्मस्य फलं प्रत्यक्षं साक्षात्तस्मात्तत्र धर्मे वयमुद्यमं कुर्मः । एवमृद्धिषु राजप्रभृतिसम्बन्धिषु प्रतन्वीसु यथाक्रमं हीयमानतरास्वपि सद्यते सङ्गमुपयाति । यथा यथा चाल्पाल्पतरास्वपि ऋद्धिषु सङ्गमुत्पद्यते तथा तथा लक्ष्यते तीव्रातीव्रतरा तस्य भोगाशक्तिरित्युप्रकारेण भवति प्रायश्चित्तनानात्यमिति । अपरे त्विर्यं भावविशोधिमिति प्रतिपन्नाः ।

सम्प्रति क्षेत्रतः शोधिमभिधित्सुराह—

[भा.१२५१] खेत्ते निवपहनगरोद्वारे उज्जाने परेण सीमतिक्कंते ।
पनगादी जो लहुओ, एएसु य सनियत्तंते ।।

वृ- क्षेत्रे क्षेत्रविषयाः एतेभ्यः सन्निवर्तमाने एएसुत्ति गाथायां सप्तमी पञ्चम्यर्थे केभ्यः स निवर्त्तमाने इत्यत आह- निवपहेत्यादि । अत्रापि सप्तमी पञ्चम्यर्थे ततोऽयमर्थः । तथा नृपपथात् नगरद्वारादुद्यानात् परतः सीम्नोऽर्वाक् तथा सीम्नः प्रतिसीमातिक्रमतः किंप्रमाणाशोधिरत आह- पञ्चकादिका यावल्लघुको मासः । इयमत्र भावना-राजपथान्निवर्तमानस्य पञ्चरात्रिं दिवानि, नगरद्वारान्निवर्तमानस्य दश, उद्यानात्पञ्चदश, उद्यानात्परतः सीम्नोऽर्वाक् निवर्तमानस्य विंशतिरहोत्राः, सीम्नो भिन्नमासः, सीमानमनतिक्रम्य मासलघु सम्प्रति कालतः शोधिमाह—

[भा.१२५२] पढमदिननियत्तंते, लहुओ दसहिं सपदं भवे ।
कालेसंज्जोगे पुन एत्तोदव्वे खेत्ते कालेय ।।

वृ- यदि प्रथमे दिवसे निवर्तते तस्तस्मिन् प्रथमदिवसे निवर्तमाने लघुको मासः लघुप्रायश्चित्तमेव यावत् दशभिर्दिवसैः स्वपदं दशमं प्रायश्चित्तं भवति । तद्यथा द्वितीये निवर्तमानस्य मासगुरु तृतीये दिवसे चतुर्मास लघु, चतुर्थे दिवसे चतुर्मास गुरु, पञ्चमे षट् लघु, षष्टे षड् गुरुः, सप्तमे च्छेदः, अष्टमे मूलं, नवमेऽनवस्थाप्यं, दशमे पाराञ्चित्तमिति, एषा काले कालविषये शोधिः भावतो वक्ष्यमाणा सम्प्रत्य ऊर्ध्वद्रव्ये क्षेत्रे काले च यः संयोगः तस्मिन् वक्ष्ये, प्रतिज्ञातमेव निर्वाहयति ।

[भा.१२५३] दव्वस्स य खेत्तस्स य, संजोगे होइमा पुन विसोही ।
रायाणं रायपहे दट्ठुं जा सीमति क्कंते ।।

[भा.१२५४] पनगादी जा मासो जुवरायं निवपहादि दट्ठूणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दसराइं दिवमाई मासगुरुं होइ अंतंमि ।।

वृ- द्रव्यस्य च क्षेत्रस्य च संयोगे सम्बन्धे पुनरियं वक्ष्यमाणा भवति विशोधिस्तामेवाह-रायाणमित्यादि एषा हि राजादिकं द्रव्यं नृपपथादिकं, क्षेत्रमधिकृत्योच्यते, इतीयं द्रव्यक्षेत्रसंयोगजा विशोधिः । तत्र यदि राजानं राजपथे दृष्ट्वा निवृत्तस्ततः तस्य पञ्चकं पञ्चरात्रिंदिवं प्रायश्चित्तमेवं क्षेत्रं राजपथमादिं कृत्वाराज्ञ्येव द्रव्ये पञ्चकादि प्रायश्चित्तं यावन्मासस्तद्यथानगरद्वारे राजानं दृष्ट्वा निवर्तमानस्य दश रात्रिं दिवानि, उद्यानान्निवर्तमानस्य पञ्चदश, उद्यानस्य सीम्नश्चान्तरात् विंशतिकं, सीम्नो निवर्तमानस्य पञ्चविंशतिकं, सीमातिक्रान्त राजानं दृष्ट्वा निवर्तमानस्य मासलघु, युवराजं द्रव्यं नृपपथादि क्षेत्रे गतं दृष्ट्वा निवर्तमानस्य दशरात्रिंदिवादिकं प्रायश्चित्तं क्रमेण तावद्वक्तव्यं यावदन्ते भवति, । तद्येवं राजपथे युवराजं दृष्ट्वा निवर्तमानस्य दशरात्रिं दिवानि नगरद्वारे पञ्चदश उद्याने विंशतिरुद्यानसीम्नोरपान्तराले पञ्चविंशतिः, सीम्नि मासलघु, सीमातिक्रमे मासगुरु ।।

[भा.१२५५] सचिवे पन्नरसादी लघुगं तं वीसमादि उ पुरोहे ।
अंतंमि उ चउ गुरुगं कुमारभिन्नादि जा च्छेओ ।।

वृ- सचिवे राजपथादिषु क्रमेण पञ्चदशादि चतुर्लघुपर्यन्तं, तद्यथा राजपथे सचिवं दृष्ट्वा निवर्त्तमानस्य पञ्चदशरात्रिंदिवानि नगरद्वारे विंशतिरुद्याने पञ्चविंशति रुद्यानसीम्नोरन्तराले मासलघु सीम्नि मासगुरु सीमाऽतिक्रमे चतुर्मासलघु तथा पुरोधसि विंशत्यादि प्रायश्चित्तमन्ते चतुर्गुरुकम्, तद्यथा राजपथे पुरोधसं दृष्ट्वा निवर्त्तमानस्य विंशतिरहोरात्रं नगरद्वारे पंचविंशति रुद्याने मासलघु उद्यानसीम्नोरपान्तराले मासगुरु, सीम्नि चतुर्मासगुरु, कुमारे भिन्नमासादि यावत् षट् लघु तद्यथा राजपथे कुमारंदृष्ट्वा निवर्तमानस्य भिन्नोमासः पंचविंशति रहोरात्रा इत्यर्थः नगरद्वारे मासलघु उद्याने मासगुरु उद्यान सीम्नोरपान्तराले चतुर्मास लघु, सीम्नि चतुर्मासगुरु, सीमातिक्रमे षण्मासलघु ।।

[भा.१२५६] कुलपुत्ते मासादी छग्गुरुगं होइ अंतिमट्ठाणे ।
इत्तो य दव्वकाले संयोगमिमं तु वोच्छामि ।।

वृ- कुलपुत्रे मासादि मासलघ्वादि प्रायश्चित्तं क्रमेण तावत् द्रष्टव्यं यावदन्तिमं स्थानं षट्गुरुकं भवति । तद्यथा-राजपथे कुलपुत्रं दृष्ट्वा निवर्तमानस्य मासलघु, नगरद्वारे मासगुरु, उद्याने चतुर्लघु, उद्यानसीम्नोरपान्तराले चतुर्गुरु सीम्नि षण्मासलघु, सीमातिक्रमे षण्मासगुरु । तदेवं द्रव्य-क्षेत्रसंयोग उक्त इत ऊर्ध्वं द्रव्यकाले च संयोगमिमं वक्ष्यमाणं वक्ष्यामि यथा प्रतिज्ञातमेव निर्वाहयति–

[भा.१२५७] रायाणं तद्दिवसं दट्ठूण नियत्ते होति मासलहुं ।
दसहिं दिवसेहिं सपयं जुयरणादिं ततो वोच्छं ।।

वृ- राजानं दृष्ट्वा तस्मिन् दिवसे यदि प्रतिनिवर्तते, तेन तु अवधावनान्तरं तत्क्षणमेव तदा तस्य मासलघु प्रायश्चित्तं, । एवं क्रमेण तावद्वक्तव्यं यावद्दशभिर्दिवसैः स्वपदं दशमं प्रायश्चित्तं भवति, । यद्यथा-द्वितीये दिवसे राजानं दृष्ट्वा निवर्त्तमानस्य मासगुरु तृतीये दिवसे चतुर्मासलघु, चतुर्थदिवसे चतुर्मास गुरु, पञ्चमे षण्मास लघु, षष्टे षण्मास गुरु, सप्तमे च्छेदोऽष्टमे मूलं नवमेऽनवस्थाप्यं दशमे पाराञ्चितं साम्प्रतमत ऊर्ध्वं युवराजादिमधिकृत्य वक्ष्यामि । प्रतिज्ञातमेव करोति–

[भा.१२५८] मासगुरु चउ लहुया चउगुरु च्छलहुय च्छगुरुकमादी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवहिं अट्ठहिं सत्तहि च्छहिं पंचहिं चेव चरमपयं ।।

वृ- युवराजामात्यपुरोहितकुमारकुलपुत्रेपु यथाक्रमं प्रथमदिवसे मासगुरु चतुर्लघुक चतुर्गुरुक षट्लघु षट्गुरुकादि कृत्वा यथाक्रमं नवभिरष्टभिः सप्तभिः पड्भिः पञ्चभिश्च दिवसैश्चरमं पाराञ्चितं वक्तव्यम्, । तद्यथा-प्रथमे दिवसे युवराजं दृष्ट्वा निवर्तमानस्य मासगुरु, द्वितीये दिवसे चतुर्मासलघु, तृतीये दिवसे चतुर्मासगुरु, चतुर्थेदिवसे षण्मासलघु, पञ्चमे दिवसे षण्मासगुरुः, पष्टे च्छेदः, सप्तमे मूलमष्टमेऽनवस्थाप्यं, नवमे पाराञ्चितम् । तथा अमात्यं दृष्ट्वा प्रथमे दिवसे निवर्त्तमानस्य चतुर्मासलघु, द्वितीये दिवसे चतुर्मासगुरु, तृतीये पण्मासलघु, चतुर्थे षण्मासगुरु, पञ्चमे च्छेदः, षष्ठे मूलं सप्तमेऽनवस्थाप्यं अष्टमे पाराञ्चितमिति, । तथा पुरोहितं दृष्ट्वा प्रथमे दिवसे निवर्तमानस्य चतुर्मासगुरु, द्वितीये षण्मासलघु, तृतीये षण्मासगुरु, चतुर्थेच्छेदः, पञ्चमे मूलं, षष्ठेऽनवस्थाप्यं सप्तमे पाराञ्चितम् । तथा कुमारं दृष्ट्वा प्रथमे दिवसे निवर्तमानस्य षण्मासलघु, द्वितीये दिवसे षण्मास गुरु, तृतीये च्छेदः, चतुर्थे मूलं, पञ्चमेऽनवस्थाप्यं, षष्टे पाराञ्चितम् । तथा कुलपुत्रकं प्रथमे दिवसे दृष्ट्वा निवर्त्तमानस्य षण्मासगुरु, द्वितीये च्छेदः, तृतीये मूलं, चतुर्थेऽनवस्थाप्यं, पञ्चमे पाराञ्चितमिति; उपसंहारमाह—

[भा.१२५९] इति दव्वखेत्तकाले भणिया सोहीउ भावइणमणा ।
दंडियभूणगे संकंत भोइया विवणे भुंजणे दासु ।।

वृ- इति एवमुक्तेन प्रकारेण प्रत्येकं संयोगतश्च द्रव्ये क्षेत्रे काले च भणिता शोधिरिदानीं भावत इत्यमन्या प्रव्यक्षेत्रकालव्यतिरिक्ता भण्यते इति वाक्यशेपः । प्रतिज्ञातमेव कुर्वन् द्वारसंग्रहमाह-दण्डिके राजाभूणके देशीपदमेतत् बालके पुत्रादावित्यर्थः । मृते इति वाक्यशेषः । तथा सङ्क्रान्ते परपुरुषं गते विपन्ने मृते कलत्रे इति गम्यते । तथा दोसुत्ति तृतीयार्थे सप्तमी । यथा । तिसु तेसु अलंकिया पुहवी इत्यत्र ततोऽयमर्थः । द्वाभ्यां पुरुषाभ्यां स्त्रीभ्यां वा वक्ष्यमाणस्वरूपाभ्यां भोजने भावतः शोधिर्भवति । तत्र यथोद्देशं निर्देश इति प्रथमतो दंडितादि द्वारत्रयमाह—

[भा.१२६०] दंडिय सोउ नियत्तं पुत्तादि मए व चउलहू होंति ।
संकंत मया एवा भोए ते चउगुरू होंति ।।

वृ- यत्र स संप्रस्थितस्तत्र तानि मनुष्याणि कस्मिंश्चिदपराधे राजा दण्डितानि यदि वा तेषां पुत्रादिकं किमपि मृतं अथवा द्वयमपीदं जातं ततो दंडितवान् यदि वा पुत्रादीन् मृतानथवा उभयमपि श्रुत्वा निवर्तते । ततो निवृत्ते निवृत्तस्य प्रायश्चित्तं चत्वारो लघुका लघुमासका भवन्ति, । तथा भोजिकानाम भार्या । सा अन्यपुरुषसङ्क्रान्ता, अथवा मृता श्रुता; ततोऽन्यपुरुषसङ्क्रान्तायां मृतायां वा भोजिकायां निवर्तमानस्य चत्वारो गुरुका गुरुमासा भवन्ति, सम्प्रति भोजणे दोसत्ति व्याख्यानयति ।

[भा.१२६१] अह पुन भुंजेजाही, दोहिं उवग्गेहिं सत्थ समयं तु ।
इत्थीहिं पुरिसेहिं, व तहिं य आरोवणा इणमा ।।

वृ- अथ पुनस्तत्र गतः सन् द्वाभ्यां वर्गाभ्यामेतदेव वक्तव्यमाचष्टे-स्त्रीभ्यां पुरुषाभ्यां वा समकं सार्धं तुशब्दो वक्ष्यमाणसमस्तविशेषसूचकः । भुञ्जीत तत्र इयमनन्तरमुच्यमाना आरोपणा प्रायश्चित्तं तामेवाह—

[भा.१२६२] लहुगाय दोसु दोसु य गुरुगाच्छम्मास लहुगुरुच्छेदो ।
निक्खिवणंसि य मूलं जं चन्नं सेवए दुविहं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- द्वयोः चत्वारो लघुका तत्र द्वयोश्चत्वारो गुरुकाः तथा षण्मासलघवः षण्मासा गुरवः । तथा च्छेदः निक्खेवणंमिय इत्यादि यदा स्वयं लिङ्गं निक्षिपति परित्यजति तदा स्वयं लिङ्गस्य मूलं । अथवा बलात् लिङ्गं विड्वरकेनापि मोच्यते तदा शुद्ध इति । तथा यच्चान्यत् सेवते स्त्रीनपुंसकादिकं तन्निष्पन्नमपि प्रायश्चित्तं तस्यभवत्येष गाथासंक्षेपार्थः । साम्प्रतमेनमेव विवरीपुः प्रथमतो लहुगाय दोसु दोसु य गुरुगा इति व्याख्यानयति—

[भा. १२६३] पुरिसे य नालयद्धे अनुव्वतो वासएय चउ लहुगा ।
एयासुं चिय थीसुं अनालसंमेय चउगुरुगा ।।

वृ- अत्रापि सर्वत्र सप्तमी तृतीयार्थेषु पुरुषेण नालबद्धेन तु शब्दो विशेषणार्थः । स चैतद्विशिनष्टि मिथ्यादृष्टिना अथवा अनुव्रतोपासकेन नालबद्धेनैताभ्यां दाभ्यां पुरुषाभ्यां वा शब्दस्यानुक्त-समुच्चयार्थत्वाद्दर्शनमात्रश्रावकेण च सार्धं भुञ्जानस्य प्रायश्चित्तं चत्वारो लघुकाः व्याख्यातं लघुगा य दोसु इति पदमधुना दोसु य गुरुगा इति व्याख्यानयति । एयासुं चियथीसुमिति एताभ्यामेव स्त्रीभ्यां किमुक्तं भवति नालबद्धमिथ्यादृष्टिस्त्रिया नालबद्धाणुव्रतोपासकस्त्रिया वा सार्धं भुञ्जानस्य चतुर्गुरुका, अनालसम्मे य चउ गुरुगा इति अनालबद्धमिथ्यादृष्टिपुरुषेणानालबद्धाणुव्रतोपासकेन वा समं भुञ्जानस्य चतुर्गुरुकाः अधुना छम्मास लहुगुरु इति व्याख्यानार्थमाह—

[भा. १२६४] अनालदंसणत्थिसु दिट्ठाभट्ठपुरिसे य छल्लहुया ।
दिट्ठित्ति पुन अदिट्ठो, मेहुणीभोत्ती ए छगुरुगाय ।।

वृ- अनालबद्धा दर्शनमात्रश्राविकायाश्च पूर्वंदृष्टः सन् तदानीमाभाषितपुरुषस्तेन च समं भुञ्जानस्य षट् लघुकाः, तथा दिट्ठित्ति पदैकदेशे पदसमुदायोपचारात् पूर्वं या दृष्टा तदानीमाभाषिता तया दृष्टा भाषितया तथा अदृष्टेन पुरुषेणाभाषितेन तथा मेहुणीत्ति मैथुनिक्या मैथुनाजीवया वेश्यया इत्यर्थः । तथा भोजिकया भार्यया एतैश्चतुर्भिः सह भुञ्जमा(जा)नस्य षण्मासा गुरवः ।

सम्प्रति च्छेदइति व्याख्यानार्थमाह—

[भा. १२६५] अदिट्ठा भट्ठासु त्थीसुं संभोइ संजईच्छेदो ।
अमणुन्नसंजतीए मूलं थीपाससंबंधे ।।

वृ- पूर्वमदृष्टाभिस्तदानीमाभाषिताभिः सह तथा सांभोगिकसंयत्यापि च समं भुञ्जानस्य च्छेदः, तथा असांभोगिकसंयत्या सह भोजने तथा स्त्रीस्पर्शसम्बन्धे च मूलं प्रायश्चित्तं । साम्प्रतमत्रैव व्याख्यानान्तरमाह—

[भा. १२६६] अहवावि पुव्वसंथुय पुरिसेहिं सद्धिं चउलहू होंति ।
पुरसंथूय इत्थीए पुरिसेयरदोसुवी गुरुया ।।

वृ- अथवेति प्रकारान्तरोपदर्शने पूर्वसंस्तुतपुरुषैः सह पूर्वसंस्तुतस्त्रिया च समं भुञ्जानस्य चत्वारो लघुका लघुमासा भवन्ति, । एतेन लहुगा य दोसु इति व्याख्यातम् । तथा पुरुषेतराभ्यां पुरुषस्त्रीभ्यां द्वाभ्यामपि च सह भुञ्जानस्य गुरुकाश्चत्वारो गुरुमासाः, अनेन दोसु य गुरुगा इति व्याख्यातम् ।।

[भा. १२६७] पच्छा संथूय इत्थीए छ लहु मेहुणीए छ गुरुगा ।
समणुन्नेयर संजति च्छेदो मूलं जहा कमसो ।।

वृ- पश्चात्संस्तुतया स्त्रिया सह भुञ्जानस्य षट् लघवः मैथुनिक्या मैथुनाजीवया पणाङ्गनया इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सह भुञ्जानस्य षड्गुरुवः समनोज्ञया संयत्या सह भुञ्जानस्य च्छेदः । अमनोज्ञया संयत्या सह मूलं, पुनः प्रकारान्तरमाह—

[भा.१२६८] अहव पुरसंथुए तर पुरिसित्थीसोय सोयवादीसु ।
समणुन्नेयरसंजइ अह्वोकंतीए मूलं तु ।।

वृ- अस्या व्याख्या कल्पनाध्ययन चूर्णितः कर्तव्या सम्प्रति यदुक्तं प्राक् जं चणं सेवते दुविहंति तद्व्याख्यार्थमाह—

[भा.१२६९] थीविग्गह किलिबंवा मेहुणकम्मं च चेयणमचेयं ।
मूलोत्तरकोडिदुगं परित्तिणं तं च ए मादी ।

वृ- स्त्रीविग्रहो नाम स्त्रीशरीरं । क्लीबो नपुंसकं एतद्द्विकं यत्सेवते । अहवा मेहुणत्ति मैथुनं कम्मंति हस्तकर्मा । अथवा सचित्तमचित्तं वा यत् प्रतिसेवते । यदि वा मूलगुणविषयं यदि वा उद्गमकोटि-विशुद्धिकोटि अथवा परित्तमिति प्रत्येकशरीरमनंतत्ति अनन्तकायमेवमादि द्विविधं द्रष्टव्यमादिशब्दात् तिर्यग्योनिकं मानुषिकं वा मैथुनमित्यादिद्विक परिग्रहः ।

[भा.१२७०] एएसिं तु पयाणं जं सेवइ पावई तमारुवणं ।
अन्नं च जमावज्जे पावंति तं तथ्थ तहियं तु ।।

वृ- एतेषामनन्तरोदितानां स्त्रीविग्रहक्लीबादीनां पदानां मध्ये यत्सेवते तमारोपणं तन्निष्पन्नं प्रायश्चित्तं प्राप्नोति । अन्यच्च पदापद्यते संयमविराधनाप्रत्ययं प्रायश्चित्तं तदपि तत्र प्राप्नोति ।।

[भा.१२७१] तत्तो य पडिनियत्तं सुहुमं परिनिव्ववंति आयरिया ।
भरियं महातलागं तलफलदिट्ठंतोचरणम्मि ।।

वृ- ततस्तस्मात् अवधावनात्प्रतिनिवृत्तात् सूक्ष्मं यथा ते जानन्ति सूरयोऽस्माकमुपरितथैव सस्नेहा वर्तन्ते इत्येकमभि कोमलेनोपायेनाचार्याः परिनिर्वापयन्ति सुखापयन्ति येन ते सर्वमालोचयन्ति । ते चालोचनानन्तरमेवं वदेयुः । यथा चारित्रमस्माकं सर्वं गलितमस्मभ्यं व्रतानि दत्थ । एवमुक्ते सूरिभिश्चरणे चरणविषये भरितं महातडागमतिभरणदेव कस्मिंश्चित् प्रदेशे बालीभेदात् गलदुदकं तत्क्षणादेव पतितेन फलेन । तत्प्रदेशापूरणान्निरुद्धोदकं दृष्टान्तः करणीयः । इह सुहुमं परिनिव्ववन्तीत्युक्तं तच्च सूक्ष्मं परिनिर्वापणं द्विविधं । तद्यथा-लौकिकंलोकोत्तरिकंच । तत्र लौकिकंयथा रोहिणिक चौरस्याभयकुमारेण कृतम् । तच्चैवम्—रायगिहं नगरं, तत्थ रोहिणितो चौरो बाहिं दुग्गट्ठितोसोसयलं नगरं मुसति । न कोई तं घेत्तुं सक्कति । अन्नया वद्धमाणसामी समोसढो । रोहिणितो भयवतो धम्मं कहेंतस्स नातिदूरेणं बोलेइ सोचलमाणो मा तित्थगरवयणं सोउं चोरियं न कहामित्ति कणे ठवेइ एइ तस्सेवं बोलमाणस्स कण्टकः पादे लग्गो तं जाव एगेणां हत्थेणं उद्धरइ ताव तित्थगरो इमं गाहत्थं पणवेइ—

[भा.१२७२] अमिलायमल्लदामा अनिमिसनयनाय नीरजसरीरा ।
चउरंगुलेण भूमिं नच्छिवंति सुरा जिनो कहइ ।।

वृ- सुरा देवाश्चतुर्निकायभाविनोऽपि अम्लानमाल्यदामानस्तथा न विद्यते निमिषो येषां ते अनिमिषा अनिमिषे नयने येषां ते अनिमिषनयनाः । तथा नीरजा निर्मलं शरीरं येषां ते नीरजाः शरीराः । चतुरङ्गुलेन चतुर्भिरङ्गुलैर्भूमिं न स्पृशन्ति इति जिनः सर्वज्ञः कथयति । अनेन सर्वतीर्थकृतामविसंवादिवचनता-मावेदयति । एवं सो उं कण्टगं उद्धरित्ता पुने कणे ठवेउ गतो अन्नया सो रोहिणितो रायगिहमतिगतो रत्तिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोरेत्ति गहितो न य निज्जइ रोहिणितो उयाहु अन्नो चोरो ततो पिङ्गिउमाढत्तो भणइ य अक्खाहि सव्वं तुमं रोहिणितो नवत्ति । जइ रोहिणितो सियात्तो सुयामो । एवं सो नीतिस्तत्थ पविठाहिं अठारसहिं कारणेहिं एक्केक्कं काउं पुच्छिज्जइ सो न कहेइ जहा कहं रोहिणितो चोरेत्ति । ताहे अठारसमा सुहुमा कारणा करिउमाढत्ता मज्जं पाइतो मत्तो निव्वेयणो जातो । ताहे देवलोगभवणसरिसं भवणं काउं तत्थ महरिहे सयणिज्जे निज्झावितो ततो पडिबोहवेलाए इत्थि नाडए निव्वतिज्जमाणे ताहिं भणइ-तुमं देवलोगे उववन्नो देवलोए य एसो अनुभावो जो पुच्छितो पुव्वभवं सम्मं अक्खाति तो चिरठिती देवत्ति अत्थति, जो न अक्खाति तो तक्खणं पडति, तो मा अम्हे अनाहा काहसि सव्वं अक्खाहि, । ततो रोहिणीएन तित्थयरवयणं संभरित्ता चिंतियं-अपूतिवयणा तित्थगरा सामिणा भणियं-अमिलाय इत्यादि इमं च सव्वं वितहं दीसइ । तओ कयगं एवंति भणाइ नाहं रोहिणितो । ततो मुक्को । रोहिणिएण चिंतियं-अहो एगस्स वि सामिणो वयणस्स केरिसं माहप्पं । अहं जीविय सुह आभागी जातो, जइ पुन निग्गंथाण वयणं सुणेमि तो इहलोए परलोए य सुहिओ भवामिति चिंतिऊण पव्वइतो ।

उक्तं सौक्ष्मं लोकिकं परिनिर्वापनं । तथा चाह—

[भा. १२७३] सुहुमाय कारणा खलु लोए एमादि उत्तरे इणमो ।
मिच्छदिठीहिं कया किं तुह भे तत्थ उवसग्गा ।।

वृ- सूक्ष्मा खलु कारणा यातना लोके एवमादिका एवं प्रभृतिका आदिशब्दात्प्रभूतान्येवंविधदृष्टान्तसूचकाः उत्तरे लोकोत्तरे इयं वक्ष्यमाणस्वरूपा कारणा, तामेवाह मिथ्यादृष्टिभिः किन्तु कृता भे भवतस्तत्र गतस्योपसर्गाः । किमुक्तं भवति न तव वत्स विरूपाचरणे किमपि चित्तं केवलं यदि मिथ्यादृष्टिभिर्बलात्कारेण किंचिदपि कारितः स्यात् । तत्र किं प्रतिसेवितं किंवा न प्रतिसेवितमिति, एवमुक्ते स यत् करोति तदाह—

[भा. १२७४] अविसिंधरइ सिनेहो पोराणो आयओ निप्पिवासाए ।
इइगारव मारुहितो कहेइ सव्वंजहावित्तं ।।

वृ- अपीति संभावने । संभावयामीत्येतत् सिंति एतेषां पौराणो पुराणायामवस्थायां भवः पौराणः स्नेह आयातो अद्यापि निःपिपासया मदीयवैयावृत्त्यादि पिपासा व्यतिरेकेणादि धरति विद्यते । एवं गौरवत्वमारोपितः सन् किमेतेषां कुर्मो जीवितमपि मदीयमेतेषामेवेति मन्वानो यथावृत्तं समस्तमपि कथयति । एतदेव स्पष्टतरमाचष्टे ।

[भा. १२७५] एवं भणितो संतो उत्तूइओ सो रुहेइ सव्वं तु ।
जंजेण समनुभूयं जं वासे तं कयं तेहिं ।।

वृ- एवं पूर्वप्रदर्शितेन प्रकारेण भणितः सन् उत्तूइओत्ति देशीपदमेतत् गर्वे वर्तते ततोऽयमर्थः । अहमेव गुरूणां मान्यो नान्य इति गौरवमारोपितः सर्वमेव तुरवधारणे यदनेन स्वयं समनुभूतं यद्वा से तस्य मिथ्यादृष्टिभिः कृतं तत्समस्तमेव कथयति । तत्र यदि सोऽगीतार्थो भणति तत इदं ब्रूते—

[भा. १२७६] ण्हाणादीनि कयाइं देहवए मज्झ बेइ तु अगीतो ।
पुव्वं च उवसग्गा किलिट्ठभावो अहो आसि ।।

वृ- मया स्नानादीनि स्नानाङ्गरागादीनि कृतानि, तथा पूर्वमुपसर्गात् उपसर्गेष्वनारब्धेष्वहं संक्लिष्ट परिणामोऽभवमुपसर्गप्रारंभसमकालमेव पुनर्विशुद्धपरिणामो जातस्तत एव तेन कारणेन मह्यं ददत यूयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्रतानि ममारोपयतेति भावः इति अगीतो अगीतार्थो ब्रूते, एवं तनोक्ते यदाऽचार्येण वक्तव्यं तदाह–

[भा.१२७७] वेसकरणं पमाणं न होइ नयमज्जणं नलंकारो ।
साइज्जिएण सेवी अननुमएणं असेवीउ ।।

वृ- वत्स न वेषकरणं न साधु वेषकरणं प्रमाणं न च मज्ञनं नालङ्कारः प्रमाणं यथाक्रममप्रतिसेवने प्रतिसेवने वा किन्तु साएज्जिएणंति यदिस्त्रानादि विषये अनुमननं कृतं तेन सेवी प्रतिसेवनाकारी भवति, अननुमतेन तु असेवी अप्रतिसेवी । अन्यच्च–

[भा.१२७८] जो सो विसुद्धभावो उप्पन्नो तेन ते चरित्ताया ।
धरितो निमज्जमाणी जलेण नावा कुविंडेण ।।

वृ- योऽसौ विशुद्धभावस्तत्रोपसर्गप्रारम्भसमये समुत्पन्नस्तेन तव चरित्रात्माधारितः । यथा कुविन्देन कोलिकेन जले निमज्ञती नौरिति ।

[भा.१२७९] जहवा महा तलागं भरितं भिज्जंतमुवरि पालीयं ।
तज्जाएण निरुद्धं तक्खण पडिएण तालेन ।।

वृ- यथेति दृष्टान्तोपन्यासे वा इति दृष्टान्तान्तरसमुच्चयेन महा तडागं भरितमिति वर्षे (र्षा) पानीयेन परिपूर्णं भरितमिति भरणादेव चोपर्येकस्मिन् प्रदेशे भिद्यमानपालीकं भित्तुमारब्धपालीकं तज्ञातेनेति प्राकृतत्वात्तृतीयां पञ्चम्यर्थे ततोऽयमर्थः तस्यां पाल्यां जातस्तज्जातस्तस्मात् तालात् तालवृक्षात् यस्मिन् क्षणे उदकगलनेन पाली भेत्तुमारब्धा तत्क्षणे तस्मिन्नेव प्रदेशे पतितेनतालेन तालफलेनेति गम्यते उदकं गलत् तेन निरुद्धमेष दृष्टान्तोऽयमर्थोपनयः ।

[भा.१२८०] एवं चरणतलागं नायय उवसग्गवीचिवेगेहिं ।
भिज्जंतु तुमे धरियं धिचबल वेरग्ग तालेणं ।।

वृ- एवं महत्तडागदृष्टान्तगतप्रकारेण चरणमेव तडागं ज्ञातयः स्वजनास्तैः कृता ये उपसर्गास्त एव वीचिवेगाः कल्लोल वेगास्तैर्ज्ञातिकृतोपसर्गवीचिवेगैर्भिद्यमानं त्वयाधृतिबलं च वैराग्यं च धृतिबलवैराग्यं च तदेवतालोऽवयवे समुदायोपचारात् तालफलं तेन धृतिबलवैराग्य तालेन धारितं केवलमवधावनतः प्रायश्चित्त भागजातः तीर्थकराज्ञा भङ्गात्तदेवाह--

[भा.१२८१] पडिसेहियगमनं आवणो जेन तेनसो पुठो ।
संघाडगतिह वोच्छो उवहिग्गहणे ततो विवादो ।।

वृ- प्रतिषिद्धं खलु भगवता तीर्थकरेणावधावनानुप्रेक्षिगमनं तस्मिन् प्रतिषिद्धे गमने कृते तथा येन कारणेन स्त्रीसेवादित आपन्नं प्रायश्चित्तस्थानं तेन स स्पृष्टः कर्मबन्धेन ततस्तद्विशोधनाय तस्मै दीयते प्रायश्चित्तं । अथ योऽसौ द्वितीयः संघाटकः प्रेषितस्तेन कियच्चिरंस प्रतीक्षणीयः तत आह-संघाडगेत्यादि सङ्घाटकस्य त्र्यहं त्रीन् दिवसान् यावत् प्रतीक्ष्यत । इह त्र्यहग्रहणमध्यमतो भवितुमर्हति तत उपधिग्रहणं कर्तव्यं तदीय उपधिर्याचित्वा परिग्रहणीयः ततो विवादोत्ति । यत्र सो वधावितस्ततः प्रतिनिवृत्तस्य सहायैर्यदि विवादो वक्ष्यमाणस्वरूपः क्रियते । तदा स प्रमाणयितव्यः इति ।

सम्प्रत्येतदेवोत्तरार्धं व्याचिख्यासुराह–

[भा.१२८२] एगाह तिहे पंचाहए य ते बिंति णं सहायाणां ।
वच्चासु अनिच्छंते भणंति उवहिंपि तोदेहि ।।

वृ- जघन्यत एकाहे एकस्मिन्मध्ये दिवसे मध्यमतख्याह, उत्कर्षतः पञ्चाहे प्रतीक्षिते यदा स निवर्तितुं नेच्छति ततः सहायाणमिति तं ब्रुवते कियच्चिरमस्माभिरवस्थातव्यमेहि व्रजामः । एवमुक्ते यदि सोऽभिधत्ते नाहं व्रजामि । ततस्तस्मिन् प्रत्यागमनमनिच्छति भणंति यदि नागच्छसि तर्हि उपधि मपि तावद्देहि मा उपधेरप्युपघातो भूदिति ।।

[भा.१२८३] न वि देमित्ति य भणिए गएसु जइ सो स संकितो सुवति ।
उवहम्मइ निसंकेन हम्मए अप्पडिवज्जंते ।।

वृ- यदि उपधेर्याचने कृते स ब्रूते नापि नैव ददाम्युपधिमहमिति तत एवं भणिते स सङ्घाटको गच्छति सङ्घाङगतिर्हेति व्याख्यातमधुना वुच्छो उवहिग्रहणे इति तद्व्याख्यानयति गएसु इत्यादि गतेपु तेषु सहायेषु यदि सशङ्कितः शङ्कनं शङ्कितं सह शङ्कितं सशङ्कितं यस्य येन वा स तथा का पुनः शङ्का ? उच्यते - किंमुत् व्रजामि किं वा नेति एव रूपशङ्कोपेतः स्वपिति, रात्रौ तदा स उपधिरुपहन्यते । अथ निःशङ्कितः सन् (न) स्वपिति यथा नियमान्मयोत्प्रव्रजितव्यमिति तदा नोपहन्यते । अथ निःशङ्कित उपित्वा यदि वा यस्मिन् दिने सहाया गतास्तद्दिवसमेवानुषित्वा यदि निवृत्य व्रजिकादिष्वप्रतिबध्यमान आगच्छति । न चान्तरा रात्रौ दिवसे वा स्वपिति तदा तस्मिन्नप्यप्रतिबध्यमाने नोपहन्यते । अथ स्वपिति तर्ह्युपहन्यते ।

[भा.१२८४] संवेग समावन्नो अनुवहयं घेत्तु एति तं चेव ।
अह होज्जाहि उवहतो सो विय जइ होज्ज गीयत्थो ।।

[भा.१२८५] तो अन्नं उप्पाए तं वोवहयं विगंचिउं होइ ।
अपडिबज्झतेत्तु सुचिरेण वि हू न उवहम्मे ।।

वृ- संवेगो मोक्षाभिलाषस्तं समापन्नस्तमेव गुरुप्रदत्तमुपधिमनुपहतं गृहीत्वा । एति समागच्छति । अथ भवेत् कथमप्युपहतः सोऽपि च साधुर्यदि स्यात् गीतार्थः ततस्तमुपहतमुपधिं विगंचिउंति परिस्थाप्यान्यमुपधिमुत्पाद्य एति समायाति । अथ स्यादगीतार्थस्तर्हि तेनोपधिरन्यो नोत्पादनीयो अगीतार्थत्वेनान्योत्पादने योग्यताया अभावात् । किन्तु तेनैवोपधिना गन्तव्यं । समागतस्य चान्यमुपधिमाचार्याः समर्पयन्ति । प्राक्तनं च साधुभिः परिस्थापयन्ति । सम्प्रति अप्पडिबज्झं तेउ इत्यादि अप्रतिबध्यमाने कर्मकर्तर्ययं प्रयोगः क्वचिदपि प्रतिबन्धमकुर्वति पुनः सुचिरेणापि प्रदीर्घेणापि कालेन हु निश्चितं नोपहन्यते उपधिः क्वचनापि प्रतिबन्धाकरणतः सततोद्यत्वात्।

सम्प्रति विवाद इति व्याख्यानयति-

[भा.१२८६] गंतूण तेहिं कहियं, सयावि आगंतु तारिसं कहिए ।
तो तं होइ पमाणं विसरिसकहणे विवादो उ ।।

वृ- यौ सहायौ तस्य प्रेषितौ, ताभ्यां गत्वा गुरुसमीपं तस्य प्रतिसेवनमप्रतिसेवनं वा कथितं, स चापि कृतावधावनः साधुरागत्य तादृशं कथयति ततस्तद्भवति प्रमाणमुभयेषामप्यविसंवादात् । अथ विसदृशं कथयति ततो विवादः सहाया ब्रुवते एष प्रतिसेवीति । स प्राह नप्रतिसेवीति, तत्र सत्य प्रतिज्ञाः खलु व्यवहाराः इति, स एव प्रमाणीक्रियते, न सहायाः, । तदेवं प्रतिसेवनामधिकृत्य विवादो दर्शितः ।

सम्प्रति मज्जनादिकमाधिकृत्याह-

[भा.१२८७] अहवा बेंति अगीया मज्जनमादिएहिं एस गिहीभूतो ।
तं तु न होइ पमाणं सो चेव तहिं पमाणं तु ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथवेति प्रकारान्तरोपप्रदर्शने अगीतार्था ब्रुवते । मज्जनादिभिर्मज्जनाङ्गरागधूपाधिवासादिभिरप गृहिभूतो जातः, सपुनरेवसमाह - नाहं स्नानादिकं कृतवान् यदि वा बलादहं स्वजनैः स्नानादिकं कारितो न पुनस्तेषु स्नानादिष्वनुरागवान् जात इति । तत्रैवं भूते विवादे यत्ते सहाया ब्रुवते तत्र भवति प्रमाणं, किन्तु स एव तत्र प्रमाणमिति एतदेव प्रविकटयिषुराह--

[भा.१२८८] पडिसेवी अपडिसेवी एवं थेराण होइ उ विवादो ।
तत्थ वि होइ पमाणं स एव पडिसेवणा न खलु ।।

वृ- स्थविरा आचक्षते एष प्रतिसेवी स प्राह-नाहं प्रतिसेवी एवं स्थविरैः सहगाथायां षष्टी तृतीयार्थे विवादो भवति । अत्रापि प्रतिसेवना विषयेऽपि भवति स एव प्रमाणं न पुनः खलु सहायैरुच्यमाना प्रतिसेवना तेषां पुनरगीतार्थानां पुरतः सूरय एतदभिदधति--

[भा.१२८९] मज्जन गंध परियारणादि जह नेच्छतो अदोसाय ।
अनुलोमा उवसग्गा एमेव इमंपि पासामो ।।

वृ- यथा अनिच्छतोऽनभिलषितोऽनुलोमा अनुकूला उपसर्गाः । के ते इत्याह-मज्जनं स्नानं गन्धः पटवासादिरुपः परिचारणास्त्रिया बलात्कारेणोपभोग आदिशब्दादेवं विधान्योपसर्गाः परिग्रहः एते यथा अदोषास्तद्विषयानुमननाभावात् । एवमिदमप्यथिकृताऽवधावितसाधुविषयं मज्जनादि पश्यामस्तदनुरागा भावतो निर्दोषमिति भावः एतदेव भावयति--

[भा.१२९०] जह चेवय पडिलोमा अपदुस्संतस्स होंति दोसा य ।
एमेव य अनुलोमा होंति असायज्जणे अफला ।।

वृ- यथेति दृष्टान्तोपन्यासे, च शब्दो दृष्टान्तदार्ष्टान्तिकयोः साम्यावधारणार्थः । यथा चैवं प्रतिलोमाः प्रतिकुला उपसर्गाः प्रद्वेषतः प्रद्वेषमगच्छतो भवंत्यदोपाय एवमेव अनेनैव प्रतिकुलोपसर्गगतेन प्रकारेण अनुलोमा अपि स्वजनैः क्रियमाणा मज्जनादय उपसर्गा असाइज्जमाणे अननुमनने भवन्त्यफलाः अन्यच्च-

[भा.१२९१] साहीणभोगचाई अविमहती निज्जराउ एयस्स ।
सुहुमो वि कम्मबंधो न होइ उ नियत्तभावस्स ।।

वृ- अपीति गुणान्तर समुच्चये । स्वजनक्रियमाणमज्जनाङ्गरागाद्यनास्वादनादेप स्वाधीन भोगत्यागी स्वाधीनभोगपरित्यागाच्चैतस्य महती निर्जरा पुराणकर्मनिर्जरणं प्रवृद्धप्रवृद्धतर शुभाशयसंभवात् न चाप्यभिनवकर्मसंगलनंयत आह-नतुनिवृत भावस्यावधावनात् प्रतिनिवृत्त परिणामस्य सतः सूक्ष्मोऽपि कर्मबन्धो भवति, कर्मोपचयहेतोर्दुष्टाध्यवसायस्याभावात् ।

मू. (६१) *एगपक्खियस्स भिक्खुयस्स कप्पति आयरिय उवज्झायाण इत्तरियं दिसं वा अनुदिसं वा उद्दिसित्तए वा धारित्तएवा जहा वा तस्स गणस्स पत्तियं सिया ।।*

वृ- एकः समानः पक्ष एकपक्षः । सोऽस्यास्तीति एकपक्षिकः प्रव्रज्यया श्रुतेन च स्ववर्गस्य भिक्षोः कल्पते । इत्वरां कियत्कालभाविनीमित्वरग्रहणमुपलक्षणं यावत्कथिकां च दिशमाचार्यत्वमुपाध्यायत्वं वा अनुदिशं वा आचार्योपाध्यायपदद्वितीयस्थानवर्तित्वं वा शब्दो विकल्पार्थः । उद्दिष्टुं वा तस्य वा स्वयं धारयितुं यथा वा तस्य गणस्य प्रीतिकं स्यात् । य थावा दिशमनुदिशं वा उद्दिशेत । किमुक्तं भवति ? भिन्नपक्षिकमप्यपवादपदेन स्वगणप्रीत्याचार्यादिपदाध्यारोपितं कुर्यादिति संक्षेपार्थः ।

व्यासार्थं तु भाष्यकृद्विवक्षुः प्रथमतः पूर्वसूत्रेण सह सम्बन्धमाहः--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१२९२] निक्खित्तंमि उ लिंगे मूलंसा तिन्नने य ण्हाणादी ।
दिनेसु य होइ दिसा दुविहा वि वएसु संबंधो ।।

वृ- यदि लिंगं रजोहरणं निक्खित्तं परित्यक्तं भवति ततस्तस्मिन्निक्षिप्ते लिङ्गे यदि वा लिङ्ग परित्यागेऽपि स्नानादेः साइज्जणे अनुमनने मूलं नाम प्रायश्चित्तं भवति, तस्मिंश्च मूलप्रायश्चित्त दानेन समस्त-पर्यायोच्छेदतः प्रदत्तेपुव्रतेपु द्विविधाप्याचार्यत्वमुपाध्यायत्वरुपादिकं दीयते । ततोऽवधावनसूत्रानन्तरं दिक् सूत्रोपन्यासः एप पूर्वसूत्रे सहास्य सूत्रस्य सम्बन्धः । साम्प्रतमेकपक्षिकत्वं व्याख्यानयति—

[भा.१२९३] दुविहोय एगपक्खी पव्वज्ज सुए य होइ नायव्वो ।
सुत्तम्मि एगवायण पव्वज्जाए कुलिव्वादी ।।

वृ- द्विविधो द्वि प्रकार एकपाक्षिको भवति ज्ञातव्यः । तद्यथा-प्रव्रज्यायां श्रुते च तत्र सूत्रे सूत्रविपये एकपाक्षिकवाचनः । एका समाना परस्परं वाचनयिम्यः (यस्य) स तथा एकगुरुकुलाधीन इत्यर्थः । प्रव्रज्ययात्येकपाक्षिक एककुलवर्ती आदिशब्दादेकगच्छवर्ति शिष्यसहाध्यायादिपरिग्रहः ।

एतदेव स्पष्टतरमाह-

[भा.१२९४] सकुलिव्वओ पव्वज्जा पक्खित्तो एगवायण सुयंमि ।
अब्भुज्जय परिकम्मो मोहेरोगेव इत्तरितो ।।

वृ- प्रव्रज्या पाक्षिको नाम सकुलिव्वतोत्ति स्वकुलसंभवी उपलक्षणमेतत् तेन स्वशिष्य इत्याद्यपि द्रष्टव्यं श्रुते श्रुतपाक्षिकः पुनरेकवाचन इहसूत्रे इत्वरादिग् ग्रहणात् कथिक्यपि दिक् सूचितातामुभयीमपि व्याख्यानयति । अब्भुज्जएत्यादि । आचार्यो अभ्युद्यत विहार परिकर्म कर्तुकाम उपलक्षणमेतत् अभ्युद्यत मरणं वा प्रतिपक्षुकामेन यावत्कथिकाचार्योपाध्यायाविति शेषः मोहे चिकित्सां रोगे रोगचिकित्सां वा कर्तुकाम इत्वरं, अक्षरयोजनात्वियं अभ्युद्यतकर्मणि अभ्युद्यतमरणेवा यावत्कथिकाचार्योपाध्यायाविति शेषः । मोहे रोगे चत्वारो बहुवचनं प्राकृतत्वात् । आचार्यस्य यावत्कथिकाचार्यस्थापने द्विविधः सापेक्षो निरपेक्षश्च तत्रयः तथा चात्र राजदृष्टान्तस्तमेवाह—

[भा.१२९५] दिट्ठंतो जह राया सावेक्खो खलु तहेव निरवेक्खो ।
साविक्खो जुव नरिंदं ठवेइ इयगच्छुवज्झायं ।।

वृ- दृष्टान्तो यथा राजा । तथा हि-राजा द्विविधः सापेक्षो निरपेक्षश्च । तत्र यः सापेक्षः स जीवन्नेव युवराजं स्थापयति, । युवराजश्च संस्थापनीयो यस्मिन्ननुरक्ता परिपत्ततः कालगतेऽपि राज्ञि न वैराज्यमुपजायते । किन्तु तदवस्थमेव राज्यमनुवर्तते यस्तु निरपेक्षः सन् स्थापयति युवराजं तस्मिंश्च स्थापिते राज्ञि कालगते दायादानां परस्पर कलह, भावतो राज्यं विनाशमाविशति, एवमाचार्योपिद्विविधः सापेक्षोनिरपेक्षश्च, तत्र योगच्छसापेक्षः स जीवन्नेवगणधरंस्थापयति तस्मिंश्च स्थापिते कालगतेऽप्याचार्ये गच्छो न सीदति । तथा चाह-इत्येवं सापेक्षराज इव युवनरेन्द्रं सापेक्ष आचार्यो जीवन्नेवेति वाक्यशेषो गच्छोपाध्यायं गच्छनायकं स्थापयति । यः पुनर्गच्छनिरपेक्षः सन् नाचार्यं जीवन् स्थापयति तस्मिन्कालगते परस्परकलहभावतो गच्छो विनाशमुपजायते, तस्माज्जीवत्येव गणधरे आचार्य उपाध्यायो वा स्थापनीयः । साम्प्रतमित्वराचार्योपाध्याय स्थापनाविपयमाह—

[भा.१२९६] गणहरपायोग्गा सति पमाय अठावि एव कालगते ।
थेराणपगासंती जावन्नो न ठाविती तत्थ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गणधरस्य गणधरपदस्य प्रायोग्यो गणधरप्रायोग्यः तस्यासत्यभावे अथवा प्रमादतो अस्थापित एवाचार्ये कालगते इत्वर आचार्य उपाध्यायो वा स्थाप्यते । स च यैः स्थाप्यते ते स्थविगणां गच्छबृहत्तगणां प्रकाशयन्ति । यावत्तत्र मूलाचार्यपदे वा मूलोपाध्यायपदे वाऽन्योन च स्थापितो भवति । तावदेव युष्माकमाचार्योपाध्यायो वा प्रवर्तक इति इह एक पाक्षिको द्विविध उक्तः प्रव्रज्यया श्रुतेन च अत्र च भंगचतुष्टयं तद्यथा प्रव्रज्यया एकपाक्षिकः श्रुतेन च, १ प्रव्रज्ययान श्रुतेन २ प्रव्रज्यया श्रुतेन न ३ नापिप्रव्रज्ययानापिश्रुतेन ४ एतदेवभंगचतुष्टनं कुलादिष्वपि योजनीयं । तथा चाह-

[भा.१२९७] पव्वज्जाए कुलस्स य गणस्स संघस्स चेव पत्तेयं ।
समयं सुएण भंगा, कुज्जा कभसो दिसाबंधे ।।

वृ- दिग्बन्धे आचार्यपदे उपाध्यायपदे वा स्थाप्यमाने इत्यर्थः । प्रव्रज्यायाः कुलस्य गणस्य सङ्घस्य च प्रत्येकं श्रुतेन सार्धं भङ्गान् कुर्यात् । भङ्गचतुष्यं प्रत्येकं योजयेदिति भावः । तत्र प्रव्रज्याया भङ्गचतुष्टयमुपदर्शितमिदानीं कुलस्योपदर्श्यते- कुलेनैकपाक्षिकः श्रुतेन च १, कुलेनैकपाक्षिको न श्रुतेन २, कुलेन नैकपाक्षिकः किन्तु श्रुतेन ३, न कुलेन नापि श्रुतेन ४ । एवं गणेन सङ्घेन च प्रत्येकं भंगचतुष्टयं भावनीयं तत्र प्रव्रज्यां कुलं गणं चाधिकृत्य यः प्रथमभङ्गवर्ती स इत्वरो यावत् कथिको वा स्थापनीयः । तदभावे तृतीयभंङ्गवर्त्ती यदि पुनर्द्वितीयभङ्गवर्तिनं चतुर्भङ्गवर्तिनं वा स्थापयति तदा तस्य स्थापयितुः प्रायश्चित्तं चत्वारो गुरुमासाः न केवलमेतत् प्रायश्चित्तं किं त्वाज्ञादयोऽप दोषास्तथा चाह–

[भा.१२९८] आणाइणो य दोसा, विराधनाहोइ इमेहिं ठाणेहि ।
संकिय अभिनवगहणे तस्सवदीहेन कालेन ।।

वृ- आज्ञादय आज्ञानवस्था मिथ्यात्वविराधनारूपाश्च शब्दोऽनुक्तप्रायश्चित्तसमुच्चये । तच्च प्रायश्चित्तं प्रागेवोपदर्शितं तथा विराधना गच्छस्य भेदो भवति । आभ्यां वक्ष्यमाणाभ्यां स्थानाभ्यां ते एव दर्शयति । शङ्किते अभिनवग्रहणे च साधूनां यदि ग्लानावस्था वा तस्य स्थापयितुर्दीर्धेन कालेन रोगचिकित्सां मोहचिकित्सां वा कृत्वा समागतस्य शङ्कते ।

एतदेव विभावयिपुः प्रथम इत्वरस्य यावत्कथिकस्य च स्थापने विषयमाह–

[भा.१२९९] परिकम्मं कुणमाणो मरणस्सब्भुज्जयस्स वविहारे ।
मोहे रोगचिकिस्सा उहावेंतेय आयरिए ।।

वृ- अभ्युद्यतस्य मरणस्य पादपोपगमनलक्षणस्य परिकर्मद्वादशसांवत्सरिकसंलेखनारूपं कुर्वाणा यदि वाभ्युद्यतविहारस्य जिनकल्पादिप्रतिपत्तिलक्षणस्य परिकर्मतपोभावनादिलक्षणं कुर्वति यावत्कथिक आचार्यः स्थापनीयः, । मोहे मोहचिकित्सायां रोगचिकित्सायां यदि वा अवधाववत्याचार्ये इत्वर आचार्यः स्थापयितव्यः । अत्र श्रुतानेकपाक्षिकेत्वराचार्यस्थापने दोषमाह–

[भा.१३००] दुविहतिगिच्छं काऊण आगओ संकियंमि ।
कं पुच्छे पुच्छंतु व कंपियरे गणभेओ पुच्छणा होउं ।।

वृ- अत्रानेकपाक्षिकेत्वराचार्यस्थापने द्विविधचिकित्सां मोहचिकित्सां रोगचिकित्सां चेत्यर्थः । दीर्घकालं गत्वा समागतः सन् शङ्किते सूत्रे अर्थे च कं पृच्छेत् । नैव कंचनेतिभावः स्थापिताचार्यस्य-भिन्नवाचनाकत्वादितरे वा गच्छवासि आचार्यो मोहचिकित्सां रोगचिकित्सां वा कुर्वतिकं पृच्छंति, नैवकंचन पुर्वोक्तादेव हेतोस्ततस्ते वाचनाप्रदायकमलभमानागच्छान्तरमुपसंपद्येरन् । गच्छान्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोपसम्पत्तौ न प्रश्नहेतोर्गणभेदः स्यात् । सम्प्रति श्रुतानेक पाक्षिकयावत्कथिकाचार्यस्थापने दोषमाह-

[भा.१३०१] न तरइ सो संधेयं अप्पाहारो वि पुच्छियं देइ ।
अन्नत्थ व पुच्छंते सचित्तादीउ गिण्हंति ।।

वृ- स श्रुतानेकपाक्षिकस्थापितो यावत्कथिको आचार्यो भिन्नवाचकत्वात् न शक्तोति संधातुं विस्मृतमालापकं दातुमथवा श्रुतानेकपाक्षिकोऽल्पश्रुतोप्युच्यते । ततोऽल्पा धारः अल्पस्य सूत्रार्थस्य चाश्रय इति पृष्टः सन्नन्यं प्रष्टुमालापकं ददाति । अन्यत्र च गणान्तरे गत्वा पृच्छति ते गच्छान्तरवर्तिन आचार्यास्तेनोत्पादितं सचित्तादिकं गृह्णन्ति अगीतार्थानां न किञ्चिदाभाव्यमिति जिनवचनात्तस्य च तेषां समीपे पृच्छनात् । उपसंहारमाह-

[भा.१३०२] सुयतो अनेगपक्खं एए दोसा भवे ठवंतस्स ।
पव्वज्जणेगपक्खित, ठवयंते इमे भवे दोसा ।।

वृ- श्रुतोनेकपक्षिणमित्वरं यावत्कथिकं वाचार्यं स्थापयत एते अनन्तरोक्तदोषा भवन्ति । प्रव्रज्यानेकपक्षिणं पुनरित्वरं यावत्कथिकं वा स्थापयत इमे वक्ष्यमाणा भवंति दोषाः ।

तानेव प्रतिपादयिपुराह—

[भा.१३०३] दोन्हवि बाहिरभावो सचित्तादीसु भंडणा नियमा ।
होइ स गणस्स भेदो सुचिरेण नए अम्हत्ति ।।

वृ- प्रव्रज्यानेकपाक्षिकेत्वरयावत्कथिकाचार्यस्थापने द्वयोरपि गच्छस्य वाचार्यस्येत्यर्थः । बहिर्भावो बहिर्भावोध्यवसायो भवत् तथाहि योऽसौ स्थापित आचार्यः स गच्छवर्तिनः साधुन् समस्तानपि परकीयान्मन्यते । साधवोऽपि च गच्छवर्तिनस्तं परमभिमन्यते । एवं परस्परं बहिभावाध्यवसाये सति स्थापितस्याचार्यस्य गच्छवर्तिनां च साधुनामनिभाव्यानि सचित्तादीनि गृह्णतां नियमात् भण्डनं कलहो भवति, । तथा च सति प्रवचनोड्डाहः प्राक्कल्पव्यावर्णितप्रायश्चितप्रायश्चित्तापत्तिश्च अन्यच्च गच्छवर्तिनस्ते साधवो मन्यन्ते सुचिरेणापि प्रभूतेनापि कालेन गच्छता नास्माकमेप परकीयत्वात् । उपलक्षणमेतत् । सोऽप्यभिमन्यते सुचिरेणाप्येते परकीया इत्येवं परस्परमध्यवसायभावतो गणस्य गच्छस्य भेदो भवन्ति । तस्मादित्वरो यावन्कथिको वा प्रथमभङ्गवर्ती स्थापयितव्यः, अत्रैवापवादमाह—

[भा.१३०४] अन्नयरनिगिच्छाए पढमासति तइय भंगमित्तरियं ।
तईय स्सेवउसई बितितो तस्साणति चउत्थो ।।

वृ- अन्यतरचिकित्सायां मोहे चिकित्सायां वाचार्यमित्वरमुपलक्षणमेतत् । अभ्युद्यतमरणप्रतिपत्तौ अभ्युद्यतविहारपरिकर्मप्रतिपत्तौ वा यावत्कथिकमाचार्यमुत्सर्गतः प्रथमभङ्गवर्तिनं स्थापयेत्, प्रथमभङ्गवर्तिनोऽसति अभावे तृतीयं तृतीयभङ्गवर्तिनमित्वरमुपलक्षणमेतत् । यावत्कथिकं वा स्थापयेत्, तत सूत्रेऽर्थे च सशीध्रं निष्पादयितव्यः । तृतीयस्यापि तृतीयभङ्गवर्तिन एव शब्दार्थः । असत्यभावे पुनर्द्वितीयो द्वितीयभङ्गचर्ती स्थाप्यस्तस्याप्यसति अभावे चतुर्थभंगवर्त्ती, । तत्र योऽसौ चतुर्भङ्गवर्ती स्थापयितव्यो भवति स एतादृशगुणः-

[भा.१३०५] पयतीए भिउसहावं पगतीए संमतं विनीतं वा ।
नाऊण गणस्स गुरुं ठविंति अनेगपक्खिपि ।।

वृ- अनेकपत्तिणमपि प्रव्रज्यापक्षरहितं श्रुतसमानपक्षरहितमपि प्रथमद्वितीय भङ्गचर्त्यसंभवे प्रकृत्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावेन नतु कपटभावतो मृदुस्वभावमरोषण स्वभावं तथा प्रकृत्या स्वभावेन सम्मतमभिमतं समस्तस्यापि गच्छस्येति गम्यते स्वजनसम्बन्धभावतो वा निजकमात्मीयं ज्ञात्वा गणस्य गुरुः स्थापयितव्यः । तस्य चतुर्भङ्गवर्तिनः सचित्तादिषु य आभवन व्यवहारस्तमभिधित्सुराह–

[भा.१३०६] साहारणं तु पढमे बिइए खेत्तंमि तइय सुहदुक्खे ।
अनहिज्जंते सीसे सेसेएक्कारस विभागा ।।

वृ- प्रथमे वर्षे साधारणं विमुक्तं भवतियो यावल्लभ्यते तस्य तद्द्वितीये वर्षे यत् क्षेत्रे तदीये लभ्यते तद्गच्छवर्तिनां साधूनां, शेषं गणधरस्य, तृतीये वर्षे समदुःखोपभोगालभन्ते । तत्तेषामेव गच्छवर्तिनामाबावयति शेषं गणधरस्य, चतुर्थादिषु वर्षेषु सर्वगणधरस्य, एष आभवव्यवहारो-ऽनधीयानेशिष्ये । किमुक्तं भवति । ये स्थापिताचार्यस्य समीपे न पठन्ति तान् प्रतिद्रष्टव्यः, । ये पुनराचार्यस्य समीपे पठन्ति तेषामेकादशविभागास्तथा चाह-शेषेऽधीयाने एकादशविभागाः प्रकारा आभवव्यवहारस्य तानेव प्रतिपिपादयिषुराह–

[भा.१३०७] पुव्वुद्दिट्ठं पडित्थे पच्छुद्दिट्ठं पवादयंतस्स ।
संवच्छरंमि पढमे पडिच्छज्ञं एव सचित्तं ।।

वृ- प्रतीच्छके गच्छान्तरादध्ययनार्थमधिकृतच्छोपसम्पदं प्रपन्ने यत् आचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तं उपलक्षणमेतत् अचित्तं वस्त्रपात्रकंबलादि प्रथमे वर्षे भवति सम्पद्यते तत्सर्वं तस्य प्रतीचछकस्य एष प्रथमो विकल्पः । यत्पुनराचार्य पदस्थापनातः पश्चादुद्दिष्टं प्रथमे वर्षे सम्पद्यते । सचित्तादिकं तत्सर्वं प्रवाचयतोऽधिकृतस्थापनाचार्यस्याध्यापयितुः एष द्वितीयो विकल्पः ।

[भा.१३०८] पुव्वं पच्छुद्दिट्ठं पडिच्छए जंतु होइ सचित्तं ।
संवच्छिरंमि बितिए तं सव्वं पवायवं तस्स ।।

वृ- आचार्यपदस्थापनातः पूर्वं उद्दिष्टं यत्सचित्तमुपलक्षणमेतत् अचित्तं वा द्वितीये संवत्सरे भवति सम्पद्यते क्केत्याह-प्रतीच्छके गच्छान्तरादागत्य सूत्रस्यार्थस्य वा प्रतीच्छनं प्रतीच्छा तया चरति प्रतीच्छिकस्तस्मिंस्तत् सर्वं प्रवादयतोऽध्यापयितुरधिकृतस्थापिताचार्यस्य वेदितव्यम् ।

एष तृतीयोऽपि विकल्पः ।।

[भा.१३०९] पुव्वं पच्छुद्दिट्ठं सीसंमि उ जंतु होइ सच्चित्तं ।
संवच्छरंमि पढमे सव्वं गुरुस्स आभवति ।।

वृ- आचार्यपदस्थापनातः पूर्वं पश्चाद्वा उद्दिष्टं यत्सचित्तमुपलक्षणत्वादस्याचित्तं वस्त्रादिकं शिष्ये प्रथमे वर्षे भवति सम्पद्यते तत्सर्वं भवति । एष चतुर्थो विभागः ।।

[भा.१३१०] पुव्वुद्दिट्ठं तस्स य पच्छुद्दिट्ठं पवाइयं तस्स ।
संवच्छरंमि बिइए सीसंमि उ जंतु सच्चित्तं ।।

वृ- यत्सचित्तमचित्तं वाचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तमचित्तं वा शिष्ये द्वितीये संवच्छरे भवति सम्पद्यते तत्सर्वं तस्य शिष्यस्या भवति एप पञ्चमो विभागः । यत्पुनराचार्यपदस्थापनातः पश्चादुद्दिष्टं सचित्तमचित्तं वा शिष्ये द्वितीये संवत्सरे भवति सम्पद्यते तत्सर्वं प्रवाचयतोऽधिकृतगुरोराभवति एष षष्ठो विभागः ।

[भा.१३११] पुव्वं पच्छुद्दिट्ठं सीसंमि उ जंतु होइ सच्चित्तं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवच्छरंमि तईए, तं सव्वं पव्वाइयंतस्स ।।

वृ- यः पूर्वपश्चाद्वाचार्य पदस्थापनातः उद्दिष्टं सचित मचित्तं वा शिष्ये तृतीये संवत्सरे भवति सम्पद्यते तत्सर्वं प्रवाचयतो ऽधिकृतगुरोरभवति, एप सप्तमो विभागः ।।

[भा.१३१२] पूव्वुद्दिट्ठं तस्स पच्छुद्दिट्ठं पवाययंतस्स ।
संवच्छरंमि पढमे तं सिस्सिणी ए उ सच्चित्तं ।।

वृ- आचार्यपदस्थापनातः पूर्वमुद्दिष्टं सचित्तमचित्तं वा प्रथमे संवत्सरे शिष्विण्याः शिष्याया भवति संपद्यते, तत्सर्वं तस्याः शिष्याया आभवति, एषो अकष्टमो विभागः । यत्पुनराचार्यपदस्थापनातः पश्चादुद्दिष्टं सचित्तादिकं प्रथमे संवत्सरे शिष्यायाः सम्पद्यते । तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोरभाव्यम् एप नवमो विभागः ।।

[भा.१३१३] पुव्वं पच्छुद्दिट्ठं सिस्सीए उ जं तु सचित्तं ।
संवच्छरंमि बितिए एतं सव्वं पवाययंतस्स ।।

वृ- पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तमचित्तं वा द्वितीये संवत्सरे शिष्यायाः सम्पद्यते तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोः एप दशमो विभागः ।।

[भा.१३१४] पुव्वं पच्छुद्दिट्ठं पडिच्छयाए उ संति सच्चित्तं ।
संवच्छरंमि एठमे तं सव्वं पवायवंतस्स ।।

वृ- पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तमुपलक्षणमेतदचित्तं वा प्रथमे वर्पे प्रतीच्छिक्याः शिष्याः सम्पद्यते । तत्सर्वं प्रवाचयतोऽधिकृतस्य गुरोरेष एव न्यायो द्वितीयादिष्वपि संवत्सरेषूक्ताः एकादशापि विभागाः साम्प्रतमुपसंहारमाह—

[भा.१३१५] जम्हा एते दोसा दुविहे अपरिक्खए उठवियंमि ।
तम्हाउ ठवेयव्वो कमेणिमेणं तु आयरिओ ।।

वृ- द्विविधेप्यपाक्षिके श्रुतपक्षरहिते प्रव्रज्यापक्षरहिते चेत्यर्थः । स्थापिते चाचार्ये यस्मादेते अनन्तरोदिता दोषास्तस्मादनेनान्तरोदितेन पढमा सति तइयंभंगमित्यादि लक्षणेन क्रमेण स्थापयितव्य आचार्य इति । अथ प्रथमभङ्गवर्ती केन विधिना स्थापयितव्यः । उच्यते—

[भा.१३१६] एयरसेग दुगाही निप्फणा तेसिं बंधइ दिसातो ।
संपुच्छण उ लोयण दाने मिलिएण दिट्ठंतो ।।

वृ- एतस्य प्रथमभङ्गवर्तिनः स्थापिताचार्यस्य एकद्विकादयः एकद्वित्रिचतुरादयः शिष्याः निष्पन्नाः भवन्ति । ततस्तेषां दिश आचार्यत्वमुपाध्यायत्वं चेत्यर्थः बध्नाति तथा योऽसावाचार्यैः सन्दिष्टो यथैव सूत्रतो अर्थतश्च निर्माप्याचार्यपदे स्थापनीय स्तस्य स्थापितगणधरेणाचार्यपदे स्थापितस्य शिष्याणां विप्रतारणार्थं सम्प्रच्छनं परैरुदन्तवहनमवलोकनं साक्षात्समीपं गत्वा संयमयात्रा निर्वहन् प्रच्छनं दानं वस्त्रपात्रादेः एतेषां समाराहो द्वन्द्वः । तस्मिन्नपि कृते विपरिणामाभावे मिलितेन गोपालद्वयमिलनेन दृष्टान्तो वक्तव्यो द्वयोर्गोपालयोर्मिलितयोः प्रभूता धनवृद्धिरभूत्तथा युष्माकमस्माकंच मिलितानां विहरतां भूयान् ज्ञानादिलाभो भवतीति मिलितैर्विहर्तव्यमिति ।। साम्प्रतमेनामेव गाथां विवरीपुरिदमाह-

[भा.१३१७] गीयमगीया बहवो गीयत्थ सलक्खणा उ जे तत्थ ।
तेसिं दिसाउ दाउं वियरति सेसे जहरिहं तु ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गच्छे बहवः साधवो गीयमगीया इति गीतार्था अगीतार्थाश्च । तत्र ये गीतार्थास्तत्रापिस-लक्षणाचार्यलक्षणोपेता तेषां दिश आचार्यपदानि दत्वा शेषान् साधून् यथार्ह यथायोग्यतया केचिदनुरत्नाधिकत्वेन केचित्सामान्यतः शिष्यत्वेन वितरति प्रयच्छति । एतच्च तदा द्रष्टव्यं यदा प्रत्येकं बहवः शिष्याः प्रप्यन्ते । अन्यथा त्वेकएवाचार्यः स्थापनीयः शेषाः समस्ता अपि शिष्यत्वेन सम्बध्यन्ते । तत्रापि सलक्षणानां दिशो ज्ञायन्ते । एतदेव सुव्यक्तमभिधित्सुराह—

[भा.१३१८] मूलायरि रायनितो अनुसरिसो तस्स होउ वज्झातो ।
गयमगीया सेसा मज्झिल्लया होंति सीसाहा ।।

वृ- मूलाचार्यो नाम रात्निको रत्नाधिकः । तस्य मूलाचार्यस्याऽनुसदृशोऽनुरुपोपाध्यायः शेषास्तु ये गीतागीतार्थास्ते तस्य सब्भिलगा अनुरत्नाधिका अगीता अगीतार्था हकारो अलाक्षणिकः शिष्या भवन्ति ।।

[भा.१३१९] रायनियागीयत्था अलद्धिया धारयंति पुव्वदिसं ।
अपहुव्वं ते सलक्खण केवलमेगे दिसाबंधो ।।

वृ- ये पुनरात्निकाव्रतपर्यायेणाधिकाः गीतार्थाः श्रुतसम्पदुपेता व्रतश्रुतनिष्पन्नाश्च केवलं सङ्ग्रहे उपग्रहे वाऽलाब्धिकाः ते पूर्वदिशं पूर्वाचार्यप्रदत्तं दिशमनुरत्नाधिकत्वलक्षणं धारयन्ति । न त्वाचार्य-पदमुपाध्यायपदं वा तेषामारोप्यते लब्धिहीनत्वात् । एष विधिः यावन्तः स्थापिता आचार्यास्तेषां प्रत्येकमनुगन्तव्यः । एतच्च तदा क्रियते यदा भूयांसः स्थाप्यन्ते । अपहुव्वंते इत्यादि अप्रभवति प्रत्येकमाचार्याणां साधुपरिवारे भूयस्यऽप्राप्यमाणे केवलमेकस्मिन् लक्षणे विशिष्टाचार्यलक्षणोपेते दिग्बन्ध आचार्यपदाध्यारोपः क्रियते । एतदेवाह—

[भा.१३२०] सीसे य पहुव्वंतं सव्वेसिं तेसिं होइ दायव्वा ।
अपहुव्वं तेसुं पुन केवलमेगे दिसाबंधो ।।

वृ- शिष्ये शिष्यवर्गे प्रत्येकं भवति परिपूर्णतया भवति तेषामाचार्यलक्षणोपेतानां सर्वेषामपि दिशो दातव्याः । अप्रभवस्तु प्रत्येकं पूर्णतया साधुष्वप्राप्यमाणेषु केवलमेकस्मिन् सलक्षणेतरे दिग्बन्धः कर्तव्यः । शेषाणां तु सलक्षणानां दिशोऽनुज्ञाप्याः साम्प्रतं तेष्वाचार्यपदस्थापितेषु उपकरणदान-विधिमाह—

[भा.१३२१] अचित्तं च जहरिहं दिज्जइ तेसुं च बहुसुगीएसु ।
एसविही अक्खातो अगीएसुं इमो उ विही ।।

वृ- तेषु आचार्यपदस्थापितेषु बहुषु गीतार्थेषु अचित्तं वस्तुपात्रादि उपकरणं यथार्हं यो यावन्मात्रार्हस्तस्य तावन्मात्रं दीयते, एष विधिराख्यातो गीतार्थेषु सूत्रार्थनिष्पन्नेषु आचार्यलक्षणोपेतेषु; अगीतेष्वनधिगतसूत्रार्थेषु आचार्यलक्षणोपेतेष्वयं वक्ष्यमाणो विधिर्द्रष्टव्यस्तमेवाह—

[भा.१३२२] अरिहं व अनिम्माउं नाउं थेराहणंति जो ठविंतो ।
एयं गीयं काउं दिज्जाहि दिसं अनुदिसं वा ।।

वृ- अहो नाम लक्षणोपेततयाचार्यपदयोग्यः परमद्यापि सूत्रे अर्थे च न विनिर्मातस्तमर्हमनिर्मातं ज्ञात्वा यो गणधरस्तत्कालं स्थापतस्तं स्थावरवृद्धाचार्या भणन्ति यथा एतं साधुं गीतं गीतार्थं कृत्वा दद्यात् भवान् दिशमनुदिशं वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१३२३] सो निम्माविय ठवितो अत्थति जइतण सठितो लद्धं ।
अह नवि चिठति तहियं संघाडो तो सि दायव्वो ।।

वृ- यो सावाचार्येण सन्दिष्टो यथैतं साधुं निर्माप्य एतस्मै दिशमनुदिशं वा दद्यात् । स निर्मापितो निर्माप्य चाचार्यपदेस्थापितः । ततः स यदि निर्मापितस्थापितस्तेन सह तिष्ठति विहरति ततो लब्धं समीचीनं । अथ नैव अपि शब्द एवकारार्थो न तिष्ठति । तत्र तस्य समीपे तर्हि से तस्य सङ्घाटो दातव्यः यश्च पूर्वाचार्येण वैयावृत्तकारो दत्तः सोऽपि तेन सार्धं विहरति । तत्र ये स्थापितगणधरेणैको द्वौ त्रयो वा सहाया दत्ताः यश्च पूर्वाचार्यप्रदत्तो वैयावृत्त्यकरस्तान् पाठयति । ये वाभिनव शिष्यका उपस्थिताः प्रव्राजितास्तेऽप्यात्मनः शिष्यत्वेनसंबन्धनीयाः । एवं सञ्जातपुष्टविहारः सन्नन्यत्र विहारेण गतस्तस्य तथा विहरतः शिष्यान् स्थापितगणधरो विपरिणमयितुकामो यत्समाचरति तदुपदर्शयति—

[भा.१३२४] पेसेइ गंतु व सयं व पुच्छे सं बंधमाणो उवहिं व देतो ।
सज्झंतियासिं च समल्लियावि सचित्तमेवं न लभे करंतो ।।

वृ- यत्र स निर्मापितस्थापित विहरति तत्रोदन्तवाहकान् साधून् तच्छिष्याणां प्रेषयति । अथवा स्वयमन्तरान्तरागत्वा तान् पृच्छति, यथा संस्तरति यूयं सुखेन यद् भो भवतां नास्ति ततः कथयत, येनाहं ददामीति; तथा तान् शिष्यानात्मनः संबंधयन् उपधिं चान्तरान्तरा ददाति । तथा ये स्वाध्यायान्तिकाः स्वाध्यायनिमित्तं समीपस्थायिनो अनुरतनाधिका गीतार्था इत्यर्थः तान् तेषां निर्माप्य स्थापितानामाचार्याणां सक्तानात्मनः समालापयति संश्लेषयति लीङ श्लेषणे इति वचनात् एवं तेन गीतार्थाः शिष्याश्च विपरिणम्यमाणा निर्मापितस्थापितस्य समीपं मुक्त्वा तं स्थापित गणधरमुपसंपद्यंते, सचैवं सचित्तं साधुवर्गलक्षणमात्मीकुर्वन् न लभते, व्यवहारतो न ते तस्या भवन्तीति भावः अथैवमपि ते विपरिणम्यमाना न विपरिणमन्ति नापि तस्य समीपमायान्ति ततोऽनेन दृष्टान्तेन तान् सम्बन्धयन्ति तमेव दृष्टान्तमाह-

[भा.१३२५] गोवालगदिठंतं करेइ जह दोन्नि भाउगा गोवा ।
रक्खंती गोणीओ, प्पिहप्पिहा असहिया दोवि ।।

[भा.१३२६] गेलणं एगस्स उ, दिना गोणी उ ताहि अन्नस्स ।
इय नाऊणं ताहि सहिया जाया दुवग्गावि ।।

वृ- दोनि गोवाला सहोयरभाउगा भंडणं करेत्ता पत्तेयं पत्तेयं वेयणएण गावीतो रक्खंति । अन्नया तेसिं एगो रोगी जातो ततो तेन जाव न रक्खिया तो गावीतो परिहीणो जातो, अन्नया बितितो पडिलग्गो सो वितहेव परिणीणो ततो तेहिं एगागयिस्स न सोहमिति चिंतिऊण परोप्परंपीती कया, तो एको पडिलग्गो । तस्स वियातो गावीतो विइतो रक्खइ, एवं इयरस्सवि । एवं तेसिंदव्वपरिवड्ढी जाया । एवं अम्हंपि वीसुंवीसुं विहरंताणं परिहानी भवति तम्हा मिलिया विहरामो जेण विउला नाणादीणं वड्ढी हवइ । जं तुब्भं तं तुब्भं चेव नाहं तं हरामि । एवं समल्लियावेत्ता सीसे सज्झंतिए यदि परिणामेइ तहवि सो न लहह । सम्प्रतक्षरयोजनागोपालकदृष्टान्तंकरोति । यथा-द्वौ गोपौ भ्रातृकौ तौ द्वावप्यसहितौ पृथक् पृथक् वेतनेन गा रक्षतः अन्यदा एकस्य ग्लानत्वे गा अन्यस्य गोस्वामिना दत्ता स वेतनात्परिभ्रष्टः । एवमितरोऽपि ग्लानत्वे वेतन परिहीनो जातस्तत इति पृथक् पृथक् असंहितस्थितस्य महती द्रव्यहानिरिति ज्ञात्वा जातौ द्वावपि सहिताविति उपसंहारमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१३२७] एवं दोनिवि अम्हे पिहप्पिहा तह विहरिमो समयं ।
वाघातेण णोन्ने सीसातो परं च न भयंति ।।

वृ- एवं द्वयोरपि वयं यद्यपि प्रथक् प्रथक् तिष्ठामः तथापि समकं सहिततया विहरामो येन व्याघाते ग्लानत्वादि लक्षणेऽन्योन्यज्ञानादिहानिर्नोपजायते शिष्या वा परं गच्छान्तरं न भजन्ते । एवमपि स कुर्वाणो न कुरुते शिष्यान् ।

मू. (६२) *बहवे परिहारिया बहवे अपरिहारिया इच्छेज्जा एगतो एगमासं दुमासं वा तिमासं वा चाउ मासं वा पंचमासं वा छमासं वा वत्थए ते अन्नमन्नं संभुंजति, अन्नमन्नं नो संभुंजइ मासंते तओ पच्छा सव्वेवि एगओ संभुंजति ।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध इति संबन्धप्रतिपादनार्थमाह-

[भा.१३२८] असरिसपक्खे गओ तिए परिहारो एस सुत्तसंबंधो ।
काऊणवि तेगिच्छं साइज्जया गते सुत्तं ।।

वृ- असदृशपक्षिको नाम द्वितीयभङ्गवर्ती चतुर्थभङ्गवर्ती वा तस्मिन् स्थापिते किल चतुर्गुरु नामप्रायश्चित्तपरिहारप्रस्तावादधि कृत परिहारसूत्रस्योपनिक्षेपः । एप पूर्व सूत्रेण सहाधिकृत सूत्रस्य सम्बन्धः ।। अत्रैव प्रकारान्तरमाह-काउण वेत्यादि रोगचिकित्सां कुर्वता मनोज्ञमौषदं मनोज्ञं वा भोजनमनुरागेणास्वादितं तत्र च प्रायश्चित्तं परिहारतपस्ततो रोगचिकित्सां कृत्वा मनोज्ञं च भोजनादिकमास्वाद्य समागतस्य प्रायश्चित्तं परिहारतपो भवतीति ज्ञापनार्थमधिकृतं परिहारविषयं सूत्रम् । एप द्वितीयः सम्बन्धः प्रकारः । अधुना तृतीयमाह—

[भा.१३२९] अहवा गणस्स अपत्तियं तु ठावेंतो होइ परिहारो ।
एसो तितएसोत्ति ठवेज्जउ भंडणं सगणे ।।

वृ- यो गणधरः स्वाभिप्रेतं गणासंमतं गुणरहितमपि स्थापयितुकामोऽभिमान वशेनैष योग्यो न पुनरेष गणसम्मतो योग्य इत्येवं स्वगणे भंडनं कृत्वा स्थापयति तस्मिन् गणस्य गच्छस्य अप्रीतिकं यथा भवति । एवं स्वाभिप्रेममाचार्यं स्थापयति प्रायश्चित्तं भवति पारिहारः परिहारतपः, । तत एतदर्थं प्रतिपादनार्थं दिग्बन्धसूत्रानन्तरं परिहारसूत्रमेष तृतीयः सम्बन्धः । सम्प्रति चतुर्थं पञ्चमं च सम्बन्ध प्रकारमाह—

[भा.१३३०] परिहारो वा भणितो न तु परिहारंमि वणिया मेरा ।
ववहारे वापगते अह ववहारो भवे तेसिं ।।

वृ- वा शब्दः प्रकारान्तरद्योतनार्थः । अधस्तात् परिहारउक्तो न तु तस्मिन् परिहार वोढव्ये व्यावर्णिता मर्यादाविधिरित्यर्थः । ततः परिहार विधिप्ररूपणार्थमेष आरम्भः क्रियते । अयं च चतुर्थः सम्बन्धः प्रकारः । पञ्चममाह । वा शब्दोऽत्रापि प्रकारान्तरद्योतनार्थः । व्यवहारार्थं किल व्यवहाराध्ययनं प्रकृतं । ततस्तस्मिन्नपगते अधुनावदनवर्तमाने कृते व्यवहारे अह एष एतेषां परिहारिकाणामपरिहारिकाणां च व्यवहारो भण्यते । अनेन सम्बन्धपञ्चकेनायातस्यास्य व्याख्या-बहवः प्रभूताः परिहारिका बहवोऽपरिहारिकाः कारणवशतः तीर्थकरोपदेशेच्छया न स्वच्छन्देच्छया इच्छेयुरेकत एकत्रस्थाने एकमासं वा द्विमासं वा त्रिमासं वा चतुमासं वा पञ्चमासं वा षण्मासं वा वस्तुं अन्योऽन्यं परस्परमपि परिहारिका इति शेषः । संभुञ्जते सर्वप्रकारैः भुञ्जते अन्नमन्नं न संभुञ्जतित्ति परिहारिका यावत्तपो वहन्ति तावत्ते परस्परमपरिहारिकैर्वा समं न संभुञ्जन्ति । यैः षण्मासाः सेविता तेषां यः षण्मासो परिवर्त्तीमासस्तं यावत्ते

परिहारिकाः परस्परं परिहारिकैः सममुपलक्षणमेतत् । अपरिहारिकैर्वा सममेकत्र न संभुञ्जते । आलापनादीनि कुर्वन्ति तत उपरितनमास परिपूर्णो भवनानन्तरं पश्चात् सर्वेऽपि पारिहारिका अपरिहारिकाश्च एकत एकत्रस्थाने सर्वप्रकारैर्भुञ्जते । एत सूत्र संक्षेपार्थः । अत्र पर आह-ननु बहवः परिहारिका अपरिहारिकाश्च कथमेकत्र संभवन्ति येनाधिकृतं सूत्रमुपपद्येत तत आह–

[भा.१३३१] कारणिगाते लीना बहुगा परिहारिका भवेज्जाहि ।
अपरिहारियभोगो परिहारि न भुञ्जए बहवो ।।

वृ- बहवः पारिहारिका एकत्र मिलिता भवेयुः कारणिकाः कारणवशेनेति भावः ततो नाधिकृत सूत्रानुपपत्तिः तत्रापरिहारिकाणामेकत्र परस्परं भोगो भवति । एतावता ते अनमनं संभुञ्जतीति व्याख्यातं यस्तु परिहारी स परिहारतपो वहन् परिहारिभिर्वा समं न भुङ्क्ते । एतेन अन्नमन्नंनो संभुञ्जतीति व्याख्यातम् । पारिहारिका नाम ये परिहारतपोरूपं प्रायश्चित्तं प्रपन्नाः । ये पुनः परिहारतपोरूपं प्रायश्चित्तं न प्रतिपन्नास्ते अपरिहारिकास्तत्र परिहारतपः प्रतिपादनविधिः परिहरणविधिश्च निशीथाध्ययने कल्पे च व्यावर्णितो यस्तु तत्र नोक्तस्तमिदानीं प्रतिपिपादयिषुराह–

[भा.१३३२] गिम्हाणं आवणो चउसुवि वासातु देंति आयरिया ।
पुन्नंमि मासवज्जण अपुने मासियं लहुयं ।।

वृ- इह ग्रीष्मग्रहणेन ऋतुबद्धकालग्रहणं तेषामृतुबद्धानां मासानां मध्ये एकमासं यावत् षण्मासं तावत् परिहारतप; समापन्न स्तद्वर्षारात्रे चतुर्षुमासेष्वपि दीयते अत्रार्थे च कारणं स्वयमेव वक्ष्यति यस्तु षण्मासं परिहारतपः प्रपन्नस्तस्य पूर्णे षण्मासे उपरि मासवर्जनं मासं यावदेकत्र भोजनवर्जनम् । एतेन मासादिके परिपूर्णो पञ्चरात्रिंदिवानि भोजनवर्जनमुपलक्षितं । तच्चानन्तरगाथायां स्वयमेव वक्ष्यति, । तत्र यावद्भोजनं प्रतिषिद्धं, तत्र तावत् परिपूर्णं भोजनं कुर्वतः प्रायश्चित्तं मासिकं लघु सम्प्रति पुन्नंमि मासवज्रणमित्येतद्व्याचिख्यासुराह–

[भा.१३३३] पनगं पनगं, वज्जेज्जइ मासो छण्हमासाणं ।
नयभद्द पंतदोसा, पुव्वुत्तगुणायतो वासो ।।

वृ- मासे मासे पञ्चकं पञ्चकं परिवर्धमानं तावत्पर्यन्ते यावत्षण्णां मासानामुपरिमासो वर्ज्यते, इयमत्र भावना-यो मासिकं परिहारतप आपन्नस्तस्य मासं वहतः पूर्वोक्तो विधिः आला(ल) पनवर्जनादिको वेदितव्यः । मासे तु व्यूढे उपरि पञ्चरात्रिंदिवानि यावदालापनादीनि सर्वाणि क्रियन्ते, नवरमेकं भोजनमेकः वर्ज्यते । एवं यौ द्वौ मासावापन्नस्तस्य दशरात्रिंदिवानि, यस्त्रीन्मासान् तस्य पञ्चदश चश्चतुरो मासान् तस्य विंशतिः, यः पञ्चमासान् तस्य भिन्नमासं यावत् यस्तु षण्मासान्नापन्नस्तस्य षण्मासेषु व्यूढेषु उपरि मास यावदेकत्रभोजनमेकं वर्ज्यते । शेषं त्वालापनादिकं सर्वं सर्वत्र दशरात्रिं दिवादौ क्रियते, । अथ कस्माहतु बन्धेषु मासेष्वापन्नस्यापि वर्षारात्रैः तपो दीयते, । अत आह-नयभद्दपंत दोसा इत्यादि ऋतुबद्धे काले यदि परिहारतपो दीयते ततस्तस्मिन् दत्ते सति यदि मासकल्पे परिपूर्णे सति विहरन्ति तर्हि परिहारिकाणां परितापनादि दोषप्रादुर्भावः । अथ न विहरन्ति ततो भद्रकप्रान्तकृतदोषसम्भवः । भद्रकृता दोषा उद्गमादिकरणं, प्रान्तकृतदोषा अति चिरावस्थाने चमढनादिका, वर्षाकाले त्वेतेदोषाः प्रायो न संभवन्ति, । सर्वदर्शनिनां वर्षाकालस्य तपोऽनुष्टानाअयतया सम्मतत्वेन कस्यचिदपि विशेषतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषतः प्रीतेर्द्वेषस्य वाऽसंभवात्तया पूर्वोक्तगुणाश्च कल्पाध्ययनप्रतिपादिता गुणाश्च वर्षाकाले अवाप्यन्ते, । ततो वर्षासु परिहारतपो दीयते अथ के ते पूर्वोक्ता गुणा इति विस्मरणशीलान् प्रति तान् भूय उपदर्शयति –

[भा.१३३४] वासासु बहुपाणा, बलिओकालोचिरं च ठायव्वं ।
सज्झायसंजमतवे धणियं अप्पा निजोतव्वो ।।

वृ- वर्षासु वर्षाकाले सर्वतः प्रायो बहवः प्राणास्ततो दीर्घा भिक्षाचर्या न भवति तथा स्निग्धतया स कालो बलिको बलियान् तपः कुर्वताः बलोपष्टंभं करोतीति भावार्थः । तथा चिरं च प्रभूतं कालं चैकत्र स्थातव्यमत एव स्वाध्याये संयमे तपसि च धणियमित्यर्थमात्मा नियोक्तव्यो भवति । तत एवं प्रभूत गुणो पदर्शनतो वर्षाकाले परिहारतपः प्रतिपत्तिः कार्या एतेन आवन्नो गिम्हाणं चउसुविवासासु देंति आयरिया इत्यत्र यदुक्तं कारणं स्वयमेव वक्ष्यतीति तत्समर्थितं । सम्प्रति षण्मासवाहनान्तरमुपरि यन्मासो भोजनमधिकृत्य वर्ज्यते तत्र कारणमाक्षेपपुरः सरमभिधित्सुराह –

[भा.१३३५] मासस्स गुणानामं परिहरणा पुति निव्वलणमासो ।
तत्तो पमोयमासो भुंजणवज्जे न सेसेहिं ।।

वृ- अथ षणां मासानामुपरि मासस्य परिहरणं भोजनमधिकृत्य कस्मात्क्रियते । उच्यते निर्वलनार्थं प्रमोदार्थं वेति वाक्यशेषः, तथाहि कुथितमद्यादि गन्धं मृत्तिकाभाजनं यावदद्यापि निर्वलितं न भवति, तावन्न तत्र क्षीरादिप्रक्षेप एवमेषोऽपि दुश्चरितदुरभिगन्धभावितो नियमादेतावताकालेन निर्वलितो भवति नान्यथा । तथा जिनवचनप्रवृत्तेः, तथा कश्चित्केनाप्यगम्यगामित्वेनालीकेनापि शपितो राजकुले च निवेदितः स ततगोलादिकं गृहीत्वा शुद्धः सन् मिथः संभाषणादिभिः प्रमोदं कृत्वा परस्परं स्वजनैः सह भुङ्क्ते, । एवमेषोऽपि पारिहारिकमात्मानमपराधेन मलिनं प्रायश्चित्तेन शोधयित्वा मासं यावन्मिथः संभाषणादिभिः प्रमोदमाधाय ते सहैकत्र भुङ्क्ते, । तदेवमुक्तकारणवशतो अन्यैः सममसंभुञ्जमानो मासं यावदवतिष्ठते, तस्मादेतस्य मासस्य गौणं गुणनिष्पन्नं नाम द्विधा, तद्यथा-पूतिनिर्बलनमास इति प्रमोदमास इति पूतिर्दुरभिगन्धिस्तस्य निर्वलनं स्फेटनं तत्प्रधानो मासः पूति निर्वलनमासः तथा प्रमोदहेतुमासः प्रमोदमासः सचमासो भोजनेन वर्ज्यः परिहर्तव्यो न पुनः शेषैरालापादिभिः यथाभ्यां कारणाभ्यां मासवर्जनमेवं पैञ्चरात्रिं दिवादि परिवर्जनमपि भावनीयं किञ्चान्यदपि कारणमस्ति पञ्चरात्रिं दिवादि परिवर्जने ततस्तदभिधित्सुराह–

[भा.१३३६] दिज्जइ सुहं च वीसुं, तवसोसियस्स जं बल करंतु ।
पुनरवि य होइ जोगो अचिरादुविहस्स वि तवस्स ।।

वृ- इह यद्येकत्र भुङ्क्ते ततः सहैव स्वसंङ्घाटकेनैषभुङ्क्ते, इत्यनादरबुद्ध्या यत्तपः शोषितस्य बलवर्धनकरं तस्य दानं न भवति, विष्पकृपृथक् प्रतिभोजने पुनस्तप शोषितगात्रोऽयमद्यापि न मंडल्यां भुङ्क्ते, इत्यादरबुद्धिभावतः तपसा शोषितस्य तद्बलवर्धनकरमशनादि तत्सुखेनैव सर्वैरपि साधुभिरपि दीयते । तस्यापि दाने को गुण इत्याह-बलवर्धनकराशनादिप्रदाने पुनरप्यचिरात् स्तोकेन कालेन द्विविधस्यापि तपसः परिहारतपसः शुद्धतपसश्चेत्यर्थः योग्योऽपि भवति ।

मू. (६३) *परिहार कप्पट्ठियस्स भिक्खुस्स नो कप्पइ, असनं वा पानं वा खाइमं वा साइमं वा दाउं वा अनुप्पदाउं वा थेरायणां वा देज्जा इमं तं अज्जो तुमं एतेसिं देहि वा अनुप्पदेहि वा, एवं से कप्पइ दाउं वा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुप्पदाउं वा कप्पइ से लेवं अनुजाणवित्तिए अनुजाणह भंते । लेवाए, एवं से कप्पइ लेवं समासेवित्तए ।

वृ- अथास्य सूत्रस्य कः सम्बन्ध उच्यते--

[भा.१३३७] एसा वूढे मेरा होइ अवूढे अयं पुन विसेसो ।
सुत्तेनेव निसिद्धो होइ अनुन्ना उ सूत्तेण ।।

वृ- एषा अनन्तरसूत्रप्रतिपादिता मर्यादा स्थितिर्भवति व्यूढे परिहारतपसि । अव्यूढे पुनः परिहारतपसि अयमधिकृतसूत्रेण प्रतिपाद्यमानो मर्यादाया विशेषः, एष पूर्वसूत्रेण सहाधिकृतसूत्रस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-परिहारकल्पे स्थितः परिहारकल्पस्थितः, तस्य परिहारकल्पस्थितस्य भिक्षोर्न कल्पते अशनं पानं खादिमं स्वादिमं वा अन्यस्मै साक्षात्स्वहस्तेन दातुमनुप्रदातुं वा परम्परकेन प्रदातुमनुशब्दस्य परम्परकद्योतकत्वात् । अत्रैवानुज्ञातमाह । थेराणयमित्यादि यदिपुनः स्थविराणामिति वाक्यालङ्कृतौ वदेयुः इमं परिहारकल्पस्थितं भिक्षुं, अहो आर्य ! त्वमेतेभ्यो देहि परिभाजय अनुप्रदेहि वा, । एवं स्थविरैरनुज्ञाते सति से तस्य कल्पते दातुमनुप्रदातुं वा दाने अनुप्रदाने च तस्य हस्तो विकृतिद्रव्येण (प्रश्रेणि) खरण्टितो भवति ततः से तस्य कल्पते । लेपविकृतिं हस्तगतं अनुप्रज्ञापयितुं यथा भदन्त यूयमनुजानीथ, लेप खरंटित हस्तं लेवाए इति समासेवितुमेवमनुज्ञापने कृते सति से तस्य कल्पते लेपं विकृतिं हस्तगतां समासेवितुमुपलक्षणमेतदन्यदपि यदुद्धरितं तदप्यनुज्ञातं सत् कल्पते समासेवितुमिति सूत्रसंक्षेपार्थः, व्यासार्थं तु भाष्यकृत् विवक्षुः प्रथमतः सामान्यत आह सूत्रेण चेत्यादि सूत्रेणैव दाने अनुप्रदाने च प्रथमतो निषिद्धे तदनन्तरं तेनैव सूत्रेण दाने अनुप्रदाने च भवत्यनुज्ञा एवं संक्षेपतः सूत्रार्थे कथिते सत्याह--

[भा.१३३८] किह तस्स दाउ किज्जइ चोयगसुत्तं तु होइ कारणियं ।
सो दुब्बलो गिलायइ तस्स उवाएण देंते वा ।।

वृ- किह कथं केन प्रकारेण तस्य परिहारकल्पस्थितस्य भिक्षोर्दातुं क्रियते अशनादिकं तद्दानकरणस्य कल्पविरुद्धत्वात् । अत्र सूरिराह-हे चोदक ! सूत्रमिदं भवति कारणिकं कारणेन निवृत्तं कारणिकं कारणमधिकृत्य प्रवृत्तमित्यर्थः । तदेव कारणमाहसो दुब्बलो इत्यादि स परिहारकल्पस्थितो भिक्षुर्दुर्बलस्तपः शोषितशरीरत्वादत एव पदे ग्लायति । ततस्तस्यानुकम्पनार्थमेवमनेनोपायेन दानानुप्रदानकारापणलक्षणेन विकृतिं स्थविरा ददति प्रयच्छन्ति । तत एषापि परिहारकल्प समाचारीति न कश्चिद्दोषः सम्प्रति यथा तस्य दानमनुप्रदातुं वा करणीयं भवति येन च कारणेन स्थविरा अनुजानते तदेतदभिधित्सुराह--

[भा.१३३९] परिमिय असति अनो सो विय परिभायणंमि कुसलो उ ।
उच्चूरपउरलंभे अगीय वामोहननिमित्तं ।।

[भा.१३४०] तवसोसीयमज्झो वा तउय तब्भावितो भवे अहवा ।
थेरा नाऊणेवं वदंति भाएहि तं अज्जो ।।

वृ- इह यद्दानमनुप्रदानं वा परिभाजनमुच्यते तच्च यथा संभवति तथोपपद्यते साधुभिः सर्वैस्तपोविशेष प्रतिपन्नवर्जितैरेकत्र मण्डल्यां भोक्तव्यम् । किं कारणमिति चेदुच्यते-इह द्विविधा साधवो लब्धिमन्तो लब्धिरहिताश्च । तत्र ये लब्धिरहितास्ते बहिर्गतास्तथाविधं प्रायोग्यं न लभन्ते, । मण्डल्यां तूपविष्टानां लब्धिमत् साधुसङ्घाटकानीतपरिभाजनेन तेषामन्येषामपि च बालशैक्षवृद्धग्लानादिनां प्रायोग्यं भवतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषामनुग्रहणाय मण्डलीबन्धकरणं, मण्डलीबन्धे च कृते कस्यचिदजीर्णं भवति । जीर्णेऽपि च कोऽपि काश्चित् विकृतीर्भुङ्क्ते न सर्वाः सर्वास्ततः प्रचुरविकृतिलाभे सर्वजनानुग्रहाय परिभाजनं क्रियते । तत्र स परिहारकल्पस्थितोऽपि भिक्षुस्तपः शोषितशरीर इति तस्य विकृतिविषये ध्युपपातश्रद्धा जाता । अथवा पूर्वं सदैव तस्यां विकृतौ भावित इति तद्भावनया तस्यामध्युपपत्तौ जात स्वत एव तत्स्थविरा ज्ञात्वा तदनुग्रहाय परिमिते विकृतिर्लाभे सति असन् अविद्यमानोऽन्यपरिभाजन कुशलो यः सर्वेषामौचित्येनापूरयति सोऽपि च परिहारकल्पस्थितः परिभाजनकुशल इति । सर्वसाधूनां वचनेन प्रकाश्यैवं वदति अहो आर्य ! गाथायामोकारान्तता प्राकृतलक्षणवशात् त्वमेतेभ्यः साधुभ्यः परिभाजय, यदि पुनः उच्चूरं नानाविधं भवति । प्रचूरमतिप्रभूतं घृतादिलब्धं भवति तदा उच्चूरप्रच्चूरलाभे अगीतव्यामोहननिमित्तं अगीतार्था मा विपरिणमन्त्विति । यथा तद्वा कारणं वचसा प्रकाश्य तद्व्यामोहननिमित्तमेवं ब्रुवते आर्य त्वं साधुभ्यः परिभाजय ।

[भा. १३४१] परिभाईय संसट्ठे, जो हत्थं संलिहावए परेण ।
फुसइव कुड्डेइ च्छड्डे अननुण्णाए भवे लहुओ ।।

वृ- आचार्योपदेशने परिभाजिते सति तस्य हस्तः संसृष्टो घृतादिना लिप्तो भवति तस्मिन् संसृष्टे यदि तथैव संसृष्टेन हस्तेनावतिष्ठते तर्हि प्रायश्चित्तं मास लघु, यथा हस्तं परेण संलेहापयति, तस्यापि प्रायश्चित्तं मास लघु । अथवा कुड्ये हस्तं स्पृशति तत्रापि मास लघु अथवा काष्टेन निघृष्य च्छर्दयति तत्रापि मासलघु, । अथाननुज्ञातः सन् स्वयं लेढिहस्तं तदापि ।

[भा. १३४२] कप्पइ य दिन्नंमी चोयगवयणं च सेस सूपस्स ।
एवं कप्पइ अप्पायणं च कप्पट्ठिती चेसा ।।

वृ- वितीर्णे अनुज्ञाते सति कल्पति स्वयं स्वहस्तं परिलेढुं । इयमत्र भावना-यद्याचार्यः समादिशति त्वं स्वहस्तं घृतादि विकृति खरंटितं स्वयमेव लेढि, ततः स लेढि । चशब्दादन्यदपि यत्परिभाजितशेषं तदप्याचार्येणानुज्ञातं भुङ्क्ते, । चोयग वयणं चेति अत्र चोदकवचनं यथा कथं परिहारिकस्य विकृतेरनुज्ञापनं युक्तमिति सूरिराह-सेस सूपस्स सूपकारकस्य यथा शेष माभाव्यं भवति तस्यापीति भावः । एतदुक्तं भवति यथा सूपकारः केनापि स्वामिना संदिष्ट एतावत्प्रमाणैस्तन्दुलमुद्रादिभिर्भक्तं निष्पाद्यैतावतः पुरुषान् भोजय, एवमादेशे लब्धे साधिते भक्ते भोजितेषु च पुरुषेषु यच्छेषमुद्धरति तत्सर्वं सूपकारस्याभाव्यम् एवमाचार्योपदेशतः परिहारिकेन परिभाजिते यच्छेषमुद्धरति तत्तस्य परिहारिकस्याभाव्यं, सूपकारदृष्टान्तं उपलक्षणं तेनापूपिकदृष्टान्तोऽपि वेदितव्यः । स चैवं केनाप्यापूपिक आदिष्ट एतावता कणिक्कादिना द्रव्येण एतावत्प्रमाणं मण्डकादिकर्तव्यमेवमादेशे लब्धे तथैव मण्डकादिके निष्पादिते शेषं यदुद्धरति मण्डकादि तदा पूपिकस्या भवत्येवं परिहारिकस्यापि, तत एवं तपः शोषित शरीरस्याप्यायन निमित्तमाचार्यस्य कल्पते अनुज्ञापनमित्यदोषः, इतरस्त्वदोषः कल्पस्थितिरेषा यत ग्लायत आप्यायन निमित्तमेव मनुज्ञापनं कर्तव्यं, येन शेषं प्रायश्चित्ततपः सुखेन वहतीति सूपकारदृष्टान्तमेव सविस्तरं भावयति--

[भा. १३४३] एव इयाणं भत्तं करेहि दिनंमि सेस यं तस्स ।
इय भाइय पज्जंते सेसुव्वरियं च देंतस्स ।।

वृ- एतावद्भिस्तन्दुलादिकैरेतावद्भक्तं कुर्विति समादेशे लब्धे निष्पादिते भक्ते दत्ते चोक्तप्रमाणेभ्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषेभ्यो भोजने यच्छेषं तत्तस्या भवति । इति एव अमुना प्रकारेणाचार्योपदेशतः पर्याप्ते भोजिते शेषमुद्धरितमस्य पारिहारिकस्य परिवेषकस्याचार्यो ददाति । सम्प्रति येन प्रमाणेनाचार्या उपदिशन्ति तत्प्रमाणमभिधित्सुराह—

[भा.१३४४] दव्वप्पमाणं तु विदित्तु पुव्वं, थेरा से दावेंति तयं पमाणं ।
जुत्ते विसेसं भवते जहा उ, उच्चूर लंभे तु पकामदानं ।।

वृ- इहाचार्यैः पूर्वं द्रव्यं प्रमाणयितव्यं यथेदं किंयुक्तप्रमाणमाहोश्वित्सपरिस्थापनमेवं पूर्वं द्रव्यप्रमाणं विदित्वा ज्ञात्वा स्थविरा आचार्याः से तस्य परिहारिकस्य तत्प्रमाणं दर्शयन्ति । यथा युक्तेऽपि युक्तप्रमाणेऽपि शेषं भवति । उच्चूरलाभे प्रचूरनानाविधघृतादिलाभे प्रकामदानं यावत् यस्मै रोचते तावत्तस्मै दीयतामित्येवं रूपमनुज्ञाप्यते ।।

मू. (६४) *परिहार कप्पट्ठिए भिक्खू सएणं पडिग्गहेणं बहिया अप्पाणं वेयावडियाए गच्छेज्जा, थेरा तं वएज्जा पडिग्गहेहि अज्जो ! अहंपि भोक्खामि वा पाहामि वा एवं नं से कप्पइ पडिग्गाहित्तए, तत्थ नो कप्पइ अपरिहारिएणं परिहारियस्स पडिग्गहम्मि असनं वा पानं वा खाइमं वा साइमं वा भोत्तए वा, पायए वा, कप्पइ से सयंसि पडिग्गहंसि, सयंसि पलासगंसि वा कमढगंसि वा सयंसि वा खुवगंसि वा उद्धट्टु भोत्तए वा पायए वा एस कप्पे अपरिहारियस्स पारिहारियओ ।।*

वृ- अस्य सूत्रस्य पूर्वसूत्रेण सह सम्बन्धेन प्रतिपादनार्थमाह—

[भा.१३४५] आयाणादिवसाने संपुडितो एस होइ उद्देसो ।
एगाहिगारियाणं वारेइ अतिप्पसंगं वा ।।

वृ- आदानमादिरवसानं पर्यन्तः तयोः साधर्मिकाधिकार प्रतिपादनादेष उद्देश सम्पुटितः तारकादि दर्शनादितः प्रत्ययः । इयमत्र भावना-अस्योद्देशकस्यादावन्ते च प्रत्येकं द्वे द्वे सूत्रे साधर्मिकाधिकार-प्रतिपादके । ततः एष उद्देशकः साधर्मिकारेणः सम्पुटितः सम्पुटितत्वाच्च सम्पुटनकरणमेवास्य सूत्रस्य सम्बन्धः । अथवा एकाधिकारिकानि यानि यान्यनन्तरमुद्दिष्टानि परिहारिकसूत्राणि तेषामेकाधि-कारिकारिकाणां पारिहारिकसूत्राणां यो भक्तदानैकत्र भोजनप्रतिषेधे अतिप्रसङ्गस्तं वारयत्यधिकृतेन सूत्रद्वयेनेत्येष पूर्वसूत्रेण सहास्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-परिहारकल्पस्थितो भिक्षुः स्वकीयेन पतद्ग्रहणेन पतद्ग्रहणे वा वसतेर्बहिरात्मनः स्वशरीरस्य वैयावृत्याय भिक्षानयनायेत्यर्थः गच्छेत् स्थविराश्च तं गच्छन्तं दृष्ट्वा वदेयुरस्मद् योग्यमपि स्वपात्रके गृह्णीयात् । अहमपि भोक्ष्ये पास्यामि वा एकमुक्ते से तस्य कल्पते स्थविर योग्यं प्रतिगृहीतुं तत्र तस्मिन् आत्मयोग्य परिगृहीते सति नो कल्पते अपरिहारिकेण सता पारिहारिकस्य पतद्गृहे अशनं पानं खादिमं स्वादिमं भोक्तुं वा पातुं वा, किन्तु कल्पते से तस्याऽपारिहारिकस्य स्वकीये वा पतद्ग्रहे तुम्बादिमये स्वकीये वा पलाशके पलाशपात्रके स्थाले स्वकीये वा कमढके स्वकीये वा खुब्बए इति । पलाशादिपत्रमये दोणके उद्धट्टु उद्धट्टु इत्यवकृष्य अवकृष्य भोक्तुं वा पातुं वा उपलक्षणमेतत् । दुर्लभपानीयभावे कालाप्रापणे वा तत्पात्रे एव पारिहारिकेण समं कल्पते भोक्तुं पातुं वा । उपसंहारमाह- एष कल्पोऽपारिहारिकस्य पारिहारिकतपः पारिहारिकमधिकृत्य एष प्रथमसूत्र संक्षेपार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (६५) *परिहारकप्पट्ठिए भिक्खू थेराणं पडिग्गहेणं बहिया थेराणं वेयावडियाए गच्छेज्जा थेराय वदेज्जा पडिग्गहे हि अज्जो ! अत्थ तुमं पि एत्थ भोयसि वा पाहसि वा एवं से कप्पइ पडिगाहित्तए, तत्थ नो कप्पइ पारिहारिएणं अपारिहारियस्स पडिग्गहंसि असनं वा पानं वा खाइमं या साइमं वा भोयएवा पायएवा, कप्पइ से सयंसि पडिग्गहंसि सयंसि या पलासगंसि वा सयंसि वा कमढगंसि सयंसि वा खुव्वगंसिवा पाणिसि उद्धट्टुं उद्धट्टुं भोयए वा पायए वा एस कप्पे पारिहारियस्स अपारिहारियओत्तिबेमि ।।*

वृ- द्वितीयसूत्रसंक्षेपार्थस्त्वयम् - परिहारकल्पस्थितो भिक्षुः स्थविराणां पतद्भहेण वसतेर्बहिः स्थविराणां वैयावृत्याय भिक्षानयनायेत्यर्थः । गच्छेत् स्थविराश्च तं तथा गच्छन्तं दृष्ट्वा नूनं सर्वगृहेषु भिक्षाकालः समकं वर्तते ततोऽस्मद्योग्यमानीय षश्चादेष आत्मनो योग्यानयनाय प्रविष्टो न किमपि लप्स्यते । इति कारणवशतो वदेयुः प्रतिगृह्णियात् । त्वमप्यत्र भोक्ष्यसे पास्यसि वा । एवमुक्ते से तस्य कल्पते स्थविरस्य प्रतिगृहीतुं तत्र तस्मिन्नात्मयोग्यग्रहणे सति न कल्पते परिहारिकेणा पारिहारिकस्य पतद्ग्रहेऽशनं पानं स्वादिमं खादिमं वा भोक्तुं वा पातुं वा किंतु कल्पते तस्य स्वकीये वा पतद्ग्रहे स्वकीये वा पलाशके स्वकीये वा कमढे स्वकीयेखुव्वके भोक्तुं वा पातुं वा उपलक्षणं व्याख्यानमत्रापि द्रष्टव्यम् । एष कल्पपरिहारिकस्यापरिहारिकतोऽपरिहारिकमधिकृत्य इति ब्रवीमि तीर्थकरोपदेशतो न स्वमनीषिकयेति । सम्प्रति नियुक्तिभाष्यविस्तरः—

[भा.१३४६] सपडिग्गहे परपडिग्गहे य बहि पुव्वपच्छतत्थेव ।
आयरिय सेहभिग्गह समसंडासे अहा कप्पो ।।

वृ- पूर्वं वसतेर्बहिर्भिक्षा नयनाय निष्क्रम्य स्वपतद्गृहे स्वयोग्यमानीय पश्चात्परपतद्ग्रहे आचार्ययोग्यमानयति । अथवा पूर्वं परपतद्ग्रहे आचार्ययोग्यमानीय पश्चात् स्वपतद्ग्रहे स्वयोग्यमानयति । अथवा कारणवशतस्तत्रैव एकस्मिन् पतद्ग्रहे उभययोग्यमानयति । आनीते स्थविरेण पूर्वं भुक्ते पश्चात्परिहारिकेण भोक्तव्यम् । अथ कालो न प्राप्यते ततं आचार्यः स्थविरः शैक्षाभिग्रहः परिहारकएतौ द्वावपि समकमेकस्मिन् तपगद्ग्रहे भुञ्जते । तत्र च सण्डासोपलक्षितः शुनकमांसदृष्टान्तो वक्तव्यः । एष यथाकल्पो यथावस्थिता सामाचारी । साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतः सपडिग्गहे य बहिपुव्वपच्छ इति व्याख्यानवति;—

[भा.१३४७] कारणिय दोन्नि थेरो, सो व गुरु अहवकेणइ असहू ।
पुव्वं सयं व गेण्हइ पच्छा घेत्तुं य थेराणं ।।

वृ- अशिवादिकारणवशतो द्वौ आचार्य पारिहारिको कारणिकौ जातौ विमुक्तं भवति अशिवादिकारणवशतः शेषसाधून् देशान्तरं प्रेष्यतावेव केवलावेकत्र स्थानस्थितौ, तत्र योऽसौ गुरुः स स्थविर इति कृत्वा अथवा केनापि रोगेण ग्रस्त इति भिक्षामटितुमससहोऽसमर्थः यः पुनस्तस्य सहायः स परिहारतपः प्रतिपन्नो वर्तते । ततस्तत्रेयं सामाचारी पारिहारिकः पूर्वमात्मीयेन पतद्ग्रहेणात्मयोग्यमानीय मुक्त्वा आत्मीयं पतद्ग्रहं स्थापयित्वा पश्चात् स्थविरसत्कं पतद्ग्रहं गृहीत्वा स्थविराणां योग्यं गृहीतुमटति । अथवा पूर्वं स्थविरसत्कं कृत्वा स्थविरयोग्यमानीय स्थविराणां सम्पर्य पश्चादात्मीयेन पतद्ग्रहेण हिण्डत्वात्मना भुङ्क्ते । अत्र परस्यावकाशमाहः—

[भा.१३४८] जइ एस सामाचारी किमट्ठसुत्तं इमं तु आरद्धं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सपरिग्गहेतरेण व परिहारी वेयावच्चकरे ।।

वृ- यदि नाम एषा सामाचारी यथा पारिहारी पारिहारिकः स्वपतद्ग्रहेण इतरेण वा चार्यपतद्ग्रहेण यथाक्रमं स्वस्याचार्यस्य च वैयावृत्यकर इति तदिदं सूत्रद्वयं किमर्थमारब्धं सूत्रोक्तस्यार्थस्या संभवादाचार्यः प्राह-न सूत्रोक्तार्थासंभवः कारणतः सूत्रद्वयस्य पतितत्वादथ कानि कारणानि यद्वशादिदं सूत्रद्वयं पतितमत आह–

[भा.१३४९] दुल्लहदव्वं पडुच्च, व तव क्खेवियं समं वसतिकाले ।
चोयगकुव्वंति तयं, जं वुत्तमिहे व सुत्तंमि ।।

वृ- हे चोदक दुर्लभं द्रव्यं पानीयं प्रतीत्य यदि वा तपसा खेदितं पारिहारिकमथवा समकमेककालं सर्व गृहेषु सति भिक्षाकाले आचार्य परिहारिकौ न कुर्वतो यदुक्तमिहैव सूत्रे । यथाहि-परिहारिकतपसा खेदितः सन् स्थविरस्य चार्थाय द्वौ वारौ भिक्षामटितुमसर्थः ।। ततस्तं पारिहारिकं स्वकीयेन पतद्ग्रहेणात्मनो अर्थाय हिण्डित्वा पश्चात् स्वविराणामर्थाय स्थविर्पतद्ग्रहेण हिण्डिष्ये इति बुद्धया सम्प्रस्थितं स्थविरा असमर्थ ज्ञात्वा ब्रुवते । अस्माकमपि योग्यमात्मीयेन पतद्ग्रहणं प्रतिगृणीयास्तत उपरि एकस्मिन् वा पार्श्वे स्थविरयोग्यं गृह्णाति । गृहीते च तथा तस्मिन् स्थविरस्ततः समाकृष्य समाकृष्य भुङ्क्ते, एषा स्थविरस्य सामाचारी; पारिहारिकस्य पुनरियं तं पारिहारिकः स्थविराणां पतद्ग्रहं गृहीत्वा स्थविरस्यार्थाय हिण्डित्वा पश्चाच्चात्मनो अर्थाय हिण्डिष्ये इति बुद्धया सम्प्रस्थितं दृष्ट्वा ग्रहादिकं वा परिमितं ज्ञात्वा स्थविरा भाषन्ते । आत्मनोप्यर्था यास्मदीय एव पात्रे प्रतिगृहणीया एवं सन्दिष्टः सन् स तथैव च गृहीत्वा समागतस्ततः स्थविरपतद्ग्रहादात्मीये पतद्ग्रहे पलाश भाजने कमढगेवा समाकृष्य समाकृष्य भुङ्क्ते । एषापरिहारिकस्य सामाचारी । एतावता तवखेवियमिति भावितं, सम्प्रति समं वसति काले इति भाव्यते-यत्र ग्रामे नगरे वा तौ स्थविरपरिहारिकौ व्यवस्थितौ तत्र सर्वगृहेषु समकालं भिक्षाकालोऽजनिष्ट. तं स्थविरा ज्ञात्वा द्वितीयं वारं प्रविष्टः सन् एष न लभेतेति संप्रस्थितं भापन्ते । एकत्रैवात्मनो मम च योग्यं गृह्णीया इति तत्र चोभयोरपि मृग्यमाणं स्तोकं पानीयं लभ्यते, ततः स्थविरपतद्ग्रहस्य प्रक्षालनाय पानीयं न पूर्यते । तत् एतत् ज्ञात्वा स्थविरास्तं पारिहारिकं संदिश्यन्त्येकस्मिन्नेव पतद्गृहे द्वयोरपि योग्य गृह्णीयाः । एवं सन्दिष्टे पारिहारिकस्येयं सामाचारी तस्मिन् पतद्ग्रहे स्थविरयोग्यं भक्तं तत् बिष्वग् गृहणाति द्वितीये पार्श्वे आत्मयोग्यमथवात्मयोग्यमधस्ताद् गृहणाति स्थविरयोग्यमुपरिष्टात् एवं गृहीत्वा वसतावागच्छति, । तत्राचार्यभोजनविधिः । तस्यैवैकस्य एकस्मिन् पार्श्वे उपरि वा यदाचार्ययोग्यं गृहीतुं तस्मिन्नाचार्यो भुङ्क्ते, पश्चात्पारिहारिको यदस्मिन् पार्श्वे अधस्ताद्वात्मयोग्यं गृहीतं तत् भुंङ्क्ते, । अथवा यत्स्थविरो भुंक्ते पश्चाद्भुङ्क्ते तावत्सूरोऽस्तमुपयाति । ततो द्वावपि समकं भुञ्जाते । एतावता समति भावितं । एतदेव व्याचिख्यासुराह–

[भा.१३५०] पास उवरिव गहियं कालस्स दव्वस्स वावि असतीए ।
पुव्वं भोत्तुं थेरा दलंति समयं च भुञ्जन्ति ।।

वृ- द्रव्यस्य पानीयस्यासति अभावे एकस्मिन् पार्श्वे उपरि बा यत् गृहीतमाचार्ययोग्यं तत्पूर्व स्थविरा भुंक्त्वा पश्चाच्छेषंपारिहारिकाय ददति । कालस्यद्वयोः क्रमेण भोजनकालस्यासति समकं वा एककालं तौ भुञ्जाते । सम्प्रति सण्डासोपलक्षिते शुनकमांसदृष्टान्तभावना क्रियते । यथा कोऽप्यऽलर्केण शुना खादितः स यदि तस्यैव शुनकस्यमांसं खादति, ततः प्रगुणो भवति, अनेनकारणेन शुनकमांसं खाद्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचतं खादितुकामः कथमहं सर्वास्पृश्यं शुनकमांसं स्पृशामीति संदंशकेन मुखेक्षिपति, एवंपारिहारिकोपि कारणत एकस्मिन् पार्श्वे उपरिवा गृहीतं स्थविरस्तकं जुगुप्समान इव ततू परिहरन् आत्मीयं समुद्दिशति ।।

उद्देशकः-२ समाप्त

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहारसूत्रे द्वितीयोद्देशकस्य [भद्रबाहुस्वामिरचिता निर्युक्तियुक्तं] संघदासगणि विरचितं भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः ३

वृ- उक्तो द्वितीयोद्देशकः । सम्प्रति तृतीयमारभ्यते । तत्र चेदमादि सूत्रम् ।

मू. (६६) *भिक्खू इच्छेज्जा गणं धारित्तए भगवं च से अपलिच्छिन्ने एवं से नो कप्पइ गणं धारित्तए, भगवं च से पलिच्छिन्ने एवं से कप्पइ गणं धारित्तए ।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध ? तत आह—

[भा.१३५१] तेसिं चिय दोन्नंपि सीसायरियाण पविहरंताणं ।
इच्छेज्ज गणं वोढुं जइ सीसो एस संबंधो ।।

वृ- तयोरेव शिष्याचार्ययोः कारणवशतो द्वयोरपि केवलयोः प्रविहरतो यदि शिष्यो गणं वोढुं धारयितुमिच्छेत् तस्य विधिर्वक्तव्यः तद्विधिप्रतिपादनार्थमिदं सूत्रमित्येष पूर्वसूत्रेण सहास्स सूत्रस्य सम्बन्धः । प्रकारान्तरेण सम्बन्धमेवाह—

[भा.१३५२] तेसिंच कारणियाणं अन्नं देसं गयाय जे सीसा ।
तेसिं गंतुं कोई गणं धरेज्जाह वा जोग्गो ।।

वृ- अथवेति प्रकारान्ते । तयोराचार्यपारिहारिकयोः कारणिकयोः कारणवशतः तथा स्थितयोर्ये अन्यं देशं गताः शिष्यास्तेषां मध्यात्कोऽपि भिक्षुः योग्यः समागत्य गणं धारयेत्, ततस्तद्विधिप्रतिपादनार्थमधिकृतसूत्रारम्भः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-भिक्षुश्चशब्द आचार्यपदयोग्यानैकगुणसमुच्चयार्थ इच्छेत् गणं धारयितुं भगवांश्च से तस्य भिक्षोरपरिच्छदः परिच्छदरहितः । परिच्छदश्च द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यतः परिच्छदः शिष्यादिपरिवारः । भावतः सूत्रादिकं । तत्र भगवानाचार्योऽपरिच्छदो द्रव्यतो भावतः पुनर्नियमात् सपरिच्छदो अन्यथाचार्यत्वायोगाच्चशब्दात भिक्षुश्च द्रव्यतोऽपरिच्छदो भावतः सपरिच्छदः । परिगृह्यते । एवं से इत्यादि एवममुना प्रकारेण से तस्य न कल्पते गणं धारयितुमेवं शब्दो विशेषद्योतनार्थः, । स चामुं विशेषं द्योतयति आचार्ये द्रव्यतोऽपरिच्छदे भिक्षोः सपरिच्छदस्य वा न कल्पते गणं धारयितुमिति, । भगवांश्च से तस्य द्रव्यतोऽपि परिच्छन्नः परिच्छदोपेतश्चशब्दात्सोऽपि च द्रव्यतोऽपि परिच्छन्नस्तत एवं से तस्य कल्पते गणं धारयितुमिति, विशेषद्योतनार्थः भाष्यकारो व्याख्यानयति ।

[भा.१३५३] थेरे अपलिच्छन्ने सयंपि च गहणा तत्थ ।
छन्नोथेरो पुन वा, इअरो सीसो भवेदोहिं ।।

वृ- स्थविरो नाम आचार्यः, । असावेव पूजावचनेन भगवान् शब्देनोच्यते । भगवानिति महात्मनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संज्ञा । स स्थविरो अपरिच्छन्नः परिच्छदरहितः । चग्रहणात् चशब्दोपादानात् भिक्षुरपि स्वयमपरिच्छन्नः । तत्र स्थविरो अपरिच्छन्नो द्रव्यतः परिवाररहितो द्रष्टव्यः, । भावतः पुनर्नियमात्सपरिच्छदः । इतरः शिष्यः पुनर्द्वाभ्यामपि द्रव्यभावाभ्यामपरिच्छन्नो भवति, । तत्र भावतोऽपरिच्छन्नो नियमादयोग्य एव । इतरस्तु द्रव्यतोऽपरिच्छदो भावतः सपरिच्छदो योग्यः, । अत्राचार्ये द्रव्यतोऽपरिच्छदे किं सर्वथा भिक्षोर्गणं धारयितुं न कल्पते, उतास्ति कश्चित्कल्पनाप्रकारः ? अस्तीति ब्रूमस्तथा चाह--

[भा. १३५४] नोकारो खलु देसं, पडिसेहयती कयाइ कप्पेज्जा ।
उसन्नंमि उ थेरे, सो चेव परिच्छओ तस्स ।।

वृ- एवं से नो कप्पइ इत्यत्र नोशब्दो देशवचनत्वात् देशं प्रतिषेधयति । तेन कदाचित्कल्पेतापि, कदा कल्पते इति चेदत आह-अवसन्ने आचार्ये, । इयमत्र भावना-यद्याचार्यो भावतः सूत्राद्युपेतस्तपः संयमोद्यतस्तस्मिन् द्रव्यतोऽपरिच्छदे न कल्पते । अथ चेदवसन्नस्तर्हि तस्मिन् द्रव्यतोऽपरिच्छदे स परिच्छदे वा कल्पते । खलुशब्दो विशेषणार्थः । स चैतद्विशिनष्टि, यो भावतः सपरिच्छदस्तस्य कल्पते न शेषस्य, सपरिच्छदे चावसन्ने आचार्ये गणं धारयति शिष्यो य आचार्यस्य परिच्छदः परिवारः स एव तस्य शिष्यस्य भवति । व्यवहारतस्तस्याभवनात् । इतरस्य तु न किमप्याभवति । शिथिलत्वादिह परिच्छदविषया चतुर्भङ्गिका । तद्यथा-द्रव्यतोऽपरिच्छन्नो भावतश्चापरिछन्नः १, द्रव्यतोऽपरिच्छन्नो भावतः परिच्छन्नः २, द्रव्यतः परिच्छदो भावतोऽपरिच्छन्नः ३, द्रव्यत सपरिच्छदो भावतश्च सपरिच्छदः ४ । तत्र चतुर्भङ्गवर्ती शुद्धः शेषास्त्वशुद्धाः । एष सूत्रार्थः अधुना निर्युक्तिविस्तरः ।

[भा. १३५५] भिक्खू इच्छा गण धारए अपव्वाविते गणो नत्थि ।
इच्छातिगस्स अट्ठा महातलागेण ओवम्मं ।।

वृ- भिक्षोरिच्छा गणं धारयितुं । स च गणः स्वयमप्रव्राजिते नास्ति तस्मात् स्वयं साधवः प्रव्राजनीयाः । अथवा यद्यपि स्वयमप्रव्राजने गणो नास्ति । तथा यद्यपि यदावसन्न आचार्यो जातो भवति, तदा योऽसावाचार्यस्य गणाः स एव तस्य भवति । इच्छा च गणं धारयितुं त्रिकस्य ज्ञानादि-रत्नत्रयस्यार्थाय । नतु पूजासत्कारनिमित्तमत्रार्थे चौपम्यमुपमा महातडागेन । किमुक्तं भवति ? पद्म-सरसा महातडागेन गणपरिवर्धस्योपमा कर्तव्या । सा चाग्रे भावयिष्यते । एष निर्युक्तिगाथासंक्षेपार्थः । व्यासार्थं तु भाष्यकृद्विवक्षुः प्रथमत इच्छानिक्षेपमाह—

[भा. १३५६] जो जं इच्छइ अत्थं, नामादी तस्स सा हवइ इच्छा ।
नामंमि जं तु नामं इच्छति नामं च जस्सिच्छा ।।

वृ- यो नाम यमर्थं नामादिलक्षणमिच्छति, तस्य सा भवति इच्छा यो नामेच्छति तस्य नामेच्छा, स्थापनामिच्छतः स्थापनेच्छा । एवं द्रव्येच्छादिकमपि भावनीयं, । इच्छायाश्च निक्षेपः षोढातद्यथा-नामेच्छा, स्थापनेच्छा, द्रव्येच्छा, क्षेत्रेच्छा, कालेच्छा, भावेच्छा, । तत्र नामेच्छामभिधित्सुराह-नामंमीत्यादिना नाम्नस्तु नामविषया इच्छा । इयं यन्नाम यद्देवदत्तादिकमात्मन इच्छति देवदत्तादिकस्य नाम्नि (म्नः) इच्छानामेच्छेति भावः, । अथवा यस्येच्छेति नाम स नामनामवतोरभेदोपचारात् नाम चासौ इच्छा च नामेच्छा । स्थापनेच्छामाह—

[भा. १३५७] एमेव होइ ठवणा, निक्खिप्पइ इच्छ एव जं ठवणं ।
सामित्ताई जह संभवं तु दव्वादिसु भणसु ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवमेवानेनैव नामगतेन प्रकारेण भवति स्थापना स्थापनेच्छा अतिदेशोक्तमेव यदिच्छति निक्षिप्यते सा स्थापना चासाविच्छा च स्थापनेच्छेति व्युत्पत्तेः स्थापनेच्छा । यतः स्थापनामिच्छति सा स्थापनेच्छा स्थापनाया इच्छा स्थापनेच्छेति व्युत्पत्तेः, द्रव्येच्छा द्विधा । आगमतो नो आगमतश्च । तत्र आगमत इच्छापदार्थज्ञाता तत्र चानुपयुक्तो नोआगमतस्त्रिधा-ज्ञशरीर भव्यशरीर तदव्यतिरिक्तभेदात् । तत्र ज्ञशरीरभव्यशरीरं प्राग्वत् । तदव्यतिरिक्ता यत् द्रव्यमिच्छति सा च त्रिधा-सचित्तद्रव्येच्छा, अचित्तद्रव्येच्छा, मिश्रद्रव्येच्छा । तत्र सचित्तद्रव्येच्छा त्रिधा-द्विपदचतुष्पदापदभेदात् । तत्र द्विपदसचित्तद्रव्येच्छा-यत्र स्त्रियमिच्छति पुरुषमिच्छति इत्येवमादि । चतुष्पदसचित्तद्रव्येच्छा-यदश्वमिच्छति गामिच्छतीत्यादि । अपदसचित्तद्रव्येच्छा आम्रस्येच्छा मातुलिङ्गस्येच्छेत्यादि । अचित्तद्रव्येच्छा-सुवर्णेच्छा हिरण्येच्छेत्यादि । मिश्रद्रव्येच्छा-सुवर्णाद्यलङ्कारविभूपितस्य द्विपदादेरिच्छा । अथवा द्रव्यादिषु द्रव्यक्षेत्रकालेषु यथासंभवं स्वामित्वादि स्वामित्वकरणाधिकरणादिककरणानि भणतः स्वामित्वादिभिः प्रकारैर्द्रव्यक्षेत्रकालेच्छा वक्तव्या इति भावः । तत्र स्वामित्वेन द्रव्येच्छा यथा आत्मनः पुत्रमिच्छति इत्यादि, करणेन यथा मद्येनाऽभ्यवहृतेन स्तैन्येच्छा कामेच्छा वा जायते । अधिकरणेन यथा सुप्रस्तारितायां शय्यायां स्थितस्य कामेच्छा समुत्पद्यते । क्षेत्रकालावचेतनौ ततो न तयोः स्वयं स्वामित्वेन इच्छा भवति, ततः करणाधिकरणाभ्यां तत्र योजना । तत्र क्षेत्रेणा-यथा सुन्दरेण क्षेत्रेण लब्धेन क्रीडनेच्छा वपनेच्छा वा जायते, अधिकरणेन यथा-गृहे स्थितस्य भोगेच्छा कामेच्छा वा, सद्गुरुकुलवासे सम्यगनुष्ठानेच्छा वा समुपजायते इत्यादि, । काले करणेन यथा-यौवनकालेन धनेच्छा कामेच्छा वा जायते इत्यादि, । अधिकरणे यथा-हेमन्ते रात्रौ शीतेन पीडितः सूर्योद्गमकालमिच्छति, । भावत इच्छा द्विधा-आगमतो नोआगमतश्च । तत्रागमत इच्छेति पदार्थज्ञाता, तत्र चोपयुक्त उपयोगो भावनिक्षेप इति वचनात् । नोआगमत आह–

[भा.१३५८] भावे पसत्थमपसत्थियाय अपसत्थियं न इच्छामो ।
इच्छामो य पसत्थं नाणाइयं तिविहमिच्छं ।।

वृ- नोआगमतो भावत इच्छा द्विधा-प्रशस्ता अप्रशस्ता च । मकारोऽलाक्षणिकः । तत्राज्ञानादिविषया इच्छा अप्रशस्ता, प्रशस्ता ज्ञानादिविषया । तां त्रिविधामिच्छामिच्छामः ।। सम्प्रति गणस्य निक्षेपमभिधित्सुराह–

[भा.१३५९] नामाइगणो चउहा दव्वगणो खलु पुणो भवे तिविहो ।
लोइयकुप्पावयणिओ लोउत्तरियो य बोधव्वो ।।

वृ- नामादिरूपो गणश्चतुर्धा । चतुष्प्रकारस्तद्यथा-नामगणः, स्थापनागणो, द्रव्यगणो भावगणश्च । तत्र यस्य गण इति नाम स नामगणः, गणस्य स्थापनाऽक्षवराटकादिषु स्थापनागणः । द्रव्यगणो द्विधा-आगमतो नोआगमतश्च, । तत्रागमतो गणशब्दार्थज्ञाता तत्र चानुपयुक्तो, नोआगमतस्त्रिधा-ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तभेदात् । तत्र ज्ञसरीरभव्यशरीरे प्राग्वत् । तद्व्यतिरिक्तस्त्रिधा । तद्यथा-लौकिकः कुप्रावचनिको लोकोत्तरिकश्च । एतेषां त्रयाणामपि प्रतिपादनार्थमाह-

[भा.१३६०] सचित्तादिवसमूहो लोगंमि गणो उ मल्लपोरादि ।
चरकादिकुप्पवयणो लोगोत्तरओसन्नगीयाणं ।।

वृ- सचित्तादिसमुहः सचित्तसमूहो अचित्तसमूहो मिश्रसमूहश्च द्रव्यगणः । तत्र सचित्तसमूहो यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मल्लगणः । तथा पुरे भवः पौरस्तस्य गणः पौरगणः । अचित्तसमुहो यथा शस्त्रगणः मिश्रसमूहो यथा सुवर्णालङ्कारभूषितो मल्लगणः पौरगणो वा । कुप्रावचने द्रव्यगणो यथा चरकादि-चरकादिगणः, चरकः परिव्राजकः आदिशब्दात् पाण्डुरागादिपरिग्रहः । लोकोत्तरिको द्रव्यगणः अवसन्ना गीतार्थानां समूहः । किमुक्तं भवति ? पार्श्वस्थादिगणो यदि वा प्रवचनविडम्बकलुमतप्ररुपगणो अथवा अगीतार्थगणो लोकोत्तरिको द्रव्यगण इति, । भावगणो द्विधा-आगमतो नोआगमतश्च । तत्रागमतो ज्ञाता तत्र चोपयुक्तो नोआगमत आह—

[भा.१३६१] गीयत्थ उज्जूयाणं गीयपुरोगामिणं च अगीयाणं ।
एसो खलु भावगणो नाणादितिगं च जत्थत्थि ।।

वृ- गीतार्थानामुद्युक्तानां शक्त्यनुपगूहनेन संयमे प्रवर्तमानानामथवा अगीतानामपि अगीतार्थानामपि । अपिशब्दो लुप्तोऽत्र द्रष्टव्यो, गीतपुरोगामिनां पुरोगामि गीतार्थनिश्रितानां समूहो नोआगमतो भावगणः । एष अनन्तरोदितो भावगणो नोआगमतो भावगणः । अथवा किं बहूनोक्तेन। यत्र ज्ञानादित्रिकमस्ति स नोआगमतो भावगणः ।

[भा.१३६२] भावगणेणहिगारो सो उ अपव्वाविए न संभवति ।
इच्छातीयगहणं पुन नियमणहेतुं तओ कुणइ ।।

वृ- भावगणेन नोआगमतो भावगणेनाधिकारः प्रयोजनं, । स च भावगणो यथोक्तरुपः स्वयमप्रव्राजिते नास्ति तस्मात् स्वयं साधवः प्रव्राजनीयाः, । तैः परिवारतया कर्तव्याः । अथवा प्रमाध्यत्याचार्ये यः परिवारः । यथा स को निर्युक्तिकारो द्वारगाथायामिच्छात्रिकग्रहणं नियमेन हेतुं करोतित्युक्तं, । तव किं नियमयति ? सूरिराह-

[भा.१३६३] नियमेइ निज्जरनिमित्तमेव न उ पूयमाई अठाए ।
धारेइ गणं जइ पहु महातलागेन सामाणो ।।

वृ- निर्जरा निमित्तमेव गणं धारयति, न तु पूजादीनां निमित्तं स च गणं धारयन् यतिप्रभुर्महातडागेन समानो भवति । महातडागेन समानतामेव भावयति-

[भा.१३६४] तिमिमगरेहिं न खुब्भति जहंबुनाहो वियंभमाणेहिं ।
सो च्चिय महातलागो पफुल्लपउमं च जं अन्नं ।।

वृ- यथाम्बुनाथस्तिमिमकरैर्विजृम्भमाणैर्न क्षुभ्यति, न स्वस्थानाच्चलति, स एवचाम्बुनाथ इह महातडागस्तथा विवक्षणात् । अथवा समुद्रात् यदन्यत्प्रफुल्लपद्मं महासरस्तन्महातडागं, उपनयमाह-

[भा.१३६५] परवादीहिं न खुब्भति संगिण्हंतो गणं च न गिलाइ ।
होती य सयाभिगमो सत्ताण सरोव्व पउमड्ढो ।।

वृ- तिमिमकरैरम्बुनाथ इव परवादिभिराक्षिप्यमाणो न क्षुभ्यते, । न च गणं संगृह्णन् यथौचित्येनानुवर्तमानो ग्लायति यथा वा सरः पद्माढ्यं सत्वानां सदाभिगमं भवत्येवं सदा सत्वानामभिगमः साधुः प्रभुर्भवति ।।

[भा.१३६६] एयगुणसंपउत्तो, ठाविज्जो गणहरो उ गच्छंमि ।
पडिबोहादीएहिं य, जइ होइ गुणेहिं संजुत्तो ।।

वृ- एतेन समुद्रतुल्यतारुपेण पद्माढ्यसरः समाननत्वेन गुणेन वा संप्रयुक्तो गच्छे गणधरः स्थाप्यते, ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स चैतद्गुणसम्प्रयुक्तस्तदा भवति यदि प्रतिबोधादिभिर्वक्ष्यमाणगुणैर्युक्तो भवति, प्रतिबोधादयो गुणाः प्रतिबोधकादिदृष्टान्तेभ्यो भावनीया इति, तानेव प्रतिबोधकादीन् दृष्टान्तानुल्लिङ्गयति ।।

[भा.१३६७] पडिबोहग देसिय सिरिघरे य निज्जामगे य बोधव्वे ।
तत्तो य महा गोवो एमेया पडिवत्तिओ पंच ।।

वृ- प्रतिबोधकः सुप्तोत्थापकः, देशको मार्गदर्शी, श्रीगृहिको भाण्डागारनियुक्तो निर्यामकः समुद्रे प्रवहणनेता तथा महागोपोऽतीवगोरक्षणकुशल एवमेता अनन्तरोदिताः पञ्च प्रतिपत्तयोऽधिकृतार्थे आभिरिति प्रतिपत्तयः उपमा । तत्र प्रतिबोधकोपमां भावयति-

[भा.१३६८] जह आलित्ते गेहे, कोइ पसुत्तं नरं तु बोहेज्जा ।
जरमरणादिभयत्ते संसारधरंमि तह उजिए ।।

वृ- यथा आ समन्ततो दीप्ते गृहे कोऽपि परमबन्धुः प्रसुप्तं नरं प्रबोधयेत्तथा संसारगृहे जरामरणप्रदीप्ते जीवान् अविबुद्धान् भावसुप्तान् प्रबोधयति । स स्थापनीयो गणधरो देशितस्तीर्थकरैः । उक्तः प्रतिबोधक दृष्टान्तः । सम्प्रति देशकादिदृष्टान्तमाह-

[भा.१३६९] बोहेइ अपडिबुद्धे देसियमाईवि जोएज्जा ।
एयगुणविप्पहीणे अपलिच्छन्ने य न धरेज्जा ।।

वृ- बोहेइ अपडिबुद्धे इति पूर्वगाथाव्याख्यायां व्याख्यातमेव देशकादीनपि दृष्टान्तान् योजयेत् । तांश्चैवं-यो ग्रामादीनां पन्थानमृजुकं क्षेमेण प्रापयति स देशक इष्यते । एवं ज्ञानादीनामविराधनां कुर्वन् यो गच्छं परिवर्धयति स गणधरः स्थापनीयो न शेषः, । श्रीगृहकदृष्टान्तभावना-यथा यो रत्नानि सुनिरीक्षितानि करोति स श्रीगृहे नियुज्यते, । एवं यो ज्ञानादीनामात्मसंयमयोश्चाविराधनया गणं परिवर्धयति स तादृशो गणस्य नेता कर्तव्यः, । निर्यामकदृष्टान्तभावना-यथा-निर्यामकस्तथा कथं-च नापि प्रवहणं वाहयति यथा क्षिप्रमविघ्नेन समुद्रस्य पारमुपगच्छति एष एव च तत्वतो निर्यामक उच्यते, शेषो नाम धारकः, एवं य आचार्यस्तथा कथंचनापि गच्छं परिवर्धयति । यथा क्षिप्रमविघ्नेनात्मानं गच्छं च संसारसमुद्रस्य पारं नयति । स तत्वतो गणधरः शेषो वै नाममात्रपरितुष्टः । महागोपदृष्टान्तभावना-यो गोपो गाः स्वापदेषु विषमेषु वा प्रदेशेष्वटव्यां वा पतंतीर्वारयित्वा च क्षेमेण स्वस्थानमानयति स महागोप उच्यते, । एवमाचार्योऽपि यो गणमस्थानेषु प्रत्यन्तदेशादिषु विहारिणं धारयति पूर्वाभ्यासप्रवृत्तानि च प्रमादस्खलितान्यपनयति स तादृशो गणपरिवर्धकः करणीयो न शेषः, । अथवा प्रतिबोधको नाम गृहचिन्तक उच्यते यो गृहं चिन्तयन् यो यत्र योग्यस्तं तत्र व्यापारयति । तत्र व्याप्रियमाणं च प्रमादतः स्खलन्तं निवारयति स गृहचिन्तक उच्यते । एवं यः स्थापितो यो यत्र योग्यस्तं तत्र नियुङ्क्ते । नियुङ्क्तांश्च प्रमादतः स्खलतः शिक्षयति स स्थापनीयो गणधरपदे नेतर इति यश्चैतद्गुणविप्रहीणः प्रतिबोधादिगुणविकल्पो यश्च द्रव्यतो भावतश्चेत्यर्थः छन्नः परिच्छदहीनः स गणं न धारयेत् । न स गणधरपदे स्थापनीय इति भावः ।।

[भा.१३७०] दोहिं वि अपलिच्छन्ने, एक्केक्केणं च अपलिच्छन्ने य ।
आहरणा होंति इमे, भिक्खुंमि गणं धरंतमि ।।

वृ- द्रव्यतोऽपरिच्छन्नो भावतश्चापरिच्छन्न इत्यादिचतुर्भङ्गी प्रागेवोपदर्शिता । तत्र भिक्षौ गणं धारयति द्वाभ्यामपि द्रव्यतो भावतश्च नेतव्यः । अपरिच्छन्ने परिच्छदरहिते प्रथमभङ्ग उपात्तः । एकैकेन वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरिच्छन्ने द्वितीयभङ्गचर्तिनि द्रव्यतोऽपरिच्छन्ने तृतीयभङ्गचर्तिनि वक्ष्यमाणानि उदाहरणानि भवन्ति ।

तान्येवाह—

[भा.१३७१] भिक्खूकुमारविरए झामणपंती सियालरायाणो ।
वित्तत्थजुद्ध असती दमग भयग दामगाईय ।।

वृ- भिक्षौ द्रव्यभावाभ्यामपलिच्छन्नेगणं धारयति कुमारदृष्टान्तः विरयो-लघुश्रोतोरुपो झामण वनदव द्वितीयो दृष्टान्तः, तृतीयः पङ्क्तिदृष्टान्तः, चतुर्थः शृगाल॰॰जदृष्टान्तः, । पञ्चमो वित्रस्तेन सिंहेन सह युद्धस्याभावो दृष्टान्तः, । एते पञ्च दृष्टान्ता अप्रशस्ताः । प्रथमभङ्गचर्तिनि, प्रशस्ताश्चतुर्भङ्गे द्वितीये द्रमकदृष्टान्तस्तृतीयभङ्गवर्तिनि भृतकस्य सतो दामकादिपरिग्रहो दृष्टान्तः । अत्रादिशब्दात् मयूराङ्गचूलिकादिपरिग्रहः । तत्र कुमारदृष्टान्तभावनार्थमाह—

[भा.१३७२] बुद्धीबलपरिहीणो कुमारपच्चंतडमरकरणं तु ।
अप्पेणेव बलेणं गेण्हावणमासणा रन्ना ।।

वृ- एको राजकुमारः बुद्धिबलपरिहीनो हस्त्यादिवलपरिहीनश्चेति भावः एतेन द्रव्यभावपरिच्छदरहितत्वमस्याख्यातं स प्रत्यन्तदेशे स्थितोडमरं देशविप्लवं करोति । ततोदायादेन राज्ञा तं बुद्धिवलपरिहीनं ज्ञात्वा अल्पेनैव वलेनैव बलेन दण्डप्रेषणेन गृहापणं तस्य राज्ञा कृतं, ग्रहणानन्तरं च शासनाकृता, ग्राहयित्वा स विनाशित इति भावः । अत्रैवोपनयमाह—

[भा.१३७३] सुत्तत्थ अनुववेतो, अगीयपरिवारगमणपच्चं तं ।
परतित्थिक उड्डावण, सावगसेहादवणो ।।

वृ- एवं सूत्रेण अर्थेन चानुपपेतोऽसम्पन्नोऽनेन भावतोऽपरिच्छन्नतामेवाह-अगीतापरिवारो अकीतार्थपरिवृतोऽनेन द्रव्यतोऽपरिच्छन्नत्वमुक्तं संप्रत्यन्तं देशं प्रति गमनं विधाय आचार्यत्वं करोति । स च तथा आचार्यत्वं विडम्बयन् परतीर्थिकैः परिमीय निःपृष्टव्याकरणः क्रियते । तदनन्तरं श्रावकाणामपभ्राजना यथा विडम्बिता यूयं, न भवदीयो धर्मः शोभनः । तथा च भवदाचचार्यः पृष्टः सन् न किमप्युत्तरं ददाति किं त्वसमंजसं प्रलपतीति तथा शिष्या अपि तैर्विपरिणम्यन्ते, । एवं च जायते महानवर्णः शासनस्य, तदेवं यत इमे दोषास्तद्रव्यभावपरिच्छदरहितेन भिक्षुणा न गणो धारयितव्यः । गतं कुमारद्वारमधुना वियरयदृष्टान्तमाह-

[भा.१३७४] वणदवसत्तसमागम विरए सिंहस्स पुंच्छडे वणया ।
तं दिस्स जंबूएण-विविरए च्छूढामिगाईया ।।

वृ- वियरयो नाम लघु श्रोतो रुपो जलाशयः स च षोडशहस्तविस्तारो नद्यां महागर्तायां वा तस्याकुञ्चः त्रिहस्तविस्तारस्तस्य प्रदेशे मध्योर्वेटः । अन्नया अडवीए वणदवो जातो, सो सव्वतो समन्तात् दहन्तो वच्चइ । ताहे मिगादयो सत्ता तस्स वणदवस्स भीया परिधावं वेटं पविट्ठा । तत्थवि सो वणदवो डहन्तो आगच्छति । तत्थ य सीहो पविट्ठो आसि । ते य मिगादीभीया चिन्तंति वेटे एस वणदवो पविसइत्ति उज्झियव्वंति । ततो तेसींहपायवडिया विनवेंति । तुम्हे अम्हं । मिगरायातो । नित्थारेहि । सीहेणं भणंति पुंच्छे मम धणियं लग्गह । ते लग्गा । ततो सीहेण प्लुतं कयं । सोलसहत्थे विक्कंतो सह मिगाईड्डिंडिणं, । अन्नया पुणो वनदवो जाते । तदेव मिगादयो तत्थ पविट्ठा । ततो एक्को सियालो सीहेण उत्तरियपुव्वो चिंतेति अहंपि सीहो चेव उत्तारेहामित्ति मिगादयो भणंति, । ममपुच्छे धणियं लग्गेह, । ते लग्गा । तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सियालेण प्लुतं कयं । वियरए सह मिगाइएहिं पडिओ सव्वे विणठा । ते अद्धाणाती आवत्ती सुय गीयत्थेणं बीयपए जयणाए निसेवणाए गच्छं नित्थारियं पासित्ता अगीयत्थो चिंतेइ सव्वत्थवि एवमायरियव्वंति मन्नंतो निक्कारणे बितियदेण गच्छेण समं विहरइ । सो तहा विहरंतो नरगाइ भववियरए अप्पाणं गच्छं च पाडेइ एष भावार्थः । अधुनाक्षरार्थो विव्रियते-वनदेव जाते सत्वानां मृगादीनां वियरयपरिवृते वेष्टे समागतः तेषां सिंहस्य पुच्छे लग्नानां सिंहेन सह व्यपर जसो लघुश्रोतो रुपस्य जलाशयस्य डेपनं लङ्घनं, ततो दृष्ट्वा जम्बुकेनाप्यन्यदा तत्कर्तुमशक्नुवता मृगादयस्तस्तिेन् व्यपरजसि चछूढा क्षिताः । एष दृष्टान्तः।

सम्प्रति दार्ष्टान्तिकयोजनामाह–

[भा.१३७५] अद्धाणादिसु एवं दट्ठुं सव्वत्थ एव मन्नंतो ।
भवविरयं अगीतो, पाडे अन्नेवि पवडंतो ।।

वृ- अध्वादिष्वापत्स्वेव द्वितीयपदेन यतना निषेवनतो गच्छं निस्तारयन्तं दृष्ट्वा अगीतोऽगीतार्थः संर्वत्रैवमाचरितव्यमिति मन्यमानो निष्कारणयतनया द्वितीयपदेन गच्छं परिपालयन् भवे वियरयमिति द्वितीय प्राकृतत्वात् सत्तम्यर्थे नरकादिभवरुपे व्यापरजसि प्रपतन् अन्यानपिस्वगच्छवासिनः पातयति, । गतं व्यपरजो द्वारमधुना पङ्क्तिद्वारमाह-

[भा.१३७६] जंबुकक्कूवे चंदे, सीहेनुत्तारणाय पंतीए ।
जंबुकसपंतिपडगं एमेव अगीयगीयाणं ।।

वृ- एगया जेट्ठा मूलमासे सियाला तिसिया अद्धरत्ते कूवतडेट्ठिया कूवं पलोयंति । तत्थ ते जोण्हाए उदए चंदबिंबं पासंति, चिंतेतिं य चंदो कूवे पडितो । तत्थ य सिहो आगतो विट्ठति । ततो तेहिं सियालेहिं सीहो विन्नवितो तुमं मिगाहिवती ए सवि गहाहिवती कूवे पडितो । एयस्स गुणेणं अम्हे दिवसभूयाए रत्तीए सुहं निरुवसग्गा वियरामो । ततो जुज्जसि तुमं गाहाहिवत्तिमुत्तारेउं सीहो भणति, पंतीए समं पुच्छे लग्गित्ता वियरह । अंतिल्लस्स चंदो लग्गहिति ताहे सव्वे प्लुतेनोत्तारेहामित्ति । ततो ते पंतीए सीहपुच्छे लग्गा कुवमज्झे ओतिण्हा सीहेण प्लुतं काउं सव्वे उत्तारिया । उवरिंगणे चंदं पासंति कूवतलेय आलोलिए उदए चंदं अपासमाणा उत्तारियत्ति मन्नंति । अन्नया तहेव चंदं पासेत्ता सीहेण उत्तारियपुव्वो सियालो एवं चिंतेति । अहमवि सीहो इव उत्तारेभि एवं चिंतित्ता सो सियालो भणति । पंतीए ममं पुच्छे लग्गित्ता उयरह ते उतिणा । सीयालेण उत्तारेहामिति प्लुतं कयं । ततो असमत्थोत्ति तह पुच्छे लग्गित्ता सह कूवे पडितो । तत्थेवमत्तो एवमद्धाणादीसु आवईसु गीयत्थेणं बितियपदे जयणा निसेवणाए इत्यादि उपनयः पूर्ववदेष भावार्थोऽधुनाक्षरार्थः-एकदा जम्बूकाः कूपतटे मिलितास्तैः कूपे कूपमध्ये चन्द्रो दृष्टः । तस्मिन् दृष्टे तदुद्धरणाय सिंहपुच्छे विलग्नानां पङ्कत्त्या प्रविष्टानां शृगालानां सिंहेनोत्तारणा कृता । तद्दृष्ट्वान्यदा एकेन जम्बुकेन सिंहोत्तारित पूर्वेण तथा कर्तुमारब्धं । ततस्तस्य जम्बुकस्य एवं स पङ्क्तिकस्य कूपे पतनमेव मनेनैव दृष्टान्तद्वयोक्तेन प्रकारेणागीतगीतयोर्भवकूपे गच्छेन सह पतनं तत उत्तारणं च गच्छस्य परिभावनीयमिति गतं पङ्क्तिद्वारमिदानीं शृगालराजद्वारमाह-

[भा.१३७७] नीलीराग खसदुम हत्थीसरभा सियाल कच्छाओ ।
बहुपरिवारअगीते विद्यूयणोहावणपरेहिं ।।

वृ- एक्को सियालो रत्तिं घरं पविट्ठो घरमाणुसेहिं चिंतितो निच्छिभिउमाढत्तो सो सुनगाईहिं पारुद्धो । नीलीरागरंजणे पडितो किहवि ततो उत्तिन्नो नीलवन्नो जातो, तं अन्ने (हत्थी) सरभ तरक्ख सीयालादी

पासिउं भणंति । को तुमं एरिसो । सो भणति । अहं सव्वाहिं मिग्गजातीहिं खसद्दुमो नाम मिगराया कतो, ततोहं एत्थमागतो पासामि ताव को मं न नमति । ते जाणंति अपुव्वो एयस्स वणो अवस्सं एस देवेहिं अनुग्गहिओ । तओ भणंति-अम्हे तव किंकरा, संदिसह किं करेमो । खसद्दुमो भणति-हत्थि बाहणं देह दिन्नं, विलग्गो वियरति । अन्नया सीयालेण उन्नइयं ताहे खसुद्दमेण तंसीयालसभावमसहमाणेण उन्नइयं । ततो हत्थिणा सीयालोत्ति नाउं सोंडाए घेत्तुं मारितो । एवं कोइ अगीयत्थो अगीयत्थपरिवारं लभित्ता पच्चत्तं देसं गंतुं अहं आयरिओति पकासेइ । सो कहिंचि विउसेहिं पेयालितो जाव न किंचि जाणति, । एवं तेन अप्पा ऊणमितो । एष भावार्थोऽधुनाक्षरार्थः । नील्याः सम्बन्धी रागो यस्य स नीलीरागः शृगालः खसद्रुमो नाम मृगराजो जातः । तस्य हस्तिनः सरभाः शृगालोपक्षणमेतत् तरक्षादयश्च परिवारः सोऽन्यदा कस्यापि शृगालस्योन्नदनमाकर्ण्य शृगालोन्नदितकमभूदिति उन्नदितवान् ततः शृगालोऽयमिति ज्ञात्वा हस्तिना मारति इति शेषः । एवमगीतार्थबहुपरिवारे अगीते अगीतार्थे विहरति बहुश्रुतोऽहमचार्य इति बहुजनविश्रुतं ब्रुवाणे प्रष्टव्याकरणासमर्थतया परेभ्यः स्वपक्षवर्तिभ्यश्चापभ्राजना भवति ।

अथवाअयमन्य उपनयः-

[भा.१३७८] सेहादीकज्जेसु व कुलादि समितीसु जंपउ अयं तु ।
गीएहिं विस्सुयं तो निहोडणपमच्चतो सेहे ।।

वृ- वा शब्द उपनयान्तरसूचकः । शैक्षकादिकार्येषु कुलादिसमितिषु कुलगणसंघसमवायेषु श्रावकाः सिद्धपुत्राश्च ब्रुवते । अयमेव तुरेवकारार्थः । बहुश्रुतो जल्पतु व्यवहारनिर्णयं करोतु । यथा कस्या भवतीति ततस्तेनाव्यवहारमुक्तं । तच्च गीतैर्गीतार्थैर्विश्रुतं ततस्तैर्निहोडणमिति निहेड्तिं । तथा अगीतार्थ एष न जानाति व्यवहारमिति शेषः । ततः शैक्षेप्राकृतत्वात् षष्ठ्यर्थे सप्तमी एकवचने बहुवचनं शैक्षकाणामुपलक्षणमेतत् । श्रावकाणां सिद्धपुत्राणां च तद्वचस्य प्रत्ययो जातः । चिन्तयंति च एष एतावन्तं कालमस्माभिः गीतार्थः संभावित इति, गतं शृगालराजद्वारम् ।

सम्प्रति वितत्थजुद्धअसतित्तिद्वारं व्याचिख्यासुराह—

[भा.१३७९] एक्केक्क एगजाती पत्तिदिनसममेव कूवपडिबिंबं ।
सिंहे पुच्छकएज्जण कूवंमि य डेव उत्तरणं ।।

[भा.१३८०] एमेव जंबुगो या कूवे पडिबिम्बमप्पणो दिस्स ।
डेवणय तत्थ मरणं समायारो गीयअगीयाणं ।।

वृ- एगो सिंहो सो हरिणजातीणं लुद्धो दिवसे दिवसे हरिणं मारेऊण खाई, । तओ हरिणेहिं विनवितो किमंगरायं तुमं हरिणजातीण क्खयाण परिनिव्विट्ठो । ता पसायं करेहि, । सव्वमिगजातीणं वारएणं पइदिवसमेक्कक्कं मिगं खाहि । सिंहेण चिंतियं जुत्तमेस भणइ । ततो सव्वे मिगा मेलित्ता सिंहेण भणिया तुब्भे कुलजुत्तीए (जुत्तताए) आत्मकुलौचित्येनेनेत्यर्थः । सव्वमिगिजातिणं वारएणं पइ दिवसं मम सट्ठाणट्ठियस्स एगं पसिज्जाह । तेहिं अब्भुवगयं ततो तेवि मिगा तहेव पेसंति । अन्नया ससगजातीए वारए ससगा संपसारेंति मन्त्रयन्तीत्यर्थः । को वच्चउ अज्ज सीहसगासे ! तत्थ एगो वुड्डससगो भणति । अहं वच्चामि जो सव्वेसिं मिगाणं संति काउं एमित्ति सो चलिओ । अंतराले मारुयकूवसरिसे कूवं दट्ठुं उस्सूरे सीहसगासमागतो ताहे सिंहेण भणियं । किं रे तुमं उस्सूरे आगतोसि । ससगो भणति-अहं पाए आगच्छंतो संतो अन्नेण सिंहेण रुद्धो जहा कहिं य वच्चसि । ततो मए सब्भावो कहितो ताहे सो भणति । अन्नो न होइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो मिगराया । ततो मए भणियं जइ अहं तस्स मिगरायस्स सगासं न जामि, ततो सो रुट्ठो सव्वे ससगा उच्छादेहित्ति । तम्हा जामि तस्स सगासं कहेमि ततो जो तुमं वलितो होहित्ति तस्स अम्हे आणं काहामो । तहि अहं तेन भणितो वच्च, कहेहि भण आगच्छ मम सगासं जति ते सत्ती अत्थि । ततो सीहो भणति । दंसेहि ममं तं सिंहं ततो ससओ सीहेण समागम्म दूरं अमडं दूरत्थो चेव दंसेति । भणति य-एत्थ पविट्ठो चिट्ठति । जइ न पत्तियसि तो तुमं उग्गज्ञय सोविउग्गज्ञेइ । ततो तेन उग्गज्ञियं उग्गज्ञ पडिसद्दो उट्ठितो ततो मुहुत्तं अत्थइ, । जाव न पुणो कोवि उग्गज्ञइ ताहे सीहो चिंतेइ मम भएण वितत्थो तो नमज्ञइ निप्फिडइवा । तं एत्थेव कूपे पविसित्ता मारेमित्ति पडित्तो अपेक्खमाणो चिंतेति-नूनं निलुक्को ताहे सीहोगज्ञइ रोक्किइ य । ततो चिंतेइ न जुज्झिउकामो मए समं । एवं जुद्धासतीए सीहोप्लुतं काउं उत्तिणो, । एवं गीयत्थस्सवि जइवि च्छलणा भवति तहावि सो जाणगत्तणेण अप्पाणं विसोहेइ, । तहा एगो जम्बुगो सो भमंतो कहवि कूवतडे समागतो कूवे पाणियं पलोइयं दिट्ठं अत्तणो पडिबिंबं । ततो उन्नयह ताहे उच्छलितो पडिसद्दो । तं सोउं मे समे हक्कार इत्ति शभसियाए पडितो तं पमाणं प्लुतं काउमसमत्थोत्ति तत्थेवमतो एवमगीयत्थो च्छलितो न सक्केइ अप्पाणं पच्चुद्धरिउयमिति तस्स गणो न दायव्वो । एष भावार्थः । अधुनाक्षरार्थविवरणं । सर्वा मृगजातयो मिलित्वा प्रतिदिवसमेकैकमेकस्या जातेः सिंहस्य स्थानस्थितस्य समर्पयन्ति । अन्यदा शशकस्य वारको जातः । सोऽपान्तराले डेपकूपे प्रतिबिम्बं मरुकूपसद्दशमतीवोण्ड कूपं द्दष्ट्वेत्यर्थः । चिरात् सिंहसकाशमागतः । ततः सिंहे सिंहस्य पृच्छा कस्माच्चिरादागतः तस्यान्यसिंहकथनं तत एज्ञणति सिंहस्य कूप समीप मागमनं तदनन्तरं पूर्वप्रकारेण कूपे डेम आत्मनः प्रतिक्षेपः । ततः प्लुतेनोत्तरणं एवमेवेत्यादि एवमेव यथा प्रवृत्त्यैवेत्यर्थः । जम्बुकोऽपि कूपे प्रतिबिम्बमात्मनो द्दष्ट्वा डेपनकं प्रतिक्षेपणमात्मनः कृतवान् । तत्र तस्य मरणमेवं समवतार उपनयो यथा क्रमं गीतागीतार्थयोः कर्तव्यः । स च प्रागेव कृत इति ।

साम्प्रतमेतान्युदाहरणानि यं भंगमाश्रित्योपदर्शितानि तत्र योजयति-

[भा.१३८१] एएउ उदाहरणा दव्वे भावे अपलिच्छन्नंमि ।
दव्वेण अपलिच्छन्ने, होंति इमे तइयभंगंमि ।।

वृ- एतान्यनन्तरोदितानि पञ्चाप्युदाहरणानि अप्रशस्तानि द्रव्ये भावे च सप्तमी प्राकृतत्वात्तृतीयार्थे द्रव्येन भावेन वाऽपरिच्छिन्ने प्रथमभङ्गवर्तिनि वेदितव्यानि । प्रशस्तानि चतुर्थभङ्गे द्रव्यतो भावतश्च परिच्छिन्ने इति वाक्यशेषः, । द्रव्येणापरिच्छन्नेऽनेन द्रव्यतो अपरिच्छन्नः भावतः परिच्छन्न इति द्वितीयभघ्गः सूचितः । तत्र तथाभावे सप्तमी तृतीयार्थे४ भावेनापरिच्छन्नेऽ द्रव्यतःपरिच्छन्नो भावतोऽपरिच्छन्न इति तृतीयभङ्ग उपात्तस्तत्र भावत इमे वक्ष्यमाणे उदाहरणे ।

तत्र प्रथमतो द्वितीयभङ्ग उपात्तः ।

[भा.१३८२] दमगेवइया वीरघडि धट्टचिंताय कुकुडिप्पसवो ।
धनपिंडण समाणेरिं ऊसीसग भिंदन घडीए ।।

वृ- एगो दमगो गोउलं गतो । तत्थ गोउलिहिं दुद्धं पाइतो, । अन्नया से दुद्धस्स भरिया घडिया दत्ता । तं सो घेत्तूण घरं गतो । खट्टाए ऊसीसमूले ठविउं निव्वि(व्व)न्नो चिंतिउमाढत्तो, । एयाए दहियघडियाए कल्ले कुक्कुडीतो किणिस्सामि । ताहे पसवो होहित्ति तं पसवं विक्केहामि, । ततो तं मूलं वड्ढीए पउंजेहामि । एवं सुबहुं धनं पिंडित्ता कुलीनं समाणंतर कुलप्पसूयं कन्नं परिणित्ता आणेहामि । ताहे सा कुलमदेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊसीसएणं सेज्जं चडिहिति, । ततो हं किं ऊसीसएणं सेज्जं चिडिहित्ति पन्हीए आहनिस्सामिति पादो उच्छूढो तेन सा घडि भग्गा अक्षरयोजना त्वियम्-द्रमको रंकः स व्रजिकायां गोकुले गतः । तेन दुग्धपानानन्तरं क्षीरभृता घटिका लब्धा सा गृह गतेन खट्वाया उच्छीर्षकमूले स्थापिता । ततश्चिन्ताऽभूत् । किं विषयेत्यत आह-कुक्कुट्यः क्रेतव्याः । तदनन्तरं तासां प्रबन्धेन प्रसवः । पुनस्तस्य मूल्येन विक्रयस्ततो वृद्धिप्रयोगेन धनपिण्डनं कृत्वा समाणेतरमिति समानां समानकुलप्रसुता मितरामसमानकुलपसूतां कन्यां परिणीय तां कुलमदेनोच्छीर्षक चटन्तीं पदेनाहनिष्यामीति दुग्धघटिकायाः भिन्दनमकार्षीत् ।। अत्रोपनयमाह—

[भा.१३८३] पव्वावइत्ताण बहुओस्सिसे, पच्छा करिस्सामि गणाहिवत्तं ।
इच्छा विगप्पेहिं विस्सरमाणो, सज्झायमेवं न करेइ मंदो ।।

वृ- बहून् शिष्यान् परिव्राज्य पश्चात्करिष्यामि गणाधिपत्यं, एवमिच्छाविकल्पैः स मन्दो नित्य कालं विस्तरयन् सूत्रार्थपौरुषीं न करोतित्यर्थः । ताश्चाकुर्वाणः पूर्वगृहीतान् सूत्रार्थान् नाशयति यथा स द्रमको दुग्धघटिकां नाशितवान् ।। सम्प्रति तृतीयभङ्गे उदाहरणमाह—

[भा.१३८४] गावीतो रक्खंतो, घेतुं च भत्तीए पट्टिया तत्तो ।
वोढुंतो गोवग्गो होतिय वच्छिगा तत्थ ।।

[भा.१३८५] तेसिं तु दामगाइं करेमि मोरंगचूलियाओ य ।
एवं तु तइय भंगे, वत्थाई पिंडणमगीओ ।।

वृ- एगो गोवो । सो गावीओ रक्खंतो चिंतेइ, अहं गोरक्खणमोल्लेण पड्डियातो गहिस्सामि । ततो से पवड्ढमाणो गोवग्गो भविस्सत्ति । तम्मि य पवड्ढमाणे गोवग्गे वच्छगाओ बहुयाओ होहिति ततो करेमि तासिं जोग्गाउ मोरंगचूलियाओय । एवं चिंतिता सो तहा पकरेति । एवमगीयत्थो वि भावेणा पलिच्छन्नो तइयभंगिल्लो बहुगे परिवारे चिंतेति इति वत्थादीणि पिंडेति । अक्षरयोजना त्वियम्-गो-रक्षन् प्रवर्धमान गोवर्गे वत्सिका भविष्यन्ति । ततो तस्तासां योग्यानि दामकानि करोमि मयूराङ्गचूलिकाश्च मयूराङ्गचूलिका आभरणविशेषरुपा । एवं चिन्तयित्वा स तथा प्रकृतवान् । तत्रोपनयमाह-एवं तु एवमेव तुरेवकारार्थस्तृतीयभङ्गवर्तमानस्य अगीतेऽगीतार्थस्य वस्त्रादिपिण्डनमवगन्तव्यम् । अस्य यद्यपि परिवारो नास्ति तथा वस्त्रादिषु लब्धिरस्तीति द्रव्यतः परिच्छन्नत्वमङ्गीकृत्य तृतीयभङ्गे इत्युक्तम् ।।

[भा.१३८६] ताइं बहूहिं पडिलेहियंतो अद्धाणमाईसु य संवहंतो ।।
एमेव वा सम्मतिरित्तिगं से, वातादि खोभय एव हानी ।।

वृ- तानि वस्त्राणि बहूनि प्रतिदिवसमुभयकालं प्रतिलेखयन् अप्रतिलेखन् प्रायश्चित्तापत्तेरद्धादिषु अध्वनि मार्गे आदिशब्दाद्वसत्यन्तरसंक्रमणादौ च संवहन् श्राम्यति । श्रमाच्च ग्लानत्वं ग्लानत्वेव संयमविराधना सूत्रहानिश्च । एवमेव अनेनैव प्रकारेण वर्षास्वपि दोषा वाच्याः केवलं से तस्य उभयकालं तानि प्रतिलेखयतोऽतिरिक्तकर्म अतिरेकेण वातदिक्षोभो भवति । तथा वसति सुदीर्घं श्रुते सूत्रस्य च शब्दार्थस्य च परिहानिः ।। अत्र परस्यावकाशमाह—

[भा.१३८७] चोदेति न पिंडेति य कज्जे गिण्हति य जो स लद्धीओ ।
तस्स न दिज्जइ किं गणो । भावेण जो उ संच्छन्नो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- चोदयति परो यथा-यः स लब्धिको भावेन चयोऽसंच्छन्नपरिच्छदरहितो न पूर्वमेव वस्त्रादीनि पिण्डयति । किन्तु कार्ये समुत्पन्ने गृह्णाति । तस्य किं कस्मात्कारणात् गणो न दीयते प्रागुक्त दोषा संभवात्, अत्र सूरि राह—

[भा.१३८८] चोयग अप्पभूय असतीपूया, पडिसेह निज्ञरतलाए ।
सं तं से अनुजाणसि, पव्वाविए-तिनिच्छासे ।।

वृ- चोदक! स भावतोऽपरिच्छन्नोऽप्रभु रहितोऽतस्मात्तस्मै गणो न दीयते, एतौ तृतीय भंगवर्तिन्याक्षेप परिहारौ असतितिसि यस्य गणो नास्ति तस्य तृतीयभङ्गवर्तिन आक्षेपपरिहारावभिधातव्याविति वाक्यशेषः । तथा पूयत्ति पूजार्थे गणो ध्रियते इति कस्यापि वचनं तस्य प्रतिषेधो वक्तव्यः । किन्तु निर्जरार्थे गणो धारणीय इति वाच्यं, निज्जरार्थे व्यवसिताः केचित् पूजामपीच्छन्ति । तत्र निर्जरार्थं गणं धारयतः पूजामपि प्रतीच्छत आचार्यस्य यथा न दोषः तथा तडागं दृष्टान्तत्वेन दृष्टव्यं, । तथा यो भावतः परिच्छिन्नशिष्यो लब्धिमांश्च शतं परिवारं से तस्यात्मीयस्याचार्यस्यानुजानाति । कियंतमित्याह, जघन्यत स्त्रीन्प्रव्राजितान् किमुक्तं भवति ? जघन्यतस्त्रयः प्रव्रजिता अवश्यं दातव्याः इच्छा सेति इच्छा वा से तस्य आचार्यस्येयमत्र भावना । आचार्य आत्मनो यथेच्छया त्रीन् वा बहुतरान्वा सर्वान् वा प्रव्राजितान् गृह्णाति । एष गाथासंक्षेपार्थो व्यासार्थं तु भाष्यकृत् विवक्षुः प्रथमतः चोयग अप्पभुत्तिपदं व्याख्यानयति—

[भा.१३८९] भणइ अविगीयस्स हु उवगरणादीहिं जइ वि संपत्ती ।
तहवि न सो पज्ञत्तो वोढव्वे करीलकाउव्व ।।

वृ- चोदकेनाक्षेपे प्रागुक्ते कृते सति प्रतिवचनं भण्यते-अविगीतस्य विशिष्टगीतार्थत्वरहितस्य हु निश्चितं यद्यपिउपकरणादीनामुपकरणशिष्यादीनां गाथायां तृतीया षष्ठ्यर्थे प्राकृतत्वात् सम्पत्तिस्तथापि न स पर्याप्तः समर्थो वोढव्ये उत्क्षिप्ते गणभारे किमिवेत्यत आह-करीलकाउव्व करीलो नाम वंशजाति विशेषो दुर्बलस्तन्मयी कापोतीव कस्माद्गणभारवहने न समर्थ इति अत आह—

[भा.१३९०] न य जाणइ वेणइयं कारावेउं न यावी कुव्वति ।
तइयस्स परिभवेणं सुत्तत्थेणं अपडिवद्धा ।।

वृ- वा यस्मादर्थे यस्मान्न जानाति विनय एव वैनयिकं । किं विनयादिभ्य इति स्वार्थे इकणप्रत्ययः अति वर्तन्ते । स्वार्थे क प्रत्ययः प्रकृत(ति) लिङ्ग वचनानीति वचनात् विनयशब्दस्य पुंस्त्वेऽपि प्रत्यये समानीते नपुंसकलिङ्गत्ता । तत् न शिष्यान् कारयितुमगीर्तात्वात् । न च तस्य गणपार्श्वे सूत्रमर्थो वा भावतोऽसंच्छन्नत्वात् । ततः सूत्रार्थाभ्यां गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात् । अप्रतिबद्धाः सन्तः शिष्याः परिभवमेव केवलं मन्यन्ते, जन्मनो निष्फलीभवनात् तेन च परिभवेन तस्य तृतीयस्य तृतीयभङ्गवर्तिनो वैनयिकं कारयितुं जानतोऽपि न चापि न चैवं ते शिष्या विनयं कुर्वन्ति । तस्मान्न तृतीयभङ्गवर्ती गणधारणयोग्यः । साम्प्रतमसतित्ति पदंव्याख्यानयन् द्वितीयमङ्गगतावाक्षेपपरिहारावाह-

[भा.१३९१] बियभंगे पडिसेहो जं पुच्छसि तत्थ कारणं सुणसु ।
जइ से होज्ञ धरेज्ञा तदभावे किं न धारेउ ।।

[भा.१३९२] तं पि यहु दव्वसंगह परिहीणं परिहरंति सेहादी ।
संगहरिए य सयलं गणधारी तं कहं होइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यत् पृच्छसि त्वं यथा द्वितीयभङ्गे द्वितीयभङ्गवर्तिना गणधरेण कस्मात्प्रतिषेधः कृतः? तत्रकारणमिदं श्रृणु। तदेवाह-यदि से तस्य गणो भवेत् ततो धारयेत्। तदभावे गणाभावे किंनु धारयेत्? नैवकिञ्चिदिति भावस्ततो गणाभावादेतस्य गणधारणप्रतिषेधः अपि च तं बहु इत्यादि तमपि च भावयेत्। सच्छन्नमपि च बहुनिश्चितमलब्धिकतया द्रव्यसङ्ग्रहपरिहीनं वस्त्रपात्राद्युपकरसङ्कहरहितं शैक्षादयः शैक्षक आदिशब्दात् मुनिवृषभादि परिग्रहः परिहरन्ति। वस्त्राद्यभावात्, तेषां सीदनात्। ततः संग्रहमृते विना सकलं परिपूर्णं गणधारित्वं कथं भवति नैव भवतीति भावस्तदभावाच्च तस्य तत्प्रतिषेध इदमलब्धिकमधिकृत्योक्तम्। यदि पुनर्द्वितीयभङ्गवर्त्यपि वक्ष्यमाणगुणैरुपेतो भवति, ततोऽनुज्ञाप्यतापि, गणधारी दोषाभावाच्च तथा चाह-

[भा.१३९३] आहारवत्थादिसु लद्धि जुत्तं आदेज्ज वक्कं च अहीनदेहं।
सक्कारभज्जं मइमंमि लोए, पूयंति सेहायपि हु जना य॥

वृ- आहारवस्त्रादिलब्धियुक्तमादेयवाक्यमहीनदेहं परिपूर्णदेहावयवं तथा मतिमंमिलोकं सत्कारभाजं विद्वज्जनपूज्यमित्यर्थः। शैक्षकाः पूजयन्ति पाठान्तरं 'सक्कारहज्जंमि इमंमि लोए' तत्रायमर्थः सत्कारेण ह्रियते आक्षिप्यते इति सत्कारहार्योऽयं यतो लोकस्तत एवं भूतेऽस्मिन् लोके आहारवस्त्रादिषु लब्धियुक्तमित्यादिगुणैः शैक्षकाः पूजयन्ति पृथग्जनश्च बहु मन्यते। ततः स तादृशो गणधारी कर्तव्यः। सम्प्रति पूयापडिसेहे इति पदे व्याख्यानयन्नाह—

[भा.१३९४] पूयत्थं नाम गणो धारिज्जाति एवं न वसितो सुणतो।
आहारोवहिपूया कारण न गणो धरेयव्वो॥

वृ- पूजां प्राप्नुयामित्येवमर्थं नाम गुणो ध्रियते। इत्येवं कश्चित् व्यवसितोऽभ्युपगतवान्,। एतावता पूया इत्यंशो व्याख्यातः। अत्राचार्यः प्राह-श्रृणुत यदर्थं गणोध्रियते, तत्र परोक्तप्रतिषेधमाह-आहारोपधिपूजाकरणेन उत्कृष्टः आहारः शोभन उपधिर्महती पूजा स्यादिति कारणतोऽत्र विभक्तिलोपः प्राकृत्वात् न गणो धारयितव्यः। एतावता प्रतिषेध इति विधृतं,। किमर्थं तर्हि गणो धारयितव्य इत्यत आह—

[भा.१३९५] कम्माणनिज्जरट्ठा एवं खु गणो भवे धरेयव्वो।
निज्जरहेतुववसिया पूयंपि च केइ इच्छंति॥

वृ- एवमनेन कारणेन खु निश्चितं भवति गणो धारयितव्यो यदुत कर्मणां ज्ञानावरणीयादीनां निर्जरार्थं मोक्षायैव तत्ववेदिनां प्रवृत्तेराहादीनां चैहिकत्वात्। केवलं केचित् स्थविरकल्पिका निर्जराहेतोः गणधारणं व्यवसिताः पूजामपि वक्ष्यमाण लक्षणामिच्छन्ति। किमुक्तं भवति? यद्यपि नाम तत्वतः कर्मनिर्जरणनिमित्तं गणो ध्रियते तथापि पूजामेष प्राप्नुयादिति पूजानिमित्तमपि तस्य मणधारणमनुज्ञाप्यते। पूजामेवाह—

[भा.१३९६] गणधारिस्साहारो उवकरणं संथवो य उक्कोसो।
सक्कारो सीसपडिच्छएहिं गिहि अन्नतित्थीहिं॥

वृ- गणधारिणः सत उत्कृष्ट आहार उत्कृष्टमुपकारणुत्कृष्टं संस्तवः सतां गुणानां प्रख्यानं तथा शिष्यैः प्रतीच्छकै गृहिभिरन्यतीर्थिकैश्चोत्कृष्टः सत्कार उपाध्यायादिभिः पूजनं क्रियते। ततः पूजानिमित्तमपि तस्य गणधारणमनुज्ञापनं, संस्तवं व्याख्यानयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१३९७] सुत्तेण अत्थेण य उत्तमो उ आगाढपणेसु य भावियप्पा ।
जद्यन्निओ वा वि विसुद्धभावो, संते गुणेवं विकत्थयंति ।।

वृ- सूत्रेणार्थेन च एष उत्तमः प्रधानः परिपूर्णः सूत्रस्यार्थस्य चावदातस्यास्य संभवात् ।तथा आगाढा प्रज्ञा येषु व्याप्रियते न या काचन तान्यागाढप्रज्ञानि शास्त्राणि तेषु भावितात्मा तात्पर्यग्रहितया तत्रावीत निष्पन्नमतिरिति भावः । तथा जात्या सकल जनप्रशस्ययान्वितो युक्तो जात्यन्वितस्तथा विशुद्धः स्वपरसंसारनिस्तोरेणैकतानतया अवदातो भावोऽभिप्रायो यस्य स विशुद्धभावः । एवं सतो गुणान् गणधारिणः शिष्या अपरे च प्रकर्षतो हर्षातिरेकलक्षणतो विकत्थयन्ते - श्लाघ्यन्ते । एवं च पूज्यमाने आचार्ये पूजकानां यो गुणस्तमुपदर्शयति—

[भा.१३९८] आगमा एवं च बहुमानितोहु, आनथिरत्तं च अभावितेसु ।
विनिज्जरविनिययाय निद्यं, माणस्स भंगोवि य दुज्जयं ते ।।

वृ- पूज्यमाने आचार्ये पूजकैरागमो बहुमानितो बहुमानविषयीकृतो भवति । आगमस्य तत्रस्थत्वात्तथा भगवतामर्हतामाज्ञा परिपालिता भवति । भगवतां हि तीर्थ कृता मियमाज्ञा युदत गुरोः सदा पूजा कर्तव्या । तथा चोक्तम्—

जहाहि अग्गिजलणं नमंसे, नाणो हुती मंतपयाभिसित्तं ।
एवायरियं उवचिट्ठएज्जा अनंतनाणोवगतो विसंतो ।।

तथा गुरुविनयकरणेन येनाद्यापि भावितातेष्वभावितेषु क्रियमाणपूजादर्शनतः स्थिरत्वमुपजायते । तथा वैनयिकैर्विनयनिमित्ता विनिर्जरा कर्म निर्जरणं सदा सततं भवति । गुरुविनयस्य सदा कर्तव्यत्वात् । तथा मानस्याहंकारस्य भङ्गोऽपि च कृतो भवति । एते पूजकानां गुणाः । सम्प्रति निर्जनार्थमेव गणधारणं व्यवसितस्य पूजामपीच्छतः आचार्यस्य दोपाभावे यस्तडागदृष्टान्तस्तं भावयति ।

[भा.१३९९] लोइयधम्म निमित्तं, तडागखाणावियमि पउमादि ।
नवि गरिहियाणुभे त्तुं, एमेव इमंपि पासामो ।।

वृ- केनापि लौकिकी श्रुतिमाकर्ण्य धर्मनिमित्तं तडागं खानितं । तस्मिंश्च तडागे पद्मादीनि जातानि । वर्षारात्रे चापगते यत्र यत्र पानीयं शुष्यति तत्र तत्र धान्यं वापयति । तत्र यथा पद्मादीन्यनुभवितुं भोक्तुं गृह्यमाणान्यपि न तस्य गर्हितानि भवन्ति लोके तथा संमतत्वादेवमेवानेनैव प्रकारेण इदमपि गणधारणं पश्यामः । निर्जरार्थमाचार्यमाणं गणधारणमप्युक्तप्रकारेण पूजानिमित्तमप्यदोषायेति भावः ।

सम्प्रति सन्तेसेत्यादि पश्चार्धं व्याख्यानयति—

[भा.१४००] संतंमि उ केवईओ, सिस्सगणोदिज्जतीति ता तस्स ।
पव्वाविते समाणे तिन्निजहन्नेन दिज्जंति ।।

वृ- भावपरिच्छन्नस्य शिष्यस्य सति विद्यमाने परिवारे तेन तस्याचार्यस्य ततो गणधारणानुज्ञापनानन्तरं कियान् शिष्यगणो दीयताम्, । अत्रोत्तरं प्रव्राजिते शिष्यगणो सति तत्रो त्रयो जघन्येन दीयन्ते, उत्कर्षणो बहुतरकाः सर्वे वा इति वाक्यशेषः ।

अथ किं कारणं जघन्यतस्त्रयोऽवश्यं दातव्या इत्यत आह—

[भा.१४०१] एगो चिट्ठति पासे सन्ना आलित्तमादिकज्जत्था ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्खादि वियारदुवे, पच्चयहेउं च दो हेउं ।।

वृ- एकः पार्श्वे समीपे संज्ञापुरीषोत्सर्गे आलत्तमालपनं कस्याप्याचार्यः कारयेदित्यादिकार्यार्थं तिष्ठति । द्वौ च भिक्षायामादिशब्दादौषधानयनादौ विचारे बहिर्भूमौ गच्छतः यदि वा सूत्रार्थः संवादप्रत्ययहेतोर्द्वौ भावेतां, सम्प्रति प्रागुक्तायामेव चतुर्भङ्ग्यां विशेषं वक्तुकाम आह–

[भा.१४०२] दव्वे भावे पलिच्छद दव्वे तिविहो उ होइ चित्तादी ।
लोइय लोउत्तरितो दुविहो वावारजुत्तियरो ।।

वृ- परिच्छदो द्विविधो द्विप्रकारो-द्रव्ये भावे च । तत्र द्रव्ये द्रव्यपरिच्छदस्त्रिविधो भवति चित्तादि सचितो अचित्तो मिश्रश्च । एष त्रिविधोऽपि द्रव्यपरिच्छदो भूयो द्विधा-लौकिको लोकोत्तरिकश्च । तत्र लौकिकः सचितः त्रिविधो द्विपद चतुष्पदापदभेदात् । अचित्ते हिरण्यादि मिश्रसचित्ताचित्तसमवायेन, लोकोत्तरिकः सचित्तो द्रव्यपरिच्छदः शिष्यादिः । अचित्त उपधि मिश्रः सचित्ताचित्तसमवायतः, । तत्र लौकिके लोकोत्तरिके च द्रव्यपरिच्छेदे द्विधा, यथा-व्यापारयुक्त इतरो व्यापारायुक्तः तत्र लौकिके व्यापारयुक्ते च निदर्शनमाह–

[भा.१४०३] दो भाउया विरिक्का, एक्को पुन तत्थं उज्जतो कम्मे ।
उचितभत्तिप्पदानं अकालहीनं च परिवड्ढी ।।

वृ- द्वौ भ्रातरौ । तौ परस्परं विरक्तौ धनं विरिच्य पृथक्पृथक् जातावित्यर्थः । तत्र तयोर्द्वयोर्मध्ये पुनरेकः कृषिं कुर्वन् कर्मणि उद्युक्तः । विमुक्तं भवति ? स्वयं कर्म करोति भूतिकांश्च कारयति, भृतिकानां वा कालपरिहीनं उचितां परिपूर्णां भृतिं मूल्यं ददाति । अकालपरिहीनं च परिपूर्णं भक्तं । एवं च तस्य व्याप्रियमाणस्य कृषेः परिवृद्धिरजायत साधुवादश्च ।।

[भा.१४०४] कयमकयंनजाणइ न य उज्जमए सयं न वावारो ।
भत्तिभत्तकालहीने दुग्गहियकिसीए परिहानी ।।

वृ- द्वितीयो व्यापारायुक्तो भृतिकैः किं कर्मकृतं किं वा न कृतमिति नैव जानाति स्वयम-परिभावनादन्यतश्चाप्रच्छनात् न च स्वयं कर्मकरणायोद्यच्छति न वा मध्ये स्थित्वा भृतकान् व्यापारयति भृतिभक्ते च भृतिभृतकानां कालहीने ददाति । किमुक्तं भवति ? भृतिमपरिपूर्णां ददाति कालहीनां च एवंभक्तमपि, तत एवंदुर्गृहीतायाः कृषेस्तस्य परिहानिरभूदसाधुवादश्च सम्प्रति लोकोत्तरिकं द्रव्यपरिच्छदे व्यापारयुक्तमाह–

[भा.१४०५] जो जाए लद्धीए उववेओ तत्थ तं निजोइंति ।
उवकरणसुए अत्थे, वादे कहणेगिलाणे य ।।

वृ- यो यया लब्ध्या उपपेतो युक्तो वर्तते, तत्र तं नियोजयन्ति सूरयस्तद्यथा उपकरणे इति उपकरणोत्पादने सुते इति सूत्रपाठलब्ध्युपेतं सूत्रपाठे अर्थग्रहण सलब्धिसमन्वितं परवादिमथने धर्मकथनलब्धिपरिकलितं धर्मकथने, ग्लानप्रतिचरणं पटीयसं ग्लानप्रतिजागरणे ।

[भा.१४०६] जह जह वावारयते जहा य वावारिया न हीयंति ।
तह तह गणपरिवड्ढी निज्जरवड्ढीवि एमेव ।।

वृ- यथा यथा तत्तल्लब्ध्युपेतान् तत्कर्मणि व्यापारयन्ति यथा यथा च व्यापारा न हीयन्ते देशकाल स्वभावौचित्येन व्यापारणात् तथा तथा गणस्य गच्छस्य परिवृद्धिर्भवति, । निर्जरावृद्धिरप्येवमेव निर्जरापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा तथा परिवर्धते इति भावः । तद्व्यतिरिक्तो व्यापारायुक्तस्तस्य गच्छेपरिहानिर्भवति न च निर्जरेति। सम्प्रति भावपरिच्छदमाह–

[भा.१४०७] दंसणनाणचरित्ते तवे य विणए य होइ भावंमि ।
संजोगे चउभंगो विईएनायं वइरभूतं ।।

वृ- दर्शनं क्षायोपशमिकादिभेदभिन्नं सम्यक्त्वं, ज्ञानं मतिज्ञानादि, चारित्रं सामायिकादि, तपोऽनशनादि एव भावे भावतः परिच्छदः । अन्ययोश्च द्रव्यभावपरिच्छदयोः संयोगे चतुर्भङ्गी । यद्यथा-द्रव्यतोऽपरिच्छन्नो भावतः परिच्छन्न इत्येवं रूपे द्वितीये भङ्गे ज्ञातमुदाहरणं च वज्रभूतिस्तदेवाह–

[भा.१४०८] भरुयच्छे नहवाहणा देवी पउमावती च वरभूती ।
उरोहकत्थगणेय कोउयनिच पुच्छदेविगमो ।।

[भा.१४०९] कत्थत्ति निवाएसो सयमासण एस चेव चेडिकहा ।
परिणाममदानं विरूवपडिचार रहिए य ।।

वृ- भरुकच्छं नयरं नहवाहणो नाम राया । तस्स पउमावती देवी । तत्थ नयरे वइरभूती आयरिओ महाकई अपरिवारो रूवेण य मंदरूवो । अतीव किसो तस्स कव्वं अंतेउरे गिज्जंति । सा य पउमावती देवी तेन कव्वेण हयहियया कया चिंतेइ जस्सेयं कव्वं कहमहंतं पेच्छिज्जा । ततो रायं अनुन्नवित्ता दासी संपरिवुडा महरिहपणागारं औचित्येन ढौकनीयं घेत्तुं वइरभूतिस्स वसहिं गता तं वारद्धियं पासित्ता वइरभूती सयमेव मिसियं घेत्तुं निग्गतो । पउमावईए कहियं कहं वइरभूती आयरितो । वइरभूतिणा आयरिएण भणितं बाहिंगतो दासीए सन्नियं एस चेव वइरभूती ताहे विरागं गया चिंतेइ य दिट्ठासि कसेरुमती पीयंते पाणियं यं वरं तुहनाम न दंसणयं । अत्र कसेरु नाम नदी तस्याः प्रसिद्धिरतीव नवरं न प्रसिद्ध्यनुरूपं तस्याः पानीयमिति क्षेपः । ताहे तं पणागारदिणं ठवियं एतं आयरियस्स दिज्जासित्ति गया । सम्प्रत्यक्षरघटना-भरुकच्छे नभोवाहनो नाम राजा । तस्य पद्मावती देवी । तत्र वज्रभूतिराचार्यः अवरोधे अन्तः पुरे तत्काव्यगानं कौतुकेन नृपं पृष्ट्वा देव्यास्तद्वसतौ गमस्तदनन्तरं पृच्छा । कुत्र वज्रभूतिराचार्यः । तस्य प्रत्युत्तरं बहिर्निर्गतः स चाचार्यः सपरिवाराभावात् स्वयमासनं गृहीत्वा मध्याद्बहिरागतः । बजया दास्याः कथाकथनमेष एव वज्रभतिस्ततो विपरिणामो विपरिणामाच्च साक्षाददानं विरूपे परिवाररहिते च तस्मिन्नाचार्ये एतेनैतदावेदितं यः परिवारवानपि रूपेण विरूपः । सोऽपि द्रव्यपरिच्छदेन अपरिच्छन्नः । ततो यद्यपि तस्य परिवारोऽस्ति तथापि योऽधस्तात् द्रव्यपरिच्छदो वर्णितस्तस्य मूलमाकृतिस्तदभावे तस्याभावात्तथा चाह–

[भा.१४१०] मूलं खलु दव्वपलिच्छयस्स सुंदरिमोरसबलं च ।
आकितिमतो हि नियमा सेसा वि हवंति लद्धीतो ।।

वृ- समस्तस्यापि प्रागुक्तस्य द्रव्यपरिच्छदस्य मूलं खलु सोदर्यमौरसं च बलं हृदयबलिष्टता सर्वव्यापारेषु दाक्ष्यमिति भावः । कुत इति चेदत आह- हि यस्मादाकृयिमतः सतो नियमाच्छेषा अपि लब्ध्यो वस्त्रादिविषया भवन्ति, न त्वाकृतिविरहितस्य प्रत्यक्षत एव दर्शनात् तत आकृतिरहितोऽपि द्रव्यपरिच्छदरहित इति न तस्यापि गणधारणानुज्ञा । सम्प्रति वक्ष्यमाणग्रन्थसम्बन्धनार्थमाह–

[भा.१४११] जो सो उ पुव्वभणितो अपभूसो उ अविसेसिओ तहियं ।
सो चेव विसेसिज्जइ इहइं सुत्ते य अत्थे य ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- योऽसौ चोयग अप्पभु इत्यादिना ग्रन्थेन अप्रभुः पूर्वं भणितः स तत्रापि विशेषतः एवोक्तः । इह अस्मिन् प्रस्तावे प्रभुः सूत्रेऽर्थे च विशेष्यते । सूत्रतोऽर्थतश्च तस्याप्रभुत्वं चिन्त्यते इति भावस्तदेवाह-

[भा.१४१२] अबहुस्सुए अगीयत्थे, दिठंता सप्पसीसवेज्जसुए ।
अत्थविहूणो धरंते, मासा चत्तारि भारीया ।।

वृ- अबहुश्रुता गीतार्थपदाभ्यां भङ्ग चतुष्टयं । तद्यथा-अबहुश्रुतो अगीतार्थ इति प्रथमो भङ्गः १, अबहुश्रुतो गीतार्थः २, बहुश्रुतोऽगीतार्थः ३ बहुश्रुतो गीतार्थः ४ । तत्र यस्य निशीथादिकं सूत्रतोऽर्थतो वा न गतं प्रथमभङ्गः । यस्य पुनर्निशीथादिगतौ सूत्रार्थौ विस्मृतौ स द्वितीयभङ्गः, । पुनरेकादशाङ्गधारी अश्रुतार्थः स तृतीयभङ्गः ३ सकलकालो चित सूत्रार्थोपेतश्चतुर्थः । अत्र बहुश्रुते अगीतार्थे वा एतेनाद्य भङ्गत्रयमुपात्तं तस्मिन् गणं धारयति । दृष्टान्तौ सर्पशीर्षकं वैद्यसुतश्च । इयमत्र भावना-आद्यानां त्रयाणां भङ्गानामन्यतरो यदि गणं धारयति ततः स सहगणेन विनश्यति यथा सर्पशीर्षकं वैद्यसुतो वा एतत् दृष्टान्तद्वयं यथा कल्पाध्ययने तथा भावनीयम् । अत्थविहूणेत्यादि अर्थविहीने अगीतार्थ इत्यर्थः । अर्थग्रहणमुपलक्षणं ते इत्यपि द्रष्टव्यं तस्मिन् अर्थविहीने सूत्रविहीने वा गणं धारयति उपलक्षणमेतत् निसृजति वा प्रायश्चित्तं चत्वारो भारिया इति गुरुका मासाः ।।

[भा.१४१३] अबहुस्सुते अगीयत्थे निसिरए वा विधारए वा गणं ।
तद्देवसियं तस्स उ मासा चत्तारि भारिया ।।

वृ- अबहुश्रुतोऽगीतार्थो वा यदि गणं निसृजति धारयति वा स्वयं किमुक्तं भवति । आद्यानां त्रयाणां भङ्गानामन्यतरो यदि गणं गीतार्थस्य वा निसृजति स्वयं चाद्यानां त्रयाणां भङ्गानामेकतरः सन् यदि गणं धारयति । एकं द्वौ वा दिवसावुत्कर्षतः सप्तरात्रिं दिवानि ततस्तद्दैवसिकस्तेषां सप्तानां दिवसानां निमित्तत्वतस्तस्य गणं निस्रष्टुर्धारयति स प्रायश्चित्तं चत्वारो मासा गुरुकाः ।।

[भा.१४१४] सत्तरत्तं तवो होही ततोच्छेदोपधावती ।
च्छेदेन छिन्नपरियाए ततो मूलं ततो दुगं ।।

वृ- अन्यदन्यतः सप्तरात्रिं यावद्गणस्य निसर्जने धारणे वा प्रायश्चित्तं तपो भवति । तपः प्रायश्चित्तपरिसमाप्त्यनन्तरं तपः क्रमेण च्छेदः प्रधावति च्छेदेन चेन्न च्छिन्नः पर्यायो भवति । ततोऽच्छिन्नपर्याये तस्मिन् मूलं दीयते, । ततोऽप्यतिक्रमे अन्तिमं द्विकमनवस्थाप्य पाराञ्चितलक्षणं । इयमत्र भावना-प्रथमसप्तदिवसानान्तरमन्यानि चेत् सप्तदिनानि गणं निसृजति धारयति वा स्वयं ततः प्रायश्चित्तं षट् लघु । ततोऽप्यन्यानि सप्तदिनानि ततः षट्गुरु, तदनन्तरमप्यन्यानि चेत् सप्तदिनानि । ततश्चतुर्गुरुकाः च्छेदः । ततोऽप्यन्यसप्तदिनानि ततश्चतुर्गुरुकाः च्छेदः । ततोऽप्यन्यसप्तदिवसातिक्रमे षट्लघुकः च्छेदः । तदनन्तरमप्यन्यसप्तदिवसातिवाहने षट्गुरुकच्छेदः । एतावता कालेन यदि पर्यायो नच्छिनत्ति । अतस्त्रिंचत्वारिंशत्तमे दिवसे गणं धारयतो निसृष्टुर्वा प्रायश्चित्तं मूलं, चतुश्चत्वारिंशत्तमे दिवसे अनवस्थाप्यं पञ्चचत्वारिंशत्तमे पाराञ्चितं तदेवं यत इत्थं प्रायश्चित्तं ततोनिवर्तते आद्यानां त्रयाणां भङ्गानामेकतरः स्थापयितुं, कः पुनर्गणधरः स्थापयितव्यः इति चेदुच्यते शुद्धः ।

अथ कोऽसौ शुद्ध इति शुद्धलक्षणमाह—

[भा.१४१५] जो सो चउत्थभंगो दव्वे भावे य होइ संच्छन्नो ।
गणधारणंमि अरिहो सो सुद्धो होइ नायव्वो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- योऽसौ चतुर्थभंगवर्ती । कोऽसावित्याह-द्रव्ये भावे च यो भवति संच्छन्नद्रव्यः परिच्छदविशेषैश्च परिकलित इति भावः । तथा आचार्यलक्षणोपेततया यो गणधरणे योग्यः स शुद्धो भवति ज्ञातव्यः ।

स च परीक्षया ज्ञातुं शक्यते इति तत्परीक्षामाह—

[भा.१४१६] सुद्धस्स य परिच्छा खुड्डय थेरे य तरुणखग्गूडे ।
दोमादि मंडलीए सुद्धमसुद्धे ततो पुच्छ ।।

वृ- शुद्धस्य परीक्षा कर्तव्या । कस्मिन् विषये इत्यत आह-क्षुल्लके स्थविरे तरुणे खग्गूडः स्वभावाद्वक्राचारः । तस्मिंस्तथा द्वयोरादिमण्डल्योः एताभिः परीक्षाभिर्यदि निर्वटितस्ततः शुद्ध इतरस्त्वशुद्धः शुद्धस्य च गणधरपदानुज्ञा कर्तव्या । नाशुद्धस्य ततः शुद्धाशुद्धप्रतिपादनानन्तरं चोदकपृच्छा उपलक्षणमेतदाचार्यस्य प्रतिवचनं वक्तव्यं । एष द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतः क्षुल्लकविषयां परीक्षाविधिमाह—

[भा.१४१७] उच्चफलो अह खुड्डो सउणिच्छावोपवासिउं दुक्खं ।
पुट्ठो विहोहिति न वा पलिमंथो सारवंतस्स ।।

वृ- तस्य द्रव्यभावपरिच्छदोपेतस्य गणधरपदयोग्यता परीक्षणाय प्रथमतः क्षुल्लको दीयते । एनं द्विविधामपि शिक्षां त्वं ग्राहय, ततः स एव मुक्तः सन् यदि चिन्तयति यथा अहत्ति एषक्षुल्लकः उच्च चिरकालभाविफलं यस्मात्स उच्चफलचिरकालेनोपकारी तावता कालेन किमपि भविष्यतीति को वेद, ततः क एनं शिक्षां ग्राहयिष्यति । यदि वा शकुनिशावशिवावत् पोषयितु दुःखं महता कष्टेनैष पोष्यते । पुनः पुनर्बुभुक्षाभावादिति भावः । अपि च पुष्टोऽपि सन्नेष मम भविष्यति न वा को जानाति अन्यच्चामुं धारयतः सारामस्य कुर्वतो मम सूत्रस्य च महान् पलिमन्थो व्याधातस्ततो नैतस्य मे शिक्षयायोजनमेवं चिन्तयन् यो न ग्राहयति सोऽनर्हस्तद्विपरीतोऽर्हस्ततो यः स्थविर एष प्रवचनोपग्रहकरो भविष्यति दृढदेहो वा यथा आर्यरक्षितपितेति कारणतो दीक्षितस्तिष्ठति । शैक्षस्तस्य समर्प्यते । एवं द्विविधामपि शिक्षां ग्राहयति तस्मिंस्तत्समर्पिते यदि स इदं चिन्तयति ।

[भा.१४१८] पुठं वा समरिसतिदुराणुवुत्तो न वेत्थ पडियारो ।
सुत्तत्थे परिहाणी थेरे बहुयं निरत्थं तु ।।

वृ- एष प्रथमालिकादिदापनतः शिक्षाग्रहणतश्च पुष्टीकृतोऽप्यासु शीघ्रं मरिष्यति । वा शब्दश्चिन्तान्तर समुच्चये । यदि वा वृद्धः स्वभावात् दुरनुवर्त्य दुःखेनानुवर्त्यते न वा अत्र वृद्धशिक्षापनेकश्चित्प्रतीकारः । किमुक्तं भवति ? नास्मात् वृद्धात् कश्चित्प्रत्युपकारः । अथवा वृद्धो वृद्धत्वादेव जडप्रज्ञश्च ततोऽस्य शिक्षणे मम सूत्रार्थपरिहाणिस्तदेवं स्थविरशिक्षां ग्राह्यमाणे बहुकं निरर्थकमिति य एव चिन्तयित्वा यो न शिक्षां ग्राहयति सोऽनर्हः तद्विपरीतोऽर्ह इति । तदनन्तरं योऽसौ तरुणो मेधावी तं समर्प्य भण्यते यथा एष मण्डलिपरिपाट्या आलापके दीयमाने सीदति । ततस्त्वमेवमप्याक्षेपेण पाठय, ततः स इदं चिन्तयति-

[भा.१४१९] अहियं पुच्छति गिण्हए बहुं किं गुणो मरगेण ।
होहिति य विवद्धंतो एसो ममं पडिसवत्ती ।।

वृ- एष मेधावित्वादधिकं प्रच्छत्यवगृह्णाति वा वधारयति बहु प्रभूतं तत इत्थमस्यैव सूत्रस्यार्थस्य चरकेण प्रदानत आक्षणिकयोः को गुणो मम निरर्थकं कश्चिदित्यर्थः । केवलं दोषो निजसूत्रार्थ-परिगलनादन्यच्च एष हु निश्चितं विवर्धमानः । सूत्रतोऽर्थतश्च वृद्धिं गच्छन् मम प्रति सपत्नी च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्थी भविष्यति । ततो न कोऽप्येनं पाठयिष्यतीति न शिक्षयति, सोऽनर्हस्तद्विपरीतोऽर्हस्ततः खग्गूडं दत्वा स भण्यते-अमुं तथा ग्राहय यथा ऋजुः सामाचारी कुशलश्च भवति । ततो यदि-

[भा.१४२०]　　कोही निरुवगारी करुसो सव्वस्स वामवट्टोय ।
　　अविनीतोत्ति च काउं हंतुं सत्तुं च निच्छुभती ।।

वृ- क्रोधी यदि वा निरुपकारी अथवा परुषः परुषभाषी तथा सर्वस्य साधुवर्गस्य वामावर्तः प्रतिकूलतया वर्तते यदि वा अविनीत इति कृत्वा शिक्षां ग्राहयति, अथवा आक्रुश्य शत्रुमिव वा हत्वा निःकाशयति तर्हि सोऽनर्हस्तद्विपरीतोऽर्हः ।

सम्प्रति चतुर्ष्वपि योजनेषु तद्विपरीततया यथार्हो भवति तथा भावयति—

[भा.१४२१]　　वच्छाहारादीहिय संगिण्ह अनुवत्तए य जो जुगलं ।
　　गाहेई अपरितंतो, गाहण सिक्खावए तरुणं ।।

[भा.१४२२]　　खरमउएए अनुयत्तति खग्गूडं जेण पडति पासेणं ।
　　गाढमविहार विजढो तत्थोड्डुण अप्पणे कुणति ।।

वृ- यो नाम युगलं क्षुल्लकवृद्धलक्षणं वस्त्राहारादिभिः संगृह्णाति आत्मवशीकरोत्यनुवर्लयति च तरुणमपरिभ्रान्तः परिश्रममगणयन् ग्राहयति ग्राहणं ग्राह्यते । शिष्य एतदिति बाहुलकात्कर्मण्यनट् ग्राहणमाचारादिसूत्रं आसेवना शिक्षया च शिक्षयति । तथा खग्गूडं खरमृदुभिर्वाक्यैस्तथानुवर्तयति येन स पाशेन पतति अन्यथा गतिं न लभते इति मन्यमानस्तद्वशी भवति, । तथा यः स्थानाविचलनादपि सन् खग्गूडतया विहारविजढो भवति विहारं न करोतीति भावस्तत्र उड्डुणमङ्गीकारमात्मना करोति । यथैनमहं खरेण मृदुना चोपायेन विहारक्रमं चोपायेन विहारक्रमं कारयिष्यामीति एष एवंभूतो योग्यः ।

[भा.१४२३]　　इय सुद्धसुत्त मंडलि दाविज्जइ अत्थ मंडली चेव ।
　　दोहिंपि असीयंते, देइ गणं चोइए पुच्छा ।।

वृ- इति एवमुपदर्शितेन प्रकारेण चतुर्ष्वपि जनेषु सूत्रोपदेशतः परीक्षितः सन् शुद्धो भवति न मनागपि दोषः ततस्तस्य सूत्रमण्डली दाप्यते, अर्थमण्डली च एतयोश्च द्वयोरपि मण्डल्योर्यदि न विषीदति । किन्त्वपरिश्रान्ततया गच्छवर्तिनां प्रतीच्छकानां च ज्ञानाद्यभिलाषिणां चित्तग्राहको वर्त्तते, ततस्तस्मिन् मूलाचार्यो गणं ददाति । एवमुक्ते चोदके चोदकस्य पृच्छा केत्यत आह—

[भा.१४२४]　　चोएइ भणिऊणं उभयच्छन्नस्स दिज्जइ गणोत्ति ।
　　सुत्ते य अनुन्नायं भयवं धरणं पडिच्छन्ने ।।

[भा.१४२५]　　अपरिहाणरिहपरिच्छद अत्थेण जं पुणो परूवेह ।
　　एवं होइ विरोहो सुत्तत्थेणं दुवेण्हंपि ।।

वृ- चोदयति प्रश्नयति परो यथा-पूर्वमिदमुक्तं उभयच्छिन्नस्य द्रव्यभावपरिच्छदविशेषात् साकल्यपरिकलितस्य गणो दीयते । युक्तं चैतत् यतः सूत्रेऽपि च शब्दोऽपि शब्दार्थे भगवन् धारणं गण-धारणमनुज्ञातं परिच्छिन्ने द्रव्यभावपरिच्छेदोपेतमात्रे, तत एवमुक्त्वा यदर्हानर्हपरीक्षामर्थेनार्थमर्थमाश्रित्य प्ररूपयथ नन्वेवं सति द्वयोरपि सूत्रयोर्भवति विरोधः ।

उक्तस्वरूपस्यार्थस्याधिकृतसूत्रेणासूचनात् अत्र सूरिराह—

[भा.१४२६]　　संतिहि आयरिय वियज्जगाणि सत्थाणि चोयगसुणाहि ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सुत्तानुनातो विहु होइ कयाई अनरिहोउ ।।

[भा.१४२७] तेन परच्छा कीरइ सुवण्णस्सेव ताव निहसादी ।

तत्थ इमो दिट्ठंतो रायकुमारेहिं कायव्वो ।।

वृ- चोदक श्रृणु मदीयं वचः । सन्ति हि स्फुटं तानि शास्त्राणि यान्याचार्यद्वितीयकानि किमुक्तं भवत्याचार्यपरम्परयातसम्प्रदाय विशेष परिकलितानि ततो यद्यप्यर्हानर्हपरीक्षालक्षणार्थः । सूत्रे साक्षान्नोपनिबद्धस्तथापि सूचनात्सूत्रमिति सोपसूत्रेण सूचित इति सम्प्रदायादवगम्यते इति न कश्चिद्दोषः, । तथा च सूत्रानुज्ञाऽपि हु निश्चितं कदाचिदनर्हो भवति । न च सूत्रमन्यथा सर्वज्ञप्रणीतत्वात् तेन परीक्षापि सूचितेति तापनिकषादिभिः सुवर्णस्येव सूत्रानुज्ञातस्यापि क्षुल्लकादिभिः परीक्षा क्रियते, । तत्रायं वक्ष्यमाण लक्षणो द्दष्टान्तो राजकुमारैः कर्त्तव्यः । तमेवाह—

[भा.१४२८] सूरे वीरे सत्तिए ववसायथिरे चियाय धितिमंते ।

बुद्धी विनयकरणे सीसे वि तहा परिच्छाए ।।

[भा.१४२९] निब्भयउरस्सबली अविसावि पुणो करेंति संठाणं ।

न विसम्मत्ति देति अनस्सितो चउहा नुवित्ती य ।।

वृ- इत्याद्यगाथापदानां द्वितीयगाथापदैर्व्याख्यानं तद्यथा-शूरो नाम निर्भयः । स च कुतश्चिदपि न भयमुपगच्छति । वीर ऊरसबलवान् तेनाक्लेशेन परिबलं जयति । सात्विको नाम यो महत्यप्युदवे गर्वं नोपयाति । न च गरिष्टेऽपि समापतित्ते व्यसने विषादं, । तथा चाह-अविषादी उपलक्षणमेतत् । अगवी वा व्यवसायी अनलस उद्योगवानित्यर्थः । तथा चाह-पुनः करोति संस्थानं किमुक्तं भवति प्रमादतः कथंदचिध्यवसायविकलोऽपि भूत्वा पुनः करोति संस्थानं कर्तुमुद्यच्छति स्वोचितं व्यवसायमिति भावः, । स्थिरो नाम उद्योगं कुर्वन्नपि न परिताम्यति । तथा चाह-विश्राम्यतीति चियायत्ति दानरुचिय-थौचित्यमाश्रितेभ्योऽन्येभ्यश्च ददातीत्यर्थः । धृतिमान् राज्यकार्याणि कुर्वन् परनिश्रामऽनिक्षेपमाणः तथा चाह-अनिस्सिते इति, बुद्धित्ति औत्पत्तिक्यादिबुद्धि चतुष्टयोपेतः, विनीतो गुर्वादिषु विनयकारी यथौचित्यं गुर्वादीनामनुवर्तक इत्यर्थः, करणे इति यद्राज्ञः कर्त्तव्यं तत्करणे कुशलः । एतेषु परीक्षा क्रियते । किमेते गुणाः सन्ति न वा तत्र यः एतैर्गुणैरूपेतो भवति स राज्ञो राज्येऽभिषिच्यते । दानशीलोऽत्र यः स्थिरः सोऽपरिश्रान्तः सन् कर्त्तव्यं करोति । कृत्वापि पश्चादननुपतापी त्यागवान् नाम दानशीलः स च स्तोकादपि स्तोकं ददानो गणस्य बहुमानभाग् भवति ।।

[भा.१४३०] परवादी उवसग्गे उप्पन्ने सूरयाइतंतरवि ।

अद्धाने तेणमादी उरस्सबलेण संतरति ।।

[भा.१४३१] अब्भुदए वसणे वा अखुब्भमाणो उ सत्ति होति ।

आवति कुलादि कज्जेसु चेव ववसायवं तरति ।।

[भा.१४३२] कायव्वमपरितं तो दातुं वि थिरो अनानुभाविउ ।

थोवा तो विदलंतो चियाग वंदन सीलोउ ।।

[भा.१४३३] उवसग्गे सोढव्वे झाएकिच्चेसु यावि (साइ) धीमंतो ।

बुद्धिचउक्कविनीतो अहवा गुरुमादि विनीतो उ ।।

वृ- धृतिमान् उपसर्गान् सोढव्यान् ध्यायति, कृत्येष्वपि कार्येष्वविषादं प्रवर्त्तते, बुद्धिविनीत इत्यत्र

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

इदमपि व्याख्यातं बुद्धि चतुष्टयं नीतं प्रापितमात्मनि येन स बुद्धिविनीतः सुखादिदर्शनात्क्लान्तस्य (चतुष्कस्य) पाक्षिकः परिनिपातः । अथवा बुद्धित्ति बुद्धिचतुष्कोपेतो विनीतो गुर्वादिषु विनीतः ।

[भा.१४३४] दव्वाई जं जत्थओजम्मि वि किच्चं तु जस्स वा जं तु ।
किच्चइ अहीन कालं जियकरणविनीयए गच्छ ।।

वृ- यद्यत्र द्रव्याद्युपयोगि यस्य वा यत्र यत् कृत्यं तत्सर्वमहीनकालं जितकरणः करोति कारयति जितकरणो विनीत इति द्वावप्येकार्थौ तत्पर्यं विश्रान्त्या शब्दार्थस्तु परस्परं भिन्नो जितकरणो नाम करणदक्ष उच्यते । विनीत इति विनयकरणशीलः ।।

[भा.१४३५] एवं जुत्तपरिच्छा जुत्तो वे तेहिमेहिउ अजोग्गो ।
आहारादि धरेंतो तिंतिणिमाईहिं दोसेहिं ।।

वृ- एवमेतैरनन्तरोदितैः शूरत्वादिभिगुणैर्युक्ता उचिता या परीक्षा तथा युक्तोऽपि निश्चित एभिर्वक्ष्यमाणदोषैः अयोग्यस्तानेवाह-आहारादि आहारोपधि पूजानिमित्तं गुणं धारयन् तिन्तिणादिभिश्च दोषैरयोग्यः । तिन्तिणी नाम यत्र तत्र वा स्तोकेऽपि कारणे करकरायणं । आदि शब्दाद्यलचित्तता-दिपरिग्रहः । एतदेव व्याख्यानयति—

[भा.१४३६] बहुसुत्ते गीयत्थे, धरेइ आहारपूयणठाई ।
तिंतिणि चल अनवठिय, दुब्बलचरणा अजोग्गाउ ।।

वृ- बहुकालोचित्तं सूत्रं आचारादिकं यस्य स बहुसूत्रो गीतार्थो विदितसूत्रार्थः । एतेन युक्तः परीक्षायुक्तोऽपीत्येतद्व्याख्यानयति । एवं भूतोऽपि यो गणं धारयति आहारपूयणठाई उत्कृष्टो मे आहारो भविष्यति, पूजनं वा स्वपक्षतः चेत्येवमर्थं आदिशब्दादुपधिरन्यद्वोपकरणमुत्कृष्टं मे भविष्यतीत्येवमर्थ परिग्रहः । सोऽयोग्यस्तथा यो तिंतिणः स्वल्पेऽपि प्रयोजने करकरायमानः चलश्चलचित्तोऽनवस्थितः स्वप्रतिपन्नार्थाऽनिर्वाही दुर्बलश्चरणचारित्रविषये दुर्बलः । एतेऽप्ययोग्याः ।

[भा.१४३७] एवं परिक्खिवयंमी पत्ते दिज्जति अपत्ते पडिसेहो ।
दुपरिक्खियपत्ते पुणचारिय हावेंति मा मेरा ।।

वृ- एवमनन्तरोदितेषु गुणेषु च यदि परीक्षया निर्वटितो भवति, गुणैरुपेतो दोषैश्च विप्रयुक्त इत्यर्थः, । तदा स पात्रमिति कृत्वा तस्मिन् परीक्षिते पात्रे गणो दीयते । यस्तु प्रागुक्तैर्दोषैरुपेतो गुणैश्च विप्रमुक्तः सोऽपात्रमिति तस्मिन्नपात्रे गणदानस्य प्रतिषेधः । तस्मै गणो न दातव्य इति भावः । दुपरिक्खिय इत्यादि । अथ कदाचित्सुदुःपरीक्षितः कृतो भवेत् गणश्च तस्मै दत्तः । स च गणः सीदति । तं दृष्ट्वा अन्येऽपि गच्छवर्तिनः केचित् सामाचारी शिथिला भवितुं प्रवृत्तास्ततः परीक्षिते प्राप्ते पात्रे गणे प्रदत्ते सति गणे च सीदति ये तत्र गच्छे अन्य तीव्रधर्मका न सीदन्ति, तैरुपायेन प्रतिबोध्य वारयितव्यः । तत्र यदि वारणानन्तरमावृत्योद्यच्छति ततः समीचीनमथ वारितोऽपि किञ्चित्कालमुद्यम्य पुनः सामचारीं हापयति तत इयं मर्यादा कर्तव्या । अयं विधिः प्रयोक्तव्य इत्यर्थः । तमेवाह--

[भा.१४३८] दिठोवसमोसरणे अहवा थेरा तहिं तु वच्चंति ।
परिसाय घट्टमट्ठा चंदण खोडि खरंटणाय ।।

वृ- यत्र समवसरणे ज्ञायते, आचार्योऽत्र प्रवेक्ष्यति, तत्र गच्छोऽनुलोमवचसा प्रवेशनीयः । प्रवेश्य तत्र गत्वाचार्यस्य कथयति । त्वं सीदन् तिष्ठसि नैव च तद्युक्तं, तस्माद्भवगत्यावर्त्तस्व । अथवा कुलानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिण्डमानाः स्थविरास्तत्र गच्छे व्रजन्ति तत्र दृष्टान्तैः पर्षद्साधुपरिवाररूपा घृष्टा पादघर्षणात्, मृष्टा शरीरस्य केशादीनां च समारचनात् ततस्तां तथारूपां पर्षद मवलोक्य चन्दनाखोडिदृष्टान्तेन खरण्टना कर्तव्या। सा चैवं--आयरियादिट्ठंतमेगं सुणंति। एगो इंगालदाहओ इंगालकठाईणं आणणठाए नदीकूलं गतो, तत्थ पासइ।तडेण बुज्झ माणं गोसीसचंदणखोडिं सो तं घेत्तूण पारं ठितो, तमंतरा वणिओ पासइ जाणइ। एसा गोसीसचंदनखोडी। ततो तेन सो भणितो किं एएण कट्ठेण तं करिस्सइ। इंगालदाहगो भणइ-दहिऊण इंगाले घेच्छामि। वणिओ चिंतेति जइ इत्ताहे चेव मग्गीहामो तो बहुं सुंकं मोल्लं काहिति, तो जाहे डहिओमाझवेहिति ताहे किणीहामि,। एवं चिंतित्ता जाव वणिओ मुल्लस्स कएण घरं गंतुं एति ताव तेन दड्ढा गोसीसचंदनखोडी। वणिएण आगंतुं पुच्छितो कहिं ते कट्ठं। सो भणइ-दड्ढत्ति। एवं भणिएण खिंसितो महाभाग फिडितो सिईसरियत्तणस्स एवं जहा सो इंगालदाहओ सोय वाणियओ ईसरियत्तणस्स चुक्को एवं तुमंपि नाणादी दहंतो निव्वाणस्स चुक्किहिसि। एतदेवाह--

[भा.१४३९] इंगालदाह खोडी पवेसे दिठाउ वाणिएणं तु।
जा मुल्लं आनयए इंगालड्डाए ता दड्ढा॥

[भा.१४४०] इय चंदनरयणनिभा पमायतिक्खेण परसुणा भेत्तुं।
दुविहं पडिसेवि सिहिणा तिरियणखोडी तुमेदड्ढा॥

वृ- अङ्गारान् दहतीति अङ्गारदाहस्तस्य पार्श्वे गोशीर्षचन्दनखोडी प्रवेशे ग्रामप्रवेशे च वणिजा दृष्टा। स च यावन्मूल्यमानयति तावत्तेनाङ्गारदाहकेनाङ्गारार्थं सा खोडिर्दग्धा। इत्यक्षरार्थो भावार्थस्तु प्रागेवोक्तः॥ साम्प्रतमुपनयमाह-इय चंदणेत्यादि। इत्येवममुना प्रकारेण चन्दनरत्ननिभा गोशीर्षचन्दनमूल्या त्रिरत्नरत्नत्रयरूपा खोडिः। प्रमादरूपेण तीक्ष्णपरशुना भित्त्वा द्विविधा या प्रतिसेवा मूलगुणप्रतिसेवा उत्तरगुणप्रतिसेवा चेत्यर्थः। सैव शिखी वैश्वानरस्तेन त्वया दग्धा। एवं वारितः सन् यदि निवर्तते ततः प्रायश्चित्तं दत्वा तस्य वर्त्तापकाः स्थविरा दातव्याः। अथ न निवर्त्तये तस्य गणोऽपहरणीयः न केवलमेतेऽनर्हाः किं चान्येऽपि तथा चाह--

[भा.१४४१] एएण अनरिहेहिं अन्ने इय सूइया अनरिहातो।
के पुन ते इणमो त्ते दीनादिया मुणेयव्वा॥

वृ- एतैरनन्तरोदितैरनार्हैरन्येऽपि खलु सूचितानर्हाः के पुनस्ते। सूरिराह- इमे ते वक्ष्यमाणादीनादयो ज्ञातव्यास्तानेवाह--

[भा.१४४२] दीना जुंगिय चउरो जातीकम्मे य सिप्पसारीरे।
पाणा डोंबा किणिया सोवागा चेव जातीए॥

वृ- दीनार्हाः कस्मादिति चेदुच्यते-तेषां नन्दनाभावादुक्तं च-

दीनाभासं दीनगविं दीणजंपिउं पुरिसं।
कं पेच्छसि नंदंतं दीणं दीणाए दिठीए॥

तत्थ जुंगिका हीनाश्चत्वारोऽनर्हाः। तद्यथा-जातौ कर्मणि शिल्पे शरीरे च तत्र जातौ जुंगिकाश्चत्वारस्तद्यथा-पाणा डांबाः किणिकाः श्वपचाश्च। तत्र पाणा नाम ये ग्रामस्य नगरस्य च बहिराकाशे वसन्ति तेषां गृहाणामभावात्, डोम्बा येषां गृहाणि सन्ति गीतं च गायन्ति, किणिका ये वादित्राणि परिणह्यन्ति। वध्यानां च नगरमध्ये नीयमानानां पुरतो वादयन्ति। श्वपचाश्चण्डाला ये शुनः पचन्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्त्रीश्चविक्रीणन्तीति एते जातौ जुङ्गिका उपलक्षणमेतत् । तेनाय (यि) कल्पिका ये च हरिकेशजातयो मेया ये च वरुडादयस्तेऽपि जातौ जुङ्गिका द्रष्टव्याः सम्प्रति कर्मणि शिल्पे च तानभिधित्सुराह—

[भा. १४४३] पोसगसंबर नड लंख वाह मच्छंध रयरा वच्छुरिया ।
पडगारा य परीसह सिप्पे सरीरे य वुच्छामि ।।

वृ- पोषका ये स्त्रीकुक्कुटमयूरान् पोषयन्ति, । संवराः स्तानिकाः शोधकाः । नटाः प्रतीता ये नाटकानि नर्तयन्ति । लङ्गा ये वंशादेरूपरि वृत्तं दर्शयन्ति । व्याधा लुब्धका । मत्स्यबन्धाः कैवर्ता रजका वस्त्रप्रक्षालका वागुरिका मृगजालिकाजीविनः । एते कर्मणि जुङ्गिकाः, पटकाराः कुञ्चिकादयश्चर्मकारा इत्यरेपरीषहा नापिता एते शिल्पे जुङ्गिकाः । सम्प्रति शरीरे तान् वक्ष्यामि । प्रतिज्ञातं निर्वाहयति—

[भा. १४४४] हत्थे पाए कणे नासा उट्ठेहिं वज्जियं जाण ।
वामणग मडम कोढिय काणा तह पंगुला चेव ।।

वृ- शरीरे जुङ्गिका जानीहि । हस्ते सप्तमी प्राकृतत्वात् तृतीयार्थे । एवं सर्वत्र, ततोऽयमर्थः हस्तेन उपलक्षणमेतत् । हस्ताभ्यां वा वर्जितं, । एवं पादेन पादाभ्यां वा कर्णेन कर्णाभ्यां वा नाशया ओष्टेन वा वामनका हीनहस्तपादाद्यवयवा, मडभाः कुब्जाः कुष्टव्याध्युपहताः, काणा एकाक्षाः, पङ्गुलाः पादगमनशक्तिविकलाः एतानपि शरीरजुङ्गिकान् जानीहि ।

[भा. १४४५] दिक्खेउं पि न कप्पंति, जुंगिया कारणेवि दोसा वा ।
अनादिक्खिएवा नाउं न करेंति आयरिए ।।

वृ- एते अनन्तरोदिताश्चत्वारोऽपि जुङ्गिका दीक्षितुमपि न कल्पन्ते । पुनराचार्यपदे स्थापयितुमित्यपि शब्दार्थः कारणे तथाविधे समुत्पन्नेऽदोषाका निर्दोषा वा दीक्षितुमपि सम्बध्यन्ते । अज्ञाताश्चेत्कथमपि जुङ्गिका दीक्षिता भवेयुस्ततस्तान ज्ञात दीक्षितान् ज्ञात्वा कुर्वन्त्याचार्यगुणोपेतान् अप्याचार्यान् प्रवचनहीलनाप्रसक्तेः ।।

[भा. १४४६] पच्छावि होंति विकला आयरियत्तं न कप्पई तेसिं ।
सीसो ठावेयव्वो कानगमहिसोव निन्नम्मि ।।

वृ- पश्चादपि श्रामण्यस्थिताक्षिगलनादिना विकला भवन्ति, तेषामप्याचार्यगुणैर्युक्तानामप्याचार्यत्वं न कल्पते, येऽप्याचार्यपदोपविष्टाः सन्तः पश्चाद्विकला जायन्ते तेषामपि न कल्पते धारयितुमाचार्यत्वं, किन्तु तैस्तथा विकलैः सद्भिरात्मनः पदे शिष्यः स्थापयितव्यः । आत्मा त्वप्रकाशे स्थापयितव्यः । कइवेत्यत आह-काणकमहिष इव निम्ने । इयमत्र भावनाकाणको नाम चोरितमहिषो मा कोप्येनमद्राक्षीदिति हेतोः ग्रामस्य नगरस्य वा बहिर्गर्त्ता रूपे निम्ने प्रदेशे उपलक्षणमेतदिति गुपिले वा वनगहने स्थाप्यते । एवमेषोऽप्यन्यथा प्रवचनहीलना प्रसक्ते राज्ञादिदोषप्रसङ्गश्च । अथवा सो वात्मीयः शिष्यः पश्चाद्विकलैराचार्यः स्थाप्यते स कीदृश इत्यत आह—

[भा. १४४७] गणि अगणी वा गीतो जोवि अगीतोवि आगईमंतो ।
लोगे स पगासिज्जइ तहा बेंति न किंचमियरस्स ।।

वृ- गणोऽस्यास्तीति गणी साधु परिवारवान् यो वर्तते तदभावेऽगणी वा यो गीतो गीतार्थः कालोचितसूत्रार्थपरिनिष्ठितः तस्याप्यभावे यो चाप्यगीतार्थोऽपि आकृतिमान् रूपेण मकरध्वज-तुल्यः स गणधरपदे निवेश्यते, । यथायमस्माकमाचार्यो नेतर इति केवलमितरस्यापि जुङ्गिका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चार्यस्य यत् कृत्यं तत्स्थविरा अन्येऽपि च न हायन्ति । सर्वमपि कृत्यं कुर्वन्तीति भावः।

सम्प्रत्यनर्हान् प्रतिपिपादयिषुरिदमाह--

[भा.१४४८] एयद्दोसविमुक्का वि अनरिहा होंति से उ अने वि ।
अव्वाबाधादीया तेसिं विभागो उ कायव्वो ।।

वृ- एतैरनन्तरोदितैर्दोषैर्विमुक्ता अपि भवन्त्यन्ये इमे अनर्हाः । के ते इत्याह-इत्यबाधादयस्तेत-स्तषामत्याबाधादीनां विभाग पार्थक्येन स्वस्वरूपवर्णनं कर्तव्यं । प्रतिज्ञातमेव निर्वाहयति--

[भा.१४४९] अच्चाबाध अवायंते नेच्छई अप्पचेतए ।
एगपुरिसे कहं निंदूकगवप्भा कहं भवे ।।

वृ- इत्याबाधा आवाहंतोत्ति अशक्नुवत् नेच्छतितित्ति नेच्छति अनिच्छन् तथा आत्मचिन्तकः एते चत्वारोऽपि पुरुषा अनर्हाः । न केवलमेतेऽनर्हाः किन्त्वेकपुरुषादयोऽपि तत्र शिष्यः प्राह-कथमेकपुरुषो भवति ?, कथं वा निंदूः ? कथं वा काकी कथं वा बन्ध्येति ? । एवं शिष्येण प्रश्ने कृते सूरिः सकलविनेयजनानुग्रहप्रवृत्तः सर्वानप्यव्याबाधादीन् व्याख्यानयति--

[भा.१४५०] अच्चाबाधे बाहेइ न मन्नइ बिति धरेउ मसमत्थो ।
तइओ न चेव इच्छइ तिनि ए ए अनरिहातो ।।

वृ- अतिशयेन आबाधा यस्य सोऽत्याबाधः । स गच्छस्य द्विविधेप्युग्रहे वस्त्रपात्रादिज्ञाना-द्युपष्टम्भरूपे कर्तव्ये बाधां मन्यते, । द्वितीयोऽशक्तवद्गणं धारयितुमसमर्थः द्विविधमप्युपग्रहं गच्छस्य कर्तुमशक्तः इत्यर्थः, । तृतीयोऽनिच्छन् समर्थोऽप्लालस्येन गणं धारयितु नेच्छति, । एते त्रयोऽप्यनर्हाः। आत्मचिन्तकमाह--

[भा.१४५१] अल्भुज्जयमेगयरं पडिवज्जिस्संति अत्तचिंतो उ ।
जो वा गणे वसंतो न वहति तत्तीतो अन्नेसिं ।।

वृ- य आत्मानमेव केवलं चिन्तयन् मन्यते, यथाहमभ्युद्यतं जिनकल्प यथालन्दकल्पानामेकतरं विहारं प्रतिपत्स्ये इति आत्मचिन्तकः योऽपि गणोऽपि गच्छेऽपि वसन् तिष्ठन् न वहति न करोति तत्तिमन्येषां साधूनां सोप्यात्मचिन्तकः । एतो द्वावप्यात्मचिन्तकावनर्हौ ।

[भा.१४५२] एवं ममगति सिस्सं पणत्थट्ठे मरंति विद्धसंते वा ।
अन्नमयस्स वि य एवं, नवरं पुन ठायए एगो ।।

वृ- पणत्ति पञ्चम एक पुरुष एकं शिष्यं मृगयते सह्येवं चिन्तयति किमप्येकमात्मनः सहायं मृगयामि येन सुखं तिष्ठामीति, तथा कष्टे निन्दू तुल्ये शिष्या म्रियन्ते, विध्वंसन्ते वा प्रतिभज्यन्ते चेति भावार्थः, । इयमत्र भावना-यथा निन्दू महेला यद्यदपत्यं प्रसूते तन्म्रियते । एवं योऽपि यं यं प्रव्राजयति, स स म्रियते, अपगच्छति वा । ततः स निन्दूरिव निन्दूसत्तमस्यापि काकी तुल्यस्य एवमेव द्रष्टव्यं । नवरं पुनरेकं तिष्ठति किमुक्तं भवति ? यस्यापि यः शिष्यः स म्रियते विध्वंसते वा केवलमेकस्तिष्ठति उपलक्षणमेतत् । तेनैतदपि द्रष्टव्यम् । यस्यैकस्मिन् प्रव्राजिते सति द्वितीयविषये लब्धिरेव नास्ति स काकीव काकी काक्यपि हि किलैकं वारं प्रसूते इति प्रसिद्धिः । वंध्या तुल्यः सुप्रतीत इति न व्याख्यातस्तदेवेदं व्याख्यातं वन्ध्या किलाप्रसवधर्मा । एवं यस्य नैकोऽपि शिष्य उपतिष्ठते स वन्ध्येव वन्धयेति ।

पुनरन्यानर्हान् प्रतिपिपादयिषुरिदमाह--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१४५३] अहवा इमे अनारिहा देसाणं दरिसणं करेंतेन ।
जे पव्वाविय तेनं थेरादि पयच्छति गुरूणं ।।

वृ- अथवेति अनर्हाणामेव प्रकारान्तस्तोपदर्शनि इमे वक्ष्यमाणा अनर्हास्तानेवाह-देशानांदर्शनं कुर्वता तेन ये प्रव्राजिकाः स्थविरादयस्तान् प्रयच्छति गुरूणां, न तरुणादीन् पूर्व बहुवचनमनेकव्यक्त्यपेक्षयेत्यदोषः । स्थविरादीनेमाह--

[भा.१४५४] थेरे अनरिहे सीसे खग्गूडे एवलंभिए ।
उक्खोवगयत्ति रिह पंथे कालगते इय ।।

वृ- यः स्थविरान् प्रयच्छति शिष्यान् यो वा नर्हान् यो वा खग्गूडान् यदि वा च एकलम्भिकान् अथवा य एकं प्रधानं शिष्यमात्मना लभते गृह्णाति शेषास्त्वाचार्यस्य समर्पयति । स एकलाभेन चरतीति एकलाभिकः । यो वा शिष्याणामुत्क्षेपको यश्चाचार्याणामित्वरिकान् शिष्यान् करोति यो वा गुरुसम्बन्धिनः शिष्यान् पथि कालगतान् च शब्दात् प्रतिभग्नान् कथयति एते सर्वेऽप्यनर्हास्तत्र स्थविरादिन् व्याख्यानयति –

[भा.१४५५] थेरा उ अतिमहल्ला अणरिहा काण कुंटमादीया ।
खग्गूडा य अवस्सा एगालंभी पहाणो उ ।।

[भा.१४५६] तं एगं न विवंती अविसेसे देइ जे गूरुणां तु ।
अहवावि एग दव्वं लभंति जे ते देइ गुरूणं ।।

वृ- स्थविरा नाम अतिमहान्तो वयसातिगरिष्टा इत्यर्थः, । अनर्हाः कारणकुटादयः, खग्गूडा अवश्याः । अयमत्र भावार्थः । योऽसौ पूर्वपरीक्षितः स देशदर्शनं कार्यते, तेन च देशदर्शनं कुर्वता यदि से स्थविराः प्रव्राजिता ये च जुङ्गिका ये च खग्गूडा वा ते आचार्यस्य समर्प्यन्ते । तरुणा नव्याङ्गा विनीताश्चात्मनस्तदा सोऽनर्ह इति, एकलाभी नाम यः प्रधानः शिष्यः तमेकं यो न ददाति । अवशेषांस्तु सर्वानपि प्रव्राजितान् गुरुणां प्रयच्छति । अथवा येषामेक एव लाभो यथा यदि भक्तं लभन्ते ततो वस्त्रादीनि न, । अथ वस्त्रादीनि लभन्ते तर्हि न भक्तमपि, एकमेव लभन्ते इत्येवं शीला एकलाभिनस्तथाचाह-अथवा ये एकं द्रव्यं तान् शिष्यान् गुरुणां यः प्रयच्छति, उभयलब्धिकानात्मनः सम्बन्धयति सोऽप्यनर्हः ।

[भा.१४५७] उक्खेवेणं दो तिन्नि वावि उवनेति सेसमप्पणो गेण्हे ।
आयरियाणित्तरियं वंधइ दिसमप्पणोव कहिं ।।

वृ- इयं किल सामाचारी यावन्तः किल देशदर्शनं कुर्वता प्रव्रजिताः तावन्तः सर्वे गुरुणां समर्पणीयाः, । यस्तु प्रव्राजितान् द्विधा कृत्वा उत्क्षेपेण हस्तोसाटनेन द्वौत्रीन् वा शिष्यान् गुरुणामुपनयति, शेषान् सर्वानप्यात्मना गृह्णाति । एषोत्क्षेपकोऽनर्हः तथा ये केचन देशदर्शनं कुर्वता प्रवाज्यन्ते ते सर्वेऽप्यात्मन इत्वरिका बन्धनीयाः यथा आचार्य समीपं गता यूयं सर्वेऽप्याचार्यस्य यत्पुनराचार्याणां दिशमित्वरिकां बन्धाति । आत्मनस्तु यावत्कथिकं यथा यावत् यूयमाचार्यसमीपे तिष्ठत तावदाचार्यसक्ताः शेषकालं ममेत्येवमित्वरिकान् कतिशिष्यान् सोऽप्यनर्हः ।।

[भा.१४५८] पंथंमि य कालगया पडिभग्गा यावि तुज्झ जे सीसा ।
एए सव्वे अनरिहा तप्पडिवक्खा भवे अरिहा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यो देशदर्शनं कृत्वा समागतः सन् ब्रूते युष्माभिर्दत्ताः साधवः परिवारतया ते सर्वे युष्माकं शिष्याः पथि कालगताः प्रतिभग्ना वा, इमे पुनः सर्वे मम शिष्या एते स्थविरादयोऽनर्हास्तेषां पुनरनर्हाणामाचार्य-समीपगतानां ये तैः प्रव्राजिताः शिष्यास्तानाचार्य इच्छापयति वा न वा गुरुणामत्रेच्छा प्रमाणं ।।

[भा.१४५९] एसा गीते मेरा इमाउ अपरिग्गहाउ अगीयाणं ।
गीयत्थपमादी णव अपरिग्गह संजतीणं च ।।

वृ- एषा अनन्तरोदिता मर्यादा योग्यस्य गीतार्थता आचार्यस्तस्मिन् गीते गीतार्थे द्रष्टव्या, इयं पुनरपरिग्रहाणामगीतानां तथा गीतार्थप्रमादिनामपरिग्रहसंयतीनां च; इयमत्र भावना-येषामाचार्योऽप्यगीतार्थस्ते अपरिग्रहा यद्यपि नाम तेषामाचार्यपरिग्राहकस्तथापि सोऽगीतार्थ इति तत्वतः सूत्रनीत्या ते अपरिग्रहा एव, तेषां मध्यात्कोऽप्येकोऽन्यं संविग्नं गच्छमुपसम्पन्नं एष एकः अन्यो अवषन्ना गीतार्थानां गच्छस्तेषां मध्यादेकः कश्चिदन्यं संविग्नं गच्छमाश्रितवान् एष द्वितीयः । तथा अन्याः काश्चन संयत्यस्तासामाचार्यो नास्ति, कालकरालपिशाचेन कवलितत्वात् केवलं ताभिरेकः क्षुल्लकः परिव्राजित आसीत् । (सो?) कोऽन्यं संविग्नं गच्छमुपसम्पन्नः एते त्रयोऽपि पूर्वगता कालिकगते वा श्रुते सूत्रार्थतदुभयैः परिपूर्णा जातास्तेषामागतानां यावदा भवति, तावद्वक्तव्यमिति । एतदेवाह—

[भा.१४६०] गीयत्थमगीयत्थे, अज्झाणं खुड्डए य अन्नेसिं ।
आयरियाण सगासे, अमुयत्तेणं तु निम्माया ।।

वृ- गीतार्थो योऽवसन्नगीतार्थः गच्छाद्विनिर्गतोऽगीतार्थो योऽपरिग्रहगीतार्थगच्छान्निर्गतः आर्यिकाभिः प्रव्राजितः आर्यिकाणां क्षुल्लक एते त्रयोऽप्यन्येषामाचार्याणां सकाशे अमायित्वेन कदाचनापि आचार्यसमीपममुञ्चतो निर्माताः । सूत्रार्थतदुभयज्ञा जाताः । एतदेव स्पष्टतरमाह—

[भा.१४६१] सीस पडिच्छो होउं, पुव्वगए कालिए य निम्मातो ।
तस्सागयस्स स गणं किं आभव्वं इमं सुणसु ।।

वृ- गीतार्थोऽगीतार्थ आर्यिका क्षुल्लको चान्येषामाचार्याणां समीपे प्रतीच्छक रुपकः शिष्यो भूत्वा पूर्वगते कालिके वा श्रुते निर्मातस्तस्य स्वगणस्य गतस्य किमाभाव्यं सूरिराह-इदं च वक्ष्यमाणं शृणु तदेवाह—

[भा.१४६२] सीसो सीसो सीसो, चउत्थंपि पुरिसंतरं लहइ ।
हेट्ठावि लभति तिणी, पुरिसजुगं सत्तहा होइ ।।

वृ- शिष्यः स्वदीक्षितः तस्यापि शिष्यो यः पौत्रकल्पस्तस्यापि शिष्यः प्रपौत्रकल्प रुपं एवं सन्तानत्रयात्मकं चतुर्थमपि पुरुषान्तरः पुरुषयुगं लभते, । चतुर्थग्रहणादन्येऽपि त्रयः सूचितास्तानेवाह-हेट्ठावि लहइ तिणी इत्यधस्तात्त्रीणि पुरुषयुगानि लभते । अपि शब्दादुपर्यपि त्रीणि । इयमत्र भावना-आत्मीयमाचार्यं वर्जयित्वा यस्तस्य परिवारस्तं सर्वं लभते इदमेकं पुरुषयुगं ? पितामहं वर्जयित्वा पितामह परिवारं सर्वं लभते इति द्वितीयं पुरुषयुगं प्रपितामहपरिवारं सर्वं लभते इति तृतीयपुरुषयुगं ३ । एतानि त्रीण्युपरितनानि । साम्प्रतमधस्तनानि त्रीणि भाव्यन्ते । गुरुभ्रातृप्रव्राजितं समस्तं परिवारं लभते इत्येवं पुरुषयुगं, भ्रातृव्य प्रव्राजितमपि सर्वं लभते परिवारमिति द्वितीयं पुरुषयुगं, भ्रातृप्रव्राजितैरपि प्रव्राजितान् समस्तान् लभते इति तृतीयं पुरुषयुगं । तदेवमधस्तनानि त्रीणि पुरुषयुगानि त्रीण्युपरितनानीति मिलितानि षट् जातानि । तथा आत्मना ये प्रव्राजिताः पुत्रस्थानीया ये च तैः प्रव्राजिताः पौत्रस्थानीया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये च तैरपि प्रव्राजिता प्रपौत्रकल्पाः । एष सर्वोऽपि समुदाय एकं पुरुषयुगं । इदं च षट्सु मेलितमपिति पुरुषयुगं सप्तधा भवति । तथा चाह-पुरिसजुगं सत्तहा होइ । तदेव स्पष्टयति–

[भा.१४६३] मूलायरिए वज्जितु उवरि सगणो उ हेठिमे तिन्नि ।
अप्पा य सत्ततमो खलु पुरिसजुगं सत्तहा होइ ।।

वृ- मूलाचार्यान् पितृपितामहलक्षणान् वर्जयित्वाऽन्य उपरितनः समस्तोऽपि स्वगणस्तस्या भवति । एतेन त्रीणि पुरुषयुगान्युपात्तानि । अधस्तनान्यपि च प्रागुक्तस्वरुपाणि त्रीणि पुरुषयुगानि लभते । आत्मा च आत्मीयश्च पुत्रपौत्रप्रपौत्रलक्षणः परिवारः सप्तम इति पुरुषयुगं सप्तधा भवति । भावना प्रागेवोक्ता । अत्रैव प्रकारान्तरमाह–

[भा.१४६४] अहवा न लभति उवरिं हेट्ठिच्चिय लब्भइतिनि तिनेव ।
तिणत लाभतिन्नियदासक्खरनायं ।।

वृ- अथवेति आभवनस्य प्रकारान्तरसूचने यान्युपरि त्रीणि पुरुषयुगानि प्रागुक्तानि, तानि नैव लभते गरीयस्तया एकगुरुदीक्षितत्वेन समानतया च तेषां सदायत्तत्वायोगात् । हेठिच्चियलब्भइतिणित्ति यानि पूर्वं त्रीणि पुरुषयुगान्यधस्तनानि प्रदर्शितानि तेषां ग्रहणार्थं प्रथमं त्रीणीत्युक्त्वा तिन्नेवत्ति तेषां पूर्वभणितानामधस्तनानां त्रयाणां पुरुषयुगानामन्यान्यप्यधस्तनानि यानि त्रीणि पुरुषयुगानि परलाभत्रयः पुत्रपौत्रलक्षणा आत्मलाभ इदमेकं पुरुषयुगं सर्वमीलने सप्तपुरुषयुगानि तस्या भाव्यानि तेषां चाभवने ज्ञातमुदाहरणं-दासेन मे खरो कीतो दासो वि मे खरो वि मे ।।

मू. (६७) *भिक्खू य इच्छेज्जा गणं धारेत्तए नो कप्पइ से थेरा अणापुच्छित्ता गणं धारित्तए, थेराय से वितरेज्जा एवं कप्पइ गणं धारेत्तए, थेराय सो न वियरेज्जा एवं से नो कप्पइ गणं धारित्तए, जनं थेरेहिं अविइणं गणं धारेज्जा से संतराछेओ वा परिहारो वा ।।*

वृ- अथास्य सूत्रस्य कः सम्बन्धस्तत आह-

[भा.१४६५] दुहतोवि पलिच्छन्ने अप्पडिसेहोत्ति अतिप्पसंगा ।
धारेव्व अनापुच्छा गणमेसो सुत्तसंबंधो ।।

वृ- द्विधातोऽपि द्रव्यतो भावतश्च परिच्छन्ने परिच्छदोपेत आचार्यत्वमपि च द्विधातः परिच्छन्ने गणधारणस्य न प्रतिषेध इति कृत्वा किमनुज्ञया स्थविराणां कार्यमिति बुद्धा माति प्रसङ्गतः स्थविराणामनापृच्छया गणं धारयेदतस्तत्प्रतिषेधार्थमिदंसूत्रमारभ्यते । एषोऽधिकृतसूत्रस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-भिक्षुरिच्छेद्गणं धारयितुं तत्रसे तस्य न कल्पते स्थविरान् गच्छगतान् पुरुषान् अनापृच्छय गणं धारयितुं; कल्पते से तस्य स्थविरान् आपृच्छय गणं धारयितुं, स्थविराश्च से तस्य वितरेयुरनुजानीयुर्गणधारणं पूर्वोक्तैः कारणैरर्हत्वात् तत एवं सति से तस्य कल्पते गणं धारयितुं, स्थविराश्च से तस्य न वितरेयुर्गणधारणानर्हत्वादेवं सति न कल्पते गणं धारयितुं, यः पुनः स्थविरैरवितीर्णमननुज्ञातगणं धारयेत् ततः से तस्य कृतादन्तरादपन्यायात् प्रायश्चित्तं च्छेदो वा परिहारो वा वाशब्दादन्यद्वा तपः । एष सूत्राक्षरार्थः । भावार्थं भाष्यकृदाह–

[भा.१४६६] काउं देसदरिसणं, आगतउवठियम्मि उवरया ।
थेरा असिवादि कारमेहिं, व न ठाविते साहस्ससती ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१४६७] सो कालगतम्मि उ गतो, विदेसं व तत्थ व अपुच्छा ।
थेरे धारेयमणं भावनिसिठं अनुग्घाया ।।

वृ- देशदर्शननिमित्तं गतेन ये प्रव्राजितास्तान् यद्यात्मनो यावत् कथिकान् शिष्यतया बद्धाति ततस्तस्य प्रायश्चित्तं चतुर्गुरुकं । तथा देशदर्शनं कृत्वा तस्मिन्नागते अप्रस्थापिते च तस्मिन्ना चार्यपदे स्थविरा यस्याचार्या उपरताः कालगता यदि वा स प्रत्यागतोऽप्यशिवादिभिः कारणैर्यदि वा साधकस्य असतित्ति अभावेनाचार्यपदे स्थापितेऽत्रान्तरे वाचार्यः तस्मिन् कालगते यदि वागतो विदेशं तत्रैव विदेशे गणं धारयिमुमिच्छित् । एतेषु सर्वेष्वपि कारणेषु समुत्पन्नेषु यदि स्थविरान् गच्छमहतो अपृष्ट्वा यद्यपि तस्याचार्येण भावतो गणो निसृष्टोऽनुज्ञातस्तथापि स्थविरा आपृच्छनीयास्तत आह- भावनिसृष्टमाप गणं धारयति तर्हि तस्य स्थविरानापृच्छाप्रत्ययं प्रायश्चित्तं अनुद्घाता गुरुकाश्चत्वारो मासा उपलक्षणमेतत् आज्ञानवस्थामिथ्यात्वविराधनारुपाश्च तस्य दोषाः ।

[भा.१४६८] सयमेव दिसाबंधं अननुन्नाते करे अनापुच्छा ।
थेरेहिंय पडिसिद्धो सुद्धालग्गा उवेहंता ।।

वृ- यो नाम स्वयमेव आत्मच्छंदसा को मम निजमाचार्यं मुक्त्वान्य आपृच्छनीयः समस्तीत्यध्यवसायतः पूर्वाचार्येणाननुज्ञात आचार्यपदे तस्य स्थापनात् स्थविरान् गच्छमहत्तररुपान् अनापृच्छ्य दिग्बन्धं करोति स्थविरैः प्रतिषेधनीयः । यथा न वर्तते आर्य! तव तीर्थकराणामाज्ञां लोपयितुं एवं प्रतिचोदितो यदि न प्रतिनिवर्तते तर्हि स्थविराः शुद्धाः स चतुर्गुरुके प्रायश्चित्ते लग्नः । अथ स्थविरा उपेक्षन्ते तर्हि ते उपेक्षाप्रत्ययं चतुर्गुरुके लग्ना यत एवमुपेक्षायामनापृच्छायां च तीर्थकराभिहितं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मात्स्थविरैरुपेक्षा न कर्तव्या । तेन च स्थविरा आपृच्छनीयाः ।।

[भा.१४६९] सगणे थेराणसती तिग थेरे वा वाति गंतु ।
बद्धातिसेवा सति इत्तरियं धारेइ न मेलितो जाव ।।

वृ- अथ स्वगच्छे स्थविरा न सन्ति तर्हि गणे स्वकीये गच्छे स्थविराणामसति अभावे ये त्रिककुलगणसंघरुपे स्थविरांस्तान् त्रिकं स्थविराणां त्रिकं वा समस्तं समस्तं कुलं वा सङ्घं वा गणं वा इत्यर्थः । उपतिष्ठेत् यथा यूयमनुजानीत मह्यं दिशमिति अथ अशिवादिभिः कारणैर्न पश्येत् कुलस्थविरादीनामसत्यभावे इत्वरिकां दिशं गणस्य धारयति यावत् कुलादिभिः सह गणेन मिलितो भवति ।।

[भा.१४७०] जेउ अहाकप्पेणं अनुनायंमि तत्थ साहम्मी ।
विहरंति तमद्धाए न तेसिं च्छेओ न परिहारो ।।

वृ- ये तु साधर्मिकाः स्वगच्छवर्तिनः परगच्छवर्तिनो वा यथाकल्पेन श्रुतोपदेशेन तेषां सूत्राद्यर्थं तत्रोपस्थापनात् विषये तदर्थाय सूत्राणामर्थाय आसेवना शिक्षायैवेत्यर्थः । अनुज्ञाते गणधारणा तत्र गच्छे विहरन्ति । ऋतुबद्धे काले मासकल्पेन वर्षासु वर्षाकल्पे तेषां तत्प्रत्ययो यदेषोऽनुज्ञातो गणं धारयतीति तन्निमित्तमित्यर्थः । प्रायश्चित्तं न च्छेदो न परिहार उपलक्षणमेतन्नान्यद्वा । तपः, श्रुतोपदेशेन तेषां सुत्राद्यर्थं तत्रोपस्थापनात्, विषय लोलता हि तस्या समीपमुपतिष्ठमानानां दोषा, न सूत्राद्यर्थमिति, ।।

मू. (६८) *तिवासपरियाए समणे निग्गंथे आयारकुसले संजमकुसले पवयणकुसले पन्नत्तिकुसले*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संगहकुसले उवग्गहकुसले अक्खयायारे अभिन्नायारे असबलायारे असंकिलिट्ठायारचित्ते बहुस्सुए बब्भागमे जहन्नेणं आयारपकप्पधरे कप्पइ उपज्झायत्ताए उद्दिसित्तए ।।

मू. (६९) *सच्चेवणंसे तिवासपरियाए समणे निग्गन्थे नो आयारकुसले जाव नो उवग्गहकुसले खयायारे भिन्नायारे सबलायारे संकिलिट्ठायारचित्ते अप्पसुए अप्पागमे नो कप्पइ उवज्झाय त्ताए उद्दिसित्तए ।*

मू. (७०) *पंचवासपरियाए समणे निग्गंथे (जहा ६८) जहन्नेणंदसकप्प ववहारधरे कप्पइ आयरिय उवज्झायत्ताए उद्दिसितए ।*

मू. (७१) *सच्चेवणंसे पंचवासपरियाए समणे निग्गंथे (जहा ६९) नो कप्पइ आयरिय उवज्झायत्ताए उद्दिसित्तए ।*

मू. (७२) *अट्ठवासपरियाए समणे निग्गंथे (जहा ६८) जहन्नेणं ठाणसमवायधरे कप्पइ आयरियत्ताए जाव गणावच्छे इत्यत्ताए उद्दिसित्तए ।*

मू. (७३) *सच्चेवणं से अट्ठवासपरियाए समणे निग्गंथे (जहा ६९) नो कप्पइ आयरियत्ता जाव गणावच्छे इयत्ताए उद्दिसित्तए ।।*

वृ- 'तिवासपरियाए समणे' इत्यादि सूत्रषट्कम् । अथास्य पूर्वसूत्रेण सह कः सम्बन्धस्तत आह-

[भा. १४७१] भावपलिच्छ्यस्स उ परिणामठाए हो इमं सुत्तं ।
सुयचरणे उपमानं सेसाउ हवंति जा लद्धी ।।

वृ- द्रव्यभावपरिच्छदोपेतः स्थविरैरनुज्ञातो गणं धारयति तद्विपरीतो न धारयतीति उक्तं । तत्रेदं सूत्रषट्कम् । भावपरिच्छेदस्य परिमाणर्थं परिमाणप्रतिपादनार्थं भवति वर्तते यथा चानेन सूत्रषट्केन श्रुतेन चरणे च प्रमाणमभिधीयते, । शेषाश्च या लब्धय आचार्याणामुपाध्यायादीनां योग्या याभिः समन्विताः आचार्यतया उपाध्यायादितया वा उद्दिश्यन्ते । ता अपि प्रतिपाद्यन्ते, । तत्र श्रुतपरिमाणं जहन्नेण आयारपकप्पधरे इत्यादिना चारित्रपरिमाणं ति वासपरियाए इत्यादिना र्यायः । श्राम्यति, तपस्यतीति श्रमणः । स च शाक्यादिरपि भवति ततस्तद्वच्छेदार्थमाह निर्ग्रंथः निर्गतोर्ग्रन्थात् द्रव्यतः सुवर्णादिरुपात्, भावतोमिथ्यात्वादिलक्षणादिति निर्ग्रन्थः आचारकुशलः ज्ञानादिपञ्चविधाचारकुशलः । तत्र कुशल इति द्विधा-द्रव्यतो भावतश्च । तत्र यः कुशं दर्भं दात्रेण तथा लुनाति न क्वचिदपि दात्रेण विच्छिद्यते स द्रव्य कुशलः । यः पुनः पञ्चविधेनाचारेण दात्रकल्पेन कर्मकुशं लुनाति स भावकुशलः । तत्र एवमत्र, समासः आचारेण ज्ञानाद्याचारेण कर्मकुशलः कर्मच्छेदकः आचारकुशलः । आचारविषये सम्यक्परिज्ञानवान् इति तात्पर्यार्थः । अन्यथा तेन कर्मकुशच्छेदकत्वानुपत्तेः । एवं सर्वत्र भावनीयं, संयमं सप्तदशविधं यो जानात्याचरति च स संयमकुशलः । समासभावना सर्वत्र तथैव । अथवा यः कुशं लुनन् क्वचिद्दात्रेणाच्छिद्यते स लोके तत्वतः कुशलो न न्यु स्य स्तेन कुशलशब्दस्य प्रवृत्तिनिमित्तं दक्षत्वं । तच्च यत्रास्ति तंत्र कुशलशब्दोऽपि प्रवर्तते इति दक्षवाची कुशलः शब्दस्तत एवं समास आचारे ज्ञातव्ये प्रयोक्तव्ये प्रयोक्तव्ये वा कुशलो दक्ष आचारकुशलः एव संयमकुशलः प्रवचने ज्ञातव्ये कुशलः प्रवचनकुशलः प्रज्ञप्तिर्नाम स्वसमयपरसमयप्ररुपणा । तत्र कुशलः, संग्रहणं संग्रहः ।

स द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यत आहारोपध्यादीनां भावतः सूत्रार्थौ . तयोर्द्विविधेऽपि सङ्ग्रहे कुशलः । उप सामीप्येन ग्रहणमुपग्रहः । सोऽपि द्विधा - द्रव्यतो भावतश्च । तत्र येषामाचार्य उपाध्यायो वा न विद्यते तान् आत्मसमीपे समानीय तेषामित्परां दिशं बध्वा तावद्धारयति यावन्निष्पाद्यन्ते । एष

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यत उपसङ्ग्रहः । ग्रही उपादाने इति वचनात्, यः पुनरविशेषेण सर्वेषामुपकारे वर्तते स भावत उपग्रहः । अक्षताचारता परिपूर्णाचारता च चारित्रे सति भवति । चारित्रवता नियमतः शेषाश्चत्वारोऽप्याचाराः सेव्याश्चारित्रवतश्चारित्रं स्याद्दानतेति वचनात् । ततश्चारित्रवानित्युक्तं द्रष्टव्यम् । न त्वेषोऽप्यर्थ आचारकुशल इत्यनेनोपात्त इति किमर्थस्याप्यादानमुच्यते । चारित्रं खलु प्रधानं मोक्षाङ्गं तदपि कण्ठतो नोक्तमिति तदा शङ्काव्युदासार्थमित्यदोषः । तथा अशबलो यस्य सितासितवर्णोपेतबलीवर्द इव कर्बुर आचारो निवयाशिक्षा भाषा गोचरादिको यस्यासावशबलाचारः । तथा अभिन्नेन केनचिदप्यती-चारविशेषेण (अ) खण्डित आचारो ज्ञानाचारादिको यस्यासायभिन्नाचारः । तथा असंक्लिष्ट इह परलोकाशंसारुपसंक्केशविप्रमुक्त आचारो यस्य सोऽसंक्लिष्टाचारः । तथा बहुश्रुतं सूत्रं यस्यासौ बहुश्रुतः । तथा बहुरागमोऽर्थरुपो यस्य स बह्वागमः जघन्येनाचारप्रकल्पधरो निशीथाध्ययनसूत्रार्थधर इत्यर्थः । जघन्यत आचारप्रकल्पग्रहणादुत्कर्षतो द्वादशाङ्गविदिति द्रष्टव्यं, स कल्पते यो भवत्युपाध्याय-तयोद्देष्टुमिति प्रथमसूत्रार्थः सच्चेवणं से ति वासेत्यादि से शब्दोऽथशब्दार्थः । अथ स एव त्रिवर्षपर्यायः श्रमणो निर्ग्रन्थो नो आचारकुशल इत्यादि पूर्वव्याख्यानतः सुप्रतीतः । एवं द्वे सूत्रे पञ्चवर्षपर्यायस्था-चार्योपाध्यायत्वोद्देशविषये भावनीये । नवरं तत्र जघन्येन दशाकल्पव्यवहारध इति वक्तव्यम् (४) एवमेवाष्टवर्षपर्यायस्याप्याचार्योपाध्यायगणावच्छेदित्वोद्देशविषये द्वे सूत्रे व्याख्येये । केवलं तत्र जघन्येन स्थानसामाचार्या गण इति वाच्यं । शेषं तथैव ।। एष सूत्रषट्कस्य संक्षेपार्थः अधुना निर्युक्तिविस्तरः । तत्र तावत्सर्वेषामेव सूत्रपदानां सामान्येन व्याख्यां चिकीर्षुरिदमाह-भाष्यकृत्

[भा.१४७२] एक्कारसंग सुत्तत्थ, धारया नवमपुव्वकडजोगी ।
बहुसुय बहु आगमिया, सुत्तत्थ विसारया धीरा ।।

[भा.१४७३] एय गुणोववेया सुयनिधस नायगा महा(ज)नस्स ।
आयरिय उवज्झाय पवत्ति थेरा अनुन्नाया ।।

वृ- एकादशानामङ्गानां सूत्रार्थमवधारयन्तीत्येकादशाङ्गसूत्रार्थधारकाः । नवमपुव्वत्ति अत्रापि सूत्रधारका इति सम्बध्यते, नवमपूर्वग्रहणं च शेषपूर्वाणामुपलक्षणं । ततोऽयमर्थः । समस्त-पूर्वसूत्रधारकाः तथा सूत्रोपदेशेन मोक्षाविराधीकृतो न्यस्तो योगो मनोवाक्कायव्यापारात्मकः स कृतयोगः स येषामस्ति ते कृतयोगिनः बहुश्रुताः प्रकीर्णकानामपि सूत्रार्थधारणात् । इह पूर्वधरा अपि तुल्येपि च सूत्रे मतिवैचित्र्यतोऽर्थागममपेक्ष्य षट्स्थानपतितास्ततः प्रभूतावगमप्रतिपादनार्थमाह-बह्वागमाः बहुप्रभूतः आगमोऽवगमो येषां ते तथा एतदेवाह-सूत्रार्थविशारदाः तत्कालपेक्षया सूत्रेऽर्थे च विशारदाः तथाधिया औत्पत्तिक्यादिरुपया चतुर्विधया बुद्धया राजन्ते इति धीराः । एतद्गुण इत्यादि । ये अनन्तरगाथायामुक्ता गुणैरुपेता एतद्गुणोपेताः श्रुतं निघर्षयन्तीति श्रुतनिघर्षाः । किमुक्तं भवति ? यथा सुवर्णाकारस्तापनिघर्षच्छेदैः सुवर्णं परीक्षते किं सुन्दरमथवामङ्गलमिति । एवं स्वसमयपरसमयान् परीक्ष्यन्ते ते श्रुतनिघर्षा इति । यथा नायकाः स्वामिनो महाजनस्य स्वगच्छवर्तिनां साधूनामिति भावः । अथवा नायका ज्ञानादीनां प्रापकास्तदुपदेशनात्, महाजनस्य समस्तस्य सङ्घस्य इत्थंभूता आचार्या उपाध्यायाः प्रवर्तिनः स्थविरा उपलक्षणमेतत् । गणावच्छेदिनश्चानुज्ञाताः । तदेवं सामान्यतः सर्वसूत्रपदानामर्थो व्याख्यातः । सम्प्रत्येकैकस्य सूत्रपदस्यार्थो वक्तव्यस्तत्र येषां पदानां वक्तव्यस्तान्युपरिक्षपन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१४७४] आयारकुसलसंजमपवयणपणात्तिसंगहोवगहे ।
अक्खुया असबलभिन्न संकिलिट्ठायारसंपन्ने ।।

वृ- अत्र कुशलशद्धः पूर्वार्द्धे प्रत्येकं सम्बध्यते । ततोऽयमर्थः आचारकुशलशद्धस्य प्रवचन-कुशलशद्धस्य प्रज्ञप्तिकुशलशद्वेस्य सङ्ग्रहकुशलशद्धस्य उपग्रहशद्धकुशलस्य च । अक्खुए इत्यादि । अत्राचारशद्धसम्पन्नः प्रत्येकमभिसम्बन्धनीयः । अक्षताचारसम्पन्नस्य अक्षताचारस्येत्यर्थः, एवं शवलाचारसम्पन्नस्य अभिन्नाचार सम्पन्नस्य असंक्लिष्टाचारसम्पन्नस्य च व्याख्या कर्तव्या । तत्राचारकुशलशद्धस्य व्याख्यानार्थमाह-

[भा.१४७५] अब्भुट्ठाणे आसनकिंकर अब्भासकरणमविभत्ती ।
पडिरुवजोगजुंजण निजोगपूजा जहाकमसो ।।

[भा.१४७६] अफरुस अणवल अचवलमकुकुयमडंभगो म (अ)सीभरगा ।
सहितसमाही उवहि गुणनिहि आयारकुसलो ।।

वृ- आचारकुशलो नाम यो गुर्वादीनामागच्छतामभ्युत्थानं करोति, । आसनत्ति आसनप्रदानं च तेषामेव गुर्वादीनां विधत्ते, समागतानां पीठकाद्युपनयतीति भावः, तथा प्रातरेवागत्य आचार्यान् वदति संदिशत किं करोमीति स किङ्करः । तथा अब्भासकरणमिति य अभ्यासादभ्युपेतास्तेषामात्मसमी-पवर्तित्यकरणमभ्यासकरणं, अविभक्तिर्विभागाभावः शिष्यप्रतीच्छिकानां विशेषाकरणमिति भावः, । पडिरुवजोगजुंजणत्ति प्रतिरुपः खलु विनयः कायिकादिभेदतश्चतुर्धाऽधस्तात् पीठिकायाम-भिहितस्तदनुगता योगा मनोवाक्कायास्तेषां योजनं व्यापारणवश्यकरणं, अविभक्तविभागायोजनं, नियोगत्ति यो यत्र वस्त्राद्युत्पादने नियोक्तव्यः तस्य तत्र नियोगं करोति, । पूजा जहाकमसोत्ति गुर्वादीनां यथानुरुपं क्रमशो येन पूजा क्रियते । अपरुषमनिष्ठुरं मनः प्रह्लादकृदित्यर्थः । तद्भाषते, अणबलत्ति तत्र प्राकृतत्वात् यकारलोपः तेन अवलया इति द्रष्टव्यं । तस्याबावोऽवलया अकुटिलत्वम् इत्यर्थः । अचपलः स्थिरस्वभावः अकुक्कुचो हस्तपादमुखादिविरुपचेष्टारहितः । अदम्भको वञ्चनानुगतवचन-विरहितः सीभरोनामय उल्लपन्परं लालया सिञ्चति । तत्प्रतिषेधादसीभरः, प्राकृतत्वात् । स्वार्थिकप्रत्यय-विधानेन असीभरकः । एष सर्वोऽपि किल विनय इति वीर्याचारः प्रतिपादितो द्रष्टव्यः । सम्प्रति शेषाणां ज्ञानाद्याचाराणां प्ररुपणानिमित्तं पश्चार्धमाह-सहितो नाम सो यस्य ज्ञानादेरुचितः कालस्तेनोपेतः । किमुक्तं भवति ? काले स्वाध्यायं करोति । काले प्रतिलेखनादिकं काले च स्वोचितं तप इति सम्यक् आदितो यत् यस्योपधाने तत्करणे वा स्वाभिप्रायः समाहितः उपशमी ज्ञानादीनां हितः स्थित उत्पत्तिके ज्ञानाद्यधिकं निर्मलतरं आत्मनो वांच्छन् सदैव गुरुषु बहुमानपर इति भावः । एवं ज्ञानाद्याचारसमन्वितो गुणनिधिर्भवति । तत आह-गुणनिधिर्गुणानामाकारः एष आचारकुशलः ।

साम्प्रतमेतदेव गाथाद्वयं विनेयजनानुग्रहाय भाष्यकृद्वयाख्यानयति—

[भा.१४७७] अब्भुठाणं गुरुमादियाण आसनदानं च होइ तस्सेव ।
गोसेवय आयरिए संदिसह किं करोमित्ति ।।

वृ- अत्र गोसे इति प्रातरेवेत्यर्थः ।

[भा.१४७८] अब्भासकरणधम्मम्भुयाण अविभत्ति सीसपाडिच्छे ।
पडिरुवजोगो जह पीढियाए जुंजण करेमि धुवं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अत्र प्रतिरुपयोगो यथा पीठिकायां प्राक् प्रतिरुप विनयाधिकारेऽभिहितस्तथा प्रतिपत्तव्यः। जुंजण इत्यस्य व्याख्यानं यद् ध्रुवमकालहीनं प्रतिरुपयोगात् करोति व्यापारयतीति भावः।

[भा.१४७९] पूयं जहानुरुवं गुरुमादीणं करेह कमसो उ।
ल्हादी जनन मफरुसं अणवलया होइ कुडिलत्तं ॥

वृ- अत्र ल्हादिजननमिति मनः प्रल्हत्ति (ल्हाद) जनकं।

[भा.१४८०] अचवलथिरस्स भावो अप्फंदणया य होइ अकुयत्तं।
उल्लावलाल्लससीभर सहितोकालेननाणादी ॥

वृ- अवस्पन्दनता भण्डोचितहस्तपादादिचेष्टाविकलता।

[भा.१४८१] सम्मं अहियभावो समाहितो समीवम्मि।
नाणादीणं तुट्ठितो गुणनिहिज्ञो आगरो गुणाणं ॥

वृ- गाथापञ्चकमपि गतार्थं। उपसंहारमाह-

[भा.१४८२] आयारकुसलो एसो संजमकुसलं अतो वोच्छामि।
पुढवादि संजमं मी सत्तर से जो भवे कुसलो ॥

वृ- एषोऽनन्तरमुक्तः आचारकुशलः अत ऊर्ध्वं संजमकुशलं वक्ष्यामि। प्रतिज्ञातमेव निर्वाहयति। पृथिव्यादिसंयमे-

[भा.१४८३] पुढवि दगअगणिमारुय वणस्स वितिचउ पणिंदि अज्ञीवो।
पेहुप्पेह पमज्ञण परिठवणमणोवईकाए ॥

इत्येवंरुपे सप्तदशे सप्तदशप्रकारे यो भवति कुशलः संयमं प्रकारान्तरेण संयमकुशलमाह-

[भा.१४८४] अहवा गहणे निसिरण एसणा सज्ञा निसेज्ञ उवही य।
आहारेवि य सतिमं पसत्थजोगे य जुंजणया ॥

[भा.१४८५] इंदियकसायनिग्गह पिहियासवजोगज्झाणमल्लीणो।
संजयकुसलगुणनिहि तिविहकरणभावस विसुद्धो ॥

वृ- अथवेति संयमस्यैव प्रकारान्तरोपदर्शने ग्रहणे आदाने निसिरणे एषणायां गवेषणादिभेदभिन्नायां शय्यानिषद्योपध्याहारविषयानां च निषद्यायां सम्यगुपयुक्तसंयमकुशलः। किमुक्तं भवति? य उपकरणभारमाददानो निक्षिपिन्वा प्रतिलेख्य प्रमार्ज्य च गृह्णाति निक्षिपति वा एतेन प्रेक्षासंयमः प्रमार्जनासंयमश्चोक्तः,। एतद्ग्रहणात्तज्ज्तीयाः शेषा अप्युपेक्षादि संयमा गृहीता द्रष्टव्याः। तथा यः शय्यामुपधिमाहारं च उद्गमोत्पादनैषणाशुद्धं गृह्णाति। संयोजनादिदोषरहितं च भुङ्क्ते स्थानाद्यपि कुर्वाणः प्रत्युपेक्ष्य प्रमार्ज्य च करोति स संयमकुशलः,। अत्र निषद्याग्रहणेन स्थानादि गृहीतं, तथा य एतेषु सर्वेष्वपि संयमेषु योजना व्यापारणं, किमुक्तं भवत्य प्रशस्तानां मनोवाक्काययोगानामपवर्जनं, प्रशस्तानां मनोवाक्काययोगानामभियोजनं संयमकुशलः। तथा इन्द्रियाणि श्रोत्रादीनि कषायाश्च क्रोधादीन् यो निगृह्णाति। तथा श्रोत्रादीनि न स्वविषये व्यापारयति श्रोत्रादिविषयप्राप्तेषु शुभाशुभेषु शद्वादिष्वर्थेषु रागद्वेषौ न विधत्ते। क्रोधादीनप्युदयितुः प्रवृत्तान् निरुणद्धि। उदयप्राप्तांश्च विफलीकरोति। तथाश्रवाणि प्राणातिपातादिलक्षणानि पिदधाति,। योगं च मनोवाक्कायलक्षणमप्रशस्तं ध्यानं चार्तरौद्रं तत्परिहारेण प्रशस्तधर्म शुक्लं च आलीन आश्रितो निगूहितबलवीर्यतया तत्र प्रवृत्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः । एष संयमकुशलः, कथंभूतः सन्नित्याह-गुणनिधिः संयमानुगता ये गुणास्तेषां निधिरिव तैः परिपूर्ण इति भावः गुणनिधिः ।, तथा त्रिविधेन प्रकारेण मनोवाक्कायलक्षणेन सुविशुद्धो मनसाप्यसंयमानभिलाषान् भावेन च परिणामेन विशुद्ध इह लोकाद्याशंसादिप्रमुक्तत्वात् त्रिकरणभावविशुद्धः । अस्यैव गाथाद्वयस्य व्याख्यानार्थमाह—

[भा.१४८६] गिण्हइ पडिलेहेउं, पमज्जियं तह य निसिरएयावि ।
उवउत्तो एसणाए सेज्जनिसज्जोवहाहारे ।।

[भा.१४८७] एएसुं सव्वेसुं जो न पहुसए उ सो सत्तिमं ।
जुंजइ पसत्थमेव उ मणभासाकायजोगं तु ।।

[भा.१४८८] सोइंदियाइयाणं निग्गहणं चेव तह कसायाणं ।
पाणातियाइयाणं संवरणं आसवाणं च ।।

[भा.१४८९] झाणे अपसत्थ एय पसत्थज्झाणे य जोगमल्लीणो ।
संजमकुसलो एसो, विसुद्धो तिविहकरणेण ।।

वृ- गाथाचतुष्टयमपि गतार्थम् । नवरं उवउत्तो एसणाए इत्यादि उपयुक्त एषणायां किं विषयाया-मित्याह-शय्यानिषद्योपध्याहारे शय्या उपाश्रयः निषद्या पीठफलकादिरुपा, स्थानादिरुपनिषद्या व्याख्यानं तु प्रागेवोक्तं । उपधिः पात्रनिर्योगादिराहारोऽशनादिरुपः । एषां समाहारो द्वन्द्वस्तस्मिन् तद्विषयायामित्यर्थः । ज्झाणे अपसत्थेत्यादिध्यानं द्विधा-अप्रशस्तं प्रशस्तं च, । अप्रशस्तमार्त्तं रौद्रं च, । प्रशस्तं धर्मं शुक्लं च । तत्र प्रशस्ते ध्याने धर्मशुक्ले रुपे च शब्दो भिन्नक्रमः प्रशस्तं योगमालीनः सुविशुद्धो तिविहकरणेणंति उपलक्षणमेतत् । भावेनापि सविशुद्धः शेषं सुगमं उक्तः संयमकुशलः । प्रवचनकुशलमाह—

[भा.१४९०] सुत्तत्थहेउकारण वागरणसमिद्धचित्तसुयधारी ।
पोराण दुद्धरधरं सुयरयणनिहाणभिव पुणो ।।

[भा.१४९१] धारियगुणियसमीहिय निज्जवणा विउलवायणसमिद्धो ।
पवयणकुसलनिही पवयणहियनिग्गहसमत्थो ।।

वृ- सूत्रार्थात्मकत्वात्यदिवा सूत्र युक्तोऽर्थोऽस्मिन्नतिसूत्रार्थः, । नत्वक्षराधानारुढार्थमिति भावः । हेतुरन्वयव्यतिरेकात्मककारणमुपपत्तिमात्रं हेतुकारणे व्याक्रियते प्रतिपाद्यते अनेनेति हेतुकारणव्याकरणं, समृद्धं अनेकातिशयात्मकत्वात् चित्रमाश्चर्यभूतं अनन्तगमपर्यायात्मकत्वात् । एवं रुपं श्रुतं धारयतीत्येवं शीलः सूत्रार्थहेतुकारणव्याकरणसमृद्धचित्रश्रुतधारी, तथा पोराणमिव पोराणं याद्दशमतीताद्धायामासीत् ताद्दशमिदानीमप्यतिबहुलत्वेनेति भावः, दुर्द्धरं नयभङ्गाकुलतया प्राकृतजनैर्धारयितुमशक्यं धरतेऽर्थान् प्रवचनमिति पौराणदुर्द्धरः । तथा श्रुतरत्नस्य निदानमिव पूर्णः प्रतिपूर्णोऽर्थनिर्णयप्रदानादिना, तथा धारितं सम्यग् धारणाविषयीकृतं न विनष्टमिति भावः, । गुणितं च बहुशः परावर्तितं तथा सम्यक् ईहितं पूर्वापरसम्बन्धेन पूर्वापराव्याहतत्वेनेत्यर्थः, । मीमांसितं समीहितं एतानि प्रवचन विशेषणानि इत्थंभूतेन प्रवचनेन तथा तस्यैव प्रवचनस्य निर्यापणा मीमांसिततया निर्दोषत्वेन निश्चयतया निर्दोषत्वेन निश्चयनं तया विपुलविशोधनार्थं बहूनामाचार्याणां सकाशे ग्रहणात् वाचना विपुलावाचना तया च समृद्धो धारितगुणितसमीहितनिर्यापणाविपुलवाचनासमृद्धः । तथा प्रवचनपरिज्ञानुगतानां गुणानां निधिरिव

गुणनिधिः । किमुक्तं भवति ? । प्रवचनमधीत्यात्मनो हितं चरत्यन्येषां च हितमुपदिशतीति तथा प्रवचनस्याहिता अवर्णभाषिणस्तन्निग्रहे समर्थः प्रवचनाहितनिग्रहसमर्थः पाठान्तरं-पवयणहियनिग्गम समत्थो प्रवचनाय हितः स्वशक्त्यनिगूहनेन प्रभावक इत्यर्थः । निर्गमि आत्मनः परस्य च संसारान्निस्तारणे समर्थः । अत्रैव कतिपयपदव्याख्यानार्थमाह–

[भा.१४९२] नयभंगाउलयाए दुद्धर इव सद्दोत्ति उवमे ।
धारियमविघणट्ठं गुणियं परियत्तियं बहुसो ।।

[भा.१४९३] पुव्वावरबंधेणं समीहियं वाइयं तु निज्झवियं ।
बहुविय वायणकुसलो पवयणअहियए निगिणहो ।।

वृ- गाथाद्वयमपि गतार्थं । नवरंवाचितमापेक्षपरिहारपूर्वकतया सम्यक् गुरुपादान्तिके निर्णीतार्थीकृतं निर्यापितं विपुलवाचनासमृद्ध इत्यस्या व्याख्यानं बहुविधया वाचनया कुसलो दक्षो बहुविधवाचना-कुशलः, उक्तः प्रवचनकुशलः । सम्प्रति प्रज्ञप्तिकुशलमाह–

[भा.१४९४] लोगेवेएसमए तिवग्गसुत्तत्थ गहियपेयालो ।
धम्मत्थ काममीसग कहासु कहवित्थरसमत्थो ।।

[भा.१४९५] जीवाजीवं बंधं मोक्खं गतिरागति सुहं दुक्खं ।
पन्नत्तीकुसलविऊ परिवादकुदंसणे महणो ।।

वृ- लोके वेदे समये वात्मीये प्रवचने यानि शास्त्राणि तेषु सूत्रार्थयो र्गृहीतं पेयालं परिमाणं येन स सूत्रार्थगृहीतपेयालः सम्यग् विनिश्चितसूत्रार्थ इति तात्पर्यार्थः । तथा धर्मकथासु अर्थकथासु कामकथासु मिश्रकथासु च द्वित्रिसंयोगतो धर्मार्थकामकथासु कथयितव्यासु, कहवित्थरत्ति विस्तरेण कथने समर्थः धर्मार्थकाममिश्रकथासु विस्तरकथाकथनसमर्थः, तथा जीवमजीवं बंधमोक्षं गतिमागति सुखं दुःखमधिगत्य प्रज्ञप्तौ कुशलः । कुत इत्याह-यतो विदू विद्वान् । एतदुक्तं भवति-यतो लोकवेदसमया-चाराणां सम्यग्वेत्ता ततो जीवानां नारकादिभेदभिन्नानामजीवानां धर्मास्तिकायादीनां बन्धस्य मिथ्यात्वाविरतप्रमादकषाययोगप्रत्ययकस्य मोक्षस्य सकलकर्मांशापगमरूपस्य ज्ञानदर्शनचारित्र-हेतुकस्य तथा येन येन कर्मणा कृतेन नरकतिर्यग्देवभवेषूत्पत्तिर्भवति । तद्रूपयोगतो येन च कर्मणा कृतेन मनुष्यभवे समुत्पत्तिस्तद्रूपाया आगतेस्तथा सुखं यथा प्राणिनामुपजायते तथा भूतस्य, यथा दुःखं तथा दुःखस्य प्ररुपणायां कुशलः तथा परवादिनो यत्कुदर्शनं तस्मिन् मथनः किमुक्तं भवति । परवादिनः प्रथमं भाषन्ते यथा युष्माभिः कुदर्शनमग्राहिततस्ते न सहमाना विप्रतिपद्यन्ते तांश्च विप्रतिपद्यमानान् युक्तिभिस्तथा मथ्नाति यथा स्वदर्शनपरित्यागं कुर्वन्तीति । एष इत्थंभूतः प्रज्ञप्तिकुशलः ।

साम्प्रत-मत्रैवदृष्टान्तमाह-

[भा.१४९६] पनत्ती कुसलो खलु जए खुड्डगणी मुरुंडरायस्स ।।
पुठो कहं नवि देवा, गयंपि कालं न याणंति ।।

[भा.१४९७] तो उठितो गणधरो, । रायाविय उठितो ससंभंतो ।
अह खीरासवलद्धी कहति सो खुड्डगणीतो ।।

[भा.१४९८] जाहे य पहरमेत्तं कहियं न य मुणइ कालमह राया ।
तो बेति खुड्डगगणी रायाए एव जाणाहि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१४९९] जह उठिएण वि तु मे नविनाओ एत्तिओ इमो कालो ।
इय गीयवादियविमोहिया उ देवा न याणंति ।।

[भा.१५००] अब्भुवगयं च रणा कहणाए एरिसो भवे कुसलो ।
ससमयपरूवणाए महेति सो कुसमए चेव ।।

वृ- प्रज्ञप्तिकुशलो यथा कुश (ल)क्षुल्लकगणी क्षुल्लकाचार्यो मुरुएडराजस्य तथा चान्यदा तेना राज्ञा पृष्टः क्षुल्लकगणी कथं तु देवा गतमपि कालं न जानन्ति, । तत एवं पृष्टः सन् स गणधरः सहसा आसनादुत्थितः, । तमुत्थितं दृष्ट्वा राजापि ससंभ्रान्तः समुत्थितः ततो थानंतरं स क्षुल्लकगणी क्षीरमिवाश्रति कथयन् यस्या लब्धेः साक्षीराश्रवा सा लब्धिर्यस्यासौ क्षीराश्रवलब्धिः स इत्थंभूतः स्वसमयानुगतं किमपि कथयति । जाहे ये इत्यादि यथा च प्रहरमात्र कालं यावत्कथिकमथ च तावन्तं कालं राजा गतमपि न जानाति ततो राजानं ब्रूते क्षुल्लकगणी, एवमनेन प्रकारेण वक्ष्यमाणमपि जानीहि । तदेवाह- जह उठिएण वेत्यादि । यथा उत्थितेनापि त्वया न विज्ञातोऽयमेतावान् कालो गतः । कथारसप्रवृत्तनेति एवमनेन प्रकारेण गीतवादित्रविमोहिता देवाः प्रभूतमपि गतं कालं न जानन्ति, एतच्च राज्ञा तथैवाभ्युपगतं जाता महती प्रतिपत्तिरीदृशः खलु कथनायाः प्रज्ञप्तेः कुशलः । स च तथाभूतः स्वसमयप्ररूपणानियमतः कुसमनाय् मथ्नात्येव उक्तः प्रज्ञप्तिकुशलः ।।

सम्प्रति संग्रहकुशलो व्याख्येयस्ततः सङ्ग्रहप्ररूपणार्थमाह—

[भा.१५०१] दव्वे भावे संगहो दव्वेऊ उक्ख हारमादीउ ।
साहिज्जादीभावे परूवणा तस्सिमा होइ ।।

वृ- संग्रहो द्विधा-द्रव्ये भावे च । तत्र द्रव्ये उक्षादिक आहारादिकश्च । उक्षा बलीवर्दः । भावे भावविषयः साहाय्यादिकस्य भावसंग्रहस्य । इयं वक्ष्यमाणा भवति प्ररूपणा तामेवाह—

[भा.१५०२] साहिज्जवयणवायण अनुभासणदेसकालसंवरण ।
अनुकंपनमनुसासण पूयणामब्भंतरं करणं ।।

[भा.१५०३] संभुंजण संभोगे भत्तोवहि अन्नमन्नसंवासो ।
संगहकुसलगुणानिही अनुकरणकारावणनिसग्गो ।।

वृ- साहिज्ज सहायकृत्यकरणं वचनमाभाषितस्य इच्छाकारभणनं, अथवा अभिग्रहस्य ग्रहीतमौनव्रतस्य वचनविषयेन केनाप्याभाषणं कृते तस्योत्तरभणनं वचनं, । वायणत्ति वाचनया क्लान्ते गुरौ साधूनां ददाति वाचनं, । अनुभाषणं नाम आचार्येण भाषिते पश्चाद्भाषणं न पुनः प्रधानीभूयाचार्या-भाषणाद्ग्रे एव भाषते । देशकालसंस्मरणंनाम अस्मिन् देशे अस्मिन् काले च कर्त्तव्यमिदं ग्लानादानीमिति विज्ञाय यद्देशे काले स्मारयत्याचार्याणां ग्लानादीनां अनुकम्पनं दुःखार्तस्यानुकम्पाकरणं बालवृद्धासहान् यथादेशकालमनुकम्पते इति भावः, । अनुशासनं भज्यमाने वा दृष्टे वा किमुक्तं भवति । सामाचारीतः प्रतिभज्यमानान् कथंचित् रुष्टान् वा यदनुशास्ति तदनुशासनं, । यदि वा यो यथोक्तकार्येऽपि सन् कथंचिन्न कुरुते तत्कस्यचिच्छिक्षणमेतत्तदकृत्यमिति खग्गूडान्वानुशास्ति एतदनुशासनं, पूजनं नाम यथाक्रमं गुर्वादीनामाहारादिसम्पादनविनयकरणं, यदि वा ज्ञानाचारादिषु पञ्चस्वाचारादिषु यथायोगमुद्यच्छतामुपबृंहणं । अभ्यन्तरकरणं नाम द्वयोः साध्वोर्गच्छमेढीभूतयोरभ्यन्तरे कुलादि-कार्यनिमित्तं परस्परमुल्लपतो स्तृतीयस्योपशुश्रूषो बहिःकरणं । अथवा यदिष्टः सन्नभ्यन्तरे गत्वा तत् गच्छादिप्रयोजनं ब्रूते एतदभ्यन्तरकरणं । यदि वा तेन सह ये बाह्यभावं मन्यन्ते तानपि तथानुवर्तयति यथा तं तेजस्विनमभिमन्यन्ते एतदभ्यन्तरकरणं । संभोजनं नाम यत्सांभोगिकैः सह भोजनसंयोगो भक्ते वहतीति । यदि भक्तमुपधिं वा संभोगयति किमुक्तं भवति ? यद्यस्य कारकं भक्तमुपधिर्वा यत्स्वमुत्पाद्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मै ददाति ततो गृह्णाति वा । तथा अन्नमन्नं संवासे इति सांभोगिकैः परस्परमेकत्र वसनं एतानि कुर्वाणः संग्रहशुकलः । पुनः कथंभूत इत्याह-संग्राहानुगता ये गुणां तेषां निधिरिव गुणनिधिस्तथा अनुकरणं नाम यत्सीवनलेपादि कुर्वन्तं दृष्ट्वा ब्रूते-इच्छाकारेण तवेदमहं करिष्यामि कुरुते च, कारापणं वा न यत्स्वयं करणे अकुशलानन्यानपीच्छाकारेण कारापयति तस्मिन् निसर्गः स्वभावो यस्य सोऽनुकरणकारापण निसर्गः इत्थंभूतस्तस्य स्वभावो यदि अनभ्यर्थित एव करोति कारयति चेति भावः ।

सम्प्रति कतिपयपदव्याख्यानार्थमाह—

[भा.१५०४] वयणे तु अभिग्गहियस्य केणती तस्स उत्तरं कुणति ।
जा जयणाह किण्हं ते उ गुरम्मी वयणं देइ ।।

वृ- वचने वचनविषये अभिग्गहिकस्य गृहीताभिग्रहप्रतिपत्तमौनव्रतस्येत्यर्थः । केनापि पश्ने कृते सति तस्योत्तरं यद्भणत्येष वचनसंग्रहकुशलः । पश्चार्धं सुगमम् ।

[भा.१५०५] साहूणं अनुभासइ आयरिएणं तु भासिए संते ।
सारेयायरियाणं देसे काले गिलाणादी ।।

वृ- अत्र साधूनामिति पदं पश्चात् गाथायां सम्बध्यते । शेषं प्रागेव व्याख्यानार्थमाह-

[भा.१५०६] दुक्खत्ते अनुकंपा अनुसासन भज्जमाणरक्खो वा ।
जो वा जहुत्तकारी अनुसासण किच्चमेयं ।।

वृ- इयमपि व्याख्यानार्था ।

[भा.१५०७] पूयणमहागुरुणं अब्भंतरदोण्हमुल्लवेंताणं ।
तइयं कुणती वहिया वेई गुरूणं च तं इट्ठो ।।

वृ- पूजनं यथाक्रमं गुरुणामन्यतरकरणं यदभ्यंतरे द्वयोरुल्लपतोस्तृतीपमुपशुश्रूषं बहिः करोति । यदि वा तद्रच्छादिप्रयोजनं पृष्टः सन्नभ्यन्तरं गत्वा गुरुणां ब्रूते कथयति-

[भा.१५०८] संभुज्जण संभोगेण भुज्जए जस्स कारणं भत्तं ।
तं घेत्तुमप्पणासे देइ एमेव उवहिं पि ।।

वृ- संभोजनं नाम यत्संभोगेन योजयति सांभोगिकैः सहैकत्र भुङ्क्ते इति, तथा यद्यस्य कारकमुपकारकं भक्त तदात्मना गृहीत्वा तस्मै ददाति, । एवमेवोपधिमपि उपधिरपियो यस्योपकारकस्तं स्वयमुत्पाद्य तस्मै ददाति । एतेन संभोगे भत्तौवहीति व्याख्यातं परस्परमेकत्र संवासः सुप्रतीतत्वान्न व्याख्यातः ।

[भा.१५०९] अनुकरणं सिव्वणलेवणादी अनुभासणा उ दुम्मेहो ।
एरिसो तस्स निसणा, जं भणियं एरिस सहावो ।।

वृ- अनुकरणं नाम सीवनलेपनादि स्वयं किञ्चित्कुर्वन्तं दृष्ट्वा इच्छाकारेणानुज्ञाप्य करोति । तथा दुर्मेधसि स्वयं सीवनलेपनादिकर्तुमनुजानाति स्वयं तावत् करोत्येव । किन्त्वन्यानपि भाषते । यथा कुरुतैतस्य महानुभागस्येत्येतत्करणं ईदृशस्तस्यानुकरणे कारापणे च निसर्गः निसर्गः स्वभावः जं भणियंति किमुक्त भवतीत्यर्थः । ईदृशः स्वभावः उक्तः संग्रहकुशलः । उपग्रहकुशलमाह—

[भा.१५१०] वालासहुउढेसु संततवकिलंत वेयणातंके ।
सेज्जनिसेज्जो वहिपाणमसणभेसज्जु वग्गहिए ।।

[भा.१५११] दान दवावण कारावणे य तहा कयमनुनाए ।
उवहितमणुवहित विही जाणाति उवग्गहं एयं ।।

वृ- बालासहवृद्धेषु तथा प्रभूतमार्गगमनतः पवनो (ठतो) वा श्रान्तेषु तपःक्लान्तेषु तथा वेदनायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामान्यतः शरीरपीडायां जातायामातंके च सद्योजाते सति रोगे समुत्पन्ने शय्यावसतिर्निषद्यापीठ-फलकादिरुपाः उपधिकल्पादिः पानं द्रवं अशनमोदनादिभेषजमौषधमौपग्रहिकं दण्डप्रोञ्छनाद्युपकरणं। एतेषां समाहारो द्वन्द्वस्तस्मिन् सप्तमी षष्ट्यर्थे । ततोऽयमर्थः- एतेषां स्वयं दाने अन्यैर्दापने तथा वैयावृत्यादेः कारापणे करणे च तथा कयमणुन्नाए इति परैः कृतस्यानुज्ञायां यत्प्रवर्त्तनं तथा उपहितविधिर्य-श्चानुपहितविधिस्तत्रोपहितविधिर्नाम यत् आचार्यैर्वितीर्णं तदाचार्यमनुज्ञाप्यान्येषां साधूनां तदन्तरेण विस्तरयतां ददाति । अनुपहितविधिर्यदनुत्पन्नमुत्पाद्य ददाति । अन्ये तु व्याचक्षते-यद्यस्य गुरुभिर्दत्तं तत्तस्योपनयतीत्येव उपहितविधिः यत्पुनस्तस्य गुरुभिर्दत्तं तत्सोऽन्यस्य गुरुन् अनुज्ञाप्य ददाति । एषोऽनुपहितविधिः एवं सर्वमुपग्रहं जानाति एतदेव लेशतो व्याख्यानयति—

[भा.१५१२] बालादीनं तेसिं सेज्जनिसेज्जो वहिप्पयाणेहिं ।
भत्तन्नपान भेसज्ज मादीहिं उवग्गहं कुणइ ।।

[भा.१५१३] देइसयं दावेइ य करे य कारावए य अनुजाणे ।
उवहियजं जस्स गुरुहिं दिन्नं तं तस्स उवनेतिं ।।

[भा.१५१४] अनुवहियं जं तस्स उ दिन्नं तं देइ सो उ अन्नस्स ।
खमसमणेहिं दिन्नं तुब्भंति उवग्गहो एसो ।।

वृ- एतेषामनन्तरगाथाभिहितानां बालादीनां बालासमर्थवृद्धमार्गगमनादिश्रान्ततपः क्लान्तवेदनार्त्तजातातङ्कानां शय्या-निषद्योपधिप्रदानैस्तथा भक्त मोदकाशोकवर्त्यादि अन्नमोदनादि पानभैषजे प्रागुक्तस्वरुपे आदिशब्दादौपग्रहिकोपकरणादिपरिग्रह एतैरुपग्रहमुपष्टम्भं करोति कथमित्याह-स्वयं शय्यादिकं ददाति अन्यैर्वा दापयति तथा स्वयं वैयावृत्त्यादि करोति अन्यैः कारयति । कुर्वन्तं वा अन्यमनुजानीते । उवहियत्ति पदैकदेशे पदसमुदायोपचारादुपहितविधिरिति द्रष्टव्यं यद्यस्य गुरुभिर्दत्तं तत्तस्योपनयतीत्येष उपहितविधिर्यत्पुनस्तस्य दत्तं सोऽन्यस्मै गुरुन् अनुज्ञाप्य ददाति क्षमाश्रमणैः-तुभ्यमिदं दत्तमित्येषोऽनुपहितविधिः । एष सर्वोऽप्युपग्रहः । उक्त उपग्रहकुशलः ।

साम्प्रतमक्षता-चारादिपदानां सामान्येन व्याख्यानमाह—

[भा.१५१५] आहाकम्मुद्देसिय ठविय रइयकीयकारियच्छेज्जं ।
उब्भिणाहडमाले वणीमगा जीवणनिकाए ।।

[भा.१५१६] परिहरति असनपानं सेज्जोवहि पूति संकियं मीसं ।
अक्खुयमसबलमभिन्नमसंकिलिठमावासए जुतो ।।

वृ- आधाकर्मिकं यन्मूलत एव साधूनां कृते कृतं, औद्देशिक मुद्दिष्टादिभेदभिन्नं, स्थापितं यत्संयतार्थं स्वस्थाने परस्थाने वा स्थापितं, रचितं नाम संयतनिमित्तं कांस्यपात्रादौ मध्ये भक्तं निवेश्य पार्श्वेषु व्यञ्जनानि बहुविधानि स्थाप्यन्ते; । तथा क्रीतेन कारितमुत्पादितं क्रीतकारितं आच्छेद्यं यत् भृतकादिलभ्यमाच्छिद्य दीयते उद्भिन्नं यत्कुतपादिमुखं स्थगितमप्युद्भिद्य ददाति । आहृतं स्वग्रामाद्याहृतादि । मालत्ति मालापहृतं, वनीपकीभूय पिण्ड उत्पाद्यते स पिण्डोऽपि वनीपकः । आजीवनं यदाहारशय्यादिकं जात्याद्याजीवनेनोत्पादितं, । निकाएत्ति मम एतावद्दातव्यमिति निकाचितं । एतानि योऽशनपानानि शय्योपधींश्च परिहरति तथा पूतिशङ्कितं मिश्रमुपलक्षणमेतत् । अध्यवपूरकादिकं च यश्चावश्यकेयुक्तः सोऽक्षताचारः अभिन्नाचारः असंक्लिष्टाचारः । तत्र स्थापितादिपरिहारी अक्षताचारः अभ्याहृतादिपरिहारी अशबलाचारः । जात्योपजीवनादि परिहरन् अभिन्नाचारः । दोषपरिहारी असंक्लिष्टः । सम्प्रति लाघवाय द्वितीयसूत्रगतानि क्षताचारादीनि पदानि व्याख्यानयति-

[भा.१५१७] ओसन्नखुपायारो वलायारो य होइ पासत्थो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिन्नायारकुसीलो संसत्तो संकिलिट्ठो उ ।।

वृ- अवसन्न आवश्यकादिष्वनुद्यमः क्षताचारस्तथा पार्श्वस्थोऽन्योद्गमादिभोजी सबलाचारः, कुशीलो जात्याजीवनादिपरो भिन्नाचारः, संसक्तः संसर्गवशात् स्थापितादिभोजी, संक्लिष्टः संक्लिष्टाचारः । सम्प्रत्याचारः प्रकल्पधर इति पदं व्याख्यानयति-

[भा.१५१८] तिविहो य पकप्पधरो, सुत्ते अत्थे य तदुभए चेव ।
सुत्तधर वज्जियाणं तिगदुगपरिकड्डणा गच्छे ।।

वृ- त्रिविधः खलु प्रकल्पधरस्तथा सूत्रे सूत्रतः अर्थतः तदुभयतश्च । इयमत्र भावना-आचारप्रकल्पधारिणां चत्वारो भङ्गास्तद्यथा- सूत्रधरोऽर्थधरः, नोसूत्रधरोऽर्थधरः, सूत्रधरोप्यर्थ-धरोऽपि । नो सूत्रधरोनाप्यर्थधरः ४ । अत्र चतुर्थो भङ्गः शून्य उभयविकलतया आचारप्रकल्प-धारित्वविशेषणासंभवात् । आद्यानां तु त्रयाणां भङ्गानां मध्ये तृतीयो भङ्गवर्ती स उपाध्याय उद्दिश्यते । यतः स उभयधारितया गच्छस्य सम्यक् परिवर्धको भवति, । तदभावे द्वितीयभङ्गवर्त्यपि तस्याप्यर्थ-धारितया सम्यक् परिवर्धकत्वान्नात्वाद्यवर्ती तथा चाह-सूत्रधरवर्जितानामाचारप्रकल्पिकानां गच्छे गच्छस्य परिवर्धना त्रिके तृती यभङ्गे च ततस्त एवोपाध्यायाः स्थाप्या न प्रथमभङ्गवर्तिनः । एवं दशाकल्पव्यवहारधरादिपदानामपि व्याख्या कर्तव्या । अत्र पर आह–

[भा.१५१९] पुव्वं वणेऊणं दीनं परियाय संघयणसद्दं ।
दसपुव्वीए धीरे मज्जारपडियपरुवणया ।।

वृ- ननु पूर्वमाचार्यपदयोग्यस्य दीर्घः पर्यायो वर्णितः, संहननं चाति विशिष्टं श्रद्धा च प्रवचनविषयाऽत्युत्तमा आगमतश्चार्चायपदेयोग्या जघन्यतोऽपि दशपूर्विकास्तथा धीरा बुद्धिचतुष्टयेन विराजमानाः ततः एवं पूर्वं वर्णयित्वा यदेवमिदानीं प्ररुपयथ, यथा त्रिवर्षपर्याय आचारप्रकल्पधर उपाध्यायः स्थाप्यते । पञ्चवर्षपर्यायोदशाकल्पव्यवहारधर इत्यादि सैषा प्ररुपणा मार्जारदिनकल्पा । यथा हि मार्जारः पूर्वं महताशब्देनारटति पश्चादेवं शनैः शनैरारटति । यथा स्वयमपि श्रोतुं न शक्नोत्येवं त्वमपि पूर्वमुच्चैः शब्दितवान् पश्चाच्छनैरिति; सूरिराह-सत्यमेतत् । केवलंयत्पूर्वोक्तं तद्यथोक्तं न्यायमङ्गीकृत्य, सम्प्रति पुनः कालानुरुपं प्रज्ञाप्यतेइत्यदोषस्तथा चात्र पुष्करिण्यादयो दृष्टान्तास्तानेवाह-

[भा.१५२०] पुक्खरिणी आयारे, आणायणातेनगा यगीयत्थे ।
आयारंमि उ एए, आहरणा होंति नायव्वा ।।

वृ- पुष्करिणी वापी आचारे आचारप्रकल्पस्य आनयनं स्तेनकाश्चौरा गीतार्था एतानि चत्वार्याहरणानि दृष्टान्ता भवन्त्याचार्ये ज्ञातव्यानि इमानि च-

[भा.१५२१] सत्थपरिणाच्छक्काय अहिगम पिंडउत्तरज्झाए ।
रुक्खे य वसभगावो गोहा सोही य पुक्खरिणी ।।

वृ- शस्त्रपरिज्ञा षट्कायाधिगमः, षट्जीवनिका इदमेकमुदाहरणं १ पिंड २ उत्तराध्ययन उत्तराध्ययनानि ३ वृक्षाः कल्पद्रुमादयः ४ वृषभाः बलीवर्दाः ५ गावः ६ गोधाः ७ शोधिः ८ । अत्रैव दृष्टान्तः पुष्करिणी च ९ । एवं सर्वसंख्यया त्रयोदश आहरणानि । एतानि व्याचिख्यासुः प्रथमतः पुष्करिण्याहरणं भावयति-

[भा.१५२२] पुक्खरिणीतो पुव्वं जारिसया तुण्हा तारिसया इण्हिं ।
तहवियता पुक्खरिणीतो हवंति कज्जाइं कीरंति ।।

वृ- पूर्वं सुखमसुखमाकाले यादृश्यः पुष्करिण्यो जम्बूद्वीपप्रज्ञप्तौ वण्यन्ते । इदानीं न तादृश्यः तथापि च ता अपि पुष्करिण्यो भवन्ति कार्याणि च ताभिः क्रियन्ते । आचारप्रकल्पानयनाहरणमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५२३] आयारपकप्पो ऊ नवमे पुव्वंमि आसि सोधी य ।
तत्तो च्चिय नि ज्जूढोइहाहि तो किं न सुद्धि भवे ।।

वृ- आचारप्रकल्पः पूर्वं नवमे पूर्वं आसीत् शोधिश्च ततोऽभवत् । इदानीं पुनरिहाचाराङ्गे तत एव नवमात्पूर्वान्निर्यूह्यानीतः ततः किमेष आचारप्रकल्पो न भवति किं वा ततः शोधिर्नोपजायेत । एषोऽप्याचारकल्पः शोधिश्चास्मादवशिष्टा भवतीति भावः । अधुना स्तेनकदृष्टान्तबावनार्थमाह-

[भा.१५२४] तालुग्धाडिणिउसोवणादि विज्जाहि तेनगा आसि ।
इण्हिं ते उ न संती तहवि किं तेनगा न खलु ।।

वृ- पूर्वंस्तेनकाश्चौरा विजयप्रभवादयस्तालोद्घाटिन्यवस्वापिन्यादिभिरुपेता आसीरन् । ताश्च विद्या इदानीं न सन्ति । तथापि किं खलु स्तेनका न भवन्ति भवन्त्येव । तैरपि परद्रव्यापहरणादिति भावः । अधुना गीतार्थदृष्टान्तं भावयति ।

[भा.१५२५] पुव्वं चउदसपुव्वी इण्हं जहन्नोपकप्पधारी उ ।
मज्झिमग पकप्पधारी किं सो उ न होइ गीयत्थो ।।

वृ- पूर्वंगीतार्थश्चतुर्दशपूर्वी अभवत् । इदानीं स किंगीतार्थो जधन्यः प्रकल्पधारी न भवति भवत्येवेति भावः । शस्त्रपरिज्ञादृष्टान्तमाह—

[भा.१५२६] पुव्व सत्थपरिणा अधीयपढियाइ होउ उवट्ठवणा ।
इण्हिं चछजीवणया किं सा उ न होउ उवट्ठवणा ।।

वृ- पूर्वं शस्त्रपरिज्ञायामाचाराङ्गान्तर्गतायामर्थतो ज्ञातायां पठितायां सूत्रत उपस्थापना अभूदिदानीं पुनः सा उपस्थापना किं षट्जीवनिकायां दशवैकालिकान्तर्गतायामधीतायां पठितायां च न भवति भवत्येवेत्यर्थः । पिण्डदृष्टान्तभावनार्थमाह-

[भा.१५२७] बितितंमि बंभचेरे पंचमउद्देस आमगंधम्मि ।
सुत्तंमि पिंडकप्पी इह पुन पिंडेसणाएओ ।।

वृ- पूर्वमाचाराङ्गन्तर्गति लोकविजनम्नि द्वितीयेऽध्ययने यो ब्रह्मचर्याख्यः पञ्च उद्देशकस्तस्मिन् यदामगन्धिसूत्रं सव्वामगंधं परिच्चयं इति तस्मिन् सूत्रतोऽर्थतश्चाधीते पिण्डकल्पी आसीत्, । इह इदानीं पुनर्दशवैकालिकान्तर्गतायां पिण्डैषणायामपि सूत्रतोऽर्थतश्चाधीतायां पिण्डकल्पिकः क्रियते सोऽपि च भवति तादृश इति, उत्तराध्ययने दृष्टान्तं भावयति ।

[भा.१५२८] आयारस्स उ उवरिं उत्तरज्झयणाउ आसि पुव्वं तु ।
दसवेयालिय उवरिं इयाणिं किं ते न होंति उ ।।

वृ- पूर्वमुत्तराध्ययनानि आचारस्याप्याचारङ्गस्यो पर्यासरिन् इदानीं दशवैकालिकस्योपरि पठितव्यानि । किं तानि तथारुपाणि न भवन्ति भवन्त्येवेति भावः वृक्षदृष्टान्तभावनामाह-

[भा.१५२९] मत्तंगादीतरुवर न संति इण्हिं न होंति किं रुक्खा ।
महजूहाहिव दप्पिय पुव्विं वसभाण पुन इण्हं ।।

वृ- पूर्वं सुखमसुखमादिकालेमत्तङ्गादयोदशविधास्तरुवराः कल्पद्रुमा आसीरन् । इदानीं तेन सन्ति । किन्त्वन्ये चूतादयस्ततः । किं ते वृक्षा न भवन्ति तेऽपि वृक्षा भवन्तीति इदानीं ते तथाभूता न संति- किन्तु पञ्चदशादिगोसंख्यातास्ततः किंते यूथा न भवन्ति किंतु भवन्त्येवेतिभावः । अधुना गोदृष्टान्तमाह-

[भा.१५३०] पुव्विं कोडीबद्धा जूहाओ नंदगोवमाइणं ।
इण्हं न संति ताइं किं जूहाइं न होंतिउ ।।

वृ- पूर्वं नन्दगोपादीनां गवां यूथाः कोडीबद्धाः कोटीसंख्याका आसीरन् । इदानीं ते तथाभूता न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्ति किन्तु पञ्चदशादि गोसंख्याकास्तत्किं ते युथा न भवन्ति किन्तु भवन्त्येवेति ।

अधुना योधदृष्टान्तभावनामाह—

[भा.१५३१] साहस्सी मल्ला खलु मह पाणा पुव्व आसि जोहाओ ।
ते तुल्ल नत्थि एण्हिं किं ते जोहा न होंतीतु ।।

वृ- पूर्वं योधा महाप्राणाः सहस्रमल्ला आसीरन् । इदानीं तेषां तुल्या न सन्ति किन्त्वभागहीनाः ततः किं ते योधा न भवन्ति भवन्त्येव कालौचित्येन तेषामपि योधकार्यकरणादिति भावः एवं शोधिदृष्टांतमाह-

[भा.१५३२] पुव्विं छम्मासेहिं परिहारेणं च आसिसोधीतु ।
सुद्धवतवेण निव्वितियादि एहिं विसोधीतु ।।

वृ- पूर्वं षड्भिर्मासैः परिहारेण वा परिहारतपसा वा शोधिरासीत् । इदानीं निर्विकृतिकादिभिरपि च शोधिः पञ्चकल्याणकदशकल्याणकादिमात्रप्रायश्चित्तदानव्यवहारात् शोधिविषय एव पुष्करिणीदृष्टान्तमाह-

[भा.१५३३] किं च पुन एव सोही जह पुव्विल्लासु पच्छिमासुं च ।
पुक्खरिणीसुं वत्थाइयाणि सुज्झंति तुह सोही ।।

वृ- किं केन प्रकारेण पुनरत्राधुना एवं निर्विकृतिकादिमात्रेण शोधिर्भवति । सूरिराह यथा पूर्वासु कालभाविनीषु पुष्करिणीष्वतिप्रभूतजलपूर्णासु वस्त्राणि शुद्धयन्ति स्म एव पश्चिमास्वप्यधुनातन कालभाविनीषु शुद्ध्यन्ति तथा शोधिरपि पूर्वमिवेदानीमपि भवतीति ।

एवं दृष्टान्तानभिधाय दार्ष्टान्तिकयोजनामाह—

[भा.१५३४] आयरियादीचोद्दस पुव्वादि आसि पुव्विं तु ।
एवं जुगाणुरुवा आयरिया हुंति नायव्वा ।।

वृ- एवमनन्तरोदितदृष्टान्तकदम्बकप्रकारेण यद्यपि पूर्वमाचार्यादयश्चतुर्दश पूर्वधरादय आसीरन् तथापीदानीमाचार्या उपलक्षणमेतत् उपाध्यायादयश्च युगानुरुपा दशाकल्पव्यवहारधरादयस्तपो नियमस्वाध्यायादिषूद्युक्ता द्रव्यक्षेत्रकालभावोचितयतनापरायणा भवन्ति ज्ञातव्याः । सम्प्रति यावत्पर्यायस्य यावन्ति स्थानानि सूत्रेणानुज्ञातानि तस्य तावन्त्यसंमोहार्थमुपदिदर्शयिषुराह-

[भा.१५३५] ति वरिसे एगं ठाणं दोन्नि य ठाणाउ पंचवरिसस्स ।
सव्वाणि विकिट्ठो पुन वोढुं वा इति ठाणाइं ।।

वृ- त्रिवर्षे त्रिवर्षपर्यायस्य एकमेवोपाध्यायलक्षणं स्थानमनुज्ञातं, न द्वितीयमाचार्यत्वलक्षणमपि तस्याल्पपर्यायतया प्रभूतखेदसहिष्णुत्वाभावेनाचार्यपदे योग्यताया अभावात् पञ्चवर्षस्य पञ्चवर्षपर्यायस्य द्वे स्थानेऽनुज्ञाते तद्यथा-उपाध्यायत्वमाचार्यत्वं च बहुवर्षतरवर्षपर्यायतया खेदसहतरत्वात् विकृष्टोऽष्टवर्षपर्यायः । पुनः सर्वाण्यपि स्थानानि वोढुं शक्नोति बहुतमवर्षपर्यायत्वात् ततस्तस्य सूत्रेणोपाध्यायत्वमाचार्यत्वं गणित्वं प्रवर्तित्वं स्थविरत्वं गणावच्छेदित्वं चानुज्ञातं । अथ कथं सर्वाणि यथोक्तानि स्थानानि शक्नोति । तत आह-

[भा.१५३६] नोइंदिइंदियाण य कालेण जयाणि तस्स दीहेण ।
कायव्वेसु बहुसुय अप्पा खलु भावति तेनं ।।

वृ- तस्य अष्टवर्षपर्यायस्य दीर्घेणाष्टवर्षप्रमाणेन इन्द्रियनोइन्द्रियाणि जितानि भवन्ति । कर्तव्येषु च बहुष्वात्मा खलु तेन भावितो भवति । ततो योग्यत्वात् सर्वाण्यपि स्थानानि तस्यानुज्ञातानि ।

मू. (७४) निरुद्धपरियाए समणे निग्गन्थे कप्पइ तद्दिवसं कप्पइ आयरियउवज्झायत्ताए उद्दिसित्तए से किमाहु भंते अत्थिणं थेराणं तहारुवाणि कुलाणि कडाणि पत्तियाणि थेज्जाणि वेसासियाणि संमयाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्मुइकराणि अनुमयाणि बहुमयाणि भवंति, तेहिं पत्तिएहिं थेज्जेहिं तेहिं वेसासिएहिं तेहिं संमएहिं तेहि संमुइकरेहिं निरुद्धपरियाए समणे निग्गन्थे कप्पइ आयरियउवज्झायत्ताएउद्दिसित्तए तद्दिवसं सूत्रं ।।

वृ- अथास्य सूत्रस्य कः संबंध उच्यते ।।

[भा.१५३७] उस्सग्गस्स ववादो होति विवक्खो उ तेणिमं सुत्तं ।
नियमेन विगिठो पुन तस्सासी पुव्वपरियातो ।।

वृ- इहोत्सर्गस्य विपक्षप्रतिपक्षो भवत्यपवादस्तेन कारणेन तिवरिसपरियाए समणे निग्गंथे इत्यादिरुपस्योत्सर्गस्येदमपवादभूतं सूत्रमुच्यते, । अनेन सम्बन्धेनायातस्यास्यव्याख्या, निरुद्धो विनाशितः पर्यायो यस्य स निरुद्धपर्यायः श्रमणो निर्ग्रन्थः कल्पते युज्यते तद्दिवसं यस्मिन् दिवसे प्रव्रज्यार्थं प्रतिपन्नावान् तस्मिन्नेव दिवसे पूर्वपर्यायः पुनस्तस्य प्रभूततर आसीत् । तथा चाह-नियमेनेत्यादि नियमेन पुनस्तस्य पूर्वपर्यायो विकृष्टो विंशतिवर्षाण्यासीत् ततस्तद्दिवसं कल्पते । आचार्योपाध्यायतया उद्देष्टुं । अत्र शिष्यः प्राह-से किमाहु भंते सि शब्दोऽथ शब्दार्थः । अथ किं कस्मात्कारणात् भदन्त परमकल्याणयोगिन् भगवन्त एवमाहुर्यथा तद्दिवसमेव कल्पते आचार्यउपाध्याययोरुद्देष्टुं न खलु प्रव्रजितमात्रस्याचार्यत्वादीनारोप्यमाणानि युक्तान्यगीतार्थत्वात् । अत्र सूरिराह-अत्थिणमित्यादि । अस्तीति निपातो निपातत्वाच्च बहुवचनेऽप्यविरुद्ध स्ततोऽयमर्थः । सन्ति विद्यन्ते नमिति वाक्यालङ्कारे स्थविराणामाचार्याणां तथारुपाणि आचार्यादिप्रायोग्यानि कुलानि तेन कृतानि गच्छप्रायोग्यतया निर्वर्तितानीत्यर्थः । येन यत्तथाकालं तेभ्य आचार्यादिप्रायोग्यं भक्तमुपधिश्चोपजायते । उपलक्षणमेतत् । तेन केवलं तथारुपाणि कुलानि कृतानि किन्त्वाचार्यबालवृद्धग्लानादयोऽपि अनेकधा संग्रहोपग्रहविषयीकृता इति द्रष्टव्यं । न केवलं कुलानि तथारुपमात्राणि कृतानि किन्तु पत्तियाणित्त प्रीतिकराणि वैनयिकानि कृतानि च्छेज्जाणित्ति च्छेद्यानि प्रीतिकरतया गच्छचिन्तायां प्रमाणभूतानि । अथवा स्थेयानीति किमुक्त भवति ? नैकं द्वौ वा वारौ प्रीतिकेराण कृतानि किन्त्वनेकश इति । वेसासियाणित्ति आत्मानं अन्येषां गच्छवासिनां मायारहितीकृततया विश्वासस्थानानि कृतानि । विश्वासे भवानि योग्यानि विश्वासकानीति व्युत्पत्तेः । अत एव सम्मतानि तेषु तेषु प्रयोजनेष्विष्टानि संमुदिकराणि अविषमत्वेन प्रयोजनकारीणि । सोऽपि च बहुशो विग्रहेषु समुत्पन्नेषु गणस्य संमुदितमाकार्षीत् । संमुदिकृतया इष्टेषु च प्रयोजनेषु आनुकूल्येन मतान्यनुमतानि, तथा बहूनां खग्गुडवर्जानां सर्वेषामित्यर्थः मतानि बहुमतानि भवंति, तिष्ठंति शभ्रं तस्य स्यादिदंरुपं, ततोयद्यस्मात्-तेषु कुलेषु तथारुपेषु कुलेषु प्रीतिकरेषु तेषु स्थेयेषु तेषु वैश्वासिकेषु तेषु संमुद्दिकरेष्वित्यपिभावनीयं, स श्रमणो निर्ग्रन्थो निरुद्धपर्यायोऽभवत्तेन कारणेन स कल्पते आचार्यतया उपाध्यायतया वा उद्देष्टुं तद्दिवसमिति एष सूत्रसंक्षेपार्थः । व्यासार्थं तु भाष्यकृद्विवक्षुः प्रथमतः से किमाहु भंते इत्यादि एतत् पदं व्याख्यानयति-

[भा.१५३८] चाएइ तिवासादि पुव्वं वन्नेउ दीहपरियागं ।
तद्दिवसमेव इण्हिं आयरियादीण किं देह ।।

वृ- चोदयति प्रश्नयति परो यथा पूर्वं त्रिवर्षादिकं दीर्घं पर्यायं वर्णयित्वा किमिदानीं तद्दिवसमेव आचार्यादीनि भावप्रधानोऽयं निर्देश आचार्यत्वादीनि दत्थ । अत्र सूरिराह-

[भा.१५३९] भणति तेहिं कयाइं वेणइयाणं तु उवहिभत्ताई ।
गुरुबालासहुमादी अनेगकारे उवग्गहिया ।।

वृ- भण्यते अत्रोत्तरं दीयते तैराचार्यादिपदयोग्यैर्वैनयिकानां विनयमर्हन्तीति वैनयिका आचार्यादयस्तेषां कृतानि उत्पादितानि उपधिभक्तानि । किमुक्तं भवति ? तथारुपाणि स्थविराणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तैर्वैनयिकानि कुलानि कृतानि येन तेभ्यो यथाकालमुपधिभक्त चोपजायते । इति एतेन अत्थिणं थेराणं तथारुपाणि कुलाणीति व्याख्यातम् । न केवलं तैस्तथारुपाणि कुलानि कृतानि किन्तु गुरुबालासहादय आदिशब्दात् वृद्धग्लानादिपरिग्रहः अनेकप्रकारैरुपगृहीताः सङ्ग्रहोपग्रहान्याभुपष्टम्भे नीताः पत्तियानीति सुप्रतीतत्वात्र व्याख्यातं, तच्चेत्यत्र द्वितीयं व्याख्यानमाह–

[भा.१५४०] ताइं पीतिकराइं असईपुव्वत्ति होंति थेज्जानि ।
वेसिय अणवेक्खाए जिम्हजढा ईति विस्संभो ।।

वृ- अथवेति प्रतीतप्रथमव्याख्यानापेक्षया व्याख्यानान्तरोपदर्शने स्थेयानीति किन्त्वसकृदिति तथा वैश्वासिकानीति कोऽर्थः अनपेक्षया स्वपरविशेषाकरणेन प्रभूततराणां सञ्चिता (संवतिना) ङ्गेनेत्यर्थः वैष्याणि विशेषतः एषणीयान्यभिलषनीयानि कृतानि यतस्तानि जिम्हजढानि जिम्हं मायारहितानि कृतानीति तेषु, विश्रम्भो विश्वासो विश्रंभस्थानत्वासाद्यव्यपेणीति संमुईकराणीति व्याख्यानार्थमाह-

[भा.१५४१] सव्वत्थ अविसमत्तेण कारगो होइ संमुदीनियमा ।
बहुसो य विग्गहेसुं अकासिगणसम्मुदिंसो उ ।।

वृ- सर्वत्र सर्वेषु प्रयोजनेषु यो नियमादविषमत्वेनाकुटिलतया कारको भवति संमदित्तिपदैकदेशे पदसमुदायोपचारात् सम्मुदिकरः तान्यपि कुलानि तेन तथारूपाणि कृतानि न केवलं तेन कुलानि संमुदिकराणि कृतानि किन्तु सोऽपि तु शब्दोऽपि शब्दार्थः बहुशो बहुभिः प्रकारैर्विग्रहेषु समुत्पन्नेषु तदुपशमनतो गणस्य गच्छस्य सम्मुदिमकार्षीत् । शेषाणि तु पदानि सुप्रतीतत्वान्न व्याख्यातानि ।

[भा.१५४२] थिरपरिच्चिय पुव्वसुतो सरीरथामावहारविजढो उ ।
पुव्विं विनीयकरणो करेइ सुत्तं सफलमेयं ।।

वृ- स्थिरो नाम अचपलः परिचितं पूर्वस्मिन् पर्याये श्रुतं यस्य स परिचितपूर्वश्रुतः यदि वा प्रत्यागतस्यापि स्वाभिधानमिव परिचितं पूर्वपठितं यस्य स तथा ततः पूर्वपदेन विशेषणसमासः । तथा शरीरस्य स्थामप्राणस्तस्यापहारोऽपलपनं तेन विजढो रहितः शरीरस्थानापहाररहितः । किमुक्तं भवति ? पूर्वं तेन शारीरं बलं वैयावृत्यवाचनादिषु परिहारापितमिति तथा पूर्वं पूर्वपर्याये विनीतानि विशेषतः संयमयोगेषु नीतानि करणानि मनोवाक्कायलक्षणानि येन स विनीतकरणः संयमयोगादिकं सर्वं तेन पूर्वमपरिहीनं कृतमिति भावः । य ईदृशः पूर्वमासीत् । स एतत्सूत्र सफलं करोति । ईदृशस्य तद्दिवसमाचार्यत्वमुपाध्यायत्वं वा उद्दिश्यते न शेष्य ततो न कश्चित्पूर्वापरविरोध इति भाव ।।

[भा.१५४३] किह पुन तस्स निरुद्धो परियातो होज्ज तद्दिवसतो उ ।
पच्छाकडसावेक्खो सणईहिं बलानीतो ।।

वृ- कथं केन प्रकारेण तस्य पूर्वः पर्यायो निरुद्धः कथं तावद्दैवसिकस्तद्दिवसभावीपर्यायोऽभवत् । अत्रोत्तरमाह-पच्छाकडेत्यादि स्वज्ञातिभिः स्वकीयैः स्वजनैः सापेक्षो गच्छसापेक्षः सन् बलानीतः सोऽभूदतः सर्वं सर्वपृष्टनमभूत् । एतदेव प्रपञ्चयन्नाह–

[भा.१५४४] पव्वज्जअप्पंचम कुमारगुरुमादि उवहिते नयनं ।
निज्जंतस्स निकायण पव्वइते ते तद्दिवसपुच्छा ।।

वृ- राजा कोप्यमात्यपुरोहितसेनापतिश्रेष्ठिसहितो राज्यमनुशास्ति । ए (ते) षामेकैकः पुत्रस्तत्र राजपुत्रो राज्ञा राजा भविष्यतीति संभावितः अमात्यपुत्रो अमात्येनामात्यत्वे पुरोहितेन पुरोहितत्वे सेनापतिपुत्रः सेनापतिना सेनापतित्वे श्रेष्टिपुत्रोऽपि श्रेष्टिना श्रेष्टित्वे । ते पञ्चापि सह क्रीडन्ति । अन्यदा कुमारो राजपुत्र आत्मपञ्चमो अमात्यपुरोहितसेनापतिश्रेष्टिपुत्रैः सहेत्यर्थः प्रव्रज्यामग्रहीत् । सर्वे च ते अतीव बहुश्रुता जाता ग्रहणशिक्षां आसेवनाशिक्षां चातिशिक्षितवन्तः । कुलानि च प्रीतिकरादिरूपाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतानि आचार्येण च ते गुर्वादयः संभावितास्तद्यथा-राजपुत्र आचार्यपदे, अमात्यपुत्र उपाध्यायत्वे, पुरोहितपुत्रः स्थविरत्वे, श्रेष्ठिपुत्रो गणवच्छेदित्वे संभावितः । राजादीनां चान्ये पुत्रा न विद्यन्ते ततस्ते सूरिसमीपमागत्य विज्ञपयन्ति । यथा नयाम एतान् स्वस्थानं पश्चादेतैरेव सह समागत्य वयं प्रव्रजिष्यामः । एवमुपधिना मातृस्थानेन विज्ञप्य तेषां ते नयनमुपकरणं कुर्वन्ति । तस्य च राजकुमारस्यात्मपञ्चमस्य नीयमानस्याचार्यो निकाचनं करोति । यथा सम्यक्त्वेन नियमतोऽप्रमत्तेन भाव्यं । अत्र शिष्यस्य पृच्छा भूयः प्रव्रजिते सति राजकुमारादौ किमिति तद्दिवसं यस्मिन् दिवसे प्रव्रज्या प्रतिपन्ना, तस्मिन्नेव दिने आचार्यादिपदस्थापनमत्रोत्तरं वक्तव्यमिति भावार्थः । इति उपधिना तेषां नयनमुक्तं ।

सम्प्रति प्रकारान्तरेणापहरणमाह—

[भा.१५४५] पियतो व तावसादी पव्वति उ मनाउते फुरावेंति ।
ठविता रायादीसु ठाणेसु ते जहा कमसो ।।

वृ- पितरो वा तेषां तापसादयः तापसादिरूपतया प्रव्रजितुमनसः तान् राजपुत्रादीन् फुरावितित्ति देशीपदमेतत् अपहारयन्ति इत्थं च नीताः सन्तस्ते स्वपितृभिर्यथाक्रमं राजादिषु स्थानेषु स्थापिताः ।

[भा.१५४६] नीयावि फासु भोजी, पोसहसलाए पोरिसिकरणं ।
धुवलोयं च करेंती लक्खणपाठे पुच्छंती ।।

[भा.१५४७] जो तत्थ अमूढलक्खारिउ काले तीए एक्कमेक्कंतु ।
उप्पाएऊण सुयं अविय ताहे पुनो एंती ।।

वृ- नीता अपि ते राजकुमारादयः प्रासुकभोजिनः पौषधशालायां प्रतिदिवसं सूत्रपौरुष्या अर्थपौरुष्याश्च करणं ध्रुवमवश्यं लोचं च ते कुर्वन्ति, ब्रह्मचर्यं च परिपालयन्ति । नवरं लक्षणपाठकान् दिने पृच्छन्ति कस्या महेलाया ऋतुकाले गब्भों लगतीति, । एवं पृष्ट्वा यासां महेलानां लक्षणपाठका भवन्ति यथैतादृशामृतुकाले नियमात् गब्भों लगीष्यतीति । ततो या ऋतुकाले अमूढलक्षा ऋतुकालस्य ज्ञात्री तस्यामात्मीयायामात्मीयायामेकैकं वारं गत्वा बीजं निक्षिपन्ति । एवं चात्मीयमात्मीयं पुत्रमुत्पाद्य यदा यो राज्यसमर्थो जायते तदा तदा तं स्वस्थाने स्थापयित्वा पुनरागच्छन्तीति ।

[भा.१५४८] अब्भुज्जयमेगयरं पडिवज्जिउकामथेरअसतिअन्ने ।
तद्दिवसमागतेसुं ठाणेसु ठवंति तस्सेव ।।

वृ- यस्मिन् दिवसे ते प्रत्यागतास्तस्मिन्नेव दिवसे स्थविरा आचार्या अभ्युद्यतमेकतरं विहारं जिनकल्पिकं यथालन्दकल्पविहारं वा प्रतिपत्तुकामाः स्थविरत्वात् अन्यश्च गणधारणे असमर्थस्तादृशो न विद्यते ततस्तद्दिवसमागतान् राजकुमारादीन् तेष्वाचार्यत्वादिषु स्थानेषु स्थापयन्ति ।

पुव्वयेतदिवसपुच्छे यदुक्तं तामेव पृच्छां भावयति—

[भा.१५४९] कहदिज्जइ तस्स गणो तद्दिवसं चेव पव्वइगस्स ।
भणइ तम्मं ठविए होंति सुबहूगुणाउ इमे ।।

वृ- कथं तस्य राजकुमारस्य प्रव्रजितस्य तद्दिवसमेव यस्मिन् दिने प्रव्रज्या प्रतिपन्नामतस्मिन्नेव दिने गणो दीयते । अत्र सूरिराह-भण्यते । तस्मिन् स्थापेन सुष्ठु अतिशयेन बहवो गुणा इमे वक्ष्यमाणा भवन्ति ।

तानेवाह-

[भा.१५५०] साहू विसीयमाणो अज्जा गेलणभिक्खउवगरणा ।
ववहारइच्छियाए वाएय अकिंचनकरे य ।।

[भा.१५५१] एते गुणा हवंति तज्जायाणं कुटुंबपरिवड्ढी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवहाणंपि य तेसिं अनुलोमुवसग्ग तुल्लं तु ।।

वृ- साधुर्विषीदन् तान् तथाभूतान् दृष्ट्वा स्थिरो भवति । आर्यिका अपि तेषु स्वचेतसि स्थिरा उपजायन्ते, । गिलणत्ति ग्लानत्वे साधूनामौषधं सुलभं भवति । वैद्योऽपि तेषां प्रभावतोऽनुकूलां क्रियां करोति, । यथा एते राजादिपुत्राः, तेषां चामी शिष्या इति । तथा भिक्षा उपकरणमपि साधूनामतिसुलभं । ववहारो इत्थिया एते स्त्रिया अपहृताया स्तेषां भयतो व्यवहारं लभते, । इयमत्र, भावना-काचित् रूपवती कुमारश्रमणी केनापि राज्ञा गृहीता स्यात् ततस्तेषां गतानां भयेन सा मुच्यते इति वादे च तद्गौरवात्साधवोऽपिरभूता भवन्ति । अकिंचनकरेयत्ति योपि कश्चित्साधूनां प्रत्यनीकः सोऽपि तेषां राजादिकुमारप्रव्रजितानां भयतो न किंचित् करोति । अथवा अकिंचनानां साधूनां यदि कथमपि केनाप्यर्थजाते प्रयोजनमुपजायते तर्हि तत् सर्वं लोकः प्रायोऽप्रार्थित एव करोति । तदेवमेते अनन्तरोदिता गुणास्तज्ज्ञातानां राजादिजातीनां यतोऽतस्ते निरुद्धपर्यायाः प्रत्यागताः प्रव्राजिताः तद्दिवस एवाचार्यादिपदेषु स्थाप्यन्ते, । अयं च गुणः कुटुम्बपरिवृद्धिर्गच्छपरिवृद्धिस्तथाहि यदि नामैते तथाभूतं राज्यादिकमपहाय धर्मं सनाचरन्ति । किं वयमपि तुच्छेषु भोगोपभोगेषु सजामः (इति) निष्क्रामन्ति ततो भवति गच्छस्य महती वृद्धिः । एतेषामवधावनमुत्प्रव्राजनं तदप्यनुलोमोपसर्गतुल्यं । किमुक्तं भवति ? यथा कस्यापि साधोः कश्चिदनुलोमान् उपसर्गान् प्रकृतवान् स चैवं चिन्तयति-यदि परमनेनोपायेनाहं मुच्ये, नान्यथा । तत एवं विचिन्त्याशठभावः परिसेवते स च तथाकृतपरिसेवनोऽप्यशठभाव इत्यखण्डचारित्र इति व्यवह्रियते । एवमेतेऽप्यखण्डचारित्रा एव तत्वतो मन्तव्याः ।

एतदेव लेशतो व्याख्यानयन्नाह--

[भा.१५५२] साहूणं अज्जाणय विसीयमाणाण होंति थिरकरणं ।
जइ एरिसावि धम्मं करेंति अम्हं किमंग पुन ।।

वृ- साधूनामार्यिकाणां च विषीदतां स्थिरकरणं भवति । तथाहि-केचित्साधवो भोगेषु विषीदन्तस्तान् दृष्ट्वा एवं चिन्तयन्ति-यदि तावदीदृशा अपि विपुलराज्यादिका अमी देवकुमारिका प्रख्याभिरपि निजमहेलाभिरुपसर्ग्यमाणा धर्मं कुर्वन्ते न पुनर्निजं ब्रह्मचर्यं भ्रंशितवन्तो अत्र एव ते तद्दिवस एवाचार्यपदेषु स्थापिताः किमङ्गपुनरस्माभिः सुतरां धर्मे समाचरणीयं विभवादिपरिभ्रष्टत्वादिति । आर्यिका अपि चिन्तयंति-यदि तावदीदृशाः खल्वस्माकं बान्धवाः सम्पन्नाः कथममंद्पुन्नएतेषया । सुखमपि निरीक्ष्यन्ते न सीदन्ति । खल्वेतादृशधीरपुरुषगृहीता आर्यिकाः केवलमपरिभूताः सदा वर्तन्ते ।

[भा.१५५३] किं च भयं गोरव्वं बहुमाणं चेव तत्थ कुव्वंति ।
गेलणोसहिमाई सुलभं उवकरण भत्तादी ।

वृ- किं च तत्र तेषु राजा कुमारादिष्वाचार्यादिपदेषु स्थापितेषु लोको भयं गौरवं बहुमानं च कुर्वते । ग्लानत्वे च भवत्यौषधादिकं सुलभमुपकरणं भक्तादि च ।

[भा.१५५४] संजतिमादीगहणे ववहारे होइ दुप्पधंसोउ ।
तग्गोरव्वा वादे हवंति अपराजिया एव ।।

वृ- संयत्यादीनामादिशद्बात् तथाविधक्षुल्लकादिपरिग्रहः ग्रहणे अपहारे भवत्यसौ राजकुमारादिदुःप्रधृष्यः तथा तद्गौरवात् वादे भवन्ति साधवोऽपराजिता एव ।

[भा.१५५५] पडिनीय अकिंचकरा होंति अवत्तव्वो अट्ठ जाएय ।
तज्जायदिक्खिएणं होइ विवड्ढीविय गणस्स ।।

वृ- प्रत्यनीकाः अकिञ्चित्करा भवन्ति । अर्थजाते च समुत्पन्ने कश्चिदपि वक्तव्यो न भवति । किन्तु सर्वेण प्रार्थित एव यथौचित्यं करोति तथा तेन तज्जातेन राजादिजातेन तद्दिवस एवाचार्यादि पदस्थापितेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गणस्य गच्छस्य वृद्धिर्भवति । शेषं सुप्रतीतत्वान्न व्याख्यातम् ।

मू. (७५) *निरुद्धवासपरियाए समणे निग्गंथे कप्पइ आयरिय उवज्झयत्ताए उद्दिसित्तए समुच्छेयकप्पंसि तस्सणं आयारपकप्पस्स देसं अवट्ठिए सेय अहिज्जिस्सामि, त्ति अहिज्जेज्जा, एवं से कप्पइ आयरिय उवज्झायत्ताए उद्दिसित्तए सेय अहिज्जिस्सामि त्ति नो अहिज्जेज्जा एवं से नो कप्पइ आयरिय उवज्झायत्ताए उद्दिसित्तए तद्दिवसं ।।*

वृ- अस्य सम्बन्धमाह-

[भा.१५५६] अपवदितं तु निरुद्धं आयरियत्तं तु पुव्वपरियाए ।
इमं तो पुन अववातो, असमत्तसुयस्स तरुणस्स ।।

वृ- निरुद्धे विनाशिते पूर्वपर्याये सत्याचार्यत्वमपवदितुं प्रव्रज्यादिवस एवाचार्यत्वमनुज्ञातमनन्तरसूत्रेऽयमनेन सूत्रेणाभिधास्यमानः पुनरपवादोऽसमाप्तश्रुतस्य तरुणस्य किमुक्तं भवत्यल्पविषयपर्यायस्यासमाप्तश्रुतस्यापि चापवादतो गणधरत्वमनुज्ञाप्यते । ततोऽनेनाप्ययपवादाभिधानतो भवति पूर्वसूत्रेणास्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-निरुद्धो विनाशितो वर्षपर्यायो यस्य स निरुद्धवर्षपर्यायः । एतदुक्तं भवति-त्रिषु वर्षेषु परिपूर्णेषु यस्य निरुद्धः पूर्वपर्यायो यदि वा पूर्णेषु समाप्तश्रुतस्य निरुद्धवर्षपर्याय इति श्रमणो निर्ग्रन्थः कल्पते आचार्योपाध्यायतया आचार्यतया उपाध्यायतया वा उद्देष्टुं क्वेत्याह-समुच्छेदकल्पे आचार्ये कालगते अन्यस्मिंश्च बहुश्रुते लक्षणसम्पूर्णे सति तस्य च आचार्यतया उपाध्यायतया वोद्देष्टुमपि तस्य आचारप्रकल्पस्य निशीथाध्ययनस्य देशोऽधीतो भवति । सूत्रमधीतमर्थाद्यापि नाधीतो यदि वाचार्यो न परिपूर्णोऽद्याप्यधीत इत्यर्थः । सेय इत्यादि स च देशमधीतवान् पाश्चात्यं स्थितं देशमध्येऽधीयते । तत एवं सति कल्पते आचार्योपाध्यायतया उद्देष्टुं, यदि पुनः सोऽध्येष्ये इति चिन्तयन्नपि नाधीयतेति संभाव्यते । तत एवं सति न कल्पते आचार्योपाध्यायतया उद्देष्टुं । एष सूत्रार्थसंक्षेपार्थः । तत्राल्पवर्षपर्यायस्यासमाप्तश्रुतस्यापवादतो गणधरपदानुज्ञानार्थमिदं सूत्रमित्युक्तमतोऽल्पवर्षपर्यायत्वं समाप्तकृतत्वं च भाष्यकृद्भावयति–

[भा.१५५७] तिन्नी जस्स अ पुना वासा पुने हि वा तिहिउ तं तु ।
वासेहिं निरुद्धेहहिं, लक्खणजुत्तं पसंसंति ।।

वृ- यस्य त्रीणि वर्षाणि व्रतपर्यायतयाऽद्याप्यपरिपूर्णानि एतस्यामवस्थायां यदि वा त्रिषु वर्षेषु परिपूर्णेषु तस्य तन्निरुद्धवर्षपर्यायत्वमभवत् । स त्रिषु वर्षेषु पूर्णेषु वा अपूर्णेषु वा वर्षेषु निरुद्धेषु आचार्ये कालगते अन्योबहुश्रुतोऽपि लक्षणसम्पूर्णो न विद्यते । स चासमाप्तश्रुतोऽपि लक्षणयुक्तो ग्रहणधारणसमर्थश्चेति स्थाप्यते, बहुश्रुतोऽप्यन्यो न स्थाप्यते किन्तु सोऽसमाप्तश्रुतोऽपि लक्षणयुक्तः । किंकारणमत आह-लक्षणेत्यादि लोके वेदे समये च विशारदा नायकत्वपदाध्यारोपे प्रशंसन्ति लक्षणयुक्त नेतरं बहुश्रुतमपि, ततः स एव स्थाप्यते । अत्र पर आह–

[भा.१५५८] किं अम्ह लक्खणेहिं तवसंजमसुठियाण समणाणं ।
गच्छविवद्धिनिमित्तं इच्छिज्जइ सो जहा कुमरो ।।

वृ- किमस्माकं श्रमणानां तपःसंयमसुस्थितानां लक्षणैः केवलं लक्षणहीनोऽपि बहुश्रुतः स्थाप्यतां येनास्माकं स्वाध्यायवृद्धिर्भवति । आचार्य आह-सोऽल्पश्रुतोऽपि लक्षणयुक्ततया गणधरपदस्थापनायामिष्यते गच्छविवृद्धिनिमित्तं यथा राज्यविवृद्धिनिमित्तं राज्ये कुमारः । एतदेव भावयति–

[भा.१५५९] बहुपुत्तो नरवई सामुद्दं भणति किं ठवेमि निवं ।
दोसगुणएगनेगे सोविय तेसिं परिकहेइ ।।

वृ- कोऽपि बहुपुत्रको नरपतिः सामुद्रिकं सामुद्रलक्षणवेत्तारं भणति यथा कमहं कुमारं नृपं स्थापयामि एवमुक्तः सोऽपि तेषां कुमाराणां यस्य दोषो गुणो वा एके नैके च विद्यन्ते तत्सर्वं परिकथयति ।

तत्र दोषा इमे-

[भा.१५६०] निध्धूमगं च डमरं मारीदुब्भिक्खचोरपउराइं ।
धणधन्नकोसहानी बलवति पच्चंतरायाणं ।।

वृ- निर्धूमकं नाम अपलक्षणं यत्प्रभावतो राज्यमनुशासति रन्धनीयमेव न भवति । डमरं यद्वशाद्राज्यं डमरबहुलं भवति प्रभूतस्वदेशोत्थविप्लवा एवोपजायन्ते इत्यर्थः । मारिर्यद्वशान्मारिदोषोपहतं प्रचुरं दुर्भिमुपयाति । चोरप्रचुरं यद्वशाद्बहवश्चौरा उच्छलन्ति । धनहानिर्यतः सर्वत्र धनक्षयः संभवति धान्यहानिर्यत्प्रभावात् वृष्टेऽपि मेघे सस्यनिष्पत्तिस्तादृशी नोपजायते । कोशहानिर्यतः कोशक्षयः । बलवत् प्रत्यन्तराजकं यदो बलवतः प्रत्यंतराजनः सर्वे भवन्ति । एते कस्याप्येकः कस्याप्यनेके कस्यापि सर्वदोषाः । अधुना गुणमाह-

[भा.१५६१] खेमं सिवं सुभिक्खं निरुवसग्गं गुणेहिं उववेयं ।
अभिसिंचंति कुमारं गच्छेवि तयानुरुवं तु ।।

वृ- क्षेमं नाम सुलक्षणं यद्वशात्सर्वत्र राज्ये नीरोगता, शिवं यतः कल्याणं सुभिक्षं यतः सर्वत्र सुभिक्षसंभवः, निरुपसर्गं यतः सकलेऽपि देशे मारिडमराद्युपसर्गासंभवः । एतेऽपि गुणाः कस्याप्येकः कस्याप्यनेके कस्यापि सर्वे । तत्र यथा दोषापेतमधिकृतैश्च गुणैः सर्वैरप्युपेतं कुमारं राजामात्यादयो राज्येऽभिषिञ्चन्ति । तथा गच्छेऽपि तदनुरुपं राजा कुमारानुरुपं सर्वथा दोषविनिर्मुक्तमेकान्ततो गुणैरुपेतमाचार्यपदे सिञ्चन्ति । एतदेव स्पष्टयति-

[भा.१५६२] जह ते रायकुमारा सुलक्खणा जे सुहा जनवयाणं ।
संतमवि सुयसमिद्धं न ठावेंतिगुणे गुणविहूणं ।।

वृ- यथा ते राजकुमाराः सलक्षणा ये स्थापिताः सन्तो जनपदानां शुभाः कल्याणकारिणः त एव स्थाप्यन्ते । न शेषास्तथा सुरयोऽपि गच्छवृद्धिमपेक्षमाणाः सन्तमपि श्रुतसमृद्धं गुणविहिनं न गणे स्थापयन्ति ।

[भा.१५६३] लक्खणजुत्तो जइवि हु न समिद्धसुत्तेण तहवि तं ठवए ।
तस्स पुन होति असमत्तो पकप्पनामस्स ।।

वृ- लक्षणयुक्तो यद्यपि हु निश्चितं न समृद्धः श्रुतेन तथापि तं स्थापयेत् तस्य पुनर्देशो भवत्यसमासः प्रकल्पनाम्नो निशीथाध्ययनस्य कथं पुनर्देशोऽसमास इत्याह-

[भा.१५६४] देसो सुत्तमधीतं न तु अत्थो अत्थतो व असमत्ती ।
सगणे अणरिहगीता सत्तीए गिण्हेज्ज मत्थेहिंतो ।।

वृ- प्रकल्पस्य द्विधा शरीरं सूत्रमर्थश्च । तत्र देशः सूत्रमधीतं न त्वर्थः । अथवा अर्थोऽपि कियानधिगतः केवलमर्थतः समाप्तिर्नाभूत् । ततो ये स्वगणे आचार्यलक्षणविहीनतया गीतार्था अपि सन्तोऽनर्हाः आचार्यपदायोग्यास्तेभ्यः आचार्यपदोपविष्टः सन्नर्थ गृह्णीयात् । अथ स्वगणे गीतार्था न विद्यन्ते तेषामसत्यभावे एभ्यो वक्ष्यमाणेभ्यो गृह्णीयात्तानेवाह-

[भा.१५६५] संविग्गमसंविग्गे सारुवियसिद्धपुतपच्छन्ने ।
पडिक्कंतअब्भुठिए असती अन्नत्थ तत्थेव ।।

वृ- स्वगणे गीतार्थानामभावे अन्येषां सांभोगिकानां समसुखदुःखानां गीतार्थानामंतिके गत्वा धीते, तेषामप्यभावे न्यसांभोगिकानां गच्छे प्रविश्य पठति, तेषामप्य भावे पार्श्वस्थादीनां संविग्र-

पाक्षिकाणामन्तिके केवलं तान् संयमयोगेष्वभ्युत्थाप्य एतावता संविग्नेति व्याख्यातं । अधुना असंविग्नेत्यादि व्याख्यायते असंविग्नात् सारुपिकान् संयतरुपधारिणः सिद्धपुत्र प्रच्छन्नान् सिद्धपुत्रान् पश्चात्कृतांश्चाश्रयेत् । कथं भूतानित्याह-प्रतिक्रान्ताभ्युत्थितान् असंयमव्यापारान् प्रतिक्रान्तान् संयमं प्रत्यभ्युत्थितान् तेषामप्यसति अभावे अन्यत्र यत्र तेन ज्ञायन्ते तत्र गत्वा तेषामन्तिके अधीते न अन्यत्र, तेषामगमने तत्रैव पठेत् । यत्र ते स्वव्यापारेण स्थिता वर्तन्ते । इयमत्र भावना-पार्श्वस्थादीनां संविग्नपाक्षिकाणामभावे ये पूर्व संविग्ना गीतार्था असीरन् तेषां पश्चात्कृतानां पुनः प्रतिक्रान्ताभ्युत्थिता-नामन्तिके गृह्णीयात् तेषामप्यभावे संयमयोगं प्रत्यभ्युत्थितानां सिद्धपुत्राणामंतिके एषामप्यभावेऽन्यत्र तान् संयरुपकान् कृत्वा तेषामंतिके अन्यत्रागमने तत्रैव तान् तथारुपान् कृत्वा सागारिकाणामभावे तेषामन्तिकेऽधीते । एतदेवाह–

[भा. १५६६] सगणे परगणे वा मनुन अन्नेसि वा वि असतीए ।
संविग्ग पक्खिएसुं सरुविसिद्धेसु पढमं तु ।।

वृ- स्वगणे गणधरपदानर्हगीतार्थानामन्तिके परगणे वा मनोज्ञे सांभोगिके तदभावे अन्येषां वा असांभोगिकानामन्तिके तेषामप्यसत्य भावे संविज्ञपाक्षिकेषु पार्श्वस्थादिषु प्रथममेव प्रतिक्रान्ताभ्युत्थितेषु तेषामप्यभावे सरुपिषु प्रतिक्रान्ताभ्युत्थितेषु पश्चात् कृतेषु तेषामप्यभावे प्रथममेव स्वरुपिषु सिद्धेषु सिद्धपुत्रेषु एतत्प्रतिक्रान्ताभ्युत्थितानधिकृत्योक्त, तद्भावेऽन्यत्र विधिमाह-

[भा. १५६७] मुंडं व धरेमाणे सिहं च फेडंत अनिच्छससिहेवि ।
लिंगेन मसागारिए वंदनगादीण हावेंति ।।

वृ- ते पश्चात्कृतादयो यदि न प्रतिक्रान्ताभ्युत्थिताः किन्तु लिङ्गतो गृहस्था वर्तन्ते अन्यत्र गत्वा तान् मुण्डं वा धरमाणान् धारयतः कारयति, यदि पुनः सशिखाकाः सन्ति, ततः शिखां स्फेटयति । अथ शिखास्फेटनं ते नेच्छन्ति ततः सशिखाकानपि स्थापयित्वा इत्वरं श्रमणलिङ्गं तेषां समर्पयन्ति व्याख्यानवेलायां च चोलपट्टकं मुखपोतिकां च ग्राहयन्ति । तेनापि तेषां तथाभूतानां पार्श्वे पठता यथा प्रतिरुपश्रुतविनयः प्रयोक्तव्यः । तेषु न वारणीयः । अथ ते अन्यत्र गमनं नेच्छन्ति तर्हि तत्रैवा सागारिके सागारिकसम्पातरहिते प्रदेशविशेषे लिङ्गेन रजोहरणमुखपोतिकादिना श्रमणरुपधारिणः कारयित्वा पठनीयम् । ते च तत्रापि तथा पठन्तो न वन्दनादीनि हापयन्ति ।।

[भा. १५६८] आहार उवहि सेज्ञा एसणमादीसु होइ जइयव्वं ।
अनुमोयणकारावण सिक्खत्ति पदंमि तो सुद्धो ।।

वृ- तेन तेषां समीपे पठता आहारोपधि शय्यानामेषणादिषु भवति यतितव्यं तदानुमोदनकारापणे च न च करणकारापणानुमोदनदोषैः स परिगृह्यते, । यतः शिक्षा मयाऽस्य समीपे गृह्यते इति द्वितीये पदे वर्तते । ततः स शुद्ध इति । इयमत्र भावना यदि स पार्श्वस्थः पश्चात्कृतादिः पाठयन्नात्मनः आहारो-पध्यादिकमात्मनैवोत्पादयति ततः सुन्दरमथात्मना नोत्पादयति तत आह–

[भा. १५६९] नोयइ से परिवारं अकरेमाणं भणति वा सड्ढे ।
अव्वोच्छित्तिकरस्स हु सुयभत्तीए कुणह पुयं ।।

वृ- से तस्य परिवारं विनयमकुर्वन्तं नोदयति प्रज्ञापयति । यथा महदिदं ज्ञानपात्रमतः क्रियताम-स्योत्कृष्टाहारसम्पादनेन विनय इति परिवारस्याभावे श्राद्धान्वा सिद्धपुत्रपुराणे तत्रुपान् भणति-यथा अव्यवच्छित्तिकरस्यास्य श्रुतभक्त्या कुरुत पूजामिति एतेनानुमोदनकारापणे व्याख्याते ।

सम्प्रति स्वयमुत्पादनमाहारादीनां भावयति-

[भा. १५७०] दुविहा सती एतेसिं आहारादी करेति से सव्वं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पणहानीए जयंतो अत्तठाए वि एमेव ।।

वृ- द्विविधस्य प्रति परिवारकस्य सिद्धपुत्रोदेश्चेत्यर्थः असत्यभावे तेषां पार्श्वस्थपश्चात्कृतादीनामाहारादिकं स सर्वात्मना करोति । तत्रापि स प्रथमतः तदलाभे पञ्चकपरिहान्या यतमानोऽशुद्धमानमपि पञ्चकपरिहानियतना नाम स शुद्धालाभे पञ्चकप्रायश्चित्तस्थान-प्रतिसेवनादुत्पादयति । तदसंभवे दशकप्रायश्चित्तस्थानप्रतिसेवनात एवं तावत् यावच्चतुर्गुरुकमसंप्राप्तः । तथापि से तस्योत्पादयति । एवमेवात्मार्थं पञ्चकपरिहान्या यतते । किमुक्तं भवति ? उद्गमादिदोष-त्रयशुद्धमलभमानः पञ्चकादियतनया त्रिभिरपि दोषैरशुद्धं गृह्णाति । स तथा कुर्वन्नपि ज्ञाननिमित्तं प्रवृत्तत्वात् कृतयतनाविषयपुरुषकारत्वात् रागद्वेषविराहितत्वाच्च शुद्ध इति ।

मू. (७६) *निग्गंथस्सणं नवडहरतरुणस्स आयरियउवज्झाए विसंभेज्ञा नो से कप्पइ अनायरिय उवज्झाइयाए होत्तए कप्पइ से पुव्वं आयरियं उद्दिसावेत्ता तओ पच्छा उवज्झायं से किमाहु भंते ? दुसंगहिए समणे निग्गंथे तं जहा आयरिएणं उवज्झाएणय ।।*

वृ- अथास्य सूत्रस्य कः संबंधः आह

[भा.१५७१] आयरियाणं सीसो परियाओ वावि अहिकतो एस ।
सीसाण केरिसाण व ठाविज्ञइ सो उ आयरिओ ।।

वृ- पूर्वसूत्रे आचार्यस्थापनीय उक्तः आचार्याणां च शिष्यो भवतीति तद्वक्तव्यतार्थमिदं सूत्रमथवा पूर्वसूत्रेषु पर्यायोऽधिकृतोऽस्मिन्नपि च सूत्रे एष एव पर्यायस्तथा च नवडहरतरुणग्रहणं यदि वानन्तरसूत्रे य आचार्यः स्थापनीय उक्तः । स कीदृशानां शिष्याणां स्थाप्यते इतीदमनेन सूत्रेणोच्यते । अनेन सम्बन्धेनायातस्यास्य व्याख्या निर्ग्रन्थस्य नमिति वाक्यालङ्कारे नवडहरतरुणस्य नवस्यडहरस्य तरुणस्य वा आचार्यसहित उपाध्याय आचार्यउपाध्याय आचार्योपाध्यायश्चेत्यर्थः । विष्कंभो यावत् भ्रियते ततः से तस्य नवडहरतरुणस्या नाचार्योपाध्यायस्य सतो भवितुं वर्तितुं न कल्पते किन्तु पूर्वमाचार्यमुद्देशाप्य स्थापयित्वा ततः पश्चादुपाध्यायमुद्देशाप्यैवमाचार्योपाध्यायस्य सतो भवितुं कल्पते । से किमाहु भंते इति से शब्दोऽथशब्दार्थः । अथ भदन्त किं कस्मात्कारणात् भगवन्त एवमाहुः-सूरिराह-द्वाभ्यामाचार्योपाध्यायाभ्यां संगृहीतो द्विसंगृहीतः श्रमणो निर्ग्रन्थः सदा भवति । तद्यथा-आचार्येणोपाध्यायेन च एष सूत्रसंक्षेपार्थः । व्यासार्थं तु भाष्यकृद्विवक्षुः नवादिशब्दार्थानामर्थमाह –

[भा.१५७२] ते वरिसो होइ नवो आसोलसगं तु डहरगं बेंति ।
तरुणो चत्ता सत्तरूणमज्झिमो थेरती सीसो ।।

वृ- प्रव्रज्यापर्यायेण यस्य त्रीणि वर्षाणि नाधिकमित्येष त्रिवर्षो भवित नवः । जन्मपर्यायेण चत्वारि वर्षाणि आरभ्य यावदाषोडशकं वर्षमत्राङमर्यादायां यथा आ पाटलिपुत्राद्वृष्टो देवः किमुक्तं भवति ? पाटलीपुत्रं मर्यादीकृत्यारतो वृष्टो देवः इत्यत्र ततोऽयमर्थः यावत् परिपूर्णानि पञ्चदशवर्षाणि षोडशाद्वर्षादर्वाक् वा तड्डहरकं ब्रुवन्ते समयविदः । ततो जन्मपर्यायेण षोडशवर्षाण्यारभ्य यावच्चत्वारिंशद्वर्षाणि तावत्तरुणः । ततः परं यावत्सप्ततिरेकेन वर्षेणोना तावन्मध्यमः । ततः परं सप्ततेरारभ्य स्थविरः शेषः ।

[भा.१५७३] अनवस्सवि डहरग तरुणगस्य नियमेन संगहं बिंति ।
एमेव तरुणमज्झे थेरम्मिय संगहोनवए ।।

वृ- यः प्रव्रज्यापर्यायेण त्रिवर्षोत्तीर्णः सोऽनवक उच्यते । तस्यानवकस्यापि आस्तां नवकस्येत्यपि शब्दार्थः । डहरकः सन् तरुणको डहरकतरुणकस्तस्य द्वादशवर्षाण्यरतो यावत् पञ्चदशवर्षाणि तावदित्यर्थः । नियमेन संग्रहमभिस्थापितो आचार्योपाध्यायानां संग्रहणं ब्रुवते अभिनवस्थापिता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चार्योपाध्यायसंगृहीतेन तेनावश्यं वर्तितव्यमिति भावः । तथा यः प्रव्रज्यापर्यायेण त्रीणि वर्षाणि नाद्याप्युत्तीर्णः सन् नवकस्मिन्नवके तरुणेन मध्यमे स्थिरे तरुणे मध्ये स्थविरे चशब्दाड्डहरं च एवं पूर्वोक्तेनैव प्रकारेण संग्रहं ब्रुवते । किमुक्तं भवति ? नवकस्य डहरस्य तरुणस्य वा मध्यमस्य वा स्थविरस्य वा नवकत्वादेव नियमादभिनवाचार्योपाध्यायसंग्रहो वेदितव्य इति ।

[भा. १५७४] वा खलु मज्झिमथेरगीयमगीयंति होइ नायव्वं ।
उद्दिसिणाउ अगीए पुव्वायरिए उ गीयत्थो ।।

वृ- वाशब्दो विभाषायां । खलु निश्चितं त्रिवर्षपर्यायोत्तीर्णत्वेनानवके मध्यमे स्थविरे च प्रत्येकं गीते अगीते च विभापणं नानात्वं ज्ञातव्यं तदेवाह उद्दिसणाउ अगीते अगीतार्थे उद्देशना । इयमत्र भावना- ये मध्यमा स्थविरा वा त्रिवर्षपर्यायोत्तीर्णा अप्यगीतार्थास्ते नियमात् यः स्थापितो गणधरस्तस्य शिष्या बध्यंते इति गीतार्थे पुनः स्थविरे मध्यमे च पूर्वाचार्यः पूर्वाचार्यसंग्रहः ये मध्यमाः स्थविरा गीतार्थाः पूर्वाचार्यदिशं धारयन्तीति ।

[भा. १५७५] नवडहरतरुणगस्सा विहीए विसुंभियंमि आयरिए ।
पच्छन्ने अभिसेतो नियमा पुन संगहे ठाइ ।।

वृ- नवश्च डहरकश्च तरुणश्च समाहारो द्वन्द्वः । तस्य पुनः सङ्ग्रहार्थमाचार्ये विष्कंभिते मृते विधिना नियमेनान्यस्य गणधरस्याभिषेकः कर्तव्यः अविधिना अभिषेककरणे प्रायश्चित्तं चत्वारो गुरुका मासाः । कोऽत्र विधिरिति चेदुच्यते आचार्यः कालगतो न प्रकाश्यते यावदन्यो गणधरो न स्थापितस्तथा चाह- पच्छन्नेति आचार्ये कालगते प्रच्छन्ने प्रदेशेऽभिषेकः करणीयः । एतदेवाह-

[भा. १५७६] आयरिए कालगए न पगासए अट्ठविए गणहरम्मि ।
रन्नेव अणभिसित्ते रज्जेक्खोभो तहा गच्छे ।।

वृ- अस्थापितेऽन्यस्मिन् गणधरे आचार्यः कालगतो न प्रकाश्यते । अत्र दृष्टान्तो राजा । तथाहि- यथा राजा कालगतस्तावन्न प्रकाश्यते यावदन्यो नाभिषिच्यते । अन्यथा अनभिषिक्ते राज्ञि राज्यक्षोभो भवति दायादैः परस्परविरोधतः सर्वं राज्यं विलुप्यते इत्यर्थः । तथा गच्छेऽप्यन्यस्मिन्नस्थापिते गणधरे यद्याचार्यः कालगतः प्रकाश्यते तदा गच्छक्षोभो भवति तमवाह-

[भा. १५७७] अनाहोहावणसच्छंद खित्तेतेना स पक्खपरपक्खे ।
लयकंपणाय तरुणे सारणमाणावमाणे य ।।

वृ- केषांचिदनाथा वयं जाता इत्यवधावनं भवेत् । केषांचित् सच्छंदत्ति स्वच्छन्दचारिता । अपरे केचित् क्षिप्ताःक्षिप्तचित्ता भवेयुः । तथा स्तेनाः स्वपक्षे परपक्षे चोत्तिष्ठन्ति । लताया इव साधूनां कम्पनं । तथा तरुणानामाचार्यपिपासयान्यत्र गमनं तथाऽसारणासंयमयोगेषु सीदतां पुनः संयमाध्वन्यप्रवर्त्तमामा तथा मानापमानं च । साम्प्रतमेतानेव दोषान् व्याचिख्यासुः प्रथमतोऽनाथावधावनस्वच्छन्दचारिता क्षिप्तचित्तानि व्याख्यानयति-

[भा. १५७८] जायामो अनाहोत्ति अनहि गच्छंति केइतो हावे ।
सच्छंदावभमंती केइखित्ताव होज्जाहि ।।

वृ- बाला वृद्धास्तरुणा वा केचिदगीतार्था आचार्याणां विप्रयोगे जाता वयमनाथा इति विचिन्त्य केचिदन्यत्र गच्छान्तरे गच्छन्ति, केचिदवधावेयुः, तथा केचिन्मन्दधर्मश्रद्धाका गणादपक्रम्य स्वच्छन्दा भ्रमन्ति । अपरे केचिदाचार्यविप्रयोगतः क्षिप्ताः क्षिप्तचित्ता अपगतचित्ता भवेयुः ।

स्वपक्षे परपक्षे स्तेनान् लताकम्पनं चाह-

[भा. १५७९] पासत्थ गिहित्थादी उन्निखावेज्ज खुड्डगादीए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लयावकंपमाणाउ केई तरुणाउ अच्छंति ।।

वृ- स्वपक्षे पार्श्वस्थादयः परपक्षे गृहस्थादयः । अत्रापिशब्दात् परतीर्थिकग्रहणं क्षुल्लकादीन् उन्निष्क्राममेयुः । किमुक्तं भवति ? पार्श्वस्थादयः क्षुल्लकादीन् विपरिणमय्य पार्श्वस्थादीन् कुर्युः । पुनरन्यतीर्थिकान् स्वज्ञातयो गृहस्थानिति लतेव वातेन कम्पमाना संयमे परिषहैः केचित् तरुणास्तिष्ठन्ति । इयमत्र भावना-यथा पद्मलताऽन्यस्मिन्ननवष्टब्धा सती वातेन कम्प्यमाना तिष्ठति, एवं केचित्तरुणा गच्छेऽपि वर्तमानाः संयमे परीषहैः कम्प्यमानास्तिष्ठन्तीति तरुणदोषमस्मारणादोषं चाह—

[भा.१५८०] आयरियपिवासाए कालगयं तु सोउ तेवि गच्छेज्जा ।
गच्छेज्ज धम्मसद्धावि केइ सारंतगस्स असती ।।

वृ- केचित्तरुणा आचार्यपिपासया नाचार्यमन्तरेण ज्ञानदर्शनचारित्रलाभोऽनुत्तरो भवति, तस्मादवश्यमाचार्यसमीपे वर्तितव्यमित्याचार्यवाञ्छया कालगतं श्रुत्वा तेऽप्यन्यत्र गच्छेयुः । तथा धर्मश्रद्धा अपि केचित्सारयितुरभावे गच्छान्तरं गच्छेयुः । मानापमानदोषमाह—

[भा.१५८१] मानिया वा गुरूणं तु थेरादी तत्थ केचिउ नत्थि ।
मानं तु तओ अन्नो अवमानभयाउ गच्छेज्जा ।।

वृ- तत्र केचित्स्थविरादय एवं चिन्तयेयुः यथा सर्वकालं मानिता वयं गुरुभिः अत्र गाथायां षष्ठी तृतीयार्थे प्राकृतत्वात् नास्ति साम्प्रतमन्योऽस्मान्मानयन् एवं चिन्तयित्वा तेऽपमानभयात् गच्छेयुः ।

उपसंहारमाह—

[भा.१५८२] तम्हा न पगासिज्जा कालगयं एवदोसरक्खट्ठा ।
अनम्मिव ताए पगासेज्ज कालगयं ।।

वृ- यस्मादेते दोषा तस्मादेतद्दोषरक्षार्थमाचार्यं कालगतं न प्रकाशयेत् यदा पुनरन्यो गणधरो व्यवस्थापितो भवति तदान्यस्मिन् व्यवस्थापिते कालगतं प्रकाशयेत्, ।।

मू. (७७) *निग्गंथीएणं नवडहर तरुणीए आयरिय उवज्झाए वीसंभेज्जा नो से कप्पइ अनायरिय उवज्झाइयाए होत्तए कप्पइ से पुव्वं आयरियं उदिसावेत्ता तओ उवज्झायं तओ पच्छा पवत्तिणिं से किमाहु भंते ? तिसंगहिया समणी निग्गन्थी तं जहा आयरिएणं उवज्झाएणं पवत्तिनीएय ।*

वृ- निग्गंथीएणमिति पूर्ववत् नवडहरतरुणाया नवाया डहरायास्तरुण्या वा इत्यर्थः । आचार्योपाध्यायः समासोऽत्र पूर्ववत् आचार्योपाध्यायमेतत् प्रवर्त्तिनी च विष्कंभी यावत् क्रियते । ततः से तस्या अनाचार्योपाध्यायाया उपलक्षणमेतत् प्रवर्तिनीरहितायाश्च नो कल्पते भवितुं वर्तितुं किन्तु पूर्वमाचार्यमुद्दिशाप्य ततः पश्चादुपाध्यायं ततः पश्चात्प्रवर्तिनीं कया (कृता) ? भवितुं कल्पते । से किमाहु इत्यादि । अथ भदन्त किं कस्मात्कारणात् भगवन्त एवमाहुः । सूरिराह-त्रिभिः संगृहीता त्रिसंगृहीता श्रमणा निर्ग्रन्थी सदा भवति तद्यथा-आचार्येणोपाध्यायेन प्रवर्तिन्या च । एष सूत्रसंक्षेपार्थः । अत्राक्षेपपरिहारौ वक्तव्यौ । तत्रायमाक्षेपः-किं कारणं ननु यत् त्रिभिः संगृहीता निर्ग्रन्थी भवति । तत्राचार्योपाध्यायसंग्रहे गुणानुपदर्शयति—

[भा.१५८३] दूरत्थम्मि विकीरइ पुरिसे गारवभयं सबहुमाणं ।
छंदेय अवट्टंती चोएउं जे सुहं होइ ।।

वृ- दूरस्थेऽपि पुरुषे स्वपक्षेण परपक्षेण च क्रियते गौरवं भयं सबहुमानं चेत्यर्थः । इयमत्र भावना-यद्यपि नाम आचार्य उपाध्यायो वा संयतीनां दूरे वर्तते तथापि दूरस्थस्यापिपौरुषस्य गौरवेण भयेन वा कोऽपि संयतीनामपन्यायं न करोति किन्तु स्वपक्षे परपक्षे च सुबहुमानो जायते, । तथा संयती प्रवर्तिन्याः छंदे अवर्तमानाश्चोदयितुं शिक्षयितुं जे इति पादपूरणे इति वचनात् सुखं भवति, । किमुक्तं भवति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्योपाध्यायभयतो न काचिदपि संयती आचारक्षतिमाचरति, यापि काचिदाचरति सापि प्रवर्तिन्या सावष्टंभं शिक्ष्यते । अथ शिक्ष्यमाणापि न प्रतिपद्यते । तत प्रवर्तिनी ब्रूतेआचार्यस्योपाध्यायस्य वाहं कथयिष्यामि ततः सा भीता प्रवर्तिन्या उपपाते तिष्ठति । एते आचार्योपाध्यायसंग्रहे गुणाः ।

सम्प्रति प्रवर्तिनीसंग्रहे गुणानाह—

[भा.१५८४] मिहो कहाज्झझ्झरवड्डेरेहिं कंदप्पकिड्डा बउसत्तणेहिं ।
पुव्वावरे तेसु य निच्चकालं गिण्हतेनं गणिणी साहीणा ।।

वृ- मिथः कथा परस्परं भक्तादिविकथाकरणं झड्डर विड्ड नाम तेषु गृहस्थप्रयोजनेषु कुण्टलविंटलादिषु वाप्रवर्तनं एताभ्यां कन्दर्पः क्रीडाकन्दर्पोद्रेकजननी कायवाक्चेष्टा । बकुशत्वं शरीरोपकरणविभूषाकरणं एताभ्यां च तथा पूर्वरात्रे अपररात्रे च गणिन्या प्रवर्तिन्या स्वाधीना सती संगृह्यते । तथा तत्प्रवर्तिनीसंग्रहोऽपि साध्व्याः श्रेयान् एतदेव विभावयिषुर्लोकिष्वपि स्त्रियास्त्रिविधं संग्रहमाह—

[भा.१५८५] जाया पिति व्वसा नारी दत्ता नारी पतिव्वसा ।
विहवा पुत्तवसा नारी नत्थि नारी सयं वसा ।।

वृ- जाता सती नारी पितुर्वशा पितुरायत्ता भवति, । दत्ता परिणीता सती नारी पतिवशा भर्त्तुरायत्ता । विधया मृतभर्तृका नारी पुत्रवशास्ति । एवं च सती नारी नास्ति कदाचनापि स्वयं वशा,

अमुमेवार्थं प्रकारान्तरेणाह—

[भा.१५८६] जायं पिय रक्खंती मातापितिसासुदेवरादिन्नं ।
पितिभायपुत्तविहवं गुरुगणिगणिणीय अज्जंपि ।।

वृ- जातामपि नारीं रक्षेतां मातापितरौ । दत्तां परिणीतां रक्षन्ति मातृपितृस्वस्त्र(श्व श्रू)देवरभर्त्रादयः । देवरग्रहणंस्वसुर (श्वशुर) भत्रादिरुपलक्षणं । विधवा पुनः पिता भ्राता पुत्रो वा । यदि जीवन्ति पित्रादयस्तर्हि सर्वेऽपि रक्षन्ति । एवमार्यिकामपि गुरुराचार्यो गणी उपाध्यायः गणिनी प्रवर्तिनी रक्षन्ति ।

[भा.१५८७] एगानिया अपुरिसा सकवाडं परघरं तु नो पविसे ।
सगणं व परगणे वा पव्वतिया वीतिसंगहिया ।।

[भा.१५८८] आयरियउवज्झाया सययं साहुस्स संगहो दुविहो ।
आयरियउवज्झाया अज्जाण पवत्तिणी तइया ।।

वृ- संगृह्णातीति संग्रहः संग्राहक इत्यर्थः साधोः सततं सर्वकालं संग्रहः संग्राहको द्विविधः आचार्योपाध्यायौ । आर्यिकाणां त्रिविधस्तद्यथा द्वावाचार्योपाध्यायौ तृतीया प्रवर्तिनी ।

अत्रैवापवादमाह—

[भा.१५८९] बितियपदे सा थेरी जुणा गीयाय जइ खलु भवेज्जा ।
आयरियादी तिण्हवि असतीए न उद्दिसाविज्जति ।।

वृ- द्वितीयपदे अपवादपदे सा प्रव्रजिता स्थविरा वयसा वृद्धा जीर्णा चिरकालप्रव्रजिता गीता उत्सर्गापवादसामाचारीकुशलतया गीतार्था यदि खलु भवेत् तत आचार्यादीनामाचार्योपाध्याय-प्रवर्तिनीनां तिसृणामप्यभावे न संग्राहकमाचार्यमुपाध्यायं प्रवर्तिनीं वा उद्देशापयेत् दोषासंभवात्—

मू. (७८) *भिक्खू य गणाओ अवकम्म मेहुणं पडिसेवेज्जा, तिन्नि संवच्छराणि तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा, तिहिं संवच्छरेहिं वीइक्कंतेहि चउत्थगंसि संवच्छरंसि पट्ठियंसि ठियस्स उवसन्तस्स उवरयस्स पडिविरयस्स एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ।*

वृ- अथास्य सूत्रस्य कः सम्बन्धस्तत आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५९०] नवतरुणे मेहुण्हं कोई सेवेज्ज एस संबंधो ।
अन्नंतभक्खणादिव्व संगहो एत्थ विसए वा ।।

[भा.१५९१] अपरियाएवि गणो, दिज्जइवुत्तंति मा अतिपसंगा ।
सेवियमपुनपज्जय दाहिंति गणं अतो सुत्तं ।।

वृ- पूर्वसूत्रे नवतरुणादिकः साधुरुक्तस्तत्र कोऽपि नवतरुणो मोहोदयवशात् मैथुनं सेवेत कृतमैथुनसेवाकस्य च यथाचार्यत्वादिकमुद्देष्टव्यं तथानेन सूत्रेण प्रतिपाद्यते इत्येष सूत्रसम्बन्धः अब्रह्मणादेर्हेतोरब्रह्मरक्षणादेर्हेतोरब्रह्मरक्षणादिनिमित्तं संग्रह आचार्यादिकोऽनन्तरसूत्रेऽभिहितः । अत्रापि सूत्रे स एव संग्रहोऽभिधीयते इति । अथवा पूर्वतरेषु सूत्रेषु अपर्यायेऽपि गणो दीयते इत्युक्तं तद्दिवसाचार्यादिपदानुज्ञानात्तत् एतत् श्रुत्वा मा अतिप्रसंगान्मैथुनं सेवित्वा अपूर्णे पर्याये गणं दास्यंतीति तत एतन्निवारणार्थमिदं सूत्रम् । अनेन सम्बन्धेनायातस्यास्य व्याख्या-भिक्षुर्गणात् अपक्रम्य मैथुनं प्रतिसेवते ततस्य त्रीणि संवत्सराणि यावत्तत्प्रत्ययं मैथुनसेवाप्रत्ययं न कल्पते आचार्यत्वमुपाध्यायत्वं यावत्करणात्प्रवर्तित्वं स्थविरत्वमिति परिग्रहः, गणावच्छेदित्वं वा उद्देष्टुमनुज्ञातुं नापि तस्य कल्पते स्वयं धारयितुं, किन्तु त्रिषु संवत्सरेषु व्यतिक्रान्तेषु चतुर्थे संवत्सरे प्रस्थिते प्रवर्तितुमारब्धवति तच्च प्रस्थितत्वमाभिमुखी भवनामात्रेऽपि भवति तत आह-अत्थि ते प्रवर्त्तमाने स्थितस्य वर्तमानस्य किंविशिष्टस्य सत इत्याह-उपशान्तस्य उपशान्तवेदोदयस्य तच्चोपशान्तत्वं प्रवृत्तिनिषेधादवसीयते तत आह उपरतस्य मैथुनप्रवृत्तेः प्रतिनिवृत्तस्य तच्च प्रतिनिवृत्तत्वं दाक्षिण्यवशादिमात्रतोऽपि भवति तत आह-मैथुनेच्छा प्रातिकूल्येन विरतः प्रतिविरतः तस्य तदपि च प्रतिविरतत्वं विकारादर्शनतो लक्ष्यते । तत आह-निर्विकारलेशतोऽपि मैथुनाभिलाषहेतुकारहितस्य कल्पते आचार्यत्वं यावद्गणावच्छेदित्वं वा उद्देष्टुं वा धारयितुं वा एष सूत्रसंक्षेपार्थः । व्यासार्थं तु भावतो भाष्यकृदाह—

[भा.१५९२] दुविहो साविक्खियरो निरवेक्खो उदिने जाइणा पुच्छा ।
जोगं च अकाऊणं जाव सदेसादि सेवेज्जा ।।

वृ- द्विविधो द्विप्रकारः खलु मैथुनसेवकः । तद्यथा-सापेक्ष इतरश्च । इतरो निरपेक्षः । तत्र निरपेक्षो य उदीर्णवेदे याति अपगच्छत्यनापृच्छ्या यो वाऽयाति योगं यतनया योगमकृत्वा यदि वा स वैश्यादिकां सेवेत । एष त्रिविधोऽपि निरपेक्षः गुरुतीर्थकरापेक्षारहित्वात् ।

[भा.१५९३] सावेक्खो उ उदिणो आपुच्छे गुरुं तु सो जति उवेहं ।
ता गुरुगा भवतित्ती सो व अनापुच्छए गच्छे ।।

वृ- यदि पुनरुदीर्णोदयप्राप्ते मोहे उदिते वेदेत्यर्थः । गुरुमापृच्छति स सापेक्षः । सह अपेक्षा गुर्वपेक्षा यस्यास्ति स सापेक्ष इति व्युत्पत्तेः । तत्रापृच्छायां यदि स गुरुरुपेक्षां कुरुते ततस्तस्य प्रायश्चित्तं चतुर्गुरुका भवन्ति, । स च साधुरनापृच्छ्य गुरुं याति तर्हि तस्यापि प्रायश्चित्तं चतुर्गुरुकाः । सा च पृच्छा त्रीन् वारान् कर्तव्या, । तथा चाह—

[भा.१५९४] अहवा सइदोवावी आयरिए पुच्छ अकडजोगी वा ।
गुरुगा तिनि उ वारे तम्हा पुच्छेज्ज आयरिए ।।

वृ- अथवा सकृदेकं वारं यद्याचार्यान् पृच्छति तथापि प्रायश्चित्तं गुरुकाः । अथ द्वौ वारौ पृच्छति न तृतीयमपि वारं तदापि चतुर्गुरुकाः । अथवा वारत्रयपृच्छायामपि कृतायां यदि अकृतयोगी यतनायोगमकृत्वा गच्छति । तदानीमपि चतुर्गुरुकाः यत एवमेकं द्वौ वा वारावपृच्छायां प्रायश्चित्तं तस्मात् त्रीन् वारान् आचार्यान् पृच्छेत् लोकेऽपि तथा दर्शनात्तथा चाह—

[भा.१५९५] बंधे य घाते य पमारणे य दंडेसु अन्नेसु य दारुणेसु य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पमत्तमत्ते पुनवितहेउं लोएवि पुच्छंति उ तिनि वारे ।।

वृ- राज्ञाबंधे आदिष्टे यदि वा घाते प्रहारे अथवा प्रमारणे कुमरणमारणे अन्येषु च दण्डेषु हस्तपादच्छेदादिषु दारुणेष्वादिष्टेषु लोके त्रीन् वारान् राजा पृच्छयते । किमर्थमित्यत आह-पमत्तमत्ते पुनवि तहेउमिति प्रमत्तेन व्याक्षिप्तेन यदि वा मद्यपानेनमत्तेनादिष्टं भवेत् प्रशान्तस्य पुनश्चित्तमुपजायते, यथा मा मार्यतामिति, वारत्रयमनापृच्छायां स रुष्येत किमिति स मारित इति एवं यथा राजा केनापि त्रीन् वारान् पृच्छयते तथाचार्योऽपि ।

[भा. १५९६] आलोइयंमि गुरुणा तस्स चिकिस्सा विहीए कायव्वा ।
निव्वितिगमादीया नायव्वाकमेणिमेणं तु ।।

वृ- आलोचिते वारत्रयमापृच्छायां कृतायां गुरुणा आचार्येण तस्योदितवेदस्य साधोर्विधिना चिकित्सा कर्त्तव्या । सा चिकित्सा निर्विकृतिकादिका क्रमेणानेन वक्ष्यमाणेन ज्ञातव्या । तमेव क्रममाह—

[भा. १५९७] निव्वीयउम तवेवेए वेयावच्चे तहेव ठाणेय ।
आहिंडणे य मंडलि चोयगवयणं च कप्पठी ।।

वृ- प्रथमतो निर्विकृतिकं कारयितव्यः । ततो यदि निर्विकृतिकं तपः कुर्वतो नोपशाम्यति वेदस्तर्हि निर्विकृतिकेनावमौदर्यं कारयितव्यम् तथाप्यनुशाम्यति ततश्चतुर्थादिकं कार्यते, तस्याप्यतिष्ठति वैयावृत्यंकारणीयः वैयावृत्येनाप्यतिष्ठति स्थाने नोर्ध्वस्थानेन तिष्ठति, तथाप्यनुपशाम्यति आहिंडनं कार्यते देशकाहिण्डकानां सहायो दीयतेइत्यर्थः । तत्र यदि पथपरिश्रमेणोपशान्तो भवति वेदस्ततः सुन्दरमथनोपशाम्यति ततो यदि सबहुश्रुतस्तर्हि स सूत्रमण्डलीं अर्थमंडली च दाप्यते । अत्रार्थे चोदकवचनं यथा किमर्थं स मण्डलीं दाप्यते । सूरिराह-दृष्टान्तोऽत्र कप्पट्ठीति कूलवधूः । एगो सेठी तस्स पुत्तो धनो वज्जणा निमित्तं देसंतरं गतो । भारिया सेठीसमीवे मुक्का । सा य सुहभोयण-तंबोलविलेवणमंडणपसाहणरया घरवावारकुणंती अन्नया उम्मत्तिया जाया, । दासचेडिं भणइ-पुरिसं मग्गेह । तीए सेठिणो कहियं । तेन चिंतियं जावज्जवि न विनस्सत्ति ताव चिंतेमि उवायं, । सेट्ठिणी भणिया-कलहं काऊणं तुमं गच्छ जेण सा धरवावारे छुब्भत्ति । अन्नहा विणिस्सिहिति । एवं सा मत्थेऊणन्नया सेठी घरमागओ आभोक्खं मग्गइ । सा न देइ । तो सेठिणा महतो कलहो कतो । सा पेट्टिऊण निस्सारिया । सा य वहू य कलहसद्दं सोऊण तत्थागया सेठिणा भणिया-पुत्तिवहूए तुमं घरसामिणी काएसा, ता तुमे अज्जप्पभिती सव्वो वावारो कायव्वो । सा तहेव करिउमारद्धा । तओ तीए वावारवाउलाए भोयणमवि वियालवेलाए कुतो मंडणपसाहणं । दासाचेड्डीए भणियं-मग्गितो चिट्ठति पुरिसो, कया मेलिज्जइ । तीए भणियं-मरणस्सवि मे अवसरो नत्थि कतो पुरिसस्स ।' एवं यथा तस्या गृहव्यापारव्यापृततया वेदोपशान्तिरभूत् । तथास्यापि सूत्रमण्डल्यादिव्यापारव्यापृततया कदाचिद्वेदोपशान्तिः संभाव्यते ततः सूत्रमण्डलीं अर्थमण्डलीं च दाप्यत इति ।

[भा. १५९८] एवंपि अठायंते अठाणादेक्कमेक्कतिगवारा ।
वज्जेज्ज सचित्ते पुन इमेउ ठाणे पयत्तेणं ।।

वृ- एवमपि सूत्रमण्डल्यादिदापनतोऽपि अतिष्ठति वेदोदये अस्थाने वैश्यापाटके स्थविरैः सह वसतिं गृह्णाति । तत्रालिङ्गनचुम्बनादि दृष्ट्वा यदि शुक्रपुद्गलविनिर्गमे वेद उपशाम्यति ततः सुन्दरं । एवं त्रीन् वारान् तथाप्यतिष्ठति यत्र शब्दाः श्रूयन्ते तत्र शब्दप्रतिषिद्धायां वसतौ स्थविरैः समवतिष्ठते । तत्र यदि परिचारणाशब्दमाकर्ण्य निबिडाध्यवसायभावतः शुक्रपुद्गलक्षरणे उपशाम्यति ततः सुन्दरम् । एवमत्रापि त्रीन् वारान् तथाप्यनुपशान्तौ दूष्यपलाशपत्रान्तरितमेकं द्वौ त्रीन् वारान् हस्तकर्म करोति । तथाप्यनुपशान्तौ मनुष्ययौनावचित्तायां तथाप्यतिष्ठति सचित्ते वक्ष्यमाणं विधिना संचरन्ति । तत्र सचित्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरिमानि वक्ष्यमाणानि स्थानानि प्रयत्नतो वर्जयेत् । तान्येवाह–

[भा.१५९९] सदेससिस्सिणी सज्जंतिया सिस्सणी कुलगणेया ।
संघेय कुलकन्नगा य विहवा बहुगा य तहा सलिंगेणं ॥

वृ- सदेशा समानदेशजातिशिष्यिनी स्वहस्तदीक्षिता सज्जंतिया भगिन्यादिका तथा शिष्यिनी कुले संघे च । किमुक्तं भवति ? समानकुलवर्तिनी समानगुणवर्तिनी समानसंघवर्तिनी च कुलकन्यका विधवा च प्रतीता वधूका लघुकुलवधूर्वा एता परिहरेत् । अपरिहरतः प्रायश्चित्तं । तथा स्वलिङ्गेन सेवनान्यथा तत्रापि प्रायश्चित्त ।

[भा.१६००] लिंगंमि उ चउभंगो पढमे भंगंमि होइ चरमपयं ।
मूलं चउत्थभंगे बितिए ततिए य भयणा उ ॥

वृ- लिङ्गे लिङ्गविपये चतुर्भङ्गी तद्यथा-स्वलिंगेन स्वलिंगे वर्त्तमानां सेवते १, स्वलिङ्गेनान्यलिङ्गे २ अन्यलिङ्गेन स्वलिङ्गे ३, अन्यलिङ्गेनान्यलिङ्गे ४ तत्र प्रथमे भंगे सेवमानस्य भवति प्रायश्चित्तं चरमपदं पाराञ्चितलक्षणं चतुर्थे भङ्गेऽन्यलिङ्गेनान्यलिङ्गे इत्येवरूपे सेवमानस्य मूलं नाम प्रायश्चित्तं । द्वितीये तृतीये भङ्गे भावनीयं भजना । क्वचित् प्रायश्चित्तं तामेव विविक्षुः प्रथमभङ्गगतामपि भावनामाह –

[भा.१६०१] सलिंगेन सलिंगे सेवंते चरमं तु होइ बोधव्वं ।
सलिंग अन्नलिंगे देवी कुलकन्नगा चरिमं ॥

वृ- स्वलिङ्गेन स्वलिङ्गे वर्त्तमानायां यदि सेवते तदा तस्य भवति बोद्धव्यं प्रायश्चित्तं चरमं पाराञ्चितरूपं । स्वलिङ्गेनान्य लिङ्गे इत्येवंरूपे द्वितीये भङ्गे यदि सेवते देवीं राजाग्रमहिषीमुपलक्षणमेतत् । अन्था वा राजस्त्रियः कुल कन्यकां वा गाथायां विभक्तिलोपः प्राकृतत्वात् तदा प्रायश्चित्तं चरमं पाराञ्चित्तं ।

[भा.१६०२] नवमं तु अमच्चीए विहवीए कुलच्चियाए मूलं तु ।
परलिंगे पासलिंगे सेवंते होइ भयणाउ ॥

वृ- स्वलिङ्गेनामात्याया अमात्यभार्यायाः सेवनं प्रायश्चित्तं नवममनवस्थाप्यं विधवाया कुलच्चियाए इति कुलवध्वा उपलक्षणमेतत् अन्ययाश्चाविशेषितायाः प्राकृतस्त्रियाः सेवने मूलं पुनर्व्रतारोपणं प्रायश्चित्तमुक्त्वा द्वितीयभङ्गे भजना तृतीये विव क्षुरिदमाह- परलिङ्गे स्वलिङ्गे वर्त्तमानाया सेवना भवति । इयं वक्ष्यमाणा भजना तामेवाह–

[भा.१६०३] सदेससिस्सणीए सज्जंति कुलच्चियाए चरमं तु ।
नवमं गणच्चियाए संघच्चियाए मूलं तु ॥

वृ- सदेशायाः समानदेशोद्भवायाः तथा शिष्यिन्याः स्वहस्तदीक्षितायाः सज्जंती भगिनी तस्याः कुलच्चियाए इति समानकुलवर्तिन्यासेवने चरमं पारञ्चित्तं । समानगणवर्तिन्याः सेवनेन नवममनवस्थाप्यं समानसङ्घवर्तिन्या मूलं । सम्प्रति चतुर्थभङ्गभावनामाह–

[भा.१६०४] परलिंगेन परंमि उ मूलं अहवावि होइ भयणाउ ।
एएसिं भंगाणं जयणं वुच्छामि सेवाए ॥

वृ- परलिङ्गेन परलिंगेन वर्त्तमानायां यदि सेवते तदा मूलं अथवा भवत्येतेषां भङ्गानां भजना विकल्पना क्वचिद्भङ्गे द्वितीयपदेन सेवा कर्तव्या क्वचिन्नेत्यर्थः । तत्र यस्मिन् भङ्गे सेवा कर्तव्या तत्र सेवायां यतनां वक्ष्यामि । तामेवाह–

[भा.१६०५] तत्थ विगिच्छाए विहिं निव्वितियमादियं अइक्कंते ।
उवभुत्तथेरसहितो अद्धाणादीसु तो पच्छा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तत्र चिकित्सायां विधिं निर्विकृतिकादिकमतिक्रान्ते ततः पश्चात् य उपभुक्ता उपभुक्तभोगाः स्थविरास्तैः सहितः समेतोऽस्थानादिषु वेश्यापाटकादिरूपेषु वसतिं गृह्णाति । तत्र च विधिः प्रोगेवोक्तः ।

तथाप्यनुपशान्तौ —

[भा.१६०६] अट्ठाण सद्दहत्थे अचित्ततिरिक्खभंगदोच्चेणं ।
एगदुगतिनिदारा समुद्धस्स उवठिए गुरुगा ।।

वृ- अस्थाने वेश्यापाटके यत्र परिचारणा शब्दाः श्रूयन्ते तत्र शब्दापूर्णे उपभुक्तभोगस्थविरैः सह तिष्ठति तत्रायं विधि स एव प्रागुक्तः । तथाप्यतिष्ठति कृत्रिमाया तिर्यग्योनावचित्तायां मैथुनकर्म एक द्वौ त्रीन् वारान् करोति । तथाप्यनुपशान्तौ कृत्रिमायां मनुष्ययोनौ तथाप्यतिष्ठति भंगदोच्चेणंति द्वितीयेन भङ्गेन स्वलिङ्गे परलिङ्गे इत्येवंरुपेण स्वगण एव स्थितेन शून्यगृहे शून्यदेवकुलिकायां वा निरपायेनापवादपदतः प्राकृतायाः स्त्रिया वृत्तिप्रदानतः । तत्र प्रवेशितायां एकं द्वौ त्रीन् वारान् मैथुनमाचरति । ततः शुद्धस्योपशान्तवेदस्याकरणाय उपस्थितस्याभ्युतस्य गाथायां सप्तमी षष्ठ्यर्थे प्रायश्चित्तं चत्वारो गुरुकाः ।

मू. (७९) *गणावच्छेइए गणावच्छेइयत्तं अनिक्खिवित्ता मेहुणधम्मं पडिसेवेज्ञा, जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ, आयरियत्तं वा जाव गणावच्छेइयत्तं उद्दिसित्तए वा धारेत्तए वा ।।*

वृ- गणावच्छेदको गणावच्छेदकत्वमनिक्षिप्य मैथुनप्रकारं प्रतिसेवते । तस्य यावज्जीवं यावत्प्राणधारणं करोति तावत्प्रत्ययं गणावच्छेदिकत्वमनिक्षिप्य यन्मैथुनधर्मप्रतिसेवनं तत्करणं न कल्पते, । आचार्यत्वं वा प्रवर्तित्वं वा स्थविरत्वं वा उद्देष्टुमनुज्ञातुं स्वयं वा धारयितुं, इदमेकं सूत्रं, द्वितीयमाह ।।

मू. (८०) *गणावच्छेइए गणावच्छेइयत्तं निक्खिवित्ता मेहुणधम्मं पडिसेवेज्ञा, तिनि संवच्छराणि जाव धारेत्तए वा ।।*

वृ- गणावच्छेदको गणावच्छेदकत्वं निक्षिप्य गुरुसमक्षं मुक्त्वा मैथुनधर्मं प्रतिसेवतस्तस्य त्रीणि संवत्सराणि यावत्प्रत्ययं न कल्पते । आचार्यत्वं वा यावद्गणावच्छेदकत्वं वा उद्देष्टुं वा अनुज्ञातुं स्वयं वा धारयितुं त्रिषु संवत्सरेषु व्यतिक्रान्तेषु चतुर्थसंवत्सरे प्रस्थिते स्थितस्य, वर्तमानस्य उपशान्तस्य उपरतस्य प्रतिविरतस्स निर्विकारस्स एवं से तस्य कल्पते आचार्यत्वं वा गणावच्छेदिकत्वं उद्देष्टुं वा धारयितुं वा, । अत्र पदानामर्थभावना भिक्षुसूत्रे इव निरवशेषा द्रष्टव्याः । तथा च द्वे सूत्रे गणावच्छेदके उक्ते तथा आचार्योपाध्येऽपि तथा एवं आयरियउवज्झाएवि एवं गणावच्छेदके इवाचार्योपाध्यायेऽपि द्वे सूत्रे ते चैवं ।

मू. (८१) *आयरियउवज्झाए आयरिय उवज्झायत्तं निक्खिवेत्ता मेहुणधम्मं पडिसेवेज्ञा जावज्जीवाए तस्स तप्पतियां नो कप्पइ आयरियत्तं वा जाव गणावच्छिदियत्तं वा उद्दिसित्तए वा धारित्तए वा ।*

मू. (८२) *आयरियउवज्झाए आयरियउवज्झायत्तं निक्खिवेत्ता मेहुणधम्मं पडिसेवेज्ज तिन्नि संवच्छराणि तस्स तपत्तियं नो कप्पइ । आयरियत्तं वा जाव गणावछेदियत्तं वा उद्दिसित्तए वा धारित्तए वा तिहिं संवच्छरेहिं वइक्कंतेहिं चउत्थगं संवच्छरंसि प्पठियंसि उठियंसि ठियस्स उवसंतस्स उवरयस्स पडिवियरस्स । एवं से कप्पइ आयरियत्तं वा जावं गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा ।।*

वृ- अस्य सूत्रद्वयस्याप्यर्थो गणावच्छेदकसूत्रद्वयवद्भावनीयः । अत्र भाष्यकारः प्राह-

[भा.१६०७] एमेव गणायरिए निक्खिविणा नवरि तत्थ णाणत्तं ।
अयपालगसिरि धरिए जावज्जीवं अणरिहाउ ।।

वृ- एवमेव अनेनैव प्रकारेण भिक्षुसूत्रमिवेत्यर्थः । गणेगणावच्छेदके आचार्ये आचार्योपाध्याये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकंसूत्रद्विकमनिक्षेपणनिक्षेपणविषयंभावनीयं । नवरंतत्र तेषु चतुर्षु सूत्रेषु मध्ये अनिक्षेपणायामनि-क्षेपणाविषये गणावच्छेदकसम्बन्धिन्याचार्योपाध्यायसम्बन्धिनि च सूत्रे नानात्वमिदं तदेवाह-अजापालकेन श्रीगृहिकेन च दृष्टान्तेन गणावच्छेदकाचार्योपाध्याया यावज्जीएमाचार्यपदानामनर्हा तत्राजापालकदृष्टान्तमाह—

[भा.१६०८] अइयातो रक्खंतो अइबालो दिठतित्थजत्ताउ ।
कहि वञ्चह तित्थानि वेति अहगंपि वच्चामि ।।

[भा.१६०९] छड्डेऊण गयंमी सावज्जाईहिं खइयरिय नट्ठा ।
पच्चागतोवविज्जइ न लभति य भक्तिं न वियत्ताओ ।।

[भा.१६१०] कोई भईए अजाओ रक्खति तेन अडवीए ।
आयाउ चारयंतेन व रक्खंतेन कप्पडियादीदिट्ठा ।।

वृ- गंगं संपाट्ठिया तेन पुच्छियं, कहिं वच्चह । ते भणंति गा जत्ता, सो ततो अजाओ छड्डित्ता तेहिं समं गंगं गतो, । ताओ अजाओ सुणातो काउवि ताव सावज्जेहिं खइया तोकातो तेनेहि हरिया तोकातो विनट्ठा उ । सोय गंगाए ण्हाएत्ता पडिआगतो । पुनो रक्खामिति अजातो मङ्गति ताहे सो बंधित्ता लोगेण अयाणं मोल्लं दवावितो भत्ती न लद्धी न य पुनो लभति मग्गंतोवि अयातो रक्खिउं । अक्षरयोजना त्वेवं-अजापालो अजारक्षन् तीर्थयात्रिकान् कार्पटिकादीन् दृष्ट्वाऽप्राक्षीत् क्व व्रजथ यूयं । तेऽवोचन् दूरिक्षीने । स ब्रूते अहमपि व्रजामि । एवमुक्त्वा तस्मिन् अजास्त्यक्त्वा गते श्वापदादिभिः खादितहृतनष्टाः काश्चिदजाः श्वापदैः खादिताः काश्चित् स्तेनैरपहृता अपरा नष्टा नंष्ट्वा स्वगृह्मागताः । स च गङ्गायां स्नात्वा अग्यागतः सन् अजामूल्यं दाप्यते न च लभते भृतिं नापि पुनरजा रक्षितुमिति ।

[भा.१६११] एवं सिरिधरीए वी एवं तु गणादिको व अनिक्खित्ते ।
जावज्जीवं त प्पत्तीयं गणं सोउ ।।

वृ- एवमजापालकइव श्रीगृहिकोऽपि द्रष्टव्यः । सो चौवं । कोइ सिरिधरिओ भीईए सिरिधरं पालेह । अन्नया तेन केइ गंगं संपट्ठिता दिट्ठा पुच्छिया कहिं वच्चह । तेहिं कहियं गंगाए । ततो सो अनापुच्छित्ता तेहिं समं गंगं गतो । पच्छा सिरिधरं सुन्नं लोगेण विलुत्तं । सो गंगाए एहाएत्ता पडियागतो पुनो रक्खामित्ति सिरिधरमेति, ताहे सो रिरिधरसामिणा बंधित्ता जं सिरिधरे पणट्ठं तं दवावितो न य पुनो लभति रक्खिउं मग्गंतोवि । एष दृष्टान्तः ।। अत्रोपनयमाह-एवं तुइत्यादि । एवमेव तु स्वधारणे गणादिकस्य अनिक्षिप्ते । अनिक्षिप्ते कृते भावे क्तप्रत्ययविधानात्तत् प्रत्ययंगणाद्यनिक्षेपेण मैथुनसमाचरणप्रत्ययं सगणावच्छेदिकादियावज्जीवं न लभते गणमिति । तदेवमनिक्षेपविषये सूत्रद्विके दृष्टान्तद्विकमुक्तमेतदेव दृष्टान्तद्विकं निक्षेपविषयेऽपि सूत्राद्विकं योजनीयं । तच्चैवं-अन्नो अजापालगो अजातो रक्खतिक तेन कप्पडियादी अन्नया गंगं संपट्ठिया दिट्ठा । तेन पुच्छिया-कहिं वच्चह । तेहिं कहियं गंगाए वच्चामो । ततो तेन गंगं गन्तुकामेण अजातो अजासामियाणं निक्खित्ता अन्नो वा अप्पणो ट्ठाणे अजापालगो कतो काउं गंगं गतो । गंगाए ण्हाएत्ता पडियागतो तेन पुनो रक्खामिति अजा मग्गिया लद्धा । तहाकोइसिरिधरितो सिरिधरं पालति । अन्नया तेन गंगं संपट्ठिया । केइ दिट्ठा आपृच्छिया कहि गंगाए वच्चामो सो गंगं गंतुकामो सिरिधरं सामिस्स कहेत्ता अप्पणो वा ट्ठाणे अन्नं पच्चइयसिरिधरियं ठवित्ता ततो गंगाए एहाएत्ता पडिआगतो । पुनो लद्धं सिरिधरमेवं यो गणावच्छेदक आचार्योपाध्यायो वा गणावच्छेदकत्वादिकं निक्षिप्य मैथुनधर्मं प्रतिसेवते । स संवत्सरत्रयातिक्रमे लभते पुनराचार्यादिकमिति, सूत्रम्-

मू. (८३) *भिक्खूय गणाओ अवकम्मओहायइ तिन्नि संवच्छराणि तस्स पत्तियं नोकप्पइ आयरियत्त वा जाव गणावच्छेद इयत्तं वा उद्दिसित्तए वा धारेत्तए वा, तिहिसंवच्छरेहिं वीइक्कंतेहिं चउत्थगंसि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवच्छरंसि उट्ठियं सिट्ठियस्स उवसंतस्स पडिवीरियस्स निवारियस्स एवं से कप्पइ ति आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा ।

वृ- अथास्य सूत्रस्य कः सम्बन्धस्तत आह—

[भा.१६१२] जो तिन्नि अड्डांयते सावेक्खो वच्चएउ परदेसं ।
तं चेव य ओहावण जं उज्झति दिव्वलिंगं तु ।।

वृ- यावत्त्रीन् वारानपवादतो द्वितीयभङ्गे स्त्रीसेवायामपि कृतायां न तिष्ठति वेदोदये पुनरेष्यापि मावज्ञास्येहमिति निक्षिप्य प्रच्छन्नमवधावामीति स्वापेक्षास्ति स सापेक्षः स्वदेशपरिहरणार्थं परदेशं व्रजति। तत्र सुखं लिङ्गविवेकेन प्रतिसेविष्यामीति बुद्ध्या एतदेव चावधावनं यतिलिङ्ग विवेकबुद्ध्यागमनं तथा चाह-तं चेव य इत्यादि तदेव अवधावनं यद् द्रव्यलिङ्गं रजोहरणादिकमुज्झति मा प्रवचनस्योड्डाहो भूदिति कृत्वा ततः पूर्वं सूत्रपञ्चकानन्तरमिदमवधावनसूत्रपञ्चकं । तद्यथा-प्रथमं भिक्षुसूत्रं तदनन्तरं गणावच्छेदकसम्बन्धिना क्रमेणानिक्षेपणनिक्षेपणविषये द्वे सूत्रे —

मू. (८४) *गणावच्छेइए गणावच्छेइयत्तं अनिक्खिवित्ता ओहाएज्ञा जाव धारेत्तए ।।*

मू. (८५) *गणावच्छेइए गणावच्छइयत्तं निक्खिवित्ता ओहाएज्ञा तिन्नि संवच्छराणि तस्य ताप्पतियं नो कप्पइ आयरियत्तं जाव गणावच्छेइयत्तं वा जाव धारेत्तए वा ।*

वृ- अक्षरसूत्रगमनिकासूत्रपञ्चकस्यापि तथैव अनिक्षेपणसूत्रद्विके गणावच्छेदकादयः पुर्ववदजापालकश्रीगृहिकदृष्टान्ताभ्यां यावज्जीवमाचार्यपदानामनहाः निक्षेपणासूत्रद्विके—

मू. (८६) *आयरिय उवज्झाए आयरिय उवज्झायत्त अनिक्खिवित्ता ओहाएज्ञा* जाव *धारेत्तएवा ।*

मू. (८७) *आयरिय उवज्झाए आयरिय उवज्झायत्व निक्खिवित्ता ओहाएज्ञा जाव धारेत्तएवा ।*

वृ- ताभ्यामेव दृष्टान्ताभ्यां प्रागुक्तप्रकारेण संवत्सरत्रयातिक्रमेऽर्हाः । सम्प्रति भिक्षुसूत्रस्या-निक्षेपणसूत्रद्विकस्य च मैथुनसूत्रादापृच्छनविधौ यतनायां च यो विशेषस्तमभिधित्सुराह-

[भा.१६१३] एमेव बितियसुत्ते बिय भंग निसेवयम्मिउ अठंते ।
ताहे पुनरवि जयती निव्वीतियमादिणा विहिणा ।।

वृ- एवमेव अनेनैव प्रकारेण भिक्षुमैथुनसूत्रे इवेत्यर्थः । द्वितीयसूत्रे भिक्षुरवधावनसूत्रे उपलक्षणमेतत् निक्षेपणसूत्रद्विक च द्वितीयभङ्गे प्रागुक्तस्वरुपेण निषेवितेऽपि मैथुने अतिष्ठति वेदोदये ततः पुनरपि निर्विकृतिकादिना विधिना यतते-

[भा.१६१४] जइ तह वि म उवसामइ ताहे जयति चउत्थभंगेण ।
पुव्वत्तेणं विहिणा, निग्गमने नवरि नाणत्तं ।।

वृ- यदि तथापि पुनरपि निर्विकृतिकादिना-परलिङ्गेन परलिङ्गे इत्येवरुपेण यतते । नवरं द्वितीयभङ्गाच्चतुर्थभङ्गे निर्गमने नानात्वं विशेषस्तथाहि-पूर्वोक्तेन विधिना द्वितीयवारमपि स्त्रीसेवानन्तरं भूयो निर्विकृतिकादिके विधौ कृते यदि नोपशाम्यति वेदस्तत्र परदेशं गन्तव्यं । तत्र च गमने इयं यतना-

[भा.१६१५] उम्मत्तो वपलवते गतोवआणेच्छु बज्झई सिढिलं ।
भाविते वसभामाणं बंधइ नासेज्ञमादूरं ।।

वृ- स परदेशं गन्तुमना उन्मत्तकवेषं करोति । उन्मत्तकबद्धसम्बद्धं प्रलपति उन्मत्तक इवेतश्च गच्छति ततोऽपि च वृषभैः आनीय शिथिलं बध्यते, । एवं चोन्मत्तकरुपतया प्रलपन् पलायमानो वा तथा बालशैक्षकादीन् साधूनन्यान् भावयति यथा ते जानते सत्यमयमुन्मत्तक एव एवं भाविते साधुजने तान् वृषभा ब्रूवते (न) गाढमेवं बन्धीथ मा बन्धनस्योद्विगतो नष्टः सन् दूरं नंक्ष्यति । पश्चाद् मार्गयद्भिरपि न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लप्स्यते ।

[भा.१६१६] गुरुआ पुच्छपलायणपासुत्तमिगेसु अमुगदेसंमि ।
मग्गणवसभादिट्ठे भणंति मुत्तामो सेसस्स ।।

वृ- रात्रौ मृगेष्वज्ञेषु बालशैक्ष्यकादिषु प्रसुप्तेषु गुरुमाचार्यमापृच्छ्य अमुकं देशं गच्छामीति पलायते । प्रभाते च वृषभा ब्रुवते नष्टः स पिशाचो न दृश्यते इति मार्गयित्वा तस्मिन्नदृष्टे वसतौवागत्य भणन्ति । नष्टः पिशाचो च क्वापि दृष्ट इति मुक्ताः स्म च्छुट्टा वयं शेषस्य तद्गवेषणाद्यायासस्य; तेन च परदेशं गच्छता यानि स्थानानि परिहर्तव्यानि, तान्यभिधित्सुराह—

[भा.१६१७] विहरण वायण खमण वेयावच्चे गिहत्थ धम्मकहा ।
वज्जेज्ज समोसरणं पडिवयमाणो हियट्ठिओ ।।

वृ- हितार्थिकः प्रवचनविराधनाया आत्मन उड्डाहस्य च संरक्षणपरायणो यत्र विहरणेति साधुत्वेन विहृतवान् यत्र वाचना दत्ता, यत्र च क्षपकत्वमकार्षीदातापना वा कृता येषु च गच्छेषु वैयावृत्यं कृतं तं यत्र विहरन्ति यत्र च गृहस्थत्वेन । स्थितवान् यत्र वा धर्मकथाप्रबन्धेनानेकशः कृत यत्र वा रथयात्रा-दिनिमित्तमनेकेषामाचार्याणां समवसरणं मेलक एतानि स्थानानि प्रतिपन्न प्रतिसेवितुकामो वर्जयेत् ।

[भा.१६१८] गंतूण अन्नदेसं वज्जित्ता पुव्व वणिए देसे ।
लिंगविवेगं काउं स सड्ढि किड्ढी पणवित्ताणं ।।

वृ- गत्वा अन्यदेशं परदेशं वर्जयित्वा पूर्ववर्णितान् अनन्तरगाथोपात्तान् देशान् लिङ्गविवेकं कृत्वा आत्मीयमाचारभाण्डं समस्तमपि क्वचिन्निक्षिप्यान्यलिङ्गं गृहलिङ्गं वा गृहीत्वा सड्ढित्ति अविरत-सम्यग्दृष्टिका यथा भद्रिका वा प्रज्ञाप्य संभोगोचितरीत्या बोधयित्वा किड्ढीत्ति कृष्यते संभोगोयः प्रतिरिक्ते स्थाने नीयते । तदभावे विध्यन्तरमाह—

[भा.१६१९] पणपनगादि पदिसु किंवि अदेंतो उ अहव अदसादी ।
अपया एत्थ गुरुगा बाहिं तु चउगुरुनिसेगो ।।

[भा.१६२०] सपया अंतोमूलं च्छेदो पुन होइ बाहिरनिसेगे ।
अनुपुव्विं पडिसेवइ वज्जंतो सदेसमादीनि ।।

वृ- पञ्च कपर्दादयः पण्यं यस्या एकवारप्रतिसेवने सा पञ्चपण्यिका । आदिशब्दात् दशपण्य-कादिपरिग्रहस्तासु कृष्टासु प्रतिरिक्तस्थानं नीतासु प्रतिसेवनां वा करोति । कथंभूतः सन्नित्याह-किञ्चित् अददान एतच्चाविरतसम्यग्दृष्टिकाया यथा भद्रिकाया वा विषये द्रष्टव्यम् । सा हि लज्जातो न किञ्चिदपि याचते । अथ पञ्चकपण्यिकादिभाटीं विना नेच्छति प्रतिसेवनां तत आह-अथवा भाटीं विनानिच्छायां अदसादीनि वस्त्राणि प्रयच्छति प्रथमतोऽदशानि ददाति तान्यनिच्छन्त्या योग्यान्यपितस्या दीयन्ते । सा च प्रतिसेवितुमिष्यमाणा द्विधा संभवति-अप्रजा सप्रजा च । अनपत्या सापत्या चेत्यर्थः । तत्राप्रजाया ग्रामस्यान्तर्यदि शुक्रनिषेकं करोति ततः प्रत्यागतस्य प्रायश्चित्तं षट् गुरु । अथ बहिस्तर्हि ततश्चतुर्गुरु । अथ सप्रजाया ग्रामस्यान्तः करोति ततो मूलमथ बहिस्तर्हि च्छेदः । तथानुपूर्व्या क्रमेण प्रथमतो भाटीं विना तदभावे भाट्यपीत्यर्थः । अथवा प्रथमतो बहिस्तदसंभवेऽन्तरपि प्रतिसेवने वर्जयन् सदेशादिकाः समानदेशशिष्यिण्यादिका ।

[भा.१६२१] फासुपिंडोयारेणं न य अभिक्खनिसेवे जाव च्छम्मासा ।
चउगुरु छम्मासाणं परतो मूलं मुणेयव्वं ।।

वृ- स च तत्र तथा तिष्ठन् प्रासुकप्रत्यवतारेण तिष्ठति यथाशक्ति अशनादिकं स्नानादिकं च(चा) प्रासुकं वर्जयतीत्यर्थः । न च अभीक्ष्णनिषेवणमभीक्ष्णप्रतिसेवनं करोति । स च तथा प्रतिसेवमानो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत् षण्मासास्तावद्यदि तिष्ठति । ततः प्रत्यागतस्य षण्मासेभ्य आरतो वा प्रतिनिवृत्तस्य प्रायश्चित्तं चतुर्गुरु षण्णां मासानां परतः प्रतिनिवृत्तस्य मूलं ज्ञातव्यम् ।

[भा.१६२२] आगंतु अन्नगणे सोहिं काऊण वूढपच्छित्तो ।
सगणागणमुब्भाये दरिसीती ताहे अप्पाणं ।।

वृ- एवं मोहचिकित्सां कृत्वा तत्पूर्वनिक्षिप्तमाचारभाण्डमादाय अन्यगणे आगत्य प्रविश्य शोधिं कृत्वा आलोचनां प्रदाय यत्प्रायश्चित्तं लभते तत्रैव वहति । ततो व्यूढप्रायश्चित्तः सन् उद्भ्रामकभिक्षाचरप्रचुरग्रामे ये आचार्यसम्बन्धिनः साधवो भिक्षाचर्यामागतास्तेषामात्मानमुपदर्शयति तं दृष्ट्वा यः प्ररुषयति, तस्य प्रायश्चित्तं चतुर्गुरुकाः, । किन्तु तै र्गत्वा सूरिभ्यः कथनीयं, दृष्टोऽस्माभिः स पूर्वनष्ट इति । यच्च तेनोक्त तदपि कथनीयं । किं तु तेनोक्तमित्यत आह–

[भा.१६२३] वेतिय लज्जाए-अहं न तरामि गंतु गुरुसमीवं तु ।
न य तत्थजं कयं, मे निग्गमनं चेव सुमरामि ।।

वृ- आत्मनि साधुनामुपदर्शिते स तान् साधून् प्रति ब्रूते-लज्जया अहं गुरुसमीपं गंतुं न शक्नोमि न च तत्र वसतौ यन्मया कृतं तत्स्मरामि केवलं निर्गमनमेव स्मरामि ।

[भा.१६२४] तेहिं निवेइए गुरुणो गीया गंतूण आनयंति तयं ।
मिगपुरतो उ खरंटण वसभनिवारंति मा भूओ ।।

वृ- एवं तैः साधुभिर्गुरौ निवेदिते गुर्वादिशेन गीता गीतार्था वृषभा इत्यर्थः । गत्वा तकं साधुमानयन्ति आनीतस्य च तस्य तेषां मृगाणां बालशैक्षिकाणां पुरतः कैतवेन गुरुणा खरण्टणा कर्तव्या । यथा क्रियायां क्रियमाणायां किमर्थं नष्टो यदि कथमप्यनर्थे अपतिष्यत् ततः कुगतावगमिष्यदिति । एवं गुरुणा कैतवेन खरण्टनायां कृतायां वृषभास्तं निवारयन्ति । वत्स मा भूय एवं कार्षीरिति । पृच्छन्ति च मृगपुरतः तां वार्तां कथमित्याह–

[भा.१६२५] कत्थगतो अनपुच्छा साहु किलिट्ठा तुमं वि मग्गंतो ।
मानं अज्जो वंदह तिनि उ वरिसाणि दंडो से ।।

वृ- त्वमनापृच्छ्य कुत्र गतः क्लिष्टाः खलु त्वां विमार्गयन्तः साधवः स प्राह-न स्मरामि भगवन् कथमहं नष्टः कुत्र वागतः केवलं कर्मोपशमेन स्वस्थीभूतो जानाति स्म यथाइं विनिर्गत इति । ततो युष्मत्पादान्तिकमागतः । तत आचार्यैः साधवो वक्तव्याः मा आर्या अमुं साधुं त्रीन् संवत्सरान् वन्दध्वमेषोऽस्य साधोर्दंडः ।

[भा.१६२६] तिण्हं समानपुरतो होयरिहो पुनो निव्वियारो उ ।
जावज्जीवमनरिहा इयमन्ने जे उ गणादीणं ।।

वृ- तिसृणां समानां संवत्सराणां पुरतः पुनर्यदि निर्विकारस्ततो भवत्यर्हो गणादीनां गणावच्छेदकत्वादीनां पदानां शेषास्तु सूत्रोक्ता अनिक्षिप्तगणादयो नर्हाइमे अन्ये गणादीनां गणावच्छेदकत्वादिपदानां यावज्जीवमनर्हा तानेवाह–

[भा.१६२७] पढमो निक्खित्तगणो बितितो पुन होइ अकडजोगित्ति ।
तितितो जम्मसदेसो चउत्थो उ विहारभूमीओ ।।

[भा.१६२८] पंचमो निक्खित्तगणो कडजोगी जो भवे सदेसंमि ।
जइ सेवंती अकरणं पंचण्हवी बाहिरा हुंति ।।

वृ- प्रथमोऽनिक्षिप्तगणो द्वितीयः पुनर्भवत्यकृतयोगी यतनायोगमकृतवान् । तृतीयो जन्माधिकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वदेशेऽकृत्यसेवी चतुर्थो विहारभूमौ स्वविहारभूमावकार्यसेवी पंचमो निक्षिप्तगणः कृतयोगी कृतयतनायोगोऽपिसन् स्वदेशे भवत्यकार्यसेवी । तथा चाह- जइ सेवंतीत्यादि । पञ्चाप्यकरणमकरणीयं मैथुनमित्यर्थः सेवन्ते पञ्चापि पञ्चानामपि आचार्यादिपदानां बाह्या भवंति एतदेवाह—

[भा. १६२९]　　आयरियमाइआणं, पंचण्हं जज्जियअनरिहाऊ ।
　　　　　　　　चउगुरुसत्तरतादि, जाव आरोवणा धरेंते ।।

वृ- पंचापि पदानां-यावज्जीवमनर्हाः चउगुरुय इत्यादि । यदि पुनस्तेषामनर्हाणामपि योगणं निसृजति तेषामन्यतमो वा यो धारयति तदा तस्योभयस्यापि सप्तरात्रं तस्मिन् गणं धारयति आरोपणं प्रायश्चित्तं चत्वारो गुरुकाः, । आदिशद्वादन्यसप्तदिनातिक्रमे षट्गुरु । सत्तरत्तारिया व आरोपणधरेते आचार्यादीनां पञ्चानामपि पदानां यावज्ञावलघुकस्ततोऽन्यसप्तदिवसातिक्रमे षट्गुरुकच्छेद एतावता कालेन यदि पर्यायो न चिछिन्नस्ततस्त्रिचत्वारिंशत्तमे गणं निस्रष्टुर्द्धारयतश्च प्रायश्चित्तं चतुश्चत्वारिंशत्तमे दिवसेऽनवस्थाप्यं पञ्चचत्वारिंशत्तमे पाराञ्चितमेव तदारोपणमिति ।

[भा. १६३०]　　अहव अक्खित्तगणाइएसु चउसुंपि सोलसउ भंगो ।
　　　　　　　　चरमे सुत्तानिवातो जावज्जिय अनरिहा सेसा ।।

वृ- अथवेति प्रकारान्तरे अनिक्षिप्तगणोऽकृतयोगी जन्मतः स्वदेशेऽकृतसेवी विहारभूमावकृत्य-कारीत्येवंरूपेषु चतुर्षु पदेषु षोडशभङ्गस्ते च प्रस्तारतोऽमी अमीषां षोडशानां भङ्गानां मध्ये यश्चरमो भङ्ग स्तत्र सूत्रनिपातः । भिक्षुसूत्रस्य निक्षिप्तसूत्रद्वयस्य चावकाशः शेषाः पुनः पञ्चदशस्वपि भङ्गेषु वर्तमाना यावज्जीवमनर्हाः ।

मू. (८८) *भिक्खू बहुस्सुए बब्भागमे बहुस्सो बहु आगाढागाढेसु कारणेसु माई मुसावाई असुइ पावजीवी जावज्जीवाए- (जाव) धारेत्तएवा ।*

मू. (८९) *गणावच्छेइए (जाव) धारेत्तए वा।*

मू. (९०) *आयरिय उवज्जाए जाव धारेत्तए वा।*

मू. (९१) *बहवे भिक्खुणो बहुस्सुया बब्भागमा बहुसो (जाव) नवरं तेसिं तस्स धारेत्तए।*

मू. (९२) *बहवे गणावच्छेइया (जाव) धारेत्तए वा।*

मू. (९३) *बहवे आयरिय उवज्झाया (जाव) धारेत वा।*

मू. (९४) *बहवे भिक्खुणो बहवे गणावच्छेइया बहवे आयरिय उवज्झाया (जाव) धारेत्तए वा ।*

वृ- सूत्र सप्तकं अथास्य सूत्रस्य पूर्वसूत्रैः सह सम्बन्धमाह —

[भा. १६३१]　　वय अतियारे पगते अयमवि अन्नो उ तस्स अइयारो ।
　　　　　　　　इत्तिरियमत्तं वा वृत्तं इदमावकहियं तु ।।

वृ- पूर्वसूत्रेषु व्रतस्य । मैथुनविरत्यादेरतिचारः प्रकृतोऽधिकृतोऽयमपि चान्यस्तस्य व्रतस्यातिचारः इति तत्प्रतिपादनार्थमिदं सूत्रसप्तकं अथवा पूर्वसूत्रेषु त्रीणि संवत्सराणि यावदाचार्यत्वादीनि न कल्पन्ते इति वचनादित्वरमपात्रमुक्तमिदं पुनः सूत्रसप्तके नाभिधीयमानमपात्रं यावत्कथितं बहुशो यावज्जीवमाचार्यत्वादीनि कल्पन्त इति वक्ष्यमाणात् ।

[भा. १६३२]　　अहवा एगहिगारो उद्देसो तइओ उ ववहारो ।
　　　　　　　　केरिसितो आयरिओ ठविज्जइ केरिसो नेति ।।

वृ- अथवेति सम्बन्धस्य प्रकारान्तरोपदर्शने व्यवहारे तृतीयोद्देशकाधिकारे यथा कीदृशः आचार्यः स्थाप्यते, । कीदृशो न तत्र यादृशः स्थाप्यो यादृशश्च न स्थाप्यः तादृश उक्तो मयन्यो न स्थाप्यत इति प्रतिपादनार्थमेप सूत्रसप्तकारंभः ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

[भा.१६३३] अहवादीवगमेयं जह पडिसिद्धो अभिक्खमाइन्नो ।
सागारिसेवि एवं अभिक्खओहावणकरीय ।।

वृ- अथवेति पूर्ववत् दीपकमेतत् सप्तसूत्रकं पूर्वसूत्रेष्वधिकार्योद्दीपनार्थमिदं सूत्रसप्तकमधिकमेवार्थमुपदर्शयति । यथानेन सूत्रसप्तकेन अभीक्ष्णं मायी बहुशो मायावी यावज्जीवमाचार्यत्वादिषु, पदेषु प्रतिषिद्धस्तथा मैथुनसूत्रपञ्चकमध्ये यो भिक्षुसूत्रे निक्षेपणसूत्रद्वये च सागारिकसेवी मैथुनप्रतिसेवी संवत्सरत्रयातिक्रमे योग्य उक्तः । सोऽप्येवमभीक्ष्णं सागारिकसेवी सन् यावज्जीवं प्रतिषिद्धो द्रष्टव्यः । तस्यापि यावज्जीवमाचार्यत्वादीनि न कल्पन्ते इति भावस्तथा अवधावनसूत्रेयो भिक्षुसूत्रे निक्षेपणसूत्रद्वये वर्षत्रयातिक्रमेण योग्य उक्तः सोऽपि यदि अभीक्ष्णमवधावनकारी भवति ततस्तस्यापि यावज्जीवमाचार्यत्वादिपदप्रतिषेधः । अनेन सम्बन्धेनायातस्यास्य व्याख्या- भिक्षुर्बहुश्रुतं सूत्रं यस्यासौ बहुश्रुतस्तथा बहुरागमोर्थपरिज्ञानं यस्य स बह्वागमः । तथा कुलप्राप्तं गणप्राप्तं संघप्राप्तं यत्सचित्तादिकं व्यवहारेण च्छेत्तव्यं कार्यं तथा आगाढागाढं कारणं तेषु आगाढागाढेषु कारणेषु बहुप्रभूतेषु बहुशोऽनेकप्रकारं मायी मायावान् मृषावादी अशुचिराहाराद्यर्थमव्यवहारी पापजीवी कोण्टलाद्याजीवी तस्य यावज्जीवं तत्प्रत्ययं मायित्वमृषावादित्वादिप्रत्ययं न कल्पते । आचार्यत्वं वा यावत् गणावच्छेदित्वं वा उद्देष्टुं वाऽनुज्ञातुं स्वयं वा धारयितुं एवं प्रथमसूत्रसंक्षेपार्थः । एवं गणावच्छेदसुत्रं आचार्योपाध्यायसुत्रं च भावनीयं । पाठोऽपि सुप्रतीतः । यथा च त्रीणि सूत्राणि एकत्वेनोक्तानि इत्येवं त्रीणि सूत्राणि बहुत्वे वक्तव्यानि सप्तमं बहुभिक्षुबहुगणावच्छेदि बह्वाचार्यविषयं तदपि तथैव । अत्र भाष्यकृदाह—

[भा.१६३४] एगत्त बहुत्ताणं सव्वेसिं तेसिमेगजातीणं ।
सुत्ताणं पिंडेणं वोच्छं अत्थं समासेणं ।।

वृ- एकत्वबहुत्वादिसम्बन्धिनां सर्वेषामेतेषां सूत्राणामेकजातीयानामेकप्रकाराणां पिण्डेनाप्युक्तौ वैविक्त्येन प्रतीतः । तत्र प्रथमत एकत्वबहुत्वविषया वाक्षेपपरिहारवाह—

[भा.१६३५] एगत्तियसुत्ते संभणिएसुं किं पुनो बहुग्गहणं ।
चोयग सुणसू इणमो जं कारणमो बहुग्गहणं ।।

वृ- एकत्वे नैकवचनेन निवृत्तान्यैकत्विकानि तेष्वेकत्विकेषु किं पुनर्बहुग्रहणं । बहुत्वविशिष्टसूत्रचतुष्टयोपादानं सूरिराह- यत्कारणं येन कारणेन मो इति पादपूरणे बहूग्रहणं बहुष्वपि विशिष्टसूत्रोपादानं तत्कारणमिदं हे चोदक श्रृणु । तदेवाह—

[भा.१६३६] लोगंमि सयमवज्झं होइ अदंडं सहस्समा एवं ।
होहिति उत्तरियम्मि विउत्ताउकया बहुकएवि ।।

वृ- लोके बहुभिरकृत्ये सेवितेऽयं न्यायः शतमवध्यं सहस्त्रमदण्ड्यं ततएवमौत्तरिकेऽपि लोकोत्तरिकेऽपि व्यवहारे प्रसङ्गोमा भूत् इति तत्प्रतिषेधार्थं चत्वारि सूत्राणि बहुकेऽपि बहुवचने कृतानि । साम्प्रतमागाढागाढकारणादिनि पदानि व्यचिख्यासुराह—

[भा.१६३७] कुलगणसंधपत्तं सचित्तादीउ कारणागाढं ।
छिद्दाणि निरिक्खंता मायी तेनेव असुतीओ ।।

वृ- सचित्तनिमित्तो अचित्तनिमित्तो वा यो व्यवहारः कुले क्षिप्तो यथेदं सचित्तादिकं विवादास्पदीभूतं कुलेन च्छेत्तव्यमिति तत्कुलप्राप्तमेवं गणप्राप्तं सङ्घप्राप्तं भावनीयं । यत्र यत्सचित्तादिकं विवादास्पदीभूतं व्यवहारेण च्छेद्यतया कुलप्राप्तं वा गणप्राप्तं वा तत्कारणागाढं कारणं तथाकथमहमेनं व्यवहारमाहाराद्युपग्रहे वर्तमानं तोज्झितं च्छिद्यामिति । बुद्ध्या परेषां च्छिद्राणि निरीक्ष्यमाणो मायी तेनैव मायित्वेनैव सोऽशुचिः तमेवाशुचिं द्रव्यभावभेदतः प्ररूपयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६३८] दव्वे भावे असुती भावे आहारवंदनादीहिं ।
कप्पं कुणइ अकप्पं विविहेहिं य रागदोसेहिं ।।

वृ- अशुचिर्द्विधा द्रव्यतो भावतश्च । तत्र योऽशुचिना लिप्तगात्रो यो वा पुरीषमुत्सृज्य पुतौ न निर्लेपयतिसद्रव्यतोऽशुचिः, भावे भावतः पुनरशुचिराहारवंदनादिभिर्विविधैर्वा रागद्वेषैः कल्प्यमकल्प्यं करोति । किमुक्तं भवति ? आहारोपधिशय्यादिनिमित्तं वन्दननीचैर्वुत्यादिना वा तोषितो यदि वा एष मम स्वगच्छसम्बन्धी स्वकुलसम्बन्धी स्वगणसम्बन्धी तैरागतोऽथवा न मामेष वन्दते विरूपं वा भाषितवानित्यादि द्वेषतोऽयं श्रुतोपदेशेनाभाव्यमनाभाव्यं करोति, । अनभाव्यमप्यभाव्यंसोऽव्य वहारी भावतोऽशुचिः । एतदेव सुव्यक्तमाह-

[भा.१६३९] दव्वे भावे असुती दव्वंमि विट्ठमादिलित्तो उ ।
पाणतिवायादीहिओ भावम्मि उ होइ असुईओ ।।

वृ- अशुचिर्द्विधा द्रव्ये भावे च । तत्र द्रव्ये विष्टादिना लिप्त आदिशब्दान्मूत्रश्लेष्मादिपरिग्रहः । भावे प्राणतिपातादिर्भवत्यशुचिः ।

[भा.१६४०] तप्पत्तियमेतेसिं आयरियादी न देंति जाजीवं ।
के पुन भिक्खु इमे अबहुस्युयमादिनो हुंति ।।

वृ- तत्प्रत्ययं मायाविवादिप्रत्ययं येषां भिक्षुप्रभृतीनां यावज्जीवमाचार्यादीनि भावप्रधानोऽयं निर्देशः । आचार्यत्वादीनि न ददाति के पुनस्ते आह भिक्षव उपलक्षणमेतत् गणावच्छेदकाचार्योपाध्यायश्च सूत्रोक्ता न केवलमेते किन्त्विमे च बहु श्रुतादयो भवन्त्याचार्यादिपदानामनर्हास्तानेव निर्युक्ति कृदाह-

[भा.१६४१] अबहुस्सुते य उभे पडिसेवते अयते अप्पचिंते य ।
निरवेक्खपमत्ते माई अनरिहे जुंगिए चेव ।।

वृ- अबहुश्रुतोऽवमः प्रतिसेवकोऽयतः आत्मचिन्तकः निरपेक्षः प्रमत्तो मायी अनर्हो जुङ्गिकश्च । एते सूरित्यादिपदानामनर्हाः । साम्प्रतमेनामेव व्याचिख्यासुराह-

[भा.१६४२] अबहुस्सुतो पकप्पो अणहीओ मो तिवरिसारेणं ।
निक्कारणोवि भिक्खु कारण पडिसेविते जत्तो उ ।।

[भा.१६४३] अब्भुज्जयनिच्छओ अप्पवि नो निरवेक्खो बालमादीसु ।
अन्नयर पमायजुत्तो असच्चरुची होइमाईओ ।।

[भा.१६४४] अवलक्खणा अणरिहा अच्चाबाहादि य जे वुत्ता ।
चउरो य जुंगिया खलु अच्चंति य भिक्खुणो एते ।।

वृ- अबहुश्रुतो नाम येनाचारप्रकल्पो निशीथाध्ययननामकः सूत्रतो अर्थतश्च नाधीतः । अवमो नाम आरात्रिवर्षारतो यस्य प्रव्रज्यापर्यायेण त्रीणि वर्षाणि नाद्यापिपरिपूर्णानि भवन्तीत्यर्थः, । प्रतिसेवको नाम यो भिक्षुः निक्कारणे कारणाभावेऽपि पञ्चकादीनि प्रायश्चित्तस्थानानि प्रतिसेवते, आत्मचिन्तको योऽभ्युद्यतमरणं वा प्रतिपत्तुं निश्चितो निश्चितवान्, निरपेक्षो बालादिषु चिन्तारहितः, प्रमत्तः पञ्चानां प्रमादानामन्यतरेण प्रमादेन युक्तः, । असत्ये मृषाभाषणे असंयमे वा रुचिर्यस्यासावसत्यरुचिर्भवति मायी । किमुक्तं भवत्यभीक्ष्णं मायाप्रतिसेवनशीलो मायीति, अपलक्षणा येषामाचार्यलक्षणानि न विद्यन्ते ये च पूर्वमुक्ता अत्याबाधादय एते सर्वाऽनर्हाः जुङ्गिका जातिकर्मशिल्पशरीरभेदतश्चतुर्धा । एतेऽपि प्रागुक्ता एते सर्वेऽपि भिक्षवो अत्यन्तमाचार्यत्वादिपदानामनर्हाः यदि पुनर्बहुश्रुतो भवेत् । अवमोऽपि त्रिवर्षपर्यायोत्तीर्णः प्रतिसेवकोऽप्यप्रतिसेवको यतोप्ययतनातः प्रतिविरतो निरपेक्षः सापेक्षीभूतः प्रमत्तोऽप्यप्रमत्ततामुपगतस्तदा भवन्त्येतेऽप्याचार्यत्वादिपदानां योग्याः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति सप्तानामपि सूत्राणां संभवविषयमाह—

[भा.१६४५] अहवा जो आगाढं वंदनआहारमादिसंगाहितो ।
कप्पं कुणइ अकप्पं विविहेहिं य रागदोसेहिं ।।

[भा.१६४६] माई कुणइ अकज्जं को माई जो भवे मुसावाई ।
को पुन मुसावाई असुई पावसुयजीवी ।।

वृ- अथवेति सूत्रव्याख्याप्रकारान्तरोपदर्शने यो वन्दनादिभिः । वन्दनवैयावृत्यादिना आहारादिभिराहारोपधिशय्यादिभिरागाढमत्यर्थं संगृहीतः सन् विविधैश्च रागद्वेषैः प्रागुक्तस्वरूपैः कल्प्यमप्याभाव्यमप्यकल्प्यमनाभाव्यं करोति । सप्तानामपि सूत्राणां विषयः माई कुणइ इत्यादिकः । पुनरेवमकार्यं कल्प्यमप्यनाभाव्यमप्याभाव्यमित्यर्थः करोति । एवं शिष्यस्य प्रश्नमाशङ्कत सूत्रकृदाह- मायी मायावान् को मायी तत आह- यो भवेत्मृषावादी कः पुनर्मृषावादी तत आह- अशुचिः कोऽशुचिः । सूत्रकृदाह- पापजीवी एतस्य व्याख्यानं पापश्रुतोपजीवी इत्यर्थः । कोण्टलादिशास्त्रोपजीवीत्यर्थः ।

[भा.१६४७] किह पुन कज्जमकज्जं करेज्ज आहारमादिसंगहितो ।
जह कम्मिवि नगरम्मी उप्पणं संघकज्जं तु ।।

वृ- कथं पुनराहारादिसंगृहीतः सन् कार्यमकार्यमुपलक्षणमेतत् अकार्यमपि कार्यं करोति । अत्र सूरि निर्दशनमाह- यथा कस्मिन्नगरे किमपि सङ्घकार्यमुत्पन्नं सचित्तादिनिमित्तं वास्तव्यसङ्घस्य व्यवहारो जात इत्यर्थः । स च वास्तव्यसंघेन च्छेत्तुं न शक्यते ।

[भा.१६४८] बहुसुयपरिवारो य आगतो तत्थ कोइ आयरितो ।
तेहिं य नागरगेहिं सोउ नियत्तो उ ववहारे ।।

वृ- अन्यदा कोऽप्याचार्यो बहुश्रुतो बहुपरिवारस्तत्र नगरे समागतः । स च तैर्नागरकैर्नगरवास्तव्येन सङ्घेनेत्यर्थः । नियुक्तो व्यवहारे बहुश्रुतस्त्वमत एतं व्यवहारं च्छिंद्धि ।

[भा.१६४९] नाएण च्छिन्ने ववहारे कुलगणसंघेण कीरइ पमाणं ।
तो सेविउं पवत्ता आहारादीहिं कज्जिया ।।

वृ- एवमुक्ते तेन न्यायेन श्रुतोपदेशेन व्यवहारच्छिन्नस्ततः कुलगणसङ्घेन सप्रमाणं क्रियते । एष बहुश्रुतो न च श्रुतोत्तीर्णं किमपि वदति, तस्माद्यदेष भाषते तत्प्रमाणमिति । एवं च प्रमाणीकृते तस्मिन् श्रावकसिद्धपुत्रादयः कार्यिकादयस्तत्कार्यार्थिनः सन्तस्तमाहारादिभिः सेवितुंप्रवृत्ताः सेवनान्याहारादीनि दीयमानानि गृह्णाति ।

[भा.१६५०] तो च्छिंदिउं पउत्तो निस्साए तत्थ सो उ ववहारं ।
पच्चत्थीहिं नायं जहिं च्छिंदइ एस निस्साए ।।

वृ- ततः आहारादिग्रहणानन्तरं स तत्र नगरे व्यवहारं निश्रया पक्षपातेन च्छेत्तुं प्रवृत्तः । ततो ये आहारादिकं न दत्तवन्तस्ते तस्य प्रत्यर्थिनस्तैः प्रत्यर्थिभिर्ज्ञातं यथा एष व्यवहारं निश्रया च्छिनत्ति ।

[भा.१६५१] कोन्नु हु हवेज्ज अन्नो जो नाएणं नएज्ज ववहारं ।
अह अन्नय समवाओ घुठो वा आयो य तत्थ विदू ।।

वृ- ततस्ते प्रत्यर्थिनश्चिन्तयन्ति को नु हु निश्चितं भवेदन्यो गीतार्थो यो न्यायेन व्यवहारं नयेत् । अथान्यदा सचित्तादिव्यवहारच्छेदार्थं सङ्घसमवायो घुष्टो घोषितः सङ्घसमवायघोषणं श्रुत्वा तथा सङ्घसमवायविदः (दू) विद्वान् सूत्रार्थतदुभयकुशलोऽन्यः प्राघूर्णकः कोऽपि समागतः । इह समवायघोषणामाकर्ण्य धूलीधूसरैरपि पादैरवश्यमागन्तव्यमन्यथा प्रायश्चित्तमित्येतदधुना प्रतिपादयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६५२] घुट्ठंमि संघकज्जे धूलीजंघो वि ज्जो न एज्जाहि ।
कुलगणसंघसमवाए लगति गुरुगे चउम्मासे ।।

[भा.१६५३] न कहिंति अकज्जं तं पावइ सइ बाले आगच्छंतो ।
अनाइं ताव तो हानमादि जं कुज्ज तं पावे ।।

वृ- घुट्टे घोषिते सङ्घकार्ये संघसमवाये धूलीजंघोऽपि आस्तामन्य इत्यपि शद्वर्थाः । धूल्या धूसरे जङ्घे यस्य स धूलीजंघः शाकपार्थिवादिदर्शनात्मध्यपदलोपी समासः । संघसमवायघोषणामाकर्ण्य प्राधूर्णकेनापि पादलग्रायामपि धूलावप्रमत्ततया त्वरितमवश्यमागन्तव्यमिति ज्ञापनार्थ धूलीजंघोऽपीत्युपादानं सति बले यो न आगच्छेत् कुलसमवाये गणसमवाए सङ्घसमवाए वा गुरुके चतुर्मासि लगति तस्य गुरुकाश्चत्वारो मासाः प्रायश्चित्तमिति भावः, । न केवलमेतत् किन्त्वन्यदपि । तथा चाह- जं काहिंत्यादि सति बले आगच्छन् व्यवहारोच्छेदकार्यकरणतो वान्यैरन्यथाच्छिन्ने व्यवहारे यदकार्यं ते व्यवहारार्थिनः करिष्यन्ति तत् प्राप्नोति तन्निमित्तमपि प्रायश्चित्तं तस्यापद्यते इत्यर्थः । अन्यदपि चापमानवशतो यदवधावनादि कुर्यात्तदपि प्राप्नोति ।

[भा.१६५४] तम्हाउ संघसद्दे घुट्ठे गंतव्व धूलि जंघेण ।
धूलीजंघनिमित्तं ववहारो उट्ठितो सम्मं ।।

वृ- यत एवमनागमने दोषास्तस्मात् सङ्घशद्वे घुष्टे घोषिते धूलीजंघेनाप्यवश्यं सति बले गन्तव्यं । यतः कदाचित् धूलीजंघनिमित्तं व्यवहारः सम्यगुत्थितो भवेत् । यथा प्राघूर्णको गीतार्थो धूलीजङ्घः समागतः सन् यदि भणिष्यति तत्प्रमाणमिति ।

[भा.१६५५] तेन य सुयं जहेसो तेन घयादीहिं संगहीतो उ ।
कज्जाइ नेइवितहंमाई पावोवजीवो (वी) उ ।।

वृ- तेन च धूलीजङ्घेनागच्छतैव कथकस्यापिपार्श्वे श्रुतं यथैष वास्तव्यो व्यवहारच्छेत्ता तैलघृतादिभिः संगृहीतः सन् मायी अभीक्ष्णं मायाप्रतिसेवी पापोपजीवी कोण्टलाद्युपजीवी वितथमुत्सूत्रं कार्याणि नयति ।

[भा.१६५६] सो आगतो उ संतो वितहं दट्ठूण तत्थ ववहारं ।
समएण निवारेई कीस इमं कीरइ अकज्जं ।।

वृ- एवं श्रुत्वा समागतः, सन् तृष्णीकस्तावदास्ते यावत्सूत्रेण निर्दिश्यमानं व्यवहारं पश्यति तं च तथाभूतं वितथं व्यवहारं दृष्ट्वा समयेन सिद्धान्तेन निवारयति, । यदकस्मादिदमकार्यं क्रियते, न केवलमेवं निवारयति किन्त्वेतदपि वक्ति, ।

[भा.१६५७] निद्धमहुरं निवायं, वीणियमवि जाणएसु जंपंतो ।
सचित्तखेत्तमीसे अठधर निहोडणा (णं) विहिणा ।।

वृ- सचित्तनिमित्तव्यवहारे स्वेत्तत्ति क्षेत्रनिमित्ते व्यवहारे य दुर्व्यवहारिणस्तेषां प्रतिदिवसनिमित्तं अविजाणएसुत्ति येऽपि च साधवो न जानन्ति । यथा घृतादि अनुवृत्ता वितथमेते व्यवहरन्ति तेष्वविजानत्सु विज्ञाननिमित्तमेवं जल्पति । अहो स्निग्धो व्यवहारः । किमुक्तं भवति ? तैलघृतादिसंगृहीत एवमेते अन्यथा व्यवहरन्तीति । अथ गुडशर्करादिभिः गृहीता वितथव्यवहारिणः ततो जल्पति अहो मधुरो व्यवहारः, । यदि पुनरुपाश्रयो निर्वातो लब्धः शीतप्रावरणानि वेति वितथं व्यवहरन्ति, । तत आह निर्वातो व्यवहारः । अथ कृतिकर्मविनयादिभिः संगृहीतास्ततो ब्रूते । अहो विनीतो व्यवहारः । एवं स्निग्धं मधुरं निवातं व्यवहारं जल्पन् सोऽर्थधरस्तेषां दुर्व्यवहारिणां विधिना सूत्रोपदेशन निहोडणां निवारणं करोति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६५८] एवं चेव य सुत्तं उच्चारेउं दिसं अवहरंति ।
पयावगह आउट्ट दान इयरे उ जा जीवं ।।

वृ- एवं निहोडणं कृत्वा एतदेवाधिकृतं सूत्रं सप्तसूत्रात्मकमुच्चार्य दिशिमाचार्यत्वादिकमपहरन्ति उद्दालयन्ति, अथ सोऽल्पापराधः प्रत्यावृत्तश्च तदा दाणत्ति तस्य दिक पुनर्दीयते । इयरे उ इति सप्तमी पष्ठ्यर्थे इतरस्य त्वनावृत्तस्य आवृत्तस्य वा बहुदोपस्य यावज्जीवमाचार्यत्वादिकं न दीयते ।

[भा.१६५९] एवं नाव बहुसु मज्झत्थेसु तु होउ ववहरंति ।
अह होज्ज बला इयरा, ठावेइ उ तत्थिमं वयणं ।।

वृ- एवमनन्तरोदितेन प्रकारेण नावद्वहुपु मध्यस्थेपु सत्सु सोऽर्थधरो व्यवहरति । अथ भवेयुरितरे दुर्व्यवहारिणो बहुत्वेन बलीयांसः । ततस्तत्रान्यथा व्यवहारच्छेदे क्रियमाणे इदं वक्ष्यमाणं ब्रूते तदेवाह -

[भा.१६६०] रागेण व दोसेण व पक्खग्गहणेण एक्कमेक्कस्स ।
कज्जंमि वीरमाणे, किं अत्थति संघोमज्झत्थो ।।

वृ- रागेण वा एकस्य पक्षस्य ग्रहणेन द्वेपेण एकस्य पक्षाग्रहणेन द्वेपेणा वा कार्ये क्रियमाणे वितथे व्यवहारे च्छिद्यमाने किं संघो मध्यस्थस्तिठति ।

[भा.१६६१] रागेण व दोसेण व पक्खग्गहणेण एक्कमेक्कस्स,
कज्जंमि कीरमाणे अणो वि भणउ ता किंचि ।।

वृ- रागेण च एकस्य पक्षग्रहणेन द्वेपेण वा एकस्य पक्षाग्रहणेन कार्ये क्रियमाणे ततस्तस्मात् किञ्चिदन्योऽपि भणतु, ।

[भा.१६६२] बलवंतो सव्वं वा भणाति, अणोवि लभति को एत्थ ।
वोत्तुं जुत्तमजुत्तं उताहु नवि लब्भते आणस्स ।।

वृ- बलवत्सु सर्वेपु वाहुर्व्यवहारेष्वेवं वक्ष्यमाणरीत्या भणति तामेवाह,- अत्र अस्मिन् सङ्घसमवाये युक्तमयुक्तं वा वक्तुमन्योऽपि कश्चिल्लभते उताहोऽन्यस्य वक्तुं न लभ्यते अन्यो न लभते इत्यर्थः ।

[भा.१६६३] जति बेंति लब्भतेऽवि हेतुमं जंतु जानसी जुत्तं ।
तो अनुमाणेऊणं बिंति तहिं नायतो सो उ ।।

वृ- यदि ब्रुवते लभ्यतेऽन्येनापि वक्तुमतस्त्वमपि यज्जानासि वक्तुं तद्ब्रूहि । तत एवमुक्ते तां पर्पदमनुमान्य सम्यक् क्षमयित्वा तत्र न्यायतः स ब्रूते कथमनुमान्येत्यनुमानप्रकारमाह—

[भा.१६६४] संघो महानुभागो अहं च वेदेसिओ इहं भयवं ।
संघसमितिं न जाणे तं भे सव्वं खमावेमि ।।

वृ- सङ्घो महानुभागोऽचिन्त्यशक्तिरस्येति महानुभावः अहं च वैदेशिको विदेशवर्ती इह अस्मिन् स्थाने भगवतो सङ्घसमितिं सङ्घमर्यादां न जाने ततो युक्तमयुक्तं वा वक्तुं सर्वं भे भवतः क्षमयामि । यतः—

[भा.१६६५] देसे देसे ठवणा अनत्था अनत्थ होइ समितीणं ।
गीयत्थो होइण अदेसिओ तं न जाणामि ।।

वृ- समितीनां सङ्घमर्यादानां स्थापना गीतार्थैराचीर्णा अत्र जगति देशे देशेऽन्यान्या भवन्ति । ततोऽहमदेशिक इहत्यां सङ्घमर्यादां स्थापनां न जानामि, ततः क्षमयतः श्रुतोपदेशेनाहमपि किञ्चिद्वक्ष्ये -

[भा.१६६६] - अनुमाने उं संघं परिसग्गहणं करेइ तो पच्छा ।
किह पुन गेण्हइ परिसं इमेण वाएण सो कुसलो ।।

वृ- एवं सङ्घमनुमान्य सम्यक् क्षमयित्वा ततः पश्चात्पर्पद्ग्रहणं करोति, । शिष्यः प्राह कथं पुनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्षदं गृह्णाति । सुग्गिह- कुशलो दक्षोऽनेनोपायेन गृह्णाति समीचीनासमीचीनां वा जानाति तमेवोपायमाह–

[भा.१६६७] परिसावववहारिया मज्झत्था रागदोसनीहूज्जा (या) ।
जह होंति दोविपक्खा ववहरिउं तो सुहं होइ ।।

वृ- पर्षन्नाम व्यवहार्यौ द्वावपि पक्षौ तौ ब्रूते-यदि द्वावपि पक्षौ मध्यस्थौ भवतो मध्यस्थता रागद्वेषाकरणतो भवति । तत आह-निभृतौ निर्व्यापारौ रागद्वेषौ ययोस्तौ रागद्वेषनिभृतौ क्लान्तस्य पाक्षिकः परनिपातः सुखादिदर्शनात् । ततः सुखं व्यवहरितुं व्यवहरणं भवति । एवं पर्षद्ग्रहणं कृत्वा ये दुर्व्यवहारिणस्तान्निक्षिपन्निदमाह–

[भा.१६६८] उसन्नचरणकरणे सच्चव्ववहारया दुसद्दहिया ।
चरणकरणं जहंतो सच्चववहारयं जहइ ।।

वृ- अवसन्ने शिथिलतां गते चरणकरणे व्रतश्रमणधर्मादिपिण्डविशोधिसमित्यादिरूपे यस्य सोऽवसन्नचरणकरणः तस्मिन् सत्यव्यवहारता यथावस्थितव्यवहारकारिता दुःश्रद्धेया यतश्चरणकरणं जहन् त्यजन् सत्यव्यवहारतामपि जहाति–

[भा.१६६९] जइया णेणं चत्तं अप्पाणतो नाणदंसणचरित्तं ।
तइया तस्स परेसु अनुकंपा नत्थि जीवेसु ।।

वृ- यदानेनात्मनः सम्बन्धिज्ञानदर्शनचारित्रं त्यक्तं तदा तस्य परेषु जीवेष्वनुकम्पा नास्ति यस्य ह्यात्मनो दुर्गतौ प्रपततो नानुकम्पा तस्य कथं परेष्वनुकम्पा भवेदिति भावः ।

[भा.१६७०] भवसयसहस्सलद्धं जिनवयणं भावतो जहंतस्स ।
जस्स न जायं दुक्खं न तस्स दुक्खं परे दुहिते ।।

वृ- यस्य भवशतसहस्रैः कथमपि लब्धं जिनवचनं भावतः परमार्थतो जहतस्त्यजतो दुःखं न जातं न तस्य परे दुःखिते दुःख यस्य ह्यात्मन्यपि दुःखिते न पीडा तस्य परे दुःखिते कथं स्यादिति भावः ।

[भा.१६७१] आयारे वट्टंतो, आयारपरुवणा असंकउ ।
आयारपब्भिट्ठो सुद्धचरणदेसणे भइतो ।।

वृ- आचारे वर्तमानः खल्वाचारः प्ररुपणा अशक्योऽशङ्कनीयो भवति, यः पुनराचारपरिभ्रष्टः सशुद्धचरणदेशने यथावस्थितचरणप्ररुपणा सभक्तो विकल्पितः शुद्धचरणप्ररुपणाकारीति वा न वेत्यर्थः । एवं दुर्व्यवहारिणामाक्षेपे कृते ते ब्रूयुर्वयमप्रमाणीकृता युष्माभिः । ततः स गीतार्थः प्राह-

[भा.१६७२] तित्थयरे भगवंते, जगजीववियाणए तिलोगगुरु ।
जो न करेइ पमाणं, न सो पमाणं सुयहराणं ।।

वृ- तीर्थकरान् भगवतो जगज्जीवविज्ञापकान् सर्वज्ञानित्यर्थः । त्रिलोकगुरुन् यो न करोति प्रमाणं न स प्रमाणं श्रुतधराणां ।।

[भा.१६७३] तित्थयरे भगवंते जगजीववियाणए तिलोकगुरु ।
जो उ करेइ पमाणं, सो उ पमाणं सुयहराणं ।।

वृ- तीर्थकरान् भगवतो जगज्जीवविज्ञायकान् त्रिलोकगुरुन् सर्वज्ञानित्यर्थः यस्तु करोति प्रमाणं, स प्रमाणं श्रुतधराणां । एवं धूलीजङ्घेन दुर्व्यवहारिष्वपालब्धेषु ते ब्रूयुरेवं सङ्घमप्रमाणीकुरुथ यूयमिति । ततः प्राह-

[भा.१६७४] संघो गुणसंघातो संघायविमोयगोय कम्माणं ।
रागद्दोसविमुक्को होइ समो सव्वजीवाणं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- संघो मयो गुणानां मूलगुणानामुत्तरगुणानां च सङ्घातः सङ्घातात्मकः गुणसंघातात्मकत्वादेव च कर्मणां ज्ञानावरणीयादीनां संघाताद्विमोचयति प्राणि न इति संघातविमोचकः रागद्वेषविमुक्त आहारादिकं ददत्सु रागाकारी तद्विपरीतेषु द्वेषाकारीत्यर्थः । अतएव भवति समः सर्वजीवानां स इत्थंभूतो नाप्रमाणीकर्तुं शक्यते श्रुतोपदेशेन व्यवहरणात् किं चान्यत् ।।

[भा.१६७५] परिणामिय बुद्धीए उववेतो होइ समणसंघाओ ।
कज्जे निच्छयकारी सुपरिच्छियकारगो संघो ।।

वृ- पारिणामिकी चासौ बुद्धीश्च पारिणामिकबुद्धिस्तया उपेतो युक्तो भवति श्रमणसंधः । तथा कार्ये दुर्गेऽपि समापतिते यत् श्रुतोपदेशबलेन सम्यग्निश्चितं तत्करणशीलः कार्ये निश्चितकारी तथा सुष्ठु देशकालपुरुषौचित्येन श्रुतबलेन च परीक्षितं सुपरीक्षितं तस्य कारकः संघोन यथा कथञ्चनकारी ।

[भा.१६७६] किह सुपरिच्छियकारी एक्कसि दो तिन्नि वावि पेसविए ।
नवि उक्खियए सहसा को जाणाइ नागतो केन ।।

वृ- कथं केन प्रकारेण सुपरीक्षितकारी ? उच्यते इहार्थिना सङ्घप्रधानस्य समीपे सङ्घसमवायोचितस्तेन वा ज्ञप्तः सङ्घमेलापककारी सङ्घस्त्वया मेलनीयः, । तत्र च प्रत्यर्थी कुतश्चित्कारणान्नागच्छति ततो मानुषं प्रेषणीयं सङ्घस्त्वां शब्दयति, । स नागतस्ततो द्वितीयमपि वारं मानुषं प्रेष्यति, तथापि नागच्छति । तत्रापरिणामिका ब्रूवते-उद्घाट्यतामेष गीतार्थास्त्वाहुः । पुनः प्रेष्यतां गीतार्थं मानुषं केन कारणेन नागच्छति ? । किं परिभवेन उत भयेन । तत्र यदि भयेन नागच्छति ततो वक्तव्यं मा भैस्त्वं परित्राणकारी खलु भगवान् श्रमणसङ्घ इति, । अथ परिभवेन तत उद्घाट्यते, । एवं सुपरीक्षितकारी तथा चाहएवं द्वौ त्रीन् वारान् मानुषे प्रेषितेऽपि तमनागच्छन्तं सहसा सङ्घो न क्षिपति न सङ्घबाह्यं करोति यत एवं पर्यालोचयति को जानाति न ज्ञायते इत्यर्थः । केन कारणेन नागत इति ।।

[भा.१६७७] नाऊण परिभवेण, नागच्छंते ततो उ निज्जुहणा ।
आउट्टे ववहारो एवं सुविणित्थकारीओ ।।

वृ- परिभवेन नागच्छतीति ज्ञात्वा तस्मिन्नागच्छति ततः सङ्घान्निर्यूहणा निष्काशनं कर्त्तव्यम् । अथ शठतामपि कृत्वा स प्रत्यावर्तते प्रत्यावृत्तश्च संघं प्रसादयति ततस्तस्मिन्नावृत्ते व्यवहारो दातव्यः । एवं सुविनिश्चितकारी सङ्घः । यस्तु भीतो नागच्छति तं प्रतीदं वक्तव्यम्-

[भा.१६७८] आसासो वीसासो सीयधरसमो य होइ मा भाहि ।
अम्मापिति सम्माणो संघो सरणं तु सव्वेसिं ।।

वृ- आश्वासयतीति आश्वासो भीतानामाश्वासनकारी भगवान् श्रमणसङ्घः विश्वासयतीति विश्वासो व्यवहारे वञ्चनाया अकर्ता सर्वत्र समतया शीतगृहेण समः शीतगृहसमः । तथा मातापितृभ्यां समानो मातापितृसमानः पुत्रेषु मातापितराविव व्यवहारार्थि(दि)ष्वविषमदर्शी, । तथा सर्वेषां प्राणिजां शरणं भगवान् सङ्घस्तस्मान्या भैस्त्वमिति इदं च परिभावयन् संघोऽव्यवहारं न करोति ।

[भा.१६७९] सीसो पडिच्छओ वा आयरियो वा न सोग्गइनेंति ।
से सच्च करण योगा ते संसारा विमोएंति ।।

वृ- शिष्यः स्वदीक्षितः प्रतीच्छकः परगणवर्त्ती सूत्रार्थ तदुभयग्राहकः आचार्यो वाचनाचार्यादिको न सुगतिं नयति किंतु ये सत्यकरणयोगाः संयमानुगत व्यापारास्ते संसाराद् विमोचयंति ।

[भा.१६८०] सीसो पडिच्छओ वा आयरिओ वा विएते इहलोए ।
जे सच्चकरणजोगा ते संसारा विमोएंति ।।

वृ- शिष्यः प्रतीच्छको वा आचार्यो वा एते सर्वेऽपि इहलोके, परलोके पुनः सत्यकरण योगास्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसाराद्विमोचयन्ति ।।

[भा.१६८१] सीसो पडिच्छओ वा कुलगणसंघो न सोग्गतिं नेति ।
जे सच्चकरण जोगा ते संसारा विमोएंति ।।

वृ- शिष्यः प्रतीच्छको वा कुलं वा गणा वा सङ्घो वा न सुगतिं नयति, किन्तु ये सत्यकरणयोगास्ते संसाराद्विमोचयन्ति ।।

[भा.१६८२] सीसो पडिच्छतो वा कुलगणसंङ्घो वा एते इहलोए ।
जे सच्चकरणजोगा ते संसारा विमोएंति ।।

वृ- सुगमाः शीतगृहसमः सङ्घ इत्युक्त । तत्र शीतगृहसमतां व्याख्यानयति-

[भा.१६८३] सीसे कुलव्विए वा गणव्विय संघव्विए य समदरिसी ।
ववहारसंथवेसु य सो सीयधरोवमो संघो ।।

वृ- शिष्ये स्वदीक्षिते कुलव्विएत्ति स्वकुलसम्बन्धिनि गणसम्बन्धिनो सङ्घसम्बन्धिनि च जाते समदर्शी । किमुक्तं भवति ? शिष्याणां कुलगणसङ्घसम्बन्धिनां च परस्परं व्यवहारे जाते समदर्शी तथा संस्तवेषु पूर्वसंस्तुतेषु पश्चात्संस्तुतेषु चान्यैः समं व्यवहारे जाते समदर्शी अतः स सङ्घः शीतगृहोपमः । यथा शीतगृहमाश्रितानां स्वपरविशेषाकरणतः परितापहारी तथा व्यवहारार्थमागतानां सङ्घोऽपि स्वपरविशेषाकरणतः परितापहारीति भावः । सम्प्रति सङ्घशब्दस्य व्युत्पत्तिमाह-

[भा.१६८४] गिहिसंघायं जहिउं संजमसंघायगं उवगएणं ।
नाणचरणसंघायं संघाय ततो हवइ संघो ।।

वृ- गृहिणां संसारिणां मातापित्रादीनांसङ्घातं हित्वा परित्यज्य संयमसङ्घातमुपगतः सन् नमिति वाक्यालङ्कारे । यो ज्ञान चरण सङ्घातं सङ्घातयति आत्मनि स्थितं करोति । स ज्ञानचरणे सङ्घातयन्-भवति सङ्घः । सङ्घातयतीति सङ्घ इति व्युत्पत्ते र्विपरीतस्तु सङ्घो न भवति ।

[भा.१६८५] नाणचरणसंघायं रागद्दोसेहिं जो वि संघाए ।
अबुहो गिहि संघायंमि अप्पाणं मेलितो न सो संघो ।।

वृ- यो ज्ञानचरणसंघातं रागद्वेषैः अनेकैर्व्यक्त्यपेक्षया बहुवचनं विसंघातयति विघटयति । सोऽबुधो मूर्खो गृहिसङ्घाते आत्मानं संघातयति मेलयति स परमार्थतो न सङ्घः, । ज्ञानचरणसङ्घातनलक्षण-प्रवृत्तिनिमित्ताभावात् । तस्यापायरुपं फलमाह–

[भा.१६८६] नाणचरणसंघायं रागद्दोसेहिं जो विसंघाए ।
सो भमिहि संसारं चउरंगं तं अणवदग्गं ।।

वृ- यो ज्ञानचरणसङ्घातं रागद्वेषैर्विसंघातयति विघटयति संसारे चतुर्षु अङ्गेषु नारकतिर्यङ्न-रामरगातिरुपेष्वन्तः पर्यन्तो यस्य स चतुरङ्गांतः । तं अणवदग्गं कालतोऽपरिमाणं भविष्यति, तस्य च संसारं परिभ्रमतो वितथव्यवहारकारित्वोन्मार्गदेशनया तीर्थकराशातनया च बोधिरपि भवान्तरे दुर्लभा । तथा चाह–

[भा.१६८७] दुक्खेन लहइ बोहिं, बोद्धोविय न लभत्ते चरित्तं तु ।
उम्मग्गदेसणाए, तित्थकरासायणयाए य ।।

वृ- वितथं हि व्यहारं कुर्वता तेनोन्मार्गोदेशितः तीर्थकरश्चाशातितस्तत उन्मार्गदेशनया तीर्थकराशातनया च संसारं परिभ्रमन् दुःखेन लभते बोधि, बुद्धोऽपि च न लभते चारित्रं, ।

कस्मान्न लभते इत्याह-

[भा.१६८८] उम्मग्गदेसणाए संतस्स यच्छायणाए मग्गस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बंधति कम्मरयमलं जरमरणमनंतकं घोरं ।।

वृ- उन्मार्गदेशनया सन्तो मार्गस्याच्छादनया स्थगनेन वध्नाति कर्म किं विशिष्ट मित्याह-रज इव रजः संक्रमणोद्वर्तनापवर्तनादि योग्यं मल इव मलो निधत्तनिकाचितावस्थां तथा जरमरणान्यनन्तानि यस्मात्तत् जरामरणानन्तकं प्राकृतत्वाद्विशेषणस्य परनिपातो मकारोऽलाक्षणिकः । अतएव घोररौद्रमतो न लभते बोधिं नापि चारित्रमिति, कीदृशेन पुनर्व्यवहारच्छेत्तव्यस्तत आह-

[भा.१६८९] पंचविहं उवसंपय नाऊणं खेत्तकालपव्वज्जं ।
तो संघमज्झगारे ववहरियव्वं अनिस्साए ।।

वृ- यत एवं वितथव्यहारकरणे दोषास्ततस्तस्मात्पञ्चविधां ज्ञानदर्शनचारित्रतपोवैयावृत्यभेदतः पञ्चप्रकारामुपसम्पदं क्षेत्रं कालं प्रव्रज्यां च ज्ञात्वा संघमध्ये व्यवहर्तव्यम् । किमुक्तं भवति ? यः पञ्चविधायामुपसम्पदि आभवन्तमनाभवन्तं जानाति, यश्च क्षेक्षमक्षेत्रं वा बुध्यते, ।क्षेत्रेऽपिच क्षेत्रिकस्य यदा नयति तत् जानाति, । तथा क्षेत्रे यावन्तं कालमवग्रहो नु व्र (ष) जति, तावन्तं कालमवबुध्यते, तथा प्रवाजयितुं यो जानाति प्रव्राजितोऽपि केनापि तस्य यत् आभवति यच्च ना भवति, तत् जानाति, तेन सङ्घमध्ये अनिश्रया आहारप्रदायिषु स्वकुलसम्बध्यादिषु रागाकरणत इतरेषामद्वेषाकरणतो व्यवहर्तव्यं, । अत्र परस्याशङ्कामाह-

[भा.१६९०] उस्सुत्तं ववहरंतो उ वारितो नेव होइ ववहारो ।
बेतिजइ बहुसुएहिं, कत्तोत्तितो भणइ इणमो ।।

वृ- उत्सूत्रं सूत्रोत्तीर्णं व्यवहरतो बहुश्रुतस्य बहुश्रुतैः कृत इति व्यवहारो नैवान्यैर्वारितस्ततः सप्रमाणमिति यदिब्रुते तत इदं भण्यते, -द्विविधाः खलु व्यवहारच्छेदकास्तद्यथा-प्रशंसनीया अप्रशंसनीयाश्च । तथा चोभयानेव सनिदर्शनमभिधित्सुराह-

[भा.१६९१] तगराए नयरीए एगायरियस्स पासे निप्पणा ।
सोलस सीसा तेसिं, अव्ववहारीउ अट्ठ इमे ।।

वृ- नगर्यां तगरायामेकस्याचार्यस्य पार्श्वे षोडशशिष्या निषणास्तेषां च मध्येऽष्टौ व्यवहारिणोऽष्टौ चाव्यवहारिस्तत्र व्यवहारिणोऽष्टाविमे । तानेवाह-

[भा.१६९२] मा कित्ते कंकटुकं, कुणिमं पक्खुत्तरं व चाइं ।
बहिरं च गुंठसमणं, अंबिलसमणं च निधम्मं ।।

वृ- मा कीर्तय प्रशंसय, व्यवहारिणं कं कमित्याह-कंकटुकं ? कुणपंकुनपनखं २ पक्कं ३ उत्तरं ४ चार्वाकं ५ बधिरं ६ गुण्ठसमानं लाटमायाविसमानं, अम्लसमानं च निर्धर्माणं ८ ।

तत्र कंकटुकं कुणपञ्च प्रतिपादयंति-

[भा.१६९३] कं कडुओ विवमासो, सिद्धिं न उवेइ जस्स ववहारो ।
कुणिम नहो वन सुज्झइ दुच्छेज्जो जस्स ववहारो ।।

वृ- यस्य व्यवहारः कांकटुक माष इव न सिद्धिमुपयाति स कांकटुकव्यवहारयोगात् कांकटुकः यस्य पुनर्व्यवहारो दुच्छेज्जो(द्यो)भवति, न च छिन्नोऽपि सर्वथा निरवशेषः शुद्ध्यति, यत्तथा कुणपे मांसे सूक्ष्मो नखो नकावयवः ।स कुणप नखावयवः । स कुणप नखावयवतुल्यः व्यवहारकरणयोगात्, कुणपं पक्कमुत्तरं चाह-

[भा.१६९४] फलमिव पक्कं पडए पक्कस्सह वा न गच्छए पागं ।
ववहारो तज्जोगा ससिगुत्तसिरिव्व ,सन्नासे ।।

[भा.१६९५] पक्कुल्लोव्व भया वा कज्जंपि न संसया उदीरेंति ।

पाएण अहातोन्निव उत्तरिसो वाहणेणंति ।।

वृ- पक्कस्य व्यवहारः फलमिव पक्कं पतति न पुनः स्थिरोऽवतिष्ठति, अथवा तद्योगात् व्यवहारः पाकं न गच्छति, । यथा चाणाक्यस्य सन्यासे शशीगुप्तश्रीचन्द्रगुप्तस्य लक्ष्मीः । अत एव एतेन पाको गमनेन वा पक्कफलसदृशव्यवहार करणात् स पक्क इति व्यवह्रियते, । अथवा यस्य पक्ककोल्लापभयात् कार्यमपि न शेषका उद्दीरयन्ति ब्रुवते स पक्कः । किमुक्त भवति ? पक्कपक्कानि तादृशानि संभाषते यैः भाषिताः सन्तो अन्ये सद्वादिनस्तूष्णीका आसते, ततः पक्कोल्लापयोगात्सपक्क इति पादेन सोपानहा आहत इत्युत्तरसदृशोत्तरकारी उत्तरः । इयमत्र भावना-केनापि क्वचित्सोपानहा पादेनोपहतः तेन च गत्वा राजकुले निवेदिते कारिणिकैश्च स आकारितः । किं त्वयैष आहतः सप्राह नमयैसआहत, किन्तु सोपानहा पादेन एवं सोऽपि दुर्व्यवहारं कुर्वन गीतार्थेन सुत्रोपदेशतः उपालब्धः सन्नेतादृशैः छलवचनैरुत्तरं ददाति । ततः कदुत्तरकरणात् स उत्तर इति । सम्प्रति चार्वाकिबधिरं चाह-

[भा.१६९६] रोमंथयते कज्जं वद्यागी नीरसं च विसनेरिं ।
कहिते कहिते कज्जे भणाति बहिरोव न सुयंमे ।।

वृ- यथा वृषनेत्रंवृषसागारिकंनीरसमपरो वृषभश्चर्वयति एवं यः कार्यं रोमन्थायमाणो निष्फलं स्चयन् तिष्ठन् चर्वणशीलः चार्वादिकः, । तथा यः कथिते कार्ये बधिर इव ब्रूते, न सुष्ठु मया श्रुतमिति स बधिर इव बधिरः; गुण्ठ समानमम्लसमानं चाह–

[भा.१६९७] मरहट्ठलाडपुच्छा केरिसिया लाडगुंठसाहिंसु ।
पावारभंडिछुभणं दसिया गणणे पुनो दानं ।।

[भा.१६९८] गुंठाहिं एवमादीहिं, हरति मोहित्तु तंतु ववहारं ।
अंबफरिसेहिं अंबो, न तेहिं सिद्धिं तु ववहारं ।।

वृ- एको लाटो गन्त्र्या किमपि नगरं व्रजति अपान्तराले च पथि महाराष्ट्रिको मिलितस्तेन लाटस्य पृच्छा कृता कीदृशाः खलु लाटा गुण्ठामायाविनोभवन्ति । स प्राह-पश्चात्साधयिष्यामि, । मार्गे च गच्छतां शीतवेलाऽपगता ततो नष्टे शीते महाराष्ट्रिकेण प्रावारो गन्त्र्यां क्षिप्तः, । तस्य च प्रावारस्य दशका लाटेन गणितास्ततो नगरप्राप्तौ महाराष्ट्रिकेण प्रावारो ग्रहीतुमारब्धः । लाटो ब्रूते- किं मदीयं प्रावारं गृह्णासि ? । एवं तयोः परस्परं विवादो जातो महाराष्ट्रिकेण लाटो राजकुले कर्षितो विवादे लाटोऽवादीत् । पृच्छत महाराष्ट्रिक यदि तव प्रावारः तर्हि कथय, कति दशास्य सन्ति । महाराष्ट्रिकेण न कथितास्तेन च लाटेन कर्षिता इति महाराष्ट्रिको जितस्ततो राजकुलादपसृत्य लाटेन महाराष्ट्रकमाकार्य प्रावारं च तस्मै दत्वा ब्रूते,-वर मित्र यत्त्वया पृष्टं कीदृशा लाटगुण्ठा भवन्तीति तत्रेदृशालाटगुण्ठा भवन्तीति । एवमादिभिर्गुण्ठाभिर्मायाभिर्यो मोहयित्वा तं प्रस्तुतं व्यवहारं हरति अपनयति स गुण्ठसमानः । तथा येषु वचनेषूक्तेषु परस्य शरीरं विडविडायतेतानि अम्लानि अम्लैः पुरुषश्च वचनैर्व्यवहारं न सिद्धिं नयति, । सोऽम्लवचनयोगादम्ल इति उपसंहारमाह–

[भा.१६९९] एए अकज्जकारी तगराए आसिं तंमि उ जुगंमि ।
जेहिं कया ववहारा खोडिज्जंत अणकज्जेसु ।।

वृ- एते अनन्तरोक्तस्वरुपा अष्टौ कार्यकारिणो दुर्व्यवहारिणस्तस्मिन् गुणे तस्मिन् विवक्षिते काले तगरायामासीरन् । यैः कृता व्यवहारा अन्येषु राज्येषु खोद्यन्ते, दुर्व्यवहारिणामिह परलोके च फलमाह-

[भा.१७००] इह लोए य अकित्ती, परलोए दुग्गती धुवा तेसिं ।
अणाणाए जिणेंदाणं जे ववहारं ववहरंति ।।

वृ- ये जिनेन्द्राणामनाज्ञया व्यवहारं व्यवहरन्ति, तेषामिह लोकेऽकीर्तिः परलोके ध्रुवा दुर्गतिः ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

[भा.१७०१] तेन न बहुस्सुतोवी होइ पमाणं अनायकारिओ ।
नाएण ववहरंतो, होई पमाणं जहाउ इमे ।।

वृ- यत एवं दुर्व्यवहारिण इह लोकेऽपकीर्तिः परलोके दुर्गतिस्तेन कारणेन बहुश्रुतोऽप्यन्यायकारी न भवति प्रमाणं, न्यायेन पुनर्व्यवहरन् भवति प्रमाणं यथा इमे वक्ष्यमाणाः तगरायां तस्यैवाचार्यस्याष्टौ शिष्यास्तानेवाह–

[भा.१७०२] कित्तेहि पूसमित्तं वीरं सिवकोट्ठगस्स अज्ञासं ।
अरहन्नग धम्मणगरवंदिल गोविन्ददत्तं य ।।

वृ- कीर्त्तय प्रशंसय, सुव्यवहारकारितया पुष्पमित्रं १ वीरं २ शिवकोष्टकं ३ आर्यासं ४ अर्हंतकं ५ धर्मान्विगं ६ स्कन्दिलं ७ गोपेन्ददत्तं च ८ ।।

[भा.१७०३] एते उ कज्जकारी तगराए आसि तंमि जुगम्मि ।
जेहिं कया ववहारा अक्खोभा अन्नरज्जेसु ।।

वृ- एते अनन्तरोदितास्तस्मिन् युगे तस्मिन् काले कार्यकारिणः सुव्यवहारिणः तगरायामासीरन् । यैः कृता व्यवहारा अक्षोभ्याऽचाल्यान्यराज्येषु; सुव्यवहारिणामिह परलोके च फलमाह-

[भा.१७०४] इह लोगंमि य कित्ती परलोगे सोगती धुवा तेसिं ।
आणाए जिणिंदाणं जे ववहारं ववहरंति ।।

वृ- ये जिनेन्द्राणामाज्ञया व्यवहारं व्यवहरन्तिं तेषामिह लोके कीर्तिः परलोके सुगतिः ध्रुवा ।

[भा.१७०५] केरिसतो ववहारी आयरियस्स जुगप्पहाणस्स ।
जेणेसकासेगहियं, परिवाडीहि तिहिं असेसं ।।

वृ- कीदृशो ननु व्यवहारी भवति, एवं शिष्येण प्रश्ने कृते सूरिराह-येन युगप्रधानस्याचार्यस्य सकाशे समीपे तिसृभिः परिपाटीभिरशेषं श्रुतं व्यवहारादिकमवगृहीतं । ता एव परिपाटीराह-

[भा.१७०६] सूयपारायणं पढमं, बिइए पदुब्भेदितं ।
तइयं च निरवसेसं-जति सुज्झातिगाहगे ।।

वृ- प्रथमं सूचकपारायणं अर्थपरिसमाप्त्या पदच्छेदेन सूत्रोच्चारणं, संहितेति भावार्थः । द्वितीयं पदोद्भेदकं पारायणं पदविभागः पदार्थमात्रकथनपदं विग्रहफला द्वितीया परिपाटीति भावः । तृतीयं पारायणं निरवशेषं चालना प्रत्यवस्थानात्मिका तृतीया परिपाटीत्यर्थः, । एवं श्रुते यदि शङ्का भवति तर्हि ग्राहक आचार्यः शोधयति परीक्षते इत्यर्थः । कथमिति चेदुच्यते-तिसृभिः परिपाटीभिः श्रुतेऽपि व्यवहारादिके ग्रन्थे सूरिणा स विचारणीयः किं सम्यक् गृहीतं न वा, गृहीतेऽपि पुनः परीक्षणीयः किं व्यवहारी अव्यवहारी वा, तत्र यदि व्यवहारी तर्हि योग्यः । अथाव्यवहारी अयोग्यः, । अथवा ग्राहको नाम शिष्यः, स यदि तिसृभिः परिपाटीभिः शुद्ध्यति भावतो निःशेषसूत्रार्थपारगो भवति, ततः स व्यवहारो क्रियत्ते, । एतदेवव्याख्यानद्वयं विवदिषुराह-

[भा.१७०७] गाहगो आयरिओ ऊ, पुच्छइ सो जाणि विसमठाणाणि ।
जइ निव्वहतीतहियं, तस्सहिययं तु तो सुज्झे ।।

वृ- ग्राहक आचार्यः ग्राहयतीति ग्राहक इति व्युत्पत्तेः, स यानि विषमाणि स्थानानि पृच्छति । तत्र यदि निर्वहति । किमुक्तं भवति ? तस्य हृदयं सम्यगभिप्रायं जानाति ततः शुध्यति व्यवहर्तुं व्यवहारकरणयोग्यः । द्वितीयं व्याख्यानमाह-

[भा.१७०८] अहवा गाहगो सीसो, तिहिं परिवाडीहिं जेन निस्सेसं ।
गहियं गुणियं अवधारियं च सोहोइ ववहारी ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथवा ग्राहको नाम शिष्यः गृह्णातीति ग्राहकः इति व्युत्पत्तेर्येन तिसृभिः परिपाटीभिः निर्विशेषं व्यवहारादिकं गृहीतं परिपाटया प्रथमतः पश्चाद्गुणितमने कवारमभ्यस्सी कृतमवधारित्तं तात्पर्यग्रह्णतो हृदयं विश्रामितं स भवति व्यवहारी ।।

[भा.१७०९] पारायणे सम्मत्ते, थिरपरिवाडी पुनो उ संविग्गे ।
जो निग्गओ वितिओ गुरुहिं सो होइ ववहारी ।।

वृ- पारायणे सूचकादि लक्षणे त्रिविधे समाप्तेऽपि पुनर्यः संविग्ने संविग्नसमीपे स्थिरपरिपाटीरभूद्यश्च गुरुभिर्वितीर्णोऽनुज्ञातः सन् निर्गतो विहारक्रमेण स भवति व्यवहारी, न शेषस्तथा चाह-

[भा.१७१०] पडिनीयमंदधम्मो, जो निग्गतो अप्पणो सकम्मेहिं ।
न हु सो होइ पमाणं, असंभतो देस निग्गमने ।।

वृ- आत्मनः परेषां च प्रतिकूलः प्रत्यनीको धर्मे मन्दो मन्दधर्मः राजदन्तादि दर्शनात् धर्मशब्दस्य परनिपातः, संयमे शिथिल इत्यर्थः । तथा य आत्मनः स्वकर्मभिः स्वव्यापारैर्निर्गतो विहारक्रमेण न तु गुरुभिरनुज्ञातः सन् हु नैव भवति प्रमाणमसमाप्तश्च भवति देशनिर्गमनेन देशेषु विहारक्रमकरणे ।।

[भा.१७११] आयरियादेसा धारिएण अत्थेण गुणिवक्खरिएण ।
तो संघमज्झयारे ववहरियव्वं अनिस्साए ।।

वृ- यत एवं विपक्षे दोषास्तस्मात्सङ्घमध्यकारे कारशब्दोऽत्र स्वरुपमात्रे सङ्घमध्ये व्यवहर्त्तव्यमर्थेन किं विशिष्टेनेत्याहाचार्यादेशात् आचार्यकथनादवधारितेन एतेन सम्प्रदायागतत्वमावेदितं, । तथा गुणितेन अनेकशः परावर्तित्वेन अक्षरितेन कस्मत्त क्षणतः स्थिरतयावस्थितसारेण । एवं भूतेनाप्यर्थेन व्यवहर्तव्यमनिश्रया रागद्वेषा करणे नान्यथा अर्थस्य तत्वतोऽक्षरितत्वानुपपत्तेः ।

[भा.१७१२] आयरिय आणादेसा धारिएण सच्छंदबुद्धिरइएण ।
सचित्तखेत्तमीसे जो ववहरति न सो धनो ।।

वृ- यः सचित्त व्यवहारे क्षेत्रव्यवहारे मिश्रव्यवहारे च प्रागुक्तस्वरुपेऽर्थे न व्यवहरति आचार्यानादेशात् धारितेन आचार्योपदेशमृते धारितेन कथमित्याह-स्वच्छन्दबुद्धिरचितेन स्वेच्छया निजबुद्ध्या निजबुद्धिकलितेन न स धन्यः श्रेयान् इति । यतः-

[भा.१७१३] सोभिमुहेइ लुद्धो संसारकडिल्लगंमि अप्पाणं ।
उम्मग्गदेसणाए तित्थयरासायणाए य ।।

वृ- स उन्मार्गदिशनया तीर्थकराणामाशातनया चात्मानं संसारगहनेऽभिमुखयत्यभिमुखं करोति पातयतीत्यर्थस्तस्मान्न स धन्यः । अधुनास्यैव प्रायश्चित्तमाह-

[भा.१७१४] उममग देसणाए संतस्स छायणाए भग्गस्स,
ववहरिओमवायंते, मासा चत्तारि भारिया ।।

वृ- उन्मार्गदिशनया सतो मार्गस्याच्छादनया च व्यवहरन् गीतार्थैः प्रतिषिध्यंते प्रतिषेधितश्च व्यवहरितुमशक्नुवति प्रायश्चित्तं चत्वारो गुरुका मासाः ।

[भा.१७१५] गारवरहिएण तहिं ववहरियव्वं तु संघमज्झंमि ।
को पुन गारवइणमो परिवारादी मुणेयव्वो ।।

वृ- तत्रापि गौरवरहितेन संघमध्ये व्यवहर्तव्यं । किंपुनर्गौरवमिति चेत् सूरिराह-इदं वक्ष्यमाणं परिवारादिकं परिवारादिविषयं ज्ञातव्यम् । तदेवाह-

[भा.१७१६] परिवार इड्ढीधम्मकह वादि खमगा तहेव नेमित्ती ।
विज्जा रायनियाए गारवो इति अठहा होइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- परिवारगौरवं १ ऋद्धिगौरवं २ धर्मकथी अहमिति गौरवं ३ वाद्यहमिति गौरवं ४ क्षपकोऽहमिति गौरवं ५ नैमित्तिकोऽहमिति गौरवं ६ विद्यागौरवं ७ रत्नाधिकतागौरव ८ मित्येवममुना प्रकारेणाष्टधा प्रकारं गौरवं भवति ।

[भा.१७१७]　बहु परिवारमहिड्ढी निक्खंतो वावि धम्मकहवादी ।
जइ गारवेण जंपिज्जइ अगीतो भणइ इणमो ॥

वृ- बहुपरिवारो १ महर्द्धिको वा निष्क्रान्तो २ धर्मकथी ३ वादी ४ उपलक्षणमेतत् क्षपको नैमित्तिको विद्यावान् रात्निको वा यदि गोरवेणा गीतार्थः सन् जल्पेत यूयमस्मानेव प्रमाणीकुरुथेति, तर्हि स इदं वक्ष्यमाणं भण्यते । तदेवाह--

[भा.१७१८]　जत्थ उ परिवारेणं पयोयणं तत्थ भणिहह तुज्झे ।
इड्ढीमंतेसु तहा धम्मकहा वायकज्जे वा ॥

[भा.१७१९]　पवयणकज्जे खमगो नेमित्ती चेव विज्जसिद्धे य ।
रायनिए वंदनायं जहिं दायव्वं तहिं भणेज्जा ॥

वृ- परिवारगौरवानिदं भण्यते-यत्र सङ्घस्य प्रेषणादिके कार्ये समुत्पन्ने परिवारेण प्रयोजनं भविष्यति, तत्र यूयं भणिष्यथ, । तत्र प्रमाणी करिष्यध्वे यूयं नात्र प्रस्तुते व्यवहारे इति भावः, । तथा ऋद्धिमत्सु वक्तव्यं धर्मकथा प्रयोजने वादी वादकार्ये । इयमत्र भावना-ऋद्धिगौरवोपेतो महार्द्धिक एवमुच्यते । यदि लोकेन कृत्यं भविष्यति, तदा त्वं प्रमाणीकृत्य तत्पार्श्वात् लोकोऽनुवर्तिष्यते, धर्मकथी भण्यते । यदि राजादीनां धर्मः कथयितव्यो भविष्यति, तदा युष्मान्वयमभ्यर्थयिष्यामो, यथा कथय कथानकं सम्प्रति राजादीनामिति, वादी भण्यते यदा परवादी कश्चनाप्युत्थास्यति तदा तवोपरोधः करिष्यते यथा निगृह्णीथ कथमप्येनं वादिनमिति । तथा क्षपको नैमित्तिको विद्यासिद्धो वा प्रवचनकार्ये उपालम्भनीयो यथा क्षपकःयदा संघस्य कृत्ये देवतया प्रयोजनं भविष्यति, तदा त्वं कार्योत्सर्गं कारयित्वा सा आकम्पयिष्यते, । नैमित्तिको भण्यते यदि सङ्घस्य निमित्तेन प्रयोजनं भविष्यति, तदात्वमभ्यर्थयिष्यसे, । विद्यासिद्धो भण्यते,-यदा संघस्य कार्यं विद्यया साधनीयं भविष्यति, तदा त्वत्पार्श्वात्साधयिष्यते, । रात्निके रत्नाधिके पुनरेवं भण्यते-यत्र पाक्षिकादिवन्दनकं दातव्यं भविष्यति तत्र यूयं भणिष्यत । किमिदानीमायासं कुरुतेति । एतच्च स तान् प्रतिमाह--

[भा.१७२०]　न हु गारवेण सक्का ववहरिउं संघमज्झयारंमि,
नासेइ अगीयत्थो, अप्पाणं चेव कज्जं तु ॥

वृ- बहुनैव संघमध्ये गौरवेण शक्यं व्यवहर्त्तव्यमन्यैर्जिनाराधकैर्गीतार्थैर्निवारणात्केवलं सोऽगीतार्थस्तथा दुर्व्यवहारं कुर्वन् आत्मीयमेव कार्यं नाशयति । उत्सूत्रप्ररूपणातो-ऽबोधिफलनिविडकर्मबन्धनात्तथा चाह--

[भा.१७२१]　नासेइ अगीयत्थो, चउरंगं सव्वलोए सारंगं ।
नट्ठंमि उ चउरंगे, न हु सुलभं होइ चउरंगं ॥

वृ- अगीतार्थो गौरवेन यो व्यवहरन् अबोधिफलकर्म बन्धनाच्चतुर्णामङ्गानां समाहारश्चतुरङ्गं मानुषत्वं श्रुतिः । श्रद्धासंयमे च वीर्यमित्येवं रूपं कथंभूतमित्याह-सर्वस्मिन्नपि लोके सारमङ्गं स्वरूपं यस्य तत्सर्वलोकसारांगं नाशयति । नष्टे च तस्मिन् चतुरंगेन बहुनैव भूयो भवति । सुलभं चतुरंगं

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

निबिडकर्मणाऽनर्वाक् पारे संसारे क्षिप्तत्वात् ।

[भा.१७२२] थिरपरिवाडीएहिं संविग्गेहिं अनिस्सियकरेहिं ।
कज्जेसु जंपियव्वं अनुओगियं गंधहत्थीहिं ।।

वृ- स्थिराः सूत्रार्थपरिपाट्यो येषां ते स्थिरपरिपाटीकास्तैः संविग्नैः मोक्षाभिलाषिभिरनिश्रितकरैः रागद्वेषपरिहारतो यथावस्थित व्यवहारकारिभिः आनुयोगिक गन्धहस्तिभिरनुयोगधरप्रकाण्डैः कार्येषु जल्पितव्यं, नशेषैरिति । एतदेव भावयति—

[भा.१७१५] एयगुणसंपउत्तो ववहरई संघमज्झयारंमि ।
एयगुणविप्पमुक्के आसायण सुमहती होति ।।

वृ- एतैरनन्तरगाथयोक्तैः स्थिरपरिपाटीकत्वादिभिर्गुणैः सम्प्रयुक्तः सङ्घमध्ये व्यवहरति । एतद्गुणविनुक्ते पुनर्व्यवहरति सुमहती आशातना भवति, । न केवलमाशातना व्रतलोपश्च तथा चाह—

[भा.१७१६] आगाढमुसावादी वितियतईए य लोवति वएऊ ।
माईय पावजीवी असुईकन्ने कणगदंडे ।।

वृ- आगाढे कुलकार्ये गणकार्ये सङ्घकार्ये वा अनाभाव्यस्या भावस्या वा नाभाव्यस्य ज्ञानतया रागद्वेषाज्ञानस्य वा भणनात् मृषा वदतीत्येवं शील आगाढे मृषावादी द्वितीयतृतीयमृषावादादत्तादानविरतिरूपे व्रते लोपयति, । तत्र द्वितीयव्रतलोपो मृषावादभणनात् तृतीयव्रतलोपो ना भाव्यं ग्राह्यतोऽनुमतिदोषभावात् तु शुद्धात् शेषाण्यपि व्रतानि लोपयति । एकव्रतलोपे सर्वव्रतलोप इति वचनात् । मायी सूत्रमुल्लङ्घ्य शठोक्तैर्व्यवहारकरणात् पापजीवी दुर्व्यवहारादिकरणात्परदत्तापराहाराद्युप जीवनात् अत एवाशुचिर्मृषावादित्वादिदोषदुष्टत्वात् । अशुचित्वादेव यथा कनकदण्डः संज्ञालिप्तः स्पृष्टुं न कल्पते । एवमेषोऽपि न कल्पते । यावज्जीवमाचार्यत्वादि परेषु स्थापयितव्यमिति ।

<u>उद्देशक-३ : समाप्त</u>

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहारसूत्रे तृतीयोद्देशकस्य
संघदासगणि विरचितंभाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

३६/१	तृतीयं छेदसूत्रं "व्यवहारं" समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

પંચમ ગણધર શ્રી સુધર્મા સ્વામી	ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી
દશ પૂર્વધર શ્રી શય્યંભવસૂરિ	(અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ
દેવવાચક ગણિ	શ્રી શ્યામાચાર્ય
દેવર્દ્ધિગણિ ક્ષમાશ્રમણ	જિનભદ્ર ગણિ ક્ષમાશ્રમણ
સંઘદાસગણિ	સિદ્ધસેન ગણિ
જિનદાસ ગણિ મહત્તર	અગત્સ્યસિંહ સૂરિ
શીલાંકાચાર્ય	અભયદેવસૂરિ
મલયગિરિસૂરિ	ક્ષેમકીર્તિસૂરિ
હરિભદ્રસૂરિ	આર્યરક્ષિત સૂરિ (?)
દ્રોણાચાર્ય	ચંદ્ર સૂરિ
વાદિવેતાલ શાંતિચંદ્ર સૂરિ	મલ્લધારી હેમચંદ્રસૂરિ
શાંતિચંદ્ર ઉપાધ્યાય	ધર્મસાગર ઉપાધ્યાય
ગુણરત્નસૂરી	વિજય વિમલગણિ
વીરભદ્ર ઋષિપાલ	બ્રહ્મમુનિ તિલકસૂરિ

સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

આનંદ સાગરસૂરિજી	ચંદ્રસાગર સૂરિજી	મુનિ માણેક
જિન વિજયજી	પુન્યવિજયજી	ચતુરવિજયજી
જંબુ વિજયજી	અમરમુનિજી	કનૈયાલાલજી
લાભસાગરસુરિજી	આચાર્ય તુલસી	ચંપક સાગરજી

સ્મરણાંજલિ

બાબુ ધનપતસિંહ	પં૦ બેચરદાસ	પં૦ જીવરાજભાઈ
પં૦ ભગવાનદાસ	પં૦ રૂપેન્દ્રકુમાર	પં૦ હીરાલાલ

શ્રુત પ્રકાશક સર્વે સંસ્થાઓ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

क्रम	आगमसूत्रनाम	मूल श्लोक प्रमाण	वृत्ति-कर्ता	वृत्ति श्लोकप्रमाण
१.	आचार	२५५४	शीलाङ्काचार्य	१२०००
२.	सूत्रकृत	२१००	शीलाङ्काचार्य	१२८५०
३.	स्थान	३७००	अभदेवसूरि	१४२५०
४.	समवाय	१६६७	अभयदेवसूरि	३५७५
५.	भगवती	१५७५१	अभयदेवसूरि	१८६१६
६.	ज्ञाताधर्मकथा	५४५०	अभयदेवसूरि	३८००
७.	उपासकदशा	८१२	अभयदेवसूरि	८००
८.	अन्तकृद्दशा	९००	अभयदेवसूरि	४००
९.	अनुत्तरोपपातिकदशा	१९२	अभयदेवसूरि	१००
१०.	प्रश्नव्याकरण	१३००	अभयदेवसूरि	५६३०
११.	विपाकश्रुत	१२५०	अभयदेवसूरि	९००
१२.	औपपातिक	११६७	अभयदेवसूरि	३१२५
१३.	राजप्रश्निय	२१२०	मलयगिरिसूरि	३७००
१४.	जीवाजीवाभिगम	४७००	मलयगिरिसूरि	१४०००
१५.	प्रज्ञापना	७७८७	मलयगिरिसूरि	१६०००
१६.	सूर्यप्रज्ञप्ति	२२९६	मलयगिरिसूरि	९०००
१७.	चन्द्रप्रज्ञप्ति	२३००	मलयगिरिसूरि	९१००
१८.	जम्बूद्वीपप्रज्ञप्ति	४४५४	शान्तिचन्द्रउपाध्याय	१८०००
१९थी	निरयावलिका	११००	चन्द्रसूरि	६००
२३.	(पञ्च उपाङ्ग)	–	–	–
२४.	चतुःशरण	८०	विजयविमलयगणि	(?) २००
२५.	आतुर प्रत्याख्यान	१००	गुणरत्नसूरि (अवचूरि)	(?) १५०
२६.	महाप्रत्याख्यान	१७६	आनन्दसागरसूरि (संस्कृतछाया)	१७६
२७.	भक्तपरिज्ञा	२१५	आनन्दसागरसूरि (संस्कृतछाया)	२१५
२८.	तन्दुल वैचारिक	५००	विजयविमलगणि	(?) ५००
२९.	संस्तारक	१५५	गुणरत्न सूरि (अवचूरि)	११०
३०.	गच्छाचार★	१७५	विजयविमलगणि	१५६०
३१.	गणिविद्या	१०५	आनन्दसागरसूरि (संस्कृतछाया)	१०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रम	आगमसूत्रनाम	• मूल श्लोक प्रमाण	वृत्ति-कर्ता	• वृत्ति श्लोकप्रमाण
३२.	देवेन्द्रस्तव	३७५	आनन्दसागरसूरि (संस्कृत छाया)	३७५
३३.	मरणसमाधि ★	८३७	आनन्दसागरसूरि (संस्कृत छाया)	८३७
३४.	निशीथ	८२१	जिनदासगणि (चूर्णि)	२८०००
			सङ्घदासगणि (भाष्य)	७५००
३५.	बृहत्कल्प	४७३	मलयगिरि+क्षेमकीर्ति	४२६००
			सङ्घदासगणि (भाष्य)	७६००
३६.	व्यवहार	३७३	मलयगिरि	३४०००
			सङ्घदासगणि (भाष्य)	६४००
३७.	दशाश्रुतस्कन्ध	८९६	- ? - (चूर्णि)	२२२५
३८.	जीतकल्प ★	१३०	सिद्धसेनगणि (चूर्णि)	१०००
३९.	महानिशीथ	४५४८	—	—
४०.	आवश्यक	१३०	हरिभद्रसूरि	२२०००
४१.	ओघनिर्युक्ति	नि.१३५५	द्रोणाचार्य	(?)७५००
-	पिण्डनिर्युक्ति ★	नि. ८३५	मलयगिरिसूरि	७०००
४२.	दशवैकालिक	८३५	हरिभद्रसूरि	७०००
४३.	उत्तराध्ययन	२०००	शांतिसूरि	१६०००
४४.	नन्दी	७००	मलयगिरिसूरि	७७३२
४५.	अनुयोगद्वार	२०००	मलधारीहेमचन्द्रसूरि	५९००

નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, ૧૨ થી ૨૩ उपांगसूत्रो, २४थी३३ प्रकीर्णकसूत्रो ३४थी ३९ छेदसूत्रो, ४० थी ४३ मूलसूत्रो, ४४-४५ चूलिकासूत्रोના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત વૃત્તિ-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ वृत्ति-चूर्णि આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे ''आगमसुत्ताणि''मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड એ બંને निर्युक्ति વિકલ્પે છે. જે હાલ મૂળસૂત્ર રૂપે પ્રસિધ્ધ છે. જે બંનેની वृत्ति અમે આપી છે. તેમજ તેમાં भाष्यની ગાથાઓ પણ સમાવિષ્ટ થઈ છે.

(૬) ચાર प्रकीर्णक सूत्रो અને महानिशीथ એ પાંચ આગમની કોઈ वृत्ति આદિ ઉપલબ્ધ થવાનો ઉલ્લેખ મળતો નથી. प्रकीर्णक ની संस्कृत छाया ઉપલબ્ધ છે તેથી મૂકી છે. निशीथ-दशा-जितकल्प એ ત્રણેની चूर्णि આપી છે. જેમાં दशा અને जीतकल्प એ બંને ઉપરवृत्ति મળતી હોવાનો ઉલ્લેખ છે, પણ અમે તે મેળવી શક્યા નથી. જ્યારે निशीथ ઉપર તો માત્ર વીસમા उद्देशकःની જ वृत्ति નો ઉલ્લેખ મળે છે.

➡ વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ निर्युक्तिः ⬅

क्रम	निर्युक्ति	श्लोकप्रमाण	क्रम	निर्युक्ति	श्लोकप्रमाण
१.	आचार-निर्युक्ति	४५०	६.	आवश्यक–निर्युक्ति	२५००
२.	सूत्रकृत-निर्युक्ति	२६५	७.	ओघनिर्युक्ति	१३५५
३.	बृहत्कल्प-निर्युक्ति ★	–	८.	पिण्डनिर्युक्ति	८३५
४.	व्यवहार-निर्युक्ति ★	–	९.	दशवैकालिक-निर्युक्ति	५००
५.	दशाश्रुत०-निर्युक्ति	१८०	१०.	उत्तराध्ययन-निर्युक्ति	७००

નોંધ :-

(१) અહીં આપેલ श्लोक प्रमाण એ ગાથા સંખ્યા નથી. ''૩૨ અક્ષરનો એક શ્લોક'' એ પ્રમાણથી નોંધાયેલ श्लोक प्रमाण છે.

(२) ★ बृहत्कल्प અને व्यवहार એ બંને સૂત્રોની निर्युक्ति હાલ भाष्य માં ભળી ગઈ છે. જેનો યથાસંભવ ઉલ્લેખ वृत्तिकार महर्षि એ भाष्य ઉપરની वृत्तिમાં કર્યો હોય તેવું જોવા મળેલ છે.

(३) ओघ અને पिण्डनिर्युक्ति સ્વતંત્ર मूलआगम સ્વરૂપે સ્થાન પામેલ છે તેથી તેનું સ્વતંત્ર સંપાદન आगम-४१ રૂપે થયેલ છે. (તેમજ આ સંપાદનમાં પણ છે.)

(४) બાકીની छ निर्युक्तिમાંથી दशाश्रुतस्कन्ध निर्युक्ति ઉપર चूर्णि અને અન્ય પાંચ निर्युक्ति ઉપરની वृत्ति અમે અમારા સંપાદનમાં પ્રકાશીત કરી છે. જ્યાં આ छ निर्युक्ति સ્પષ્ટ અલગ જોઈ શકાય છે.

(५) निर्युक्तिकर्ता તરીકે भद्रबाहुस्वामी નો ઉલ્લેખ જ જોવા મળે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

क्रम	भाष्य	श्लोकप्रमाण	क्रम	भाष्य	गाथाप्रमाण
१.	निशीषभाष्य	७५००	६.	आवश्यकभाष्य ★	४८३
२.	बृहत्कल्पभाष्य	७६००	७.	ओघनिर्युक्तिभाष्य ★	३२२
३.	व्यवहारभाष्य	६४००	८.	पिण्डनिर्युक्तिभाष्य ★	४६
४.	पञ्चकल्पभाष्य	३१८५	९.	दशवैकालिकभाष्य ★	६३
५.	जीतकल्पभाष्य	३१२५	१०.	उत्तराध्ययनभाष्य (?)	–

નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા મૂળભાષ્ય રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે ભાષ્યગાથા જોવા મળે છે.

(૭) ભાષ્યકર્તા તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ चूर्णि:

क्रम	चूर्णि	श्लोकप्रमाण	क्रम	चूर्णि	श्लोकप्रमाण
१.	आचार-चूर्णि	८३००	९.	दशाश्रुतस्कन्धचूर्णि	२२२५
२.	सूत्रकृत-चूर्णि	९९००	१०.	पञ्चकल्पचूर्णि	३२७५
३.	भगवती-चूर्णि	३११४	११.	जीतकल्पचूर्णि	१०००
४.	जीवाभिगम-चूर्णि	१५००	१२.	आवश्यकचूर्णि	१८५००
५.	जंबूद्वीपप्रज्ञप्ति-चूर्णि	१८७९	१३.	दशवैकालिकचूर्णि	७०००
६.	निशीथचूर्णि	२८०००	१४.	उत्तराध्ययनचूर्णि	५८५०
७.	वृहत्कल्पचूर्णि	१६०००	१५.	नन्दीचूर्णि	१५००
८.	व्यवहारचूर्णि	१२००	१६.	अनुयोगदारचूर्णि	२२६५

નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिમાંથી निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ वृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार तरीके जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

"આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"

૧ *વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત પંચાંગી એક માત્ર आवश्यक सूत्रની ગણાય.*

૨ *नंदीसूत्र માં પંચાંગીને બદલે संग्रहणी, प्रतिपत्ति ઓ વગેરેના પણ ઉલ્લેખ છે.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धનો છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક मूलनो છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને ગાથા/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા શ્રુતસ્કન્ધ માં જ છે.

(૨) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(૩) **स्थान** - स्थानं/अध्ययनं/मूलं

(૪) **समवाय** - समवायः/मूलं

(૫) **भगवती** - शतकं/वर्ग्गः-अंतरशतकं/उद्देशकः/मूलं
અહીં शतक ના પેટા વિભાગમાં બે નામો છે. (૧) **वर्ग्गः** (૨) **अंतर्‌शतक** કેમકે **शतक** ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ **वर्ग्गः** જ જણાવેલ છે. शतक - ૩૩,૩૪,૩૫,૩૬,૪૦ ના પેટા વિભાગને अंतरशतक અથવા **शतकशतक** નામથી ઓળખાવાય છે.

(૬) **ज्ञाताधर्मकथा**- श्रुतस्कन्धः/वर्ग्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग्ग નામે છે અને તે वर्ग्ग ના પેટા વિભાગમાં अध्ययन છે.

(૭) **उपासकदशा**- अध्ययनं/मूलं

(૮) **अन्तकृद्दशा**- वर्ग्गः/अध्ययनं/मूलं

(૯) **अनुत्तरोपपातिकदशा**- वर्ग्गः/अध्ययनं/मूलं

(૧૦) **प्रश्नव्याकरण**- द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(૧૧) **विपाकश्रुत**- श्रुतस्कन्धः/अध्ययनं/मूलं

(૧૨) **औपपातिक**- मूलं

(૧૩) **राजप्रश्नीय**- मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४) **जीवाजीवाभिगम-** *प्रतिपत्तिः/* उद्देशकः/मूलं
આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -૩-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(१५) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(१६) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(१७) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(१८) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સુત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

क्रम	आगमसूत्र	मूलं	गाथा	क्रम	आगमसूत्र	मूलं	गाथा
१.	आचार	५५२	१४७	२४.	चतुःशरण	६३	६३
२.	सूत्रकृत	८०६	७२३	२५.	आतुरप्रत्याख्यान	७१	७०
३.	स्थान	१०१०	१६९	२६.	महाप्रत्याख्यानं	१४२	१४२
४.	समवाय	३८३	९३	२७.	भक्तपरिज्ञा	१७२	१७२
५.	भगवती	१०८७	११४	२८.	तंदुलवैचारिक	१६१	१३९
६.	ज्ञाताधर्मकथा	२४१	५७	२९.	संस्तारक	१३३	१३३
७.	उपासक दशा	७३	१३	३०.	गच्छाचार	१३७	१३७
८.	अन्तकृद्दशा	६२	१२	३१.	गणिविद्या	८२	८२
९.	अनुत्तरोपपातिक	१३	४	३२.	देवेन्द्रस्तव	३०७	३०७
१०.	प्रश्नव्याकरण	४७	१४	३३.	मरणसमाधि	६६४	६६४
११.	विपाकश्रुत	४७	३	३४.	निशीष	१४२०	–
१२.	औपपातिक	७७	३०	३५.	बृहत्कल्प	२१५	–
१३.	राजप्रश्निय	८५	–	३६.	व्यवहार	२८५	–
१४.	जीवाभिगम	३९८	९३	३७.	दशाश्रुतस्कन्ध	११४	५६
१५.	प्रज्ञापना	६२२	२३१	३८.	जीतकल्प	१०३	१०३
१६.	सूर्यप्रज्ञप्ति	२१४	१०३	३९.	महानिशीथ	१५२८	८
१७.	चन्द्रप्रज्ञप्ति	२१८	१०७	४०.	आवश्यक	९२	२१
१८.	जम्बूदीपप्रज्ञप्ति	३६५	१३१	४१.	ओघनिर्युक्ति	११६५	११६५
१९.	निरयावलिका	२१	–	४१.	पिण्डनिर्युक्ति	७१२	७१२
२०.	कल्पवतंसिका	५	१	४२.	दशवैकालिक	५४०	५१५
२१.	पुष्पिता	११	२	४३.	उत्तराध्ययन	१७३१	१६४०
२२.	पुष्पचूलिका	३	१	४४.	नन्दी	१६८	९३
२३.	वण्हिदशा	५	१	४५.	अनुयोगद्वार	३५०	१४१

નોંધ :- ઉક્ત ગાથા સંખ્યાનો સમાવેશ મૂલં માં થઈ જ જાય છે. તે મૂલ સિવાયની અલગ ગાથા સમજવી નહીં. મૂલ શબ્દ એ અમો સૂત્ર અને ગાથા બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. ગાથા બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—: અમારા પ્રકાશનો :—

[१] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[५] कृदन्तमाला
[६] चैत्यवन्दन पर्वमाला
[७] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[८] चैत्यवन्दन चोविशी
[९] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[१०] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ – ૧– શ્રાવક કર્તવ્ય – ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ – ૨– શ્રાવક કર્તવ્ય – ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ – ૩– શ્રાવક કર્તવ્ય – ૧૬ થી ૩૬
[૧૪] નવપદ – શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ – સૂત્ર – પદ્ય – આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ – બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ – બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો – [આવૃત્તિ – ચાર]
[૨૬] અભિનવ જૈન પંચાંગ – ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા – અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[४२]	आयारो	[आगमसुत्ताणि-१]	पढमं अंगसुत्तं
[४३]	सूयगडो	[आगमसुत्ताणि-२]	बीअं अंगसुत्तं
[४४]	ठाणं	[आगमसुत्ताणि-३]	तइयं अंगसुत्तं
[४५]	समवाओ	[आगमसुत्ताणि-४]	चउत्थं अंगसुत्तं
[४६]	विवाहपन्नति	[आगमसुत्ताणि-५]	पंचमं अंगसुत्तं
[४७]	नायाधम्मकहाओ	[आगमसुत्ताणि-६]	छट्ठं अंगसुत्तं
[४८]	उवासगदसाओ	[आगमसुत्ताणि-७]	सत्तमं अंगसुत्तं
[४९]	अंतगडदसाओ	[आगमसुत्ताणि-८]	अट्ठमं अंगसुत्तं
[५०]	अनुत्तोववाइयदसाओ	[आगमसुत्ताणि-९]	नवमं अंगसुत्तं
[५१]	पण्हावागरणं	[आगमसुत्ताणि-१०]	दसमं अंगसुत्तं
[५२]	विवागसूयं	[आगमसुत्ताणि-११]	एक्करसमं अंगसुत्तं
[५३]	उववाइयं	[आगमसुत्ताणि-१२]	पढमं उवंगसुत्तं
[५४]	रायप्पसेणियं	[आगमसुत्ताणि-१३]	बीअं उवंगसुत्तं
[५५]	जीवाजीवाभिगमं	[आगमसुत्ताणि-१४]	तइयं उवंगसुत्तं
[५६]	पन्नवणासुत्तं	[आगमसुत्ताणि-१५]	चउत्थं उवंगसुत्तं
[५७]	सूरपन्नतिः	[आगमसुत्ताणि-१६]	पंचमं उवंगसुत्तं
[५८]	चंदपन्नत्तिः	[आगमसुत्ताणि-१७]	छट्ठं उवंगसुत्तं
[५९]	जंबूद्दीवपन्नति	[आगमसुत्ताणि-१८]	सत्तमं उवंगसुत्तं
[६०]	निरयावलियाणं	[आगमसुत्ताणि-१९]	अट्ठमं उवंगसुत्तं
[६१]	कप्पवडिंसियाणं	[आगमसुत्ताणि-२०]	नवमं उवंगसुत्तं
[६२]	पुप्फियाणं	[आगमसुत्ताणि-२१]	दसमं उवंगसुत्तं
[६३]	पुप्फचूलियाणं	[आगमसुत्ताणि-२२]	एक्करसमं उवंगसुत्तं
[६४]	वण्हिदसाणं	[आगमसुत्ताणि-२३]	बारसमं उवंगसुत्तं
[६५]	चउसरणं	[आगमसुत्ताणि-२४]	पढमं पईण्णगं
[६६]	आउरपच्चक्खाणं	[आगमसुत्ताणि-२५]	बीअं पईण्णगं
[६७]	महापच्चक्खाणं	[आगमसुत्ताणि-२६]	तीइयं पईण्णगं
[६८]	भत्तपरिण्णा	[आगमसुत्ताणि-२७]	चउत्थं पईण्णगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६९]	तंदुलवेयालियं	[आगमसुत्ताणि-२८]	पंचमं पईण्णगं
[७०]	संथारगं	[आगमसुत्ताणि-२९]	छट्ठं पईण्णगं
[७१]	गच्छायार	[आगमसुत्ताणि-३०/१]	सत्तमं पईण्णगं-१
[७२]	चंदावेज्झयं	[आगमसुत्ताणि-३०/२]	सत्तमं पईण्णगं-२
[७३]	गणिविज्जा	[आगमसुत्ताणि-३१]	अट्ठमं पईण्णगं
[७४]	देविंदत्थओ	[आगमसुत्ताणि-३२]	नवमं पईण्णगं
[७५]	मरणसमाहि	[आगमसुत्ताणि-३३/१]	दसमं पईण्णगं-१
[७६]	वीरत्थव	[आगमसुत्ताणि-३३/२]	दसमं पईण्णगं-२
[७७]	निसीह	[आगमसुत्ताणि-३४]	पढमं छेयसुत्तं
[७८]	बुहत्कप्पो	[आगमसुत्ताणि-३५]	बीअं छेयसुत्तं
[७९]	ववहार	[आगमसुत्ताणि-३६]	तइयं छेयसुत्तं
[८०]	दसासुयक्खंधं	[आगमसुत्ताणि-३७]	चउत्थं छेयसुत्तं
[८१]	जीयकप्पो	[आगमसुत्ताणि-३८/१]	पंचमं छेयसुत्तं-१
[८२]	पंचकप्पभास	[आगमसुत्ताणि-३८/२]	पंचमं छेयसुत्तं-२
[८३]	महानिसीहं	[आगमसुत्ताणि-३९]	छट्ठं छेयसुत्तं
[८४]	आवसस्सयं	[आगमसुत्ताणि-४०]	पढमं मूलसुत्तं
[८५]	ओहनिज्जुत्ति	[आगमसुत्ताणि-४१/१]	बीअं मूलसुत्तं-१
[८६]	पिंडनिज्जुत्ति	[आगमसुत्ताणि-४१/२]	बीअं मूलसुत्तं-२
[८७]	दसवेयालियं	[आगमसुत्ताणि-४२]	तइयं मुलसुत्तं
[८८]	उतरज्झयणं	[आगमसुत्ताणि-४३]	चउत्थं मूलसुत्तं
[८९]	नंदीसूयं	[आगमसुत्ताणि-४४]	पढमा चूलिया
[९०]	अनुओगदारं	[आगमसुत्ताणि-४५]	बितिया चूलिया

પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[૯૧]	આયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	પહેલું અંગસૂત્ર
[૯૨]	સૂયગડ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	બીજું અંગસૂત્ર
[૯૩]	ઠાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ત્રીજું અંગસૂત્ર
[૯૪]	સમવાય -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ચોથું અંગસૂત્ર
[૯૫]	વિવાહપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૨]	પાંચમું અંગસૂત્ર
[૯૬]	નાયાધમ્મકહા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	છઠ્ઠું અંગસૂત્ર
[૯૭]	ઉવાસગદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	સાતમું અંગસૂત્ર
[૯૮]	અંતગડદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	આઠમું અંગસૂત્ર
[૯૯]	અનુત્તરોપપાતિકદસા-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	નવમું અંગસૂત્ર
[૧૦૦]	પણ્હાવાગરણ-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	દશમું અંગસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૦૧] વિવાગસૂય -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	અગિયારમું અંગસૂત્ર
[૧૦૨] ઉવવાઇય	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	પહેલું ઉપાંગસૂત્ર
[૧૦૩] રાયપ્પસેણિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	બીજું ઉપાંગસૂત્ર
[૧૦૪] જીવાજીવાભિગમ -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ત્રીજું ઉપાંગસૂત્ર
[૧૦૫] પન્નવણાસુત્ત	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ચોથું ઉપાંગસૂત્ર
[૧૦૬] સૂરપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	પાચમું ઉપાંગસૂત્ર
[૧૦૭] ચંદપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	છઠ્ઠું ઉપાંગસૂત્ર
[૧૦૮] જંબુદ્દીવપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	સાતમું ઉપાંગસૂત્ર
[૧૦૯] નિરયાવલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	આઠમું ઉપાંગસૂત્ર
[૧૧૦] કપ્પવડિંસિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	નવમું ઉપાંગસૂત્ર
[૧૧૧] પુપ્ફિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	દશમું ઉપાંગસૂત્ર
[૧૧૨] પુપ્ફચૂલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	અગિયારમું ઉપાંગસૂત્ર
[૧૧૩] વણ્હિદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	બારમું ઉપાંગસૂત્ર
[૧૧૪] ચઉસરણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલો પયન્નો
[૧૧૫] આઉરપ્પચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજો પયન્નો
[૧૧૬] મહાપચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજો પયન્નો
[૧૧૭] ભત્તપરિણ્ણા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથો પયન્નો
[૧૧૮] તંદુલવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમો પયન્નો
[૧૧૯] સંથારગ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠો પયન્નો
[૧૨૦] ગચ્છાચાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૧
[૧૨૧] ચંદાવેજ્ઝય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૨
[૧૨૨] ગણિવિજ્જા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	આઠમો પયન્નો
[૧૨૩] દેવિંદત્થઓ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	નવમો પયન્નો
[૧૨૪] વીરત્થવ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	દશમો પયન્નો
[૧૨૫] નિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલું છેદસૂત્ર
[૧૨૬] બુહતકપ્પ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજું છેદસૂત્ર
[૧૨૭] વવહાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજું છેદસૂત્ર
[૧૨૮] દસાસુયક્ખંધ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથું છેદસૂત્ર
[૧૨૯] જીયકપ્પો -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમું છેદસૂત્ર
[૧૩૦] મહાનિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠું છેદસૂત્ર
[૧૩૧] આવસ્સય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	પહેલું મૂલસુત્ર
[૧૩૨] ઓહનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૧
[૧૩૩] પિંડનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૨
[૧૩૪] દસવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	ત્રીજું મુલસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર
[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા
[૧૩૭] અનુયોગદ્વાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.

[૧૩૮] દીક્ષા યોગાદિ વિધિ
[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ
[१४०] आचाराङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१
[१४१] सूत्रकृताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-२
[१४२] स्थानाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-३
[१४३] समवायाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-४
[१४४] भगवतीअङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-५/६
[१४५] ज्ञाताधर्मकथाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४६] उपासकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४७] अन्तकृद्दशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४८] अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४९] प्रश्नव्याकरणाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१५०] विपाकश्रुताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५१] औपपातिकउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५२] राजप्रश्नियउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५३] जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-९
[१५४] प्रज्ञापनाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१०/११
[१५५] सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५६] चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५७] जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१३
[१५८] निरयावलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१५९] कल्पवतंसिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६०] पुष्पिताउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६१] पुष्पचूलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६२] वण्हिदसाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६३] चतुःशरणप्रकीर्णकसूत्र सटीकं आगमसुत्ताणि सटीकं-१४
[१६४] आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६५] महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६६] भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६७]	तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६८]	संस्तारकप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१६९]	गच्छाचारप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१७०]	गणिविद्याप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७१]	देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७२]	मरणसमाधिप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७३]	निशीथछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१५-१६-१७
[१७४]	बृहत्कल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१८-१९-२०
[१७५]	व्यवहारछेदसूत्रं सटीकं	आगगम सुत्ताणि सटीकं-२१-२२
[१७६]	दशाश्रुतस्कन्धछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७७]	जीतकल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७८]	महानिशीथसूत्रं (मूलं)	आगमसुत्ताणि सटीकं-२३
[१७९]	आवश्यकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२४-२५
[१८०]	ओघनिर्युक्तिमूलसूत्रं सटीकं	आगम सुत्तामि सटीकं-२६
[१८१]	पिण्डनिर्युक्तिमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२६
[१८२]	दशवैकालिकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२७
[१८३]	उत्तराध्ययनमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२८-२९
[१८४]	नन्दी-चूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०
[१८५]	अनुयोगद्वारचूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०

પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

–: સંપર્ક સ્થળ :–

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

आगमसुत्ताणि	समाविष्टाआगमाः
भाग-१	आयार
भाग-२	सूत्रकृत
भाग-३	स्थान
भाग-४	समवाय
भाग-५-६	भगवती (अपरनाम व्याख्याप्रज्ञप्ति)
भाग-७	ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण
भाग-८	विपाकश्रुत, औपपातिक, राजप्रश्निय
भाग-९	जीवाजीवाभिगम
भाग-१०-११	प्रज्ञापना
भाग-१२	सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति
भाग-१३	जम्बूद्वीपप्रज्ञप्ति
भाग-१४	निरयावलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चातुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा. तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि
भाग-१५-१६-१७	नीशीथ
भाग-१८-१९-२०	बृहत्कल्प
भाग-२१-२२	व्यवहार
भाग-२३	दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ
भाग-२४-२५	आवश्यक
भाग-२६	ओघनिर्युक्ति, पिण्डनिर्युक्ति
भाग-२७	दशवैकालिक
भाग-२८-२९	उत्तराध्ययन
भाग-३०	नन्दी, अनुयोगद्वार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org